सुश्रुतसंहिता ।

महामति-डल्लनाचार्य्यकृत-निबन्धसंग्रहाख्य-टीका-सहिता

अस्याः प्रथमो भागः ।

सूत्र-निदान-शारीर-स्थानकल्पितः ।

कविराज-श्रीअविनाशचन्द्र-कविरत्नेन

अनुवादितः संशोधितश्च ।

সুশ্রুতসংহিতা ।

মহামতি ডল্লনাচার্য্য-কৃত টীকা সহিত ।

প্রথম ভাগ ।

সূত্রনিদানশারীর-স্থান-কল্পিত ।

কবিরাজ শ্রীঅবিনাশচন্দ্র কবিরত্ন কর্ত্তৃক

অনুবাদিত ও পরিশোধিত হইয়া

কলিকাতা কর্ণওয়ালিস্ ষ্ট্রীট্ ২০০সংখ্যক ভবন হইতে অনুবাদক কর্ত্তৃক

প্রকাশিত ।

কলিকাতা ।

শিমলাষ্ট্রীট্ ৫ নং জ্যোতিষপ্রকাশযন্ত্রালয়ে

শ্রীগোপালচন্দ্র ঘোষালদ্বারা মুদ্রিত ।

সন ১২৯১ সাল ।

মূল্য ৯৲ নয় টাকা মাত্র ।

উৎসর্গপত্র।

"একমপ্যক্ষরং যস্তু গুরুঃ শিষ্যে নিবেদিতম্।
পৃথিব্যাং নাস্তি তদ্দ্রব্যং যদ্দত্ত্বা সোহঋণী ভবেৎ ॥"

ভক্তিভাজন

শ্রীযুক্ত —বিরাজ কালী প্রসন্ন সেন গুপ্ত কবিরত্ন
মহোদয় পরম শ্রদ্ধাস্পদেষু।

মহাভাগ!

আপনি যে শিক্ষাবীজ আমাদের হৃদয়ক্ষেত্রে বপন করিয়াছিলেন, কেবলমাত্র আপনার সেই শিক্ষা ও সাহায্যবলেই ইতিপূর্ব্বে ...নিদান প্রভৃতি বৈদ্যকগ্রন্থের প্রচার করি। ... যে, সেই বলেই আজ্ আবা... সুশ্রুতগ্রন্থের প্রচারে ব্রতী হইলাম। আমাদের প্রতি আপনার যেরূপ অকৃত্রিম স্নেহ ও বাৎসল্য আছে, এবং আপনি আমাদের যেরূপ উপকার করিয়া আসিতেছেন, তাহাতে এই উপহার অকিঞ্চিৎকর মাত্র।

আপনার একান্ত বশম্বদ ছাত্র

অবিনাশ
ও
চন্দ্রকুমার

বিশেষ কারণ ছিল। কেননা আমাদের দেশে যদিও এই গ্রন্থের ডল্লনাচার্য্য প্রণীত নিবন্ধসংগ্রহ নামক সমগ্রটীকা এবং চক্রপাণিদত্তকৃত ভানুমতী নামক টীকার কিয়দংশ পাওয়া যায়, কিন্তু তাহা নিতান্তই ভ্রমপরিপূর্ণ। কাজেই অনেকের আন্তরিক ইচ্ছাসত্বেও ঐরূপ ভ্রমপূর্ণ ও অসংলগ্ন টীকা মুদ্রিত করিতে এপর্য্যন্ত কেহই সাহসী হন্ নাই। কিছু দিবস অতীত হইল, আমরা এই গ্রন্থের মুদ্রণকার্য্যে হস্তার্পণ করি, কিন্তু টীকাগুলি পূর্ব্বোক্তরূপ অসংলগ্নবোধ হওয়ায় উহার মুদ্রণেবিরত থাকিয়া বিশুদ্ধটীকা সংগ্রহের নিমিত্ত চেষ্টা করি। অধিক কি, এই টীকার জন্য আমরা স্বয়ং বম্বে ও বেনারসপ্রভৃতি নানা স্থানে পর্য্যটন করি, অত্যন্ত আহ্লাদের বিষয় এই যে, উক্ত দুইস্থানে বিশেষতঃ বম্বে উক্ত টীকার অনেকাংশ সংগৃহীত হওয়ায় এত দিনের পর আমাদের সেই আশা ফলবতী হওয়ার উপক্রম হইয়াছে।

এরূপ দুর্ব্বোধ অথচ বৃহৎ গ্রন্থের বঙ্গানুবাদ গুলি সাধারণের উপযোগী করিয়া মুদ্রিত করিতে হইলে বিচক্ষণ ও বহুদর্শী ডাক্তারের মত লওয়া আবশ্যক। সেইজন্য এইগ্রন্থের বঙ্গানুবাদ গুলি আধুনিক ডাক্তারী চিকিৎসার সহিত তুলনা করিয়া সর্ব্বসাধারণকে বুঝাইয়া দেওয়ার জন্য কলিকাতার বিখ্যাত ডাক্তার শ্রীযুক্ত বাবু অন্নদাচরণ খাস্তগির মহাশয় সাহায্য করিতে প্রস্তুত হওয়ায় ইহার বঙ্গানুবাদ যে সাধারণের বিশেষ উপকারে আসিবে, তাহার সম্পূর্ণ আশা করা যাইতে পারে।

পরিশেষে বক্তব্য এই যে, এই গ্রন্থ বা ইহার সদৃশ চরকাদিগ্রন্থের মুদ্রণকার্য্যে যেরূপ বহুল পরিশ্রম ও অর্থের প্রয়োজন, তাহা চিন্তা করিলে আর কিছুতেই ইহার মুদ্রণে সাহসই হয় না। বাস্তবিকও এই সমস্ত কার্য্য এতাদৃশ বহুল অর্থ-সাপেক্ষ ও পরিশ্রম-সাধ্য বলিয়াই সহসা ইহাতে কেহই হস্তার্পণ করিতে সাহসী হন্ না। অথবা অনেকে হস্তার্পণ করিয়াও ইহার পরিসমাপ্তি ও ফলপ্রাপ্তিবিষয়ে নিরাশ হইয়া থাকেন। তবে আমাদের দৃঢ়বিশ্বাস ও একান্ত ভরসা এই যে জেলা ২৪ পরগণার অন্তর্গত টাকীর সুবিখ্যাত দানশীল জমীদার শ্রীযুক্ত রায় সুরেন্দ্র নাথ চৌধুরী মহাশয় যখন আমাদের এই সুমহৎ কার্য্যের ব্যয়নির্ব্বাহ জন্য সাহায্য করিতে প্রস্তুত আছেন, তখন কার্য্যটি নির্ব্বিঘ্নে সম্পন্ন হওয়ারই সম্পূর্ণ সম্ভাবনা। বস্তুতঃ এই মহৎ ব্যাপারে উক্ত জমীদারের ন্যায় ধনশালী জমীদার মহাশয়ের আর্থিক সাহায্য না পাইলে

ভূমিকা।

দেশীয় লোকের পক্ষে দেশীয় চিকিৎসাই সর্ব্বথা প্রশস্ত। এই বিষয়ে সাধারণের ধারণা ও বিশ্বাস ক্রমে বদ্ধমূল হইতে দেখিয়া আজকাল আমাদের দেশের অনেক লোকেই বৈদ্য চিকিৎসার উন্নতির জন্য চেষ্টা করিতে আরম্ভ করিয়াছেন। বাস্তবিকও বহুলচিন্তা এবং পরীক্ষাদ্বারা সূক্ষ্ম দৃষ্টিতে বিবেচনা করিয়া দেখিলে উষ্ণপ্রধান ভারতবাসীর পক্ষে ইউরোপীয় অতি তীক্ষ্ণবীর্য্য ঔষধের অপেক্ষা ভারতীয় মৃদুবীর্য্য ঔষধই যে সর্ব্বথা শ্রেয়স্কর, তাহা অনেক রকমেই প্রতিপন্ন করা যাইতে পারে। যাহা হউক, দিন দিন আয়ুর্ব্বেদের অনেক অনেক পুরাতন গ্রন্থের সংস্করণ ও মুদ্রণপ্রভৃতি দ্বারা ইহার ভাবী উন্নতির পথ যে, ক্রমশই পরিষ্কার হইয়া আসিতেছে, তাহা বোধহয় কেহই অস্বীকার করিবেন না। আয়ুর্ব্বেদশাস্ত্রের রাশি রাশি গ্রন্থ থাকিলেও চরক ও সুশ্রুত, এই দুইখানিই সর্ব্বপ্রধান গ্রন্থ। তন্মধ্যে চরক, কায়চিকিৎসার (যাহাতে জ্বর অতীসারাদি শারীরিক পীড়ার বিষয় বর্ণিত আছে) এবং সুশ্রুত অস্ত্র চিকিৎসার প্রধানতম গ্রন্থ। প্রায় তিন বৎসর অতীত হইল, আমরা সাধ্যমত যত্ন ও পরিশ্রম করিয়া মূল ও বঙ্গানুবাদ সহিত সমগ্র চরকসংহিতা এবং মাধব নিদান প্রচার করি। বিশেষ আহ্লাদের বিষয় এই যে, আমাদের কর্ত্তৃক অনুবাদিত চরকসংহিতা ও মাধবনিদান সমাজে আদৃত হওয়ায় আমরা সেই পরিশ্রম কতকটা সফলবোধ করিয়াছি। বলা বাহুল্য যে, সাধারণের সেই উৎসাহবলেই আজ আবার টীকা ও বঙ্গানুবাদ সহিত সুশ্রুত গ্রন্থখানির প্রচারে ব্রতী হইলাম। সুশ্রুত অতি দুর্ব্বোধ ও জটিল গ্রন্থ। যদিও মূল গ্রন্থ ২ ৩ বার মুদ্রিত হইয়াছে, কিন্তু তাহা আশানুরূপ বিশুদ্ধ না হওয়ায় তদ্দ্বারা অধ্যয়নাদির নিতান্ত অসুবিধা ঘটে। বিশেষতঃ টীকার সাহায্য ভিন্ন এই গ্রন্থের অধ্যয়ন বা অধ্যাপনাকার্য্য সুচারুরূপে হওয়াই দুষ্কর। কিন্তু অত্যন্ত দুঃখের বিষয় এই যে, টীকার এতদূর আবশ্যকতা এবং এতকাল হইতে মুদ্রযন্ত্রের আবিষ্কারসত্ত্বেও কোন মহাত্মাই এপর্য্যন্ত এই সর্ব্বজনহিতকর অথচ দুরূহকার্য্যে হস্তার্পণ করেন নাই। না করিবারও

আমরা ইহাতে হস্তার্পণ করিতেও সাহসী হইতাম না। যাহা হউক, এস্থলে ইহাও বলা আবশ্যক যে, যেমন যতীন্দ্র বাবুর যত্ন ও আর্থিক সাহায্য দ্বারা "চিকিৎসাসম্মিলনী" পত্রিকাখানির জীবনপ্রদীপ ক্রমেই উদ্দীপ্ত হইয়া উঠিতেছে, আশা করি, তাঁহার জ্যেষ্ঠভ্রাতা শ্রীযুক্ত সুরেন্দ্র বাবুর যত্ন ও আর্থিক সাহায্যে সুশ্রুত গ্রন্থখানি সাধারণে নির্ব্বিঘ্নে প্রচারিত হইয়াও ঠিক্ সেইরূপ মহোপকার সাধন করিবেক। কিন্তু কেবল একজন লোকের সাহায্যের প্রতি সম্পূর্ণ নির্ভর করিয়া এরূপ বৃহৎ কার্য্যের পরিসমাপ্তির আশা করা উচিত নহে। কেন না সাধারণের অত্যাবশ্যকীয় বিষয়ে সাধারণেরই সহানুভূতি প্রদান করা একান্ত কর্ত্তব্য। সেইজন্য দেশহিতৈষী বিদ্যানুরাগী মহাত্মাগণের নিকট আমাদের বিনীত নিবেদন এই যে, সুরেন্দ্র বাবুর ন্যায় আপনারাও সকলে আমাদের প্রস্তাবিত কার্য্যে যথাসাধ্য উৎসাহ ও সাহায্য প্রদান করিয়া বীর্য্যহীন, ক্রিয়াহীন ও মৃতপ্রায় আয়ুর্ব্বেদশাস্ত্রের পুনরুদ্ধারে যত্নবান্ হন।

পরন্তু সুশ্রুতের ভূমিকা সম্বন্ধে আমাদের আরও অনেক কথা বলিবার আছে। কারণ সুশ্রুত গ্রন্থের প্রণেতা ও উহার টীকাকার প্রভৃতির ঐতিহাসিক বৃত্তান্ত এবং গ্রন্থের আমূলবৃত্তান্ত জানিতে অনেকের স্বতই বাসনা হইয়া থাকে। যাহাহউক, স্থানাভাব বশত এখন আর আমরা এই সমস্ত বিষয়ের বিস্তৃত বিবরণ বিবৃত করিতে পারিলাম না। ঈশ্বর কৃপায় সুশ্রুত গ্রন্থের মুদ্রণকার্য্য সমাপ্ত হইলে অবশ্যই আমরা পাঠকগণের কৌতূহল নিবারণার্থে উহার বিস্তৃত বিবরণ বিবৃত করিব।

কলিকাতা
১২৯' । ৩রা ফাল্গুন।

শ্রীঅবিনাশ চন্দ্র কবিরত্ন
কবিরাজ শ্রীচন্দ্রকুমার গুপ্ত

भूमिका ।

इह खलु सर्व्वायुर्व्वेदशास्त्राणां सारभूते वीजभूते च कायचिकित्सामधिकृत्य चरकप्रतिसंस्कृतं चरकनामधेयमस्त्रचिकित्सामधिकृत्य नागार्ज्जुनप्रतिसंस्कृतं सुश्रुतनामधेयं द्वे तन्त्रे। तत्र प्रायेण त्रीणि वर्षाण्यतीतानि मया कथमपि बहुना व्ययेन मत्कृत-वङ्गानुवादेन सह मुद्रितस्य चरकप्रतिसंस्कृततन्त्रस्य। तेन सानुवादमुद्रितेन चरकतन्त्रेण वङ्गदेशे सर्व्वत्रादरातिशयेन गृहीतेन सफलीकृतेऽपि मे श्रमे वङ्गाक्षरमुद्रिततया केवलं वङ्गवासिनामेव उपयोगितामर्हति। न तु सर्व्वेषां भारतवासिनामेव मन्येषाञ्चा। तेन च वङ्गवासिनामुत्साहेन वलीयानिदानीमहं सर्व्वेषां भारतवासिनां अन्येषाञ्च वैदेशिकानामुपयोगमन्यमानः बहुपरिश्रमपुरःसरं पर्य्यटनमङ्गीकृत्य वम्बाइ वाराणसी प्रभृतिभ्य स्थानेभ्य सुश्रुताख्यमपरतन्त्रं टीकया सह संगृह्य परमवन्धुवरेण पण्डित श्रीयुक्त चन्द्रकुमार कविराजेन सह मिलित्वा टीकया अधुना केवल वङ्गानुवादेन च सहितमुक्तं सुश्रुताभिधानं तन्त्रं देवनागराक्षरैर्मुद्रयित्वा खण्डशः प्रचारयितुं प्रवृत्तः। तच्च तन्त्रमति दुर्व्वोधं, अस्य प्रचारं बहुव्ययं अमञ्चापेक्ष्यमाणमवेक्ष्य न कथमपि तत् प्रचारयितुमस्माकमाशा साहसञ्चापि भवितुमर्हति। यत् सत्यं, ईदृशं बहुव्ययापेक्षिं अमसाध्यञ्च कार्य्यमवलोक्य न केनाप्यतं हस्तमर्पयितुं साहसञ्चा कर्त्तुं शक्यते, केचित्त, हस्तमर्पयित्वापि तत् समाप्तिं गमयितुं फलेन च योजयितुमसमर्था निराशाः प्रतिनिवर्त्तन्ते। अस्माकन्तु चतुर्व्विंशतिपरगणान्तर्गत--टाकीग्रामनिवासि-महानुभाव-सुविख्यात-दानशील-भूम्यधिकारिश्रीयुक्त वाबु राय सुरेन्द्रनाथ चतुर्धूरिणानां सुमहत् साहाय्यमस्य परिसमाप्तिं प्रति सुदृढ़ं प्रत्ययमादधाति। तेन साहाय्यबलेन कार्य्यारम्भं प्रति प्रवर्त्तिता वयं। परन्तु न कोऽपि एकाकी ईदृशस्य साधारण-हितकरकार्य्यस्य सुदुर्व्वहं भारं वोढ़ं समर्थो भवति। समर्थेनापि

नैकेन वाहयितुं युज्यते। यत आवश्यकतया सर्व्वेषामेवेदं परमोपकारि कार्य्यं सहानुभूतिमपेक्षते। अथ विद्यानुरागिणां देशहितैषिवराणां राज्ञां महाराजानाञ्चात्र प्रस्तुतविषये सकृपं कटाक्षपातः स्यात्, तर्हि निर्व्विघ्नेनास्य परिसमाप्तिमालोक्य फलवत्यस्माकमाशा सम्पत्स्यते। अधुना सविनयनिवेदनं यत् श्रीयुक्त-राय-सुरेन्द्रनाथ चतुर्धूरिणेमहाशयेन यथा सर्व्वैरपि यावच्छक्य-मुत्साहमानुकूल्यञ्च वितीर्य्येत्र वीर्य्यहीनं निस्पन्दप्रायमायुर्व्वेदशास्त्रं पुन-रुज्जीवयितुमाधीयतां यत्नः।

चरकसंहितानुवादक—चिकित्सासम्मिलनी सम्पादकस्य

कविराज श्रीअविनाश चन्द्र कविरत्नः।

Preface.

After a continuous labour extending over a period of more than three years, we were able, year before last, to complete a full translation of two of the most important works on Hindu medicine, namely, Charak Sanghita and Madhub Nidana into Bengali. The kind reception given by the press and the public at large of these works, emboldens us to issue a similar translation of Susruta (the only best and important work on Hindu Surgery), with this difference, that the text and the notes are to be printed in Deva Nagri character, so that the work may be not only read in Bengal, but in other places in India, and even out of it, whereever Sanscrit language is read and appreciated. At first the hope of this undertaking was very small, as the notes on the work available here, are far from satisfactory, being not very clear and perfect. We were therefore obliged to travel over the Northwestern provinces and Bombay to secure full notes on the work, and we are glad to say that our labours in this respect have met with success. With the aid of the notes thus collected, we now intend to publish the work in monthly parts with full notes and translations. An undertaking of so gigantic nature, would not have been ventured by us unless our philanthropic Countryman, Roy Surendra Nath Chowdri, Zemindar of Taki in 24-Perghs, had with his usual liberality come forward to pay the expenses of the publication at the outset. We now earnestly hope that the learned public and others philanthropic noblemen would lend similar aid as has been given by Baboo Surendra Nath in bringing the work to a successful termination.—

CALCUTTA;
The 8th February 1885.

Abinash Chunder Kabiratnya.
Chunder Coomar Goopta.

सुश्रुतसंहिता।

सूत्रस्थानं

प्रथमोऽध्यायः।

नमो ब्रह्मप्रजापत्यश्विबलभिद्धन्वन्तरिसुश्रुतप्रभृतिभ्यः।

अथातो वेदोत्पत्तिं नामाध्यायं व्याख्यास्यामः। यथोवाच भगवान् धन्वन्तरिः सुश्रुताय॥१॥

सहस्राचं गुणाधीशं स्वगुरुञ्च सरस्वतीम्।
जनकं जनयित्रीञ्च शास्त्रादौ प्रणमाम्यहं।

समस्तजनपद-तिलक-कल्प-श्रीभादालकदेशे नगरीवर-मथुरा-समीपे अङ्कोलानामकं वैद्यस्थानमस्ति। यत्र सौरवंशजा ब्राह्मणाः समस्त-भूमिपतिमान्या अश्विनीकुमार-समानाः पार्व्वण-चन्द्र-रुचियशःप्रसाधित-दिङ्मण्डला वैद्या अभूवन्। तदन्वये गोविन्द-नामा चिकित्सक-शिरोमणिरभूत्। ततस्तत्पुत्रो भिषक्शिरोमुकुटमणिर्जयपालः समजनि। तत्तनयश्च समस्त-शास्त्रार्थ-तत्त्वज्ञो भरतपालः सञ्जातः। तत्पुत्रः स्वकुलनभस्तलचन्द्रमा विवेक-वृहस्पतिः श्रीसहणपालदेव-नृपति-वल्लभः श्रीडल्लनः समभूत्। तेन श्रीजैज्झटं टीकाकारं श्रीगयदास-भास्करौ च पञ्जिकाकारौ श्रीमाधव-ब्रह्मदेवादीन् टिप्पनककारांश्चोपजीव्यायुर्व्वेदशास्त्र-सुश्रुत-व्याख्यानाय निबन्धसंग्रहः क्रियते। यद्यपि सुश्रुतोपरि जैज्झटादिभिः टीका रचिता, तथापि तस्याः कुशाग्रीयधियामभिगम्यत्वात् अल्पमेधसामनुग्रहाय सुश्रुतं व्याख्यातु-कामस्य मम प्रयासः सफलः।

अथात इत्यादि। ननु कतरत् सूत्रमिदं? चतुर्बिधानि हि सूत्राणि भवन्ति। तद्यथा;—प्रतिसंस्कर्त्तृसूत्रं, एकीयसूत्रं, शिष्यसूत्रं, गुरुसूत्रञ्चेति। इह प्रतिसंस्कर्त्तृसूत्रं नास्तेत्येतेतरे। अन्ये त्वस्तीति भाषन्ते। यथाच तदस्ति तथैव नैकटेन कथयिष्यामः। एकीयसूत्रं यथा,—तत्र लोहित-कपिल-

पाण्डु-पीत-नील-शुक्ले पुवनिप्रदेशेषु मधुराम्ल-लवण-कटु-तिक्त-कषायाणि यथासंख्यमुदकानि भवन्तीतेत्रके भाषन्ते। इत्येकीयसूत्रम्। शिष्यसूत्रं यथा,—वायोः प्रकृतिभूतस्य व्यापन्नस्य च कोपनैः स्थानं कर्म्म च रोगांश्च वदस्व वदतां वर! इतिशिष्यसूत्रम्। गुरुसूत्रं यथा,—देहे विचरतस्तस्य लचणानि निवोध मे, इतिगुरुसूत्रं। इति सूत्रानेकत्वात् कथेदं सूत्रम्? उच्यते—गुरोरेवैतत् सूत्रं, शिष्येण ग्रन्थं चिकीर्षता लिखितम्। अन्ये तु शिष्यस्यैवेदं सूत्रमित्याहुः। स तु आत्मशिष्येषु धन्वन्तरि-प्रशिष्येषु प्रतिज्ञां कृतवान्। तन्नेच्छति गयी। किमेतत् स्वकपोलकल्पितं सुश्रुतेनोक्तम्? अथवा यथैव गुरुणोदीरितमिति दृष्टः प्रतिसंस्कर्त्ता सुश्रुतमुखेनेदमाह यथोवाच भगवान् धन्वन्तरिरिति। इदं प्रतिसंस्कर्तृसूत्रम्। यत्र यत्र परोक्षे नियोगस्तत्र तत्रैव प्रतिसंस्कर्तृसूत्रं ज्ञातव्यमिति। प्रतिसंस्कर्त्तापीह नागार्जुन एव। अथशब्दोऽनन्तरार्थ एव। अतोयुष्मत्तन्त्रोपदेशकामित्वादनन्तरम्। वेदोत्पत्तिमिति अस्यादौ आयुःशब्दो लुप्तोऽयस्तेनायुर्व्वेदोत्पत्तिमिति। उत्पत्तिरत्राभिव्यक्तिः नतु अभूतप्रादुर्भावः। अधीयन्तेऽस्मिन्नर्था इत्याध्यायः। व्याख्यास्याम इति वि विशेषः, आङ्-अभिव्याप्तौ, व्याख्यास्यामः कथयिष्यामः। अन्येतु अथशब्दः शिष्यप्रश्नानन्तरार्थः, अतःशब्दो हेत्वर्थः। यत एते शिष्याः प्रजाहितार्थमायुर्व्वेदं गुरुं पप्रच्छुः। वि-विविधप्रकारे आङ्-आभिमुख्ये, शेषं समम्; एतेनातः शल्यतन्त्रोपदेशकामित्वादनन्तरमायुर्व्वेदाभिव्यक्तिमधिकृत्य कृतोऽध्यायस्तम्। विशेषाभिव्याप्त्या प्रकथयिष्यामः। द्वितीयव्याख्यानपक्षेऽपि इदं योजनीयम्। यथोवाच भगवान् धन्वन्तरिरिति;—यथोवाच इति यादृक् उक्तवान्। समस्तैश्वर्य्य-माहात्म्य-यशः—श्रीकामार्यप्रसन्नैर्युक्तोभगवानुच्यते। अन्ये तु ज्ञानातिशयवान् पुरुषातिशयो भगवान्; अपरे तु अष्टगुणैश्वर्य्यवानेवात्र भगवानुच्यते। अथात इत्यादिकं प्रतिज्ञासूत्रम्। यद्यपि अध्यायादौ लिखितं तथापि वत्स सुश्रुत इत्यनन्तरं द्रष्टव्यं। अन्ये तु अध्याप्याश्च भवन्तो वत्सा इत्यनन्तरं पठन्ति। तन्नेच्छति गयी। अत्र केचिद्वेदोत्पत्तिनामाध्यायमिति पठन्ति॥ १॥

अथ खलु भगवन्तममरवरमृषिगण-परिवृतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनव-वैतरणौरभ्र-पौष्कलावत करवीर्य्य-गोपुररक्षित-सुश्रुतप्रभृतय ऊचुः ॥ २ ॥

भगवन्! शारीरमानसागन्तुस्वाभाविकैर्व्याधिभिर्व्विविध-वेदनाभिघातोपद्रुतान् सनाथानप्यनाथवद्विचेष्टमानान्

अथेति मङ्गलार्थः। तत्त्, श्रोतृव्याख्यात्रोः क्रियाफलसिद्धिं कथयति। खलु वाक्यशोभार्थः। अन्ये तु निश्चयार्थः। अमरवरं देवश्रेष्ठं पूर्व्व-जन्मामृतोद्धरणात्। अन्ये ब्रह्मणोऽवतारत्वात्। ऋषिगणपरिवृतं देवर्षि-ब्रह्मर्षि-राजर्षिसमूहैर्वेष्टितं तपोज्ञानवाङ्कल्यादुपादेयवाक्यत्वाच्च। आश्र-मस्थं वानप्रस्थाश्रमस्थं। एतेन राज्यचिन्तापरित्यागादनाकुलितचित्तत्वं सूचितं राजर्षित्वञ्च। काशिराजं वारानसीजनपद-नृपतिं। काशि-राजस्य निर्वाणपदाभिलाषित्वात्। कृत्रिमपुत्रत्वमापन्नमिति काशिराजं। काशीराजानामनेकत्वात् विशेषणमाह दिवोदासं। दिव्शब्देनात्र तत् स्थानदेवाः कथ्यन्ते। तैः पूजाकाम्यया सम्प्रदीयते यस्मै स दिवोदासः तं तथा। अन्ये तु दासयति कर्म्माणि यत्नेन करोतीति दासः। दिवः स्वर्गस्यदासो दिवोदासस्तं। सर्व्वजनप्रसिद्धं विशेषणमाह धन्वन्तरिमिति।—धन्व शल्य-शास्त्रं, तस्य अन्तं पारं इयर्त्ति गच्छतीति धन्वन्तरिः (धन्वन्-अन्त-ऋ + इ) तम्। अपरा व्युत्पत्तिर्विस्तारभयान्न लिखिता। औपधेनवादयः सुश्रुतान्ताः सप्तशिष्या ऊचुः उक्तवन्तः। प्रभृतिशब्देन भोजादयः। अन्ये तु गोपुरो रक्षित इति नामद्वयं मन्यन्ते, इत्यौपधेनवादयोऽष्टौ। प्रभृतिग्रहणात् निमि-काङ्कायन-गार्ग्य-गालवा इति। एवमेते द्वादशशिष्याः प्राज्ञः। ननु प्रश्न-कर्त्तृकतया सुश्रुतस्य मुख्यत्वादादावस्यनामग्रहणमुचितं स्यात्, कथमौप-धेनवादीनां? मान्यादादावुक्तानि। सत्यं, देवर्षयस्तु राजर्षीणां पूज्या इति न दोषः ॥ २ ॥

ऋषयस्ते तं काशिराजं प्रति किमुचुरित्याह,—भगवन्नित्यादि। भगव-न्निति सम्बोधने। तत्र शारीरा वातादिवैषम्यनिमित्ताः, मानसा रजस्तमः-

विक्रोशतश्च मानवानभिसमीक्ष्य मनसि नः पीड़ा भवति, तेषां सुखैषिणां रोगोपशमार्थमात्मनः प्राणयात्रार्थञ्च प्रजाहितहेतोरायुर्व्वेदं श्रोतुमिच्छाम इहोपदिश्यमानं। अत्रायत्तमैहिकमामुष्मिकञ्च श्रेयः। तद्भगवन्तमुपपन्नाः स्मः शिष्यत्वेनेति ॥ ३ ॥

तानुवाच भगवान् स्वागतं वः। सर्व्व एवामीमांस्या अध्याप्याश्च भवन्तो वत्साः ॥ ४ ॥

सम्भूता:कामादयः, आगन्तवो व्याघ्रादिकृताः शस्त्रादिकृताश्च, स्वाभाविकानामग्रे अग्रहणमस्मिन् शास्त्रे तत् प्रतीकारस्याप्राधान्यसूचनार्थं। अथवात्मनश्च प्राणयात्रार्थमित्यत्रैवाववोधाच्च। ऋषीणाञ्च शारीर-मानसागन्तुव्याधिसम्भवात् केवलं स्वभावव्याधिनिषेधेनैव प्राणयात्राभिप्रेता। उपद्रुतान् उपसृष्टान्, सनाथानपि समित्रादिकानपि, अनाथवत् एकाकिजनवत्, विचेष्टमानान् क्रियाविरहां कुर्व्वाणान्। तेनायुर्व्वेदं विना मित्रादयोऽप्यनर्थका इति। विक्रोशतश्च विशेषादार्त्तस्वरैरुदतः। नः अस्माकं, आत्मनश्च प्राणयात्रार्थं प्राणानामग्निसोमादीनां, यात्रार्थं व्यवहारार्थं स्वस्थवृत्तानुवर्त्तनार्थं। अत्र केचित् आत्मप्रजाहितहेतोरिति पठन्ति। उपदिश्यमानं संक्षेपतः कथ्यमानं। तत्रायुर्व्वेदोपदेशे आयत्तमधीनं, ऐहिकमिहलोके भवं, आमुष्मिकं परलोकभवं, श्रेयः कल्याणलाभः। अर्थकामौ मित्रादिलाभो यशश्च ऐहिकं श्रेयः, स्वर्गादिविशिष्टजन्मान्तरज्ञानादयश्च आमुष्मिकं श्रेयःअमरत्वञ्च। तदिति हेतौ, यस्मादायुश्चादायुर्व्वेदोपदेशाद्द्विविधं श्रेयः आयत्तं, तस्मात् उपपन्नाःस्मः समीपागताःस्मः। शिष्यत्वेन छात्रभावेन ॥ ३ ॥

तेषां औपधेनवादीनां समीपगतानां काशीराजेन किं कृतमित्याह,—स्वागतमिति। स्वागतं शोभनमागतं, वः युष्माकं, अमीमांस्याः अविचारणीयाः प्रसिद्धजात्यादित्वात्। अध्याप्याश्च अध्यापनार्हाश्च। वत्सा इति पक्षपातातिशयत्वं सूचकं सम्बोधनं। अथवा वत्साः

इह खल्वायुर्वेदो नाम यदुपाङ्गमथर्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान् स्वयम्भूः। ततोऽल्पायुष्ट्वमल्पमेधस्त्वञ्चावलोक्य नराणां भूयोऽष्टधा प्रणीतवान् ॥ ५ ॥

तद्यथा ।—शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति ॥६॥

प्रथमवयसो गवां पुत्राः वत्सादिव वत्साः । अनेन विशेषणेन प्रथमवयस्त्वं पुत्रसादृश्यदमनीयत्वं वा सूचयति ॥ ४ ॥

इदानीमायुर्वेदस्य सामान्यलक्षणं दर्शयन्नाह,—इह खल्वित्यादि। इह खल्विति वाक्यालङ्कारे, वक्ष्यमाणं वाक्यमलङ्करोति। अन्ये तु इह मयि सूत्रकारे, खलु एवार्थः। एतेन मयि एव आयुर्वेदोऽष्टाङ्गः नान्येषु सूत्रकारेषु, अन्येषामेकस्यैवाङ्गस्य प्रणेतृत्वात् ।इहेति वाक्योपक्रमे,खलु सम्बोधने इत्यपरे। उपाङ्गमङ्गमेवान्यत्वात् उपाङ्गं। तद्यथा,—देहस्य बाहू जङ्घे शिरः इत्यङ्गानि, करचरणनासिकादीनि उपाङ्गानि, एतेन उपाङ्गमित्युक्तं। उपाङ्गमङ्गसमीपमित्येके। अनुत्पाद्यैव प्रजाः लोकस्रष्टेः प्राक्, आयुर्वेदं प्रदर्श्य प्रजाः पश्चात् स्रष्टवानित्यर्थः। कृतवान् संस्कृतवान् । नतु पूर्व्वमुत्पादितवान् । कुतः ? नित्यत्वात्। स्वयम्भूर्ब्रह्मा। ततः प्राक्तनकरणादनन्तरं, अधर्म्मप्रवृत्तौ सत्यामल्पायुष्ट्वमल्पजीवितत्वम्, अल्पमेधस्त्वं स्वल्पबुद्धित्वं, भूयः पुनः, अष्टधा अष्टभिः प्रकारैः ॥ ५ ॥

अथ के अष्टौ प्रकारा इत्याह,—तद्यथेति । शल्याहरणप्रधानं तन्त्रं शल्यतन्त्रं। शलाकायाः कर्म्म शालाक्यमेतत् प्रधानं तन्त्रमपि शालाक्यम्। कायोऽन्तराग्निरुच्यते तस्यचिकित्सा कायचिकित्सा, अथवा कायो देहस्तस्य चिकित्सा कायचिकित्सा । भूतानि देवासुरगन्धर्व्व-यक्ष-रक्षः-पितृ-नाग-पिशाचा अष्टौ, तानि वेत्ति अनया इति भूतविद्या ; अथवा भूतावेशापाकरणार्था विद्या भूतविद्या। कुमारा बालाः, तेषां भृतिं भरणं पोषणञ्च भृता, तस्या इदं तन्त्रमिति कौमारभृत्यं। अगदो

अथास्य प्रत्यङ्गलक्षणसमासः ॥ ७ ॥

तत्र शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोह-लोष्ठास्थिबालनखपूयास्रावान्तर्गर्भशल्योद्धरणार्थं यन्त्रशस्त्र-क्षाराग्निप्रणिधानव्रणविनिश्चयार्थञ्च ॥ ८ ॥

विषप्रतीकारः, तदर्थं तन्त्रमगदतन्त्रं। अन्ये विषगरवैरोधिकसंप्रयोगो गदः, तस्याभावः अगदः, अगदाय तन्त्रमगदतन्त्रमित्याचक्षते। रसानां रसरक्तादीनामयनमाप्यायनं रसायनं तदर्थं तन्त्रं रसायणतन्त्रं। अथवा रसानां रसवीर्यविपाकादीनां आयुःप्रभृतिकारणानामयनं विशिष्टलाभोपायो रसायनं, तदर्थं तन्त्रं रसायनतन्त्रं। वाजीकरणतन्त्रमिति-येन नरः स्त्रीषु विषये वाजीव सामर्थ्यं प्राप्नोति तद्वाजीकरणं। येनात्यर्थं व्यज्यते स्त्रीषु तद्वाजीकरणं। अन्ये तु वाजनं वाजो वेगः प्रसरत्वात् शुक्रस्य, स विद्यते येषां ते वाजिनः, अवाजिनो वाजिनः क्रियन्तेऽनेनेति वाजीकरणं। अन्ये तु वाजिशब्देन शुक्रमभिधीयते, तेन शुक्ररहितस्य वाजी शुक्रं क्रियतेऽनेनेति वाजीकरणं, तदर्थं तन्त्रं वाजीकरणतन्त्रं। इति शब्दोऽष्टाङ्गपरि-समाप्तौ ॥ ६ ॥

अथेत्यानन्तर्य्ये। अस्येत्यायुर्व्वेदस्य प्रत्यङ्गलक्षण समासः एकमेक-मङ्गं प्रति लक्षणसंक्षेपः ॥ ७ ॥

किन्तदेकमङ्गं प्रतिलक्षणं संक्षेपेणेत्याह,—तत्र शल्यं नामेति। अत्र शल्यं नामेति केचित् पठन्ति, तत्र तेष्वङ्गेषु। नामशब्दः प्रतिपादने, शल्यं प्रतिपाद्यते कथ्यते इत्यर्थः। विविधतृणादीनां पूयास्रावान्तानां दुष्टव्रणस्यान्तर्मध्यादुद्धरणार्थमुद्धरणप्रयोजनं तथा गर्भशल्यस्यापि उद्धरणार्थ-मित्यग्रे षष्ठ्याविधानैरिति केचित् पठन्ति व्याख्यानयन्ति। अपतर्पणादि रक्षाविधानान्तैर्हि व्रणीयाक्तैरित्यर्थः। प्रणिधानार्थं निषेवणार्थं। न केवलं काष्ठतृणादि शल्यं, अतिप्रवृद्धं मलदोषजञ्च। "शरीरिणां स्थावरजङ्गमानां यत्किञ्चिदाबाधकरं शरीरे तत् सर्व्वमेव प्रवदन्ति शल्यम्।" ॥ ८ ॥

शालाक्यं नाम ऊर्द्ध्वजत्रुगतानां रोगाणां श्रवण-नयन-वदन-घ्राणादिसंश्रितानां व्याधीनामुपशमनार्थं ॥ ९ ॥

कायचिकित्सा नाम सर्व्वाङ्गसंसृतानां व्याधीनां ज्वरातीसाररक्तपित्तशोषोन्मादापस्मारकुष्ठमेहादीनामुपशमनार्थं ॥ १० ॥

भूतविद्या नाम देवासुरगन्धर्व्वयक्षरक्षःपितृपिशाच-नागग्रहाद्युपसृष्टचेतसां शान्तिकर्म्मबलिहरणादिग्रहोपशमनार्थं ॥ ११ ॥

कौमारभृत्यं नाम कुमारभरण-धात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थं ॥ १२ ॥

अगदतन्त्रं नाम सर्पकीटलूतावृश्चिकमूषिकादिदष्टविष-व्यञ्जनार्थं विविधविषसंयोगविषोपहृतोपशमनार्थं ॥ १३ ॥

जत्रु ग्रीवामूलं । अनेन वक्षोसन्धिमाहुः । वदनमत्र मुखकुहरमाहुः । घ्राणादिसंश्रितानां ।—आदिशब्दात् शिरः कपालादिसंश्रितानां ॥ ९ ॥

केचित् ज्वरानन्तरमतीसारं पठन्ति तन्नपञ्जिका-दूषितत्वात् ॥ १० ॥

असुरा दैत्याः, गन्धर्व्वा देवगायनाः, यक्षा धनदादयः, रक्षांसि रावणप्रभृतीनि, पितरोऽग्निष्वात्तादयः, पिशाचः पिशिताशनाः, एते ग्रहाणां ग्रहाः प्रोच्यन्ते । शान्तिकर्म्मबलिहरणादिग्रहोपशमनार्थं शान्तिकर्म्मादिभिरष्टग्रहोपशमनं प्रयोजनं ॥ ११ ॥

कौमारभृत्यमित्यादि । दुष्टस्तन्यग्रहसमुत्थानामिति दुष्टस्तनेन दुष्टग्रहेण च जातानामित्यर्थः । तत्र दुष्टस्तनेन शारीराः, दुष्ट ग्रहेणागन्तवः ॥ १२ ॥

अगदेत्यादि,—विविधानां नानाप्रकाराणां, स्थावरजङ्गमानां विषाणां संयोगः सङ्गमः, तदुपशमाय । अनेन तु विविधकीटा वृश्चिकादयः, लूता-

रसायनतन्त्रं नाम वयःस्थापनमायुर्मेधा-बलकरं रोगापहरणसमर्थञ्च ॥ १४ ॥

वाजीकरणतन्त्रं नाम अल्पदुष्ट-विशुष्क-क्षीणरेतसामाप्यायनप्रसादोपचयजननिमित्तं प्रहर्षजननार्थञ्च एवमयमायुर्वेदोऽष्टाङ्ग उपदिश्यते ॥ १५ ॥

अत्र कस्य किमुच्यतामिति। त ऊचुः। अस्माकं सर्व्वेषामेव शल्यज्ञानमूलं कृत्वोपदिशतु भगवानिति। स उवाचैवमस्त्विति। त ऊचुर्भूयोऽपि भगवन्तं। अस्माकमेकमतीनां मतमभिसमीक्ष्य सुश्रुतो भगवन्तं प्रक्ष्यति।

मर्कट कीटभेदो वा, विविधविषसंयोगोपशमार्थञ्चेति संयोगविषं समानमधुघृतादि॥ १३॥

रसायणेतयादि।—वयःस्थापनमायुर्मेधावलकरमिति वयःस्थापनं वर्षशतमायुस्थापनं आयुष्करं शताधिकमपि करोति। अनेन तु वयःस्थापनं जरापहरणं, तारुण्यं बहुकालं स्थापयतीत्यर्थः॥ १४॥

वाजीकरण तन्त्रेतयादि। वाजीति अल्परेतसः प्रकृतैव स्तोकरेतसः, तेषामुपचयनिमित्तं; विशुष्करेतसः स्वमानादित्यर्थं क्षीणरेतसः, तेषां जननिमित्तं। अथवाऽल्परेतसः पञ्चविंशतिमप्राप्ताः, क्षीणवयसस्तु मध्यवयसःकारणादल्पीभूतरेतसः, शुष्करेतसोवृद्धाः। प्रहर्षजननार्थञ्चेति स्वस्थस्य शुक्रवृद्धिकरं श्रुति करञ्चेति। एवमयमायुरितयादि। एवमनेन प्रकारेण॥ १५॥

अत्रेतयादि। एषु मध्ये किमङ्गं कस्मै शिष्यायोपदिश्यतां व्याख्यायतां, इतिशब्दः समानेयन। त ऊचुः अस्माकमितयादि। त ऊचुः शिष्या धन्वन्तरिं प्रति ऊचुः उक्तवन्तः। शल्यज्ञानं मूलं कृत्वा शल्यज्ञानमादौ कृत्वा। स उवाचैवमस्त्विति। स इति स धन्वन्तरि रुवाच उक्तवान् एवमस्त्विति एवं भवतु। सहोवाचेति केचित् पठन्ति, तैः शिष्यैः सहेत्यर्थः। त ऊचु भूयोपीत्यादि। प्रक्ष्यति प्रश्नं करिष्यति। स उवाचैवमस्त्विति

अस्मै चोपदिश्यमानं वयमप्युपधारयिष्यामः । स होवाचैवमस्त्विति । वत्स सुश्रुत ! इह खल्वायुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च । आयुरस्मिन् विद्यतेऽनेन वा आयुर्विन्दतीत्यायुर्वेदः । तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुच्यमानमुपधारय ॥ १९ ॥

एतत् पूर्व्वं व्याख्यातं । वत्स सुश्रुत इति सम्बोधने, अस्याग्रे तथेति इत्यादिका प्रतिज्ञा ज्ञातव्येत्यति पूर्व्वोक्तमेवोक्तं । इह खल्वायुरित्यादि । इह खल्वित्यधिकारे, व्याधिशब्दोयं दुष्टेषु वातादिषु तत्कार्य्येषु ज्वरादिषु क्लेशेषु, रागादिषु दुःखेषु संसारानुवृत्तिजनकेषु च वर्त्तते, परिमोक्षोनिवृत्तिः । ननु व्याधिपरिमोक्षः स्वस्थरक्षणादन्यदपि प्रयोजनं अस्ति किन्तद्याप्यव्याधितरक्षा रसायनादायुरुत्कर्षश्च तदिदं वक्तव्यं । उच्यते, स्वस्थस्य रक्षणञ्चेति चकारोऽनुक्तसमुच्चयार्थः । तेन याप्यव्याधितरक्षणं रसायनादायुरुत्कर्षश्च । अथवा साध्यव्याधेः क्रियैकत्वाद् याप्यावबोधः रसायनादायुरुत्कर्षस्तु स्वस्थरक्षयैव गृह्यते । आयुरस्मिन्नित्यादि । आयुःशरीरेन्द्रियसत्वात्मसंयोगः, तदस्मिन्नायुर्वेदे विद्यते अस्तीत्यायुर्व्वेदः, अथवा आयु र्विद्यते ज्ञायते अनेनायुर्व्वेदः, आयुर्विद्यते विचार्य्यते अनेन वा इत्यायुर्व्वेदः,आयुरनेन विन्दति प्राप्नोति इति वा आयुर्व्वेदः । तस्याङ्गवरमित्यादि । अङ्गवरं अङ्गश्रेष्ठं, आद्यं आदिभवं । प्रत्यक्षागमानुमानोपमानैरविरुद्धमिति अनेन श्लोकेनाङ्गवरेण योऽर्थः प्रतिपाद्यते स खलु प्रत्यक्षादिभिरपि तथा अवगम्यत इत्यर्थः । प्रत्यक्षमिति यत्किञ्चिदेवार्थस्य साक्षात्कारिज्ञानं तावदेव प्रत्यक्षं ।तथाहि"मनोक्षगतमभ्रान्तं वस्तु प्रत्यक्षमुच्यते । इन्द्रियाणामसंज्ञानं वस्तुतत्त्वे भ्रमः स्मृतः ।"प्रत्यक्षाविरुद्धं यथा, — सूर्य्यावलोकनान्नासान्तःस्रुतवर्त्ति प्रवेशनाच्च क्षुतः प्रादुर्भावः । आगमो वेदः, आप्तानां शास्त्रं वा ।

एतद्ध्यङ्गं प्रथमं प्रागभिघातव्रणसंरोहाद् यज्ञशिरःसन्धानाच्च। श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति, ततो देवा अश्विनावभिगम्योचुः। भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः। भवद्भ्यां यज्ञस्य शिरःसन्धातव्यं। तावूचतुरेवमस्त्विति। अथ तयोरर्थे देवा इन्द्रं यज्ञभागेन प्रासादयन्। ताभ्यां यज्ञस्य शिरः संहितमिति॥ १७॥

तथाहि "सिद्धं सिद्धैः प्रमाणैस्तु हितं चात्र परत्र च। आगमः शास्त्रमाप्तानामाप्ता स्तत्त्वार्थवेदिनः।" आगमाविरुद्धं यथा,—पुराणादिष्वपि श्रूयते रुद्रेण यज्ञस्य शिरश्छिन्नमश्विभ्यां संहितमिति। आगमस्य प्रत्यक्षफलत्वात् वरीयान् स, तेनानुमानात् पूर्व्वं निर्द्दिष्टवान्। अनु पश्चादव्यभिचारिलिङ्गाल्लिङ्गं मीयते ज्ञायते येन तदनुमानं, तेनाविरुद्धं यथा,—प्रणष्टशल्यं चन्दनघृतोपदिग्धायां त्वचि विशेषेण रागाद्याजन्यविलयनाभ्यामनुमीयते। प्रसिद्धसाधर्म्म्यात् सूक्ष्मव्यवहितविप्रकृष्टार्थस्य साधर्म्म्यसाधनमुपमानं, तेनाविरुद्धं यथा,—माषवन्माषः, तिलमात्रस्तिलकालकः, विदारीकन्दवत्विदारीरोगः; शालूकवत्पनसिकेत्यादिकं; उच्यमानं उपदिश्यमानं, मया धन्वन्तरिणेत्यर्थः॥ १६॥

शल्याङ्गस्याद्यत्वं प्रतिपादयन्नाह,—एतद्ध्यङ्गमित्यादि। एतद्धि अङ्गं प्रथममिति हिशब्दोऽवधारणे, एतेनैतदेवाङ्गं प्रथममाद्यं प्रधानं वा, कस्मात् प्रथमं प्रागभिघातव्रणसंरोहात्। शारीरव्याधीनां प्रागेव देवासुरसंग्रामे अभिघातव्रणोत्पत्तिस्तत् संरोहात्, द्वितीयं हेतुमाह यज्ञशिरः सन्धानाच्चेति। अत्रापि प्रागिति सम्बध्यते। अन्ये त्वत्र यज्ञप्रधानशिरःसन्धानाच्चेति पठन्ति। यतः प्राक् यज्ञस्य प्रधानभूतस्य शिरसः सन्धानं तस्मादिदमाद्यं। अत्रैव पारम्पर्य्योपदेशमाह;—श्रूयते हीत्यादि। यावच्छिरःसंहितमिति, अत्र केचित् सन्धितमिति पठन्ति॥ १७॥

अष्टास्वपि चायुर्वेदतन्त्रेष्वेतदेवाधिकमभिमतमाशु-क्रियाकरणात् यन्त्रशस्त्रक्षाराग्निप्रणिधानात् सर्वतन्त्र-सामान्याच्च। तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुष्यं वृत्तिकरञ्चेति ॥ १८ ॥

ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे तस्मादश्विना-वश्विभ्यामिन्द्र इन्द्रादहं मया त्विह प्रदेयमर्थिभ्यः प्रजा-हितहेतोः ॥ १९ ॥

इदानीं वरत्वे प्रतिज्ञातहेतुं प्रतिपादयन्नाह;—अष्टास्वप्यायुरित्यादि । एतदेवाधिकमिति एतदेवाधिकं नान्यत् शालाक्यादि, आशुक्रियाकरणात्। कुतोऽस्य पुनराशुक्रियाकरणमेव यन्त्रादिप्रणिधानाच्च। नहि यन्त्रादिषु प्रणिधानेषु मन्दा क्रिया कर्त्तुं युक्ता, मन्दकारित्वे हि आतुरस्य व्यापत्तिः स्यात् । वरत्वे द्वितीयं हेतुमाह;—सर्व्वतन्त्रसामान्याच्च शालाक्यादितन्त्रतु-ल्यत्वाच्च। अधिकक्रियाकरणादिति केचित् पठन्ति, अधिकक्रियाकरणमप्यस्य यन्त्रादिप्रणिधानात् सर्व्वतन्त्रसामान्याच्च हेतुभ्यां ; अनेऽत्रतु वरत्वे आशु-क्रियाकरणादिति हेतुत्रयमाहुः। आशुक्रियाकरणात् शीघ्रं छेदादिक्रिया-करणादिति व्याख्यानयन्ति। अतःशिष्योत्साहनाय यथाभूतप्रशंसामाह;—तदिदं शाश्वतमित्यादि। तदिदमिति तदिदं शल्यतन्त्रं, शाश्वतमविनाशि, अथवा शाश्वतशब्देन मोक्षोऽभिधीयते, तत्सम्पादनत्वात्, शाश्वतं पुण्यं पुण्यहेतुत्वात्, स्वर्गस्य निमित्तं स्वर्गाय हितं वा स्वर्ग्यं, यशसो निमित्तं यशसे हितं वा यशस्यं, आयुषो निमित्तं आयुषे हितं वा आयुष्यं, वृत्तिकरञ्चेति निर्व्वाहकरं ॥ १८ ॥

इदानीं क्रमगतिं प्रतिपादयन्नाह ;—ब्रह्मा प्रोवाचेत्यादि । प्रोवाच प्रथमं कथितवान्, तस्मात् प्रजापतिरधिजगे इति प्रजापतिर्दक्षः, अधिजगे अधीतवान्। मया त्विह प्रदेयमर्थिभ्य इति स्वर्गे ब्रह्मणैवार्थिभ्यः प्रथमंदत्तं, मया धन्वन्तरिणा, पुनरिह मर्त्त्यलोके, प्रदेयं प्रथमं दातव्यमिति ॥ १९ ॥

भवति चात्र।

अहं हि धन्वन्तरिरादिदेवो जरारुजामृत्युहरोऽमराणां।
शल्याङ्गमङ्गैरपरैरुपेतं प्राप्तोऽस्मि गां भूय इहोपदेष्टुम् ॥२०॥

अस्मिन् शास्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुष इत्युच्यते। तस्मिन् क्रिया, सोऽधिष्ठानं, कस्माल्लोकस्य

अथ काशिराजः शिष्यप्रतीत्यर्थं श्लोकमाह;—भवति चात्र अहं हीत्यादि। आदिदेवः शङ्करः, अन्ये तु आदिदेवा ब्रह्मादयः, कर्मदेवाः शत-क्रतुप्रभृतयः, प्रयोजनदेवा अयोनिजाः स्कन्दादयः, तेषामहमादिदेवः। आदिदेवत्वेऽपि काशिराजत्वमुपपन्नमवतारान्तरमापन्नत्वात्। जरारुजा-मृत्युहरोमराणामिति एतेन एतदुक्तं देवानामपि पुरा जरादयस्तस्थुः। ते च मया आदिदेवेन हृताः। प्राप्तोऽस्मि गां भूय इहोपदेष्टुमिति, पूर्व्वमहं देवकार्य्यार्थं स्वर्गं प्राप्तः, इदानीं प्राप्तोऽस्मि गां पृथिवीं, भूयः पुनः, इह मर्त्त्यलोके, मनुष्यकायार्थमुपदेष्टुं। अन्ये शल्यं महत्शास्त्रवरं गृहीत्वेति पठन्ति। स्वमाहात्म्यप्रकाशनमपि परार्थत्वात् यथा भूतत्वाच्च न दोषः॥ २०॥

अस्मिंस्तु शास्त्रे पञ्चमहाभूतेत्यादि,—पञ्चमहाभूतानि पृथिव्यादीनि, शरीरी आत्मा, समवायः संयोगः, अन्ये तु तत्रास्मिन् शास्त्रे इति पठन्ति। तत्र इत्यनेन शल्यतन्त्रमधिक्रियते, तस्मिन् शल्यशास्त्रे। अस्मिन्निति अस्मिन्नधिकारे, किं विशेषयति उच्यते क्रियाधिकारे व्याध्यधिष्ठानप्रस्तावेच। तस्मिन् क्रियेति। तस्मिन्निति पूर्व्वनिर्द्दिष्टे पुरुषे, क्रिया शास्त्रोदितं कर्म्म। किन्तत्? भेषजशस्त्रक्षाराग्निनिर्वर्त्त्यस्वास्थ्यप्रवृत्तिकरञ्च। कस्मात्? तस्मिन्नेव क्रिया। सोऽधिष्ठानमिति,—यस्मात् पुरुषः अधिष्ठान-माश्रयः। कस्य? व्याधेः। लोकोहीत्यादि। हि यस्मादर्थे, स्थावरो वृक्षादिः, जङ्गमो मनुष्यादिः। चिकित्सोपयोगिधर्म्मद्वयं प्रतिपादयितुमाह,—द्विधात्मक एवेत्यादि। अग्निभूताधिदैविकस्वभावमाग्नेयं, सोमभूताधिदैव-तस्य भावं सौम्यं, अन्ये द्विविधात्मको द्विविधहेतुक इति व्याख्यानयन्ति,

द्वैविध्यात् । लोको हि द्विविधः स्थावरो जङ्गमश्च । द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात् । पञ्चात्मको वा । तत्र चतुर्विधो भूतोग्रामः । स्वेदजाण्डजोद्भिज्जजरायुजसंज्ञः । तत्र पुरुषः प्रधानं, तस्योपकरणमन्यत् । तस्मात्

तन्न पञ्जिकया दूषितत्वात् । ननु सर्व्वभूतानां सर्व्वत्र साम्यमस्ति तत् कथं द्विविधात्मक इत्याह,— तद्भूयस्त्वादिति, तद्बाहुल्यादित्यर्थः । प्रायेण हि सर्व्वं द्रव्यं शीतमुष्णं, न तृतीयोराशिरस्ति, अतोद्वावेव अग्निसोमौ भूयांसौ । अमुना विशेषेण द्वितीयं पक्षमाह,— पञ्चात्मकोवेति । वा शब्दः पक्षान्तरे, तेन स द्विविधोऽपि लोकः पञ्चात्मकः पञ्चस्वभावः ; इत्यर्थं वा पक्षः । इदानीं जगतां पृथकत्वमाह, —तत्र चतुरित्यादि । तत्रेति तयोः स्थावरजङ्गमयोर्मध्ये चतुर्व्विधः चतुःप्रकारः भूतग्रामः प्राणि-समूहः, । अथवा ते चत्वारः प्रकारा इत्याह,—संस्वेदजेत्यादि । भुवः शरीरस्य च संस्वेदादुष्मणोजाताः संस्वेदजाः,जरायुणा जाता जरायुजाः, जरायुर्गर्भाशयः, अण्डाज्जाताः अण्डजाः, अण्डं प्राण्याधारोवर्त्तुलं । भुवमुद्भिद्य जाताः उद्भिज्जाः, संज्ञाशब्दः प्रत्येकं सम्बध्यते । चतुर्षां निपतितानां उष्माणं विना कस्यचित् चिकित्सा सिद्धिर्नास्ति । अतः संस्वेदजस्य प्राग्निर्द्देशः, केचिदन्यथाक्रमं पठन्ति, तन्न पञ्जिकयादूषितत्वात् । लोकद्वैविध्यादिति प्रागुद्दिष्टहेत्वर्थं स्फुटीकुर्व्वन्नाह, —तत्र पुरुषप्रधानमित्यादि । तत्रेति तयोः स्थावरजङ्गमयोर्मध्ये पुरुषः प्राधान्येन गुणेन पृथक् क्रियते । यद्यप्यत्र पञ्चमहाभूतशरीरिसमवायः पुरुष इति सामान्येन पुरुषशब्देन पश्वादिरपि वाच्यस्तथापि मनुष्यजातिरेवात्र पुरुषशब्देनोच्यते, तस्योपकार्य्यत्वात्, इतरस्य च अप्राधान्यं उपकरणत्वात्,अतएवाह तस्योपकरणमन्यत्, तस्य मनुष्यजातेः पुरुषस्य, अन्यत् स्थावरसंस्वेदजादि उपकरणं, उपकरणत्वादप्रधानत्वमित्यतआह ।—तस्मात् पुरुषोधिष्ठानं, तत्र पुरुषः प्रधानमिति । तत्र तेषु चतुर्षु स्वेदजादिषु मध्ये इत्यनेन व्याख्यानयन्ति, ननु के ते व्याधयो येषां पुरुषोधिष्ठानमित्याह,—तद्दुःखसंयोगा व्याधय उच्यन्ते । तच्छब्देनानन्तरनिर्द्दिष्टः पुरुषोऽधिक्रियते ।दुःखं कायवाङ्-

पुरुषोऽधिष्ठानं। तद्दुःखसंयोगा व्याधय इत्युच्यन्ते। ते चतुर्विधा आगन्तवः शारीरा मानसा स्वाभाविकाश्चेति। तेषामागन्तवोऽभिघातनिमित्ताः। शारीरा स्त्वन्नपानमूला वात-

मानसपीड़ा,वि वन्ध' दुःखमादधतीति व्याधयः,तस्य पुरुषस्य दुःखाय संयोगो-येषां आगन्तुप्रभृतीनां ते व्याधयः, अथवा तस्य पुरुषस्य येषु सद्वृत्सायैव व्याकरणभूते येभ्यो वा दुःखं जायते ते व्याधयः, एतौ वाक्यार्थौ न्याय्यौ, अनेत्र तु तस्य पुरुषस्य दुःखानां वेदनानां ये संयोगास्ते व्याधयः, अपरे तु दुष्टानि खानि स्रोतांसि दुःखानि तस्य पुरुषस्य दुःखानां दुष्टस्रोतसां निमित्तं संयोगोयेषां ते तथोक्ताः। नैतत् व्याख्यानं संगच्छते पञ्जिकया दूषितत्वात्। ते चतुर्विधा इत्यादि। शारीरा इत्यस्य प्रागुक्तिः शरीरस्य प्राधान्यत्वात्। ततः शेषावपि। स्वभावेन भवन्तीति स्वाभाविकाः, स्वभा-वोऽत्र सहजोधर्मः। आगन्तुप्रभृतयः पूर्व्वं व्याख्याताः। स्वाभाविकाश्चेति चकारः स्वाभाविकस्य व्याधेः पूर्व्वैः सह अतुल्यवलतां सूचयति, इतिशब्द श्चतुःप्रकारसमाप्तौ। इदानीमागन्तुप्रभृतीनेव विवरितुमाह,— तेषामित्यादि। अभिहननं अभिघातः शरादिप्रहारः, सएव निमित्तं येषां ते तथोक्ताः। शारीरा इति,—अन्नपानमूला इति सामर्थ्याद्विषमान्नहेतवः, नह्यन्न-साम्यं व्याधिहेतुः, तत्त्वन्नवैषम्यं स्वस्थवृत्तवैधर्म्यमुपलक्षयति, तेन काल-वैषम्यं कायवाङ्मनो विहारवैषम्यं इन्द्रियार्थ-वैषम्यञ्च लक्षयति, शारी-राणां विकाराणा मेषवर्गश्चतुर्व्विधः। प्रकोपे प्रशमे चैव हेतुरुक्तश्चिकित्सकै रिति, एषां ग्रहणमकृत्वा अन्नग्रहणेनैतानुपलक्षयन्नतल्लक्षयति यथा अन्नमेवैषां सम्भवे प्रधानहेतुस्तथा नानेत्र। वातपित्तकफशोणित-सन्निपातवैषम्यनिमित्ता इति वातादीनां सन्निपातान्तानां वैषम्यं विषमता, तदेव निमित्तं येषां ते तथोक्ताः। ते पुनर्वातादीनां सञ्चयच्चापका व्याधयः, तच्च वैषम्यं क्षयेण वृद्ध्या वा दोषप्रस्तावे दूष्य-शोणित-ग्रहणे हेतुर्वक्तव्यः? उच्यते, एतद्धि शल्यतन्त्रं शल्यतन्त्रे व्रणं प्रधानभूतं, व्रणे च दूष्येषु मध्ये रक्तस्य प्राधान्यमिति शोणितोपादानं। अनेत्रतु दोषदूषित-

पित्तकफशोणितसन्निपातवैषम्यनिमित्ताः। मानसास्तु क्रोधशोकभयहर्षविषादेर्ष्याभ्यसूयादैन्यमात्सर्य्यलोभकामप्रभृतय इच्छाद्वेषभेदैर्भवन्ति। स्वाभाविकाः क्षुत्पिपासा-

त्वात् रक्तमपि व्याध्युत्पत्तिनिमित्तं भवतीति,ब्रुवन्ति वायं दोषदूषितेष्विति, अत धातुसंज्ञा,शोणिताज्जातमित्यादिव्यपदेशो घृतादिदग्धवत् ।अन्यनिबन्धकारैरेवमुक्तं तच्च शिष्यबुद्धिव्याकुलत्वहेतुत्वादस्माभिरुपेक्षितं। मानसान् प्रतिपादयन्नाह;—मानसास्त्वित्यादि। क्रोधः पराभिद्रोहलक्षणः, शोकःपुत्रादिवियोगे चित्तोद्वेगः, भयं परस्मात्त्रासः, हर्ष उत्सेकः, निर्निमित्तं अन्यस्य दोषोत्पादनेन आत्मनः प्रीतिजननं वा हर्षः, असिद्धिभयादिभिर्विषेषु कर्म्मसु सादोऽप्रवृत्ति र्विषादः, ईर्षा परसम्पत्तावसहिष्णुता, छिद्रान्वेषितया परगुणेषु दोषारोपणं असूया, दैन्यं क्लिष्टचित्तता। मात्सर्य्यं परगुणेषु असाधयत्वं क्रौर्य्यं वा, काम इन्द्रियार्थेषु अभिकाङ्क्षा, लोभः परस्वग्रहणाभिलाषः। आदिग्रहणात् मानमददम्भादयः। इच्छाद्वेषभेदैर्भवन्तीति इच्छा सातिशयोऽर्थाभिलाषः, साच नानावलम्बि नानाकामतश्च भिन्ना भवति। तत्र हर्षशोकदैन्यकामलोभादयः इच्छाभेदेन। द्वेषोऽप्रीतिः, सोऽपि नानावस्त्ववलम्बि नानारूपो भवति। क्रोधभयविषादेर्षासूयामात्सर्य्याणि द्वेषभेदेन। अनेत्र तु मानसाः क्रोधशोकभयदैन्येर्षासूयामात्सर्य्यकामादय इति पठन्ति। स्वाभाविकान् व्याख्यातुमाह,—स्वाभाविकास्त्वित्यादि। क्षुत् भोक्तुमिच्छा,पिपासा पातुमिच्छा,जरा वार्द्धक्यं,मृत्युः शरीरेन्द्रियात्ममनसां वियोगः। प्रकृतिग्रहणात् प्रकृतिभावा रोगा गृह्यन्ते, ते च कदाचित् स्वाभाविकाः कदाचिद्दोषजाः, तत्र यदा प्रवृद्धपित्तस्य क्षीणश्लेष्मणो भस्मकानलेन बुभुक्षा भवति, सा प्रकृतिकार्य्या दोषजत्वात्। पिपासापि यदा दोषैः क्रियते तस्या अपि दोषतः प्रसाधनं कर्त्तव्यं ; जरापि यदा अकाले भवति, सा प्रतिकार्य्या ; मृत्युरप्यकालजः प्रतिकार्य्यः। निद्रापि दोषजाः प्रतिकारादुपशमं याति, तत्र यदा एते सर्व्वे दोषेभ्यो जायन्ते तदा शारीराः प्रतिकार्य्याश्च यदा तु स्वभावतः तदा निःप्रतिकाराः, रसायन-

जराक्षुत्‌पिपासानिद्राप्रभृतयः। त एते मनःशरीराधिष्ठानाः। तेषां संशोधनसंशमनाहाराचाराः सम्यक्‌प्रयुक्ता निग्रहहेतवः।२१।

तोऽपि न प्रतिकार्य्याः। तत्र ते स्वभावसम्भूतत्वात् स्वाभाविकाः कथ्यन्ते, यद्यपि क्षुत्‌पिपासाजरासु स्वभावसम्भूतास्वपि पित्तजत्वं निद्रायां श्लेष्म-तमोभवत्त्वमस्ति तथाप्यल्पदोषारब्धत्वाद्दोषजत्वमुच्यते, एकतण्डुलाहारिणा-मनशनव्यपदेशवत्। ऋतुस्तु महद्भिरपि स्वभावानुवर्त्तिभिर्दोषैरारब्धोऽपि दोषव्यपदेशं लभते। यथा राजानुवर्त्तिभिरपि पुरुषैः सम्पादितं जरा-दिकं राजव्यपदेशं लभते राज्ञाजित मिति तद्वदत्रापि आगन्तुष्वतयोः सम्भव-त्वाच्च, नावश्यं दोषजव्यपदेशं लभते। अनेन निद्रा प्रकृतयश्चत्यत प्रभृतय इति पठन्ति।प्रभृति ग्रहणात् रात्रिजागरणादय इति व्याख्यानयन्ति। तएत इत्यादि। तएत इति अनन्तरोक्ता व्याधयः, तत्र मनोधिष्ठानाः क्रोधादयः शरीराधिष्ठाना जरादयः। उभयाधिष्ठाना अपस्मारादयः। यद्यपि मानसा अपि शरीरं पीड़यन्ति, शारीरा अपि मनः पीड़यन्ति, तथापि प्राङ्‌मानसा एव मनः पीड़यन्ति पश्चात् शरीरं। एवं शारीरा अपि इति न दोषः। आत्मनि तु व्याध्यधिष्ठानं नास्ति निर्व्विकारत्वात्।व्याधीन् निर्द्दिश्य चिकित्सा निर्द्दिष्टुमाह ;—तेषामित्यादि। तेषां व्याधीनां सम्यक् संशोधयतीति संशो-धनं, तद्‌ द्विविधं वहिराश्रयं अभ्यन्तराश्रयञ्च,तत्र वहिराश्रयं शस्त्रक्षाराग्नि-प्रलेपादयः,अभ्यन्तराश्रयं चतुःप्रकारं वमनं विरेचनं आस्थापनं शोणितमोक्षणञ्च अन्ये तु शोणितमोक्षणमित्यत्र शिरोविरेचनं मन्यन्ते। संशोधनं यत्किञ्चित् पीतलीढ़ादिक मनिर्हृत्य दोष शमयति तत् संशमनं। तदुक्तं "न शोधयति यद्दोषान् समान्नोदीरयत्यपि। समी करोति क्रुद्धांश्च तत् संशमनमुच्यते।" तदपि द्विविधं वाह्यमाभ्यन्तरञ्च, तत्र वाह्यमालेपपरिषेकावगाहाभ्यङ्ग-शिरोवस्तिकग्रहणगण्डूषादिकः। आभ्यन्तरन्तु पाचन-लेखन-वृंहण-रसा-यन-वाजीकरण-विषप्रशमनादिकं। आहारश्चतुर्विधः पेयलेह्यादिभक्ष्य-भेदात्। स पुनस्त्रिविधः दोषप्रशमनो व्याधिप्रशमनः स्वास्थ्यवृत्तिकरश्चेति। दोषसंशमनत्वात् संशमनग्रहणे नैव आहारे लब्धे पृथक्करणं। आचारः

प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च, स षट्सु रसेष्वायत्तः, रसाः पुनर्द्रव्याश्रयाः । द्रव्याणि पुनरोषधयः । ताः द्विविधाः स्थावरा जङ्गमाश्च । तासां स्थावराश्चतुर्विधाः । वनस्पतयो वृक्षा वीरुध ओषधय इति । तास्व-

कायवाङ्मानसं कर्म । तत्रोत्क्षेपणावक्षेपणादिकं कायिकं कर्म, पाठः स्वाध्यायादि वाचनिकं, अध्येयचिन्तासङ्कल्पादि मानसं । सम्यक् प्रयुक्ता इति आयुरादीन् वीक्ष्य प्रयुक्ताः ॥ २१ ॥

संशोधनादिषु आहारस्य प्राधान्यं दर्शयितुमाह;—प्राणिनामित्यादि । मूलमिति मूलमिव मूलसम्भवहेतुत्वात् । शुक्रशोणितं तावदाहारादेव जायते यद् गर्भजननसमर्थं, न केवलं प्राणिनां मूलं बलवर्णौजसाञ्च । एतेन प्राणिनामाहारादेव उत्पत्तिस्थिती निदर्शिते । बलं कर्मसाधनशक्तिः व्यायामाद्यनुमेया । वर्णो गौरादिः, ओजः सोमात्मकं रसादिशुक्रान्तधातु-धामभूतं हृदिस्थं । अन्ये तु बलं शरीरोपचयोऽत्राभिप्रेतः इति वदन्ति । एवं परमार्थतो बलौजसोर्भेदोऽपि दोषधातुमलक्षयवृद्धिविज्ञानीये चिकित्स्य-कार्थं सभेद उक्तः । षट्सु रसेष्वायत्त इति । स आहारो रसेषु मधुरादिषु आयत्तोऽधीनः । द्रव्याणि पुनरोषधय इति । ओषधिशब्दोऽत्र सान्निध्यात् वक्ष्यमाणस्थावरजङ्गमराशिद्वये एव वर्त्तते, न पुनरोषधिमात्रे, अन्यथा हि पार्थिवेष्वपि ओषधिशब्दो वर्त्तते । पार्थिवानामुपादानं पृथक् न स्यात् अन्ये तु पार्थिवेष्वपि ओषधिशब्दो वर्त्तते इत्याहुः । तास्तु द्विविधा स्थावरा जङ्गमाश्च । ता इति ओषधयः । स्थावराणां बहुतरोपयोगात् प्रागुपादानं । तासामिति । द्विविधानामोषधीनां मध्ये स्थावराः ते चत्वारः प्रकारा इत्याह;— वनस्पतय इत्यादि । तान्येव विवरितुमाह ;—तास्वपुष्पाः फलवन्तो वनस्पतय इति । तासु मध्ये अपुष्पा इति अविद्यमानपुष्पाः, फलवन्त इति फलं येषा-मस्ति ते वनस्पतय इति;के पुनस्तादृशाः प्लक्षोदुम्बरादयः । फलपुष्पवन्तो वृक्षा के ते आम्रजम्बूप्रभृतयः । प्रतानवत्यस्तम्बिन्यश्च वीरुध इति प्रतानवत्यो विस्तारवत्यो वीरुधः, न केवलं प्रतानवत्यो वीरुधः स्तम्बिन्यश्च गुल्मिन्यश्च पुन-र्वर्त्तुल-लता-सन्ततिविशिष्टाः, ताश्च विदारी-कोल-चव्य-वल्ली-शालपर्णी-

पुष्पाः फलवन्तो वनस्पतयः। पुष्पफलवन्तो वृक्षाः। प्रतानवत्यः स्तम्बिन्यश्च वीरुधः। फलपाकनिष्ठा ओषधय इति। जङ्गमास्वपि चतुर्विधाः। जरायुजाण्डजस्वेदजोद्भिज्जाः। तत्र पशुमनुष्यव्यालादयो जरायुजाः। खगसर्पसरीसृपप्रभृतयोऽण्डजाः। क्रिमिकीटपिपीलिकाप्रभृतयः स्वेदजाः।

पृश्निपर्णी-प्रभृतयः, केचित् स्तम्बिन्य इत्यत्र गुल्मिन्यश्चेति पठन्ति, तत्रापि सएवार्थः। फलपाकनिष्ठेति। निष्ठा नाशः, फलपाकेन परिणत्या नाशो यासां तास्तथोक्ताः। ते पुनर्गोधूमादयः। अन्ये तु निष्ठाशब्दं प्रत्येकं सम्बध्नन्ति, तेन फलनिष्ठा पाकनिष्ठाः इति। तत्र फलनिष्ठाः शालितिलकुलत्थादयः, पाकनिष्ठा करकादयः, करकश्चतक उच्यते। जङ्गमा इत्यादि। जङ्गमाः खल्वपि चतुर्विधा इति खलुशब्दः शिष्यसम्बोधने। हे सुश्रुत जङ्गमा अपि चतुःप्रकाराः तानाह जरायुजेत्यादि। एतच्च पूर्वं व्याख्यातं। जरायुजादिषु पूर्वोक्तसंस्वेदजादिक्रमत्यागो योनिसङ्करं बोधयति, तेन पक्षिषु वलाका जरायुजा अण्डजाश्चेति, सर्पजातिषु अहिपताका जरायुजा, संस्वेदजेष्वपि काश्चित् पिपीलिका अण्डजा उद्भिज्जाश्च इत्याह। व्यालादय इति। व्याला हिंस्रपशुव्याघ्रादयः, अन्ये तु पशुग्रहणादेव हिंस्रपशूनामपि ग्रहणमिति। व्यालशब्देन सर्पविशेषमाहुः। तदुक्तं सर्पजातिषु अहिपताका जरायुजेति। आदिग्रहणात् वलाका-वल्गुलादयः। दृष्टोपकरणप्रस्तावे पशूनां प्राधान्यमिति प्राङ्निर्देशः, प्राक्तनग्रामप्रसङ्गेन पुरुषप्राधान्यख्यापनार्थं, अत्र पुनः जरायुजाण्डजेत्यादि पाठ ओषधित्वख्यापनाय इति न पौनरुक्तिः। खगसर्पेत्यादि। खगाः पक्षिणः, सर्पा मन्दगामिनोऽजगरप्रभृतयः, सरीसृपाः शीघ्रगामिनः कृष्णसर्पादयः, मीनमकरा वा, प्रभृतिग्रहणात् कूर्मनक्रादीनां ग्रहणं। केचित् प्रभृतिशब्दमपठित्वा लुप्तनिर्दिष्ट आदिशब्दात् कूर्मादीन् गृह्णन्ति। क्रिमिकीटेत्यादि। क्रिमयः कोष्ठपुरीषादिवाह्यसम्भवाः कीटाः, वृश्चिकषड्विन्दुप्रभृतयः, पिपीलिकाश्चिटिकाः। प्रभृतिग्रहणात् एवम्विधा अन्येऽपि दृश्यन्ते, इन्द्रगोपइत्यादि।

इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः । तत्र स्थावरेभ्यस्त्वक्-पत्रपुष्पफलमूलकन्दनिर्यासस्वरसादयः प्रयोजनवन्तः, जङ्गमेभ्यश्चर्म्मनखरोमरुधिरादयः ॥ २२ ॥

पार्थिवाः सुवर्णरजतमणिमुक्तामनःशिलामृत्कपाला-दयः। कालकृतास्तु प्रवातनिवातातपच्छायाज्योत्स्नातमः-

इन्द्रगोपाः प्रावृट्कालजा अतिरक्तकृमय, इन्द्रवधूरिति लोके। प्रभृति-ग्रहणादीदृशा अन्येऽपि स्थावरजङ्गमयोर्निर्दिष्टयोश्चिकित्सोपयोगिनोऽव यवविशेषान् दर्शयितुमाह;—तत्र स्थावरेभ्य इत्यादि। स्वरसादय इत्यादि-ग्रहणात् तैलक्षारभस्मकण्टकप्रभृतीनां ग्रहणं। केचित् कन्दं सूत्रे न पठन्ति आदिशब्दाच्च गृह्णन्ति, रोमरुधिरादय इत्यादिशब्दान्मांसवसा-घृतास्थिखुरादयः ॥ २२ ॥

रसाधिकारि क्रमौषधिवर्गं स्थावरजङ्गमं प्रतिपाद्य परिशिष्टं प्रतिपाद-यितुमाह ;—पार्थिवाः सुवर्णेत्यादि। पृथिव्या विकाराः पार्थिवाः, रजत रौप्यं, मणिः स्फटिकादिः, मुक्ता मौक्तिकं, मृत् मृत्तिका, कपालं कर्परं, सुवर्णस्येह पार्थिवत्वमेवाङ्गीक्रियते, गुरुत्वकाठिन्यस्थैर्यादिहेतुभिः सूत्रे आदिग्रहणात् लोहमलसिकतासुधाहरितालमणगैरिकरसाञ्जन-प्रभृतीनां, यद्यपि स्थितिशीलत्वात् तथा लोकहितसमाख्याने पृथगुक्तत्वाच्च स्थावरशब्देनैव पार्थिवा उच्यन्ते, तथाप्यत्र प्रकरणात्। येष्वाहारोपयोगित्वात् फलमूलाद्यवयवेषु रसप्रधानतया तत्रैव चतुर्विधे वनस्पत्यादिगणे स्थावरशब्दो वर्त्तते न तु पार्थिवेष्वपि। तेषामाहारेषु प्रायेणानुपयोगात् अन्यदपि समानान्तरमस्ति, तच्च विस्तरभयान्न लिखितं। कालकृता इत्यादि। आदिग्रहणान्निमेषकाष्ठाकलामुहूर्त्तादयः। अन्ये तु एतद्ग्रहणमन्यथा पठन्ति व्याख्यानयन्ति च, तच्च वर्त्तमानप्रतीतिषु अप्रसिद्धमित्यस्माभिरुपेक्षितं। एषां प्रयोजनं दर्शयितुमाह ;—तत्र ते स्वभावत एवेत्यादि। स्वभावत एवेति स्वलक्षणतएव दूषयन्ति। कायवाक्-चित्तानीति। दोषा वातादयः। तदारब्धाः ज्वरादयः;सञ्चयः स्थानवृद्धिः,प्रकोपनं

शीतोष्णवर्षाऽहोरात्रपक्षमासर्त्त्वयनादयः सम्वत्सरविशेषाः।
त एते स्वभावत एव दोषाणां सञ्चयप्रकोपप्रशमप्रतीकार-
हेतवः प्रयोजनवन्तश्च ॥ २३ ॥

भवन्ति चात्र।

शारीराणां विकाराणामेष वर्गश्चतुर्विधः।
चये कोपे शमे चैव हेतुरुक्तश्चिकित्सकैः॥
आगन्तवश्च ये रोगास्ते द्विधा निपतन्ति हि।

प्रकोपः। प्रकोपप्रसरस्थानसंश्रयव्यक्तिभेदाः षड्वोच्यन्ते;, प्रकोपः स्थाना-दुन्मार्गगमनं, प्रसरः पञ्चदशप्रकारो व्रणप्रश्ने वक्ष्यते। ज्वरातीसारादीनां सामान्यलक्षणं व्यक्तिः, यथा सन्तापलक्षणो ज्वरः;, सरणलक्षणोऽतीसार इत्यादि, विशेषणं भेदः;, यथा अष्टानां ज्वराणामित्यादि। प्रशमनं प्रशमः;, हेतुव्याधिविपरीतं कर्म्म प्रतीकारः। अन्येतु प्रशमप्रतीकारयोरेकार्थतां मन्यमानाः प्रतीकारं न पठन्ति, तन्न, यस्माज्ज्वरादीनामप्यस्ति स्वभावो-पशमः तद्यथा कफज्वरप्रशमनं वसन्ते पूर्व्वाह्णे च, स्वभावेन प्रशमस्तु ग्रीष्मे मध्याह्ने च इत्यादि, तस्मात् प्रशमनप्रतीकारयोरर्थभेदोऽस्त्येव, प्रयोजनवन्तश्चेति चिकित्सोपकारिण इत्यर्थः। लाजजलोशीरकुचचन्द-नानि दत्त्वा प्रवाते निशि वासयेत्। तथा निवाते देशे निचितं कृत्वा मदन-फलानामातपपरिशुष्कानामित्यादि प्रयोजनं ज्ञातव्यं ॥ २३ ॥

इदानीं गद्यविस्तरेण प्रतिपादितमर्थं श्लोकैः प्रकटीकुर्व्वन्नाह ;— भवन्ति चात्र श्लोका इत्यादि। यद्यपि सुश्रुते भवन्ति चात्रेति विनापि श्लोका भवन्ति तथाप्यत्र मन्दमतीनां गद्यपद्यभेदकथनाय भवन्ति चात्र श्लोका इति ज्ञातं। अन्येतु वेदादिधर्मसम्वादार्थमितिवदन्ति। अथ के ते श्लोका इत्याह;— शारीराणामित्यादि, न चात्र द्विरुक्तिः, पूर्व्वोक्तस्य गूढार्थस्याभिव्यक्तिकरत्वात्, शारीराणामिति शरीरसम्भवानां, विकाराणामिति विकृतयो विकाराः। तेन विकारा अत्र कुपिता दोषा व्याधयोऽपि गृह्यन्ते। एषपूर्व्वोक्तोवर्गश्चतु-र्व्विधश्चतुःप्रकारः, आहाराचारपार्थिवकालभेदात्, स्थावरजङ्गमपार्थिव-

मनस्यन्ये शरीरेऽन्ये तेषान्तु द्विविधा क्रिया ॥
शरीरपतितानान्तु शरीरवदुपक्रमः ।
मानसानान्तु शब्दादिरिष्टो वर्गः सुखावहः ॥ २३ ॥

एवमेतत् पुरुषो व्याधिरौषधं क्रियाकाल इति चतुष्टयं समासेन व्याख्यातं । तत्र पुरुषग्रहणात्तत्सम्भवद्रव्यसमूहो भूतादिरुक्तस्तदङ्गप्रत्यङ्गविकल्पाश्च त्वङ्मांससिरास्नाय्वप्रभृतयः ।

कालभेदाच्चतुर्विध इति जेज्झटः । पञ्जिकाकारस्तु इदं न मन्यते, अत्रापि प्रकोपशब्दः प्रकोपप्रसरस्थानसंश्रयव्यक्तिभेदेषु वर्त्तते । प्रशमनशब्दोऽत्र रोगोपशमार्थः तन्मात्रस्योपलक्षणं, तेन साध्यानां सिद्धिः, याप्यानां यापनं खस्थस्तत्त्वं गृह्यते । इदानीमागन्तुकानामाश्रयभेदेन चिकित्सां वक्तुमाह ;—आगन्तवस्त्विति । मनस्यन्येति एके शरीरे अन्ये इत्यपरे । शरीरपतितानां खड्गाद्यभिघातकानां शारीराणामिव मनःपतितानां शब्दादिवर्गः शब्दा रूपरसगन्धस्पर्शाः । इष्ट इत्यभिप्रेतः, चिकित्सार्त्ते सुखावह इति सुखकारी । अन्ये तु चशब्दमनुक्तसमुच्चयार्थमाचक्षते । तेन धैर्य्याद्यतिप्रभृतयोऽपि मानसानां चिकित्सितं निर्द्दिष्टं ॥ २४ ॥

इदानीं व्याख्यातमर्थमुपसंहरन्नाह ;—एवमेतदित्यादि । एवमिति अनेन प्रकारेण, एतदिति पूर्व्वनिर्द्दिष्टं । चतुष्टयमिति चतुरवयवं, यद्यप्यत्र पुरुषादयः पञ्च तथापि चतुष्टयं ज्ञेयं । तथाहि "नान्यः कालः क्रियातोऽस्ति क्रियानान्यात्र्वौषधात् । प्राधान्यात् पुरुषस्यास्य ततो व्याधिचतुष्टयं" क्रियाविशिष्टः कालो वा तच्चतुष्टयं अतो न संख्यातिरेकः । तत्र येन यदुपगृहीतं तत्र तदुपदर्शयितुमाह ;—तत्र पुरुषग्रहणादित्यादि, तत्रेति तस्मिन् चतुष्टयमध्ये । तत् सम्भवद्रव्यसमूह इति तस्य पुरुषस्य सम्भव उत्पत्तिस्तद्योर्यो द्रव्यसमूहः स तथा । कः पुनरसावित्याह ;—भूतादिः । भूतानि आदीनि प्रथमानि प्रधानानि वा यस्य इति भूतादिरिति वाक्यार्थः । तेन शुक्रार्त्तव पञ्चमहाभूतानीह गृह्यन्ते । अन्ये त्वन्यथा व्याख्यानयन्ति, तस्य पुरुषस्य सम्भवद्रव्याणि शुक्रशोणितादीनि तेषां समूहः संयोगविशेषः,

व्याधिग्रहणाद्वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः सर्व्व एवव्याधयो व्याख्याताः। ओषधिग्रहणाद्द्रव्यगुण-रसवीर्य्यविपाकप्रभावाणामादेशः। क्रियाग्रहणाच्छेद्यादीनि स्नेहादीनि च कर्म्माणि व्याख्यातानि। कालग्रहणात्सर्व्व-क्रियाकालानामादेशः ॥ २५ ॥

कथम्भूतः स भूतादिः? भूतं महाभूतं पृथिव्यादिकं, आदिर्मूलकारणं यस्य स तथा; अथवा भूत् सम्भवद्‌द्रव्यसमूहः, शुक्रशोणितादिसंयोगः, स भूतानां प्राणिनामादिः, तत्र व्यक्तीभावात् भूतादिरित्यत्र एके भूताना-मादिर्भूतादिः अव्यक्तादारभ्य यावान्, स एष कर्म्मपुरुषः चिकित्साधि-कृत इति वदन्ति, तच्च पञ्जिकया निरस्तत्वात्। तदङ्गप्रत्यङ्गविकल्पा-श्चेति अङ्गानि मस्तकादीनि, प्रत्यङ्गानि चिबुकादीनि, त्वङ्मांससिरा-स्नायुप्रभृतय इति, त्वचः सप्त, मांसपेशीशतानि, पञ्चशिराशतानि, सप्तस्नायुशतानिच, प्रकृतिग्रहणात् स्रोतोधमन्यादयः, व्याधिग्रहणा-दित्यादि सर्व्वएवेति सर्व्वग्रहणादागन्तुमानसस्वाभाविकानां ग्रहणं। ओषधिग्रहणादित्यादि द्रव्यं स्थावरादि, रसा मधुरादयः, गुणा गुर्व्वादयः, वीर्य्याणि शीतोष्णादीनि, द्वौ विपाकौ गुरुलघू। औषधग्रहणं क्रिया-विशेषणं अतो न संख्यातिरेकः, अयमर्थः पुरुषादिचतुष्टयप्रस्तावे व्याख्यातः। क्रियाग्रहणादित्यादि। क्रियाग्रहणादिति औषधिविशेषा-दित्यर्थः। स्नेहादीनीति। आदिशब्दात् स्वेदन-वमन-विरेचना-स्थापनानुवासननस्यकवलग्रहगण्डूषपाचनसंशमनादीनां ग्रहणं। छेद्या-दीनीत्यादिशब्दात् भेद्यलेख्यएष्याहार्य्यविस्राव्यसीव्यादीनां ग्रहणं। कालग्रहणादित्यादि। स्नेहस्वेदनवमनविरेचनादीनां कर्म्मणां यथा शास्त्रादिक्रमेणाग्न वक्ष्यमाण समयनिर्द्देशः, तत्र स्नेहस्य प्रतप्तचामी-करपीतलोहित सवितरि इति वचनात्। कालनिर्द्देशः सर्व्वस्वेदानां जीर्णान्नकालः, वमनस्य पूर्व्वाह्नकालः, विरेचनस्य प्रातः, प्रातरिति दिना दित्रयो मुहूर्त्ताः आस्थापनान्तमनुसर्त्तव्यं ॥ २५ ॥

भवति चात्र।

बीजं चिकित्सितस्यैतत्समासेन प्रकीर्त्तितं।
सविंशमध्यायशतमस्य व्याख्या भविष्यति॥

तच्च सविंशमध्यायशतं पञ्चसु स्थानेषु। तत्र सूत्रस्थान-निदान शारीर-चिकित्सित-कल्पेष्वर्थवशात् संविभज्योत्तरे तन्त्रे शेषानर्थान् व्याख्यास्यामः॥ २१॥

अनेन चतुष्टयेन सकलमेव शास्त्रं व्याप्तमिति निदर्शयितुमाह;—भवति चात्रेत्यादि। बीजमिति। बीजमिव बीजं, यथैकं बीजं भूमौ निक्षिप्तं मूलकाण्डशाखापल्लवपलाशैरुत्तरविसारिततरमुपजायते, तथेदमपि चिकित्सितबीजं सूत्रनिदानशारीरचिकित्साकल्पस्थानादिभिर्विस्तृतमारोप्य फलं भवतीति। समासेन संक्षेपेण, सविंशमध्यायशतमित्यर्थः। तर्हि सहशब्देन किं प्रयोजनमुच्यते सह शब्देनात्र उत्तरतन्त्रेण सह विंशत्यधिकमिति उत्तरतन्त्रसहितत्वं प्रकाश्यते। नन्वत्र पक्षे बीज-कथनेनैवेत्याद्याध्यायस्य गतत्वात् कथं विंशत्यधिकमध्यायशतं पूर्य्यते। नैवं सर्वं तत्रोपलक्षणत्वात्, तस्येति नालोचनत्वं, अन्ये तु सशब्दं मूलार्थ-माचक्षते। यथा सलवणं व्यञ्जनं सक्षारमिति, कथमन्योच्यते वेदो-त्पत्तिमध्यायं विहाय विंशत्यधिकमध्यायशतं न पूर्य्यते। एकेनोनत्वात्, तस्मादूनविंशत्यधिकमध्यायशतं न पूर्य्यते अस्य व्याख्याभविष्यतीति। यद्येवं तर्हि उत्तरतन्त्रस्य कथं प्राप्तिरुच्यते? अर्थवशात्। ननु कः पुनरर्थो यद्वशात् प्राप्तिरित्याह। शेषा अर्था उत्तरे तन्त्रे प्रतिपादनीया इति, उत्तरतन्त्रप्राप्तौ चान्योयोऽर्थोऽस्ति स च न लिखितो ग्रन्थगौरवभयात्, तच्च सविंशमध्यायशतमित्यादि। तच्चेति तच्च सोत्तरं सविंशमध्यायशतं पञ्चसु स्थानेषु। ननु कथमेतत् उत्तरतन्त्रस्य पञ्चमस्थानेभ्य पृथगुक्तत्वात् नैवं कुतः पञ्चस्वेवेति नियमाभावात्, अतएवात्र वक्ष्यति उत्तरे शेषानर्थान् वक्ष्याम इति। शेषानर्थानिति शेषशब्देन रसभेदादयः स्वस्थवृत्तादयश्च ज्ञेयाः॥ २१॥

भवति चात्र। स्वयम्भुवा प्रोक्तमिदं सनातनं पठेद्धि यः काशिपतिप्रकाशितं॥ २७॥

स पुण्यकर्म्मा भुवि पूजितो नृपैरसुक्षये शक्रसलोकतां व्रजेत्॥

इति सौश्रुते सूत्रस्थाने प्रथमोऽध्यायः समाप्तः।

इदानीं वेदोत्पत्त्यध्याये निर्द्दिष्टस्य चिकित्साबीजोपदेशन्यायेन शास्त्रस्य पाठानुशंसामाह;—भवतिचात्रस्वयम्भुवेत्यादि। स्वयम्भुवा ब्रह्मणा प्रोक्तमुपदिष्टमिति शास्त्रं। सनातनं नित्यं, यः पठेदधीयीत, अनेनतु पाठधातुरत्र चतुर्द्धा तथाहि पाठे अर्थज्ञाने कर्म्मदर्शने अभ्यासे च हि स्फुट. प्रकाशितं आदिदेवेन धन्वन्तरिणा प्रकाशितं भुवि पृथिव्यां पूजितो नृपैरिति नृपैर्नरेन्द्रैः, एतेन ऐहिकं फलं दर्शयति। असुक्षये प्राणक्षये, शक्रसलोकतां इन्द्रसमानलोकतां व्रजति, एतेन पारलौकिकं श्रेयो दर्शयति। अन्ये तु शक्रसुलोकतां व्रजेदिति पठन्ति। सुशब्दः पूजावचनः, तेन शक्रलोकपूज्यतां व्रजेत् प्राप्नुयादित्यर्थः। एते भुवि नरेन्द्रैः पूजिता भवेयुरितर्थः॥ २७॥

इतिसूत्रस्थाननिबन्धसंग्रहे प्रथमोऽध्यायः समाप्तः।

द्वितीयोऽध्यायः।

अथातः शिष्योपनयनीयमध्यायं व्याख्यास्यामः।

अथात इति। अथोवाच भगवान् धन्वन्तरिरिति प्रत्यध्यायं वोद्धव्यं। अथशब्दोऽत्राद्याध्यायादीनामानन्तर्य्ये, अतः शब्दो हेत्वर्थे, स च हेतुः पूर्व्वाध्याये विस्तरेण व्याख्यातः। एवं प्रत्यध्यायं अथातःशब्दौ ज्ञातव्यौ। शिष्योपनयनीयमिति। उपनयनं दीक्षा,तदधिकृत्य कृतोऽध्यायः शिष्योपनयनीयस्तं तथा। अनेनतु उपनयनमात्रवक्तया अर्थकरणं। यद्यपि ब्राह्मणादयः प्राक् उपनीताः, तथापि आयुर्व्वेदपठनारम्भे पुनरुपनयनं। यथा ऋग्यजुःसामानि अधीत्य अथर्व्वारम्भे पुनर्व्रतावतरणं धनुर्वेदारम्भे च, तद्वत्रापि।

ब्राह्मणक्षत्रियवैश्यानामन्यतममन्वयवयःशीलशौर्य्यशौचाचारविनयशक्तिबलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्ताग्रमृजुवक्त्राक्षिनासं प्रसन्नचित्तवाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत्। अतो विपरीतगुणं नोपनयेत् ॥ १ ॥

उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरणमुहूर्त्त-

ब्राह्मणक्षत्रियवैश्यानामित्यादि। ब्राह्मणादिषु मध्ये अन्यतममेकतमं अन्वयादियुक्तं। तत्र अन्वयः आयुर्व्वेदाध्यायिकुलं; अन्ये वंशशुद्धिमाहुः। वयोऽत्र बाल्यं तारुण्यं वा। शीलं शास्त्रार्थानुसारिणोऽविपरीतस्वभावः। शौर्य्यं शूरत्वं सर्व्वत्राविषादिता। शौचं शुचिता, तच्च द्विविधं बाह्यमाभ्यन्तरञ्च, तत्र बाह्यं स्नातादिकं, आभ्यन्तरं मनःशुद्धिः। आचारः कुलदेशाद्यनुगतं लौकिकं विधानं, अन्ये तु कायवाङ्मानसिकं शुभव्यापारलक्षणं त्रिविधमाहुः; श्रुतिस्मृतिविहितानुष्ठानमित्येके। विनय इन्द्रियवशित्वं, शक्तिः उत्साहशक्तिः, बलं क्रियानिवर्त्तनक्षमता, अन्ये शक्तिबलयोर्विपर्य्ययात्मिकां बुद्धिमाहुः। मेधा कर्षणसामर्थ्यं। धृतिर्मनःसन्तुष्टिः, अन्ये नियमात्मिकां बुद्धिमाहुः। स्मृतिः पूर्व्वानुभूतस्य स्मरणं, अर्थधारणशक्तिरित्यन्ये। मतिः अनागतार्थोद्देशः, त्रिकालविषया बुद्धिरित्यन्ये। प्रतिपत्तिरर्थावबोधप्रागल्भ्यं, अनुष्ठानं वा। तनुजिह्वौष्ठदन्ताग्रमिति तनुशब्दो जिह्वादिभिः प्रत्येकं सम्बध्यते। तनुजिह्वौष्ठदन्तमित्येके पठन्ति। प्रसन्नचित्तवाक्चेष्टमिति प्रसन्नशब्दो चित्तादिभिः सह प्रत्येकं सम्बध्यते, चेष्टा कायपरिस्पन्दः, क्लेशसहं दुःखसहं, उपनयेत् दीक्षेत्, अतो विपरीतगुणं नोपनयेत्, अतएव गुणविशिष्टान्। विपरीतगुणं नोपनयेन्नदीक्षेत्, अन्वयादियुक्तं शिष्यमुपनयेत् इत्युक्तेः। गुणहीनस्यनिषेधः सिद्धः, पुन निषेधवचनं नियमार्थं; तेन विपरीतगुणं नोपनयेदेव ॥ १ ॥

शिष्यगुणसम्पदमभिधाय उपनयनविधिं वक्तुमाह;—उपनयनीयस्त्वि-

नक्षत्रेषु प्रशस्तायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्त्रं स्थण्डिलमुपलिप्य गोमयेन दर्भैः संस्तीर्य्य पुष्पैर्लाजभक्तै रत्नैश्च देवताः पूजयित्वा विप्रान् भिषजश्च, तत्रोल्लिख्याऽभ्युक्ष्य च दक्षिणतो ब्राह्मणं स्थापयित्वाग्निमुपसमाधाय खदिरपलाशदेवदारुविल्वानां समिद्भिश्चतुर्णां वा क्षीरवृक्षाणां न्यग्रोधोऽदुम्बराश्वत्थमधूकानां दधिमधुघृताक्ताभिर्दार्वी-

त्यादि। उपनयनीयं ब्राह्मणमित्यादि। उपनयनीयं उपनयार्हं पूर्वाभिहित-गुणसम्पन्नं ब्राह्मणं शिष्यं भिषक् स्वाहाकारं कारयेदिति सम्बन्धः। कदा-कारयेदित्याह;—प्रशस्तेष्वित्यादि। किं कृत्वेत्याह,-प्रशस्तायामिति। तदनु रत्नपुष्पेत्यादि। ततश्च तत्रोल्लिख्येत्यादि। तदनन्तरमग्निमुपसमाधाय खदिरादीनां क्षीरवृक्षाणां वा दधिमधुघृताक्ताभिः समिद्भिः कृत्वा दार्वीहोमिकेन विधिना जुहुयात् तथा सप्रणवाभि र्महाव्याहृतिभिरुप-लक्षिताः स्रुवेण कृत्वा आज्याहुतीरेव जुहुयादिति सम्बन्धः। अन्ये तु उपनयनीयस्तु ब्राह्मण इति पठन्ति व्याख्यानयन्ति च। उपनयनीय इति कर्त्तर्य्यनीयप्रयोगः। तेन उपनेता ब्राह्मण इदं इदं कृत्वा आज्याहुती-र्जुहुयात् इति क्रियापदेन सम्बन्धः। प्राक् ब्राह्मणग्रहणं, वर्णेषु मध्ये तस्य श्रेष्ठत्वात्। प्रशस्तेषु तिथि-करण-मुहूर्त्त-नक्षत्रेष्विति तिथयः प्रतिपदादयः, करणानि बव-बालवादीनि, मुहूर्त्तास्त्रिंशत् शिवाद्या अनिलपर्यन्ताः, नक्ष-त्राणि अश्विनीप्रभृतीनि ; एषां प्रशस्तत्वं ज्योतिःशास्त्रविदां वचनादुन्नेयं। प्रशस्तायां दिशि प्राच्यामुदीच्यां वा। चतुरस्त्रं चतुष्कोणं, गोमयेन गोपुरी-षेण, स्थण्डिलं व्रतसाधन-पिण्डिका, गोचर्म्ममात्रभूप्रदेशः स्थण्डिलमित्यन्ये, एके चतुर्हस्तस्थाने गोचर्म्ममात्रमिति पठन्ति, पठित्वा गोचर्म्ममात्रस्थण्डि-लमिति व्याख्यानं कुर्वन्ति ; गोचर्म्ममात्रं चतुर्हस्तप्रमाणं स्थण्डिलं संस्कृता भूः। तत्रेति तस्मिन् स्थण्डिले उल्लिख्य लेखां कृत्वा अभ्युक्ष्य जलेन सिक्त्वा अग्निमुपसमाधाय सन्निधाने आरोप्य। चतुर्णां वा क्षीरवृक्षाणा-मिति न्यग्रोधोदुम्बराश्वत्थमधूकादीणां। दार्वीहोमिकेन विधिना इति

होमिकेन विधिना स्रुवेणाज्याहुतीर्जुहुयात् सप्रणवाभि-र्महाव्याहृतिभिः। ततः प्रतिदैवतमृषींश्च स्वाहाकारञ्च कुर्य्यात् शिष्यमपि कारयेत्। ब्राह्मणस्त्रयाणां वर्णानामुप नयनं कर्त्तुमर्हति, राजन्यो द्वयस्य, वैश्यो वैश्यस्यैवेति। शूद्र मपि कुलगुणसम्पन्नं मन्त्रवर्जमनुपनीतमध्यापयेदित्येके।२।

ततोऽग्निं त्रिःपरिणीयाग्निसाक्षिकं शिष्यं ब्रूयात्,— कामक्रोधलोभमोहमानाहङ्कारेर्षापारुष्यपैशुन्यानृताल-

दार्वी-होमप्रोक्तकल्पेन। दार्वीहोमिकविधिस्तु ब्राह्मणां छन्दोविदां प्रसिद्धः। सप्रणवाभिः सोङ्काराभिः महाव्याहृतिभिर्भूःस्वाहेत्यादिभिः। तथाहि ओं भूः स्वाहा, ओं भुवः स्वाहा, ओं स्वः स्वाहा, ओं भूर्भुवः स्वःस्वाहा इति। स्रुवेणाज्याहुतीर्जुहुयादिति दारुहस्तकेन घृताहुतीर्दद्यात्। प्रतिदैवतमृषींश्चेति चकारात् ऋषिंश्चेत्यत्रापि प्रतिशब्दः सम्बध्यते; तेन प्रतिदैवतं प्रतिऋषीनित्यर्थः। तत्र प्रतिदैवतं ब्रह्मणे स्वाहा, प्रजापतये स्वाहा, अश्विभ्यां स्वाहा, इन्द्राय स्वाहा। प्रतिऋषीनिति धन्वन्तरये स्वाहा, भरद्वाजाय स्वाहा, आत्रेयाय स्वाहा इत्यादि। ब्राह्मणस्त्रयाणां वर्णानामुपनयनं कर्तुमर्हति। अन्ये तु अस्याग्रे राजन्यो द्वयस्य, वैश्यो वैश्यस्यैवेति पठन्ति; स च निबन्धैरभाषीकृतः। शूद्रमिति कुलगुण-सम्पन्नं कुलवयःशौचादिशिष्यगुणसंयुक्तं, अनुपनीत दीक्षारहितं, शूद्रमपि गुणसम्पन्नं मन्त्रवर्जमध्यापयेदित्येके इति केचित् पठन्ति॥ २॥

ब्रूयादिति त्रिः परिणीय त्रीण् वारान् प्रदक्षिणीकृत्य अग्निसाक्षिकं शिष्यं ब्रूयादिति अग्निसाक्षिकं यथा स्यादेवं शिष्यं ब्रूयात्। किं ब्रूया-दित्याह;—कामादीन् हित्वा मत्प्रियहितेषु वर्त्तितव्यमिति। कामो विशिष्टस्त्रीविषयस्पर्शसङ्कल्पः। अथवा शब्दादिषु ग्रहणप्रवृत्तिर्वा सर्वा-न्यवहृतस्नेहो वा कामः। क्रोधः परस्यापकारपूर्वकं हृदयस्य तेजः। लोभः परस्व ग्रहणेच्छा। मोहः तत्त्वज्ञानमूढता, सा पुनस्त्रिभिः कारणैः, अज्ञानात्

स्यायशस्यानि हित्वा नीचनखरोमणा शुचिना कषाय-वाससा सत्यव्रतब्रह्मचर्य्याभिवादनतत्परेणाऽवश्यं भवितव्यं, मदनुमत-स्थान-गमन-शयनाशन-भोजनाध्ययन-परेण भूत्वा मत्प्रियहितेषु वर्त्तितव्यं। अतोऽन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या न च प्राकाम्यं प्राप्नोति। अहं वा त्वयि सम्यग्वर्त्तमाने यद्यन्यथादर्शी स्यामेनोभाग्भवेयमफलविद्यश्च ॥ ३ ॥

द्विजगुरुदरिद्रमित्रप्रव्रजितोपनतसाध्वनाथाभ्युपगतानां चात्मबान्धवानामिव स्वभेषजैः प्रतिकर्त्तव्यमेवं साधु भवति।

संशयज्ञानात् मिथ्याज्ञानाच्च। मानः सर्व्वतोत्कर्षणात्मनो ज्ञानं। कार्य्ये परामर्षतोऽहमिति प्रवृत्तिरहङ्कारः। ईर्षा परसम्पत्तावसहिष्णुता। पारुष्यं वाग्रूक्षता। पैशुन्यं सूचकता (खलता)। अनृतमसत्यं। आलस्यं कर्म्मणि अनुत्साहः। अयशस्यानि वाच्यस्थानप्रवर्त्तनानि। हित्वा परित्यज्य। नीचनखरोम्नेति*कृन्तत्वान्नीचमल्पं नखादि यस्य स तथा तेन। सत्यव्रत-ब्रह्मचर्य्याभिवादनतत्परेणेति;—तत्परशब्दः सत्यादिभिः प्रत्येकं सम्बध्यते, ब्रह्मचर्य्यं समस्तेन्द्रियसंयमः। अवश्यमिति। नान्यथेत्यर्थः। मत्प्रिय-हितेषु वर्त्तितव्यमिति। मदनुमतानि मत्कथितानीत्यर्थः। स्थानादिपरेण भूत्वा तन्निष्ठेन भूत्वा। प्राकाम्यं प्रसिद्धिं। शिष्यप्रवृत्तिमात्मविषये नियम्य शिष्यविषये आत्मप्रवृत्तिं नियमयन्नाह ;—अहमिति। यद्यन्यथा-दर्शी स्यां अन्यप्रकारदर्शी भवेयं एनोभाग्भवेयं तदा पापभाजनं भवामी-त्यर्थः ॥ ३ ॥

शिष्यस्य आतुरे प्रवृत्तिं नियमयन्नाह ;—द्विजेति। प्रव्रजिताः तप-स्विनः। उपनताः सन्निधाने प्रणतियुक्ताः। साधवः सत्पुरुषाः। अनाथा एकाकिनः (अभिभावकविरहिताः)। अभ्युपगता दूरादायाताः, प्रतिकर्त्तव्यं प्रतिविधातव्यं, एते त्वया सन्तोषीकृताः इत्यर्थः। एवं साधु भवति

व्याधशाकुनिकपतितपापकारिणां न च प्रतिकर्तव्यं एवं विद्या प्रकाशते मित्रयशोधर्मार्थकामांश्च प्राप्नोति ॥ ४॥

भवतश्चात्र । कृष्णेऽष्टमी तन्निधनेऽहनि द्वे कृष्णेतरेऽप्येवमहर्दिसन्ध्यं । अकालविद्युत्स्तनयित्नुघोषे स्वतन्त्रराष्ट्रक्षितिपव्यथासु । श्मशानयानायतनाहवेषु महो-

अनेन प्रकारेण शोभनं भवति । इदानीमप्रवृत्तिं दर्शयन्नाह ;—व्याधेति । व्याधादिषु सत्यपि अर्थलाभे न प्रतिकर्तव्यं । व्याधा वागुरिकादयः । शाकुनिकाः पक्षिणां हन्तारः । पतिताः स्वकीयाचारभ्रष्टाः । पापकारिणो गुरुतल्पगादयः (गुरुपत्नीगमनादि-पापाचारिणः) । न प्रतिकर्तव्यं नोपचरणीयं । एवं विद्या प्रकाशते अनेन प्रकारेण विद्या स्वयमेव प्रकाशं याति, केचित् प्रकाश्यत इति पठन्ति ॥ ४ ॥

इदानीमनध्ययनकालमाह ;—कृष्णेति । कृष्णेऽष्टमीति कृष्णपक्षे या अष्टमी । तन्निधने कृष्णपक्षावसाने । अहनि द्वे चतुर्दश्यमावास्ये । शुक्ले शुक्लपक्षेऽपि तथा तेनैव प्रकारेण नाध्येयमिति । तेनात्रापि अष्टमी-चतुर्दशी—पौर्णमासीषु नाध्येयमिति । तत्प्रतिपदोस्तु पाठनिषेधः, अन्येषु च येषु विप्रा नाधीयत इतत्रनेन गम्यते । अन्ये तु प्रतिपदावन्यथा गर्हितं व्याख्यानयन्ति । तन्निधन इति कृष्णपक्षावसाने अहनि नाध्येयं । तेन अमावस्या गृहीता । अहनी द्वे इति कृष्णपक्षावसानसमीपे यौ द्वौ दिवसौ तयोरपि नाधेयं । तेन चतुर्दशी-प्रतिपदौ । अहानि नियम्य अहरवयवान्नियन्तुमाह ;—अहर्दिसन्ध्यमिति । अहनि द्वयोः सन्ध्ययो नाध्येयमिति । अकालविद्युत्स्तनयित्नुघोष इति अकाल-शब्दो विद्युत्—स्तनयित्नुघोषाभ्यां सह सम्बध्यते । अनार्त्तवा विद्युत्, विद्युद्ग्रहणमुपलक्षणं । तेनाकालिकी वृष्टिः गृह्यते । अकालवृष्टिः अनृतुवृष्टिः, सा तु हेमन्त-शिशिरयोः । तथाचोक्तं "पौषादिचतुरो मासान् स्मृता वृष्टिरकालिकी ।" अकालस्तनयित्नुघोष इति अनृतुमेघगर्जितं । अन्ये सन्ध्या-

त्सवौत्पातिकदर्शनेषु । नाधेयमन्येषु च येषु विप्रा नाधीयते नाशुचिना च नित्यं ॥ ५ ॥

मेघगर्ज्जितमाचष्टे । सूतकाद्यङ्गिपर्य्यायास्विति सूतकादिभिः प्रत्येकं सम्बध्यते ; तेनात्मीयलोकदेशभूपपीड़ासु । श्मशानयानायतनाहवेष्विति श्मशानं मृतशरीरदाहस्थानं, यानं हस्त्यादि, आयतनं बधस्थानं, आहवः संग्रामः । महोत्सवौत्पातिकदर्शनेष्विति महोत्सवाः शक्रोत्सवादयः । तथा हि भाद्रपद-पौर्णमास्यां शक्रस्य महोत्सवः, आश्विन्यां कौमुदीमहोत्सवः, उत्तरायणसंक्रान्तौ कुवेरमहोत्सवः, चैत्रशुक्लत्रयोदश्यां मदनमहोत्सवः इत्यादयः । उत्पातः अनिष्टसूचकनिर्घातादि, अन्ये तु उत्पातं त्रिविधमाचक्षते,—भौमं, आन्तरीक्षं, दिव्यमिति । तेषु मध्ये भौम उत्पातः स्थिरा-जातः (पृथ्वीसम्भूतः)। आन्तरीक्षं गन्धर्व्वपुरं इन्द्रचापादि, दिव्यः ग्रहनक्षत्रवैकृतौत्पातादिश्च । उत्पातएव औत्पातिकः । अनुक्तसंग्रहार्थमाह ;—नाध्येयमन्येषु चेत्यादि । ते च कालविशेषाः छन्दोगानाद्देवाऽवगन्तव्या इति, अन्ये तत्र उत् शिष्यादि भोजवचनमाश्रयन्ति । कृष्णाष्टमीति केचित् पठन्ति ॥ ५ ॥

इति सूत्रस्थाने निबन्धसंग्रहे द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः।

—— o ——

अथातोऽध्ययनसम्प्रदानीयमध्यायं व्याख्यास्यामः।

प्रागभिहितं सविंशमध्यायशतं पञ्चसु स्थानेषु। तत्र सूत्रस्थानमध्यायाः षट्चत्वारिंशत्। षोड़श निदानानि। दश शारीराणि। चत्वारिंशच्चिकित्सितानि। अष्टौ कल्पाः। तदुत्तरं षट्षष्टिः॥ १॥

वेदोत्पत्तिः शिष्यनयस्तथाध्ययनदानिकः।
प्रभाषणाग्रहरणाहतुचर्य्याथ यान्त्रिकः॥
शस्त्रावचारणं योग्या विशिखा क्षारकल्पनं।
अग्निकर्म्म-जलौकाख्यावध्यायौ रक्तवर्णनं॥
दोषधातुमलादीनां विज्ञानाध्याय एव च।
कर्णव्यधामपक्वैषावालेपो व्रणदापासनं॥

अथात इति। अधीयत इत्यध्ययनं शास्त्रं। सम्यक् प्रविभज्य दानं सम्प्रदानं अविभक्तमध्ययनं दातुमशक्यं अतस्तद्विभागायाह। अस्य च वाक्यस्यार्थं आद्याध्याये उक्तः, प्रतिस्थानमध्याये उक्तः। प्रतिस्थानमध्यायान् संख्यातुमाह; तत्रेति॥ १॥

प्रतिस्थानोक्तानामध्यायानां नामानि निर्द्देष्टुमाह,—वेदोत्पत्तिरिति। शिष्यनयः शिष्योपनयनीयः। अध्ययनदानिकः अध्ययनसम्प्रदानीयः। प्रभाषणः प्रभाषणीयः। अग्रहरणः अग्रोपहरणीयः। ऋतुचर्य्या ऋतुचर्य्याध्यायः। यान्त्रिको यन्त्रविधिः। शस्त्रावचारणः शस्त्रावचारणीयः। योग्या योग्यासूत्रीयः। विशिखा विशिखानुप्रवेशनीयः। क्षारकल्पनं क्षारपाकविधिः। अग्निकर्म्म अग्निकर्म्मविधिः। जलौकाख्यः जलौकावचारणीयः। रक्तवर्णं शोणितवर्णनीयोऽध्यायः। दोषधातुमलादीनां

हिताहितो व्रणप्रश्नो व्रणास्रावश्च यः पृथक्।
कृताकृतविधि र्व्याधिसमुद्देशीय एव च॥
विनिश्चयः शस्त्रविधौ प्रनष्टज्ञानिकस्तथा।
शल्योद्धृतिर्व्रणज्ञानं दूतस्वप्ननिदर्शनं॥
पञ्चेन्द्रियं तथा च्छाया स्वभावाद्दैकृतं तथा।
वारणो युक्तसेनीय आतुरक्रममिश्रकौ॥
भूमिभागो द्रव्यगणः संशुद्धौ शमने च यः।
द्रव्यादीनाञ्च विज्ञानं विशेषो द्रव्यगोऽपरः॥
रसज्ञानं वमनार्थमध्यायोरेचनाय च।
द्रवद्रव्यविधि स्तद्वदन्नपानविधिस्तथा॥

विज्ञानाध्यायः दोषधातुमलक्षयवृद्धिविज्ञानीयः। कर्णव्यधः कर्णव्यधबन्धविधिः। आमपक्वैष आमपक्वैषणीयः। आलेपः व्रणालेपनबन्धविधिः॥ अव्रणयुपासनं अव्रणितोपासनीयः। हिताहितः हिताहितीयः। शेषास्तु निर्दिष्टा नाम प्रसिद्धाः। व्रणास्रावः व्रणास्रावविज्ञानीयः। शस्त्रविधौ विनिश्चयः अष्टविधशस्त्रकर्म्माध्यायः। प्रणष्टविज्ञानिकः प्रणष्टशल्यविज्ञानीयः। शल्योद्धृतिः शल्योपनयनीयः। व्रणज्ञानं विपरीताविपरीतव्रणविज्ञानीयः। दूत-स्वप्न-निदर्शनं विपरीताविपरीत-दूत-स्वप्न-निदर्शनाध्यायः। पञ्चेन्द्रियं पञ्चेन्द्रियार्थविप्रतिपत्तिः। छाया छायाविप्रतिपत्तिः। स्वभावाद्वैकृतं स्वभावविप्रतिपत्तिः। वारणोऽवारणीयाध्यायः। आतुरक्रमः आतुरोपक्रमणीयाध्यायः। भूमिभागो भूमिप्रविभागीयः। द्रव्यगणोद्रव्यसंग्रहणीयः। संशुद्धौ शमने च यः संशोधनसंशमनीयः। द्रव्यादीनाञ्च विज्ञानं द्रव्यगुणरसवीर्यविपाकविज्ञानीयः। विशेषो द्रव्यगोपरः द्रव्यविशेषविज्ञापनीयः। रसज्ञानं रसज्ञानीयः। वमनार्थमध्यायः वमनद्रव्यविकल्पविज्ञानीयः। रेचनाय च विरेचनद्रव्यविकल्पविज्ञानीयः। शेषास्तु निर्दिष्टा नाम प्रसिद्धा इति नोक्ताः। आतुरक्रम-मिश्रकाविति केचित् पठन्ति,तन्न यतः पूर्व्वनिबन्ध-

सूचनात् सूत्रणाच्चैव सन्धानाच्चार्थसन्ततेः ।
षट् चत्वारिंशदध्यायं सूत्रस्थानं प्रचक्षते ॥ २ ॥
वातव्याधिकमर्शांसि साश्मरिश्च भगन्दरः ।
कुष्ठमेहोदरमूढ़विद्रध्यः परिसर्पणम् ॥
ग्रन्थिवृद्धिभग्नशूकाः तु द्राश्च मुखरोगिकं ।
हेतुलक्षणनिर्देशान्निदानानीति षोड़श ॥ ३ ॥
भूतचिन्तारजःशुद्धिर्गर्भावक्रान्तिरेव च ।
व्याकरणञ्च गर्भस्य शरीरस्य च यत् स्मृतम् ॥
प्रत्येकं मर्म्मनिर्देशः सिरावर्णनमेव च ।

कारैरेषक्रमोऽनाङ्गीकृतः। सूत्रस्थानस्य निरुक्तिं कर्त्तुमाह;—सूचनादिति। सूचनात् लेशतोऽर्थप्रकाशनात्। सूत्रणात् अर्थानां यथास्थानं विनिवेशनात्। अर्थसन्ततेः अर्थसमूहस्य। सूत्रस्थानमध्यायाः षट्चत्वारिंशदिति प्रागेव संख्यानिर्देशात्, पुनः षट्चत्वारिंशदध्यायं सूत्रस्थानमिति। तेन द्रवद्रव्यान्नपानकालोदकगोरसतैलादिप्रकरणानां प्रत्येकमध्यायत्वं निराकृतं ॥ २ ॥

कानि पुनस्तानि षोड़श निदानानीत्याह;—वातेति। मूढ़गर्भादीनामेकादशेन सूचनं लाघवार्थं; एवं उत्तरत्रापि बोद्धव्यं। मूढ़ो मूढ़गर्भः। परिसर्पणं विसर्पनाड़ीस्तनरोगनिदानं। ग्रन्थिरिति ग्रन्थ्यपच्यर्बुद-गलगण्ड-निदानं। वृद्धिरिति वृद्ध्युपदंशश्लीपदनिदानं। शूकः शूकदोषनिदानं। निदान—निरुक्तिं प्रतिपादयन्नाह ;—हेत्विति हेतव इति। कारक-हेतवः, ते बलवद्विग्रह-क्रोध-दिवास्वप्नादयः। लक्षणानि ज्ञापकहेतवः, ते च पूर्व्वरूप-रूपोपशयसम्प्राप्तयः। निर्देशात् विवरणात् ॥ ३ ॥

कानि पुनः शारीराणीत्याह ;—भूतेति। भूतचिन्ता सर्व्वभूतचिन्ता-शारीरं। रजःशुद्धिः शुक्रशोणितशुद्धिशारीरं। गर्भावक्रान्तिरिति अनेनैव नाम्ना प्रसिद्धा। गर्भावक्रान्तिः गर्भान्तःप्रवेश इत्यर्थः। व्याकरणञ्च

सिराव्यधो धमनीनां गर्भिण्या व्याकृतिस्तथा ॥
निर्द्दिष्टानि दशैतानि शारीराणि महर्षिणा।
विज्ञानार्थं शरीरस्य भिषजां योगिनामपि ॥ ४ ॥
द्विव्रणीयो व्रणः सद्यो भग्नानां वातरोगिकं।
महावातिकमर्शांसि साश्मरिश्च भगन्दरः ॥
कुष्ठानां महताञ्चापि मैहिकं पैडिकन्तथा।
मधुमेहचिकित्सा च तथाचोदरिणामपि ॥
मूढ़गर्भचिकित्सा च विद्रधीनां विसर्पिणां।
ग्रन्थिवृद्ध्युपदंशानान्तथा न त्त्युद्ररोगिकं ॥
शूकदोषचिकित्सा च तथाच मुखरोगिणां।
शोफस्यानागतानाञ्च निषेधो मिश्रकन्तथा॥
वाजीकरञ्च यत्क्षीणे सर्व्वोपाधशमोपि च।

गर्भस्त्र गर्भव्याकरणशारीरं। सिराव्यध: सिराव्यधविधिशारीरं। व्याकृतिशब्द: धमनीगर्भिणीभ्यां प्रतेरक सम्बध्यते। तेन धमनीव्याकृति: धमनीव्याकरण-शारीरं। गर्भिणीव्याकृति: गर्भिणीव्याकरणशारीरं ॥ महर्षिणेति महच्छब्द: पूजावचन:। तेन पूजेन धन्वन्तरिणा विज्ञानार्थं विशिष्ट-ज्ञानार्थं। योग: समाधि: स विद्यते येषां ते योगिन: ॥ ४ ॥

कानि पुनश्चिकित्सितानि इत्याह ;—द्विव्रणीयरिति। व्रण: सद्य: सद्यो-व्रणचिकित्सितं। वातरोगिकं वातव्याधिचिकित्सितं। महावातिकं महावातव्याधिचिकित्सितं। महताञ्चापि महाकुष्ठचिकित्सितं। मैहिकं प्रमेहचिकित्सितं। पैड़िकं प्रमेहपिड़काचिकित्सितं। विसर्पिणां विसर्प-नाड़ी-स्तनरोगचिकित्सितं। ग्रन्थिरिति ग्रन्थ्यपचुर्द्दगलगण्डचिकित्सितं। वृद्ध्युपदंशानां वृद्ध्युपदंशश्लीपदचिकित्सितं। अनागतानां निषेध: अनागतावाधप्रतिषेधचिकित्सितं। मिश्रकं मिश्रकचिकित्सितं। वाजी-करञ्च यत्क्षीणे क्षीणवलीयं वाजीकरणचिकित्सितं। सर्व्वोपाध-

मेधायुष्करणञ्चापि स्वभावव्याधिवारणं ॥
निवृत्तसन्तापकरं कीर्त्तितञ्च रसायनं ।
स्नेहोपयौगिकः स्वेदो वमने सविरेचने ॥
तयोर्व्यापच्चिकित्सा च नेत्रवस्तिविभागिकः ।
नेत्रवस्तिविपत्सिद्धिस्तथाचोत्तरवस्तिकः ॥
निरूहक्रमसंज्ञश्च तथैवातुरसंज्ञकः ।
धूमनस्यविधिश्चाग्रश्चत्वारिंशदिति स्मृताः ॥
प्रायश्चित्तं प्रशमनं चिकित्सा शान्तिकर्म्म च ।
पर्य्यायास्तस्य निर्द्दिष्टाश्चिकित्सास्थानमुच्यते ॥ ५ ॥
अन्नस्य रक्षा विज्ञानं स्थावरस्येतरस्य च ।
सर्पदष्टविषज्ञानं तस्यैव च चिकित्सितं ॥
दुन्दुभेर्मूषिकाणाञ्च कीटानां कल्प एव च ।

शमोऽपि सर्व्वाबाधशमनीयं रसायनं। मेधायुष्करणञ्चापि मेधायुःरसायनं। स्वभावव्याधिवारणं स्वभावव्याधिप्रतिषेधीयं रसायनं। निवृत्तसन्तापकरं निवृत्तिसन्तापीयं रसायनं। स्वेदः स्वेदावचारणीयं चिकित्सितं। वमने च विरेचने वमनविरेचनव्यापच्चिकित्सितं। नेत्रवस्तिविभागिकः नेत्रवस्तिप्रमाणविभागचिकित्सितं। नेत्रवस्तिविपत्सिद्धिः नेत्रवस्तिव्यापच्चिकित्सितं। तथा चोत्तरवस्तिकं अनुवासनोत्तरवस्तिचिकित्सितं। निरूहक्रमसंज्ञश्च निरूहोपक्रमचिकित्सितं। तथैवातुरसंज्ञितः आतुरोपद्रवचिकित्सितं। धूमनस्य-विधिश्चाग्रः धूमनस्यकवड़ग्रहचिकित्सितं। अग्रे भवो ऽग्रः। चिकित्सितस्य पर्य्यायान्तरं दर्शयितुमाह ;—प्रायश्चित्तमिति। एते प्रायश्चित्तादयस्तस्य चिकित्सितस्य पर्य्यायाः। तस्यैव पर्य्यायविनिर्द्दिष्टस्य चिकित्सितस्य निर्द्देशात् विवरणाच्चिकित्सास्थानं कथ्यते ॥ ५ ॥

के पुनः कल्पा इत्याह ;—अन्नस्येति। अन्नस्य रक्षाविज्ञानं अन्नपानरक्षाविज्ञानीयः कल्पः। स्थावरस्य-स्थावरविषविज्ञानीयः कल्पः।

अष्टौ कल्पाः समाख्याता विषभेषजकल्पनात्।
अध्यायानां शतं विंशमेवमेतदुदीरितं ॥ ६ ॥
अतःपरं स्वनाम्नैव तन्त्रमुत्तरमुच्यते ॥
अधिकृत्य कृतं यस्मात्तन्त्रमेतदुपद्रवान्।
औपद्रविक इत्येष तस्याग्यत्वान्निरुच्यते ॥
सन्धौ वर्त्मनि शुक्ले च कृष्णे सर्व्वत्र दृष्टिषु।
संविज्ञानार्थमध्याया गदानान्तु प्रति प्रति ॥
चिकित्साप्रविभागीयो वाताभिष्यन्दवारणः।
पैत्तस्य श्लैष्मिकस्यापि रौधिरस्य तथैवच ॥

इतरस्य च जङ्गमविषविज्ञानीयः कल्पः। तस्यैव चिकित्सितं। दुन्दुभेः दुन्दुभिस्वनीयः कल्पः। मूषिकाणाञ्च मूषिककल्पः॥ ६॥

कल्पनिवृत्तिं प्रतिपाद्याह;—अतःपरमिति। उक्तस्थानपञ्चकादनन्तरं स्वनाम्नैव स्वसंज्ञयैव तन्त्रमुच्यते। किन्त्वात्मीयमस्य नाम येनोच्यते तत्तन्त्रमाह उत्तरतन्त्रमिति, न ह्यन्यतन्त्रं संज्ञया। कुतः पुनरौपद्रविकाध्यायस्योत्तरतन्त्रस्यादौ स्थितस्य औपद्रविक इति नाम कृतमित्याह;—अधिकृतेत्यादि। अधिकृत्य अङ्गीकृत्य। उपद्रवान् रोगान्। यस्मात् तन्त्रमेतत् उत्तरतन्त्रं कृतं अतस्तस्योत्तरतन्त्रस्याग्यत्वात् प्रधानत्वात् औपद्रविक इति नाम कृतमित्यर्थः॥ सन्धौवर्त्मनीत्यादिषु गतानां गदानान्तु प्रति प्रति सम्यक् विज्ञानं अध्याया इति सम्बन्धः। तेनायमर्थः सन्धाविति सन्धिगतरोगविज्ञानीयाध्यायः। वर्त्मनीति वर्त्मगतरोगविज्ञानीयाध्यायः। सर्व्वत्रेति सर्व्वगतरोगविज्ञानीयाध्यायः। कृष्ण इति कृष्णगतरोगविज्ञानीयाध्यायः। शुक्लश्चेति शुक्लगतरोगविज्ञानीयाध्यायः। दृष्टिष्विति दृष्टिगतरोगविज्ञानीयाध्यायः। पैत्तस्येत्यादिषु अभिष्यन्दवारण इति सम्बन्धः। तेन पैत्तिकस्येति पित्ताभिष्यन्दप्रतिषेधाध्यायः। श्लैष्मिकस्येति श्लेष्माभिष्यन्दप्रतिषेधाध्यायः। रौधिरस्येति

लेख्यभेद्यनिषेधौ च छेद्यानां वर्त्मदृष्टिषु।
क्रियाकल्पोऽभिघातश्च कर्णोत्थास्तच्चिकित्सितं॥
घ्राणोत्थानाञ्च विज्ञानं यद्गदप्रतिषेधनं।
प्रतिश्यायनिषेधश्च शिरोगदविवेचनं।
चिकित्सा तद्गदानाञ्च शालाक्यं तन्त्रमुच्यते॥ ७॥
नवग्रहाकृतिज्ञानं स्कन्दस्य च निषेधनं।
अपस्मारशकुन्योश्च रेवत्याश्च पुनःपृथक्॥
पूतनायास्तथान्धाया मण्डिका शीतपूतना।
नैगमेषचिकित्सा च ग्रहोत्पत्तिः सयोनिजा।

रक्ताभिष्यन्दप्रतिषेधाध्याय। छेद्यानामिति छेद्यरोगप्रतिषेधाध्यायः। लेख्यभेद्यनिषेधौ चेति लेख्यप्रतिषेधाध्यायः, भेद्यरोगप्रतिषेधाध्यायः। वर्त्मस्विति वर्त्मरोगप्रतिषेधाध्यायः। दृष्टिष्विति दृष्टिगतरोगप्रतिषेधाध्यायः। अभिघातश्चेति नयनाभिघातप्रतिषेधाध्यायः। कर्णोत्था इति कर्णगतरोगविज्ञानीयाध्यायः। तच्चिकित्सितमिति कर्णगतरोगप्रतिषेधाध्यायः। घ्राणोत्थानाञ्च विज्ञानमिति नासागतरोगविज्ञानीयाध्यायः। प्रतिश्यायनिषेधश्चेति प्रतिश्यायप्रतिषेधाध्यायः। शिरोगदविवेचनमिति शिरोगतरोगविज्ञानीयाध्यायः। चिकित्सा तद्गदानाञ्चेति शिरोरोगप्रतिषेधाध्यायः॥७॥

शालाक्यतन्त्रं समाप्य कुमारतन्त्रं दर्शयन्नाह—नवग्रहेति। स्कन्दस्य च निषेधनमिति स्कन्दग्रहप्रतिषेधाध्यायः। अपस्मारशकुन्योश्चेति स्कन्दापस्मारप्रतिषेधाध्यायः, शकुनीप्रतिषेधाध्यायः। रेवत्याश्च पुनः पृथगिति रेवतीप्रतिषेधाध्यायः। पूतनाया इति पूतनाप्रतिषेधाध्यायः। तथान्धाया इतत्रापि पूतनाशब्दः सम्बध्यते। तेन अन्धपूतनाप्रतिषेधाध्यायः। शीतपूतनेति शीतपूतनाप्रतिषेधाध्यायः। नैगमेषचिकित्सा चेति नैगमेषप्रतिषेधाध्यायः। ग्रहोत्पत्तिरिति ग्रहोत्पत्तिप्रतिषेधाध्यायः।

कौमारतन्त्रमित्येतच्छारीरेषु च कीर्त्तितं ॥ ८ ॥
ज्वरातिसारशोषाणां गुल्म-हृद्रोगिणामपि।
पाण्डूनां रक्तपित्तस्य मूर्च्छायाः पानजाश्च ये ॥
तृष्णायाम्छर्दिहिक्कानां निषेधः श्वासकासयोः।
स्वरभेदचिकित्सा च समुदावर्त्तिनोः पृथक् ॥
विसूचिकारोचकयोर्मूत्राघातविकृच्छ्रयोः।
इति कायचिकित्सायाः शेषमत्र प्रकीर्त्तितं ॥ ९ ॥
अमानुषनिषेधश्च तथापस्मारिकोऽपरः।
उन्मादप्रतिषेधश्च भूतविद्या निरुच्यते ॥ १० ॥
रसभेदाः स्वस्थवृत्ति र्युक्तयस्तान्त्रिकाश्च याः।

सयोनिजेति योनिव्यापत्प्रतिषेधाध्यायः। सशब्दः सहार्थः। इतिशब्दः कुमारतन्त्रपरिसमाप्तौ। किमेतत्तावदेव कुमारतन्त्रं अथवा अन्यदप्यस्तीति स्रष्ट आह शारीरेषु कीर्त्तितमिति। किन्तत् शारीरेषु उक्तं तद् यथा चिरजः शुद्धिर्गर्भावक्रान्तिरित्याह ॥८॥

का पुनरुत्तरतन्त्रे कायचिकित्सेति दर्शयन्नाह;—ज्वरेति। निषेधः प्रतिषेधः। सच ज्वरादिभिः सह प्रत्येकं सम्बध्यते। तेन ज्वरप्रतिषेधोऽतीसारप्रतिषेध इत्यादि द्रष्टव्यं। पानजाश्च ये इति मद्यपानजाश्च ये रोगास्तेषां प्रतिषेधः। एतेन पानात्ययप्रतिषेध इत्युक्तं। स्वरभेदप्रतिषेधः। मूत्राघातविकृच्छ्रयोरिति वि-शब्दः छन्दःपूर्त्तये। तेन मूत्राघातप्रतिषेधः मूत्रकृच्छ्रप्रतिषेधः। इति कायचिकित्सायाः शेषमत्र प्रकीर्त्तितं इति-शब्दः समाप्तौ, अत्र उत्तरतन्त्रे कायचिकित्सायाः शेषं प्रकीर्त्तितं निर्द्दिष्टं। शेषशब्देन शल्येऽपि निर्द्दिष्टमिति बोधयति ॥९॥

कायचिकित्सां समाप्य भूतविद्यां प्रतिपादयन्नाह;—अमानुषेति। अमानुषनिषेधः अमानुषवातप्रतिषेधः। आपस्मारिक अपस्मारप्रतिषेधः ॥१०॥

तन्त्रभूषणाध्यायानाह;—रसभेदा इति। रसभेदा रसभेदकल्पः।

दोषभेदा इति ज्ञेया अध्यायास्तन्त्रभूषणाः ॥ ११ ॥
श्रेष्ठत्वादुत्तरं ह्येतत्तन्त्रमाहुर्म्महर्षयः।
बह्वर्थसंग्रहाच्छ्रेष्ठमुत्तरञ्चापि पश्चिमं ॥
शालाक्यतन्त्रं कौमारञ्चिकित्सा कायिकी च या।
भूतविद्येति चत्वारि तन्त्रे तूत्तरसंज्ञिते ॥ १२ ॥
वाजीकरञ्चिकित्सासु रसायनविधिस्तथा।
विषतन्त्रं पुनः कल्पाः शल्यज्ञानं समन्ततः ॥
इत्यष्टाङ्गमिदं तन्त्रमादिदेवप्रकाशितं।
विधिनाधीत्य युञ्जाना भवन्ति प्राणदा भुवि ॥ १३ ॥

इति शब्दः समाप्तौ। एते अध्यायास्तन्त्रभूषणाः शास्त्रस्य अलङ्करणाः ॥ ११ ॥

पुनरुत्तरतन्त्रस्य निरुक्तिं प्रतिपादयन्नाह;—श्रेष्ठत्वादिति। एतत्तन्त्रं महर्षयः श्रेष्ठत्वादुत्तरं ब्रुवन्ति। कुतः पुनरस्य श्रेष्ठत्वमित्याह बह्वर्थसंग्रहात् श्रेष्ठमिति। शालाक्यकुमाराबाधकायचिकित्साभूतविद्यातन्त्रभूषणाध्यायनिर्द्दिष्टानामर्थानां संग्रहात् श्रेष्ठमुत्तरतन्त्रं। तस्य निरुक्तिं पक्षान्तरमाह उत्तरञ्चापि पश्चिममिति। पश्चिमत्वाद्वा इदं तन्त्रमुत्तरं। श्रेष्ठत्वादुत्तरं ह्येतदिति केचित् पठन्ति। पूर्व्वतन्त्रशेषत्वादिदं श्रेष्ठत्वाद्वा इति व्याख्यानयन्ति। अष्टाङ्गस्यायुर्वेदस्य विस्तरेण प्रतिपादितस्य संक्षेपेण तन्त्रद्वये अवस्थानं नियमयन्नाह इति चत्वारि तन्त्राणि उत्तरसंज्ञके तन्त्रे सन्ति ॥ १२ ॥

उत्तरतन्त्रे चतुर्णां तन्त्राणामवस्थानं प्रतिपाद्य पूर्व्वेऽपि शल्यतन्त्रे चतुर्णां तन्त्राणां अवस्थानं प्रतिपादयन्नाह;—वाजीकरमित्यादि। वाजीकरं चिकित्सासु यदुक्तं, तथा रसायनविधिश्च यश्चिकित्सासूक्तः, तथा विषतन्त्रं कल्पाः। कल्पस्थानोक्तं विषतन्त्रं तन्त्रमिदं पूर्व्वं शल्यतन्त्रे प्रतिपादितं। शल्यज्ञानं शल्याङ्गज्ञानं। समन्ततः सर्व्वत्र। इत्यनेन प्रकारेण आदिदेवप्रकाशितं धन्वन्तरिणा प्रकटीकृतं। युञ्जानाः प्रयोगं कुर्व्वाणाः ॥ १३ ॥

एतद्ध्यवश्यमध्येयमधीत्य च कर्माण्यवश्यमुपासितव्यमुभयज्ञो हि भिषग्राजार्हो भवति ॥ १३ ॥

भवन्ति चात्र ।

यस्तु केवलशास्त्रज्ञः कर्म्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरम्प्राप्य प्राप्य भीरुरिवाहवं ॥
यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रवहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधं चार्हति राजतः ॥
उभावेतावनिपुणावसमर्थौ स्वकर्मणि ।
अर्द्धवेदधरावेतावेकपक्षाविव द्विजौ ॥ १५ ॥
ओषध्योऽमृतकल्पास्तु शस्त्राशनिविषोपमाः ।

एतद्धीति एतत्तन्त्रं। हि स्फुटं। अवश्यमध्येयमिति निश्चयेन पठनीयं। उपासितव्यमिति अभ्यसनीयं। हि यस्मादर्थे। राजार्हो राजयोग्योभवति राजपूज्य इत्यर्थः ॥ १४ ॥

कर्म्मस्वपरिनिष्ठितः इति कर्म्मसु विषयेऽपरिनिष्ठितः अशिक्षितः इत्यर्थः। अदृष्टकर्म्मेत्यन्ये। आहवः संग्रामः। यः पुनः कर्म्मसु विषये सुशिक्षितः, शास्त्रवहिष्कृतः शास्त्रे च वहिर्भूतः। धार्ष्ट्यात् प्रागल्भ्यात् कर्म्म करोति। राजतः राज्ञः सकाशात् वधं चार्हति वधं प्राप्नोति॥ उभौ द्वौ एतौ अनिपुणौ अशिक्षितौ। स्वकर्म्मणि चिकित्सायां। अर्द्धवेदधरौ वेदशास्त्रोऽत्र ज्ञानार्थः ; तेन अर्द्धज्ञानधरौ। शास्त्रज्ञः कर्म्मज्ञो वा। एकाविव एतावर्द्धवेदधरौ स्वकर्म्मण्यसमर्थावाह। एतावेकपक्षाविव द्विजाविति यथैकपक्षौ द्विजौ पक्षिणौ एतौ सर्वतोगमने असमर्थौ तद्वदित्यर्थः ॥ १५ ॥

कुतः कारणात् शास्त्रवहिष्कृतो वधमर्हति राजत इति हेतुं प्रतिपादयन्नाह ;—ओषधैरिति। अमृतकल्पा अमृततुल्याः। अज्ञैरुपहृता औषधविषयाद्यैः प्रयुक्ताः। औषधेरज्ञानञ्च शास्त्रविहीनत्वात्। तथाचोक्तं "यस्तु

भवन्त्यज्ञैरुपहृतास्तस्मादेतौ विवर्जयेत्॥ १६॥
स्नेहादिष्वनभिज्ञो यः छेद्यादिषु च कर्मसु।
स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः॥ १७॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने।

कर्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृत” इति। ओषधीनां ज्ञानमपि नाम-रूपयोगभेदात् त्रिविधं, तत्र नामादिषु मध्ये योगज्ञानं प्रधानं। इदञ्च योगज्ञानं शास्त्रज्ञाने सति भवति। तस्मादेतौ विवर्जयेदिति एतौ ज्ञान-शास्त्रबहिष्कृतौ विशेषेण परिहरेत्। दृष्ट्वा तत्त्वं योगोपादानञ्च ऊर्द्ध्वाध उभयभाग-व्यापन्निदर्शनार्थमित्येके। संशोधनपाचनसंशमनी-यौषधव्यापन्निदर्शनार्थमित्यपरे। अनेककालानेकावस्थानत्वसूचनार्थमित्यन्ये। इतरे तत्र श्लोकाभ्यां अन्यथा समाधानं ददति। तथाहि अथ चैतन्नयं यद्वन्मिलितं स्वतुप्रकारणं, दुःप्रयुक्तास्तु तास्तद्वन्नियतं स्वतुप्रकारणं। अप्रसिद्धं क्वचित् किञ्चिदित्यर्थं वाप्यतन्नयं। गरुड़ाधिष्ठिते देशे विषमप्य-विषं तथा। अनेन पुनः ओषध्योऽमृतकल्पास्तथा स्नेहादिष्वनभिज्ञो य इत्यत्र उभयत उभावपि कर्म्मशास्त्रानभिज्ञावधिकुर्व्वते, तस्मादेतौ विवर्जयेदिति पठन्ति, एतौ पूर्व्वोक्तौ केवलशास्त्रज्ञ-कर्म्मज्ञौ विवर्जयेदिति व्याख्यानयन्ति। एष पक्षः पञ्जिकायां विस्तरेणाप्याहृतः। यद्यपि ओषधीशब्दः फलपाका-न्तेषु द्रव्येषु वर्त्तते तथाप्यत्र समस्तवाची ग्रहीतव्यः। कुतः विशेषस्यानु-पादानात्॥ १६॥

इदानीं शास्त्रज्ञं कर्म्मानभिज्ञमधिकृत्याह;—स्नेहादिष्विति। छेद्या-दिभ्यः स्नेहादीनि कर्म्माणि प्रागुपयुज्यन्ते, इति स्नेहादीनां प्रागुपादानं। केचिच्छेद्यादीनां ग्रहणं प्राक् पठन्ति। कुवैद्य इति कुशब्दः कुत्सावचनः। तेन शास्त्रज्ञानामपि कर्म्माज्ञानेन कुत्सितत्वं प्रतिपादयति। नृपदोषत इति राज्ञामयं दोषः, येन “नाज्ञातकर्म्माणं विशिखायै प्रवेशयेत्” इति। केचित् कर्त्तृपदं सर्व्वत्रैव वचनान्तं पठन्ति छेद्यादिष्वनभिज्ञो य इत्यादि॥ १७॥

इदानीं शास्त्रज्ञकर्म्मज्ञस्य गुणं दर्शयन्नाह;—यस्त्वेतयादि। उभयज्ञः

आहवे कर्मनिर्वोढुं द्विचक्रः स्यन्दनो यथा॥ १८॥

अथ वत्स! तदेतदधेयं यथा तथोपधारय मया प्रोच्य-मानं। अथ शुचये कृतोत्तरासङ्गायाव्याकुलायोपस्थिता-याध्ययनकाले शिष्याय यथाशक्ति गुरुरुपदिशेत् पदं पादं श्लोकं वा। ते च पदपादश्लोका भूयः क्रमेणानुसन्धेया एवमेकैकशो घटयेदात्मना चानुपठेत्। अद्रुतमविलम्बित-

शास्त्रज्ञः कर्म्मज्ञश्च। मतिमान् ऊहापोहक्षम इत्यर्थः। अर्थसाधने आरो-ग्यकरणे। दृष्टान्तमाह आहवे कर्म्मनिर्वोढुमित्यादि। आहवे संग्रामे। कर्म्मनिर्वोढुं कर्म्मप्रवर्त्तयितुं। स्यन्दनो रथः॥ १८॥

शास्त्रमुद्दिश्य तस्य सम्प्रदानायाह;—अथ वत्सेत्यादि। वत्स सुश्रुत इति गम्यते। शास्त्रप्रश्ने तस्याधिकृतत्वात्। इदानीं प्रकृतमध्ययनं प्रस्तौति अथेत्यादि। अथेति आह्निकादावश्यकादानन्तर्य्ये। आवश्यकमाह्निकं कृत्वेत्यर्थः। कस्मै तद्देयमित्याह;—शुचये इत्यादि॥ शुचये कृताह्निकत्वेन पवित्राय। कृतोत्तरासङ्गाय गृहीतोत्तरवस्त्राय। अव्याकुलाय एक-चित्ताय। उपस्थिताय दूरस्थितौ सम्भवे उपस्थिताय। अभिवादनानन्तरं कृतोपस्थानाय इत्यन्ये। अध्ययनकाले प्रातरादौ अध्ययनवर्जिते। शिष्याय उपनयनविधानेन अग्निसाक्षिकमनुशिष्टाय। यथाशक्ति शिष्यस्य शक्त्यनतिक्रमेण; पदं पादं श्लोकञ्चेति अनेन त्रिविधां ग्रहणशक्तिं स्थापयति। तेन हीनशक्तये पदं तच्च पदं स्याद्यन्तं त्याद्यन्तं वा। तथाहि शुचये कृतोत्तरासङ्गाय इत्यादि स्याद्यन्तं भवति। उपदिशेदिति त्याद्यन्तं। मध्यमशक्तये पादं श्लोकचतुर्थांशं। उत्तमशक्तये श्लोकं चतुष्पाद-परिपूर्णं। ते च पदपादश्लोका उपदिष्टा भूयः पुनः पुनः क्रमेण अनुसन्धेया सन्धानीयाः। तथाहि पदेन पादः पदपादाभ्यां श्लोकः सन्धानीयः। एवमे-कैकशो घटयेत् अनेन प्रकारेण एकमेकं प्रतिशिष्यं योजनीकां कारयेत्। आत्मना चानुपठेत् पठतः शिष्यस्य पश्चादाचार्य्यः स्वयं पठेत्। शिष्यस्य मुखलक्षणार्थं कायमनोभ्यां शिष्यान्नियम्य पाठे वाचि नियमयितुमाह;—

मविशङ्कितमननुनासिकं व्यक्ताक्षरमपीड़ितवर्णमक्षिभ्रुवौ-ष्ठहस्तैरनभिनीतं सुसंस्कृतं नात्युच्चैर्नातिनीचैश्च स्वरैः पठेन्नचान्तरेण कश्चिद्व्रजेत्तयोरधीयानयोः ॥ १९ ॥

भवतश्चात्र।

शुचिर्गुरुपरो दक्षस्तन्द्रानिद्राविवर्जितः।
पठेदेतेन विधिना शिष्यः शास्त्रान्तमाप्नुयात् ॥ २० ॥
वाक्सौष्ठवेऽर्थविज्ञाने प्रागल्भ्ये कर्मनैपुणे।
तदभ्यासे च सिद्धौ च यतेताध्ययनान्तगः ॥ २१ ॥

अद्रुतमित्यादि। अद्रुतं असन्निकृष्टवर्णपदपादोच्चारणं। अविलम्बितं नातिविलम्बं। अशङ्कितं त्रासरहितं। अननुनासिकं ङणमान् वर्जयित्वा नासिकोच्चारितवर्जं। अपीड़ितवर्णं वर्णं अपीड़यन्। अक्षिभ्रूवौष्ठहस्तैरनभिनीतं अक्ष्यादिभिर्नर्त्तकइव अभिनयं न कुर्य्यादित्यर्थः। सुसंस्कृतं अक्लिष्ट-वर्णश्रुतिकं। नात्युच्चैर्नातिनीचैरिति एतेनैतदुक्तं मध्यमेन स्वरेण पठेत्। नचान्तरेणेत्यादि तयोर्गुरुशिष्ययोर्मध्ये न कश्चिद्गच्छेदित्यर्थः। अन्ये त्व-न्यथा पठन्ति व्याख्यानयन्ति च ॥ १९ ॥

पठतः शिष्यस्य शास्त्रान्तगावाप्तिहेतुमाह ;—भवतश्चात्रेत्यादि। शुचिर्वाह्याभ्यन्तरशौचयुक्तः। गुरुपरो गुरुकार्य्यरतः। दक्षो नित्याभियुक्तः। तन्द्रा आलस्यम् ॥ २० ॥

अध्ययनान्तगशिष्यः किं कुर्य्यादित्याह ;—वाक्सौष्ठवेत्यादि। वाक्-सौष्ठवे अतिवाक्त्वे। प्रागल्भ्ये धार्ष्ट्ये। प्रगल्भोमहतोऽपि रोगान् साध्यानुत्साही साधयति। तदभ्यासे कर्म्माभ्यासे। चशब्दात् कर्म्मदर्शनमपि। सिद्धौ चेति आरब्धाभिप्रेतार्थसाधनं सिद्धिः। चकारोऽत्र असाध्याना-मनारम्भमनुक्तं समुच्चिनोति ॥ २१ ॥

इति सूत्रस्थाने निबन्धसंग्रहे तृतीयोऽध्यायः ॥

— —

चतुर्थोऽध्यायः।

— oo —

अथातः प्रभाषणीयमध्यायं व्याख्यास्यामः॥

अधिगतमप्यध्ययनमप्रभाषितमर्थतः।
खरस्य चन्दनभार इव केवलं परिश्रमकरं भवति॥

भवति चात्र।

यथा खरश्चन्दनभारवाही भारस्य वेत्ता नतु चन्दनस्य।
एवं हि शास्त्राणि बहून्यधीत्य चार्थेषु मूढ़ाः खरवद्वहन्ति॥१

तस्मात्सर्विंशमध्यायशतमनुपदपादश्लोकाद्‌ श्लोकमनुवर्णयितव्यमनुश्रोतव्यञ्च॥ कस्मात्सुक्ष्मा हि द्रव्यरसगुण-

अधीतस्य शास्त्रस्य पुनरर्थतो व्याख्यानं प्रभाषणं। तदधिकृत्य कृतोऽध्यायः प्रभाषणीयः।

इदानीं प्रभाषणस्य प्रयोजनं दर्शयितुमाह;—अधिगतमित्यादि। एतेन एतदुक्तं सगुणमपि चन्दनं वोढुर्गर्द्दभस्य तद्‌गुणानजानतः केवलं व्यथा-भागित्वमेव भवति। तद्वदधीतमपि शास्त्रमर्थद्वारेण अप्रभाषितं तदध्येतुः पुरुषस्य परिश्रमकरं भवतीत्यर्थः। अन्ये त्वप्रभाषितमित्यत्र अननुभाषितमिति पठन्ति व्याख्यानयन्ति च। अनुशब्दः पश्चादर्थः, तेन अध्ययनस्यानु पश्चादर्थस्य प्रकर्षेण कथनमपि अनुभाषितम्। अर्थेषु मूढ़ा अज्ञानात् गर्द्दभवत् शास्त्रं वहन्ति॥ १॥

तस्मादित्यादि। सविंशमध्यायशतं सहोत्तरतन्त्रेण विंशत्यधिकमध्यायशतं। अनुपदपादश्लोकम् अनुशब्दोविप्सार्थः। तेनायमर्थः पदं पदं पादं पादं श्लोकंश्लोकमनुवर्णयितव्यं आचार्येण व्याख्यातव्यमित्यर्थः। हिशब्दो यस्मादर्थे। यस्मात् सूक्ष्मा द्रव्यादिविभागास्तस्मादनुवर्णयितव्यमिति पिण्डार्थः।

वीर्य्यविपाकदोषधातुमलाशयमर्म्मसिरास्नायुसन्ध्यस्थिगर्भ-सम्भवद्रव्यसमूहविभागास्तथाप्रनष्टशल्योद्धरणव्रणविनिश्चयभग्न-विकल्पाःसाध्ययाप्यप्रत्याख्येयता च विकाराणामेवमादयश्चा-न्येविशेषाः सहस्रशो ये विचिन्त्यमाना विमलविपुलबुद्धे-

तत्र द्रव्यं स्थावरादि। रसाः षट् मधुरादयः। गुणा गुर्वादयः। धातवो रसादयः। धातुग्रहणात् स्तन्यार्त्तवलसीकारसादयश्चोपधातवो गृह्यन्ते। द्वौ मलौ शकृन्मूत्रे। अन्ये तु सप्तमलानाचक्षते। तत्र द्वौ पूर्वोक्तौ पञ्च चेन्द्रियाधिष्ठानाश्च। तथाहि दूषिका-सिंहालक-कर्णगूथरोमकूपप्रजनन-मलाश्चेति। मलाः पुरीषादयो धातुमलाश्चेत्यन्ये। आशयाः सप्त शारीरोक्ताः वातादीनां, स्त्रीणामष्टमोगर्भाशयः। शतोत्तरं मर्म्मशतं। सप्त सिराशतानि। नव स्नायुशतानि। सन्धयो दशोत्तरे द्वे शते। अस्थीनि शतानि, तयाणां आमाशयानां व्यक्तिं शारीरे वक्ष्यति। गर्भसम्भव-द्रव्याणि शुक्रशोणितादीनि। आत्मपञ्चमहाभूतमनांसीत्यन्ये। समूहः संघातः, एतेषां विभागा भेदाः। यस्मात् सूक्ष्मा इति हेतुपदं सर्वत्र सम्बध्यते। तथा प्रनष्ट-शल्योद्धरणादि-विकल्पा इति प्रनष्टशल्यं त्वगादिषु निलीनं। व्रणविनिश्चयो वातादिभेदेन वातशुद्ध्या च षोड़शविधः। भग्नं संक्षेपेण द्विविधं सन्धिमुक्तं काण्डभग्नञ्च। प्रनष्टशल्योद्धरणादिभिः सह विकल्प-शब्दः प्रत्येकं सम्बध्यते। विकल्पा भेदाः। साध्य-याप्य-प्रत्याख्येयता च विकाराणामिति अत्र चशब्दात् सुखसाध्यः कृच्छ्रसाध्यश्च गृह्यते। किमेते एवं परं सूक्ष्मा इत्यनुक्तान् गुणानाह एवमादयश्चान्ये विशेषा इति। आदिशब्दः प्रकारवाची। तेन एतत्प्रकाराश्चान्ये विशेषाः सूक्ष्मा इति प्रकारवाचिना आदिशब्देन द्योतितास्ते च शस्त्रकर्म्मणामष्टविधादयो भेदाः। सहस्रशः सहस्रंवारान्। ये इति द्रव्यादीनां भेदाः। चिन्त्यमाना अन्तरंविना इतिशेषः। विमलविपुलबुद्धेरपीति विमला बुद्धिर्मिथ्यासंशय-ज्ञानवर्ज्जिता। इत्यमृभूतस्यापि पुरुषस्य बुद्धिं व्याकुलीकुर्युः। अल्प-बुद्धेस्तु का कथा? सहस्रशो येऽनुचिन्त्यमाना इत्यन्ये पठन्ति, व्याख्या-

रपि बुद्धिमाकुलीकुर्युः किं पुनरल्पबुद्धेः। तस्मादवश्यमनुपद-पादश्लोकार्द्धश्लोकमनुवर्णयितव्यमनुश्रोतव्यञ्च ॥ २ ॥

अन्यशास्त्रविषयोपपन्नानाञ्चार्थानामिहोपनिपतितानामर्थवशात्तेषां तद्विद्येभ्य एव व्याख्यानमनुश्रोतव्यं। कस्मात् न ह्येकस्मिन् शास्त्रे शक्यः सर्व्वशास्त्राणामवरोधः कर्त्तुं ॥ ३ ॥

भवन्ति चात्र।

एकं शास्त्रमधीयानो न विद्याच्छास्त्रनिश्चयं।
तस्माद्बहुश्रुतः शास्त्रं विजानीयाच्चिकित्सकः ॥
शास्त्रं गुरुमुखोद्गीर्णमादायोपास्य चासकृत्।

नयन्ति च। श्रुतस्य पश्चादपि चिन्त्यमानाः किं पुनरश्रुता इत्यनुशब्दार्थः। अनुपदपादेत्यादि पुनरुक्तिः शास्त्रस्य नियमत्वख्यापनाय ॥ २ ॥

इदानीमन्यशास्त्रोपपन्नानामर्थानां शिष्यहितत्वेन विज्ञानोपायमाह;—अन्येत्यादि। अन्यशास्त्राणि व्याकरणसांख्यवैशेषिकज्योतिःशास्त्रादीनि। अन्यशास्त्राणि कायचिकित्सादीनि इत्यन्ये। उपपन्ना निबद्धाः। इहोपनिपतितानामर्थवशात् प्रयोजनाधीनत्वात्। तेषामिति अर्थानां तद्विद्येभ्यो व्याकरणादिविद्येभ्यः। अन्यशास्त्रोपपन्नानामित्यत्र अन्यशास्त्रविषयोपपन्नानामिति केचित् पठन्ति इहोपनिपतितानामित्यत्र च इहोपनीतानामिति॥ हिशब्दोयस्मादर्थे ॥ ३ ॥

अमुमेवार्थं श्लोकेन स्फुटीकर्तुमाह;—भवन्ति चात्रेत्यादि। न हि अबहुश्रुतोऽत्र संचितानप्यर्थान् वीजभूतान् अन्यशास्त्रसंस्कारादनायासेनागच्छति। न कथञ्चिदनधीतशास्त्रो बहुश्रुतमात्रेण तद्विद्योभवति। कथं न भवतीति दर्शयन्नाह;—शास्त्रमित्यादि। रोगान् शास्तीति उपवेदोऽपि शास्त्रमुच्यते। आरोग्यदानेन धर्म्मार्थकामादीनां शासनाद्वा शास्त्रं, मरणात्त्रायत इति वा शास्त्रं। उद्गीर्णमुपदिष्टं। आदाय

यः कर्म्म कुरुते वैद्यः स वैद्योऽन्ये तु तस्कराः ॥ ४ ॥
औपधेनवमौरभ्रं सौश्रुतं पौष्कलावतम् ।
शेषाणां शल्यतन्त्राणां मूलान्येतानि निर्द्दिशेत् ॥ ५ ॥

गृहीत्वा । नश्चादानमात्रेण गृहीतं किन्तु उपास्य अर्थतश्चाभ्यस्य । असकृत् अनेकवारं । अन्ये तु तस्करा इति अन्ये तु पुनः वैद्यास्तस्कराश्चौराः । कस्माद् व्याधितेभ्यो वैद्य छद्मना वित्तापहरणात् प्राणहन्तृत्वाच्च ॥ ४ ॥

अन्यशास्त्रोपपन्नार्थ-विज्ञानोपायमभिधाय स्वशास्त्रोपपन्नानामर्थानां मिथ्याज्ञाने सम्यग्ज्ञानार्थं समानतन्त्राणि दर्शयितुमाह ;—औपधेनव-मित्यादि । एतैश्चतुर्भिरौपधेनवादिभिः समानतन्त्रैः स्वकीयशास्त्रार्थानां मिथ्याज्ञानसंशयज्ञानानि स्फोटनीयानि । अन्ये तु गुरोरेव प्रभाषणस्य मिथ्याज्ञानादयः औपधेनवादिशास्त्रैः निवर्त्तन्त इति व्याख्यानयन्ति । एतेनैतदुक्तं औपधेनवादिशास्त्रैर्निवृत्तमिथ्याज्ञानादिना गुरुणा प्रभाषणं कर्त्तव्यमिति । यद्यपि गुरुमुखादेव शिष्यस्य मिथ्याज्ञानादयो निवृत्ता-स्तथाप्यागमान्तरप्रत्ययार्थमौपधेनवादिशास्त्राणि निर्द्दिष्टानि । एतान्येव परतन्त्राणि आगमान्तरप्रत्ययार्थं कुत इत्याह, शेषाणां शल्यतन्त्राणा-मित्यादि । शेषाणां करवीर्य्य-गोपुररक्षित-प्रभृति-प्रणीतशल्यतन्त्राणां प्रत्ययेतुं । प्रत्ययो न भवति कस्मात् तेषां तन्त्राणामेतन्मूलत्वात् । अन्ये तु शेषाणां करवीर्य्यादिप्रणीतानां शल्यतन्त्राणां मध्ये औपधेनवादि-तन्त्राणि सुव्याख्यानत्वेन मूलानि प्रधानानीति व्याख्यानयन्ति ॥ ५ ॥

इति सूत्रस्थाने निबन्धनसंग्रहे चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः।

——oo——

अथातोऽग्रोपहरणीयमध्यायं व्याख्यास्यामः॥

त्रिविधं कर्म्म पूर्व्वकर्म प्रधानकर्म पश्चात्कर्म्मेति तद्व्याधिं प्रति प्रत्युपदेक्ष्यामः। अस्मिन् शास्त्रे शस्त्रकर्म-प्राधान्याच्छस्त्रकर्मैव तावत् पूर्व्वमुपदेक्ष्यामस्तत्सम्भारांश्च॥ तच्च शस्त्रकर्माऽष्टविधं। तद्यथा। छेद्यं भेद्यं लेख्यं वेध्य-मेष्यमाहार्यं विस्राव्यं सीव्यमिति॥ १॥

अथातोऽग्रोपहरणीयमिति कर्मणोऽग्रे प्रथमत उपहरणं यन्त्रादि-सम्भारः, तदधिकृत्य कृतोऽध्यायः अग्रोपहरणीयः॥

पूर्वकर्म्मेत्यादि। तत्रैके लङ्घनादिविरेकान्तं पूर्व्वकर्म्म। व्रणस्य च पाचनं रोपणं यच्च प्रधानं कर्म्म तत्प्रभृतम्। बलवर्णाग्नि कार्यन्तु पश्चात् कर्म्म समा-दिशेत्। अन्ये तु संशोधनस्य पाचनस्नेहनस्वेदनानि पूर्व्वकर्म्म, वमन-विरेचनवस्तिनस्यशिरामोक्षणानि प्रधानं कर्म्म, पेयाद्यन्नसंसर्ज्जनं पश्चात् कर्म्म। अपरे तु चयादीनां पूर्वरूपान्तानामन्ते वेगोत्पत्तेः प्राक् यत् क्रियते तत्पूर्वकर्म्म, आतङ्कोत्पत्तौ यत् तत् प्रधानं कर्म्म। निवृत्तातङ्क-स्यानुबन्धोपचरणाय यत् तत् पश्चात् कर्म्म। इदं तत्कर्म्मेत्यादि इह कथं नोदा-ह्रियते इति प्रश्नेऽत्तरमाह तद्व्याधिमित्यादि। तदिति त्रिविधकर्म्म व्याधिं प्रत्युपदेक्ष्यामः, न इह ग्रन्थगौरवभयात्। ननु छेद्यादीनां कर्म्मणां तत्सम्भाराणामेव चात्र पूर्वमुपादानं। कुतो न स्नेहादीनां तत् कर्म्मणा-श्चेत्याह अस्मिन् शास्त्रे इत्यादि। तत्तु शस्त्रनिर्वर्त्त्य कर्म्मनियता-कृतिविशेषेण नानाविधप्रयोजनेन भिन्नं प्रदर्शयन्नाह तच्च शस्त्रकर्मेत्यादि। छेद्यं निःशेषं छेदनीयमर्शःप्रभृति। भेद्यं भेदनीयं विद्रध्यादि। लेख्यं लेखनीयं रोहिण्यादि। वेध्यमल्पमुखैः शस्त्रैर्व्यधनीयं शिरादि, वेधस्थाने

अतोऽन्यतमं कर्म्म चिकीर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि, तद्यथा यन्त्रशस्त्रक्षाराग्निशलाकाशृङ्गजलौकालावुजाम्बवोष्ठपिचुप्रोतसूत्रपट्ट-मधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यजन-शीतोष्णोदककटाहादीनि परिकर्म्मिणश्च स्निग्धाः स्थिरा बलवन्तः॥ २॥

ततः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु दध्यक्षतान्नपानरत्नैरग्निं विप्रान् भिषजश्चार्च्चयित्वा कृतबलिमङ्गल-

व्येध्यमितप्रर्भ पठन्ति। एष्यमेषणीयं नाड्यादि। आहार्य्यमाहरणीयं शर्क्कारादि। विस्राव्यं विस्रावणीयं तच्च विद्रधिकुष्ठादि। सीव्यं सीवनीयं तच्च "सीव्या मेदःसमुत्थाश्च भित्वा सुलिखिता गदा" इति। यद्यपि छेद्यादयः शब्दा व्याधिवाचकाः, तथापि अभेदोपचारात् शस्त्रकर्म्मव्यपदेशं लभन्ते। एषणाहरणे शस्त्रकर्म्मणी यद्यपि केचित् मन्यन्ते तथापि छित्वा भित्वा अपि एषणाहरणे क्रियेते॥ १॥

अतोऽत्र शस्त्रकर्म्मणि निर्दिष्टे। अतोमध्ये अन्यतमानामेकतमं कर्म्म छेद्यादिकं चिकीर्षता कर्त्तुमिच्छता पूर्व्वमेवोपकल्पयितव्यानि समीपमानेतव्यानि। जाम्बवोष्ठं जम्बुफलसदृशमुखाग्राकृष्टपाषाणरचितावर्त्तिः, पिचुः तूलं इति प्रोक्तं। प्रोतः कर्पटी। पट्टो व्रणबन्धनद्रव्यं। तर्पणं जलसक्तं शक्तुचौरादि। कषायः औषधं क्वथितं। उदकं जलं। व्यजनं वंशादिरचितं। कटाहो लौहादिनिर्म्मितः। आदिशब्दात् कवलिकाम्रत्कपालकलसस्थालीशयनासनादि। यन्त्रादिषु मध्ये कानिचिदुपकरणानि कर्म्माङ्गानि कानिचित् व्यापत्प्रशमनानि। न केवलं यन्त्रादीन्येवोपकल्पयितव्यानि, किन्तु परिकर्म्मिणश्च सर्वकर्मणां कर्त्तारः परिचारकाः; किंविशिष्टास्ते स्निग्धाः अनुरक्ताः, स्थिरा अचलाः, बलवन्तः सर्वकार्य्येषु समर्थाः॥ २॥

तत इत्यादि। ततः यन्त्रादिसम्भारोपकल्पनानन्तरं। तिथयः प्रतिपदादयः। करणानि ववादीनि। मुहूर्त्ताश्चिं शत् शिवाद्याः। नक्षत्राणि अश्विनीप्रभृतीनि। प्रशस्तत्वञ्चैषां ज्योतिःशास्त्रविदां वचनाद्ज्ञेयं।

स्वस्तिवाचनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्मसिरास्नायुसन्ध्यस्थिधमनीः परिहरन्ननुलोमं शस्त्रं निदध्यादापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च। महत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्रपदमुक्तं ॥ ३ ॥

तत्रायतो विशालः समः सुविभक्त इति व्रणगुणाः ॥ ४ ॥

अक्षतानि यवधान्यानि। रत्नानि माणिक्यमौक्तिकादीनि। कृतबलिमङ्गलस्वस्तिवाचनमिति बलिः पूजोपहारः, मङ्गलं गीतादि, स्वस्तिवाचनमाशीर्व्वादोच्चारणं, कृतशब्दो बलिप्रभृतिभिः सह प्रत्येकं सम्बध्यते। मर्म्माणि सप्तोत्तरशतभेदभिन्नानि। शिराःसप्तशतभेदभिन्नाः। नवशतभेदभिन्नाःस्नायवः। सन्धयो दशोत्तरद्विशतभेदभिन्नाः। अस्थीनि षष्ठ्यधिकशतत्रयभेदभिन्नानि, धमन्यो नाभिप्रभवाश्चतुर्व्विंशतिभेदभिन्नाः, एताः परित्यजन् अनुलोमातिलोमानुकुल्येन येनैवावर्त्तेन लोमानि सन्ति तेनैवावर्त्तेनेत्यर्थः। प्रतिलोमन्तु लोमभिरेव प्रतिहतधारशस्त्रं कुण्ठीभवति व्यथाञ्चोत्पादयति। निदध्यात् प्रवेशयेत्। कियद्दूरं शस्त्रं निदध्यादित्याह आपूयदर्शनादित्यादि। सकृदेकवारं, न पुनः पुनरित्यर्थः। आशुचेति शब्द एवार्थः, तेनोभयत्रापि नियमः; एतेन सकृदेव शस्त्रमपहरेत्, आशेव शस्त्रमपहरेदित्युक्तं। शस्त्रं प्रणिदध्यादित्यत्र शस्त्रप्रणिधानमात्रमुक्तं ; अपहरेत् शस्त्रमाशुचेत्यत्र शस्त्रशब्द आशुपहरणक्रियया सम्बध्यते इति न पौनरुक्तिः। इदानीं सुदूरशस्त्रपाते अनर्थं सम्भावयन्नवधिमाह ;—महत्स्वित्यादि। महत्स्वपि च पाकेष्वित्यादि अन्तरशब्दोऽयमवकाशवाची, तेन शस्त्रपदं शस्त्रस्थानं द्व्यङ्गुलावकाशं त्र्यङ्गुलावकाशञ्चेत्युक्तं। तत्र द्व्यङ्गुलावकाशं नात्यवगाढमिति। केचिदन्तरशब्दं न पठन्ति॥ ३ ॥

व्रणकर्म्मणि व्रणमाकृतिविशेषेणाह ;—तत्रेत्यादि॥ तत्रेति शस्त्रकर्म्मणि। एते आयतत्वादयो व्रणगुणाः। आयतोदीर्घः, विशालः विस्तीर्णः,

भवतश्चात्र ।

आयतश्च विशालश्च सुविभक्तो निराश्रयः ।
प्राप्तकालकृतश्चापि व्रणः कर्मणि शस्यते ॥ ५ ॥
शौर्य्यमाशुक्रिया शस्त्रतैक्ष्ण्यमस्वेदवेपथू ।
असम्मोहश्च वैद्यस्य शस्त्रकर्मणि शस्यते ॥ ६ ॥

समइति समपाकः, असमपाकोहि किञ्चित् पक्वःकिञ्चिदपक्वः शस्त्रपातनाय सुखो भवति । अनेतु विशालशब्देन चतुरस्रमाचक्षते, समशब्देन वृत्तं । तदुक्तं "आयतश्चतुरस्रो वृत्तस्त्रिपूटक" इति व्रणाकृतिसमासः । इति तिस्रोव्रणाकृतयो व्रणगुणत्वेन कर्मणि निर्द्दिष्टाः । अनेत्रतु समो गोमूत्रसर्पवन्न विषमगतिः ; स च आयतव्रणे । समइति विशेषणं । सुविभक्त इति सुव्यक्तः सुष्ठु,पृथक्भूतसकलावयवः, जिह्वा-दन्त-सन्ध्याद्यप्राप्यदेशमनाश्रितः । अनेत्र त्वन्यथा व्याख्यानयन्ति ;—वैद्यकृतव्रणगुणानाह तत्रायत इत्यादि । समो निम्नोन्नतत्वरहितः, सुविभक्त इति न दोषयुक्तः । इत्थंभूते वैद्यकृते व्रणे कल्ककषायाद्यवचारणं सुखं क्रियते । अतो विपरीता व्रणदोषाः । शेषं सुगमं ॥ ४ ॥

अमुमेवार्थं श्लोकेन स्फूटीकुर्व्वन्नाह ;—आयतश्चेत्यादि ॥ एवंविधोव्रणः शस्त्रकर्म्मणि प्रशस्यते । आयतश्च विशालश्चेति द्विरकारेण आयतोऽपि विशालोपि आयत—विशाल इति प्रतिपादयति । निराश्रयो मर्म्माद्यनाश्रितः । निराश्रयइत्यन्ये तत्रानुसङ्गीत्यर्थः । प्राप्तकालकृतश्चापीति युक्तेन कालेन कृतः । एनेन शस्त्रक्षाराग्निसाध्यः, बालवृद्धयोरप्राप्तकालयोः शस्त्रादिनिषेधात् अथवा शीतकालेऽग्निसाध्योव्रणः ग्रीष्मे सएव प्राप्तकालः । अन्ये तु युक्तकालकृत इति पठन्ति, तत्र समपाकइत्याचक्षते । युक्तकालकृतः सम्यक् पाककृतः प्रतिक्रिय इत्यपरे । आयतश्च विशालश्चेत्यादिश्लोकं केचिन्न पठन्ति ॥ ५ ॥

अथ के वैद्यगुणाः शस्त्रकर्म्मणि तानाह ;—शौर्य्यमित्यादि ॥ एते शौर्य्यादयो गुणा वैद्यस्य शस्त्रकर्म्मणि श्लाघ्यन्ते । शौर्य्यं निर्भयत्वं

एकेन वा व्रणेनाशुध्यमाने नान्तरा बुद्धा वेध्यापरान् व्रणान् कुर्य्यात् ॥ ७ ॥

भवति चात्र।

यतो यतो गतिं विद्यादुत्सङ्गो यत्र यत्र च।
तत्र तत्र व्रणं कुर्य्याद्द्यथा दोषो न तिष्ठति ॥ ८ ॥

तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्ट-कक्ष-कुक्षि-वंक्षणेषु तिर्य्यक्छेद उक्तः ॥ ९ ॥

चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत्।

भयभीतोहि साध्यमपि व्रणमवगाढ़मूलं नारभते आरब्धं वा अवशेषयति। आशुक्रिया लघुहस्तता शीघ्रं शस्त्रकर्म्मकरणं ; आशुक्रियया आतुरस्य चिरं क्लमो न भवति। शस्त्रतैक्ष्ण्यं सुनिशितं सुधारत्वञ्च, तेन रुजा न भवति। असम्मोहः असम्मूढ़ता, स च आमपक्वव्रणपरिज्ञाने यथा प्राप्तानुष्ठाने च व्रणच्छेदादिषु रक्तादिदर्शनैरसम्मोहः। अमुमपि श्लोकं केचिन्न पठन्ति ॥ ६ ॥

असुद्धावनेऽपि व्रणाः कार्य्या इत्याह ;—एकेन वा व्रणेनेत्यादि। ना पुरुषः, अन्तरा मध्ये। गतिं नाड़ीं, उत्सङ्ग इवोत्सङ्गः व्रणाशये हि चिरकाल-पूयावस्थानेनाम विदारितं अन्तःप्रदेशान्तरं निम्नमुत्सङ्गतुल्यत्वादुत्सङ्ग इत्युच्यते, तत ऊर्द्ध्वं पूयस्य सङ्ग उत्सङ्ग इत्यन्ये। यथादोषो न तिष्ठतीति दोषोऽत्र पूयः। अथवा पूयावस्थानात् वातादयोदोषा अनुबध्नन्ति इति पूयस्य दोषशब्देनोच्यते कारणे कार्य्योपचारात् ॥ ७।८ ॥

तिर्य्यक्छेदो व्यापत्सूक्तः, तस्यविशिष्टविषये प्रतिप्रसवं कुर्व्वन्नाह ;—तत्र भ्रूगण्डेत्यादि। गण्डः कपोलः। अक्षिपुटो अक्षिवर्त्म। दन्तवेष्टकं दन्तवेष्टन-मांसं। वङ्क्षणं उरुसन्धिः। मांसकन्दोप्रादुर्भावः कन्द-एव कन्दो अल्पत्वात्। अन्यथात्वित्यत्र अन्यत्र त्विति केचित् पठन्ति व्याख्या नयन्ति अन्यत्र यदि छेदनं क्रियत इत्यर्थः। छेदनमित्यत्र पाटनमिति

अर्द्धचन्द्राकृतीश्चापि गुदे मेढ्रे च बुद्धिमान्॥ १०॥

अन्यथा तु सिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्‌व्रणसंरोहो मांसकन्दीप्रादुर्भावश्चेति। मूढगर्भोदराऽर्शोऽश्मरीभगन्दरमुखरोगेष्वभुक्तवतः कर्म्म कुर्वीत॥ ११॥

ततः शस्त्रमवचार्य्य शीताभिरद्भिरातुरमाश्वास्य समन्तात्परिपीड्याङ्गुल्या व्रणमभिमृज्य प्रक्षाल्य कषायेण प्लोतेनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढ़ामौषधयुक्तां वर्त्तिं प्रणिदध्यात्। ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां

पठन्ति, क्षणनं हिंसनं। भुक्तवतः कर्म्मकुर्व्वीत इत्युक्तं, तस्य विषयान्तरेण प्रतिषेधं दर्शयन्नाह;—मूढ़गर्भेत्यादि। मूढ़गर्भादिषु पञ्चसु अन्नपूर्णकोष्ठत्वात् यन्त्रदानादिभिः कष्टं अनिलप्रकोपं मरणञ्च प्राप्नोति। मुखरोगेषु आहारोऽङ्गुल्यादिपीड़नेन छर्द्दया च निष्क्राशितः कर्म्मघातं करोति॥ ६। १०। ११॥

इदानीं व्रणकर्मविधानमाह;—ततः शस्त्रमित्यादि॥ ततोऽनन्तरं शस्त्रकर्म्म कृत्वा, आश्वास्य शस्त्रकर्म्मजनितखेदमवतार्य्य मूर्च्छादिप्रतिबन्धार्थं, समन्तात् परिपीड्य सर्व्वत पीड़यित्वा स्रावनिर्गमनार्थं, व्रणमभिमृद्य व्रणमर्द्दनं कृत्वा शस्त्रपदसमीकरणार्थं। व्रणमभिमृज्येति केचित् पठन्ति वालास्थि-गतृणसङ्गादि-विज्ञानार्थं इति च व्याख्यानयन्ति। प्रक्षाल्य कषायेण सप्तवारं सद्यो विच्छितेन। तदूर्द्ध्वं यथा स्वदोषहरौषधसिद्धेन कषायेण वस्त्रेनोदकमादाय व्रणान्तर्गतं, तिलकल्कमधुसर्पिःप्रगाढ़ां तिलकल्कादिभिरित्यर्थं लिप्तामौषधयुक्तां वर्त्तिं प्रणिदध्यात् प्रवेशयेत्। कल्केन सद्योव्रणौषधपिण्डेन। कवलिका व्रणकल्कौषधाच्छादनद्रव्यं। सा चौषधिः स्वरसान्निःसरणनिवारणार्थं भल्लातकपलाशोऽडुम्बरादीनां त्वक्‌पत्रादि कृत्वा, अन्ये द्विगुण चतुर्गुण स्थूलकर्पटविरचितां कवलिका माहुः। अभ्यन्तरमुकुभिर्ष्टतात्तां घनां कवलिकां दद्यादितप्रपरे।

घनाङ्गवलिकां दत्वा वस्त्रपट्टेन बध्नीयात् वेदनारक्षोघ्नैर्धूपैर्धूपयेद्रक्षोघ्नैश्च मन्त्रैरक्षां कुर्वीत। ततो गुग्गुल्वगुरुसर्जरसवचा-गौरसर्षपचूर्णैर्लवणनिम्बपत्रयामिश्रैराज्ययुक्तैर्धूपैर्धूपयेत् आज्यशेषेण चास्य प्राणान् समालभेत्॥ १२॥

उदकुम्भाच्चापो गृहीत्वा प्रोक्षयन् रक्षाकर्म कुर्य्यात्, तद्वक्ष्यामः ;- कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च।

रक्षाकर्म करिष्यामि ब्रह्मा तदनुमन्यतां॥

नागाः पिशाचा गन्धर्वा पितरो यक्षराक्षसाः।

अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा॥

वेदनारक्षोघ्नैरिति रुजाघ्नैः वेदनाघ्नानि हिङ्गुलवणादीनि। रक्षोघ्नानि वचादीनि। धूपद्रव्याण्याह ;—ततो गुग्गुल्वित्यादि॥ न केवलं व्रणं धूपयेत् शयनाद्यपि व्रणदौर्गन्ध्यापगमार्थं नीलमक्षिकादिपरिहारार्थञ्च। अन्यथा नीलमक्षिकोपसर्पणाद्व्रणे क्रिमयः पतन्ति। आज्यशेषेणेत्यादि। अथ शेषेण धूपनद्रव्येभ्य आज्यमिश्रेभ्यः परिशिष्टेन घृतेन। प्राणशब्देनात्र हृदयादय उच्यन्ते प्राणाधिष्ठानत्वात्। तान् समालभेत म्रक्षयेदभ्यञ्जयेदित्यर्थः प्राणाप्यायनार्थं॥ १२॥

इदानीं व्रणितस्य शोणितपूयादिसम्भवात् रक्षोभयपरिहारार्थं रक्षाकर्म्म निदर्शयन्नाह ;—उदकुम्भेत्यादि॥ उदकुम्भात् पानीयकुम्भात्, आपो-जलं, गृहीत्वा आदाय, प्रोक्षयन् प्रमार्जयन्। रक्षाकर्म्मनिर्दिष्टपदानां मन्त्रत्वात् विवरणं न करणीयमिति केचित्। अन्ये तु व्याख्या-नयन्ति कृत्यानामिति कुपितमन्त्रिणोऽभिचारकर्म्मजनिता राक्षसी कृत्ये-त्युच्यते। प्रतिघातार्थं निवारणार्थं। अत्र परिरक्षार्थमिति केचित् पठन्ति तथा रक्षोभयस्य चेति राक्षसभयस्य च प्रतिघातार्थमित्यर्थः। ब्रह्मा तदनुमन्यतामिति तत्रक्षाकर्म्म ब्रह्मा अङ्गीकरोतु। नागा इत्यादि ये ये नागादयस्त्वामभिद्रवन्ति पीड़यन्ति, तान् ब्रह्माद्या देवा घ्नन्तु इति

पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः।
दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः॥
पान्तु त्वां मुनयो ब्राह्मा दिव्या राजर्षयस्तथा।
पार्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः॥
अग्नीरक्षतु ते जिह्वां प्राणान् वायुस्तथैव च।
सोमो व्यानमपानन्ते पर्जन्यः परिरक्षतु॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः।
बलमिन्द्रो बलपति र्मनुर्मन्ये मतिन्तथा॥
कामांस्ते पान्तु गन्धर्व्वाः सत्वमिन्द्रोऽभिरक्षतु।
प्रज्ञान्ते वरुणो राजा समुद्रो नाभिमण्डलं॥
चक्षुः सूर्य्यो दिशः श्रोत्रं चन्द्रमाः पातु ते मनः।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा।
आकाशं खानि ते पातु देहं तव वसुन्धरा॥

पिण्डार्थः। तत्र नागा वासुक्यादयः। पिशाचाः पिशिताशनाः। गन्धर्व्वाः देवगायनाः हाहाहूहूप्रभृतयः। पितरोऽग्निष्वात्तादयः। यक्षा धनदादयः। राक्षसा रावणप्रभृतयः। दिक्षु इतत्र ये चरन्तीति सम्बध्यते। वास्तुनिवासा गृहभूमिनिवासिनः। प्राणानिति अग्निः सोमो वायुः सत्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः; अत्र द्वादशप्राणेषु मध्ये सामान्यवातवाच्यपि वातशब्दःप्राणाख्ये वातविशेषे वर्त्तते, कुतश्चतुर्णां व्यानादीनामग्रे वक्ष्यमानत्वात्। सोमश्चन्द्रमाः। ते तव पर्जन्यो वृष्टिमान् मेघः; इन्द्र इत्यन्ये। स्तनयित्नवो मेघाः। बलपतिरिति इन्द्रस्य विशेषणं। मनुः प्रजापतिः। मन्ये ग्रीवापश्चिमभागाश्रिते द्वे शिरे मन्ये इत्युच्यते। मतिं तथा सएव मनुर्म्मतिं रक्षत्विति सम्बन्धः। तथा मनुर्म्मतिं रक्षतु इत्यन्ये मनेत्र

वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमं।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रुवो भ्रुवौ॥
एता देहे विशेषेण तव नित्या हि देवताः।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्वतां।
स्वस्ति ते चन्द्रसूर्यौ च स्वस्ति नारद-पर्वतौ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः महेन्द्रगाः।
पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव॥
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथ इति स्वाहा॥
एतैर्वेदात्मकैर्मन्त्रैः कृतव्याधिविनाशनैः।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि॥ १३॥
ततः कृतरक्षमातुरमागारं प्रवेश्याचारिकमादिशेत्।

इति व्याख्यानयन्ति केचित्। सत्वं गुणविशेषः, मनश्चित्तं, रूपमिह लावण्यं विवक्षितं, यत्पर्य्यायः सौन्दर्य्यं छायाप्रभेदः। तदुक्तं "आसन्ना लक्ष्यन्ते या प्रभा दूरात्मिका मता" इति। रेतः शुक्रं। आपः पानीयानि। आप्यायन्तु खानि स्रोतांसि इन्द्रियाणीत्यन्ये। पराक्रमः सामर्थ्यं, पौरुषं मेढ्रं, पुरुषश्रेष्ठो नारायणः, आत्मानं जीवं, ध्रुवस्तारविशेषः। एताः पूर्व्वोक्ता देवता नित्याः सततस्थिताः। स्वस्ति ते भगवान् ब्रह्मेति स्वस्ति मङ्गलं, भगवान् विशिष्ट-ज्ञानवान्, महेन्द्रगा इन्द्रानुयायिन इत्यर्थः। पितामहो ब्रह्मा। ईतयोऽन्नादि क्षयहेतवः अतिवृष्ट्यादयः। तदुक्तं "अतिवृष्टिरनावृष्टि र्मूषिकाः शलभाः शुकाः। स्वचक्रं परचक्रञ्च सप्तैता ईतयः स्मृताः"॥ १३॥

इदानीं कृतरक्षस्येतिकर्त्तव्यतां दर्शयन्नाह ;—ततः कृतरक्षमित्यादि॥ आगारं गृहं। आचारिकं द्विविधं आहारविहारलक्षणं व्रणितोपासनीयनिर्द्दिष्टं। नचैनमिति एनं व्रणं त्वरमाणः शीघ्रोभवन् अपरेद्युः

ततस्तृतीयेऽहनि विमुच्यैवं बध्नीयाद्वस्त्रपट्टेन, नचैनं त्वरमाणोऽपरेद्व्रणं मोक्षयेत् । द्वितीयदिवसे परिमोक्षणाद्विग्रथितो व्रणश्चिरादुपसंरोहति तीव्ररुजश्च भवति । अत ऊर्द्ध्वं दोषकालबलादीनवेक्ष्य कषायालेपनबन्धाहाराचारान् विदध्यात्, नचैनं त्वरमाणः सान्तर्दोषं रोपयेत् । स ह्यल्पेनाप्यपचारेणाभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति ॥ १४ ॥

भवन्ति चात्र ।

तस्मादन्तर्बहिश्चैव सुशुद्धं रोपयेद्व्रणं ।
रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् ॥
हर्षं क्रोधं भयञ्चापि यावत् स्थैर्य्योपसम्भवात् ॥१५॥

द्वितीयदिवसे न मोक्षयेत् । ततस्तृतीयेऽहनि विमुच्य प्रक्षाल्य कषायेणैव । बध्नीयात् वस्त्रपट्टेनेति केचित् पठन्ति । कषायेण सद्यो व्रणोपितानां द्रव्याणां क्वाथेन एव पूर्ववत् । द्वितीये दिवसे मोक्षणाद्दोषं वक्तुमाह;—द्वितीयेत्यादि । ग्रथितो ग्रन्थितः । अनेऽतु विग्रथित इत्यत्र विशब्दस्य स्थाने हिशब्दं पठन्ति व्याख्यानयन्ति च हिशब्दो यस्मादर्थे, यस्माद्ग्रथितः सम्यक् लाकुतिको ग्रन्थीभूतस्तस्मान्नसंरोहति उग्रवेदनश्च व्रणोभवति इत्यर्थः । अत ऊर्द्ध्वमित्यादि । अत ऊर्द्ध्वं तृतीयदिवसानन्तरं, दोषा वातादयः, कालप्रादीनवेक्ष्य परीक्ष्य, विदध्यात् कुर्य्यात् यावद्व्रण संरोहणं भवति ; अनेत्वन्यथा पठन्ति,—अत ऊर्द्ध्वं दोषकालबलादीन्यवेक्ष्य कषायादीन् विदध्यात्, व्याख्यानयन्ति,—अतऊर्द्ध्वमिति तृतीयबन्धादनन्तरं चतुर्थबन्धे दोषादीनि परीक्ष्य कषायादीन् विदध्यात् । कषायादीनीत्यादि—शब्दात् कल्कस्नेहादीनां ग्रहणं । नचैनमित्यादि । सान्तर्द्दोषं अभ्यन्तरं पूयसंहितं, अल्पेनाप्यपचारेणेति स्तोकेनापि विरुद्धकर्म्मणा भूयः पुनर्विकरोति विशेषेण करोति ॥१४

भवन्ति चात्रेत्यादि—शुद्धाश्च वर्णरसस्थानगन्धाश्चत्वारः । केचित् हर्षं क्रोधं भयमित्यादि श्लोकं न पठन्ति, व्यवायादीनित्यादिशब्दात् भयहर्षादीनि गृह्णन्ति ॥ १५ ॥

हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत्।
त्र्यहाद्द्व्यहाच्छरद्ग्रीष्मवर्षास्वपि च बुद्धिमान् ॥ १६ ॥
अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक्।
प्रदीप्तागारवच्छीघ्रं तत्र कुर्यात् प्रतिक्रियाम् ॥ १७ ॥
या वेदना शस्त्रनिपातजाता, तीव्रा शरीरं प्रदुनोति जन्तोः।
घृतेन सा शान्तिमुपैति सिक्ता, कोष्णेन यष्टीमधुकान्वितेन ॥ १८

ननु किं सर्वदैव त्र्यहान्मोक्तव्योऽथवा किञ्चिद्वक्ष्यमाणेनेत्याह ;—हेमन्ते शिशिरे चैवेत्यादि। हेमन्तादिषु त्र्यहान्मोक्षयेत्, तेषु शीतत्वेन शीघ्रपाकभयाभावात्। शरदादिषु द्व्यहान्मोक्षयेत् तेषामुष्णत्वेन शीघ्रपाकागमभयात्। हेमन्ते शिशिरे चैवेति एवशब्दे हेमन्तशिशिरयोः त्र्यहे एव मोक्ष इति नियमयति। चकारस्तु पैत्तिकव्रणस्य नियमं व्यभिचारयति, तेन पैत्तिकस्य हेमन्त-शिशिरयो र्यथार्हं मोक्षः इति। वसन्ते चापीति अपिशब्दात् वैशाखस्योष्णत्वात् कदाचिद् द्व्यहेऽपि मोक्षः, स व्रणानां, तथा पैत्तिकस्य द्विरह्नो वन्ध इति च समुच्चिनोति। शरद्-ग्रीष्म-वर्षास्वपि चेति अपिच ग्रहणं क्वचिद्द्व्यहमोक्षणविधिरेकस्मिन् दिने वा वध्नीयात्। अन्ये तु शिशिरग्रहण मपास्य हेमन्ते च वसन्ते च प्रावृट्काले च मोक्षयेत् इति। तन्न पञ्जिकया दूषितत्वात्। ननु हेमन्तादयः शरदादयश्च समानस्तत् कथं तेषु तुल्यकालं व्रणमोक्षणं? उच्यते त्र्यहादेव द्व्यहादेवेति नियमो न कृतस्तेन हेमन्तादीनां चोत्कर्षापकर्षं समीक्ष्य व्रणमोक्षणं कर्त्तव्यमित्यदोषः ॥ १६ ॥

ननु कथं सर्वत्रैव सम्भृत-सम्भारस्य छेद्यादिकर्त्तव्यं उत अन्यथापीत्याह अतिपातिष्वित्यादि॥ अतिपातिषु आशुकारिषु अथवा अतिपातिषु रोगेषु बन्धकालादिषु नियमव्यभिचारार्थं एवायं श्लोक इति ॥ १७ ॥

शस्त्रपाते अवस्थां चिकित्सितुमाह ;—या वेदनेत्यादि॥ प्रदुनोति उपतापयति। क्वचित् प्रतनोतीति पाठे तत्र व्याप्नोतीत्यर्थः ॥ १८ ॥

इति सूत्रस्थाने निबन्धसंग्रहे पञ्चमोऽध्यायः।

षष्ठाध्यायः ।

——00——

अथात ऋतुचर्य्याध्यायं व्याख्यास्यामः ।

कालोहि नाम भगवान् स्वयम्भुरनादिमध्यनिधनोऽत्र रसव्यापत्सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते । स

ऋतवो द्विमासिकाः शिशिरादयो हेमन्तान्ताः षट्, वर्षादयः प्रावृड़ान्ता वा, तेषु चर्य्याचरणं वर्त्तनं, तदधिकृतय कृतोऽध्यायः ऋतुचर्य्यस्तं व्याख्यास्यामः । ऋतुचर्य्यामिति केचिदन्यथा व्याख्यानयन्ति । चरधातोर्गति-भक्षणार्थस्य चर्य्यमितिरूपं, तेन आहारोविहारश्चर्य्यशब्दे नोच्यते । अन्ये तु अथात ऋतुचर्य्याध्यायं नामेति पठन्ति, व्याख्यानयन्ति च, चर्य्याशास्त्रमिति आचारः । ऋतुषु ऋतूनां वा चर्य्या ऋतुचर्य्यार्थोऽध्यायः । ऋतुचर्य्या यथा प्रदीपार्थो मल्लिका प्रदीप इति । नामशब्दः संज्ञार्थी ऋतुचर्य्यां नाम स्वस्थवृत्तोऽपि रक्षति ॥

तत्र यदङ्गभूता ऋतवः तमेव प्रथमं स्वगुणकर्मनिरुक्तिभिर्निर्द्दिशन्नाह ;—कालोऽहि नामेत्यादि । कालोहि उपदर्शी, नामशब्दः प्रसिद्धौ, काल इति प्रसिद्ध उपदर्श्यते । स्वयम्भुरिति न केनाप्युत्पाद्यते । अनादिमध्येत्यादि । आदिरुत्पत्तिः, आद्यन्तयोरन्तरा मध्यं, निधनं विनाशः ; एतैर्वर्जितः । स्वधर्म्मेण कालमुक्त्वा कर्म्मणा चिकित्सोपयोगितां निदर्शयन्नाह ;—अत्र रसव्यापदित्यादि । अत्र काले रसस्य मधुरादेः । रसशब्देनात्र रसद्रव्यमुच्यते, अभेदोपचारादित्यन्ये । व्यापत् विपन्नता । सम्पत्तिः सम्पन्नता । आयत्ते अधीने । जीवितमरणे चेति चकारोऽयमत्रशब्दं इहानुवर्त्तयति, तेन जीवितमरणे कालायत्ते जीवितस्य उत्पत्त्यधीनत्वात् इति सामर्थ्यात् उत्पत्तिरपि कालाधीनैव । कथमेकस्मात् कालद्रव्यात् व्यापत्सम्पत्ती जीवितमरणे परस्परविरुद्धे स्यातां ? नहि एकस्मादग्नेः शीतोष्णौ,एकस्माद्वा प्रदीपात्

सूक्ष्मामपि कलां न लीयत इति कालः, सङ्कलयति कालयति वा भूतानीति कालः। तस्य सम्वत्सरात्मनो-भगवानादित्यो गतिविशेषेणाक्षिनिमेषकाष्ठाकलामुहूर्त्ता-होरात्रपक्षमासर्त्त्वयनसम्वत्सरयुगप्रविभागं करोति ॥१॥

तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षि-निमेषाः काष्ठा। त्रिंशत्काष्ठाः कला। विंशतिकलोमुहूर्त्तः

प्रकाश-तमसीति। सतां कालशब्देनात्र कालत्वोपाधिः शीतादिभेदभिन्नः शिशिरादिरभिधीयते; तस्य च समत्वक् मिथ्याभ्यां अन्योन्यविरुद्धयोरपि कार्य्ययोः सम्भव इत्यदोषः। कालस्य निरुक्तिं कुर्व्वन्नाह;—स इत्यादि। स कालः, सूक्ष्मामपि स्तोकामपि, कलां भागं, न लीयते गतिमत्त्वात् क्लिष्टो न भवति। अन्ये तु लीयत इत्यत्र कालीयते इति पठन्ति व्याख्या-नयन्ति च, कालीयते संख्यायते इति कालः। निरुक्ति पक्षान्तरमाह,— संकलयतीत्यादि। सङ्कलयति संहरणादेव राशीकरोति भूतानीति वा कालः। सङ्कलयति सुखदुःखाभ्यां भूतानि योजयतीति वा कालः। अथवा कालयति मृत्युसमीपं नयतीति वा कालः। अन्येतु कालयतीत्यत्र कलय-तीति पठन्ति, कलयति संख्यातीति वा कालः इति च व्याख्यानयन्ति। तस्य सम्वत्सरेत्यादि। तस्य कालस्य किं विशिष्टस्य सम्वत्सरात्मनः सम्वत्सर-स्वरूपस्य। सम्वत्सरात्मनः सम्वत्सरशरीरस्य इत्यन्ये। भगवानादित्य-हेतुत्वात्। अथवा रविरेव भगवान् माहात्म्यवान् स्वरश्मिभिः शीतोष्णवर्षाः कुरुते। कालविभागश्च गतिविशेषणाशेषेनोदयास्तगमनलक्षणेन। ननु सम्वत्सरात्मन इति किमुक्तं येन ऋत्वन्तराणां वा सर्व्वेषां धर्म्मावरोधः। कुतः शीतोष्णवृष्टिभेदेन तेषामत्यन्तभिन्नत्वात्। सम्वत्सरे पुनरेकस्मिन्नेव सर्व्वेषां भूतभवद्भविष्यतां दिवावसानाद्वृतूनां सम्वत्सरान्तराणाञ्च धर्म्मोऽवरुध्यते इति यथोक्तमेव तत्राजयं ॥ १ ॥

इदानीं सम्वत्सरांशान् निमेषादीन् विवरितुमाह;—तत्र लघ्वक्षरोच्चारण-मात्र इत्यादि। एतेषु मध्ये। लघ्वक्षरं अकारादि। तस्योच्चारणं कण्ठताल-

कलादशभागश्च। त्रिंशन्मुहूर्त्तमहोरात्रं। पञ्चदशाहोरात्राणि पक्षः। स च द्विविधः शुक्लः कृष्णश्च; तौ मासः ॥२॥

तत्र माघाद्यो द्वादश मासा द्विमासिकमृतुं कृत्वा षड्-ऋतवो भवन्ति ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः मधुमाधवौ वसन्तः। शुचिशुक्रौ ग्रीष्मः। नभोनभस्यौ वर्षा। इषोर्जौ शरत्। सहः सहस्यौ हेमन्त इति। त एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकर-

व्यादि-व्यापारेणोदीरणं। तत्प्रमाणोनिमेषः। ननु लघ्वक्षरोच्चारणादिना निमेषादयो विभज्यन्ते,तत्कथं भगवानादित्यो गतिविशेषेण निमेषादीनां विभागं करोतीत्युक्तं? नैषदोषः। यतो ज्योतिषिका निमेषादिप्रविभागेन शङ्कुच्छायामागमोक्तामर्कगत्यामपि प्रमाणयन्ति। सा तु सर्वजनप्रसिद्धेति न निर्दिष्टा। कलादशभागश्चेति कलाया दशभागः त्रिंशः काष्ठाः। त्रिंशत्कलामुहूर्त्त इति पाठो निबन्धैर्विस्तरेण दूषितः। शुक्लश्चेति कृष्णपक्षक्रमोऽमावस्यावधिमासं ज्ञापयति। अन्ये तु कृष्णः शुक्लश्चेति पठन्ति ॥ २ ॥

तत्रेत्यादि। तेषां ऋतूनां मध्ये तपाः माघः। तपस्यः फाल्गुनः। मधुश्चैत्रः। माधवो वैशाखः। शुचिर्ज्यैष्ठः। शुक्र आषाढः, अन्ये शुक्रोज्यैष्ठः, शुचिराषाढ इति मन्यन्ते। नभाः श्रावणः। नभस्यो भाद्रपदः। इष आश्विनः। ऊर्ज्जः कार्त्तिकः। सहा मार्गशीर्षः। सहस्यः पौषः। शिशिरादिरयं ऋतुविभागः रसबलमधिकृत्योक्तः। चरकेऽपि तस्याशीतीये रसबलनिष्पत्त्यर्थं शिशिरादिविभागा दर्शिताः। अन्ये तु अन्यथा व्याख्यानयन्ति। तत्र माघादयः इत्याद्यः। तत्रेति गङ्गाया उत्तरदेशे शिशिरादिऋतुविभागो बोद्धव्यः, इत्ययमर्थो गयदासाचार्य्येण बहुधा दूषितः। त एते शीतोष्णवर्षेत्यादि। तत्र ते षड् ऋतवः शीतोष्णवर्षलक्षणैर्लक्षिताः। अत्र शीतं वातकृतं, औष्ण्यं आदित्यकृतं, वर्षं चन्द्रकृतं। शीतं वर्षं चन्द्रकृतमित्यन्ये। एतैश्च षड् ऋतुभिः द्वे अयने भवतः। कुतः इत्याह चन्द्रादित्ययोः

त्वादयने द्वे भवतो दक्षिणमुत्तरञ्च। तयोर्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवानाप्यायते सोमोऽम्ललवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते। उत्तरञ्च शिशिरवसन्तग्रीष्मास्तेषु भगवानाप्यायतेऽर्कस्तिक्तकषायकटुकाश्च रसा बलवन्तोभवन्त्युत्तरोत्तरञ्च सर्वप्राणिनां बलमपहीयते॥ ३॥

भवति चात्र।

शीतांशुः क्लेदयत्युर्वीं विवस्वान् शोषयत्यपि।
तावुभावपि संश्रित्य वायुः पालयति प्रजाः॥ ४॥

कालविभागकरत्वात्। के ते द्वे अयने इति पृष्ट आह;—दक्षिणं उत्तरञ्च। अत दक्षिणमयनं चन्द्रकालं विभागयति। उत्तरमयणमादित्यकालमिति। तयोर्द्दक्षिणमित्यादि। तयोर्द्दक्षिणोत्तरायणयोर्मध्ये वर्षाशरद्धेमन्ता दक्षिणायनं, तेषु वर्षादिषु उत्तरोत्तरं भगवान् सोम आप्यायते अधिकवलो भवति। न केवलं सोम एव वलवान् भवति, रसाश्च अम्लादयो वर्षादिषु यथासंख्यमुत्तरोत्तरं वलवन्तो भवन्ति। उत्तरोत्तरञ्चेति चकारो व्यतिक्रमेण सम्बन्धनीयः, तेन सर्वप्राणिनाञ्च उत्तरोत्तरं वलमभिवर्द्धते इत्यर्थः। उत्तरमित्यादि। शिशिर-वसन्त-ग्रीष्मा उत्तरायणं, तेषूत्तरोत्तरं भगवानर्क आप्यायते अधिकवलो भवति। तिक्तादयो रसाश्च शिशिरादिषु यथासंख्यमुत्तरोत्तरञ्च वलवन्तो भवन्ति। वलमपहीयते वलहानि र्भवति। ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ता इति स्तूते यद्यपि प्रागुत्तरायणं पठन्ति तथापि भाष्ये यत् प्रथमं दक्षिणायनस्य व्याख्यानं तत् उत्तरायणतोऽपि दक्षिणायनस्य विशिष्टं प्रतिपादयति। कुतः विसर्गत्वात् प्राणिनां वलकरत्वाच्च इति॥ ३॥

अमुमेवार्थमुपसंहरन्नाह;—भवति चात्र इत्यादि। शीतांशुश्चन्द्रः। क्लेदयति आर्द्रीकरोति। उर्वीं भूमिं। विवस्वान् आदित्यः। शोषयति तावुभावपीति तौ चन्द्रसूर्य्यौ आश्रित्य वायुः प्रजा रक्षति। चन्द्रमाश्रित्य

अथ खल्वयने द्वे युगपत्सम्वत्सरो भवति। ते तु पञ्च युगमिति संज्ञां लभन्ते। स एष निमेषादियुगपर्यन्तः-कालश्चक्रवत्परिवर्त्तमानः कालचक्रमुच्यत इत्येके ॥५॥

इह तु वर्षाशरद्धेमन्तवसन्तग्रीष्मप्रावृषः षडृतवो भवन्ति दोषोपचयप्रकोपोपशमनिमित्तं। ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः। तद्यथा।–भाद्रपदाश्वयुजौ वर्षा। कार्त्तिकमार्गशीर्षौ शरत्। पौषमाघौ हेमन्तः। फाल्गुनचैत्रौ वसन्तः। वैशाखजैष्ठौ ग्रीष्मः। आषाढ़श्रावणौ प्रावृड़िति॥ तत्र वर्षास्वोषधयस्तरुण्योऽल्पवीर्य्या आप-

आप्यायनं जगतः करोति, सूर्य्यमाश्रितम् शोषणं, ततो यथाकालं रसाभिनिवृत्ते प्रजावर्द्धयतीति ॥ ४ ॥

परिशिष्टं पूर्वसूत्राद् व्याख्यातुमाह ;—अथ खल्वयन इत्यादि। युगपत् एककालः। अयनद्वयं सम्वत्सरः। न पृथग् दक्षिणायनमुत्तरायणम्बा। ननु माघादयो द्वादशमासाः सम्वत्सर इत्युक्तं, ततः किं पुन र्न उच्यते। पूर्वोदिता हि माघादयोद्वादशमासा व्यस्ता अक्रमपठिताश्च सम्वत्सर इत्याशङ्का स्यात्। अथ खल्वयने द्वे इत्यादि निर्द्देशे क्रियमाणे येन क्रमेण षडृतुभागे अयनद्वयमुक्तं तेनैव चेदयनद्वयं युगपत् तदा सम्वत्सर इति व्यस्तानामक्रमपठितानां सम्वत्सरं निरस्तमिति। इदानीं युगप्रतिभागं दर्शयन्नाह ;— ते त्वित्यादि। ते पुनः पञ्चसम्वत्सरः युगमिति संज्ञां प्राप्नुवन्ति। इयञ्च युगस्य पारिभाषिकी संज्ञा। परमार्थतस्तु सत्य-त्रेतादय श्चत्वारो युगविशेषाः। एष इत्यादि। स एष कालदर्शयन्नाह ॥ ५ ॥

इहेतीत्यादि। इहास्मिन्नध्याये। तु शब्दो पुनरर्थः। अस्मिन्नध्याये पुनः किमर्थं वर्षादय ऋतव इत्याह दोषचयाद्यर्थं। ननु इदं दर्शनं व्याधिहेतुवातादिसञ्चयाद्यर्थत्वात् प्राक् कर्त्तुं युज्यते। नैवं तत्र वातादिहेतूनां रसानां निष्पत्तौ तदेव दर्शनं प्राकृतं। अथवा हेमन्ते शिशिरे चैव वसन्ते चापीत्यादि श्लोके शिशिरादीनामादौ निर्द्दिष्टत्वात्। ननु प्रावृड् वर्षयोः को-

श्चाप्रसन्नाः क्षितिमलप्रायाः ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टब्धाग्नीनां विदह्यन्ते,विदाहात् पित्तसञ्चयमापादयन्ति। स सञ्चयः शरदि प्रविरलमेघे वियत्युपशुष्यति पङ्केऽर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति। ता एवौषधयः कालपरिणामात्परिणतवीर्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्यस्ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः स तुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छैत्याद्गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति। स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति। ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च, ता उपयुज्यमाना सूर्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति। स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नदेहानां प्राणिनां शीतवातवर्षेरितो वातिकान् व्याधीन् जनयति। एवमेष दोषाणां सञ्चयप्रकोपहेतुरुक्तः॥ ६॥

भेदः ? उच्यते,—प्रथमः प्रावृषः कालः प्रावृट्, तस्यानुबन्धो वर्षासञ्चयात् प्रकोपो बलवान्। तस्य चिकित्सितं संशोधनमधिकृत्य वर्षादयोऽभिहिताः। यद्यपि दोषसञ्चयादिनिमित्तं वर्षादयः कथिता इति। अत्र वर्षादय ऋतव उक्ताः, तथा चरकेऽपि रोगभिषग्जितीये विमाने संशोधनमधिकृत्योक्ताः, तथापि सञ्चयादिषु संशोधनं कार्यमिति। अस्य प्राधान्यं शिशिरादयस्तु रसं बलं चाधिकृत्योक्ताः, वर्षादयस्तु संशोधनमधिकृत्य सञ्चयाद्यर्थमिति तात्पर्यार्थः। अन्ये त्वन्यथा व्याख्यानयन्ति। गङ्गाया

दक्षिणे देशे वर्षादिकमनुविभागो ज्ञातव्यः। अयमपि गयदासाचार्येण दूषितः। पित्तादीनां सञ्चय-प्रकोपौ वर्षादिषु यथा सहेतुकौ भवतः तथा निर्दिशन्नाह ;—तत्र वर्षास्वित्यादि॥ तत्र तेषु मध्ये ओषधयो गोधूम-चणकशाल्यादयः। तरुण्योऽभिनवाः, अल्पवीर्य्याः अल्पशक्तयः, भवन्तीत्यध्याहारः। अन्ये तु वीर्य्यशब्दं शीतोष्णाख्यं वीर्य्यवाचिनं मन्यन्ते। ननु वर्षासु गोधूमादय पुरातना एव भवन्ति, कथमभिनवा इत्युच्यन्ते? नैष दोषः। गोधूमचणकशाल्यादयोऽन्तःसूक्ष्मजलप्रवेशात् स्विन्नमानमुपगताः किञ्चित् तिरस्कृत—शक्तयः प्ररोहधर्म्मिण्यः प्रोच्छूनतामुपगता अनवा अपि तरुण्य इत्युच्यन्ते। शाकादयस्तु नूतना एव प्रजायन्ते। आपश्चाप्रसन्ना मवत्वात्। कलुषा इत्यर्थः। चितिमलप्रायाः पृथिव्याः तृणपर्णरसकषायादिमलबहुलाः। अत्रापि भवन्ति इत्यध्याहारः। ता उपयुज्यमाना इत्यादि विदह्यन्ते अम्लपाकमुपयान्ति काताः पूर्व्वोक्ता ओषधयः आपश्च। किं क्रियमानाः उपयुज्यमानाः केषामम्लपाकमुपयान्ति देहिनां किं विशिष्टानां शीतवातविष्टम्भिताग्नीनां। शीतेन कुपितोवातः शीत-वातः शारीरः। तेन मन्दवेगीकृताग्नीनां न पुनर्वाह्येन शीतवातेन। वहिर्लोमकूपरोधेन उष्मणोऽनिर्गमात् अन्तराग्नेर्बलमेधते। पुनः किं भूतानां आर्द्रीभूतशरीराणां। कस्यां सत्यां। भूमौ किं विशिष्टायां जल-प्रक्लिन्नायां, पानीयेन सुष्ठु स्तिमितायां। कस्मिन् सति नभसि आकाशे, किं विशिष्टे, मेघावतते मेघव्याप्ते। विदाहात् अम्लपाकात् पित्तसञ्चय-मिति संहतिरूपा वृद्धिः। सञ्चयः स्वस्थानवृद्धिरित्यन्ये। सञ्चीयमान-मपि पित्तं ऋतुशैत्यात्तस्मिन् काले न कुप्यति। स सञ्चयः शरदीत्यादि। सएव पित्तस्य वर्षाकालोपचितस्य सञ्चयः, शरदि व्यमेघे आकाशे सूर्य्य-रश्मिभिः प्रविलापितः सन् पित्तोद्भवान् व्याधीनुत्पादयति। ता एवौषधयः इत्यादि। ताएवौषधयः पूर्व्वोक्ताः। कालपरिणामात्कालपरिपाकात्परि-णतवीर्य्याः सञ्जातशक्तिकाः। बलवत्यो देहोपचयहेतवः। अन्यथा परिणतवीर्य्यबलवतोरेकार्थत्वात् पुनरुक्तिःस्यात्। आपश्च प्रसन्नाः स्वच्छाः चितिमलापगमादित्यन्ये। ता इति पूर्व्वोक्ता ओषधयः आपश्च उपयुज्य-

तत्र वर्षाहेमन्तग्रीष्मेषु सञ्चितानां दोषाणां शरद्वसन्त-प्रावृट्सु च प्रकुपितानां निर्हरणं कर्त्तव्यं। तत्र पैत्तिकानां

माना: खाद्यमाना: पीयमाना:। स तुषारोपस्तम्भितदेहानामिति उप-स्तम्भितानि आप्यायितानि येषां ते तथोक्ता:। हिमानीवशात्तदानीं स्त्यान-तैव भवति। तत्र न प्रकोप:। स सञ्चय इत्यादि। अर्करश्मि—प्रविलायित इति स्त्यानत्वविलयमात्रं वसन्ते भवति, न पुनरुपशोषणाख्य: क्रम:, कस्मात् अर्कस्य नातितीक्ष्णत्वात् श्लेष्मप्राचुर्य्यात् श्लैष्मिकान् व्याधीन् अन्नद्वेष-हृदयोत्क्लेदादीन्। ता एवौषधय इत्यादि।—निदाघे ग्रीष्मे,नि:सारा दुर्बल-वीर्य्या:। रुक्षा: नि:स्नेहा:। न केवलमोषधय एवं विधा भवन्ति आपश्च भवन्तीत्यर्थ:। ता उपयुज्यमाना इत्यादि।—ता अनन्तरं निर्दिष्टा: ओषधयो रौक्ष्यलघुत्वाभ्यां हेतुभ्यां सूर्य्यप्रतापोपशोषितदेहानां देहिनां नृणां वातसञ्चयमापादयन्ति इति पिण्डार्थ:। यद्यपि शीतस्य वायो-रुष्ण—ग्रीष्मे सञ्चयो न भवति तथापि वातगुणेषु सर्व्वेषु रौक्ष्यं प्रधानं, तेन ओषधीनां अतयर्थं रौक्ष्येण रुक्षस्य वायोर्ग्रीष्मे सञ्चय:स्यात् इत्यदोष:। स सञ्चय इत्यादि। स वातसञ्चय: शीतवातवर्षेरित: वातिकान् व्याधीन् कोष्ठतोदसञ्चरणादीन् जनयति, प्रावृषि केषां वातिकान् व्याधीन् जनयति, देहिनां किं विशिष्टानां क्लिन्नानां। एवमेष दोषाणां इत्यादि। एवं अनेन प्रकारेण। एष इति कालस्वभावकृतओषधितारुण्यादि यावच्छीत-वातवर्षेरितो वातिकान् विकारान् व्याधीन् जनयति। दोषाणां सञ्चय-प्रकोपौ तयोरयं हेतुरुक्त:, दोषोपचय—प्रकोपोपशम-निमित्तमिति त्रयाणां चयादीनां प्रतिज्ञातत्वात्। कथं सञ्चय-प्रकोपौ व्याख्याय उपसंहार:, नैषदोष:। प्रकोपे हि संशोधनं कार्य्यं, तत्र यदि यथाप्रतिज्ञं त्रीन् प्रशम-सहितान् व्याख्याति तदा प्रशमान्तरित: प्रकोपोपशमविधि: स्यात्। तस्मात् सञ्चय—प्रकोपाच्चैतद् भवेत्। पृथगाख्याति॥ ६॥

प्रकोपे यथावसरं संशोधनविधेरासञ्जनार्थं तमेव विधिं वक्तुमाह ;—तत्रेत्यादि। तत्र वर्षादिषु ये सञ्चिता दोषास्ते एव यदा शरदादिषु

व्याधीनामुपशमो हेमन्ते, श्लैष्मिकाणां निदाघे, वातिकानां घनात्यये स्वभावत एव। तएते सञ्चयप्रकोपोपशमा व्याख्याताः ॥ ७ ॥

प्रकुपिता भवन्ति, तदा निर्हरणं कर्त्तव्यं। निर्हरणमाकर्षणं वमनादिना। प्रकुपितानामिति प्रशब्दो बहुदोषाणामेव संशोधनमिति दर्शयति। चकारोदर्शयति। ननु वर्षादिषु शरदादिषु चय—प्रकोपयोरन्यतरमेवोक्तत्वात् किमर्थं वर्षाशरद्धेमन्ते तत्रादि पाठः? प्रकुपितानां निर्हरणं कर्त्तव्यमितत्रैव वक्तुं युक्तं। सतत्रं शरदादिष्वेव प्रकुपितानां निर्हरणं यथास्यात् अन्यत्र माभूदिति नियमार्थं। पुनःशरदादिग्रहणं यत्क्रियेत तदा ग्रीष्मादिषु हेतुवाहुल्यं। प्रकुपितेषु दोषेषु वमनाद्योविधीयमाना न चैतदिष्यते ग्रीष्मादिषु हि वमनाद्योविधीयमाना व्यापदं मरणञ्चोत्पादयन्ति। प्रावृट्षु चेति चकारः संशोधन—साध्येषु अतिपातिषु रोगेषु ग्रीष्मादिष्वपि संशोधनं कर्त्तव्यमिति ज्ञापयति। वर्षादिषु चयस्य पूर्वमेवोक्तत्वात्पुनर्वर्षादिग्रहणं यथास्वऋतुविहित आहाराचाराख्यस्वस्थवृत्तोदितोविधिः कर्त्तव्य इति सूचयति। शरदाद्यानां ऋतूनां द्वितीयमासे संशोधनं कर्त्तव्यं। तत्रापितु संशोधनं मार्गशीर्षे, कफनिर्हरणं चैत्रे, वातस्य श्रावणे; एवं हि साधारणः कालः। त्रिमासान्तरिताश्च दोषा भवन्ति। तथाचेह ग्रीष्मादिसञ्चितान् दोषान् मासान्तरितान् हरेदिति उपशमं व्याख्यातुकाम आह;—तत्र पैत्तिकानामित्यादि। "चयप्रकोपोपशमा दोषाणां हिद्वयोरपि। सन्धौ साधारणा वत्स भविष्यद्वर्त्तमानयोः। ऋतुसन्धौतु दोषाणां बहुधाः परिकल्पना। एवम्प्रकारा व्याख्यातुं विधिं वचामतः परं। ह्रासयेदल्पशोऽभ्यस्तं वर्त्तमानतुकं विधिं। भविष्यद्वृतुकञ्चापि यतेताभ्यासकारणात्। यावदभ्यासयेत्पूर्वं तावन्तं स भजेत्परं। स्युरोगास्त्यागयोगाभ्यां सहसा सात्म्यसेवनात्। तस्माद्यथोक्तमभ्यस्येदृतुसन्धिविधिं नरः"। स्वभावतः स्वलक्षणतः। स्वलक्षणं पुनः शीतोष्णवर्षादि। ननु यदि विकाराणां स्वभावादेव दोषाणामुपशमः, तर्हि

तत्र पूर्वाह्णे वसन्तस्य लिङ्गं, मध्याह्णे ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकं, शारदमर्द्धरात्रे, प्रत्युषसि हैमन्तमुपलक्षयेत् । एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयात् ॥८॥

तत्राव्यापन्नेष्वृतुष्वव्यापन्ना ओषधयो भवन्त्यापश्च, ता उपयुज्यमानाः प्राणायुर्बलवीर्यौजस्कर्यो भवन्ति । तेषां

शास्त्रवैयर्थ्यं स्यात् । न च वैयर्थ्यं दृश्यते, तदुक्तं "विधिनापुनःपशमदर्शनात् ।" सत्यमेतत्, दोषाणां पदार्थस्वभावविनाशित्वेऽपि चयादिविसदृशसन्तानोत्पत्तौ शास्त्रं हेतुतया तत्प्राप्तिप्रमाणं नाऽनर्थकं । विनाशकारणाभावेऽपि हि घटादीनां विसदृशकपाल-लक्षणोत्पादे मुद्गरादिहेत्वन्तरसाफल्यमस्ति ॥७॥

साम्वत्सरिकं विधिं दिनेऽप्यतिदेष्टुमाह ;—तत्र पूर्वाह्णेत्यादि । तत्रेति अहोरात्रे । शारदमर्द्धरात्र इति अर्द्धरात्रे भूगोलाधःस्थित-सूर्य्यत्वात् शारदं लिङ्गं, आतपाभावे हि गोलकगणितविदो ज्योतिर्विदो मन्यन्ते ; भिषजस्तु कालस्वभावादाहारवशाच्च इति । अहोरात्रमपि वर्ष-मिवेत्यादि शीतोष्णवर्षैर्यं दोषोपचयप्रकोपोपशमास्तैरहोरात्रं वर्षमिव-जानीयादिति सम्बन्धः । एतेनाहोरात्रिके सञ्चयादौ अनागताबाधोक्त-दन्तधावनादिप्रतिकारैर्निर्हरणं कर्तव्यमित्युक्तं । ननु प्रतिदिनं दोषाणां सञ्चयप्रशमेषु सत्सु कथमार्त्तवादयः सञ्चयादयो भवन्ति? दिवसैरेव ऋतूनामा-रब्धत्वात् आह्निक-चयकोपयोः प्रत्यक्षमेव प्रतीतत्वात् । सत्यं आह्निकौ चयप्रकोपौ अहोरात्रमाश्रितत्र सोम-सूर्य्यानिलानामुष्णादिगुणमात्रोत्पन्न-त्वादल्पकारणौ, अल्पेनैवानागताबाधविधानात् शान्तिमुपायातः । ऋतु-भवौ तु चय—प्रकोपौ मार्गान्तरगतसोमसूर्य्यानिलकृतैर्द्रव्यरसगुणवीर्य्य-विपाक—प्रभावैर्निरन्तरोपचितत्वात् अहोरात्रमात्राश्रितार्कादिगुणा-दत्यन्तभिन्नैरारभ्यमाणौ महाकारणकौ महतैव संशोधनादि—विधिना शान्तिं गच्छतः ॥ ८ ॥

सोऽयं दोषचयादिरव्यापन्नेषु ऋतुषु भवतीति दर्शयन्नाह ;—तत्रा-

व्यापदोऽदृष्टकारिताः। शीतोष्णवातवर्षाणि खलु विपरीतान्योषधीर्व्यापादयन्त्यपश्च। तासामुपयोगाद् विविधरोगप्रादुर्भावो मरको वा भवेदिति॥ ९॥

तत्राव्यापन्नानामोषधीनामपाञ्चोपयोगः॥ १०॥

कदाचिदव्यापन्नेष्वप्यृतुषु कृत्याभिशापरक्षःक्रोधाधर्मैरुपध्वस्यन्ते जनपदाः। विषौषधीपुष्पगन्धेन वायुनोपनीतेना-

व्यापन्नेष्वित्यादि। प्राणा अग्निसोमादयः। आयुः शरीरेन्द्रियसत्वात्मनां संयोगः। बलमुत्साहोपचयलक्षणं। वीर्यं शक्तिः। ओजो हृदयाश्रितं सप्तधातुस्नेहः। कुतः पुनरृतूनां व्यापदः इत्याह;—तेषां पुनरित्यादि। तेषां ऋतुनां व्यापदः शीतोष्णवातवर्षाणामेव वैपरीत्यं अदृष्टेन सर्वजनसामान्येनाधर्मेण। कारिताः कृतुं प्रयोजिताः। शीतोष्णेत्यादि। विपरीतानि हीनमिथ्यातियुक्तानि. ओषधीः अपश्च व्यापादयन्ति विरूपतां प्रापयन्ति। अन्ये तु शीतोष्णवातवर्षाणीत्यादि पाठमन्यथा कृत्वा पातनिकां पूर्व्वं पठन्ति। तद्यथा अधर्मास्तावद्व्यापदां सम्भवे प्रयोजकः कर्त्ता। कः पुनः स्वतन्त्रः कर्त्ता इत्याह;—शीतोष्णवर्षाणां वैपरीत्यमोषधी व्यापादयति अपश्च। व्यापन्नानामोषधीनामपां चोपयोगात् दोषं वक्तुमाह;—तासामुपयोगादित्यादि॥ ९॥

ऋतुव्यापदां चिकित्सासूत्रं दर्शयन्नाह;—तत्रेत्यादि। अव्यापन्नशब्द उभयत्र सम्बध्यते। तेन अव्यापन्ना ओषधयः, पुराणा आपश्च अव्यापन्नाः कथिताः। अन्ये तु तत्राव्यापन्नानामोषधीनामपां चोपयोग इत्यत्र तत्र पुराणाभिरित्यादि पाठं पठन्ति। सचातन्त्रमप्रसिद्ध इति न लिखितः॥१०

ऋतुव्यापद्भ्योऽन्यैरपि हेतुभिर्व्याधिसम्भवं दर्शयन्नाह;—कदाचिदित्यादि। कदाचिन्न सर्वकालं। कृत्या कुपितमन्त्रिणोऽभिचारकर्म्मजनितो राक्षसीविशेषः। अन्ये तु सर्व्वराष्ट्रच्छेदी अभिचारः। अभिचारस्तु एक-पुरुषव्यापादक एव। अभिशापो गुरुसिद्धादीनामाक्रोशः। रक्षांसि हिंसा विहाराणि हेति-प्रहेति-कुलजातानि,तेषां क्रोधः रक्षःक्रोधः। अधर्मः

क्रम्यते यो देशस्तत् दोषप्रकृताविशेषेण कासश्वासवमथु-प्रतिश्यायशिरोरुग्ज्वरैरुपतप्यन्ते ग्रहनक्षत्रचरितै र्वा गृहदारशयनासनयानवाहनमणिरत्नोपकरण-गर्हितलक्षण-निमित्तप्रादुर्भावै र्वा ॥ ११ ॥

तत्र स्थानपरित्यागशान्तिकर्म-प्रायश्चित्तमङ्गलजपहोमो-

कायवाङ्मनसां दुश्चरितं। उपध्वस्यन्ते उपधूयन्ते। जनपदाः लोकाः। विषौषधिपुष्पगन्धेनेत्यादि। विषाणां ओषधीनाञ्च पुष्पाणि,तेषां गन्धेन; किं विशिष्टेन वायुनोपनीतेन समीपमानीतेन। तेन ये श्वासकासादयः तैरुप-तप्यन्ते जनपदाः। ओषधयो सुविलिन्दष्ठ्यादयः। अन्ये तु कासश्वासेत्यादि-पाठमन्यथा पठन्ति, कासश्वासप्रतिश्यायगन्धाज्ञानभ्रमशिरोरुग्ज्वरमसुरि-काभिरुपतप्यन्ते व्याख्यानयन्ति च। तत्र नासारन्ध्रानुगतेन वायुना कास-श्वासप्रतिश्यायगन्धाज्ञानभ्रमशिरोरुजः। त्वगिन्द्रियगतेन ज्वरमसुरिकादयः। ग्रहनक्षत्रचरितैर्वेति ग्रहाणां शनैश्चरादीनां गर्हितस्थानस्थितानां प्रचारो-ग्रहचरितं, नक्षत्राणि अश्विन्यादीनि, तेषां चरितं उल्कापातादिभि-र्जन्मनक्षत्रादिभिर्हननं। गृहदारेत्यादि। गृहाणां यानि गर्हितानि निन्दि-तानि लक्षणानि चिह्नानि तन्निमित्तं प्रादुर्भाव उत्पत्तिर्येषां व्याधीनां, तैरुतप्यन्ते जनपदाः; दारा भार्य्या, शयनं खट्टा, आसनं पीठं, यानं दोलादि, वाहनं हस्त्यश्वादि, मणिःस्फटिकादिः। गृहादयो मणिपर्य्यन्ता द्वन्द्व,तएव रत्नानि इति समासः। अन्यथा मणिरत्नयोरेकार्थत्वात् पुनरुक्तता स्यात्। अन्ये तु मणयः सर्पादीनां प्रशस्तावयवविशेषाः, रत्नानि माणिक्यादीनि उपकरणानि घटपीठरसूर्पादीनि। अथवा गृहादीन्येवोपकरणानि। अन्ये तु गृहदारेत्यादि गद्ये गृहदारशब्दौ निमित्तशब्दञ्च परित्यज्य शयनासन-यान-वाहन-मणिरत्नोपकरण-गर्हितलक्षणप्रादुर्भावैर्वा इति पठन्ति ॥ ११ ॥

इदानीं ऋतुव्यापदादिकृतानां रोगाणां साकल्येन चिकित्सां दर्शयन्नाह,-तत्र स्थानेत्यादि॥ ऋतुकोपस्य अधर्म्मकारितत्वात्। तत्र दैवव्यपाश्रयं भेषजं, शान्तिरिन्द्रियविजयः। अथवा वेदोक्तमन्त्रैर्यजनादिकं प्रायश्चित्तं प्राक्तन-

पहारेज्याञ्जलिनमस्कारतपोनियमदयादानदीक्षाभ्युपगम-
देवताब्राह्मणगुरुपरैर्भवितव्यं, एवं साधु भवति ॥ १२ ॥

ऋतूनामत ऊर्द्ध्वमव्यापन्नानां लक्षणान्युपदेक्ष्यामः ॥१३॥

वायुर्वात्युत्तरः शीतो रजोधूमाकुला दिशः।
छन्नस्तुषारैः सविता हिमानद्धा जलाशयाः ॥
दर्पिता ध्वांक्षखड्गाह्वमहिषोरभ्रकुञ्जराः।
लोध्रप्रियङ्गुपुन्नागाः पुष्पिता हिमसाह्वये ॥ १४ ॥
शिशिरे शीतमधिकं वातवृष्ट्याकुला दिशः।

कर्म्मोपशमार्थं स्वार्थवचनेन चान्द्रायनादि। अथवा "प्रायोनाम तपःप्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चयसंयुक्तं प्रायश्चित्तं इति स्मृतं"। मङ्गलं प्रशस्तौषधीमणिधारणादि। जपः ओंकारपूर्वकं ऋक्‌यजुसामावर्त्तनं। होमो लक्षकोटीप्रयुतोपलक्षितः। उपहारो देवादिषु गवाश्वप्रभृतीनामुपानयनं। अन्ये उपहारो देवतानां सपशुर्वलिः। इज्या यागः। अञ्जलिः भक्त्या करसम्पुटविधानं। नमस्कारः देवद्विजगुरुभ्यः कायवाङ्मनसः प्रणामः। तपःस्तापनालक्षणं,— उपवासादिनियमः शास्त्रोदितोविधिर्मौनादिः। दया प्राणिषु क्रियादानं यथाविभवं वित्तविसर्गं। दीक्षा गुरूपचरणपूर्वकं मन्त्रादिग्रहणं। अभ्युपगमो गुरुवाक्यादीनामङ्गीकारः। परशब्दःशान्त्यादिभिःप्रत्येकं सम्बध्यते। एवं साधुभवति कुशलं भवतीत्यर्थः ॥ १२ ॥

ऋतूनामित्यादि। अत ऊर्द्ध्वमव्यापन्नानां ऋतूनां लक्षणान्युपदेक्ष्यामः। अव्यापन्नाः प्रसन्नाः ॥ १३ ॥

ऋतुप्रकोपे हि पूर्वं शान्त्यादिकमुक्तं, अधुना प्रसन्नऋतुलक्षणान्याह;— वायुर्वात्युत्तर इत्यादि। तत्र षड्‌ऋतुषु मध्ये हेमन्ते उत्तरदिशोजातत्वात् उत्तरवायु र्वाति वहति। रजो धूलिः। आकुला व्याप्ताः। हिमानद्धा हिमसम्बन्धाः। दर्पिता हर्षिताः। ध्वाङ्क्षः काकः। खड्गाह्वो गण्डारः। उरभ्रो मेषः। पुन्नाग इति पद्मकेशरं। हिमसाह्वये हेमन्ते ॥ १४ ॥

शिशिरेत्यादि। वातवृष्टि वातेन मिश्रिता वृष्टिर्वातवृष्टिः। अधुना

शेषं हैमन्तवत्सर्वं विज्ञेयं लक्षणं बुधैः ॥ १५ ॥
दिशो वसन्ते विमलाः काननैरुपशोभिताः ।
किंशुकाम्भोजवकुलचूताशोकादिपुष्पितैः ॥
कोकिलाषट्पदगणैरुपगीता मनोहराः ।
दक्षिणानिलसम्वीताः सुमुखः पल्लवोज्ज्वलाः ॥१६॥
ग्रीष्मे तीक्ष्णांशुरादित्यो मारुतो नैऋतोऽसुखः ।
भूस्तप्ता सरितस्तन्व्यो दिशः प्रज्वलिता इव ॥
भ्रान्तचक्राह्वयुगलाः पयःपानाकुला मृगाः ।
ध्वस्तवीरुत्तृणलता विपर्णाङ्कितपादपाः ॥ १७ ॥
प्रावृष्यम्बरमानद्धं पश्चिमानिलकर्षितैः ।
अम्बुदैर्विद्युदुद्योतप्रस्रुतैस्तु सुलस्वनैः ॥

वसन्तमाह ;=सिद्धविद्याधरवधिति । वसन्ते दक्षिणदिशोजातत्वात् मलय-पर्वतस्थितचन्दनसुरभिर्दक्षिणवायुर्वाति । अन्यदपि वसन्तलक्षणमाह ;— दिशोवसन्ते इत्यादि । दिशोवसन्ते विमलाः रजोधूमादिवर्ज्जितत्वात् निर्म्मला भवन्ति । दिश एवं किंशुकादिवृक्षपुष्पितैः काननैरुपशोभिताः भूषिता भवन्ति । ता एव दिशः कोकिलाषट्पदगणैरुपगीता मधुरध्वनि-युक्ता भवन्ति। दक्षिणानिलसम्वीताः दक्षिणवातेन हता दिश इत्यर्थः । सुमुखाः शोभनावकाशाः । पल्लवोज्ज्वलाः पल्लवैः कृत्वा शृङ्गारिताः ॥१५॥१६॥

असुख इति । ग्रीष्मेहि नैऋतो वायुरसुखप्रदो भवति । तन्व्योऽल्पवाहाः भ्रान्तचक्राह्वयुगला इति जलाशयभ्रान्तचक्रवाकयुगलादिशो भवन्ति । पयः-पानाकुला इति उदकपानाय व्यस्ता मृगा भवन्ति । ध्वस्तवीरुत्तृणलता इति विरुधो विटपाः । तृणानि प्रसिद्धानि । लता वल्ली । एते विरुधादयोध्वस्ताः अधःपतिता भवन्ति। विपर्णाङ्कित पादपा इति विपर्णैर्विगलितपत्रैः अङ्किताः चिह्निता पादपा भवन्ति ॥ १७ ॥

प्रावृषेत्यादि । पश्चिमानिलकर्षितै रम्बुदैरम्बरमाकाशं प्रावृषि आनद्ध

कोमलश्यामशष्पाढ्या शक्रगोपोज्ज्वला मही।
कदम्बनीपकुटजसर्ज्जकेतकिभूषिता ॥ १८ ॥
तत्र वर्षासु नद्यम्भः पुरोद्भग्नतटद्रुमाः।
वाप्यः प्रोत्फुल्लकुमुदैनीलोत्पलविराजिताः ॥
भूरव्यक्तस्थलश्वभ्रा बहुशस्योपशोभिता।
नातिगर्जत्स्रवन्मेघनिरुद्धार्कग्रहं नभः ॥१९॥
बभ्रुरुष्णः शरद्यर्कः श्वेताभ्र-विमलं नभः।
तथा सरांस्यम्बुरुहै र्भान्ति हंसांसघट्टितैः ॥

माच्छादितं भवति। कथम्भूतैरम्बुदैरित्याह विद्युद्युद्योतेत्यादि।—विद्युदुद्योतेन सह रचितैः शब्दितैः। तुमुलस्वनैः प्रचण्डगर्ज्जितैः। मही च शरदि कथम्भूता भवति इत्याह कोमलेत्यादि। शष्पं बालतृणं आयासच्छन्ना, शक्रगोपः इन्द्रवधूः, अन्ये त्वेतिरितिगणमाहुः। नीपो धुलीकदम्बः ॥ १८ ॥

वर्षास्वित्यादि। वर्षासु अम्भसा पानीयेन छन्नोत्खाततटद्रुमाश्च नद्यो भवन्ति। सोपानसहितकूपविशेषा वाप्यः। भूरव्यक्तस्थलश्वभ्रा इति भूमिश्च अदृश्यस्थलगर्भा भवति। नातिगर्ज्जदित्यादि।—अतिगर्ज्जित-वर्ज्जितः। पर्यन्योऽसौ मेघः। तेन निरुद्धार्कग्रहं नभो भवति ॥ १९ ॥

बभ्रुरित्यादि।—बभ्रुः कपिलपिङ्गलः। श्वेताभ्रविमलं नभ इति नभ आकाशं श्वेताभ्रं विमलञ्च भवति। हंसांसघट्टितैरिति हंसस्कन्धचालितैः। पङ्कशुष्कद्रुमाकीर्णा निम्नोन्नतसमेषु भूरिति निम्नादिषु प्रदेशेषु बल्काादिकीर्णा भवति। द्रुमाश्च गोपानीककारिणः सूक्ष्माः पिपीलिकाः। बाणेत्यादि।—बाणः सहचरः, सप्ताह्वः सप्तपर्णः, बन्धूको बन्धुजीवकः बाडुली इति लोके। "मत्स्याम्लभोजिनः प्रायः नित्यं चानूपसेविनः। श्लीपदगलगण्डाश्च प्रायस्तेषु भवन्ति हि। निम्नतोयगतान् मत्स्यान् भक्षयन्ति समुद्रजान्। प्रायशः कुत्सितस्तेन मनुष्या दाक्षिणा-

पङ्कशुष्कद्रुमाकीर्णा निम्नोन्नतसमेषु भूः।
वाणसप्ताह्ववन्धूकाशासनविराजिता ॥२०॥
स्वगुणैरतियुक्तेषु विपरीतेषु वा पुनः।
विषमेष्वपि वा दोषाः कुप्यन्त्यृतुषु देहिनां ॥
हरेद्वसन्ते श्लेष्माणं पित्तं शरदि निर्हरेत्।
वर्षासु शमयेद्वायुं प्राग्विकारसमुच्छ्रयात् ॥२१॥

नरजाः। तैनान्नभोजिनो नित्यं गोधूमविद्लाशिनः। भूयिष्ठमर्शसास्तेन खञ्जाश्चावन्तिजा नराः। मांसकामाः सुराकामाः स्त्रीकामाः साहसेरताः। मागधास्तेन भूयिष्ठं दृश्यन्ते राजयक्ष्मिणः। तीक्ष्णान्नानि निषेवन्ते वाह्लीकास्तु विशेषतः। अभिष्यन्दीनि मांसानि तथा धान्योदकानि च। प्रकृत्या चाप्यभिष्यन्दान् सेवन्ते मानुषाः सदा। तेन वाह्लिकदेशेषु प्रायोव्याधिर्वलासकः। नानादेशस्वभावा ये नाचारा न च सत्ववान्। धर्म्मिणोऽधर्म्मिणस्तेषां सात्म्यं सत्वञ्च लक्षयेत्। वर्ज्जनादृतुसात्म्यानां कृशोनित्यं सुदुर्व्वलः। नित्यं रोगाभिभूतश्च पुमान् सात्म्यविवर्ज्जनात्। तस्मात् सात्म्यं निषेवेत असात्म्यं परिवर्ज्जयेत्। सात्म्यसेवी जितक्रोधो नित्यञ्चापि जितेन्द्रियः। जीर्णभोजी नितस्वप्नःसुखं जीवत्यनामयः। ऋतवः प्राग्विनिर्द्दिष्टाः वलयोगस्वभावतः। तेषु गर्भा निषिक्तास्तु तथा रूपान् तथा गुतान्। विज्ञाय च ततो बुद्ध्या प्रशस्तान् निन्दितानपि। ततोऽस्याहारसंयुक्तं भेषजं चावचारयेत्। ततोऽस्यारोगतादेहे वलं वीर्य्यञ्च वर्द्धते" ॥ २० ॥

इदानीमध्यायपरिसमाप्तौ व्यापत् संग्रहश्लोकमाह ;—स्वगुणैरित्यादि ॥ स्वगुणैरतियुक्तेष्विति स्वगुणा ऋतूनामनन्तरोक्ताः, तैरतियुक्तेषु अतिशययुक्तेषु ऋतुषु दोषा देहिनां कुप्यन्तीति सर्व्वत्र सम्बन्धनीयं। अथवा ऋतूनां स्वगुणाः शीतोष्णवर्षाणि तैरतियुक्तेषु। विपरीतेष्विति 'मन्दशीतादियुक्तेषु। अन्ये तु शीतोष्णं उष्णे शीतं वर्षास्वदृष्टिरिति ऋतुवैपरीत्यमाहुः। विषमेष्वपीति वैषम्यं ऋतूनां वर्षालिङ्गं शरदि। शरल्लिङ्गं हेमन्ते। एवमनुलोमविलोमाभ्यां शेषऋतुवैशम्यमुदाहार्य्यं। अन्येतु ऋतूनां

यथोक्तं लिङ्गानामेकस्मिन् ऋतौ सर्वेषां लिङ्गानां भावोऽभावश्चेति वैषम्य-माह:। एतेन स्वगुणातियोगात् ऋतूनां षट्व्यापत्तय:। विपरीतेषु षड् विषमेषु च षड़ेव वा। इति ऋतूनामष्टादशव्यापत्तय: उक्ता:। इरेद् वसन्ते स्त्रेष्माणमित्यादि सुगमं ॥ २१ ॥

डल्लनविरचिते सूत्रस्थाने निबन्धसंग्रहे
षष्ठोऽध्याय: समाप्त:।

सप्तमोऽध्याय:।

अथातो यन्त्रविधिमध्यायं व्याख्यास्याम:।

यन्त्रशतमेकोत्तरम्। अत्र हस्तमेव प्रधानतमं यन्त्राणा-मवगच्छ। किं कारणं? तस्माद्धस्ताद्दते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद् यन्त्रकर्म्मणां। तत्र मन:शरीराबाधकराणि

अथात इत्यादि।—यन्त्रं शल्यानामाहरणोपाय:, विधि: कल्पनं भेदो वा। यन्त्राणां संख्यामाह;—यन्त्रशतमेकोत्तरमित्यादि। एकोत्तरमेकाधिकं, अन्ये तु वाशब्दो असंख्येयवाची, उत्तरशब्द: प्रधानवाची, एतेन यन्त्राणाम-संख्येयत्वमुक्तं एकस्य प्रधानत्वञ्च। अत्र यत्प्रधानं तदेव दर्शयति, अत्र हस्त-मेवेत्यादि। प्रधानतममतिशयेन प्रधानं, अवगच्छ जानीहि। यद्यपि अग्रे कङ्कमुखस्य प्रधानत्वमुक्तं आस्ते तथापि हस्तस्य प्राधान्यं न विरुध्यते प्रधान-तमत्वात्; तस्यैव प्रधानत्वे हेतुमाह तदधीनत्वाद् यन्त्रकर्म्मणामित्यर्थ:। अन्ये त्वन्यथा पठन्ति किं कारणमित्यादि। लोहवेणुवृक्षसूत्रशृङ्गवल्कल-तृणानि स्नायुप्रताना अश्मानश्चेति ताभ्यो यन्त्राणि निष्पाद्यन्ते। इदानीं यन्त्रव्यापिलक्षणपरिभाषां प्रतिपादयन्नाह;—तत्र मन:शरीरेत्यादि।

शल्यानि, तेषामाहरणोपायो यन्त्राणि। तानि षट्प्रकाराणि। तद्यथा,—स्वस्तिकयन्त्राणि, सन्दंशयन्त्राणि, तालयन्त्राणि, नाड़ीयन्त्राणि, शलाकायन्त्राणि, उपयन्त्राणि चेति ॥१॥

तत्र चतुर्व्विंशतिः स्वस्तिकयन्त्राणि, द्वे सन्दंशयन्त्रे, द्वे एव तालयन्त्रे, विंशति र्नाड्यः, अष्टाविंशतिः शलाकाः। पञ्चविंशतिरुपयन्त्राणि॥ तानि प्रायशो लौहानि भवन्ति, तत्प्रतिरूपकाणि वा तदलाभे। तत्र नानाप्रकाराणां व्यालानां मृगपक्षिणां मुखैर्मुखानि यन्त्राणां प्रायशः सदृ-

तानि षट्प्रकाराणीति प्रकारोभेदः सादृश्यञ्च,तेषां षड़्भेदाः स्वस्तिकादयः सादृश्यानि वा। षट् स्वस्तिकादीनां सादृश्यादेव प्रतिज्ञातान् षट्प्रकारान् दर्शयितुमाह ;—तद्यथेत्यादि। स्वस्तिकं चतुरङ्गुलं पिष्टघटितं तदाकृतीनि चतुरवयवानि स्वस्तिकयन्त्राण्युच्यन्ते ; शेषाणामपि नामभिरेवाकृतयोज्ञातव्याः॥१॥

तत्र चतुर्विंशतिरित्यादि। द्वे एव तालयन्त्रे इति ननु एवशब्दं विनापि द्वे तालयन्त्रे लब्धे, ततः किं एव-शब्देन ? उच्यते, एवशब्दोऽयं स्वस्तिकादिषु निर्द्दिष्टां संख्यां व्यभिचारयतीति, तेन शल्याकृतिमवेक्ष्य स्वस्तिकादीनि यन्त्राणि अधिकान्यपि कार्य्याणि तालयन्त्रे द्वे, एवं सति निर्द्दोषः। किं द्रव्याणि पुन र्यन्त्राणि कर्त्तव्यानि इत्याह तानीत्यादि। प्रायशो लौहानि इति लोहाः पञ्चसुवर्णादयः, तत्कृतानीत्युच्यन्ते। तत् प्रतिरूपकाणीत्यादि लोह प्रतिरूपकाणि वा लोहाभावे चैतानि दन्तशृङ्गदारूणि यन्त्रयोनित्वेनोक्तानि इति व्याख्यानयन्ति। तत्र यन्त्राणां समासेनाकृतिं प्रसिद्धसाधर्म्म्याद्दर्शयितुमिच्छन्नाह ;—तत्र नानाप्रकाराणामित्यादि। नानाप्रकाराणां विविधभेदानां मृगपक्षिणां हिंस्राणां पशुविहङ्गमानां मुखैः सदृशानि यन्त्राणां मुखानि भवन्तीत्यध्याहारः।

शानि। तस्मात् तत्सारूप्यादागमादुपदेशादन्ययन्त्रदर्शना-
द्युक्तितश्च कारयेत् ॥२॥

समाहितानि यन्त्राणि खरश्लक्ष्णमुखानि च।
सुदृढ़ानि सुरूपाणि सुग्रहाणि च कारयेत् ॥३॥


तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंह-
व्याघ्रवृकतरक्ष्वृक्षद्वीपिमार्जारशृगालमृगैर्वारुककाककङ्क-
कुररचासभास-शशघातुलूकचिल्लिश्येनगृध्रक्रौञ्चभृङ्गराजा-

अत्र मृगाः सिंहादयः पशवः, पक्षिणो वायसादयः। व्यालानामिति पशू-नामेव विशेषणं नतु पक्षिणामितेत्रके। तस्मात् तदित्यादि। तत्सारूप्यादिति व्याल-पशुपक्षिमुखसादृश्यात्, आगमादिति शास्त्रात् तथाहि स्वस्तिकयन्त्राणि अष्टादशाङ्गुलानि, उपदेशादिति वृद्धवैद्यवचनोपदेशात्। युक्तितश्चेति प्रयोजनतः पुरुषोऽवयवादिविभागविचारतः॥ २ ॥


पद्योक्तेन श्लोकेनोपसंहरन्नाह ;—समाहितानीत्यादि। समाहितानि न्यूनातिरिक्तमानवर्जितानि, खरश्लक्ष्णमुखानि दृढ़मसृणमुखानि, अन्ये तु कार्यप्रभेदात् कानिचित्खरमुखानि कानिचित् श्लक्ष्णमुखानि। तत्र खरमुखानि कङ्कमुखानि, श्लक्ष्णमुखानि सिंहमुखादीनि। सुदृढ़ानि समुदीये सुग्रहानि सुधारणानि ॥ ३ ॥

तत्र स्वस्तिकयन्त्राण्येव प्रमाणाकाराभ्यां दर्शयन्नाह;—तत्र स्वस्तिकेत्यादि। तत्र स्वस्तिकयन्त्राणीत्यादि।—तत्र सिंहादयो नव व्यालमृगाः, काकादयः पञ्चदशपक्षिणः, एषां मुखसादृश्याच्चतुर्विंशतिः। तरक्षुर्नेकवष इति लोके, ऋक्षो भल्लुकोऽतिलोमशः बोछ इति लोके, द्वीपी चित्रव्याघ्रः, चित्रक इति लोके ; मार्जारो विड़ालः, एर्वारुकः

सिंहास्ययन्त्रम्।




तरक्ष्वास्ययन्त्रम्।




ञ्जलिकर्णावभञ्जन-नन्दिमुखमुखानि मसूराकृतिभिः कीलैरवबद्धानि मूलेऽङ्कुशवदावृत्तवारङ्गाण्यस्थिविनष्टशल्योद्धरणार्थमुपदिश्यन्ते ॥४॥

सनिग्रहोऽनिग्रहश्च सन्दंशौ षोड़शाङ्गुलौ भवतस्त्वङ्मांससिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते॥५॥


ऋक्षास्ययन्त्रम् ।



काकास्ययन्त्रम् ।




कङ्कास्ययन्त्रम् ।



हरिणवत् इति लोके, कङ्कः मत्स्या दीर्घचञ्चुर्महाप्रमाणः ; दग्धकाकमद्गोऽन्ये । कुररचीरिल्लाकारनादोत्थापितमत्स्या कुरल इति लोके, भासः गोकुलचारी गृध्रविशेषः; शशघाती शशारिरिति लोके, चीरिल्लि चिल्ल इति लोके, श्येनः सिच्चानो गरुड़ान्वये, गृध्रो महाप्रमाणः स तु योजनदृष्टिरामिषाशी च, क्रौञ्चः कुरञ्ज इति लोके, भृङ्गराजः कालचटक इति पारियात्रीयाः, कर्णकुञ्जास्तु पेंगिरिति। अञ्जलीकर्णावभञ्जनयोः सुश्रुतचरकादिटीकासु पर्य्यायो न दृश्यते तस्माद्देशान्तरे लोकादवगन्तव्यः। नन्दिमुखः पताटी। मसूराकृतिभिः कीलैः शल्यैः अवबद्धानि कीलितानि स्कन्धप्रदेशे इति वाक्यशेषः ; अन्ये तु तृतीये भागे इति वाक्यशेषं मन्यन्ते। मूलेऽङ्कुशवदावृत्तवारङ्गाणीति अङ्कुशवत् आवृत्तं वक्रं वारङ्गं ग्रहणस्थलं येषां तानि तथोक्तानि। अस्थिविनष्टं अस्थिनिमग्नम् ॥ ४ ॥

सनिग्रहसन्दंशयन्त्रम् ।




सनिग्रहोऽनिग्रहश्चेत्यादि। निग्रहानिग्रहौ द्वौ सन्दंशौ, एकः सनिग्रहः सवारङ्गो नापितस्येव अन्यश्च अनिग्रहः

तालयन्त्रे द्वादशाङ्गुले मत्स्यतालवदेकतालद्वितालके कर्णनासानाड़ीशल्यानामाहरणार्थम् ॥ ६ ॥

नाड़ीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च, तानि स्रोतोगतशल्योद्धरणार्थं रोग-


अनिबन्धनः सुवर्णकारस्येव ; अन्ये तु लोहकार-सन्दंश इव कीलबद्ध इति मन्यन्ते ॥ ५ ॥

अनिग्रहसन्दंशयन्त्रम्।



तालयन्त्रेत्यादि। तालसंज्ञके द्वे यन्त्रे द्वे अपि द्वादशाङ्गुलप्रमाणे तयोराकारमाह ;—मत्स्य तालवदिति। तालमत्र सल्कमाह, मत्स्यस्य मीनस्य तालतुल्ये


तालयन्त्र।



प्रतनुमुखे इत्यर्थः। के ते द्वे एकताल-द्वितालके इति। अत्र ताल-शब्देन प्रदेश उच्यते, एतेन एकतालं एकप्रदेशो यस्य तदेकतालं ; द्वे ताले द्वौ प्रदेशौ यस्य तत् द्वितालकं ; एतेन मत्स्यस्य शल्कवत् प्रतनुमुखैक-प्रदेशं एकतालं, मत्स्य-शल्कप्रतनुमुखं द्विप्रदेशं द्वितालमित्युक्तं। परि-णाहस्तु कर्णादिप्रवेशी ज्ञेयः। अन्ये तु मत्स्यतालकवदेकतालकद्वितालके इति पठन्ति व्याख्यानयन्ति च भेटुनि वाममत्स्यल स्तस्य लौहमय-तालकाकारं मुखं भवति अतस्तन्मुखाद्धीकारं द्वितालकं,तालकोऽत्र अपवरकादिकपाट-सन्धिबन्धनं लौहमयमुच्यते। कर्णनासाशल्यं नखकेशादि ॥ ६ ॥

नाड़ीयन्त्राण्यप्यनेकानीत्यादि। नाड़ीयन्त्राणीति नाड़ीवत् मध्यच्छिद्राणि एकतोमुखानि रक्ताहरणार्थानि अलावू-भगन्दरार्शोयन्त्रादीनि उभयतोमुखानि वस्त्यन्तरबस्तिधूमयन्त्रादीनि। तानि स्रोतोगतशल्योद्धरणार्थमिति तानि नाड़ी-


नाड़ीयन्त्राणि।



दर्शनार्थमाचूषणार्थं क्रियासौकर्य्यार्थञ्चेति। तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदैर्घ्याणि च ॥ भगन्दरार्शोऽर्बुदव्रणवस्त्युत्तरवस्तिमूत्रवृद्धिदकोदरधूमनिरुद्धप्रकशसन्निरुद्धगुदयन्त्राण्यलाबूशृङ्गयन्त्राणि चोपरिष्टाद्वक्ष्यामः ॥ ९॥

यन्त्राणि स्रोतोगत-शल्योद्धरण-प्रयोजनानि तथाहि नासाशल्ये कण्ठाशक्ते मुखे नाड़ीं दत्वा तन्मया लौहशलाकया आकर्षयेदित्यादिकं, रोगदर्शनार्थमिति रोगाः अभ्यन्तरार्शप्रभृतयः। आचूषणार्थमिति अस्थिगतवायोर्दुष्टरक्तस्तन्ययोराकर्षणार्थं। क्रिया-सौकार्य्यार्थमिति अत्राभ्यन्तरार्शःप्रभृतिषु शस्त्रक्षाराग्न्यादिक्रियासुकरत्वाय सुखकरणायेत्यर्थः। तानि स्रोतोद्वारपरिणाहानि इति वर्त्तुलत्वेन स्रोतोद्वारतुल्यानि। ननु विंशति नाड्य इति पूर्वमेवोक्तं, इह तु भगन्दरार्शो व्रणेष्वित्यादि नाड़ीयन्त्राणि अलाबुशृङ्गान्तानि द्वादश, तत्कथं विंशतिः पूर्य्यते? उच्यते।—भगन्दरयन्त्रे द्वे, एकं एकच्छिद्रं अपरं द्विच्छिद्रं; अर्शोयन्त्रे अपि द्वे एकच्छिद्रभेदेन; व्रणयन्त्रमेकं व्रणच्छिद्रायामपरिणाहं। वस्तिनेत्रं चतुर्विधं वयोभेदेन, अन्ये त्रिविधमाहुः। उत्तरवस्तिनेत्रं द्विविधं पुंसां स्त्रीणाञ्च एके त्रिविधमाहुः मूत्रवृद्धिदकोदरयोर्द्वे मूत्रवृद्धिस्रावणार्थमेकं दकोदरस्रावणार्थञ्च एकं; धूमनेत्राणि त्रीणि


स्नुहीपत्रम् ।



अर्शोयन्त्रे ।




शमीयन्त्रम् ।




अङ्गुलीत्राणकयन्त्रम् ।



योनिव्रणेक्षणम् ।



वस्तियन्त्रम् ।




शलाकायन्त्राण्यपि नानाप्रकाराणि नानाप्रयोजनानि यथायोगपरिणाहदीर्घाणि च। तेषां गण्डूपदशरपुङ्खसर्पफण-बडिशमुखे द्वे द्वे एषणव्यूहनचालनाहरणार्थमुपदिश्यते। मसूरदलमात्रमुखे द्वे किञ्चिदानताग्रे स्रोतोगतशल्योद्धरणार्थे। षट् कार्पासकृतोष्णीषाणि प्रमार्ज्जनक्रियासु। त्रीणि दर्व्याकृतीनि खल्लमुखानि क्षारौषधप्रणिधानार्थं। त्रीण्यन्यानि जाम्बववदनानि त्रीण्यङ्कुशवदनानि षडेवाग्निकर्म्मस्वभि-

एकं वैरेचनिकं अपरं स्नैहिकं अन्यच्च प्रायोगिकं निवद्धप्रकाशयन्त्रमेकं, सन्निवद्धगुदयन्त्रमेकं, अलावूयन्त्रमेकं ॥७॥

एकविंशति शलाकायन्त्राणि निर्द्दिष्टु-माह ;—शलाकायन्त्राण्यपीत्यादि। यथा-योगपरिणाहमिति परिणाहो वर्त्तुलता। तेषां गण्डूपदेत्यादि।—मुख-शब्दो गण्डू-पदादिभिः सह प्रत्येकं सम्बध्यते; तेन गण्डू-पदमुखशरपुङ्खमुखे द्वे, एवं शेषयोरपि। शरपुङ्खं शरगुणसन्धानस्थानं,वडिशोमत्स्यव-बन्धनं। तेषां चतुर्णां गण्डूपदमुखादीनां यथा-संख्येन प्रयोजनमाह ;—एषण-मित्यादि। एषणं गम्भीरपाकादौ पूया-द्यन्वेषणं, व्यूहणं ऊर्द्धीकरणं छित्वा उत्खण्डितस्य उद्धरणार्थं, वारङ्गणानु-सरणमितेरके। मसूरदलमिति मसूरस्य निस्तुषस्य दलितस्य खण्डं दलमित्युच्यते। किञ्चिदानताग्रे इति मनाक्वक्राग्रे। षट् कार्पासकृतोष्णीषाणीति तूलवेष्टिताग्राणि,

शलाकायन्त्राणि।



प्रेतानि। नासार्बुदहरणार्थमेकं कोलास्थिदलमात्रमुखं खल्ल-तीक्ष्णोष्ठं। अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रं। मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पवृन्ताग्र-प्रमाणपरिमण्डलमिति ॥८॥

उपयन्त्राण्यपि रज्जु वेणिका-पट्ट-चर्म्मान्त-वल्कल-लता-वस्त्राष्ठीलाश्म-मुद्गर-पाणिपादतलाङ्गुलि जिह्वा-दन्त-नख-वालाश्वकटक-शाखा-ष्ठीवन-प्रवाहन-हर्षायस्कान्तमयानि क्षाराग्निभेषजानि चेति ॥ ९ ॥

प्रमार्ज्जनक्रियासु प्रोञ्छनक्रियासु। त्रीणि दर्व्याकृतीनीति दर्व्वी दारुहस्तकः, खल्लमुखानि निम्नमुखानि। जाम्बवाननानीति जम्बूफलमुखाकृतीनि। कोलास्थिदलमात्रमुखमिति वदरास्थिमज्जविदलप्रमाणं। खल्लतीक्ष्णोष्ठमिति खल्लं मध्ये बोद्धव्यं, तीक्ष्णोष्ठन्तु अन्ते। कलायपरिमण्डलमिति कलायमात्रं परितो मण्डलं वर्त्तुलं। उभयतो मुकुलाग्रमिति द्वयोरन्तयोः कलिकावदग्रं; दैर्घ्यन्तु अष्टाङ्गुलं सालाक्योक्तत्वात् ॥ ८ ॥

गण्डूपदमुखादीनामङ्कुशवदनान्तानां शलाकायन्त्राणां तुल्याकृतित्वेऽपि द्वित्वषड्वादीनि कार्य्यत्रापेक्षीणि उपयन्त्राणि निर्द्दिष्टमाह;—उपयन्त्राण्यपीत्यादि। उपयन्त्राणीति यन्त्रसमीपवर्त्तीनि, हीनयन्त्राणीत्यन्ये। *रज्जुर्मुञ्जादिविरचितोगुणः, वेणिका गुणत्रयग्रथिता, चर्म्मान्तं चर्म्मावयवः, अत्र चर्म्मान्तमित्येके पठन्ति; चर्म्म सन्नाहः। वल्कलं पलाशोडुम्बरादीनां त्वक्, साच भग्नादिबन्धनयन्त्रार्थं। लता प्रतानानि, वेणिरिति लोके; वस्त्रं कर्पटः; अष्ठीलाश्मेति अष्ठीला दीर्घवर्त्तुलपाषाणः, अन्ये लौहकाराणां लौही दीर्घवर्त्तुलताखिण्डमाहुः, तया तुल्योऽश्मा स चाष्ठीलाश्मा उत्तरापथे प्रसिद्धः। मुद्गरः काष्ठादिकृतः, अयं अस्थिविदष्टशल्यस्य चालनार्थं। पाणिपादतलमिति तलशब्दः पाणिपादाभ्यां सह प्रत्येकं सम्बध्यते। अश्वकटकमिति अश्वकटको घोटकवल्गावलयं घोटककविकाचड़कं, शाखा वृक्षस्य, अनयोः

एतानि देहे सर्व्वेऽस्मिन् देहस्यावयवे तथा।
सन्धौ कोष्ठे धमन्याञ्च यथायोगं प्रयोजयेत्॥ १०॥

यन्त्रकर्म्माणि तु निर्घातनपूरणबन्धनव्यूहनवर्त्तनचालन-विवर्त्तनविवरणपीड़नमार्गविशोधनविकर्षणाहरणाञ्छनोन्नमन विनमन-भञ्जनोन्मथनाचूषणैषणदारणर्जुकरणप्रक्षालन-प्रधमन-प्रमार्जनानि चतुर्विंशतिः॥ ११॥

प्रयोजनं शल्यापनयनीये वक्ष्यति। ष्ठीवनं श्लेष्मादिनिरसनं, प्रवाहनं वमन-विरेचनाद्युपवर्त्तनादि यथासंख्यं कफपित्ताचिरजःशल्यादिषु, हर्षे स्तुष्टिः, अयस्कान्तः पाषाणविशेषः आकर्षकद्रावकचुम्बकभ्रामकभेदाच्चतुर्व्विधः; इति शब्दः समाप्तौ। समानि यन्त्राणीति स्वभावपावनं प्रमार्ज्जन-मित्यादयोऽनवबद्धशल्योद्धरणहेतवो रज्ज्वादुत्रपयन्त्रेष्वेवान्तभूता इति पृथक् नोक्ताः; तद्यथा,—प्रवाहणग्रहणेन तावदश्रुक्षवथुप्रभृतीनामप्यत्र ग्रहण-मित्यादिकं वोद्धव्यं॥ ६॥

कानि पुनर्यन्त्राणां कर्म्माणीत्याह;—यन्त्रकर्म्माणि त्वित्यादि। निर्घा-तनं इतस्ततश्च विचाल्य निर्हरणं, इतस्ततश्च घट्टनमितेत्रके; पूरणं वस्तिनेत्र-प्रभृतिषु तैलादिना, बन्धनं रज्ज्वादिना, व्यूहनं ऊर्द्धीकरणं छित्त्वा अन्तर्गतस्य ऊर्द्धरणार्थं, अन्नैवाधाये व्याख्यातं प्राक्। वर्त्तनं विवृत्तस्य वर्त्तुलीकरणं, चालनं स्थानात् स्थानान्तरनयनं, अन्ये शल्यकम्पमाहुः। विव-र्त्तनं कर्णवायोः निष्काशयितुमिष्टस्य कर्णलग्नस्य पुन र्निवर्त्तनं, अन्ये यन्त्रस्य भ्रमणमन्तरे वा। विवरणं प्रकाशनं, मांसच्छेदावकाशदानेन विवरणमितेत्रके; विवरणं प्रमाणं इति लक्षणं टिप्पनकेनोक्तं। पीड़नं व्रणस्य पूयादि-निर्गमनार्थं अङ्गुल्यादिना, मार्गविशोधनं मूत्रपूरीषसङ्गे विकर्षणं विगृह्या-कर्षणं, अन्ये मांसादिप्रतिबद्धशल्यस्य मोचनमाहुः। आहरणमानयनं। आञ्छनं ईषन्मुखानयनं, ईषत्मुखे आनयनमित्यर्थः। उन्नमनं अधः-स्थितस्य शिरः कर्णादेरूर्द्ध्वनयनं, विनमनं निम्नीकरणं,भञ्जनं शिरः कर्णा-देरामर्द्दनं, समन्ततो दर्शनमित्यन्ये। उन्मथनं प्रणष्टस्य शल्यस्य मार्गे शला-

स्वबुद्ध्या चापि विभजेद् यन्त्रकर्माणि बुद्धिमान् ।
असंख्येयविकल्पत्वाच्छल्यानामिति निश्चयः ॥१२॥
तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राहि विषमग्राहि वक्रं शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाशमिति द्वादश यन्त्रदोषाः ॥१३॥
एतैर्दोषैर्विनिर्मुक्तं यन्त्रमष्टादशाङ्गुलं ।
प्रशस्तं भिषजा ज्ञेयं तद्धि कर्मसु योजयेत् ॥१४॥
दृश्यं सिंहमुखाद्यैस्तु गूढ़ं कङ्कमुखादिभिः ।

कादिभिरालोड़नं, आचूषणं विषदुष्टस्तन्यरुधिरेषु शृङ्गालाबूभ्यां मुखेन वा, एषणं गण्डूपदमुखेन गतिव्रणोत्सङ्गशल्यादीनां, दारणं शिरःकर्णादिद्विधाकरणं । ऋजुकरणं कुटिलस्य, प्रचालनं तोयादिभिः व्रणोत्सङ्गादीनां, प्रधमनं श्लेष्मशल्यसङ्गे नासिकायां नाड्या चूर्णचेपणं, प्रमार्ज्जनं प्रोञ्छनं वालाङ्गुलिवस्त्रै रुधिररजःशल्यादिषु ॥ ११ ॥

इदानीं नानाविध-शल्याकारेण कर्मणां बहुत्वात् संख्यायामनियमं दर्शयन्नाह ;—स्वबुद्ध्या चापीति । यन्त्रदोषान् वक्तुमाह ;—तत्रातिस्थूलमित्यादि । असारं अशुद्धलौहादिघटितं, अग्राहि विवृतमुखं ; विषमग्राहि एकदेशग्राहि ; वक्रं अनृजु, शिथिलं पीड़नाक्षमं, अत्युन्नतं उच्छ्रितं कीलादि, मृदुकीलं दुर्ब्बलशल्यं, अन्ये तु वक्रशिथिलात्युन्नतमृदुकीलमिति पठन्ति व्याख्यानयन्ति च ; तत्र कीलशब्दो वक्रादिभिः सह प्रत्येकं सम्बध्यते, तेन वक्रकीलमित्यादि योज्यं । मृदुपाशं तनुपाशं मृदुमुखं, शल्यपीड़नासहमुखं, एते प्रायेण स्वस्तिकयन्त्राणां दोषा बोद्धव्याः ॥१२-१३॥

यन्त्रस्य प्रशस्तत्वं वक्तुमाह ;—एतैर्दोषैरित्यादि । एतै र्दोषैरिति पूर्व्वोक्तैरतिस्थूलादिभि र्दोषैरित्यर्थः ॥ १४ ॥

स्वस्तिकयन्त्राणां विषयभेदं दर्शयन्नाह ;—दृश्यमित्यादि । दृश्यं दर्शनगतं शल्यं, गूढ़मदृश्यं, कङ्कमुखादिभिरिति अत्रादिशब्दः प्रधानवाची,तेन कङ्क-

निर्हरेत् तु शनैः शल्यं शास्त्रयुक्तिव्यपेक्षया ॥१५॥

विवर्त्तते साध्ववगाहते च शल्यं, निगृह्योद्धरते च यस्मात्। यन्त्रेष्वतः कङ्कमुखं प्रधानं, स्थानेषु सर्वेष्वविकारि चैव ॥ १६ ॥

मुखादि प्रधानं येषां तैर्निर्हरेदित्यर्थः ; यदि पुनरिहादिशब्दः प्रधानवाची न स्यात् तदा काकमुखस्य ग्रहणं न स्यात् इति । शास्त्रयुक्तिव्यपेक्षया इति विविधापेक्षा व्यपेक्षा विशिष्टापेक्षा वा ॥ १५ ॥

कङ्कमुखस्य प्राधान्यं दर्शयन्नाह ;—निवर्त्तते इत्यादि । निवर्त्तते साध्विति निवर्त्तते साधु निःसरति, अवगाहते प्रविशति च साधु, अन्येषां सिंहमुखादीनां स्थूलमुखत्वेन साध्ववगाहनसाधुविवर्त्तनाभावात् ; अन्ये विवर्त्तते वृत्तत्वादन्तर्भ्रमतीत्याहुः । शल्यं निगृह्योद्धरते आकर्षति । स्थानेषु सर्व्वेष्विति सन्धिधमन्यादिषु ; अधिकारि अस्य कङ्कमुखस्य अधिकारोऽस्ति नान्यस्य ; अन्ये तु अविकारीति पठन्ति तत्रापि स एव तात्पर्य्यार्थ इति ॥ १६ ॥

इति सूत्रस्थाने निबन्धसंग्रहे

सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।


अथातः शस्त्रावचारणीयमध्यायं व्याख्यास्यामः ।

विंशतिः शस्त्राणि । तद् यथा,—मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरा-

मण्डलाग्रम् ।



करपत्रम् ।



वृद्धिपत्रे ।



नखशस्त्रम् ।




मुद्रिका ।



उत्पलपत्रकम् ।



अर्द्धधारम् ।




अथातः शस्त्रावेति । शस्त्राणामवचारणं यस्मिन्नध्यायेऽस्ति स शस्त्रावचारणीयः, तं व्याख्यास्यामः । कानि पुनस्तानि शस्त्राणीत्याह विंशतिरित्यादि । मण्डलाग्रादीनि मण्डलाग्रे द्वे, सूचान्तिश्च इत्याद्यवयवान्तरभेदेन बह्वन्यपि सुश्रः ; तानि नामभिर्निर्द्दिष्टमाह;—तद् यथेति । तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः । तथा नखशस्त्रे षण्मावराङ्गुलेत्यादिवाक्येन शस्त्राणामाकारप्रमाणञ्च यद्यप्यग्रे वक्ष्यति तथापीहैव परतन्त्रोक्तं शास्त्रप्रमाणलक्षणं सुखावबोधार्थमुपदेक्ष्यामः । मण्डलाग्रमिति मण्डलमिवाग्रं यस्य तत् मण्डलाग्रं, तच्च द्विविधं तथाहि "षड्भागे मण्डलं वृत्तं चतुरसंस्थानमेव वा ।

रीमुखान्तर्मुखत्रिकूर्चककुठारिकाव्रीहिमुखारावेतसपत्रकब-ड़िशदन्तशङ्क्वेषण्य इति ॥ १ ॥

मण्डलाग्रस्य जानीयात् प्रमाणन्तु षड़ङ्गुलं" । करपत्रमिति करवत् पत्रं करपत्रं,यथा,—आकरोऽङ्गुलिभिराचितो भवति तद्वत् यत् कण्टकैराचितं स्यात् तत्करपत्रमुच्यते । अन्ये तु करपत्रशस्त्रं करपत्राकारमेव, तच्च द्वादशाङ्गुलं तन्त्रान्तरवचनात् । ननु यदि तन्त्रान्तरात् तत् द्वादशाङ्गुलं करपत्रमुच्यते तर्हि स्वतन्त्रे विरोधः, कुतः ? स्वतन्त्रे करपत्रस्य निर्द्दिष्टप्रमाणत्वात्;शेषाणि तु षड़ङ्गुलानि इत्यनेन वाक्येन षड़ङ्गुलमेव करपत्रं स्यान्न द्वादशाङ्गुलं; नैवं,तेषां नामभिरेवाकृतयः प्रायेण व्याख्याता इत्यस्मात् सूत्रात् प्रायः शब्दोऽनुवर्त्तते, तेनायमर्थः,—शेषाणि प्रायेण षड़ङ्गुलानि, एवं शस्त्रमानेऽन्यत्राप्यविरोधः । वृद्धिपत्रमिति वृद्धेः पत्रमिव वृद्धिपत्रं, तच्च द्विविधं एकं अञ्चिताग्रं द्वितीयं प्रयताग्रं, द्वे अपि सप्ताङ्गुलप्रमाणे, द्वयोरपि अर्द्ध-


सूच्यः ।



कुशपत्रम् ।



आटामुखम् ।



शरारीमुखम् ।




अन्तर्मुखशस्त्रम् ।



कुठारिका ।



व्रीहिमुखम् ।



पञ्चाङ्गुलदन्तं कार्य्यं सार्द्धाङ्गुलद्वयं फलमिति, अनयोर्म्मध्ये अञ्चिताग्रं हिङ्गिपत्रं क्षुरमाह्वः । नखशस्त्रमिति नखानां छेदनाय शस्त्रं नैखशस्त्रं ; तस्य फलं द्व्यङ्गुलायामं, एकाङ्गुलविस्तृतं ।

वेतसपत्रकम् ।



वडिश शस्त्रम् ।



अर्द्धधारमिति अर्द्धं धारा यस्य तदर्द्धधारं, चक्रधारमिति प्रसिद्धं, तच्च अष्टाङ्गुलायतं उरसि अङ्गुलविस्तारः द्व्यङ्गुलं फलं ; अन्ये त्वध्यर्द्धधारमिति पठन्ति अधिकमर्द्धं धारा यस्य तदध्यर्द्धधारं । सूची अग्रे वक्ष्यते। कुशपत्रमिति कुशपत्रतुल्यं कुशपत्रं, तन्मानमाह ;—"अङ्गुले कूचकं विद्यात् अङ्गुलं फलमुच्यते। दन्तं स्याद् द्व्यङ्गुलं मध्ये कुशपत्रस्य लक्षणं।" आटामुखमिति आटा जलवर्द्धनीनाम पक्षिविशेषः तन्मुखवन्मुखं यस्य तदाटामुखं ; तथा चोक्तं "दन्तं सप्ताङ्गुलं विद्यात् तस्याग्रे फलमिष्यते। आटामुखप्रकारं हि फलमङ्गुष्ठमायतं।" शरारीमुखमिति शरारी दीर्घचञ्चुः पक्षिविशेषः, स द्विविधः धवलस्कन्धः रक्तशीर्षश्च, धवलस्कन्धस्य शरारीति संज्ञा, तन्मुखवन्मुखं यस्य तच्छरारीमुखं, तस्य शस्त्रस्य लोके कर्त्तरीरिति संज्ञा ; ताञ्च द्वादशाङ्गुलां चलत्पलाशां कुर्य्यात्। अन्तर्मुखमिति मध्यमुखं, तल्लक्षणमाह ;—"अष्टाङ्गुलप्रमाणेन जिह्वाधामविधारकं। शस्त्रमन्तर्मुखं नाम चन्द्रार्द्धमिव चोन्नतं।" त्रिकूर्च्चकमिति त्रयः कूर्च्चा यस्य तत्त्रिकूर्च्चकं। तत्र तन्त्रान्तरं "अङ्गुलानि तथाष्टौ च शस्त्रं कार्य्यं त्रिकूर्च्चकं । फलैरन्तर्मुखाकारैरङ्गुलैरन्वितं त्रिभिः। एकैकस्य फलस्यैषामन्तरं व्रीहिसम्मितं। दन्तं पञ्चाङ्गुलायामं कार्य्यं कूचकभूषितं"। कुठारिकेति कुठारतुल्या कुठारिका, "कुठारिकाया दन्तं स्यात् सार्द्धसप्ताङ्गुलायतं। फलमर्द्धाङ्गुलायामं गोदन्तसदृशं समं।" व्रीहिमुखमिति व्रीहिमुखमिव मुखमस्य व्रीहिमुखं। तत्र भोजः"शस्त्रं व्रीहिमुखं कार्य्यमङ्गुलानि षड़ायतं। द्व्यङ्गुलं तस्य दन्तं स्यात् तत्फलं चतुरङ्गुलं। तन्मुखं व्रीहिविस्तारं तत् तु संमूढ़कण्टकं।" आरेति आरेव आरा

तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च । वृद्धिपत्र-नखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च । सूची-कुशपत्राटामुखशरारीमुखान्तर्मुखत्रिकूर्च्चकानि विस्रावणे । कुठा-रिकाव्रीहिमुखारावेतसपत्रकाणि व्यधेन सूची च । वड़िशो दन्त-

शङ्कुश्चाहरणे, एषणी एषणे चानुलोमने च, सूच्यः सीवने ।

शङ्कुर्मकाराणां शस्त्रं । अत्र तन्त्रान्तरे "आरा द्व्यष्टाङ्गुलायामा कर्त्तव्या तु विशाम्पते । तिलप्रमाणन्तु फलं तस्याः कार्य्यं समाहितं ॥ पूर्व्वाङ्कुरपरीनाहं दन्तं गोपुच्छसन्निभं ।" वेतसपत्रमिति वेतसपत्रमिव वेतसपत्रं, अत्र भोजः "तीक्ष्णमङ्गुलविस्तारं चतुरङ्गुलमायतं । अङ्गुलानि तु चत्वारि दन्तं कार्य्यं विजानता ।" वड़िश इति वड़िशतुल्यो वड़िशः, वड़िशं मत्स्यवेधनमाहुः । अत्र तन्त्रान्तरे "वड़िशौ चापि कर्त्तव्यौ प्रमाणेन षड़ङ्गुलौ । स्थानतस्तु तयोरेक एकोनात्यायतो भवेत् । अर्द्धपञ्चाङ्गुलं दन्तं शेषं कार्य्यं मुखं तयोः । अर्द्धचन्द्राकृतिं वक्त्रं कार्य्यं नात्या-नतस्य तु । स्थाननस्यानतं तस्मात् वड़िशस्य भिषग्वरैः । दन्ताग्रयोरन्तरं स्याद् यावदर्द्धाङ्गुलं मतं । एवं हि क्रियेते एतौ दशशङ्कुर्विजानता । शङ्कुवच्च मुखं तस्य कार्य्यमर्द्धाङ्गुलायतं । चतुरस्रं समञ्चैव तीक्ष्णधारं समाहितं । दन्ताग्रं तस्य कर्त्तव्यं शस्त्रं व्रीहिमुखाकृति । कपालिकां शर्कराञ्च दन्ताक्रान्तेन शोधयेत् ।" एषणीति एष्यते अनया इति एषणी, अत्र तन्त्रान्तरे "व्रणस्तासां परीणाहोमुखं गण्डूपदाकृति ॥" १ ॥

तेषां विषयभेदमष्टविधकर्म्मणि दर्शयितुमाह ;—तत्र मण्डलाग्रेत्यादि । तत्र तेषु मध्ये स्यातां भवेतां । चकारः कर्म्मान्तरं समुच्चिनोति, चकारा-ल्लेखने च । सूची चेति चकारः कुशपत्रोत्पलपत्रकादींश्च व्यधने समुच्चिनोति । वड़िश इति । ननु उभयत्रापि एकार्थत्वात् किमर्थं यन्त्रशस्त्रयोर्मध्ये वड़िशस्य पाठः? उच्यते,—यन्त्रपठितो वड़िशो यथायोगपरिणाहदैर्घ्यः, शस्त्रपठितस्तु षड़ङ्गुल एव तीक्ष्णकण्टकमुखं एवेत्यदोषः । एषणीति । आनुलोममत्र विस्रा-वणमभिप्रेतं । ननु ऋजुकरणं कस्मात् ऋजुकरणस्य शस्त्रकर्म्मसु अनिर्द्दिष्टत्वात् यदि कथञ्चित् स्यात् तदा शस्त्रकर्म्मणां नवत्वप्रसङ्गः ; तस्मादाद्य एव पचो-

शङ्कुश्चाहरणे। एषण्येषणे आनुलोम्ये च। सूच्यः सेवने। इत्यष्टविधे कर्म्मण्युपयोगः शस्त्राणां व्याख्यातः॥ २॥

तेषामथ यथायोगग्रहणसमासोपायः कर्म्मसु वच्यते। तत्र वृद्धिपत्रं वृन्तफलसाधारणे भागे गृह्णीयात्, भेदनान्येवं सर्वाणि। वृद्धिपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने बहुशोऽवचार्य्यं वृन्ताग्रे विस्रावणानि। विशेषेण बालवृद्धसुकुमारतरुणनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्चकेन विस्रावयेत्। तलप्रच्छादितवृन्तमङ्गुष्ठप्रदेशिनीभ्यां व्रीहिमुखं। कुठारिकां वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुल्याङ्गुष्ठविष्टब्धयाभिहन्यात्। आराकरपत्रैषण्यो मूले। शेषाणि तु यथायोगं गृह्णीयात्। तेषां नामभि-

न्यायत्र इति। चकारात् व्यधनेऽपि। ननु एषणी यन्त्रशस्त्रयोः पठ्यते,प्रयोजनञ्च उभयत्रापि एषणमेव; तस्मादुभयपाठे कोविशेषः? उच्यते,—यन्त्रपठितायाः एषण्या आकृतिः गण्डूपदमुखी प्रमाणन्तु यथायोगपरिणाहदैर्घ्यं; शस्त्रेषु पुनरेषण्याः प्रमाणमष्टाङ्गुलं, आकृतिस्तु तीक्ष्णकण्टकयवपत्रमुखी चेत्यदोषः। द्व्यङ्गुलादिभेदेन सूचीनां बहुत्वात् सूच्य इति बहुवचनत्वेन निर्द्देशः॥ २॥

वृन्तफलसाधारणे भागे इति वृन्तफलयोर्म्मध्यदेश इत्यर्थः। एवं इत्यमेव यथा वृद्धिपत्रं वृन्तफलयोर्मध्यदेशे गृह्यते तथा भेदनान्यपीतेरवं शब्दार्थः। बहुश इति बहुलवारान्,सकृद्पचरेदित्यस्यापवादः। वृन्ताग्रे वारङ्गाग्रं गृह्णीयादित्यध्याहारः। अङ्गुष्ठविष्टब्धयेति अङ्गुष्ठाग्रे विष्टम्भितवेगया। यथायोगमिति योगानतिक्रमेण तद्यथा कानिचित् वृन्ताग्रे कानिचिद् वृन्तमूले कर्म्मयोगापेक्षयेत्यर्थः। संक्षेपेण शस्त्राकारं दर्शयन्नाह;—तेषां शस्त्राणामाकृतयो लक्षणानि नामभिरेव प्रायेण व्याख्याताः। तेषां प्रमाणानि दर्शयन्नाह;—नख इति। अन्ये तु नखशस्त्रस्थाने नखवृद्धनीति पठन्ति व्याख्यानयन्ति च नखवर्द्धनी नखच्छेदनी। अष्टविधकर्म्माध्याये द्व्यङ्गुलात्र्यङ्गुलेत्यादिना

रेवाकृतयः प्रायेण व्याख्याताः। तत्र नखशस्त्रैषण्यावष्टाङ्गुले। सूच्यो वक्ष्यन्ते ॥ ३ ॥


वड़िशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथमयवपत्रमुखे। एषणी गण्डूपदाकारमुखी। प्रदेशिन्यग्रपर्वप्रदेशप्रमाणा मुद्रिका। दशाङ्गुला शरारीमुखी सा कर्त्तरीति कथ्यते। शेषाणि तु षड़ङ्गुलानि ॥ ४ ॥

तानि सुग्रहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितमुखाग्राण्यकरालानि चेति शस्त्रसम्पत् ॥ ५ ॥


सूच्यो वक्ष्यन्ते इत्येतदग्रे मुद्रिकाकर्त्तरीशस्त्रयोः केचिन्मानं पठन्ति। शेषाणीति।—निर्दिष्ट-प्रमाणेभ्यो नखवर्द्ध्येषणी—सूचीभ्योऽन्यानि शेषाणि ॥ ३ ॥

आहरणे एषणे च शस्त्राणां धाराविशेषं दर्शयन्नाह, वड़िशो दन्तशङ्कु-रित्यादि। अत्र आनताग्रे इति वड़िशस्यैव विशेषणं, न दन्तशङ्कोः ; कुतः शङ्कुतुल्यत्वेनैव तस्यायतत्वदर्शनात्। एषणी त्रिविधा भवति तीक्ष्णकण्टक-मुखी प्रथमयवपत्रमुखी गण्डूपदाकारमुखी च ; अन्ये तु तीक्ष्णकण्टक-प्रथम-यवपत्र-मुखे इति पठन्ति व्याख्यानयन्ति च ; एतद् विशेषणद्वयं वड़िश-दन्तशङ्कोः, तेन तीक्ष्णकण्टकमुखो वड़िशः, प्रथमयवपत्रमुखो दन्तशङ्कुः; कुण्ठमुखत्वेन दन्तशङ्कोर्मुखतनुत्वमाकारश्च कथितः तेन गण्डूपदाकारमुखी चेति चकारादेतद्विशेषणद्वयमेषण्यामपि सम्बध्नन्ति ; अन्ये तु तत्र धाराभेदनानां मासूरीत्यादि ग्रन्थं एषणी गण्डूपदाकारमुखी चेति यावन्न पठन्ति ॥ ४ ॥

एषणी शस्त्राणि।



एषणी यन्त्रम्।



प्रमाणाकाराभ्यां शस्त्राणि निर्दिश्य शेषगुणसम्पदं (शस्त्रगुणसम्पदं)

तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः। अतो विपरीतगुणमाददीतान्यत्र करपत्रात्। तद्धि खरधारमस्थिच्छेदनार्थं ॥ ६ ॥

तत्र धारा भेदनानां मासूरी, लेखनानामर्द्धमासूरी, व्यधनानां विस्रावणानाञ्च कैशिकी, छेदनानामर्द्धकैशिकीति ॥७॥

तेषां पायना त्रिविधा क्षारोदकतैलेषु। तत्र क्षारपायितं शरशल्यास्थि-छेदनेषु, उदकपायितं मांसच्छेदनपाटनेषु, तैल-

दर्शयितुमाह,—तानि सुग्रहाणीत्यादि। सुग्रहाणि शोभन-वारङ्गानि, सुलोहानि शोभनलोहानि, सुधाराणि शोभनधाराणि (तीक्ष्णप्रान्तानि), सुसमाहितमुखानि सुसंस्थापित-मुखानि; अन्ये तु सुष्ठु,सम्यक् आहितं मुखं येषां तानि तथोक्तानि, अकरालानि अखरधाराणि, शस्त्रसम्पत् शस्त्रगुणः ॥ ५ ॥

शस्त्रदोषान्निर्दिशन्नाह;—तत्र वक्रमित्यादि। कुण्ठं स्थूलधारत्वेन अलोमवाहि, खण्डमसमग्रं, खरधारं कर्कशधारं, अत्यल्पं अतितन्वं। अतः इति वक्रादिशस्त्रेभ्यः विपरीतगुणं ऋजुतीक्ष्णश्लक्ष्णमखण्डधारादिगुणं। किं सर्व्वाण्येव विपरीतगुणान्याददीत इत्याह,—अन्यत्र करपत्रादिति। कुतः पुनरेतत्? तद्धि इत्यादि तच्छब्दो यस्मादर्थो हि शब्दो हेतौ यस्मात् करपत्रमस्थिच्छेदनार्थं अतो हेतोः खरधारं ॥ ६ ॥

अष्टविधे कर्म्मणि सुकर्म्मनिष्पादकत्वेन यथा शस्त्राणां सुधारत्वं भवति तथा निर्दिशन्नाह;—तत्र धारेत्यादि। भेदनानां वृद्धिपत्र-नखशस्त्रादीनां मासूरी मसूरधारतन्वी; लेखनानां मण्डलाग्रादीनां अर्द्धमासूरी मसूरदलधारार्द्धतन्वी; व्यधनानां कुठारिकादीनां विस्रावणानां सूचीकुशपत्रादीनां कैशिकी केशप्रमाणा; छेदनानामिति अत्र छेदनानि वृद्धिपत्रादीन्येव तानि यदा छेदने प्रयुज्यन्ते तदा तेषां धारार्द्धकैशिकी अर्द्धकेशप्रमाणतन्वी कर्त्तव्या ॥ ७ ॥

तत्र पायनायां तीक्ष्णत्वादयो गुणाः कर्म्मविशेषोत्कर्षहेतवो भवन्तीति

पायितं सिराव्यधनस्नायुच्छेदनेषु। तेषां निशानार्थं श्लक्ष्णशिला माषवर्णा। धारासंस्थापनार्थं शाल्मली-फलकमिति ॥ ८ ॥

भवति चात्र।

यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम्।
सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत् ॥ ९ ॥

अनुशस्त्राणि तु त्वक्सार-स्फटिककाचकुरुविन्दजलौकाग्नि-क्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुलय इति ॥१०॥

तामाह;—तेषां पायनेतत्रादि। पायना पातुं प्रयोजना, सा च लौहाकाराणां प्रसिद्धा, केचित् क्षारतैलपायनयोरनार्यत्वमाचक्षते। क्षारादिपायनानां कर्म्मविशेषविषयं दर्शयन्नाह;—तत्र क्षारपायितमित्यादि। सुधाराणीति प्रागुक्तं। कथं धारा शोभना कर्त्तव्या इत्यत्राह,—तेषामित्यादि। फलकं पट्टकं, श्लक्ष्णा अकर्कशा। तत्र अनिशितधाराणां निशानार्थं श्लक्ष्णशिलानिशितानां संस्थापनार्थं शाल्मलीफलकं,अन्ये तु तेषां निशानी श्लक्ष्णशिलिकामाषयूषप्रभवा धारा संस्थापनं शाल्मलीफलकमिति पठन्तिव्याख्यानयन्ति च श्लक्ष्णशिलिकानापितशिलिकामाषयूषप्रभा कृष्ण-कपिलेत्यर्थः।८॥

कथं पुनः शस्त्रं संस्थापितधारं ज्ञातव्यं इत्याह,—भवति चात्रेत्यादि। यदा शस्त्रं रोमच्छेदि भवति तदा सुनिशितं भवति; यावल्लोमानि न छिनत्ति तावन्निशितव्यमित्यर्थः। सुसंस्थितं खर्म्मसु योजयेत् सुसंस्थितं शोभनाकारं। सुगृहीतं ग्रहणञ्च शस्त्राणां प्रागुक्तं तद् यथा वृद्धिपत्रं वृन्तफल-साधारणे भागे गृह्णीयादित्यादि; प्रमाणेनेति प्रमाणेन लक्षितशस्त्रप्रमाणं तेषां नखशस्त्रैषण्यावष्टाङ्गुल्यौ इत्यादि; अन्ये तु सुगृहीतं प्रमाणेनेति प्रमाणेन सुगृहीतं इति व्याख्यानयन्ति च, तच्च वृद्धिपत्रादिवृन्तफलसाधारणभागादिग्रहणप्रमाणेनेत्यर्थः। केचिल्लोमच्छेदिस्थाने लोमवाहीति पठन्ति ॥ ९ ॥

अशस्त्रावचारणीयेषु शिशुप्रभृतिषु अलाभाद्वा शस्त्राणां तत्कर्म्मसाधकद्रव्यान्तरेण शस्त्रातिदेशं कुर्व्वन्नाह;—अनुशस्त्राणीत्यादि। अनुशस्त्राणि

शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत्।
त्वक्सारादि चतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान्॥
आहार्य्ये छेद्यभेद्येषु नखं शक्येषु योजयेत्।
विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसां॥
ये स्युर्मुखगता रोगा नेत्रवर्त्मगताश्च ये।
गोजीशेफालिकाशाकपत्रैर्विस्रावयेत्तु तान्॥
एषेष्वेषण्यलाभे तु बालाङ्गुल्यङ्कुरा हिताः॥११॥
शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु।
कारयेत्करणैः प्राप्तं कर्म्मारं कर्म्मकोविदं॥

हीनशस्त्राणि शस्त्रसदृशानि वा। त्वक्सारो वंशः। कुरुविन्दः पाषाणविशेषः,येन निशितानि तीक्ष्णाणि भवन्ति ; अन्ये तु कुरुविन्दं लोहिताश्मरप्रधानेन। गोजी गोजिह्वा, अन्ये शाखोटकमाहुः। शेफालिका रक्तवृन्ता शारदकुसुमा। शाको महावृक्षः कर्कशपत्रः। पत्रशब्दो गोजीप्रभृतिभिः सह प्रत्येकं सम्बध्यते करीरोऽङ्कुरः॥ १०॥

तेषां विषयमाह ;—शिशुनामित्यादि। त्वक्सारादिचतुर्वर्गमिति वंश-स्फटिक-काच-कुरुविन्दानि। आहार्य्यच्छेद्यभेद्येषु नखं शक्येष्विति आहार्य्यादिषु नखशक्येषु नखं प्रयोजयेदित्यर्थः। नेत्रवर्त्म नेत्रपक्ष्म। एष्येष्वेषण्य-लाभे त्वित्यादि। एष्येषु शल्येषु एषण्या अलाभे बालादयोहिताः॥११॥

इदानीं शस्त्राणां गुणसम्पत् कारणं वक्तुमाह ;—शस्त्राण्येतानीत्यादि। कारयेत् कर्तुं प्रयोजयेत्,कः कर्तुं प्रयोजयेत् बुद्धिमान् वैद्य इत्यर्थः। किं कर्म्मारं लौहकारं, किं विशिष्टं कर्मकारं लौहकारं? करणप्राप्तं करणे प्राप्तं करण-प्राप्तं युक्तं स्वकर्मणि निपुणमित्यर्थः। पुनः किं विशिष्टं? कर्मकोविदं कर्म-पण्डितं यतः स्वकर्मणि निपुणं अतएव च कर्मकोविदं, कानि कारयेत् शस्त्राणि। एतानि पूर्वोक्तानि किम्भूतानि शस्त्राणि कारयेदित्याह,—शुद्ध-शैक्यायसानित्विति। शुद्धं मलरहितं, शैक्यं तीक्ष्णं, अन्ये तु शैक्यायसानि

प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः।
तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा ॥ १२॥

सारमयलौहघटितानि। केचित् श्लोकार्द्धमन्यथा पठन्ति "कारयेत् करणैः प्रोक्तैः कर्म्मारैः कर्म्मको विदै"रिति व्याख्यानयन्ति च करणैरुपकरणैः, शेषं समं। प्रयोगज्ञस्येत्यादि। प्रयोगः प्रकृष्टयोगः। योजनात् अस्य सिद्धिः आरोग्यसम्पादनं, नित्यशः सर्व्वदा, परिचयं शस्त्रग्रहणाभ्यासं, अन्ये प्रमाणज्ञस्य शस्त्रग्रहणमानस्यत्र ॥ १२ ॥

इति सूत्रस्थाने निवन्धसंग्रहे अष्टमोऽध्यायः ॥

नवमोऽध्यायः।

—o—

अथातो योग्यासूत्रीयमध्यायं व्याख्यास्यामः।

अधिगतसर्वशास्त्रार्थमपि शिष्यं योगमकारयेत्। छेद्यादिषु स्नेहादिषु च कर्म्मपथमुपदिशेत्। सुबहुश्रुतोऽप्यकृतयोग्यः कर्म्मस्वयोग्यो भवति॥ १ ॥

अथात इति। योग्या सम्यक् कर्म्माभ्यासः, योग्यायाः सूत्रं तद् विद्यते यस्मिन् स तथा; अन्ये तु योग्याख्यापकं सूत्रं तदधिकृतत्र कृतोऽध्यायो योग्यासूत्रीयः तं तथा। अधिगतेत्यादि। स्नेहादिष्विति आदिशब्दात् स्वेदवमनविरेचनास्थापनानुवासनादीनां ग्रहणं। छेद्यादिष्विति आदिशब्दात् भेद्यादीनां सप्तानां ग्रहणं, यद्यप्यस्मिन् तन्त्रे छेद्यादिकर्म्मणां प्राधान्यं तथापि छेद्यादिष्वपि प्राक् स्नेहादि प्रयुज्यते इति प्राक् स्नेहादि ग्रहणं; अन्ये छेद्यादिषु स्नेहादिषु चेति पठन्ति। कर्म्मपथं क्रियामार्गं। कुतोऽधिगत-

तत्र पुष्पफलालावूकालिन्दकत्रपुसैर्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शयेत् कर्त्तन-परिकर्त्तनानि चोपदिशेत्। दृतिवस्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्यां। सरोम्णि चर्म्मण्याततं लेख्यस्य। मृतपशुसिरासूत्पलनालेषु च वेध्यस्य। घुणोपहतकाष्ठवेणुनलनालीशुष्कालावूमुखेष्वेष्यस्य। पनसविम्बी-विल्वफलमज्जमृतपशुदन्तेष्वाहार्य्यस्य। मधूच्छिष्टोपलिप्ते शाल्मली-फलके विस्राव्यस्य। सूक्ष्मघनवस्त्रान्तयोर्मृदुचर्मान्तयोश्च सीव्यस्य। पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धयोग्यां। मृदुमांसपेशीषूत्पल-नालेषु च कर्णसन्धिबन्धयोग्यां। उदकपूर्णघटपार्श्वस्रोतस्यलावू-मुखादिषु च नेत्रप्रणिधानबस्तिव्रणवस्तिपीड़नयोग्यामिति ॥ २ ॥

सर्व्वशास्त्रार्थमपि शिष्यं योग्यां कारयेदित्याह ;—सुबहुश्रुतोऽप्यकृतयोग्य इत्यादि। अकृतयोग्योऽकृतकर्म्माभ्यासः ॥ १ ॥

कर्म्मसु क्रियासु शल्यतन्त्रसत्र छेद्यादि कर्म्म प्राधान्यात् प्राक् छेद्यादि योग्यामुपदर्शयन्नाह ;—तत्र पुष्पफलेत्यादि। पुष्पफलं कुष्माण्डः, कालिन्दको जम्बालकुष्माण्डभेदः, त्रपुसादयः कर्कटीभेदाः, प्रभृति ग्रहणात् शीर्षदन्तादीनां ग्रहणं। छेद्यविशेषानिति गोतीर्थाङ्गलाङ्गलकप्रभृतीन्, उत्कर्त्तनमुद्धृत्य कर्त्तनं, परिकर्त्तनमधश्छेदः। दृतिवस्तीत्यादि। दृतिः चर्म्मपूटकं श्वापदादिचर्म्मेव, वस्तिर्मूत्रपूटकं, प्रसेवकश्चर्म्म खल्लपूटः। उदकपङ्कमिति उदकं आपः पङ्कः उदकपङ्कः। सरोम्णि चर्म्मणीत्यादि। आतते प्रसारिते। पनसो-वहिष्कण्टकी महाफलः, कटहलः इति लोके। पनसादीनां फलानि तेषां मज्जा। मध्विति मधूच्छिष्टं मधुसिक्थकं, शाल्मलीफलके शाल्मलीपट्टके, पुस्तमयः पुरुषो वस्त्रादिरचितो मनुष्यः। मांसपेशी मांसवर्त्तिः। उदकेति। नेत्रप्रणिधानं नेत्रप्रवेशनं, वस्तिपीड़नं अनयोर्योग्यां कारयेत्, क्व कारयेत् उदकपूर्णघटपार्श्वस्रोतसि, न केवलं जलपूर्णघटपार्श्वच्छिद्रे अलावुमु-खादिषु चेत्यर्थः ॥ २ ॥

भवत अत्र ॥

एवमादिषु मेधावी योग्यार्हेषु यथाविधि।
द्रव्येषु योग्यां कुर्वाणो न प्रमुह्यति कर्म्मसु ॥
तस्मात्कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्म्मसु।
यस्य यत्रेह साधर्म्यं तत्र योग्यां समाचरेत् ॥ ३ ॥

भवतश्चात्रेत्यादि। भवतश्चात्र एवमादिषु चेत्यर्थः। एवमादिष्विति आदिशब्दः प्रकारे एवम्प्रकारेषु योग्यार्हेषु पुष्पफलादिषु। तस्मादित्यादि।—तस्य कर्म्मणो यत्र यस्मिन् द्रव्ये साधर्म्यं साम्यं तस्य तत्र योग्यां समाचरेदिति; केचिदेवमादिषु मेधावीत्यादि श्लोकस्याग्रे आयातनिका पूर्व्वं श्लोकमेव पठन्ति; तद् यथानुक्तं योग्याविषयमुपसंगृहीतुमाह दृष्टान्तमात्रमुपदिष्टमित्यादि। सच वर्त्तमाने पुस्तके न पठ्यते इत्यस्माभिरुपेक्षितः ॥ ३ ॥

इति सूत्रस्थाने निबन्धसंग्रहे नवमोऽध्यायः ॥

दशमोऽध्यायः।

अथातो विशिखानुप्रवेशनीयमध्यायं व्याख्यास्यामः।

अधिगततन्त्रेणोपासिततन्त्रार्थेण दृष्टकर्म्मणा कृतयोग्येन

अथातो विशिखानुप्रवेशनीयमित्यादि। विशिखात्र कर्म्ममार्गः, विशिखायाः अनुप्रवेशनं तदधिकृत्य कृतोऽध्यायो विशिखानुप्रवेशनीयस्तं व्याख्यास्यामः। यादृशस्य वैद्यस्य कर्म्ममार्ग-प्रवेशाधिकारस्तादृशं वक्तुकाम आह;—अधिगततन्त्रेणोपासितेत्यादि। अधिगततन्त्रेण पठितशास्त्रेण,

शास्त्रार्थं निगदता राज्ञानुज्ञातेन नीचनखरोम्णा शुचिना शुक्ल-वस्त्रपरिहितेन छत्रवता दण्डहस्तेन सोपानत्केनानुद्धतवेशेन सुमनसा कल्याणाभिव्याहारेणाकुहकेन बन्धुभूतेन भूतानां सुसहाय-वता वैद्येन विशिखानुप्रवेष्टव्या ॥ १ ॥

उपासिततन्त्रार्थेन गुरुपार्श्वादुपदेशेन, शास्त्रार्थं निगदता शास्त्रं वदता, एतेन स्वावर्त्तितशास्त्रता उक्ता भवति ; अन्ये तु शास्त्रं निगादिना इति पठन्ति ; शास्त्राणि निगदता इत्यपरे। राज्ञानुज्ञातेन राज्ञा अभिमतेन, राजा हि प्रजापालनतत्परः, तत्प्रमादात् वैद्य-प्रतिरूपका राष्ट्रं चरन्ति कण्टकलोकभूताश्च। तस्माद् राज्ञा परीक्ष्यानुज्ञातेन विशिखा प्रवेष्टव्येति। कर्म्मज्ञतां शास्त्रज्ञताञ्च वैद्यस्याभिधाय बाह्यवेशमधिकृत्याह ;—नीच-नखरोम्णेत्यादि। क्षामत्वात् नीचमल्पं नखं रोम यस्य तेन, नीचनखत्वात् सूचितकर्म्मसौकुमार्य्यं, नीचरोमत्वादार्ज्जवं, रसवत्त्वामबाध इत्यपरे। शुचिनेति बाह्यस्नानादिशौचयुक्तेन, कृतबाह्यवेशाधिकारात् बाह्यशौचा-योगाल्लोके विगर्हणीयः। अन्तःशौचन्तु सुमनसा इत्यनेनैव बोद्धव्यं। शुक्ल-वस्त्रपरिधानं मङ्गलार्थं शौचार्जवार्थं वा। छत्रवता आतपरजोवर्षापन्न-गादिनिषेधार्थं छत्रयुक्तेन। दण्डहस्तेन दण्डोऽवलम्बनदण्डः, तस्य धारणं स्खलितादिनिषेधार्थं। सोपानत्केन पादत्राणादिना सहितेन पादत्राणादि-धारणं कण्टकादिनिषेधार्थं। अनुद्धतवेशेन साधुजनवेशेन, एतेनायुक्त-कायवेशनिषेधः ; अन्ये तु नानावस्त्राङ्गराग-माल्यानुलेपन- विचित्रभूष-णादिभिरुद्धतवेशः, अतो विपर्य्ययेणानुद्धतत्वमिति मन्यन्ते। कायं नियम्य मनो नियमन्नाह;—सुमनसेति। सुमनसा शोभनमनसा अक्रौर्य्यादिगुणयुक्त-मनसा इत्यर्थः ; दौर्म्मनस्यन्तु यात्रायां न प्रशस्यत इति सुमनसा भवि-तव्यं। वाचं नियमन्नाह ;—कल्याणाभिव्याहारेणेति। कल्याणं मङ्गलं अभिव्याहारो भाषितं यस्य स तथा, तच्च सर्व्वजनहृदयग्रहणार्थं। कायवाङ्मनःसु त्रिष्वपि नियमन्नाह ;—अकुहकेनेति। कुहकः शास्त्र-हीन-परम-विश्वासकारको मायावी, न कुहकोऽकुहकः; अन्ये तु अकुहकेन

ततो दूतनिमित्तशकुनमङ्गलानुलोम्येनातुरगृहमभिगम्योपविश्यातुरमभिपश्येत् स्पृशेत् पृच्छेच्च । त्रिभिरेतैर्विज्ञानोपायै रोगाः प्रायशो वेदितव्या इत्येके । तत्तु न सम्यक् । षड्विधो हि रोगाणां विज्ञानोपायः, तद् यथा पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति ॥ २ ॥

तत्र श्रोत्रेन्द्रिय-विज्ञेया विशेषा रोगेषु व्रणास्रावविज्ञानीयादिषु वक्ष्यन्ते सफेणं रक्तमीरयन्ननिलः सशब्दो निर्गच्छतीत्येवमादयः । स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदु-

अविस्मापकेन दम्भाद्ययोगादविस्मापककायादिवेशेन इत्यर्थः । सुसहायवता साधुसहायेन, अन्यथा अन्तःपुरचारिणो वैद्यस्य सहायदोषेण दोषः स्यात् । सहायश्चात्मरक्षार्थं मातुर—परिचर्यार्थं वा । ननु प्राणिनां जीवतामेव सद्यस्कवधिरोपदेशात् कथं वन्ध्यभूतेन भूतानामित्युक्तं ? सत्यं, – विधिप्रापितत्वाददोषः ; आलम्भयोगे पशुवत् ॥ १ ॥

ततो दूतनिमित्तेत्यादि । गमनाय प्रश्नाय वा आगतः पुरुषो दूतः, निमित्तं अनुकूलं सुरभि वातादि, शकुनं पक्षिविशेषस्वस्य प्रशस्तवाक्यादि, मङ्गलं स्वस्तिक-पूर्णकुम्भादि, एषामानुलोम्येन प्रशस्ततयेत्यर्थः । त्रिभिरेतैरित्यादि । त्रिभिरेतैर्विज्ञानोपायैरिति एतैरनन्तरोक्तैः दर्शनस्पर्शनप्रश्नैः । हिशब्दो यस्मादर्थे । तद्यथेत्यादि । श्रोत्रादिभिरिति आदिशब्दात् त्वङ्नेत्ररसनघ्राणानि गृह्यन्ते ॥ २ ॥

तत्रेत्यादि ।—शब्देन्द्रियविज्ञेया विशेषा रोगेषु व्रणास्रावविज्ञानीयादिषु वक्ष्यन्ते इति सम्बन्धः । दर्शनेन्द्रियेत्यादि ।—उपचयः स्थौल्यं, अपचयः कार्श्यं, बलमत्र उत्साहः । प्रमेहादिषु रसा मधुरादयो मक्षिकापिपीलिकाद्युपसर्पणेन भिषग्भिरनुमेयाः, तत्कथं रसनेन्द्रियविज्ञेया इत्युच्यन्ते ? नात्रभिषजां रसनेन्द्रियाणां व्यापारः, किन्तु पिपीलिकादीनां पातादिना तदनुमितिरित्यदोषः । अरिष्टलिङ्गादिषु येऽव्रणानां

कठिनत्वादयो ज्वरशोफादिषु। दर्शनेन्द्रियविज्ञेयाः शरीरोपचयापचयायुर्लक्षणबलवर्णविकारादयः। रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः। घ्राणेन्द्रियविज्ञेया अरिष्टलिङ्गादिषु व्रणानामव्रणानाञ्च गन्धविशेषाः। प्रश्नेन च विजानीयाद्देशं कालं

व्रणानां गन्धविशेषास्ते गन्धविशेषा गन्धेन्द्रियविज्ञेया इति सम्बन्धः। प्रश्नेन विजानीयादित्यादि। देशस्त्रिविधो जाङ्गलानूपसाधारणभेदात्। जातिशब्दो ब्राह्मणादिषु वर्त्तते। कालो द्विविधः नित्यग आवस्थिकः। नित्यगः ऋतुलक्षणः, आवस्थिको बाल्यादिलक्षणः। आवस्थिको द्विविधः स्वस्थस्य बाल्यादिभेदेन, व्याधितस्य ज्वरारम्भादिकालावस्थया च। सात्म्यमिति यद् यस्य सेवितं सुखत्वाय सम्पद्यते तत् तस्य सात्म्यं; तच्च द्विविधं चेष्टाख्यमाहाराख्यञ्च; चेष्टाख्यं कायवाङ्मनोभेदात् त्रिविधं, आहाराख्यं रसभेदात् षड्विधं। आतङ्कसमुत्पत्तिमिति समुत्पत्तिः कारणमुच्यते तच्च बलवद्विग्रहादि। वेदनासमुच्छ्रायमिति वेदना वातादिवेदना तोदादयः, तासां समुच्छ्राय उन्नतिः। बलं व्यायामगम्या शक्तिः। दीप्ताग्निता अन्तरग्नेरिति, कीदृशोऽन्तरग्निः? समो विषमो मन्दो वा। वातमूत्रपुरीषाणामिति अत्रादिशब्दो लुप्तोऽज्ञेयः, तेन आर्त्तवानामधोगतरक्तपित्तादीनां ग्रहणं। कालप्रकर्षादींश्च विशेषानिति कियत्कालमयं व्याधिरुत्पन्न इत्यादीन् भेदान्; चकारात् गुह्यदेश-प्रवृत्तपूयादीनां ग्रहणं; अन्ये तु देशकालजातिसात्म्यमिति पठन्ति सात्म्यशब्दो देशादिभिः सह प्रत्येकं सम्बध्यते, देशस्त्रिविधो जाङ्गलादिभेदेन तद्विपरीतेन देशसात्म्यमित्यादि व्याख्यानयन्ति; अपरे तु देशकालजातमिति पठन्ति व्याख्यानयन्ति च जातशब्दो देशकालाभ्यां सह प्रत्येकं सम्बध्यते देशो भूमिरातुरश्च, कस्मिन् देशे जाङ्गलेऽनूपे साधारणे वा अयं दोषः सञ्चितः कस्मिन् प्रकुपितः कस्मिन्नयं व्याधिरुत्पन्नः इति तथा आतुरेऽपि कस्मिन् अवयवे श्लेष्मस्थाने पित्तस्थाने वा। आत्मसदृश इति।—आत्मसदृशेषु दोषसदृशेषु विज्ञानाभ्युपायेषु षड्विधेषु श्रोत्रत्वक्चक्षुरसनघ्राणप्रश्नेषु।

जातिं सात्म्यमातङ्कसमुत्पत्तिं वेदनासमुच्छ्रायं बलं दीप्ताग्नितां वातमूत्रपुरीषप्रवृत्त्यप्रवृत्ति-कालप्रकर्षादींश्च विशेषान्। आत्म-सदृशेषु विज्ञानाभ्युपायेषु तत्स्थानीयै र्जानीयात् ॥३॥

तत्र वात-सदृशेषु विज्ञानाभ्युपायेषु पञ्चेन्द्रियप्रश्नेषु व्रणे सशब्दफेन-रक्तानिलादिनिर्गमनं श्रवणेन्द्रिय ग्राह्यं, पारुष्यशैत्यादिकं त्वगिन्द्रिय-ग्राह्यं,भस्मकपोतास्थिसवर्णत्वं चक्षुरिन्द्रियग्राह्यं, कटुगन्ध—लाजगन्धादित्वं घ्राणेन्द्रियग्राह्यं, तोदनभेदादिविशेषाः प्रश्नग्राह्याः, कषायरसादित्वं रसनेन्द्रियग्राह्यं। पित्तसदृशेषु विज्ञानाभ्युपायेषु व्रणादीनामौष्ण्यं त्वगि-न्द्रियग्राह्यं, नीलपीतवर्णत्वं चक्षुरिन्द्रियग्राह्यं, कट्वम्ललवणत्वं रसनेन्द्रिय-ग्राह्यं, तीक्ष्णातसीगन्धत्वं घ्राणेन्द्रियग्राह्यं; ओषचोषपरिदाहादिका वेदना-विशेषाः प्रश्नग्राह्याः। श्लेष्मसदृशेषु विज्ञानाभ्युपायेषु स्निग्धपैच्छिल्या-दित्वं त्वगिन्द्रियग्राह्यं, श्वेतत्वं चक्षुरिन्द्रियग्राह्यं, माधुर्य्यादि रसनेन्द्रिय-ग्राह्यं, विस्रगन्धादित्वं घ्राणेन्द्रियग्राह्यं, कण्डूगुरुत्वादिवेदनाविशेषाः प्रश्नग्राह्या इति। वैद्योजानीयादिति कान् व्याधीन् अधिकारवशादचरै-रनुक्तानपि, केषु सत्सु षड्विधेष्वपि विज्ञानाभ्युपायेषु आत्मसदृशेषु वात-पित्तश्लेष्मसदृशेषु कैर्जानीयात् तत्स्थानीयैः। तेषां शब्दादीनां स्थानानि श्रोत्रादीनि, तेषु अधिकृतैः शब्दस्पर्शरूपरसगन्धैः तत्स्थानीयैः; एतेन एत-दुक्तं वातादिलिङ्गैरायुर्व्वेदेषु अनिर्द्दिष्टनामधेयानपि व्याधिन् कुशाग्रमति-वैद्यो जानीयादिति। पञ्जिकाकारास्तु दर्शनादिपरीक्षां त्रिविधामेव पठन्ति मिथ्याद्दृष्टाविकारा हि द्रव्यादि श्लोकान्ते तस्मात् परीक्षाः सतत भिषजा सिद्धिमिच्छता। युक्तेव व्याधयः सर्वप्रमाणैर्द्दर्शनादिभिरिति श्लोकमधीते व्याख्यानयन्ति च दर्शनादिभिरितेत्र कर्तव्ये यत् प्रमाणैरित्यधिकं करोति तदधिकप्रामाण्य—प्राप्त्यर्थं; तेन गन्धरसशब्दानामप्यवोधः। येत्वत्राचरैः षड्विधामपि परीक्षां पठन्ति, तेषां सम्यक् शास्त्रावबोधो नास्तीति भाषन्ते। आत्मसदृशेषु विज्ञानाभ्युपायेषु तत्स्थानीयै र्जानीयात् इत्यपि न पञ्जिका-काराः पठन्ति ॥ ३ ॥

भवति चात्र।

मिथ्यादृष्टा विकारा हि दुराख्यातास्तथैव च।
तथा दुःपरिमृष्टाश्च मोहयेयुश्चिकित्सकम्॥ ४॥

एवं अभिसमीक्ष्य साध्यान् साधयेत्, याप्यान् यापयेत्, असाध्यान्नोपक्रमेत्, परिसम्वत्सरोत्थितांश्च विकारान् प्रायशो वर्जयेत्। तत्र साध्या अपि व्याधयः प्रायेणैषां दुश्चिकित्स्यतमा भवन्ति, तद्यथा,—श्रोत्रिय-नृपति-स्त्री-बाल-वृद्ध-भीरु-राजसेवक-कितव-दुर्ब्बल-वैद्यविदग्ध-व्याधिगोपक-दरिद्र--कृपण--क्रोधवतामनात्मवतामनाथानाञ्चैवं निरूप्य चिकित्सां कुर्वन् धर्म्मार्थकामयशांसि प्राप्नोति॥५॥

मिथ्यादृष्टा इति। रोगिणां विकारा ये मिथ्यादृष्टा असम्यक् दृष्टा स्तथा दुराख्याता रोगिणा न याथार्थ्येनोक्ताः तथा दुष्परिमृष्टा दुष्परिमर्षिताः, ते भिषजं मोहयेयुः एवमविज्ञाता ये रोगास्तान् परिवर्ज्जयेत्॥४॥

एवं अभिसमीच्येति। साध्यं द्विविधं सुसाध्यं दुःसाध्यञ्च। असाध्यं द्विविधं याप्यं प्रत्याख्येयञ्च। परिसम्वत्सरोत्थितांश्चेति यदि हि एकदोषजास्तेभवेयुरेवं तेषां तद्दोषप्रशमनर्त्तुषु प्रशमोभवेत् अल्पता वा स च न भवति, तेषां त्रिदोषजत्वाधिगमः,अतस्तान् परिवर्ज्जयेत्; अथवा सम्वत्सरेणोत्तरोत्तरधात्वनुक्रमादसाध्यत्वानुक्रमादसाध्यत्वं वा प्रायशः। प्रायशो बाहुल्येन नावश्यतया, तेन केचिद्रक्तगुल्मादयः सम्वत्सरानन्तरमुपक्रमयोग्या भवन्ति आदितस्तु त्रिभिर्वर्षैः साध्य इति। तत्र साध्या अपि व्याधयः प्रायेण एषां दुश्चिकित्स्यतमाः, तद्यथा श्रोत्रियेत्यादि। श्रोत्रियस्य वेदार्थपरिपालनपरस्य नित्यं स्नानादिभिः व्याधिपरिवृद्धिः, नृपतेरपि स्वातन्त्र्यात् यत्किञ्चनकारित्वात्; अन्ये तु सौकुमार्य्यात् क्रियासहत्वात्। स्त्रीणां लज्जया वेगाद्युपरोधात् गुह्यव्याधेरप्रकाशनाच्च, बालवृद्धयोर्विरेचनादि—क्रियायोग्यत्वेन अल्पक्रियत्वात्, अन्ये तु बालवृद्धवनिताः सुकुमारशरीरत्वात् भेषजासहिष्णवः। भीरुरल्पमतित्वान्न शक्तः सोढुं क्रियां, राजसेवकस्य राजा-

भवति चात्र।

स्त्रीभिः सहास्यां संवासं परिहासञ्च वर्जयेत्।
दत्तञ्च ताभ्यो नादेयमन्नादन्यद्भिषग्वरैः ॥६॥

यत्तत्वात्। कितवस्य व्यसनित्वात्। कितवो द्यूतकारः। दुर्बलस्य बालवृद्धयोरिव। वैद्यविदग्धस्य अभिमानेन निर्द्दिष्टादन्यथाकारित्वात्, वैद्यविदग्धो वैद्याभिमानी पल्लवग्राहीत्यर्थः। व्याधिगोपकस्य व्याधेरकथनादेव। दरिद्रस्य द्रव्याभावत्वे औषधाभावात्। कृपणस्य लोभेन भेषजस्यानुत्पादनात्, क्रोधनस्य कोपेन रोगवृद्धिः, अनात्मवतोऽपथ्याचरणत्वात्, अनात्मवान् अजितेन्द्रियः। अनाथानां परिचारकाभावात्, अनाथा एकाकिनः। एवमितयादि॥ ५॥

इदानीं वैद्यस्य विशिखायामन्तःपुरचारिणः प्रमाददोषद्वारं नियमयन्नाह;—भवति चात्रेतयादि। स्त्रीभिः सहास्यामिति सहास्यां एकत्रस्थितिं, संवासं प्रतिवेशवासितां, परिहासं हास्यं, अन्नादन्यदिति अन्नन्तु अन्नपानद्रव्यं गृह्णीयात् तस्य वृत्तिहेतुत्वात् राज्ञानुमतन्तु सर्व्वमेव गृह्णीयात् इति। संवासमितयत्र केचित् संवादमिति पठन्ति॥ ६॥

इति सूत्रस्थाने निबन्धसंग्रहे दशमोऽध्यायः॥

एकादशोऽध्यायः।

—o—

अथातः क्षारपाकविधिमध्यायं व्याख्यामः।

शस्त्रानुशस्त्रेभ्यः क्षारः प्रधानतमश्छेद्यभेद्यलेख्यकरणात्

अथात इति। क्षारशब्दः पाकविधिभ्यां सह सम्बध्यते। शस्त्रेति शस्त्राणि मण्डलाग्रादीनि, अनुशस्त्राणि त्वक्सारादीनि ; तेभ्यः क्षारः प्रधानतमः ; ते पुनर्द्वे अनुशस्त्रे अग्नि-जलौकाख्ये, परिशिष्टे तदुक्तं "विधिः प्रवक्ष्यते

त्रिदोषघ्नत्वाद् विशेषक्रियावचारणाच्च। तत्र क्षरणात् क्षणनाद्वा क्षारः। नानौषधिसमवायात् त्रिदोषघ्नः, शुक्लत्वात् सौम्यस्तस्य सौम्यस्यापि सतो दहन-पचन-दारणादिशक्तिरविरुद्धा। स खल्वाग्नेयौषधिगण-भूयिष्टत्वात् कटुक उष्णस्तीक्ष्णः पाचनो विलयनः शोधनोरोपणः शोषणः स्तम्भनो लेखनः कृम्यामकफकुष्ठविषमेदसामुपहन्ता पुंस्त्वस्य चातिसेवितः॥ १॥

पश्चादग्निक्षारजलौकसा" मिति, एषां त्रयाणां प्राधान्यमस्ति ; अतएवैषां पृथगध्यायः। अत्र जलौकसः प्रधानं, अग्निः प्रधानतरः, क्षारस्तु प्रधानतमः। क्षारादग्निर्गरीयानीत्यत्र यथा न विरोधस्तथा तत्रैव वक्ष्यामः। कस्मात् क्षारस्य प्राधान्यमित्यत आह ;—छेद्यभेद्यलेख्यकरणादित्यादि। छेद्यादीनि कर्म्माणि अग्निजलौकसो र्न सम्भवन्ति ; तेन ताभ्यां सकाशात् क्षारस्य प्राधान्यं। त्रिदोषघ्नत्वं क्षारस्य नानौषधि—समवायादित्यादिना साधयिष्यति, विशेषक्रियावचारणं यथा पित्तार्शःसु विशेषणावचारणं। क्षारस्य निरुक्तिं कुर्व्वन्नाह ;—तत्र क्षरणादित्यादि। क्षरणाद् दुष्टत्वङ्मांसादिचालनात् शातनादित्यर्थः ; अन्ये तु क्षरणाद्दोषाणां चालनात्, क्षणनात् त्वङ्मांसादिहिंसनात्; क्षपणादित्यत्र केचित् पठन्ति क्षपणं शोधनमभिप्रेतं। नानौषधि समवायादित्यादि।—समवायात् संयोगतोऽयं क्षारोऽनेकौषधिसमवायात् त्रिदोषघ्न इत्यभिप्रेतः पित्तार्शःस्वपि यौगिकत्वमस्य। शुक्लत्वात् सौम्य इति अस्याग्रे केचिदपिशब्दं लुप्तनिर्दिष्टं वर्णयन्ति व्याख्यानयन्ति च न केवलमुष्णोऽसौ सौम्योऽपि इति ; तेनास्य वक्ष्यमाणमुष्णत्वमपि न विरुध्यते। दहन-पचन-दारणशक्तिरविरुद्धा हिमानीवत्। प्रतिसारणीयः पानीयः द्विविधोऽपि क्षारः। अत्र व्रणशोथस्य प्रतिसारणीयः, अन्नाजीर्णस्य पानीयः। पाचनोविलयनः शोफस्य वातकफभूयिष्टस्य, संशोधनो दुष्टव्रणस्य, रोपणं शुद्धव्रणस्य। अत्र योगशक्तिप्रभावात् तिलयवकल्कवत्क्षारस्य शोधनरोपणत्वं न विरुध्यते। शोधन एवायं क्षारः शुद्धः व्रणः स्वयमेव रोहति इत्यन्ये ;नहि शुद्धव्रणे रोपणार्थं क्षारोऽवचार्य्यते शिरादिक्षणनभयात् तस्मात्

स द्विविधः प्रतिसारणीयः पानीयश्च। तत्र प्रतिसारणीयः कुष्ठकिटिमदद्रुकिलासमण्डलभगन्दरार्बुददुष्टव्रणनाड़ीचर्म्मकीलतिलकालकन्यच्छव्यङ्गमशकबाह्यविद्रधिक्रिमिविषार्शःसूपदिश्यते सप्तसु च मुखरोगेषूपजिह्वाधिजिह्वोपकुशदन्तवैदर्भेषु तिसृषु च रोहिणीष्वेतेषु चैवानुशस्त्रप्रणिधानमुक्तं॥ २॥

पानीयस्तु गरगुल्मोदराग्निसूलाजीर्णारोचकानाहशर्कराश्मर्य्याभ्यन्तरविद्रधिक्रिमिविषार्शःसूपयुज्यते॥ ३॥

पारम्पर्य्येण रोपण इति; केचिदत्र रोपणत्वं न पठन्त्येव। शोषणो व्रणक्लेदस्य, स्तम्भनः शोणितनिवृत्तेः, हन्तृशब्दः क्रम्यादिभिः सह प्रत्येकं सम्बध्यते। क्रमयो बाह्याभ्यन्तरास्तेषां द्विविधः क्षार उपहन्ता; आमोऽपक्वरसः मेदः पानीय एवोपहन्ता, पुंस्त्वस्य शुक्रस्य॥ १॥

इदानीमुक्तगुण-कर्म्मणः क्षारस्य द्वैविध्यं दर्शयन्नाह;—स द्विविध इत्यादि। प्रतिसारणीयः प्रतिसारणार्हः, पानीयं पानार्हं क्षारोदकमित्यर्थः। येचान्येऽपि पाक्यसर्जिकायवक्षारा यथारोगं वक्ष्यास्तेषां चूर्णवटकावलेहादिषु प्रयोगः कर्त्तव्यः। प्रतिसारणीयस्य विषयं दर्शयन्नाह;—तत्र प्रतिसारणीय इत्यादि। किटिमः कुष्ठविशेषः, तस्य पृथगभिधानं नियमेन प्रतिसारणीय-साध्यत्व ज्ञापनार्थं। दद्रुमण्डलमित्येकं, किलासं त्वग्गतचित्रकुष्ठं, चर्म्मकीलोऽर्शोनिदानपठितः, न्यच्छव्यङ्गौ क्षुद्ररोगनिदानोक्तौ, बाह्यशब्दः विद्रधि-क्रिमिविषैश्च प्रत्येकं सम्बध्यते। विषादिष्विति आदिशब्दात् वल्मीकादीनां ग्रहणं; बाह्यक्रिमिविशेषादिष्विति केचित् पठन्ति। के ते सप्तमुखरोगा येषु क्षार उपयुज्यते इत्याह,—उपजिह्वेत्यादि। उपजिह्वादीन् रोगान् मुखरोगनिदाने वक्ष्यति। तिसृणां रोहिणीनां ग्रहणं सन्निपातरक्तजयोरसाध्यत्व-ज्ञापनार्थं। कुतः पुनरुपजिह्वादिभ्योऽन्येषु मुखरोगेषु क्षारो नोपयुज्यते इत्याह;—एतेष्वेवेत्यादि। अत्रानुशस्त्रं क्षार एव, एतेष्वनुशस्त्रं निपातनमिति क्वचित् पाठः॥ २॥

पानीयविषयं दर्शयन्नाह;—पानीयस्त्वित्यादि। गरः कृत्रिमं

अहितस्तु रक्तपित्तज्वरितपित्तप्रकृतिबालवृद्धदुर्बलभ्रममदमूर्च्छातिमिरपरीतेभ्योऽन्येभ्यश्चैवंविधेभ्यः ॥ ४ ॥

तस्येतरक्षारवद्दग्ध्वा परिस्रावयेत्तस्य विस्तारोऽन्यत्र ॥ ५ ॥

अथेतरस्त्रिविधो मृदुर्मध्यस्तीक्ष्णश्च। तं चिकीर्षुः शरदि गिरिसानुजं शुचिरुपोष्य प्रशस्तेऽहनि प्रशस्तदेशजातमनुपहतं मध्यमवयसं महान्तमसितमुष्ककमधिवास्यापरेद्युः पाटयित्वाभिमन्त्र्यानेन मन्त्रेण।

विषं, दूषीविषमित्यन्ये। अग्निसङ्गः इति अग्निः सज्यते नीयते यस्माद् यस्मिन् वासौ अग्निसङ्गः, तेन वात-श्लैष्मिक-ग्रहणी-विसूचिकालसकविलम्बिकादि-विकारा गृह्यन्ते ; शर्करा वातेन भीन्नाश्मरी शर्करेत्युच्यते ॥३॥

क्षारस्य येषु अयौगिकत्वं तानाह ;—अहितस्त्वित्यादि। भ्रमश्चक्रारूढ़स्येव भ्रमणं, मदोविषमद्यशोणितोत्थो विकारः पूगफलेनेव मत्तता, मूर्च्छा चेतनाच्युतिः, परीतशब्दो भ्रमादिभिः सह प्रत्येकं सम्बध्यते ॥ ४ ॥

तत्र पानीयक्षारपाकं विधिश्च संक्षेपेण दर्शयितुमाह ;—तस्येतरक्षारवदित्यादि। इतरक्षारवत् प्रतिसारणीयवत् ; यथा प्रतिसारणीयस्य काष्ठदाहः षड्गुणोदकपाकस्त्रिभागशेषानन्तरं परिस्रावणं तद्वत् पानीयस्यापि पाकविधिः स्रावणञ्च द्वितीयपाकवर्ज्जं पचनीयः। क्षारभस्मप्रमाणं उत्तमा मात्रा पलं, मध्यमा कर्षत्रयं अधमा अर्द्धपलं। अन्यत्र गुल्मादिषु अध्यायेषु ॥ ५ ॥

अथेतरो मृदुरित्यादि। इतरः प्रतिसारणीयः, अथेतरो मृदुरित्यादात्र केचिन्न पठन्ति। प्रतिसारणीयस्य पाकविधिं निर्द्दिशन्नाह ;—तं चिकीर्षुरित्यादि। तं प्रतिसारणीयं चिकीर्षुः कर्त्तुमिच्छुः, तं चिकीर्षुरित्यत्र अथेतरं चिकीर्षुरिति केचित् पठन्ति। अथशब्दोमङ्गलार्थः, इतरं प्रतिसारणीयं। गिरिसानुजं पर्व्वतोपरिजातं, गिरिसानुजमिति जाङ्गलदेशोपलक्षणमित्यन्ये। शुचिरुपोष्येत्यत्र शुचिरुपरमन्निति केचित् पठन्ति। अनुपहतं दावाग्नि-गराद्यनुपहतं, असितमुष्ककं

अग्निर्वीर्य्य महावीर्य्य मा ते वीर्य्यं प्रणश्यतु।
इहैव तिष्ठ कल्याण मम कार्य्यं करिष्यसि॥
मम कार्य्ये कृते पश्चात् स्वर्गलोकं गमिष्यसि॥

श्वेतपुष्परक्तपुष्पसहस्रं जुहुयात्। खण्डशः प्रकल्प्यावपाट्य निर्व्वाते देशे निचितिं कृत्वा सुधाशर्कराश्च प्रक्षिप्य तिलनालैरादीपयेत्। अथोपशान्तेऽग्नौ तद्भस्म पृथग्गृह्णीयाद्भस्मशर्कराश्च।

निश्वेतादि पुष्पं(घण्टापारुली),अधिवास्य मन्त्रवद्बलिकर्म्मोपहरेत् इत्यर्थः, केचिदस्याग्रे मन्त्रेणानेनाभिमन्त्र्य "अग्निवीर्य्य महावीर्य्य मा ते वीर्य्यं प्रणश्यतु। इहैव तिष्ठ कल्याण मम कार्य्यं करिष्यसि। मम कार्य्ये कृते पश्चाद् देवलोकं गमिष्यसि।" श्वेतपुष्पं सहस्रं जुहुयात् इति पठन्ति; अयञ्च निबन्धेषु न पठ्यते; अन्ये त्वत्र प्राङ्मुखोपगतसूत्रबलिं दत्वा चतुर्द्दिशां इत्याभ्यासे ततो ब्रूयात् प्राञ्जलिः प्रयतः शुचिः निवसन्तीह भूतानि इत्यादि अधिवासनामन्त्रं पठन्ति, भोजोऽप्ययमेव पठ्यते इति च वदन्ति। अपरेद्युरपरस्मिन् दिने,खण्डशः प्रकल्प्य बहून् खण्डान् कृत्वा,अवपाट्य तान् खण्डान् पुनः पाठमित्वा ; अपरेद्युः पाटयित्वेतत्र स्थाने प्रभाते वैकृतमद्भुतं न पश्येत् तदुपकल्पयेदिति क्वचित् पाठः; वैकृतं तरुशाखाभङ्गादि, अद्भुतं रुधिरवर्षादि इति च तस्य व्याख्यानं। निचितिः काष्ठानां औत्तराधार्य्येणावस्थितिः, केचिदत्र चितिं कृत्वेति पठन्ति ; चितिं दाहस्थानमिति वदन्ति। तिलनालैरादीपयेत् तिलनालदीपनात्शक्त्यातिशयो भवति। निचितिं कृत्वेत्यस्याग्रे केचित् सुधाशर्कराः प्रक्षिप्याश्चेति पठन्ति व्याख्यानयन्ति च सुधाशर्कराः सुधापाषाणाः, भस्मशर्कराश्चेति दह्यमानार्द्रकाष्ठरशात् शर्करेवान्योन्यं महत् भस्मशर्करेत्युच्यते; ताश्च पृथक् गृह्णीयात्; पृथक्ग्रहणं भिन्नप्रयोजनार्थं तिलभस्मनः क्षारोदककरणं; भस्मशर्करा पुनः क्षारद्रव्यसमवायिनी। अन्ये तु पृथक् गृह्णीयादित्यस्याग्रे कटशर्कराभस्मशर्कराश्चेति पठन्ति। कटशर्करा अदग्धसुधापाषाणाः, भस्मशर्करास्तु क्षारद्रव्यैः सह दग्धाश्चूर्णपाषाणा इति च व्याख्यानयन्ति।

अथानेनैव विधानेन कुटजपलाशाश्वकर्णपारिभद्रकविभीतकारग्वध-तिल्वकार्कस्नुह्यपामार्गपाटलानक्तमालवृषकदलीचित्रकपूतीकेन्द्र-वृक्षास्फोताश्वमारकसप्तच्छदाग्निमन्थगुञ्जाश्चतस्रश्च कोशातकीः समूलफलपत्रशाखा दहेत् ॥ ६ ॥

ततः क्षारद्रोणमुदकद्रोणैः षड्भिरालोड्य मूत्रैर्वा यथोक्तै-रेकविंशतिवारान् विस्राव्य महति कटाहे शनैर्दर्व्या विघट्टयन् विपचेत् ॥ स यदा भवत्यच्छो रक्तस्तीक्ष्णः पिच्छिलश्च तमादाय

एष दाहकल्पः। अथानेनैवेत्यादि। अथानेनैव विधानेनेत्यनेन विधानदेश-निश्चितिस्थिलनालं दीपनं लभ्यते, गिरिसानुजं इत्यस्य जाङ्गलदेशोपलक्षण-त्वात् तेनेहापि कुटजादीन्यपि जाङ्गलानि गृह्यन्ते। मुष्ककस्य कुटजादीनाञ्च एकदेशकल्पनत्वेऽपि पृथक् दाहविधानं कुटजादिभस्मनो मुष्ककभस्मनो भागाधिक्यख्यापनार्थं भागाधिक्यञ्च ततः क्षारद्रोणमुदकद्रोणैः षड्भि-रित्यत्र वक्ष्यामः। अन्ये तु मुष्ककेन एकेनापि क्षारो भवति इति पृथग् विधानं बोधयति। पलाशः किंशुकः, अश्वकर्णः पूर्व्वदेशे गन्धमुण्डः पिप्पल-सदृशः, पारिभद्रको देवदारुः, अन्ये तु रक्तकुसुमः कण्टकीवृक्षविशेषः स्वनाम्ना प्रसिद्धः। तिल्वकः स्वनाम प्रसिद्धः। इन्द्रवृक्षं कुटज एव, द्विविधोऽहि कुटजः वृहत् फलश्वेतपुष्पः स्निग्धपत्रः पुमान्, अणुफलवृन्ता श्यावारुण-पुष्पा स्त्री। आस्फोता शारिवा। कोषातकी घोषकः, सा चतुर्व्विधा वृहत्फला, अल्पफला, पीतपुष्पा श्वेतपुष्पा इति। समूलफलपत्रशाखा इति कुटजा-दिभिः सह प्रत्येकं सम्बध्यते; केचित् कुटजादि कोषातक्यन्तं समस्तं पठन्ति ॥ ६ ॥

ततः क्षारद्रोणमित्यादि। ततो मुष्ककुटजादिदाहानन्तरं। क्षार-द्रोणमिति मुष्ककभस्मनो द्वौ भागौ, कुटजादिभस्मन एको भाग इति मिश्री-कृतं क्षारद्रोणमुच्यते। उदकद्रोणैः षड्भिरिति भस्मद्रव्यात् षड्गुणोदक-परिभाषेयं अनेनैवान्यत्रापि क्षारपाकविधौ क्षारकल्पनं पक्षान्तरं दर्श-यति मूत्रैर्वा यथोक्तैरिति इन्द्रभिस्नीय-कल्पोक्तैरित्यर्थः। तथाहि गवां

महति वस्त्रे परिस्राव्येतरं विसृज्य च पुनरग्नावधिश्रयेत्। तत एव च क्षारोदकात् कुड़वमध्यर्द्धं वापनयेत्। ततः कटशर्करा-भस्मशर्कराक्षीरपाकशङ्खनाभीरग्निवर्णाः कृत्वायसे पात्रे तस्मिन्नेव क्षारोदके निषिच्य पिष्ट्वा तेनैव द्विद्रोणेऽष्टपल-संमितं शङ्खनाभ्यादीनां प्रमाणं प्रतिवाप्य सततमप्रमत्त-

मूत्रेण क्षारकल्पेन परिस्राव्य विपचेदित्यत्रापि क्षारकल्पेनेति वचनाद् भस्मद्रव्यानुमूत्रस्य षड्गुणत्वमुक्तं। एकविंशति कृत्वा परिस्राव्येति एकविंशति वारान् वस्त्रेण गालयित्वा अवघट्टयन् चालयन् तावत् पचेद् यदा भवत्यच्छोरक्तस्तीक्ष्णः पिच्छिलश्चेति। एते अच्छादयो गुणा त्रिभागावशेषे क्षारोदके भवन्ति। तं क्षारक्वाथमादाय गृहीत्वा इतरं विभजत्र क्षार-भस्मकल्कं; इतरद्विसृजेति क्वचित् पाठः। तत्र भस्म किम्भूतं अधिश्रये दापयेत् तत एव क्षारोदकादिति। कुड़वं अष्टौ पलानि अपनयेत्, अध्यर्द्धमित्यत्र कुड़वमिति सम्बध्यते, तेनाध्यर्द्धं कुड़वं द्वादश पलानि वा अपनयेत्; अन्ये त्वत्र द्विगुणं न मन्यन्ते। एतद्धि क्षारोदकापनयनं कटशर्करा-दीनां निषेधार्थं एषणार्थञ्च; अन्ये तु कटशर्करादीनां भागप्रमाणज्ञापनार्थ-मिति वदन्ति; तेन कटशर्करादीनि द्रव्याणि प्रत्येकं कुड़वप्रमाणानि वा आवपेदित्यर्थः। ततः कटशर्करेत्यादि। कटशर्करा गाङ्गेष्ठी, भस्मशर्करा अत्रैवाध्याये पूर्वं व्याख्याता। अन्ये तु कटशर्करा—भस्मशर्करयोरन्यथा व्याख्यानं कुर्वन्ति, तदप्यत्रैवाध्याये कथितं। क्षीरपाको जलशुक्तिः। आयसे पात्रे लौहे भाजने। अग्निवर्णाःकृत्वा तस्मिन्नेव क्षारोदके पूर्वोपनीते कुड़वे अध्यर्द्धकुड़वे वा निषिच्य प्रक्षिप्य; अत्रैषां कटशर्करादीनां अनिर्दिष्टप्रमाण-त्वात् समभागा इत्येके; समभागश्चात्र प्रत्येकमष्टौ पलानि एवञ्च द्वात्रिंशत् पलानि भवन्ति; एतेन द्विद्रोणेऽष्टपलसम्मितमित्यपि प्रमाणमनुकुलितं भवति द्विद्रोणे षोड़शांशश्चावापभागो ज्ञापितः; अन्येतु अष्टपलसम्मितमिति कटशर्करादीनां प्रत्येकं द्वे द्वे पले इत्येवमष्टपलत्वं मन्यन्ते। तत्र शङ्खनाभेः प्रधानत्वादेव क्षारः स्यात्। एवञ्च विश्वामित्र-भोजोक्त-भागकल्पना निरस्ता।

श्चैनमवघट्टयन् विपचेत् । स यथा नातिसान्द्रो नातिद्रवश्च भवति तथा प्रयतेत । अथैनमागतपाकमवतार्य्यानुगुप्तमायसे कुम्भे संवृतमुखे निदध्यादेष मध्यमः । एष एवाप्रतीवापः पक्वः संव्यूहिमो मृदुः । प्रतिवापे यथालाभं दन्तीद्रवन्तीचित्रकलाङ्गलकीपूतिकप्रवालतालपत्रीविड़सुवर्चिकाकनकक्षीरीहिङ्गुवचाविषाः समाः श्लक्ष्णचूर्णाः शुक्तिप्रमाणाः प्रतिवापः । स एव सप्रतीवापः पक्वः पाक्यस्तीक्ष्णस्तेषां यथाव्याधिबलमुपयोगः । क्षीणबले तु क्षारोदकमावपेद्बलकरणार्थम् ॥ ७ ॥

तदुक्तं भागग्रहणेऽपि शङ्खनाभेरप्राधान्यं स्यात्, द्विद्रोणग्रहणेन त्रिभागावशेषं क्षारोदकं सर्वत्र परिभाषयन्तीति वृद्धाः प्रायेण हि विमिश्रितक्षारद्रोणमाहुः । उदकद्रोणैः षड्भिरिति षट्त्रिंशदधिकपञ्चदशशतोदकपलैः सह विपचेदित्यर्थः । तत्र तस्य पच्यमानस्य तैक्ष्ण्याच्छरक्तपिच्छिलादयो गुणाः षोड़शांशावशिष्टा षण्णवतिपलप्रमाणं भवति । अन्ये तु वदन्ति नचात्र चतुर्भागाद्यवशेषादिपरिभाषा व्याप्रियते । तस्मात् शनैः शनैस्तावत् विपचेत् यावद्रागादिगुणयुक्तः क्वाथो भवति । क्षारसंज्ञितमिति षण्णवति पलप्रमाणे तु क्षारोदके कटशर्करादीनां समभागानां चतुर्थांशे आवापमिच्छन्ति सप्रतिवापं पाक्यसंज्ञं तीक्ष्णं प्रतिपादयन्नाह ;—प्रतिवापे यथालाभमित्यादि । प्रतिवाप इति क्षिप्ते आवापे पुनः द्रव्यप्रक्षेपः प्रतिवापः, द्रवन्ती भेदा सम्बरीति भाद्रालके । लाङ्गलकी गणिकारिका । पूतीकप्रवालः कण्टकीकरञ्जपल्लवः अन्ये तु चिरिबिल्वपल्लवं पत्रं चेति पठन्ति । तालपत्री मुषली । कणकक्षीरी कङ्गुष्ठमित्यन्ये । शुक्तिप्रमाणा प्रत्येकमर्द्धपलप्रमाणाः । सएव सप्रतीवापः पक्वः पाक्यस्तीक्ष्ण इति स एव संव्यूहिमसंज्ञः क्षारः दन्त्यादिद्रव्यप्रतिवापेन सहितः पाक्यसंज्ञो भवति तीक्ष्णश्चेत्यर्थः । नचास्य तीक्ष्णदोषः, कुतः अतितीक्ष्णः क्षारस्य दोषः ; अन्ये तु सएवायं प्रतिवाप इत्यादि पाठस्थाने स च पूर्ववत् पक्वतीक्ष्ण इति पठन्ति । तेषां यथा-

भवत स्यात ।

नैवातितीक्ष्णो न मृदुः शुक्लः श्लक्ष्णोऽथ पिच्छिलः ।
अभिष्यन्दी शिवः शीघ्रः क्षारो ह्यष्टगुणः स्मृतः ॥ ८ ॥
अतिमार्दवशैत्यौष्ण्यतैक्ष्ण्यपैच्छिल्यसर्पिताः ।
सान्द्रताऽपक्वता हीनद्रव्यता दोष उच्यते ॥ ९ ॥

व्याधिवलमुपयोगः इति । तेषां क्षाराणां कालवशात् हीनौषधिवशाद्वा मृदौ-क्षारे वलकरणाय आवापमाह;—क्षीणवलेत्वितत्यादि । अवापे क्षीणवले हीनशक्तौ क्षारे क्षारोदकमावपेत् पूर्वकल्पेन कृतं क्षारोदकं प्रतिक्षिपेत् प्रक्षिप्य पुनर्विपचेदिति वलकरणार्थं ॥ ७ ॥

तीक्ष्णादिशब्दव्यपचर्थेत्यार्थं क्षारगुणदोषान् प्रतिपादयन्नाह ;—भवतश्चात्र नैवातीत्यादि । अतिशब्दस्तीक्ष्णमृदुशुक्लैः सह प्रत्येकं सम्बध्यते । अनति-शुक्लत्वात् प्रतिवापान्यल्पता सूचिता भवति । अनतिशब्दं श्लक्ष्णे न सम्बध्नन्ति, श्लक्ष्णोऽकर्कशः ; अन्ये तु श्लक्ष्णस्थाने व्रतस्त इति पठन्ति । श्लक्ष्णस्त्वगिन्द्रियसुखः । अभिष्यन्दी योऽवचारितोऽपि न प्रसर्पति । शिव इति सौम्य उच्यते, शिवस्थाने केचित् सम इति पठन्ति; तत्र नातिसान्द्रो नातिद्रव इत्यर्थः । शीघ्रः शीघ्रकारी, केचित् क्षारगुणेषु मध्ये सुखनिग्राह्यो दोषघ्न इति गुणद्वयं पठन्ति सुखनिग्राह्यः सुखनिवर्त्त्यः, दोषघ्नो दोषमात्रानुसारी, दोषशब्दोऽत्र व्याधौ वर्त्तते इति च व्याख्यानयन्ति। नैवातितीक्ष्ण इत्यादिना एवमष्टसंख्यालब्धा पुनरष्टगुण इति च यत्कृतं तत्कटुरसादिगुणातिरेकत्वनिषेधार्थं ॥ ८ ॥

दोषानधिकृत्याह ;—अतिमार्दवेत्यादि । अतिशब्दो मार्दवशैत्यादिभिः सह प्रत्येकं सम्बध्यते । शैत्यं शुक्लता । केचित् क्षारदोषान् सार्द्धश्लोकेना-भीयते, तद् यथा,—"अत्यौष्ण्यमतिपैच्छिल्यमतितैक्ष्ण्यं विसर्पिता । अत्यर्थं मार्दवं शैत्यं अत्यर्थं शान्द्रमेवच । हीनौषधं विपक्वत्वं क्षारदोषा नव स्मृताः ।" अत्यर्थं शब्दः प्रत्येकं सम्बध्यते । संख्येयनिर्देशादेव संख्या प्राप्ता पुनर्नवेति संख्याकरणं क्षारातिसेवया पुंस्त्वहन्तृदोष संख्या ।

तत्र क्षारसाध्यव्याधिव्याधितमुपवेश्य निर्वातातपे देशेऽसम्बाधेऽग्रोपहरणीयोक्तेन विधानेनोपसम्भृतसम्भारं ततोऽस्य तमवकाशं निरीक्ष्यावघृष्यावलिख्य प्रच्छयित्वा शलाकया क्षारं पातयित्वा वाक्शतमात्रमुपेक्षेत ॥ १० ॥

तस्मिन्निपतिते व्याधौ कृष्णता दग्धलक्षणम्।

शङ्कानिराशार्थं; केचित् क्षारदोषान्न पठन्ति, उक्तगुणविपर्ययेणैव दोषाणां लब्धत्वादिति ॥ ६ ॥

इदानीं क्षारप्रतिसारणीयविधिमधिकृत्याह ;—तत्र क्षारसाध्येत्यादि। क्षारसाध्यव्याधि—व्याधितमिति क्षारस्य साध्यो यो व्याधि स्तेन व्याधितं दुःखितं। निवातातपदेशे इति निःशब्दो वातातपाभ्यां सह प्रत्येकं सम्बध्यते। असम्बाधेऽसङ्कीर्णदेशे। अग्रोपहरणीयोक्तेन विधानेनेति प्रशस्तेषु तिथिकरण-मुहूर्त-नक्षत्रेष्वित्यादिकेन विधिना। अस्य च क्षारं प्रतिसारयेदित्यनया क्रियया सम्बन्धः। उपसम्भृतसम्भारमिति यन्त्रशस्त्रक्षाराग्निशलाकेत्यादि-समीपस्थापितोपकरणं। ततः सम्भृतसम्भारानन्तरमस्य व्याधितस्य तमव-काशं तं प्रदेशं निरीक्ष्येति व्याध्याकारविज्ञानार्थं, अवघृष्येति पित्तदुष्टं अव-लिख्येति वातदुष्टं सुप्तकठिनत्वचं, प्रच्छयित्वेति कफदुष्टकण्डूश्वयथुप्रबलं, पश्चाच्छलाकया क्षारं प्रतिसारयेदित्यर्थः। क्षारं प्रतिसारयेदित्यस्य स्थाने क्षारं पातयेदिति केचित् पठन्ति। कालावधिं प्रतिपादयितुमाह ;—दत्त्वा वाक्-शतमात्रमित्यादि। वाक्शतं शतगुर्वक्षरोच्चारणपर्य्याप्तं कालं क्षारावचारणं, वाक्शतमात्रमिमि· मात्रग्रहणेनैतद्बोधयति एतावता कालेन यो दहति स यथोक्तगुणः क्षारः। अन्ये मात्रस्थाने एवशब्दं पठन्ति वाक्शतमेव नाधिकं न न्यूनं चेति च व्याख्यानयन्ति। इदानीं क्षारस्य प्रतिदोषं लेपप्रमाण-मवचारणकालं नियमन्नाह ;—यवपत्रसम इत्यादि। इमञ्च पाठं केचि-दाचार्य्या न पठन्ति ; सत्राभावात् समग्रो न लिखित इति ॥ १० ॥

सम्यग्दग्धलक्षणं वक्तुमाह ;—तस्मिन्निपतिते व्याधाविति। कुतः तत्र कृष्णताभवेदिति एतत्, सामान्यं सम्यग् दग्धलक्षणं। तत्राम्लगणः

तत्राम्लवर्गः शमनः सर्पिर्मधुकसंयुतः ॥
अथचेत् स्थिरमूलत्वात् क्षारदग्धं न शीर्य्यते ।
इदमालेपनं तत्र समग्रमवचारयेत् ॥
अम्लकाञ्जिकवीजानि तिलान्मधुकमेव च ।
प्रपेष्य समभागानि तेनैवमनुलेपयेत् ॥११ ॥
तिलकल्कः समधुको घृताक्तो व्रणरोपणः ।
रसेनाम्लेन तीक्ष्णेन वीर्य्योष्णेन च योजितः ॥ १२ ॥
आग्नेयेनाग्निना तुल्यः कथं क्षारः प्रशाम्यति ।
एवं चेन्मन्यसे वत्स प्रोच्यमानं निबोध मे ॥
अम्लवर्ज्यान् रसान् क्षारे सर्व्वानेव विभावयेत् ।
कटुकस्तत्र भूयिष्ठो लवणानुरसस्तथा ॥
अम्लेन सह संयुक्तः स तीक्ष्णोलवणो रसः ।

शमान इति—सौवीरक तुषोदक धान्याम्लादिः । अथचेत् स्थिरमूलत्वादिति । स्थिरमूलत्वात् दृढमूलत्वात् इत्यर्थः, न शीर्यते न सटति, इदमिति अग्रे मच्यमाणं । तत्रेति अशीर्यमाने क्षारदग्धे समग्रं सर्वं अवचारयेत् प्रयोजयेत् तदेवालेपनमाह ;—अम्लकाञ्जिकेति । अम्लकाञ्जिकवीजानीति अम्ल-काञ्जिकाधःस्थित द्रव्यं, तेनैवेति समभागपिष्टेनाम्लकाञ्जिकवीजादिना । एनं क्षारदग्धं क्षारक्षतव्रणरोपणोपायमाह ।—तिल कल्कसमधुक इति । अग्नितुल्यस्य क्षारस्याग्नेयेन काञ्जिकेन कथं शमनमित्या-शङ्क्याह ;—रसेनाम्लेन तीक्ष्णेत्यादि। अम्लेन तीक्ष्णेन वीर्य्योष्णेनाग्नेयेन योजितः ॥ ११—१२ ॥

अग्नितुल्यः क्षारः कथं प्रशाम्यतीति पिण्डार्थः। उत्तरमाह एवञ्चेन्मन्यसे वत्स इत्यादि। विभावयेत् जानीयात् इत्यर्थः। कटुकस्तत्रभूयिष्ट लवणो-

माधुर्य्यं भजतेऽत्यर्थं तीक्ष्णभावं विमुञ्चति ॥
माधुर्य्याच्छमामाप्नोति वह्निरद्भिरिवाप्लुतः ॥ १३ ॥

तत्र सम्यग्दग्धे विकारोपशमो लाघवमनास्रावश्च। हीनदग्धे तोदकण्डूजाड्यानि व्याधिवृद्धिश्च। अतिदग्धे दाहपाकरागस्रावाङ्गमर्दक्लमपिपासामूर्च्छाः स्युर्मरणं वा। क्षारदग्धव्रणन्तु यथादोषं यथाव्याधिचोपक्रमेत् ॥ १४ ॥

ऽनुरसस्तथा इति भवेति पञ्चरसे क्षारे कटुकोऽनुरसः लवणस्तु भूयिष्ठ इति योजना। केचित् कटुकमेव भूयिष्ठं मन्यन्ते, तन्न, यतो जना अम्लभक्षणे माधुर्यार्थं लवणमेव रसं प्रयुञ्जते लवणवर्गे क्षारस्य पठितत्वाच्च कटुवर्गेचापठितत्वात् यद्येवं स खल्वाग्नेयौषधिभूयिष्ठत्वात् कटुक इति तर्हि कथं उच्यते लवणवर्गे पाठादेव क्षारस्य लवणत्वेऽपि सिद्धे कटुकमिति विधर्थमेव। मतोऽल्पो लवणोरस इति सक्षार एवं गुणः अद्भिः पानीयैराप्लुतो वह्निरिति लोके ॥ १३ ॥

इदानीं चिकित्सान्तकथनाय पुनः सम्यग् दग्धलक्षणमाह ;—तत्र सम्यक् दग्धे विकारेति। तत्रेति सम्यग् दग्धादिमध्यात् लाघवमङ्गानां क्रमेनारनिर्वापणे एते विकारोपशमादयो लक्षणानुत्तरकालं ज्ञेयानि, एतद्विकारोपशमादिकं किञ्चित्तात्कालिकं लक्षणं किञ्चिदुत्तरकालिकं इत्यन्ये हीनदग्धलक्षणमाह :— हीनदग्धतोदकण्डित्यादि। हीनदग्धे तोदादयो वातश्लेष्मिकाः, जाड्यं जड़ता, अन्ये त्वत्र दुर्दग्धे तोददाहकण्डूजाड्यानि व्याधिवृद्धिश्चेति पठन्ति, तस्मिन् स्थाने एतानि वातपित्तरक्तकफपाकाकार्याणाति च व्याख्यानयन्ति। अतिदग्धलक्षणमाह ;—अतिदग्धे दाहेत्यादि। दाहपाकादयः पैत्तिकाः, रागो रक्तता, अङ्गमर्द्दो वेदनाविशेषः, क्लमो ग्लानिः क्षारदग्धव्रणव्यापच्चिकित्सां वक्तुमाह ;—क्षारदग्धव्रणन्त्विति। अन्ये तु यथाविधि यथादोषमिति पठन्ति, हेतुव्याधिप्रत्यनीकेन विधिना इति व्याख्यानयन्ति। १४ ॥

अथ नैते क्षारकृत्याः। तद्यथा दुर्बलबालस्थविरभीरु-सर्वाङ्गशूनोदरिरक्तपित्तगर्भिण्यृतुमतीप्रवृद्धज्वरिप्रमेहिरूक्षक्षतक्षीण-तृष्णामूर्च्छोपद्रुतक्लीबापवृत्तोद्वृत्तफलयोनयः॥ १५ ॥

तथा मर्म्मशिरास्नायुधमनीसन्धितरुणास्थिसेवनीगलनाभी-नखान्तरशेफस्रोतःस्वल्पमांसेषु च प्रदेशेष्वक्ष्णोश्च न दद्यादन्यत्र वर्त्मरोगात्। तत्र क्षारसाध्येष्वपि व्याधिषु शूनगात्रमस्थिशूलिन-मन्नद्वेषिणं हृदयसन्धिपीडोपद्रुतं क्षारो न साधयति॥ १६ ॥

अतः क्षारस्य द्विविधस्यापि येषु प्रतिषेधस्तानाह;—अथनैते क्षार कृत्या इति। एषु च यथादोषं केषुचिदेव प्रतिसारणीय क्षारनिषेधः, केषुचित् पानीयनिषेधः, केषुचिदुभयनिषेधः। सर्वाङ्गशूनोदरीति सर्वाङ्गेन शूनो सर्वाङ्गशूनो य उदरी तस्यैव क्षारनिषेधः क्षतः, उरःक्षतस्य न क्षीणः। तृष्णामूर्च्छोपद्रुत इति उपद्रुतशब्दः तृष्णामूर्च्छाभ्यां सम्बध्यते। क्लीबः क्षीण-शुक्रः, अशुक्रस्य पुनः क्षाराधिकार एव नास्ति। उद्वृत्तापवृत्तफलयोनश्च इति उद्वृत्तापवृत्तशब्दौ फलयोनिभ्यां सह प्रत्येकं सम्बध्यते। अत्र फलं आण्डं, योनिर्गर्भाशयः। उद्वृत्तफलः स्थानादूर्द्ध्वगताण्डः, अपवृत्तफलः स्थानात् स्रस्ताण्डः, उद्वृत्तयोनिः स्थानादूर्द्ध्वगतयोनिः, अपवृत्तयोनिः, स्थानात् स्रस्तयोनिः, अन्ये तु फलयोनिशब्देन समुदितेन गर्भाशयमाचक्षते, तत्रायमर्थः उद्वृत्तफलयोनिः स्थानादूर्द्ध्वगतगर्भाशयः, अपवृत्तफलयोनिः स्थानात् स्रस्तगर्भाशय इत्यर्थः, अपरे तु फलशब्दं रजसि वर्त्तयन्ति, कुतः गर्भस्य फलसाधनत्वात् तेन यस्या योनेः सकाशात् फलं रजः उद्वृत्तमूर्द्ध्व-गतं अपवृत्तमधोगतं सा उद्वृत्तापवृत्ताफलयोनिः॥ १५ ॥

व्याधिपुरुषविशेषेण निषेधमुक्त्वा प्रदेशविशेषेण वक्तुमाह;—तथा मर्म्म-शिरा स्नायित्यादि। तरुणास्थीनि घ्राणकर्णग्रीवाक्षिकूटेषु तरुणसंज्ञान्यस्थीनि। सेवन्यः सप्त, पञ्च शिरसि, एका जिह्वायां, एका शेफसि;—धमन्यश्चतुर्विंशति नाभि प्रभवाः। नाभिरिति मर्म्मग्रहणादेव नाभिः प्राप्ता, पुनर्नाभिग्रहणं

भवतिचात्र ।

विषाग्निशस्त्राशनिमृत्युकल्पः क्षारो भवत्यल्पमतिप्रयुक्तः । स धीमता सम्यगनुप्रयुक्तो रोगान्निहन्यादचिरेण घोरान् ॥ १७ ॥

नाभ्यां दोषातिशयसूचनार्थं । सेफोमेढ्रः, अनुक्तशुक्रत्वाच्च अल्पमांसेषु च देशेषु इति जानुपादोपरि ललाटादिषु । अक्ष्णोश्च न दद्यादन्यत्र वर्त्मरोगादिति अन्यत्र अन्यस्मिन् रोगे वर्त्मरोगे पुनरक्ष्णोरपि क्षारं दद्यादित्यर्थः । अवस्थावशान्निषेधार्थं दर्शयन्नाह ;—तत्रेति । दुर्बलबालस्थवीरादीन् प्रतिसारणीय इति ॥ १६ ॥

इदानीं सम्यक् प्रयुक्तस्य क्षारस्य महागुणत्वं असम्यक् प्रयुक्तस्य महादोषत्वञ्च निदर्शयन्नाह ;—भवति चात्रेत्यादि । विषाग्नि शस्त्राशनि । मृत्युकल्प इति मृत्युशब्दः विषादिभिः सह प्रत्येकं सम्बध्यते, तेनायमर्थः विषादिभिः कृत्वा यो मृत्युस्तेन मृत्युनाकल्प इति सदृशो भवति । तत्र विषवद् वेदनाभिः सर्वाङ्गानुसारी भूत्वा मारयति, अग्निवद् विस्फोटकादिकरणीभूत्वा शस्त्रवत् शरीरादिच्छेदीभूत्वा अशनिवत् सद्यो मारयतीति दृष्टान्त चतुष्टयमुपन्यस्तं ॥ १७ ॥

इति सूत्रस्थाने निबन्धसंग्रहे एकादशोऽध्यायः ।

द्वादशोऽध्यायः ।

—०—

अथातोऽग्निकर्म्मविधिमध्यायं व्याख्यास्यामः ।

क्षाराद्‌ग्निर्गरीयान् क्रियासु व्याख्यातस्तद्‌दग्धानां रोगाणाम-पुनर्भावाद् भेषजशस्त्रक्षारैरसाध्यानां तत्साध्यत्वाच्च ॥ १ ॥

अथात इति। अग्निना कृतं यत्कर्म्म अग्निसम्बन्धि वा यत्कर्म्म तदग्निकर्म्म, तस्य विधिर्विधानं तद् यस्मिन्नध्याये विद्यते तं व्याख्यास्यामः। अग्निकर्म्मीयमितप्यन्ये पठन्ति अग्निकर्म्माधिकृतत्र कृतोऽग्निकर्म्मीय इति व्याख्यानयन्ति च। अग्निकर्म्ममाहात्म्यमाह; क्षाराद्‌ग्निर्गरीयानित्यादि। क्षाराद् गुरोः सकाशादग्निर्गरीयान् गुरुतरः, कुतः पुनः क्षाराद्‌ग्निर्गरीया-नित्याह क्रियासु कर्म्मसु न तु गुणेषु। पुनस्त्रिदोषघ्नच्छेद्यभेद्यलेख्यकरणादिषु क्षारः प्रधानं, एतेन स्वे स्वे कृते द्वयोरपि प्राधान्यमित्युक्तं, यथा यथा दण्डप्रहारित्वेन अर्ज्जुनात् कर्णः,कर्णाद दूरपातित्वेन अर्ज्जुनः प्रधानमिति। व्याख्यात इति कथित इत्यर्थः। प्रतिज्ञातस्य गरीयस्त्वस्य साधकं हेतु-माह; तद्दग्धानामिति। तद्दग्धानां अग्निदग्धानां अपुनर्भवात् इति अपुनर्भावस्तु साध्यानामसम्यग् दग्धानां एतद्विपर्य्ययेत्वग्निदग्धस्यापि पुनरुद्भवः अन्ये त्वन्यथा समादधति, अर्बुदादयोऽग्निना समूलमुन्मूलिता मिथ्याहारादिभिः पुनर्दोषप्रकोपात् तत् स्थान एव अन्ये जायमानास्तद्-दुपालभ्यन्ते। हेत्वन्तरं समुच्चिन्वन्नाह; भेषज क्षारैरिति तत् साध्यत्वादग्नि साध्यत्वादित्यर्थः। अन्ये तु स्वेदशस्त्रक्षारैरिति पठन्ति तत्रायमर्थः भगन्दरार्शआदयः पूर्व्वं स्विद्यन्ते पश्चात्तेषु शस्त्रमवचार्य्यते अथवा स्वेदग्रहणं भेषजोपलक्षणं, भेषजाशक्तौ शस्त्रावचारणं, शस्त्राशक्तौ अशेष व्याधिशमनायक्षारः, क्षाराशक्यऽवगाढ़मूलेष्वाधौ अग्निरिति ॥ १ ॥

अथेमानि दहनोपकरणानि। तद्यथा पिप्पल्यजाशकृद्गोदन्तशरशलाका जाम्बवौष्ठेतरलोहाः क्षौद्रगुड़स्नेहाश्च ॥ २ ॥

तत्र पिप्पल्यजाशकृद्गोदन्तशरशलाकनास्त्वग्गतानां जाम्बवौष्ठेतरलोहानि मांसगतानां क्षौद्रगुड़स्नेहाः सिरास्नायुसन्ध्यस्थिगतानां ॥ ३ ॥

तत्राग्निकर्म्म सर्व्वर्तुषु कुर्य्यादन्यत्र शरद्ग्रीष्माभ्यां। तत्राप्यात्ययिकेऽग्निकर्म्मसाध्ये व्याधौ तत्प्रत्यनीकं विधिं कृत्वा ॥ ४ ॥

अग्न्यवचारणोपकरणानि निदर्शयन्नाह ;—अथेमानि दहेति। शलावर्त्तिः इतरलोहाः ताम्ररजतादयः, तेषां विकाराः लौहाः। क्षौद्रगुड़स्नेहाश्चेति चकारात् सर्ज्जरसमधूच्छिष्टादयः ॥ २ ॥

अन्युपकरणाश्रितयस्य प्रत्येकं विषयं दर्शयन्नाह ;—तत्र पिप्पल्यजाशकृत् गोदन्तेति। तग्गतानामिति वातकफकृतानां सुप्तत्वादिविकाराणां जाम्बवौष्ठेति। मांसगतानां वातकफविकाराणां। क्षौद्रगुड़स्नेहा इति। अत्रापि वातकफसम्भूतानामिति बोध्यव्यं। ननु काश्यपेन मुनिना शिरादिष्वग्निकर्म्म प्रतिसिद्धं, तथा च तद्वचनं "न सिरास्नायुसन्ध्यस्थिमर्म्मस्वपि कथञ्चन। दंशस्योत्कर्तनं कार्य्यं दाहो वा भिषजाऽग्निना" इति। इहतु शिरादिष्वपि अग्निकर्म्मोक्तं इत्यंश्च शास्त्रान्तर विरोधः, तन्न अत्रापि शिरास्नायु सन्ध्यस्थिच्छेदाद् रक्तातिप्रवृत्तौ व्यापत् प्रतीकाराय अग्निकर्म्मोक्तं, न पुनः शिरादिगतरोगोच्छेदनाय। यतो मांसदाहादेव सिरादिरोगोच्छेदो जायत एव तथाच यद् शौनकः। "त्वङ्मांस संश्रितो वायुस्त्वग्दाहेनैव शाम्यति मांसैर्दग्धे हि शाम्यति शिरास्नाय्वस्थि सन्धिजा इति ॥ ३ ॥

तस्यकालं सापवादं निर्दिशन्नाह ;—अत्राग्निकर्म्मेति। अत्राग्निकर्म्म सर्व्वर्त्तुषु कुर्य्यादिति उत्सर्गः अन्यत्र शरत् ग्रीष्माभ्यां इत्यपवादः शरद्ग्रीष्मयोरप्यवस्थायां प्रवृत्तिमाह ;—तत्रेति। तत्रापीति शरद्ग्रीष्मयोरपि आत्ययिके आशुप्राणविनाशके तत्प्रत्यनीकविधिं कृत्वेति तस्याग्निसमानस्य शरत् ग्रीष्माभिधानस्य ऋतोः प्रत्यनीकविधिर्विपरीतविधानं शीताच्छादन-

सर्व्वव्याधिषु ऋतुषु च पिच्छिलमन्नं भुक्तवतः कर्म्म कुर्व्वीत मूढ़गर्भाश्मरीभगन्दरार्शोमुखरोगेष्वभुक्तवतः ॥ ५ ॥

तत्र द्विविधमग्निकर्म्माहुरेके त्वग्दग्धं मांसदग्धञ्च। इह तु सिरास्नायुसन्ध्यस्थिष्वपि न प्रतिषिद्धोऽग्निः ॥ ६ ॥

तत्र शब्दो प्रादुर्भावो दुर्गन्धता त्वक्सङ्कोचश्च त्वग्दग्धे। कपोतवर्णताल्पश्वयथुवेदना शुष्कसङ्कुचितव्रणताच मांसदग्धे। कृष्णोन्नतव्रणतास्रावसन्निरोधश्च शिरास्नायुदग्धे। रूक्षारुणता कर्कशस्थिरव्रणता च सन्ध्यस्थिदग्धे। तत्र शिरोरोगाधिमन्थयो भ्रूललाटशङ्खप्रदेशेषु दहेत्। वर्त्मरोगेष्वार्द्रालक्तकप्रतिच्छन्नां दृष्टिं कृत्वा वर्त्मरोमकूपान् दहेत्। त्वङ्मांससिरास्नायुसन्ध्यस्थिस्थिते-

भोजनप्रदेहादिकं कृत्वा अग्निकर्म्म कुर्य्यादित्यनुवर्त्तते। अत्र पाठे केचिद् विधिशब्दं न पठन्ति ॥ ४ ॥

सर्व्वाग्नि कर्म्माङ्गविधिमाह;—सर्व्वव्याधिष्विति। अत्राप्यग्निकर्म्म-कुर्य्यादिति प्रत्येकं सम्बध्यते, पिच्छिलमन्नं पिच्छिलवीर्य्यमन्नं शीतमृदु-पिच्छिलानां वीर्य्याणां पित्तघ्नत्वात्। तत्र प्रदेशेषु भोजनस्य प्रतिषेधमाह;—मूढ़गर्भाश्मरीति। एषु भोजनेकृते ऊर्द्ध्वाधोवेगाभ्यां कर्म्मविघातःस्यात् कचिदुद्गानवकाशत्वात्। केचिदत्र मूढ़गर्भाश्मरीत्यादिपाठं न पठन्ति ॥५॥

अग्निकर्म्मणि मतमेकं दर्शयन्नाह;—एतद्द्विविधमिति। स्वतन्त्रसिद्धान्तं दर्शयन्नाह;—इहतु शिरास्नायुिति। शिरादिष्वपि अग्निकर्म्म कर्त्तव्य-मित्यर्थः; पूर्व्वं व्याख्यातः शिरादिष्वपि अग्निकर्म्मविधिरात्ययिके व्याधा-वेव नान्यत्रेत्यन्ये व्याख्यानयन्ति ॥ ६ ॥

त्वगादिषु कर्म्मणिकृते प्रतिविषयं भेदलक्षणं दर्शयन्नाह;—तत्र शब्द प्रादुर्भावो दुर्गन्धतेति। स्थिरव्रणता कठिनव्रणता। रोगभेदाच्छरीरावयव-विशेषेषु अग्न्यवचारणं दर्शयन्नाह;—तत्रेति। अधिमन्थोऽक्षिरोगोऽभि-ष्यन्दपूर्व्वकः। भ्रुवौ अक्षिकूटोपरि रोमराजी। शङ्खौ भ्रूकर्णयोर्मध्यं।

ऽत्युग्ररुजे वायावुच्छ्रितकठिनसुप्तमांसे व्रणे ग्रन्थ्यर्शोऽर्बुदभगन्दरा-पचीश्लीपदचर्म्मकीलतिलकालकान्त्रवृद्धिसन्धिसिराच्छेदनादिषु ना-डीशोणितातिप्रवृत्तिषु चाग्निकर्म्म कुर्य्यात्॥ ७॥

तत्र रोगाधिष्ठानभेदादग्निकर्म्म चतुर्द्धा भिद्यते। तद्यथा, वलयबिन्दुरेखा प्रतिसारणानीति दहनविशेषाः॥ ८॥

भवति चात्र।

रोगस्य संस्थानमतो विदित्वा नरस्य मर्म्माणि बलाबलञ्च।
व्याधिं तथर्त्तुञ्च समीक्ष्य सम्यक् ततो व्यवस्येद्भिषगित्यर्थः॥९॥

वर्त्मदेशे यथाग्न्यवचारणं तथा दर्शयन्नाह;—वर्त्मरोगष्वार्द्रलक्तकेति। दहेदित्यनुवर्त्तते वर्त्मनेत्रावच्छादनं, आर्द्रालक्तकं आर्द्रकर्पटः। शेषविषय-मवस्थाभेदान् दर्शयन्नाह;—त्वङ्मांसेति। अत्युग्ररुजि वायावत्युग्रशूले वायौ। उच्छ्रितकठिनसुप्तमांसे व्रण इति उच्छ्रितं उत्सेधवत् सुप्तमचेतनं, नाडीति व्रणविशेषः॥ ७॥

प्रणिधानाकारविशेषमाह;—तत्र वलय बिन्दुविलेखेति। व्याधिमूले वलयमिव वलयं, शलाकयानिर्म्मितः बिन्दुरिवबिन्दुः तिर्य्यगृजुवक्रा विविधा लेखा तप्तशलाका प्रभृतिभिरवघर्षणं प्रतिसारणविशेषा इति आश्रयव्याधि-वशेनाकृतिभेदाः तत्र वलयेत्यादि पाठस्य आदौ केचिद् रोगाकृतिमवे-क्ष्येति पठन्ति सच निबन्धकारैर्नपठितः कुतः तस्यार्थस्याग्रिमश्लोकेनैवो-क्तत्वात्॥ ८॥

वलयादि दहनविशेषाणां आद्यशिरारम्भके हेतुपरिहार्य्याणि च दर्शयितु-माह;—रोगस्य संस्थानमिति। रोगस्य ग्रन्थ्यादेः संस्थानं आयताद्या-कारं। एतेन वलयाद्यारम्भ हेतुः कथितः। परिहार्य्याणि च कथयन्नाह; नरस्य मर्म्माणीत्यादि। बलाबलमिति आतुरस्येति शेषः। बलवति आतुरे कर्म्माधिकारः, अबलवति परिहारः, व्याधिं वातकफात्मकं तत्राग्निकर्म्माधि-कारः, परिहारस्तु रक्तपित्तादौ। ऋतुर्मात हेमन्तादि प्रवृत्तिविषयं। अप्रवृत्तिस्तु शरद्ग्रीष्मयोः। अवेक्ष्य सम्यगिति अत्र एकस्मिन्नेव श्लोके एकार्थे

तत्र सम्यग्दग्धे मधुसर्पिर्भ्यामभ्यङ्गः ।

अथेमानग्निना परिहरेत्, पित्तप्रकृतिमन्तःशोणितं भिन्न-कोष्ठमनुद्धृतशल्यं दुर्बलं बालं वृद्धं भीरुमनेकव्रणपीडितमस्वेद्यांश्चेति ॥ १० ॥

अत ऊर्द्ध्वमितरथा दग्धलक्षणं वक्ष्यामः । तत्र स्निग्धं रूक्षं वा श्रित्य द्रव्यमग्निर्दहति । अग्निसन्तप्तो हि स्नेहः सूक्ष्मसिरानुसारित्वात्त्वगादीननुप्रविश्याशु दहति । तस्मात् स्नेहदग्धेऽधिका रुजो भवन्ति ॥ ११ ॥

तत्र प्लुष्टं दुर्दग्धं सम्यग्दग्धमतिदग्धञ्चेति चतुर्विध-मग्निदग्धम् । तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत्प्लुष्टम् ।

शब्दद्वयकरणं प्रवृत्तिनिवृत्तिविषयोरुभयोरपि अवेक्षणे यत्र कार्य्यं इति प्रतिपादनार्थं, अध्यवस्येत् कुर्य्यादित्यर्थः । प्रथमस्य अवेक्ष्येत्येतस्य स्थाने विदित्वेति केचित् पठन्ति, विदित्वा ज्ञात्वा ॥ ९ ॥

इदानीं सम्यग्दग्धं चिकित्सयन्नाह । तत्र सम्यग्दग्धे इति । अग्नि-कर्म्मेत रक्तपित्तयोः प्रसादाय वेदनोपशमाय च अग्निनिवृत्तिविषयं दर्शय-न्नाह अथेमानग्निनेति । अन्तःशोणितं भिन्नकोष्ठमिति इत्थम्भूतस्य पुरुषस्य शोणितनिरोधेन दाहपाकादिसम्भवात् अनेकव्रणपीड़ितमित्यस्य स्थाने केचित् अनेकव्याधिपरिपीड़ितमिति पठन्ति । अस्वेद्याः पाण्डुमेहीरक्त-पित्तोदरार्त्त इत्यादयः ॥ १० ॥

वलयादिप्रकारात् प्रकारान्तरेणाग्निदग्धलक्षणं वक्तुमाह । अत ऊर्द्ध्व इतरथेति । प्रकारान्तरेण विद्यादिति प्रमादाद्दग्धम् । द्रव्यं स्निग्धं सर्पिरादि ; रूक्षं द्रव्यं काष्ठपाषाणलोष्टादि । तत्राग्निदग्धं वैद्यदोषात् प्रमादाद्वा ॥ ११ ॥

चतुर्व्विधं दर्शयन्नाह । तत्र प्लुष्टं दुर्दग्धमिति । प्लुष्टदुर्द्दग्धयो-र्द्दग्धत्वेऽपि पृथक्करणं लक्षणचिकित्साभेदात् ; तत्र प्लुष्टमित्यादि ।

यत्नोत्तिष्ठन्ति स्फोटास्तीव्राश्चोषदाहरागपाकवेदनाश्चिराच्चो-पशाम्यन्ति तद्दुर्द्दग्धम्। सम्यग्दग्धमनवगाढं तालफलवर्णं सुसंस्थितं पूर्वलक्षणयुक्तञ्च। अतिदग्धे मांसावलम्बनं गात्रविश्लेषः सिरास्नायुसन्ध्यस्थिव्यापादनमतिमात्रं ज्वरदाह-पिपासामूर्च्छाश्चोपद्रवा भवन्ति व्रणश्चास्य चिरेण रोहति

गणनयैव चतुःसंख्या लब्धा पुनश्चतुर्व्विधमितिकरणं प्लुष्टदुर्दग्धाभ्यां भेदाभ्यां होमद्रव्यस्य त्रिप्रकार दाहशङ्का निरासार्थं, एषां लक्षणमाह। तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रमिति। तत्र तेषु मध्ये विवर्णं प्राकृतवर्णा-दन्यवर्णं प्लुष्यतेऽतिमात्रं अत्यर्थं दह्यते न च स्फोटोत्पत्तिः स्यात्। अन्येतु अत्र प्लुष्टमतिमात्रे विवर्णं यत् प्लुष्यते इति पठन्ति व्याख्यानयन्ति च अतिमात्रं विवर्णं यत् प्लुष्यते इति। अग्नितापेन उच्छिन्न इव भवति विवर्ण-मत्र पाण्डुवर्णम्। यत्नोत्तिष्ठन्तीति। चोष अन्तःस्थित इव वेदनाविशेषः दाहो भस्मसाद्भवतीव, रागो रक्तता, वेदना चोषादयः। सम्यक्दग्धमनवगाढ़-मिति। अनवगाढ़मतिदग्धलक्षणरहितं, तालवर्णं पक्कतालफलवर्णमित्यर्थः। पक्कतालवर्णमित्येके पठन्ति। अपरेतु तालपक्कफलवर्णं सुसंस्थितं अत्यु-न्नतावनतादिदोषवर्ज्जितं पूर्व्वलक्षणयुक्तञ्चेति, त्वंमांससिरास्नायु सन्ध्य-स्थिदाहलिङ्गयुक्तम्। अतिदग्धं मांसावलम्बनमिति। गात्रविश्लेषो विघ-टनं, व्यापादनं हिंसनं। अतिमात्रशब्दो ज्वरादिभिः सह प्रत्येकं संवध्यते। मूर्च्छाश्चेति चकारात् शोणितस्रावादयश्च। तदेतच्चतुर्व्विध-मस्नोति। प्लुष्टादिभेदेन चतुर्व्विधमपि अग्निकर्म्मवैद्यस्य यदात्मकर्म्म चिकित्सारूपं तस्य प्रसाधकं भवतीत्यर्थः। ननु सम्यक्दग्धलक्षणमेव वैद्यस्यात्मकर्म्मप्रसाधकं भवति न पुनः प्लुष्टदुर्दग्धातिदग्धलक्षणं, सत्यं सम्यक्दग्धलक्षणं वैद्यकर्म्मप्रसाधकं उपादेयत्वेन प्लुष्टदुर्द्दग्धातिदग्धलक्षणं परि-हार्य्यत्वेन इति न दोषः; अन्ये चान्यथा पठन्ति तदेतच्चतुर्व्विधमग्निदग्ध-लक्षणं पूर्व्वोक्तकर्म्मप्रसाधकं भवति। पूर्व्वोक्तं त्वंमांसाश्रितं यदग्नि-कर्म्म तद्व्रणप्रसाधकं भवति। अथवा पूर्व्वोक्तेषु अग्निसाध्येषु शिरो-

रूढ़श्च विवर्णो भवति ॥ तदेतच्चतुर्विधमग्निदग्धलक्षण-
मात्मकर्मप्रसाधकं भवति ॥ १२ ॥

भवन्ति चात्र ।

अग्निना कोपितं रक्तं भृशं जन्तोः प्रकुप्यति ।
ततस्तेनैव वेगेन पित्तमस्याप्युदीर्य्यते ॥
तुल्यवीर्य्ये उभे ह्येते रसतो द्रव्यतस्तथा ।
तेनास्य वेदनास्तीव्राः प्रकृत्या च विदह्यते ॥
स्फोटाः शीघ्रं प्रजायन्ते ज्वरस्तृष्णा च वर्द्धते ॥ १३ ॥

रोगाधीमन्यादिषु यदग्निकर्म्म तत्प्रसाधकं हेयोपादेयरूपतया, अपरेतु तदेतच्चतुर्व्विधमग्निदग्धलक्षणं पूर्व्वोक्तकर्म्मप्रसाधनं भवतीति चकारं पठन्ति व्याख्यापनञ्च तेषां मते यदेतच्चतुर्व्विधमग्निकर्म्म तत् कथं चिकित्सनीय-मित्याह । पूर्व्वोक्तकर्म्मप्रसाधकं पूर्व्वो प्रतिपादितया क्रियया तत्प्रतीकारं तच्चिकित्सितमित्यर्थः । पूर्व्वप्रतिपादितक्रिया तु सम्यग्दग्धे मधुसर्पिर्भ्याम-भ्यङ्ग इत्यादि चकारात् वक्ष्यमाणापराग्निप्लुष्टप्रतापनादि कर्म्मप्रसाध-कमितिज्ञेयं ॥ १२ ॥

इदानीं सर्व्वाग्निदग्धेषु चिकित्सार्थं विशिष्टप्लुष्टदोषयोर्दुष्टिं दर्शयन्नाह । अग्निना कुपितं रक्तमिति । ततस्तदनन्तरं तेनैवाग्निना रक्तेन चेत्यर्थः, कुतः पुनः प्राधान्येनाग्निदग्धो पित्तमेवोदीर्य्येत इत्याह,— तुल्यवीर्य्ये उभे ह्येते हि तस्मात् कारणात् एतेद्वे अपि अग्निपित्ते तुल्य-वीर्य्ये उष्णवीर्य्ये रसतो रसात् द्वे अपि कटुके द्रव्यतो द्रव्यादपि तुल्ये-तथाहि सदृश एवाधारो वह्नेः पित्तस्यापि । द्रव्यं चात्रसाध्याधार उच्यते ततः कारणात् तेनाग्निना अस्य पित्तस्य कोपितस्य वेदनादाहादिकाभव-न्तीति वाक्यशेषः । प्रकृत्या च विदह्यत इति प्रकृत्या स्वभावेन विदह्यते विदाहमुपयाति, ताभ्यामेव रक्तपित्ताभ्यां स्फोटाज्वरादयश्च शीघ्रं प्रजा-यन्ते इति अन्ये तु उभे इत्यत्र रक्तपित्ते इति व्याख्यानयन्ति । उष्ण-

दग्धस्योपशमार्थाय चिकित्सा सम्प्रचक्षते ।
प्लुष्टस्याग्निप्रतपनं कार्य्यमुष्णं तथौषधम् ।
शरीरे खिन्नभूयिष्ठे खिन्नं भवति शोणितम् ।
प्रकृत्या ह्युदकं शीतं स्कन्दयत्यतिशोणितम् ।
तस्मात्सुखयति ह्युष्णं न तु शीतं कथञ्चन ॥ १४ ॥
शीतमुष्णाञ्च दुर्दग्धे क्रियां कुर्य्याद्भिषक्पुनः ।
घृतालेपनसेकांस्तु शीतानेवास्य कारयेत् ॥ १५ ॥

वीर्य्यत्वञ्च मधुररसस्यापि रक्तपित्तस्य यान्त्रिकेक्षुरसवद्विदाहित्वात् । द्रव्यत इति । एते द्वे अपि रक्तपित्ते द्रव्यादपि तुल्ये । द्रव्यशब्देनात्र हेत्वाधारौ कथ्यते तद्यथा रक्तपित्तयोर्द्वयोरपि तेजोहेतुः आधारश्च द्वयोरपि तेज एवेति ॥ १२ ॥

दग्धस्योपशमार्थायेति । अग्निप्रतापनं स्वेदनं उष्णमौषधमिति । आलेपनान्नपानादिकं, कुतः कारणादत्र शरीरमुपचर्य्यते अग्निकोपितं रक्तपित्तं ? आह,—शरीरे खिन्नभूयिष्ठ इति । खिन्नभूयिष्ठे अत्यर्थं खिन्ने, स्वल्पमपि रक्तं यदि अखिन्नं भवति तदारक्तपित्तोपशमनेन शीतोपचारेण दुःखमुत्पादयतीति दर्शयन्नाह—प्रकृत्याह्युदकमिति । स्कन्दयत्यति शोणितमिति रक्तमत्यर्थं स्त्यानतां नयतीत्यर्थः ; स्त्यानेन रक्तेन च रुद्धमार्गो वायुः उष्मापि अनिर्गच्छन् प्लुष्टे शूलशोफरागादिकां वेदनां करोत्यतः शीतक्रिया न सुखं करोति ; उष्णक्रिया पुनः रक्तविलयनकरी भवति, अतः उष्मनिःसरणवातानुलोमहेतुः स्यादिति सुखयति ॥ १४ ॥

दुर्दग्धक्रियां निर्दिशन्नाह—शीतमुष्णञ्च दुर्दग्धे इति । दुर्दग्धे अवगाढ़मूलदग्धभावस्य खिन्नरक्तस्य निर्वापणार्थं शीतं क्रियां कुर्य्यात्, अनवगाढमूलदग्धभावस्य खिन्नरक्तस्य विलयनार्थमुष्णां क्रियां कुर्य्यात् ; अन्येतु शीतां दाहातिशये, नातिदाहे उष्णामिति । पुनः किं कुर्य्यादित्याह घृतालेपनादीनपि शीतानेवकारयेदित्येवं सुखीभवति व्रणरोहणञ्च ॥ १५ ॥

सम्यग्दग्धे तुगाक्षीरी प्लक्षचन्दनगैरिकैः ।
सामृतैः सर्पिषा स्निग्धैरालेपं कारयेद्भिषक् ।
ग्राम्यानूपौदकैश्चैनं पिष्टैर्मांसैः प्रलेपयेत् ।
पित्तविद्रधिवच्चैनं सन्ततोष्माणमाचरेत् ॥ १६ ॥
अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलाम् ।
क्रियां कुर्य्याद्भिषक्पश्चाच्छालितण्डुलकण्डनैः ॥
तिन्दुकी त्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत् ।
व्रणं गुडूचीपत्रैर्वा छादयेदथवौदकैः ॥
क्रियाञ्च निखिलां कुर्य्याद्भिषक्पित्तविसर्पवत् ॥१७॥

सम्यग्दग्धे चिकित्सामाह—सम्यग्दग्धे 'तुगाक्षीरीति तुगाक्षीरी वंशलोचना, अन्ये तु वंशरोचनानुकारिपार्थिवद्रव्यम् । प्लक्षः पर्कटी, चन्दनं रक्तचन्दनं, सामृतैरिति गुडूचीसहितैः, एतैस्तुगाक्षीर्य्यादिद्रव्यैर्घृतस्निग्धीकृतैः पित्तप्रत्यनीकमविशेषिणं लेपं सम्यग्दग्धे कारयेदित्यर्थः । वातशान्त्यर्थं प्रलेपमाह ग्राम्यानूपौदकैरिति । ग्राम्याः अश्वादयः, आनूपा वराहमहिषादयः, औदकाः कूर्म्मादयः । पित्तविद्रधिवदिति—एनं सम्यक्दग्धं, सन्ततोष्माणं बलवत्तरोष्माणम् ॥ १६ ॥

अतिदग्धे चिकित्सामाह—अतिदग्धे विशीर्णानीति । विशीर्णानि अवलम्बितानि, पश्चाच्छालितण्डुलकण्डनैरिति शालितण्डुलकण्डनोद्भवैः गुड़पैः कणैरित्यर्थः । कणैश्च चूर्णप्रयोगकाले अवचूर्णयेदित्यध्याहारः । तिन्दीकीत्वक्कपालैर्व्वेति तिन्दीकीवल्कलखर्परैः तिन्दीकत्वचा तिन्दीकवल्कलेन कपालैः मृत्खर्परैरित्यन्ये ; तिन्दुकीत्वक् कषायैर्व्वेति केचित् पठन्ति तिन्दुक्या या त्वक् तया प्रलेपयेत् । कषाया कषायद्रव्याश्रये तैरपीत्यर्थः ; अन्ये तु कषायशब्देन चूर्णमाहुः तत्र तिन्दुकीवल्कलचूर्णैरित्यर्थः औदकै पद्मोत्पलादिपत्रैः, पित्तरक्तोपद्रुतोव्रणः गुडूच्यादिपत्रच्छादनेन उष्माणं त्यक्त्वा सुखं संरोहति ॥ १७ ॥

मधूच्छिष्टं समधुकं रोध्रं सर्जरसं तथा।
मञ्जिष्ठां चन्दनं मूर्वां पिष्ट्वा सर्पिर्विपाचयेत्।
सर्वेषामग्निदग्धानामेतद्रोपणमुत्तमं ॥ १८ ॥
स्नेहदग्धे क्रियां रूक्षां विशेषेणावचारयेत् ॥ १९ ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि धूमोपहतलक्षणम्।
श्वसिति क्षौति चात्यर्थमत्याधमति कासते।
चक्षुषोः परिदाहश्च रागश्चैवोपजायते॥
सधूमकं निःश्वसिति घ्रेयमन्यन्न वेत्ति च।
तथैव च रसान् सर्वान् श्रुतिश्चास्योपहन्यते॥
तृष्णादाहज्वरयुतः सीदत्यथ च मूर्च्छति।
धूमोपहत इत्येवम् ॥ २० ॥

सर्व्वेष्वग्निदग्धेषु रोपणार्थं चिकित्सां दर्शयन्नाह—मधुच्छिष्टं समधुकमिति। इदं च सामान्यं रोपणं घृतं केचित् पठन्ति न तु निबन्धकारा इति। सूपयोगित्वात्तथापि लिखितम् ॥ १८ ॥

स्नेहदग्धे चिकित्सामाह—स्नेहदग्धे क्रियामिति। रूक्षदग्धे पुनरनुक्तामपि स्निग्धां क्रियां, स्नेहदग्धे पुनरनुक्तामपि रूक्षां क्रियामवचारयेत्॥१९॥

इदानीं कण्ठनासादिषु कर्म्मणि कृते धूमोपघातलक्षणं चिकित्सां च दर्शयन्नाह—अतऊर्द्ध्वं प्रवक्ष्याम इति। श्वसिति श्वासं करोति, क्षौति चात्यर्थमिति अतिशयेन हिक्कति। आधमति आध्मानयुक्तोभवति रागः पीतलोहितता अक्ष्णोः। घ्रेयमन्यन्न वेत्ति चेति नासागतदोषेण धूमादन्यत् घ्रेयं न वेत्ति, अन्यत्स्पृश्यं दृश्यं च न वेत्ति इत्यन्ये, रसान् सर्व्वानित्यत्र न वेत्तीति सम्बध्यते, श्रुतिश्चास्योपहन्यत इति न शृणोतीत्यर्थः श्रोत्रगतदोषेण; तृष्णादाहज्वरयुत इति सर्व्वदोषेण, सीदति क्रियासु असमर्थो भवतीत्यर्थः ॥ २० ॥

प्लुष्टस्य चिकित्सितम् ॥
सर्पिरिक्षुरसं द्राक्षां पयो वा शर्कराम्बु वा।
मधुराम्लौ रसौ वापि वामनाय प्रदापयेत॥
वमनः कोष्ठशुद्धिः स्याद्धूमगन्धश्च नश्यति।
विधिनानेन शाम्यन्ति मदनक्षवथुज्वराः॥
दाहमूर्च्छाटोपदाहध्मानश्वासकासश्च दारुणाः।
मधुरैर्लवणाम्लैश्च कटुकैः कवलग्रहैः॥
सम्यगव्यक्तातीन्द्रियार्थान् मनश्चास्य प्रसीदति।
शिरोविरेचनं तस्मै दद्याद्दूयोगेन शास्त्रवित्॥
दृष्टिर्विशुध्यते चास्य शिरोग्रीवञ्च देहिनः।
अविदाहि लघुस्निग्धमाहारं चास्य कल्पयेत्॥ २१॥
उष्णवातातपैर्दग्धे शीतः कार्यो विधिः सदा।
शीतवर्षानिलैर्दग्ध उष्णः स्निग्धश्च शस्यते।

प्लुष्टस्य चिकित्सितमिति। सर्पिरिक्षुरसमित्येको योगः, द्राक्षापयो-वेति द्वितीयः, शर्कराम्बुवेति तृतीयः, मधुराम्लौ रसौ चापीति चतुर्थः, मदनमङ्गलानिः, योगेन मतया॥ २१॥

इदानीं दग्धचिकित्साप्रसङ्गेन दग्धसदृशस्य चिकित्सां दर्शयन्नाह। उष्णवातातपैर्दग्धेति। उष्णवातः ग्रैष्मिकः शारदो वा, उष्णवातेन आतपेन च दग्धइवदग्धः उष्णवातातपाभ्यामिति द्विवचनेप्राप्ते बहुवचनमनुक्तोष्ण-प्रापणार्थं, सदास्थाने केचिद्व्रणे इति पठन्ति व्रणे इति त्वगादिव्रणवस्तुनि। शीतवर्षानिलैर्दग्धेति। शीतं हिमं, हिमदग्धस्तुषारदग्ध इति, लोकोक्त्या हिमदग्धेऽपि दाहसादृश्यमस्ति, वर्षानिल इति वृष्टिसंयुक्तोवातः। अत्रापि बहुवचनमनुक्तशीतप्रापणार्थं, दग्धस्थाने केचित् हतमिति पठन्ति। तथातितेजसा दग्धेति। अतितेजसा वज्राग्निना, तथातितेजसादग्धे न

तदातितेजसा दग्धे सिद्धिर्नास्ति कथञ्चन ॥
इन्द्रवज्राग्निदग्धेऽपि जीवति प्रतिकारयेत्।
स्नेहाभ्यङ्गपरिषेकैः प्रदेहैश्च तथा भिषक् ॥ २२ ॥

सिध्यति कथञ्चनेति यदुक्तं तत्किञ्चिद्दग्धे सिद्धिरपि भवतीति ज्ञापनार्थं तत्र च पूर्व्वोक्तेनविधिना शीतोष्णादीना प्रतिकर्त्तव्यमिति, अस्याग्रे केचित् इन्द्रवज्राग्निदग्धेऽपि जीवति प्रतिकारयेत् स्नेहाभ्यङ्ग परिषेकैः प्रदेहैश्च तथा भिषक् इति पठन्ति तच्च निबन्धकारा न पठन्ति ॥ २२ ॥

इति सूत्रस्थाने निबन्धसंग्रहे द्वादशोऽध्यायः।

त्रयोदशोऽध्यायः।

—0—

नमधन्वन्तरये।

अथातोजलौकावचारणीयमध्यायं व्याख्यास्यामः।

नृपाढ्यबालस्थविरभीरुदुर्बलनारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफदुष्टशोणितं यथासंख्यं शृङ्गजलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्वाणि सर्व्वैर्वा ॥१॥

अथातो जलौकावचारणीयमध्यायं व्याख्यास्यामः।

जलौकसां विषयं निर्द्दिशन्नाह नृपाढ्यबालेति।

अनुग्रहार्थमिति उपकारार्थं। परमसुकुमारोऽयमिति, प्रधानमृदुरित्यर्थः; शृङ्गालाबुसुकुमारोपायौ जलौकसस्तुपरमः सुकुमारोपायः असुकुमारोपायश्च प्रच्छनं सिराव्यधनं च दोषविशेषेणापि जलौकसां तत् प्रसङ्गेनागतस्य शृङ्गस्य अलाब्वोश्च विषयं दर्शयितुमाह।

भवन्ति चात्र।

उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम्।
तस्माद्वातोपसृष्टे तु हितं तदवसेचने॥
शीताधिवासा मधुरा जलौका वारिसम्भवा।
तस्मात्पित्तोपसृष्टे तु हिता सात्ववसेचने॥
अलावु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम्।
तस्मात् श्लेष्मोपसृष्टे तु हितं तदवसेचने॥
तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन शृङ्गेन शोणितमव-
सेचयेदाचूषणात्। सान्तर्दीपयाऽलाब्वा॥ २॥

तत्रवातपित्तकफेति इत्यस्याग्रे केचित् स्निग्धशीतरूक्षत्वादितिहेतुमुदा-
हरन्ति, अमुञ्च निबन्धकारा न पठन्ति। पश्चान्तरं दर्शयन्नाह।
सर्व्वाणि वातपित्तकफदुष्टानि शोणितानि सर्व्वैरितिशृङ्गादिभिर्यथा-
लाभम्। ननु यथासंख्यमित्यभिधाय सर्वाणि सर्व्वैरित्युक्तमनियतं वचनं
स्यादित्यभिप्रायेणाह, विशेषतस्तु विस्राव्यं शृङ्गजलौकालावुभिर्गृह्णीयात्
अतिशयेन विस्रावणार्हं यद्भवति शोणितं अतिप्रबलतया तत्शृङ्गादिभिर्गृ-
ह्णीयान्निर्हरेदित्यर्थः। विशेषतस्त्वित्यादिपाठस्तु कैश्चिदेव निबन्धकारैः कथ-
ञ्चिदेव व्याख्यातो बहुभिस्तु जेज्झटादिभिः परिहृतएव॥ १॥
तत्र वातादिदुष्टे सहेतुशृङ्गाद्यवचारणं दर्शयन्नाह। उष्णं मधुरं स्निग्ध-
मिति समधुरं ईषत् स्निग्धं केचित्स्निग्धं मुष्णमधुरमिति पठन्ति। शीताधि-
वासा शीतगृहा। अलावूकटुकमिति वातादिदोषदुष्टरुधिरास्रावणप्रसङ्गा-
गतयोः शृङ्गालावुकयोरेवावचारणं दर्शयन्नाह।
अत्रप्रश्निते तनुवस्तीति—वस्तिः मूत्राशयः, पटलं वनं, सूत्रं मर्कटीका-
जालकं, तनुशब्द उभयोरपि सम्बध्यते, अन्ये तु तनुवस्त्रपटलावनद्धेनेति
पठन्ति व्याखानयन्ति च। सूक्ष्मवस्त्रावरणापिहितेन।

अत्र जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः । ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषा । तत्र सविषाः कृष्णा कर्बुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तास्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । वर्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्बुरा । रोमशा महापार्श्वा कृष्णमुख्यलगर्दा । इन्द्रा-

सान्तर्दीपया मध्यदीपसहितया शोणितमवसेचयेदिति सम्बन्धः । केचित् अलाब्वावचारण मन्यथा पठन्ति । तथाहि भूर्जपत्रे शणतूणानामित्यादि अयं पाठाभावात् समग्रो न लिखितः । शृङ्गालाबुप्रमाणं भालुकिसकाशादवगन्तव्यं, तथा च तद्वचविषाणं श्वेतगोविन्दु चक्रं समाङ्गुलायतं छिद्रान्तःपिचुपेशिकं योज्यं वातयुतेऽसृजि । अङ्गुष्ठमूलवन्मूले छिद्रमग्रेऽस्य मुद्गवदिति अष्टाङ्गुलपरिणाहा चतुरङ्गुलनालसम्मिता सुमुखी कृष्णमृदालिप्ता तनुःश्रेष्ठा रक्तावसेचनेऽलावुरिति अन्य तु शृङ्गालाबुप्रमाणमत्रैव पठन्ति तथा च वातादिदुष्टरक्तलक्षणञ्च स च पाठोऽस्माभिरभावान्नलिखितः ॥ २ ॥

जलौकसां निरुक्तिमाह । जलमासामायुरिति, आसां जलौकसां जलमायुरिति जलायुकाः कथ्यन्ते इत्यध्याहारः, निरुक्तिपचान्तरमाह । जलमासामोक इति जलौकसः । इदानीं चिकित्सोपयोगिनीं जलौकसां संख्यां निर्देष्टुमाह । ता द्वादशेति तासामेव सविषनिर्विषभेदाद् द्विविधत्वमाह । तासां सविषाः षट् तावत्य एव निर्विषाः । एवशब्दोऽत्र परतन्त्रोक्तसविषाष्टजलौकाशङ्कानिरासार्थं सविषाणां पोषणावचारणनिषेधार्थं प्रमादतस्तावचारितानां स्वयं वा लग्नानां व्यापच्चिकित्सार्थं नाम्नानिर्देशं कुर्वन्नाह । तत्र सविषाःकृष्ण इति । तासामाकृति निर्देष्टुमाह । तास्वञ्जनचूर्णेति अञ्जनं कृज्जलं पृथुशिरा महामस्तकाः । वर्म्मिमत्स्य वदायता छिन्नोन्नतकुक्षिकर्ब्बुरा वर्म्मिमत्स्यः सर्पाकारः अन्ये रोहितमत्स्य-

युधवद्दूर्द्धराजिभिश्चित्रिता इन्द्रायुधा। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूमूर्च्छा ज्वरो दाहश्छर्दिर्मदः सदनमिति लिङ्गानि भवन्ति। तत्र महागदः पानालेपननस्यकर्मादिषु प्रयोज्यः। इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः॥ ३॥

अथ निर्विषाः। कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिका चेति।

माहुः छिन्नोन्नतकुक्षिरिति कचिच्छिन्नकुक्षिः कचिदुन्नतकुक्षिः। रोमशा महापार्श्वा इति रोमशेति वलियुक्तत्वात् रोमावततेव प्रतिभाति। वलियुक्तत्वात् रोमावततेवप्रतिभाति इन्द्रायुधवदूर्द्धेति इन्द्रायुधं शक्रधनुः, चित्रैर्विचित्रिता मण्डितेत्यर्थः। ईषदसित पीतका . विचित्रपुष्पाकृति चेति। विचित्रपुष्पाकृतिचित्रेति नानासंस्थानधवलविन्दु चित्रा। गोवृषणवदिति वृषभाण्डइव अधोभागे द्विप्रकार भूताकृतिः तासां दंशे विषोपद्रवं निर्दिशन्नाह। ताभिर्दष्टे पुरुष इत्याति अतिमात्रशब्दः कण्ड्वादिभिः सह प्रत्येकं सम्बध्यते। मदः पूगफलेनेवमत्तता, सदनं अङ्गग्लानिः, तासां दंशविषचिकित्सां वक्तुमाह। तत्र महागदः पानालेपनेति। नस्तकरणादिष्वित्यादि शब्दात् परिषेकावगाहादिषु योज्याः। इन्द्रायुधादष्टमसाध्यमिति। असाध्यं असाधनार्हं तद्दंशलिङ्गं असाध्यसर्पदष्टविषवेगविज्ञानवद्वेदितव्यं अन्येतु श्वयथ्वादीनां सम्पूर्णलिङ्गत्वात् अरिष्टाद्युपपत्तेर्महागदावचारणेनापि अनुपशान्ते स्तल्लिङ्गज्ञानमित्याहुः॥ ३॥

एताः सविषा सन्तीति उपादानार्थं निर्व्विषाणां नामानि निर्दिशन्नाह, अथ निर्विषाइति पिङ्गला कपिला, आशुगा शीघ्रगामिनी, यकृद्वर्णा

तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्ध-मुद्गवर्णा कपिला। किञ्चिद्रक्ताष्टत्तकाया पिङ्गाशुगाच पिङ्गला। यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखीशङ्कुमुखी। मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका। मुद्गवर्णा पुण्ड-रीकतुल्यवक्त्रा पुण्डरीकमुखी। स्निग्धा पद्मपत्रवर्णाष्टादशा-ङ्गुलप्रमाणा सावरिका सा च पश्वर्थे। इत्येता अविषा व्याख्याताः। तासां यवनपाण्ड्यसह्यपौतनादीनि चेत्राणि। तेषु महाशरीरा बलवत्यः शीघ्रपायिन्योमहाशना निर्विषाश्च विशेषेण भवन्ति। तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथ-जाताः कलुषेष्वम्भःसु च सविषाः। पद्मोत्पलनलिनकुमुदसौ-गन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्वम्भःसु च निर्विषाः॥ ४॥

नीललोहितवर्णा; मूषिकाकृतिवर्णेति मूषिकाकृतिर्मूषिकवर्णाचत्यर्थः। मुद्गवर्णेति, पुण्डरीकतुल्यवक्त्रेति पद्मवद्विस्तीर्णमुखी स्निग्धपद्मपत्रेति। सावरिकाया विषमाह। सा च पश्वर्थे इति हस्त्यश्वादीनामर्थे, न पुनर्मनु-ष्याणां; द्रव्यमाख्याय निर्विषाणां प्रशस्तानि चेत्राण्याह। तासां यवन-पाण्ड्येति॥ यवनस्तुरस्कदेशः, पाण्ड्यो दक्षिणदिग्विभागे योदेशः। "काम्बोजाद्दक्षभागे तु इन्द्रप्रस्थाच्चपश्चिमे। पाण्ड्यदेशमहेशानि महा-शूरत्वकारक" इति शक्तिसङ्गमतन्त्रे सप्तमः पटलः। सह्यो नर्म्मदायाः पारे पर्वतविशेषः, पौतनो मथुराप्रदेशः, यवनादिक्षेत्रेषु काट्यो जलौका भवतीत्याह। तेषु महाशरीरा इति केचिद्यवनादीनि क्षेत्राणि नपठन्ति। कुतः सविषाणां सविषकीटादिकोथक्षेत्रत्वान्निर्व्विषाणान्तु पद्मोत्पला-दिकोथस्य क्षेत्रत्वादयुक्तं, यवनादिक्षेत्रकथनमिति वदन्ति। इदानीं सविष-निर्विषकोथकलुषजलोत्पन्नानां जलौकसां सविषनिर्व्विषत्वं दर्शयन्नाह।

भवति चात्र ।

क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु ।
न च सङ्कीर्णचारिण्यो न च पङ्केशयाः सुखाः ॥ ५ ॥

तासां ग्रहणमार्द्रचर्मणान्यैर्वा प्रयोगैर्ह्रौयाग्रत् । अथैनां नवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात् । भक्ष्यार्थं चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य शय्यार्थं तृणमौदकानि च पत्राणि । त्र्यहात्त्र्यहाच्चान्यज्जलं भक्ष्यञ्च दद्यात्, सप्तरात्रात्, सप्तरात्राच्च घटमन्यं संक्रामयेत् ॥ ६ ॥

तत्र सविषाः मत्स्यकीटेति । कोथः पूतिभावः, कलुषेषु मलिनेषु । पद्मोत्पलनलिनेति । पद्मं ईषत्शुक्लं उत्पलं ईषन्नीलं नलीनमीषद्रक्तं कुमुदं कुईंश्रा इति लोके, सौगन्धिकं गर्दभपुष्पाभिधानमत्यन्तसुरभिचन्द्रोदयविकाशो कुवलयो रक्तोत्पलं पुण्डरीकमितिश्वेतपद्मं शैवलं शैवालं, कोथ जाता इति एषां पूतिभावजाताः ॥ ४ ॥
इदानीं क्षेत्रसंग्रहश्लोकमाह । क्षेत्रेषु विचरन्त्येता इति । एता इति पूर्व्वोक्ता निर्व्विषा जलौकाः सुगन्धिषु शोभनगन्धिषु न च सङ्कीर्णचारिण्य इति न विषादिविरुद्धाहारभुजः शैवलाद्यशनत्वात् न च पङ्के स्वपन्ति तृणोदकपत्रशयनत्वात् । सुखा इति सुखहेतुत्वात् सुखकारिण्य इत्यर्थः ॥ ५ ॥
तासां ग्रहणोपायदर्शयन्नाह । तासां ग्रहणमार्द्रचर्म्मणेति ग्रहणञ्चासां शरत्काले तन्त्रान्तरवचनात् । अन्यैर्वा प्रयोगैरिति । सद्योहतजन्तु मांसपेशीनवनीतघृतक्षीराद्यं भक्तजं घटावयवैर्वा पोषणं दर्शयन्नाह । अथैनां नवे महति चेति आवाप्यप्रक्षिप्य निदध्यात् स्थापयेत् । वल्लूरं शुष्कमांसं संक्रामयेत् सञ्चारयेत् ॥ ६ ॥

भवति चात्र।

स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः।
अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः॥ ७॥

अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात्। गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रोः सलिलसरकमध्ये मुहूर्त्तं स्थिता विगतक्लमा ज्ञात्वा ताभी रोगं ग्राहयेत्। सूक्ष्मशुक्लार्द्रपिचुप्रोतावच्छन्नां कृत्वा मुखमपावृणुयाद्गृह्णन्त्यै क्षीरविन्दुं शोणितविन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदान्यां ग्राहयेत्। यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृह्णातीति गृह्णन्तीं

तास्वयोग्यानि दर्शयन्नाह। स्थूलमध्येति, परिक्लिष्टा अन्योन्यदर्शनाः पृथ्व्यो विस्तीर्णाः मन्दविचेष्टिताः मन्दगामिन्यः न पूजिता न श्लाघिताः॥७॥

तासामवचारणमुद्दिशन्नाह। अथजलौकोऽवसेकेति। संवेश्येति शाययित्वा अरुजं अव्रणं व्रणे तु गन्धक्लेदाभ्यामेव गृह्णन्ति अथवारुजावतिविरूक्षणेन रुजातिवृद्धिः। सलिलसरकं जलपात्रं केचित् सलिलसरकस्थाने सरकमध्येवारिण्य इति पठन्ति सरकं जलपूर्णपात्रं रोगमत्र रोगाधिष्ठानं दोषाधिष्ठानं वा। सूक्ष्मशुक्लार्द्रपिचुरिति। पिचुस्थूलं वीजहीनः कार्पासः प्रोतं वस्त्रं अप्रावृणुयाच्छादयेत्, शस्त्रपदानिवा कुर्व्वीतेति। रोगाधिष्ठाने तासां ग्रहणलक्षणमाह। यदा निविशते इति। निविशते लगतीत्यर्थः गृह्णाति विध्यतीत्यर्थः। गृह्णतीं चार्द्रवस्त्रावेति गृह्णन्तीमिति शोणितमाददानामित्यर्थः। आर्द्रवस्त्रावच्छन्नामिति इत्थं सुखिता शीघ्रं रक्तं पिबति, जलौकास्तु आत्मप्रभावेण तत्प्रागदुष्टमामरक्तं पिबन्ति यथा दुग्धमिश्रितोदकात् हंसोदुग्धमेव पिबतीत्यर्थः। तासां विशुद्धरक्तादावे

चार्द्रवस्त्राच्छन्नां धारयेत्सेचयेच्च। दंशे तोदकण्डूप्रादुर्भावैर्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत्। अथ शोणितगन्धेन न मुञ्चेन्मुखमस्याः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैललवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलीभ्यां शनैः शनैरनुलोममनुमार्जयेदामुखाद्वामयेत्तावद्यावत्सम्यग्वान्तलिङ्गानीति। सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा तां पुनः सम्यग्वामयेत्। दुर्वान्ताया व्याधिरसाध्य इन्द्रमदो

विज्ञानोपायं दर्शयन्नाह। तोदकण्डुप्रादुर्भावैरिति तोदोव्यथा सधातुक्षयोत्पन्नेन वायुना नतुशुद्धरक्तक्षयात्, श्लेष्मकार्य्यं कण्डुरिहनस्यात् इति केचित् कण्डूग्रहणं न कुर्व्वन्ति अन्ये तु वदन्ति आग्नेयरक्तधातुक्षयात् कफधातोः सौम्यस्य जलौकामुखक्लेदवर्द्धितस्य हद्धेः कण्डुसम्भव इति अन्ये तु दंशतोदकण्डुप्रादुर्भावैरिति पठन्ति व्याख्यानयन्ति च दंशोवनमक्षिकादंशेन कृतो यास्तोदः अन्यथा तस्मिन् तोदे यादंशकण्डुः स्यात् तदा शुद्धरक्तादानं जानीयात्। तत्र किं कुर्य्यादित्याह॥ शुद्धमाददानामपेति। अवकिरेत् अवचूर्णयेत् अन्ये तु शोणितगर्द्धेनेति पठन्ति गर्द्धेन अभिकाङ्क्षया, वदन्ति च गन्धेनेति अयुक्तः पाठः, कुतः? यस्माज्जलौकसां गन्धेन्द्रियं नास्तीति, पतितायाः रुधिरापहरणविधानमाह। अथ पतितां तण्डुलेति। तण्डुलकण्डनं गुण्डनं कणा इत्यर्थः अनुलोमं अनुकूलं अनुमार्ज्जयेत् प्रोञ्छयेत्, आमुखादिति मुखं यावदित्यर्थः। सम्यग्वान्तलिङ्गान्याह। सीदतीति, सीदति निमज्जति दुर्वान्तावचाराद्व्याधिविशेषमाह। दुर्वान्ताया व्याधिरसाध्य इति अस्यतु व्याधेः शास्त्रे लक्षणानिर्द्देशान्नपठनीय इत्येके, अथ सुवान्ता किं कार्य्येत्याह। अथ सुवान्ता पूर्व्ववदिति, पूर्व्ववदिति यथा नवे महतिघटे इत्यादौ। शोणितावसेचने उत्तर कर्म्माणि

नाम भवति। अथ सुवान्तां पूर्ववत्सन्निदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौको व्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्बध्नीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति॥ ८॥

भवति चात्र।

चेतांसि ग्रहणं जातीः पोषणं सावचारणम्।
जलौकसाञ्च योवेत्ति तत्साध्यान् स जयेद्गदान्॥ ९॥

निर्हिंश्चाह। शोणितस्य यथायोगमवेक्ष्येति। योगः सम्यक्स्रुतिः अयोगो योगदान्यः, स त्रिविधो हीनातिमिथ्यायोगभेदात्। तत्रयोगे शतधौत-घृताभ्यङ्गः शतधौतघृताक्तपिचुधारणं वा। हीनयोगे किं कुर्य्यादित्याह। अतियोगे किं कुर्य्यादित्याह शीताभिरद्भिश्च परिषेचयेदिति शीतलजल-परिषेचनं बन्धनञ्च जलौकोमुखपदस्य रक्तस्थित्यर्थं, मिथ्यायोगे उपक्रम-माह। कषायमधुरेत्यादिमदिह्यात्सिम्मेत् अत्र कषाय प्रदेहः शेषदुष्टरक्तप्रसा-दार्थं, मधुरैः प्रदेहः स्रुतादुष्टरक्तवर्द्धनार्थं, अन्ये तु मूर्च्छाद्युपद्रवपरि-हारार्थं, शीतजलसेकः मधुनावघट्टनं कषायादिलेपनं च सन्धानार्थं इति व्याख्यानयन्ति शोणितस्रावणमपि पुरुषबलप्रमाणाद्दोषबलप्रमाणाद्वा वातादिजनितव्याधिबल प्रमाणाद्वा यावत् शोणितस्य सम्यक्शुद्धिर्भवति तावद्वा रोगाशयं वा समीक्ष्य तद्यथा अनोयसि रोगाशये अल्पं रक्तं आह-रणीयं मर्हति पुनर्वद्धिति। रक्तमोक्षणं च पलादिमानेन पलश्चात्र पक्वसप्तगु-ञ्जाफलप्रमाणमाषकेण तान्यपि चार्द्धत्रयोदशपलानि प्रस्थो रक्तपस्थं चैकै-कस्यां सिरायां मोचणीयं तदपि द्वाभ्यां दिवसाभ्यां प्रस्थमात्र उत्तममात्रा मध्यम मात्रा, अर्द्धप्रस्थमात्र कर्षाधिक षट्पलानि एतदपि द्वाभ्यामहोभ्यां स्रावनीयं अधममात्रा कुड़वं, कुड़वं चात्र अष्टमाषाधिकानि त्रीणि पलानि इदमपि दिनद्वयेन मोचणीयं इति प्रसिद्धः कर्म्ममार्गः॥ ८॥

इदानीं संग्रहश्लोकमाह। चेतांसीति सविषाणां चेतांसि तत्र सविष-

कोटेत्यादि निर्व्विषाणां पद्मोत्पलपत्रे इत्यादि। ग्रहणमिति तासां ग्रहणमार्द्रचर्म्मणेत्यादिनातय: सविषाणां कृष्णकर्व्वुरेत्यादि, निर्विषाणां कपिलपिङ्गलेत्यादि। पोषणमिति नवे महतिघटे इत्यादि। अवचारणमिति अथ जलौकोऽवसेकसाध्यमित्यादि चकारात् पश्चात् कर्म्मादि॥ ८॥

इति सूत्रस्थाने निबन्धसंग्रहे

त्रयोदशोऽध्याय: समाप्त:।

चतुर्द्दशोऽध्याय:।

नमोधन्वन्तरये।

अथात: शोणितवर्णनीयमध्यायं व्याख्यास्याम:।

तत्र पाञ्चभौतिकस्य चतुर्व्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्याहारस्य सम्यक्परिणतस्य यस्तेजोभूत: सार: परमसूक्ष्म: स रस इत्युच्यते। तस्य च

अथात: शोणितवर्णनीयमध्यायं व्याख्यास्याम:।

शोणितोत्पत्तौ रसाधीनत्वात् रसमेवदर्शयन्नाह।

तत्र पाञ्चभौतिकस्येति—इत्यम्भूतस्याहारस्य य: सार: स रस इत्युच्यते, इति पिण्डार्थ:। पाञ्चभौतिकस्येति पृथिव्यादिभूतद्रव्यभेदेन, चतुर्विधस्येति पेयलेह्यभोज्यभक्ष्यभेदेन, षड्रसस्येति मधुरादिरसभेदेन, द्विविधवीर्य्यस्येति शीतोष्णवीर्य्यभेदेन। पक्षान्तरमाह, अष्टविधवीर्य्यस्य वेति शीतोष्णस्निग्धरूक्षविशदपिच्छिलमृदुतीक्ष्णभेदेन। अनेकगुणस्येति शीतादिद्रवादिगुणभेदेन, विंशतिगुणस्य उपयुक्तस्येति सम्यक्परिणतस्येत्यनेनैवोपयुक्तपदार्थस्य लब्धत्वात्। यदुपयुक्तग्रहणं करोति तत्सम्यग्योगं स्वास्थ्यवृत्तीय द्वादशविधानतो विचारमपेक्षोपयोगं प्रापयति। तेजोभूतं

हृदयं स्थानं स हृदयाच्चतुर्विंशतिं धमनीरनुप्रविश्योर्द्धगा दशदश चाधोगामिन्यश्चतस्रश्च तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनुमानाद्गतिरुपलक्षयितव्या क्षयवृद्धिवैकृतैः। तस्मिन् सर्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति।

इति तेजसोभूतः वह्निसम्भूत इत्यर्थः। अन्ये तु तेजः शब्देन घृतमाहुः। तत्र तेजोभूतोघृतवदुत्पन्न इत्यर्थः। अन्ये तु वदन्ति भूतशब्दोऽत्र उपमानार्थः तत्र तेजोभूतघृताकार इत्यर्थः। सारः इति विड़ादिमलरहित इत्यर्थः। परमसूक्ष्म इति अतिशयेन अस्थूलावयवसूक्ष्मस्रोतोऽनुसारी इत्यर्थः। रसस्य स्थानमाह। तस्य हृदयम् स्थानमिति रसस्य सर्वदेहानुसारित्वेपि हृदयं स्थानं। हृदयशब्देनात्रहृदयोपलक्षितः प्रदेश उच्यते। नतु साक्षात्हृदयं, कुतः? हृदयस्यौजस्थानत्वात्। रसस्य क्रियाः निर्द्दिशन्नाह सहृदयाच्चतुर्विंशतिमिति। तर्पयति बालमध्यस्थवृद्धान् सर्व्वानेवप्रीणयति। अन्ये गर्भं तर्पयतीतिमन्यन्ते। तस्याहारासम्भवात् वर्द्धयतीति बालं धारयतीति मध्यवयसं पूर्णधातुत्वात्। केचित् धारयतीत्यत्र जीवयतीति पठन्ति। तत्रापि स एवार्थः। यापयतीतिवृद्धं क्षीयमाणदेहत्वात्। केचिदत्रसहृदयाच्चेत्यादि पाठं चतस्रश्च तिर्य्यग्गा इत्यन्तं न पठन्ति। कृत्स्नं शरीरमित्यादि च पठन्ति। कुतः पुनरयं तर्पणादि करोतीति दृष्ट आह। अदृष्टहेतुकेन कर्म्मणेति तस्येति रसस्य। अनुसरतोऽनुगच्छतः। क्षयवृद्धिवैकृतैरिति वैकृतं विकारः। क्षयविकारैः रसक्षये हृत्पीड़ाकम्पइत्यादिभिः वृद्धिविकारैः हृदयोत्क्लेदमित्यादिभिः। तत्र क्षयवृद्धिविकारैर्विकृतस्य क्षयवृद्धिवैकृतैश्चेति चकारो द्रष्टव्यः। तेन सर्वशरीरतर्पणादिभिर्याविकृतस्य गतिरनुमन्तव्येत्यर्थः। रसभावं विनिर्दिष्टमाह तस्मिन् सर्वशरीरावयवेति। पूर्व्वोक्ते रसे जिज्ञासा-

अत्रोच्यते स खलु द्रवानुसारी स्नेहनजीवनतर्पणधारणादि-भिर्विशेषैः सौम्य इत्यवगम्यते। स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य राग मुपैति ॥ १ ॥

भवतश्चात्र॥

रञ्जितास्तेजसात्वापः शरीरस्थेन देहिनां।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसञ्ज्ञं प्रवर्त्तते।
तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयं॥ २ ॥

आतुमिच्छा, किमयं सौम्यः कफवत् अथवा तैजसः पित्तवदिति संशयः। अत्रोच्यते स खल्विति, अनुसारी अनुसरणशीलः। स्नेहनः स्नेहयतीति जीवनं जीवयतीति। तर्पणः प्रीणनः शरीरस्य। आदिशब्दादवष्टम्भनादयः। विशेषैर्भेदैः अवगम्यते अवबुध्यते। इदानीं क्रमनिष्पत्त्या शोणितं दर्शयन्नाह। खल्वाप्योरसो यकृदिति। खलुशब्दोऽप्यर्थः। आप्योऽपि रसरागमुपैति लोहितत्वं गच्छति। तमेवार्थं श्लोकेन स्पष्टीकुर्वन्नाह॥१॥

श्लोकौ चात्र भवत इति। रञ्जकनाम्ना तेजसा अव्यापन्ना एवं गुणविशिष्टा आपो रञ्जिता लोहितीकृताः सत्यो रक्तमित्युच्यते आपोऽत्र रसः। रक्तार्त्तवयोरभेदं दर्शयन्नाह। रसादेवस्त्रियरक्तमिति। रजःसञ्ज्ञमिति सञ्ज्ञान्तरमेतत्। स्त्रीयोनिप्रवृत्तस्य रक्तस्य ऋतुकालजं रक्तमेव रजः संज्ञमुच्यते इत्यर्थः। तद्वर्षाद्द्वादशादूर्द्ध्वमिति तद्रजःसंज्ञं शोणितं द्वादशवर्षादनन्तरं प्रवर्तते इति सम्बन्धः। तस्य निवृत्तिकालमाह याति पञ्चाशतः क्षयमिति। "रसादेव रजः स्त्रीणां मासिमासित्र्यहं स्रवेत्। तद्वर्षाद्द्वादशादूर्द्ध्वं यावत् पञ्चाशतः समः।" इत्यन्ये पठन्ति। समाः वर्षाणि। रक्तार्त्तवयोः सौम्यरसरसम्भवयोरपि स्वभावभेदं दर्शयन्नाह ॥२॥

आर्त्तवं शोणितं त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पञ्चाभौतिकन्त्वापरेजीवरक्तमाहुराचार्य्याः॥

विस्रताद्रवता रागः स्पन्दनं लघुता तथा।
भूम्यादीनां गुणाह्येते दृश्यन्ते चात्र शोणिते॥
रसाद्रक्तं ततोमांसं मांसान्मेदः प्रजायते।
मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः॥

आर्त्तवं शोणितं त्वाग्नेयमिति। तु शब्दोऽत्र भेदे तेन रसात् सौम्याज्जातमपि आर्त्तवं शोणितञ्च आग्नेयं। कुतः कारणादित्याह अग्निसोमीयत्वाद् गर्भस्येति। आर्त्तवमाग्नेयं शुक्रं सौम्यं ताभ्यामग्निसोमीयो गर्भोभवति। ननु यदि अग्निसोमीयत्वात् गर्भस्येत्यत्र आर्त्तवशोणितयोः स्वभावा भेदा एतदार्त्तवस्याग्नेयत्वे उक्तेशोणितस्यापि आग्नेयत्वमुक्तमेवेति। आर्त्तवशोणितं त्वाग्नेयमित्यन्ये पठन्ति। आर्त्तवं च तत् शोणितं चेति तत् आर्त्तवशोणितम्। तुशब्दोऽत्रावधारणे। तेनार्त्तवस्याग्नेयत्वमवधारयेति व्याख्यानयन्ति। रक्तं पुनरनुष्णाशीतं एवं आचार्य्याम मन्यन्ते। शोणितस्वभावे मतान्तरमाह। पाञ्चभौतिकं त्वपरे जीवरक्तमाहुराचार्य्यं इति। जीवरक्तमिति जीवतुल्यं रक्तं। कुतः जीवच्छरीरे रक्तदर्शनात् मृतशरीरे चादर्शनात्। ननु जीवरक्तमोज इति एवं प्रस्तुतस्यैवरक्तस्य लक्षणमनुक्तं स्यात्। तदेव पाञ्चभौतिकत्वं सुखबोधार्थं स्पष्टयितुमाह। विस्रताद्रवतेति। विस्रता आमगन्धिताभूमिगुणः। द्रवताद्रवभावः अयमम्बुगुणः। रागो रक्तता ओजोगुणः। स्पन्दनं किञ्चिच्चलनं वातगुणः। लघुता अगुरुत्वं आकाशगुणः। भूम्यादीनामिति अत्र आदिशब्देन तेजोवाय्वाकाशा गृह्यन्ते। हि यस्मादर्थे। यस्मादेते विस्रतादयः पृथ्व्यादीनां गुणा अत्र शोणिते दृश्यन्ते तस्माद्रक्तं पाञ्चभौतिकमिति। शोणितप्रसङ्गेन अन्येषामपि धातूनां क्रमेणोत्पत्तिं दर्शयन्नाह। रसाद्रक्तं ततो मांसं इति। सकलस्याप्यंरसो यकृत्प्लीहानौ प्राप्य रागमुपैतीत्यनेनैव

तत्रैषां धातूनामन्नपानरसः प्रीणयिता।
रसजं पुरुषं विद्याद्रसं रक्षेत् प्रयत्नतः।
अन्नात्पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः॥ ३॥

रसादेव रक्तस्योद्भवने उक्ते रसात् पुनः शोणितोद्भवनवचनं नियमार्थं। तेन रसात् क्रमोत्पत्त्या शोणितमेव भवति इत्यपरे। धातव इति एतेन युगपदेव सर्वधातुषु रससञ्चारात् रसेनैव सर्वधातुपोषणमिति तन्त्रान्तरीयं वचो निरस्तं ननु यदि परिणमन्ति रसादयो रक्तादिभावेन तर्हि सर्वेषामुत्सेदः स्यात् सन्तत्या परिणाम इति चेत् तर्हि सर्वेषां पूर्व्वेषामनल्पता स्यात् उत्तरेषां बाहुल्यमिति। नैतत्। तेषां रसादीनां मलस्थूलानुभागविशेषेण त्रिविधः परिणामो भवति। तद्यथा अन्नात् पच्यमानात् विण्मूत्रं। मलात् सारो रसः। रसादग्निपकात् मलः। कफात् स्थूलोभागरसः अनुभागो रक्तं रक्तादग्निपकात् मलः पित्तात् स्थूलभागः शोणितं अनुभागस्तु मांसमिति। ततोऽपि आत्मपावकपच्यमानान्मलः श्रोत्रनासाक्षमाक्षिप्रजननादिस्रोतोमलः। स्थूलोभागो मांसं। सूक्ष्मो मेदः। ततोऽपि निजवह्निपच्यमानान्मलाः स्वेदादयः स्थूलांशो मेद एव। सूक्ष्मभागोऽस्थि। ततोऽपि पच्यमानान्मलः केशलोमश्मश्रुणि स्थूलोऽस्थि। सूक्ष्मस्तु मज्जा। ततोऽपि मज्जः पावकपच्यमानान्मल नयनपुरीषत्वचां स्नेहः। स्थूलोभागो मज्जा। सूक्ष्मः शुक्रं। ततः पुनः पच्यमानान्मलादुत्पद्यते। सहस्रधाध्मातसुवर्णवत्। स्थूलोभागः शुक्रमेव। स्नेहभागः सूक्ष्मस्तेजः ओजः। पूर्वोक्त एवार्थः श्लोकाभ्यां कथ्यते। सस्थूलांशमलैः सर्वैर्भिद्यन्ते धातवस्त्रिधा। सस्थूलोऽंशः परं सूक्ष्मोविन्मलं याति तन्मलः। स्वाग्निभिः पच्यमानेषु मलः षट्सु रसादिषु। न शुक्रे पच्यमानेऽपि हेमनीवाक्षये मल इति आकृष्टा कोपस्यपुंसः श्मश्रुःपातात् श्मश्रुशुक्रमलइत्येके। तन्न। श्मश्रुहीनस्यापि शुक्रदर्शनात्। न तु मांसान्मेदः प्रजायते इत्यनर्थकं मन्तः शुक्रन्तुजायते इत्येके। सेवं क्रियापदेन प्रजायत

तत्र रस गतो धातुरहरहर्गच्छतीत्यतो रसः। स खलु त्रीणि त्रीणि कलासहस्राणि पञ्चदश च कला एकैकस्मिन् धाताववतिष्ठत एवं मासेन रसः शुक्रीभवति स्त्रीणाञ्चार्त्तवमिति ॥ ४ ॥

इत्यस्यार्थस्य लब्धत्वात्। मज्ञ प्रजायते इति क्रियापदं रसादीनां मेदःपर्य्यन्तानां विशिष्टकाय मिरोत्पाद्यदर्शनार्थं। एभ्यएवोपधातवः स्वभावादुत्पद्यन्ते न पुनरसादिभ्यः इति। तथाहि रसात् स्तन्यमार्त्तवम्। रक्तात् कण्डराच मांसाद्वसाः त्वचः। मेदसः स्नायुसन्धीति। शुक्रन्तुजायते इति, द्वितीयजायते शब्देन शुक्रं विशिष्टधर्म्मवत्ता उक्ता इति पठन्ति व्याख्यानयन्ति च। सम्भव शब्दोऽत्रपोषणे न तु पूर्वोत्पादने। यतो रसादीनां शुक्रान्तानां गर्भादेवोत्पत्तिरिति रसस्य निर्द्दिष्टस्य प्राधान्यं दर्शयितुमाह। तत्रैषां धातूनामिति। तत्रतेषु मध्ये एतेषां धातूनां प्रागुक्तानां रक्तादीनां अन्नपानरसः अन्नपानस्य सारः प्रीणयिता तर्पयितेत्यर्थः ॥ ३ ॥

रसस्यैव निरुक्तिमाह। तत्र रसगत धातूरिति। रसधातुर्धात्वन्तराणां स्वाभावं जनयन् एकैकस्मिन् धातौ कियन्तं कालमवतिष्ठत इत्याह। सखलु त्रीणि त्रीणि इति। अत्र शुक्रं हि स्वाग्नौ पच्यमानमपि अनुभागानुत्पादयति। अन्येतुमेदः प्रजायते इत्यत्र वर्त्तन इति पठन्ति। शुक्रन्तुजायते इत्यत्र च सम्भव इति तु तिष्ठते अवस्थितिं करोतीत्यर्थः। परिणामं गच्छन्नेव तिष्ठति पच्यमान स्थालीतण्डुलवत् न पुनरस्य गमननिवृत्तिः। त्रीणित्रीणि कलासहस्राणि पञ्चदशचकला इति अस्यार्थः, रसः किलैकाहेनैव सम्पद्यते। तदनन्तरं ये षट्धातवः ते प्रत्येकं पञ्चभिरहोभिः सम्पद्यते। यावताकालेन रसःशुक्रतां याति तावन्तं वक्तुमाह एवं मासेन शुक्रमिति अत्र आर्त्तवशब्दोऽयं शुक्रे वर्त्तते न तु रजसि। रजोहि रसाद्रक्त वत्सप्तमेऽहनिजायते। अथवा यद्यवमार्त्तवशब्दः शुक्रे वर्त्तते तदात्र शुक्रस्याशुक्रत्वात् षड्धातुत्वं स्यात्

भवति चात्र।

अष्टादश सहस्राणि संख्या ह्यस्मिन् समुच्चये।
कलानां नवतिः प्रोक्ता स्वतन्त्रपरतन्त्रयोः॥

स शब्दार्चिर्जलसन्तानवदणुना विशेषेणानुधावत्येवं शरीरं केवलम्। वाजीकरण्यस्त्वोषधयः स्वबलगुणोत्कर्षाद्विरेचनवदुपयुक्ताः शुक्रं शीघ्रं विरेचयन्ति॥ ५॥

तस्मादार्त्तवशब्दः शुक्रे वर्त्तते अन्य तु पुनरत्रार्त्तवशब्दं रजस्येव वर्त्तयति चकारेण स्त्रीशुक्रं समुच्चीनोतीति शुक्रेऽपि गर्भजननशक्तिद्योतनार्थं। तथाचोक्तं "यदानार्य्यावुपेयातां वृषस्यन्त्यौ कथञ्चन। मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थि तत्र जायते" इति। अस्मिन्पक्षेमासेनार्त्तवास्य सम्भवमुपचये-ऽभिप्रेतः। प्रकाशश्च यस्मादार्त्तवस्य रक्तवत् सप्ताहेनैवोत्पत्तिरिति। इदानीं समुदायसंख्यामाह॥ ४॥

अष्टादशसहस्राणीति। अष्टादशसहस्राणीत्यादिना त्रिंशद्दिनानि कथितानि। स्वतन्त्रपरतन्त्रयोरिति, समानतन्त्रासमानतन्त्रयोरित्यर्थः। दृष्टान्तत्रयेण शरीरे रसगतिं त्रिधा दर्शयन्नाह। सशब्दार्चिर्जलसन्तानवदिति। सरससन्तानशब्दः शब्दादिभिः सहप्रत्येकं सम्बध्यते, अणुना विशेषेण सूक्ष्मप्रकारेण अणुधावति सञ्चरति। एवं शब्दो नियमार्थः। शरीरं केवलं सकलमित्यर्थः। तत्र शब्दः सन्तानवदित्यनेन तिर्य्यग्गामित्वं रसस्योक्तम्। अर्चिः सन्तानवदित्यनेन ऊर्द्धगामित्वं जलसन्तानवदित्यनेनाधोगामित्वमिति। केचिदन्यथा व्याख्यानयन्ति, दृष्टान्तत्रयेण तीक्ष्णमध्यमन्दाग्नयो निर्द्दिष्टाः। शब्दसन्तानवत्तीक्ष्णाग्नीनां रसः सञ्चरति। अर्चिः सन्तानवन्मध्याग्नीनाम्। जलसन्तानवन्मन्दाग्नीनामिति। तेन तीक्ष्णाग्नीनामष्टाहेनैवरसः शुक्रीभवति। मन्दाग्ने मासेनैव। अयमर्थः गयदासाचार्य्येनबहुधा दूषितः। दीप्ताग्ने तु किञ्चिन्न्यूनेन मासेन शुक्रं भवति। मन्दाग्ने तु किञ्चिदधिकेन मासेन इत्ययमर्थोन्याय्य इति। यदि

यथा हि पुष्पमुकुलस्थो गन्धो न शक्यमिहास्तीति वक्तुं नैव नास्तीत्यथवास्ति सतां भावानामभिव्यक्तिरिति ज्ञात्वा केवलं सौच्म्यान्नाभिव्यज्यते स एव गन्धो विवृतपत्नकेशरैः कालान्तरेणाभिव्यक्तिं गच्छत्येवं बालानामपि वयः परिणामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोऽयार्त्तवादयश्च

मासेन रसः शुक्रीभवति, तर्हि वाजीकरिणीनां महौषधीनां प्रयोगो निष्फलःस्यादित्याह। वाजीकारिण्यस्त्वोषधय इति। याभिरोषधिभिः स्त्रीषु नरो वाजीव समर्थो भवति ता वाजीकारिण्यः। स्वबलगुणोत्कर्षादिति स्वशब्दो बलादिभि प्रत्येकं सम्बध्यते। उत्कर्षशब्दोपि अत्रकाश्चिदोषधयः स्वबलोत्कर्षात् काश्चित् स्वगुणोत्कर्षात् काश्चित् स्वबलगुणोत् कर्षात्। तत्र सङ्कल्पपादलेपविशिष्टकान्तास्पर्शादयः स्वबलोत्कर्षात् स्वप्रभावोत्कर्षादित्यर्थः। घृतक्षीरादयः स्वगुणोत्कर्षात् स्वस्नेहाद्युत्कर्षादित्यर्थः। माषादयः स्वबलगुणोत्कर्षात् स्वभावस्नेहाद्युत्कर्षादित्यर्थः। उत्कर्ष आधिक्यम्। वाजीकरिण्य इति बहुवचनं भाद्यर्थं। तेन वल्यबृंहणीय जीवनसंग्रहणादयोऽपि तद्वाच्या इति। ननु यदि मासेन रसः शुक्रो भवति तर्हि बालानामप्युतमपि तत्कथं न दृश्यते इति दृष्टान्तमाह ॥ ५ ॥

यथा हि पुष्पमुकुलस्थ इति, गाथाहोति दृष्टान्तता प्रतिपादनार्थं। पुष्पमुकुलस्थ इति कुसुमकलिकामध्यस्थ इहेति पुष्पमुकुले गन्धोऽस्त्येव नास्त्येवेति च वक्तुं न शक्यम्। पारमार्थिकं रूपमाह। अथवा अस्तीति। अथशब्दः सम्बोधने, च शब्द एवार्थं अस्त्येवेत्यर्थः। युक्तिमाह सतां भावानामभिव्यक्तिरितिज्ञात्वेति। पूर्वं सन्त एवभावाः पश्चाद्धेतु मासाद्याभिव्यज्यन्ते। यथा तिलेषु तैलमित्यादि। यद्यस्त्येवेति तत् किं मुकुलावस्थायामेव नाभिव्यज्यते इत्याह। केवलं सौच्म्यान्नाभिव्यज्यते इति स एवेत्यादि। इत्थं वयः परिणामात् शुक्रप्रादुर्भावो भवति। रोमराज्यादयश्च विशेषाभावाः वयःपरिणामाच्चारोणामपि प्रादुर्भवन्ति। आदि-

विशेषा नारीणां रजसि चोपचीयमाने शनैः शनैः स्तन-गर्भाशययोरभिवृद्धिर्भवति। स एवान्नरसो वृद्धानां जरा-परिपक्वशरीरत्वान्न प्रीणनो भवति। त एते शरीरधारणा-द्धातव इत्युच्यन्ते। तेषां क्षयवृद्धी शोणितनिमित्ते तस्मात्त-दधिकृत्य वक्ष्यामः॥ ६॥

तत्र फेणिलमरुणं कृष्णं परुषं तनु शीघ्रगमस्कन्दि च वातेन दुष्टं। नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपी-

शब्दात् स्तन्यार्त्तवादयः। रोमराज्यादयश्चेति चकारो नारीणां च इत्यत्र द्रष्टव्यः। तेन पुरुषाणामपि शुक्रप्रभृतयो गृह्यन्ते। अत्र केचिद्रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोरभिवृद्धिर्भवतीति पठन्ति। नतु निबन्धकाराः कुतः आदिशब्दात्तदर्थस्य लब्धत्वादिति। ननुरसस्य उप-चयकरत्वाद्वृद्धानामपि वर्द्धितव्यमित्यर्थः। स एवान्न रसोवृद्धानामिति। स एवाशेषधातुपोषकोऽपि वृद्धानां अप्रीणनः ईषत् प्रीणनो भवति जीव-मात्रं करोतीत्यर्थः। कुत इत्याह परिपक्वशरीरत्वादिति। रसादि धातूनां निरुक्तिं कुर्व्वन्नाह। तत्र ते शरीरधारणाद्धातव इत्युच्यन्ते इति। यद्यपि क्वचिद्दुष्टा दोषा अपि देहधारणाद्धातुशब्देनोच्यन्ते तथाप्यत्र रसादीनाम-धिकृतत्वात्त एवधातवः कथ्यन्ते। प्रस्तुतं शोणितमेवाधिकर्त्तुमाह। तेषां क्षयवृद्धीति। तेषां धातूनां तदधिकृत्येति शोणितमधिकृत्येत्यर्थः॥ ६॥

तत्र फेणिलमरुणमिति फेणिलं फेणसहितं। अरुणमीषद्रक्तं। तदेव-पाकाभिमुखं कृष्णं परुषमपिच्छिलं रूक्षमित्यन्ये। तनु अच्छं। शीघ्रमाशु-प्रसृति अस्कन्दिचेति स्त्यानरहितं। नीलं पीतमित्यादि नीलं हरितं, श्यावं सामपित्तदुष्टं, पीतं निराममित्तदुष्टं, श्यावं हरितकृष्णं। विस्रमामगन्धि अनिष्टं पिपीलिकादीनामनुसरणादवगन्तव्यं। अस्कन्दिचेतिस्त्यानत्वर-हितं। गैरिकोदकप्रकाशमिति गैरिकोदकप्रकाशं पाण्डुलोहितं। बहलं घनं मांसपेशीप्रभं स्त्यानत्वात्। सर्वलक्षणयुक्तमिति। सर्वलक्षण-

लिकामच्चिकानामस्कन्दि च पित्तदुष्टं। गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टञ्च। सर्वलक्षणसंयुक्तं काञ्जिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टं। पित्तवद्रक्तं नातिकृष्णञ्च द्विदोषलिङ्गं संसृष्टं। जीवशोणितमन्यत्र वक्ष्यामः॥ ७॥

इन्द्रगोपप्रतीकाशमसंहतमविवर्णञ्च प्रकृतिस्थं जानीयात्॥ विस्राव्यान्यन्यत्र वक्ष्यामः॥ अथाऽविस्राव्याः सर्वाङ्गशोफः क्षीणस्य चाम्लभोजननिमित्तः पाण्डुरोग्यर्शसोदरिशोषिगर्भिणीनाञ्च श्वयथवः॥ ८॥

युक्तं वातादिलक्षणयुक्तं। अत्र केचित्पित्तवद्रक्तं नातिकृष्णमितिपठन्ति। न तु निबन्धकाराः। द्विदोषलिङ्गं संसृष्टमिति। संसृष्टं दोषद्वययुक्तमित्यर्थः, अत्र केचित् जीवशोणितमन्यत्रोपदेक्ष्याम इति पाठः। न तु निबन्धेषु॥ ७॥

रक्तविकृतिमभिधाय प्रकृतिं वक्तुमाह। इन्द्रगोपप्रतिकाशमिति, इन्द्रगोपकः प्रावृट्कालज उद्भिज्जः इन्द्रवधूरितिलोके। सचानेक प्रकारवर्णः। अत्र तु रक्त एव गृह्यते। असंहतं नात्यच्छं नातिघनं। न रूपायतीत्यन्ये। अविवर्णमिति इन्द्रगोपकवर्णमपीषद् विविधवर्णं। एतेन तदेव पद्मालक्तकगुञ्जाफलवर्णमित्युक्तं। अथवा वस्त्रादिलग्नं सत् प्रक्षाल्यमानमपि न विवर्णतां यातीत्यविवर्णं। शोणितस्य स्रावणविषयमतिदेशेन दर्शयन्नाह विस्राव्यान्यन्यत्र वक्ष्याम इति। अन्यत्रेति अष्टविधशस्त्रकर्माध्याये। विस्रावणनिषेधविषयं दर्शयन्नाह। अथाविस्राव्याः सर्व्वाङ्गेति। क्षीणस्य पुंसः अम्लभोजननिमित्तो यः सोऽविस्राव्य इत्यर्थः। तथा पाण्डुरोग्यादीनां शोथा अविस्राव्याः। एतेषां व्रणशोथा एकाङ्गजा अपि न स्राव्याः॥ ८॥

तत्र शस्त्रविस्रावणं द्विविधं प्रच्छानं सिराव्यधनञ्च। तत्र ऋज्वसङ्कीर्णं सूक्ष्मं सममनवगाढमनुत्तानमाशु च शस्त्रं पातयेन्मर्मसिरास्नायुसन्धीनां चानुपघाति। तत्र दुर्दिने दुर्विद्धे शीतवातयोरस्विन्नेऽभुक्तवतः स्कन्नत्वाच्छोणितं न स्रवत्यल्पं वा स्रवति॥ ९॥

भवति चात्र॥

मदमूर्च्छाश्रमार्त्तानां वातविण्मूत्रसङ्गिनाम्।
निद्राभिभूतभीतानां नृणां नासृक् प्रवर्त्तते॥ १०॥

तद्दुष्टं शोणितमनिर्ह्रियमाणं कण्डूशोफरागदाहपाकवेदना जनयेत्। अत्युष्णातिस्विन्नातिविद्धेष्वज्ञैर्विस्रावितमति प्रवर्त्तते। तदतिप्रवृत्तं शिरोऽभितापमान्ध्यमधिमन्थ-

विस्रावणं द्विविधमिति। अत्र ऋजु संकीर्णं सूक्ष्ममिति। अत्र प्रच्छनमधिकृत्याह। ऋजु प्राञ्जलं, असंकीर्णं न सङ्कटं विशालमित्यर्थः। अन्ये परस्परासंसृष्टमित्याहुः। सूक्ष्मं नातिमहासुखगस्त्रकृतं। समंतुल्यरेखं। अनवगाढ़ं अदूरगतिकं। नोत्तानं किञ्चिन्मांसस्पृगित्यर्थः। आशु अविलम्बितं यथा भवति एवं शस्त्रं पातयेत्। रक्तस्यायोगं चिकित्सार्थमाह। तत्र दुर्दिने दुर्विद्धे इति। दुर्दिने इति नित्यगकालदोषः। केचिद्दिने इति न पठन्ति। दुर्विद्धे इति वैद्यक्रियादोषः। शीतवातयोरिति कालकृतोदोषः। भुक्तमात्रे इति आवस्थिककालदोषः। अभुक्तवत इत्यन्ये पठन्ति। स्कन्दत्वात् स्त्यानत्वात्॥ ९॥

मदो विषमद्यजोविकारः। आर्त्तानां पीड़ितानां, वातविण्मूत्रसङ्गिनामिति सङ्गोऽप्रवर्त्तनं॥ १०॥

दुष्टरक्तस्य अस्रुतिदोषमुपदिशन्नाह। तद्दुष्टं शोणितमात्तर्वनिर्ह्रियमानमिति प्रतियोगं व्यापदश्चोपदिशन्नाह। अत्युष्णातिस्विन्ने इति,अत्युष्णे अत्युष्ण

तिमिरप्रादुर्भावं धातुक्षयमाक्षेपकं पक्षाघातमेकाङ्गविकारं तृष्णादाहौ हिक्कां कासं श्वासं पाण्डुरोगं मरणं चापादयति ॥ ११ ॥

भवन्ति चात्र।

तस्मान्न शीते नात्युष्णे नास्विन्ने नातितापिते।
यवागूं प्रतिपीतस्य शोणितं मोक्षयेद्भिषक्॥
सम्यक्गत्वा यदा रक्तं स्वयमेवावतिष्ठते।
शुद्धं तदा विजानीयात्सम्यग्विस्रावितन्तु तत्॥
लाघवं वेदनाशान्तिर्व्याधेर्वेगपरिक्षयः।

काले। अतिस्विन्ने अतिस्वेदिते। अतिविद्धेऽप्यज्ञैरिति अज्ञाः अदृष्टकर्म्माणः, शिरोऽभितापं शिरःशूलं, आन्ध्यमन्धतां, अधिमन्थश्चक्षूरोगः। अभिष्यन्दपूर्वकस्तिमिरलिङ्गनाशः। प्रादुर्भावशब्दो अधिमन्थतिमिराभ्यां सम्बध्यते। शिरोऽभितापादीन् शिरसि अतिक्षतं रक्तं करोति। धातुक्षयं सर्वैवातिक्षतं। एकाङ्गविकारं एकस्मिन्नङ्गे य उत्पद्यते स एकाङ्गविकारः। सचात्र वातजनितः॥ ११॥

अयोगातियोगौ सहेतुकौ निर्द्दिश्य सम्यक्योगं सहेतुकं निर्दिशन्नाह। तस्मान्न शीते नात्युष्णे इति। न शीते नात्युष्णे साधारणेकाले। नास्विन्नेनातिस्वेदिते। नातितापिते सूर्य्यतापिदिभिः। यवागूरत्र तिलयवागूस्तस्याः सद्यः स्नेहनीयत्वात् रक्तोत्क्लेदकरित्वाच्च। प्रतिपीतस्येति प्रतिशब्दोऽत्र पानान्तरं सूचयति, तेन यवागूः द्वितीयवाचा द्वितीयपानानन्तरं तृतीयपानानन्तरं चेत्यर्थः। अन्ये तु यवागूर्विरलद्रवा बहुसिक्था तां प्रतिपीतस्य। साहि मायशः प्रक्लेदनात्मिका स्विदनत्वात् द्रवोष्णत्वाच्च शोणितं विलापयति। प्रतिशब्दोऽत्रमात्रार्थः, तेन यवागूं मात्रया पीतवत इत्यर्थः। इदानीं सम्यग्योगस्य सुविशुद्धस्य चैकेनैव वाक्येन

सम्यग्विस्राविते लिङ्गं प्रसादो मनसस्तथा ॥
त्वग्दोषा ग्रन्थयःशोफारोगाः शोणितजाश्चये ।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥ १२ ॥

अथ खल्वप्रवर्त्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठाभद्रदारुविडङ्गचित्रकत्रिकटुकागारधूमहरिद्रार्काङ्कुरनक्तमालफलैर्यथालाभं त्रिभिश्चतुर्भिः समस्तैर्वा चूर्णीकृतैः सर्ष-

लक्षणं वक्तुमाह । सम्यग्गत्वा यदा रक्तमिति । गत्वा निःसृत्य यदा सम्यग्रक्तवर्णं शोणितं भवति तदाशुद्धं विजानीयात् । सम्यग् विस्रावितपक्षे त्वयमर्थः । सम्यग्गत्वेति सम्यक् प्रवर्त्तनं कृत्वा । यदा रक्तं रुधिरं स्वयमेवावतिष्ठते अवस्थितिं करोति तदासम्यग् विस्रावितं च तद्रक्तं विजानीयात् । चकारे नैतल्लक्षणद्वयं लभ्यते । अन्ये तु सम्यग् गत्वेत्यादि श्लोकस्य व्याख्यानमन्यथा कृत्वा सार्द्धश्लोकेन व्याख्यानयन्ति । "नचातिवेगदुष्टानां सम्यग् गत्वाविनिःसृतं । विहाय स्वेदरूपेण न तथा ह्यवतिष्ठते । प्रयत्नमनपेक्ष्यासृक् तदा शुद्धं विनिर्द्दिशेत्" इति । अभ्यन्तरपमरमपि रक्तशुद्धिस्रावणस्य लक्षणं दर्शयन्नाह । लाघवं वेदनाशान्तिरिति । त्वग्दोषाः अष्टादश कुष्ठानि न्यच्छनीलिकादयश्च । ग्रन्थयो वातादि निमित्ता शिराग्रन्थिश्च । शोणितजा रोगा रक्तगुल्मविद्रधिविसर्पादयः । रक्तमोक्षणशीलानां रक्तस्रावणाभ्यासकारिणां ॥ १२ ॥

इदानीमप्रवृत्तरक्तस्य प्रवर्त्तनायाह । अथ खल्वप्रातिमाने रक्ते एला शीतशिवेति । शीतशिवं कर्पूरं । नक्तमालोवृहत्करञ्जः । त्रिभिश्चतुर्भिरिति एतेनैकद्विद्रव्यनिषेधः कृतः । लवणतैलप्रगाढैरिति सैन्धवतिलतैलोत्कटैरिति । अतिप्रवृत्तौरक्तस्थापनाय दर्शयन्नाह । अथाति प्रवृत्ते रोध्रमधुकेति पत्तङ्गं रक्तचन्दनं । सर्ज्जरसो राला । शुक्तिर्जलशुक्तिः । शालः शङ्कुः । सर्ज्जः शालभेदः । अर्ज्जुनं ककुभः । अरिमेदः अरिमज्ज इति लोके प्रसिद्धः । मेषशृङ्गः कर्कटशृङ्गः, धन्वनो धनरण इति धामन इति च

पतैलवलप्रगाढैर्व्रणमुखमवघर्षयेदेवं समस्क् प्रवर्त्तते। अथातिप्रवृत्ते रोध्रमधुकप्रियङ्गुपत्तङ्गगैरिकसर्जरसरसाञ्जनशाल्मलीपुष्पशङ्खशुक्तिमाषयवगोधूमचूर्णैः शनैर्व्रणमुखमवचूर्णाङ्गुल्यग्रेणावपीडयेत्। सालसर्ज्जार्जुनारिमेदमेषशृङ्गधवधन्वनत्वग्भिर्वा चूर्णिताभिः क्षौमेण वा ध्मापितेन समुद्रफेन लाक्षाचूर्णैर्वा यथोक्तैर्व्रणबन्धनद्रव्यैर्गाढं बध्नीयात्। शीताच्छादनभोजनागारैः शीतैः परिषेकप्रदेहैश्चोपाचरेत् क्षारेणाग्निना वा दहेद्यथोक्तव्यधनादनन्तरम्वा तामेवाति प्रवृत्तां सिरां विध्येत्। काकोल्यादिक्वाथं वा शर्करामधुमधुरं पाययेत्। एणहरिणोरभ्रशशमहिषवराहाणां वा रुधिरं क्षीरयूषरसैः सुस्निग्धैश्चाश्नीयादुपद्रवांश्च यथास्वमुपाचरेत्॥ १३॥

प्रसिद्धः। शालादित्वग्भिश्चूर्णीकृताभिर्व्रणमुखमवचूर्ण्य अङ्गुल्यग्रेणैवावपीडयेदित्यत्रापि सम्बन्धः। क्षौमेण ध्मापितेन अतसीवस्त्रेण ध्मापितेन। दग्धेन व्रणमुखमवचूर्ण्याङ्गुल्यग्रेणावपीडयेदित्यत्रापि सम्बन्धः यथोक्तैर्वाव्रणबन्धनद्रव्यैरिति क्षौमकार्पासवस्त्रादिभिः। आच्छादनं वस्त्रादि प्रदेहः। परिषेको धारासेकः। यथोक्तं वलयविल्वादिभेदेनेत्यर्थः। व्याधादनन्तरं प्राक्कृतव्यधनादधः स्थाने तामेव पूर्वविद्धां शिरां विद्धे द्रक्तगतिच्छेदनार्थं। रक्तातिस्रुतौ आभ्यन्तरं भेदेनेत्यसृजं दर्शनाह। काकोल्यादि क्वाथमिति। एणःकृष्णहरिणस्ताम्रवर्णः। एणादिरक्तं पाययेदिति सम्बन्धः। रक्ताप्यायनार्थं तच्चादुष्टमसंस्कृतं च रक्तातिप्रवृत्तौ भोजनं नियमयन्नाह। क्षीरयूषरसैः सुस्निग्धैरिति। यूषो मुद्गयूषः। रसो मांसरसः। सुस्निग्धैरिति शोभनं कृत्वा घृतेन स्निग्धीकृतैरित्यर्थः। अश्नीयादिति क्षीरादिसिक्तमोदनं भुञ्जीत। पित्तदुष्टरक्तस्यैवातिप्रवृत्तौ अतिप्रवृत्तरक्तस्य क्षीर-

भवन्ति चात्र।

धातुक्षयात्स्रुते रक्ते मन्दः सञ्जायतेऽनलः।
पवनश्च परं कोपं याति यस्मात्प्रयत्नतः॥
तन्नातिशीतैर्लघुभिः स्निग्धैः शोणितवर्द्धनैः।
ईषदम्लैरनम्लैर्वा भोजनैः समुपाचरेत्॥
चतुर्विधं यदेतद्धि रुधिरस्य निवारणम्।
सन्धानं स्कन्दनञ्चैव पाचनं दहनं तथा॥ १४॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम्।
तथा सम्पाचयेद्भस्म दाहः सङ्कोचयेत् सिराः॥
अस्कन्दमाने रुधिरे सन्धानानिप्रयोजयेत्।
सन्धाने भ्रस्यमाने तु पाचनैः समुपाचरेत्॥

भोजनं। अथवा पित्तप्रकृतिकस्यैव रक्तातिप्रवृत्तौ क्षीरभोजनं। कफदुष्टरक्तस्यैवातिप्रवृत्तौ अति प्रवृत्तरक्तस्य यूषभोजनं। श्लेष्मप्रकृतिस्यैव वा वातदुष्टरक्तस्य वातिप्रवृत्तौ अतिप्रवृत्त रक्तस्य रसभोजनं। वातप्रकृतिकस्यैव वा। अन्ये तु दीप्तमध्यमन्दाग्नीनां यथासंख्यं क्षीरादिसिक्तमोदनं भोजनमाहुः। सात्म्यापेक्षया इत्येके। अतिस्रुतरक्तस्योपद्रवान् चिकित्सितुमाह—उपद्रवांश्च यथास्वमुपचरेत् उपद्रवांश्चेति शिरोऽभितापादीन् यथास्वमिति। स्वकीयेन स्वकीयेनापचारेणेत्यर्थः॥ १३॥

धातुक्षयात् स्रुते, रक्त इति। तस्मादनतिशीतादिभोजनैः प्रयत्नस्तंपुरुषमुपाचरेदिति सम्बन्धः। अग्निसन्धुक्षणार्थं शोणिताप्यायनार्थं उपद्रवपरिहारार्थं च ईषदम्लैर्दाड़िमामलकैः। तेषामेवाम्लेषु प्रधानत्वात्। चतुर्विधं यदेतद्धीति। सन्धानं शस्त्रपदस्य, स्कन्दनं शोणितस्य स्त्यानीकरणं पाचनं दहनं च शस्त्रपदस्य॥ १४॥

व्रणं कषायः सन्धत्ते इति। कषायरसद्रव्यं तच्च लोध्रादिकं। अन्ये तु

कल्पैरेतैस्त्रिभिर्वैद्यः प्रयतेत यथाविधि।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते॥
सशेषदोषे रुधिरे न व्याधिरतिवर्त्तते।
सावशेषे ततः स्थेयं नतु कुर्य्यादतिक्रमं॥
देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः॥ १५॥
स्रुतरक्तस्य सेकाद्यैः शीतैः प्रकुपितेऽनिले॥
शोफं सतोदं कोष्णेन सर्पिषा परिषेचयेत्॥ १६॥

हरितक्यादिकं पञ्चवल्कलादिकं चाहुः। हिमं शीतं। भस्मचौमादि-जनितं दहनं शलाकाप्रभृतिभिः। इदानीं पूर्वपूर्वसिद्धौ उत्तरोत्तरं विधा-वसरं प्रतिपादयन्नाह। अस्कन्दमाने रुधिरे इति। अस्कन्दमाने प्रथमं शीतोपचारादिकर्त्तव्यं। तेन यदा स्थानीभूयरक्तं न तिष्ठति तदा हरित-क्यादि पञ्चवल्कलादि वा प्रयोजयेत्। सन्धानेन चेन्नतिष्ठतिरक्तं तदा-पाचनं भस्मप्रयोजयेत्। एभि स्त्रिभिर्विधानैर्यदिनतिष्ठति रक्तं तदा दहनं शोणितस्थापनार्थं कर्त्तव्यमित्यर्थः। इदानीं रक्तातिस्रावदोषं दर्शयन्नाह॥ शेषदोषे यतोरक्ते इति। नव्याधिरतिवर्त्तते न हृद्धिं याति। सावशेषे ततः स्थेयमिति सावशेषे दोषे रक्तं पुनः संशमनादिभिर्जयेत्॥ कुतः पुनः शोणितस्रावणे अतिक्रमो न करणीय इत्याह। देहस्य रुधिरं मूलमिति मूलमिति उत्पत्तिस्थिति प्रलयेषु शोणितमेवहेतुरनेनैवधार्य्यते स्थाप्यते। शोणितावशेषे पश्चात् कर्म्म दर्शयन्नाह स्रुत रक्तस्य सेकाद्यैरिति॥१५॥१६॥

इति सूत्रस्थाने निवन्धसंग्रहे
चतुर्द्दशोऽध्यायः॥

पञ्चदशोऽध्यायः।

अथातो दोषधातुमलक्षयवृद्धिविज्ञानीयमध्यायं व्याख्यास्यामः ॥

दोषधातुमलमूलं हि शरीरं तस्मादेतेषां लक्षणमुच्यमानमुपधारय ॥ १ ॥

तत्र प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति ॥ २ ॥

अथातो दोषधातुमलक्षयवृद्धिविज्ञानीयमिति। दोषा वातादयः। धातवो रसादयः उपधातवश्च। मलाः पुरीषादयः। तेषां क्षयवृद्धिविज्ञानं यस्मिन्नस्ति स तथा। अन्ये तु मलशब्दाग्रे आदिशब्दो लुप्तो द्रष्टव्यस्तेन स्तन्यार्त्तवगर्भादयोऽपि धातवो गृह्यन्त इति वदन्ति। कुतः पुनरेषां क्षयवृद्धी वक्तव्ये इत्याह। दोषधातुमलमूलं हीति। हि यस्मादर्थे। यस्माच्छरीरं दोषादिमूलं यथा वृक्षादीनां सम्भवस्थितिप्रलयेषु मूलं प्रधानं तथा शरीरस्य वातादयः इत्यर्थः। दोषधातुमलादीनां साम्यक्षयवृद्धयः स्वभावात् स्वलिङ्गेन कर्म्माख्यलिङ्गेन च ज्ञेयाः तस्मात् साम्यादिज्ञाने एतल्लिङ्गद्वयं वाच्यं। तदाह वातस्य स्वभावाख्यं लिङ्गं रूक्षःशीत इत्यादि वातव्याधौ वक्ष्यते। पित्तस्य तु पित्तं तीक्ष्णं द्रवमित्यादि व्रणप्रश्ने। तथा कफस्य श्लेष्मा शीतो गुरुरित्यादि, एवं धातुमलयोरपि स्वाभावाख्यं लिङ्गं दर्शनीयं ॥ १ ॥

इहतु दोषादीनां कर्म्माख्यं लिङ्गं दर्शयन्नाह। तत्र प्रस्पन्दनोद्वहनेति। प्रस्पन्दनं शरीरस्य चलनं। इदं व्यानस्य कर्म्म। उद्वहनं इन्द्रियार्थानां धारणं उदानस्य कर्म्म। पूरणमाहारेण प्राणस्य कर्म्म। विवेको रसमूत्रपुरीषाणां पृथक्करणं समानस्य कर्म्म। शुक्रमूत्रादीनां वेगकाले कर्म्मकरणं अवेगकाले धारणं इत्यर्थादपानस्य। पञ्चधा प्रविभक्त इति प्राणो-

रागपक्त्योजस्तेजोमेधोष्मकृत्पित्तं पञ्चधा प्रविभक्त-मग्निकर्मणानुग्रहं करोति ॥ ३ ॥

सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्य्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्मानुग्रहं करोति ॥ ४ ॥

दानसमानव्यानापानभेदेन। अन्ये तु सामान्यं सर्व्ववायूनां प्रस्पन्दनादिकर्म्म आहुः। प्रस्पन्दनं श्वासप्रश्वासादिभावेन चलनं उद्वहनं दोषधातुमलानामिति इतोनयनम्। पूरणमाह रसादीनां स्वेषु स्वेष्वाशयेषु नयनं विवेकः। पूर्व्ववदत्रापि धारणं शरीरयन्त्रस्य कथमित्याह पञ्चधा प्रविभक्त इत्यादि ॥ २ ॥

प्रकृतिस्थस्य पित्तस्य कर्म्म निर्द्दिशमाह। रागपक्त्योजस्तेज इत्यादि। कृत्शब्दो रागादिभिः प्रत्येकं सम्बध्यते। रागकृत्रसस्य रञ्जकाग्निसंज्ञं पित्तं। पक्तिकृदाहारस्य पाचकाग्निसंज्ञं पित्तं। ओजस्कृत् साधकाग्निसंज्ञं पित्तं ओजोहृदिस्थं सोमात्मकं तेजस्कृदालोचकाग्निसंज्ञं पित्तं तेजो दृष्टिः। तदुक्तं तेजो दृष्टिरिति ख्यातं। तेजः शुक्रं प्रकीर्त्तितमिति। मेधाकृत् मेधा-ग्रन्थकर्षणसामर्थ्यं तस्यापि साधकाग्नि संज्ञमेव पित्तं कारकम्। उष्मकृत् त्वक्स्थं पित्तं भ्राजकाग्निसंज्ञं। उष्मा शरीरस्यौष्ण्यं पञ्चधा प्रविभक्तमिति पाचकरञ्जकसाधकालोचकभ्राजकभेदेन अग्निकर्म्मणेति रागादियदग्निकर्म्म तेन कृत्वेत्यर्थः। अनुग्रहमुपकारं करोति शरीरस्येत्यनुवर्त्तते अन्येतु तेजःशब्देन वर्णप्रकाशिनीं त्वक्स्थां दीप्तिमाहुः। इदं च रागादिकर्म्मसामान्यं सर्व्वपित्तानामिति वदन्ति ॥ ३ ॥

प्रकृतिस्थस्य कफस्य कर्म्म निर्द्दिशन्नाह। सन्धिसंश्लेषणस्नेहनेति। कृत्शब्दः सन्धिसंश्लेषणादिभिः प्रत्येकं सम्बध्यते। सन्धिसंश्लेषणकृत्सन्धिबन्धनं करोति। यद्यपि सन्धिसंश्लेषणं श्लेष्मकर्म्मव्रणप्रश्नेऽप्युक्तं तथापीह तद्वचनं व्यानस्य सन्धिकारित्वात्तस्यापि सन्धिसंश्लेषणं कर्म्मेति शङ्कानिरासार्थम्। स्नेहनकृदिति शरीरस्य स्नैग्ध्यं करोति स्निग्धत्वात्। रोपणकृत्-व्रणस्य सौम्यत्वात्। पूरणकृत्शरीरस्य बहुत्वान्मूर्त्तत्वाच्च। बलकृत्पुष्टिकृत्।

रसः प्रीणयति रक्तपुष्टिञ्च करोति। रक्तं वर्णप्रसादं मांसपुष्टिं जीवयति च। मांसं शरीरपुष्टिं मेदसश्च। मेदः-स्नेहस्वेदौ दृढत्वं पुष्टिमस्थ्नाञ्च। अस्थिदेहधारणं मज्ज्ञः पुष्टिञ्च। मज्जा प्रीतिं स्नेहं बलं शुक्रपुष्टिं पूरणमस्थ्नाञ्च करोति। शुक्रं धैर्य्यं च्यवनं प्रीतिं देहबलं हर्षं वीजार्थञ्च॥ ५॥

पुरीषमुपस्तम्भं वाय्वग्निधारणञ्च। वस्तिपूरणविक्लेद-

स्थैर्य्यकृत् त्वक्सन्धिदार्ढ्यकृत्। कफस्थानानां स्वकार्य्यसामर्थ्यं वा पञ्चधा प्रविभक्ताः। आशयभेदेन आमाशयोरःशिरःकण्ठसन्धिभेदेनेत्यर्थः। अन्ये तु तस्यैव कफस्य आशयभेदेन पञ्चधाभिन्नस्य श्लेष्मणः क्लेदकबोधकतर्पकावलम्बकान्याहुः। केचिदत्र कफकर्म्मसु बृंहणं तर्पणं च पठन्ति। व्याख्यानयन्ति च बृंहणं शरीरस्य द्रवत्वमूर्त्तिमत्ताभ्यां। तर्पणः तृप्तिजनको धातूनाम्॥ ४॥

इदानीं धातूनां प्रकृतिस्थानां प्राकृतं कर्मनिर्द्दिशन्नाह। रसस्तुष्टि प्रीणनमिति। शौर्य्यं शूरत्वं। अत एव क्लीवा अधीराः। च्यवनं शीघ्रत्वेन विस्रंसनं। प्रीतिं स्नेहं प्रमदासु देहबलमुत्साहोपचयलक्षणं। हर्षं पुनरुक्तं प्रमदास्वेव। वीजार्थञ्चेति वीजप्रयोजनं। यथा ऋतुक्षेत्रादिसम्पत्तौ वीजमङ्कुरजननं स्यात् एवं शुक्रमपि गर्भजनकमित्यर्थः। अन्ये त्वन्यथापठन्ति, रसः प्रीणयति, रक्तं जीवयति, मांसंलेपयति। मेदः स्नेहयति, अस्थिधारयति, मज्जास्थि पूरयति, शुक्रं धैर्य्यं च्यवनं प्रीतिं देहबलं हर्षवीजार्थकृत्। व्याख्यानयन्ति च रसः प्रीणयति धातून् तर्पयतीत्यर्थः। रक्तं जीवयति प्राणानुवर्त्तनं करोति मांसंलेपयति अस्थ्यादीन् अस्थि धारयति शरीरमित्यर्थं। धैर्य्यच्यवनमिति धैर्य्यस्य च्यवनं धैर्य्यच्यवनं च्युतिः प्रमदासु विषयेष्वित्यर्थः। अयं पाठो निबन्धकारैः सादरं पठितः॥ ५॥

अत ऊर्द्ध्वं मलानां प्राकृतं कर्म्मोच्यते। पुरीषमुपस्तम्भमिति करोतीत्यनुवर्त्तते। उपस्तम्भोऽवष्टम्भः शरीरधारणमित्यर्थः। केचित्

द्गम्भूलम्। स्वेदः क्लेदत्वक्सौकुमार्य्यकृत्। रक्तलक्षण-मार्त्तवं गर्भकृच्च। गर्भो गर्भलक्षणं। स्तन्यं स्तनयोरापीनत्वजननं जीवनञ्चेति। तेषां विधिवत्परिरक्षणं कुर्वीत॥ ६॥

अथऊर्द्ध्वमेषां क्षीणलक्षणं वक्ष्यामः। क्षयः पुन-

पुरीषकर्मसु प्रीणनं पठन्ति, न त्वाचार्य्याः। कश्चिदाचार्य्योऽत्र उपस्तम्भं न पठति। वस्ति पूरणविक्लेद् कृदिति। वस्तिर्मूत्राशयः। तस्य पूरणं विक्लेद-मार्द्रत्वञ्च मूत्रं करोतीत्यर्थः अन्ये तु क्लेदविरेकजं वस्तिपूरणकर्म्म चर्मिति पठन्ति व्याख्यानयन्ति च क्लेदविरेकजमिति क्लेदमार्द्रत्वं स च अहारस्य तस्य विरेचकत्वात् पृथक्त्वाज्जातं मूत्रं। स्वेदक्लेदत्वक्सौकुर्य्येति। केचित् स्वेदः क्लेदयतीति पठन्ति। अत उपधातूनां प्राकृतं कर्म्माह। रक्त-लक्षणमार्त्तवं गर्भकृदिति। रक्तस्य यानिलक्षणानि तान्यस्य सम्भवन्तीति स्वभावकथनं। गर्भकृच्चेति प्राकृतकर्म्म कथनं। चकारात् रक्त कर्मापि जीवनं करोति केचिदाचार्य्यारक्तलक्षणमार्त्तवं यथोक्तमकृत्रिमं गर्भकृच्चेति पठन्ति। व्याख्यानयन्ति च। यथोक्तमिति "शशासृक् प्रतिमं यच्च यद्वा ला-क्षारसोपम"मित्याद्युक्तलक्षणं। अकृत्रिममिति वातपित्तकफैरधः प्रसृतैरष्टधा आर्त्तवदूषकैरसृग्दररूपतया वाकृतं कृत्रिमम्। न कृत्रिमं अकृत्रिमं शुद्धं गर्भकृद्भवतीत्यर्थः। गर्भोगर्भलक्षणमिति। स्तनयोः श्यावमुखताचेत्यादिकं करोतीत्यध्याहारः॥ स्तन्यं स्तनयोरापीनत्वमिति। आपीनत्वजननं मांस-लत्वजननं। जीवनं वालानाम्। तेषामेव स्त्रीक्षीरसात्म्यत्वात्। प्रकृति-स्थानां रक्षणमाह॥ तत्र विधिवत्परिरक्षणं कुर्वीतेति। तत्रेति तेषु वाता-दिषु प्रकृतिस्थेषु विधिनोपपन्नं विधिरत्र स्वास्थ्य प्रवृत्तिकः परिरक्षणं सर्वतोरक्षणम्॥ ६॥

अत ऊर्द्ध्वं एषां क्षीणलक्षणमिति। केचिदत्र क्षयःपुनरेषामतिसंशो-धनातिसंशमनवेगविधारणासात्म्यान्नमनस्तापव्यायामानशनातिमैथुनैर्भवति इति क्षयकारणानि पठन्ति। एतानि प्रायो वायुवृद्धिं कुर्वन्ति। पित्त-

रेषामतिसंशोधनातिसंशमनवेगविधारणासात्म्यान्नमनस्ताप-व्यायामानशनातिमैथुनैर्भवति ॥ ७ ॥

तत्र वातक्षये मन्दचेष्टताऽल्पवाक्त्वमल्पहर्षो मूढ़संज्ञता च। पित्तक्षये मन्दोष्माग्निता निष्प्रभत्वञ्च। श्लेष्मक्षये रूक्षतान्तर्दाह आमाशयेतराशयशिरसां शून्यता सन्धिशैथिल्यं तृष्णा दौर्बल्यं प्रजागरणञ्च। तत्र स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः ॥ ८ ॥

कफयोस्तु क्षयमिति तस्मात् यथासम्भवं कारणं ज्ञेयम्। नास्मिन् पाठे प्रयोजनमित्याचार्य्या वदन्ति ॥ ७ ॥

तत्र वातक्षये मन्दचेष्टतेति। मन्दचेष्टता मन्दकायव्यापारता। अल्पहर्षोऽतुष्टिः। मूढ़संज्ञता नष्टसम्यग्ज्ञानता चकारात् प्राकृतकर्महानिः। तद्विरोधिनश्च श्लेष्मणः प्रकृतिः कर्म वृद्धिरिति चकारः समुच्चिनोति। एवं पित्तादिक्षयेष्वपि चकारे प्रयोजनं ज्ञेयम् ॥ पित्तक्षये मन्दोष्माग्निरिति। निष्प्रभता प्रभाहानिः। श्लेष्मक्षये रूक्षतेति आमाशये। यत्राशितादि पच्यते। इतराशयाः उरःकण्ठशिरःसन्धय इति श्लेष्माशय शून्यतेति कृते सति आमाशयो लब्धः। यदामाशयस्य पृथगुपादानं तद्विशेषेण शून्यता ख्यापनार्थम्। केचित् शिरःशब्दं सूत्रे पठन्ति शिरसोऽपि सर्व्वेन्द्रियाधिष्ठानत्वेन प्राधान्यात् पृथगभिधानं। दोषक्षये चिकित्सा माह। अत्र स्वयोनिवर्द्धनान्येवेति। स्वयोनिवर्द्धनान्येवेति शीतरूक्षादीनि। प्रतिकारः चिकित्सितम्। न पुनः स्वयोनिवर्द्धनान्यपि कटुकादीनि कुतः भूयस्तेनान्यदोषप्रकोपनत्वात्। तथाचोक्तं वातक्षये शीतरूक्षैर्लवण्यैः कटुकादिभिः। पित्तक्षयेऽपि कटुकैरुष्णैर्लवणादिभिः। क्षीरादिभिः स्निग्धशीतैः प्रतिकुर्य्यात् कफक्षये इति। अन्ये तु व्याख्यानयन्ति, स्वयोनिवर्द्धनानि स्वयोनिः आत्महेतुः। तत्र वायोर्वायुरेवहेतुः। पित्तस्याग्निर्हेतुः। कफस्य हेतुरापः। पित्तक्षये पित्तवर्द्धनानि कफक्षये कफवर्द्धनानि वातक्षये वातवर्द्धनानि।

रसक्षये हृत्पीड़ाकम्पः शून्यतातृष्णा च। शोणितक्षये त्वक्पारुष्यमम्लशीतप्रार्थना सिराशैथिल्यञ्च। मांसक्षये स्फिग्गण्डौष्ठोपस्थोरुवक्षः कक्षापिण्डिकोदरग्रीवाशुष्कतारौक्ष्यतोदौ गात्राणां सदनं धमनीशैथिल्यञ्च। मेदःक्षये प्लीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च। अस्थिक्षयेऽस्थितोदोदन्तनखभङ्गो रौक्ष्यञ्च॥ मज्जक्षयेऽल्पशुक्रता

कफस्य योनीरसः पित्तस्य रक्तमित्यपरे रसरक्तयोरपिवर्द्धनानि आप्यतैजसद्रव्याणि इति स एवार्थः॥ ८॥

इदानीं धातुक्षयं दर्शयति। रसक्षये हृत्पीडेति। हृत्शब्दः पीड़ादिभिः शून्यतान्तैः प्रत्येकं सम्बध्यते। तृष्णा उदकपानाभिलाषः चकारप्रयोजनं दोषक्षयप्रस्तावेदर्शितम्। अन्ये तु रसक्षये हृत्पीड़ाकम्पःशोषः शून्यता मनसो वा। शेषं तृष्णाचेति पठन्ति व्याख्यानयन्ति च शोषं शरीरस्य, शून्यता आमशायस्य मनसो वा शेषं समम्। शोणितक्षये त्वक् पारुष्यमिति। अम्लशीतप्रार्थनेति। शोणितक्षये सति वातवृद्धा तत्प्रत्यनीकः अम्लरसेच्छा। तथारक्तस्य द्रवत्वात्क्षये तेजोवृद्धौ शीतप्रार्थनापि। केचिदग्निसोमीयत्वाद्रक्तस्य तत्तत्स्वगुणयोरम्लशीतयोरक्तमप्यत्र द्रष्टव्यम्। मांसक्षये स्फिक् गण्डौष्ठेति। स्फिचौ कटिप्रोथौ। गण्डौ गल्लौ। उपस्थो योनिः। उरुलोके जङ्घेति व्याख्याता। वक्षः उरः। पिण्डिका जानुगुल्फयोरन्तरम्। शुष्कशब्दःस्फिगादिभिः प्रत्येकं सम्बध्यते। मेदःक्षये प्लीहाभीति। रौक्ष्यं त्वचि मेदुरमांसप्रार्थनेति मेदुरं स्निग्धतमम् प्रार्थना अभिलाषः॥ अस्थिक्षये अस्थिशूलमिति। रौक्ष्यं देहस्य दन्तनखानां वा। दन्तानामस्थिसत्स्थानत्वाद्भङ्गः। मज्जक्षयेऽल्प शुक्रतेति। पर्व्वभेद ग्रन्थिपीड़ा। अस्थिशून्यता रिक्तता पूरणाभावात्॥ शुक्रक्षये मेढ्रवृषणेति चिराद्वाप्रसेक कथञ्चित्प्रवृत्तावपि चिरकालेन क्षरणं अल्परक्तशुक्रदर्शनं मज्जमिश्रमल्परक्तत्वमिच्छति। अन्ये तु अल्पशुक्रवृषणदर्शनं धातुक्षयात्, कुपितोवायुः शोणितमल्पशुक्रमिश्र निस्रावयति शुक्रस्य सर्व्वशरीरव्यापिनोऽपि विशेषाधारत्वान्मेढ्रवृषणनिर्देशः।

मज्जभेदोऽस्थिनिस्तोदोऽस्थिशून्यता च। शुक्रक्षयमेढ्रवृषण-वेदनाऽशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चाल्परक्तशुक्रदर्शनञ्च तत्रापि स्वयोनिवर्द्धनद्रव्योपयोगः प्रतीकारः ॥८॥

पुरीषक्षये हृदयपार्श्वपीड़ा सशब्दस्य च वायोरूर्द्ध्वगमनं सञ्चरणञ्च। मूत्रक्षये वस्तितोदोऽल्पमूत्रता च। अत्रापि स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः। स्वेदक्षये स्तब्धरोमकू-

चिकित्सासूत्रं निर्दिशन्नाह ॥ तत्रापि स्वयोनिवर्द्धनद्रव्योपयोग इति। स्वयोनिवर्द्धनमपि समानेन द्रव्येण समानगुणेन समानगुणभूयिष्ठेन वा। समानेन द्रव्येण यथा, रक्तेन वर्द्धन्ते मांसं, मांसेन मेदः मेदसा अस्थि, तरुणसंज्ञकेनास्थ्ना मज्जा, मज्जा शुक्रं शुक्रेण समानगुणेन यथा रक्तक्षये तैजसद्रव्योपयोगः। तेजोगुणभूयिष्ठद्रव्योपयोगेनेत्यादि बोद्धव्यम्। द्रव्यग्रहणमुपलक्षणम्। तेन कर्मणापि यद्यस्य धातोरभिवृद्धिकरं तत्क्षये तत्सेव्यम्। तत्र स्वयोनिद्रव्याणां अवबोधार्थं धातुमलोपधातुषु श्लोकाः कथ्यन्ते। यद्यपि 'पञ्चभूतानां वाह्यः पाकोद्विधापुनः। तथाप्यपां प्रधानत्वात्रसः सौम्योऽभिधीयते। अतिरिक्तागुणारक्ते वह्नेर्मांसेतु पार्थिवाः। मेदस्यम्बुभुवोर्वह्निपृथिव्यनिलतेजसाम्। मज्जशुक्रे च सौम्यस्य सूत्रेषु निखिलागुणाः। भूवो विश्वार्त्तवेलग्नेः प्रस्वेदस्तन्ययोरपाम्। इति धातुमलेष्वग्रागुणाः प्राधान्यतःस्थिताः। प्रायेण भूगुणागर्भेस्तोकाद्यनुग्रह इति" ॥ ८ ॥

मलक्षयं दर्शयन्नाह। पुरीषक्षये हृदयपार्श्वेति। कुक्षिरत्र जठरम् ॥ मूत्रक्षये वस्तितोदोऽल्पेति। अत्र चिकित्सासूत्रं निर्दिशन्नाह। अत्रापि स्वयोनीति। पुरीषक्षये माषकुल्माषादीनाम्। मूत्रक्षये इक्षुत्रपुसादीनामुपयोगः॥ स्वेदक्षये स्तब्धरोमकूपेति। स्पर्शवैगुण्यं स्पर्शहानिः। चिकित्सामाह। तत्राभ्यङ्गः स्वेदोपयोगश्चेति। चकारात् स्वेदजनन कुक्कुटवराहादिमांसोपयोगश्चाभ्यन्तरो लभ्यते। उपधातुक्षयमाह॥ आर्त्तवक्षये

पता त्वक्शोषः स्पर्शवैगुण्यं स्वेदनाशश्च तत्राभ्यङ्गः स्वेदोपयोगश्च॥ आर्त्तवक्षये यथोचितकालादर्शनमल्पता वा योनिवेदना च तत्र संशोधनमाग्नेयानाञ्च द्रव्याणां विधिवदुपयोगः॥ स्तन्यक्षये स्तनयोर्म्लानता स्तन्यासम्भवोऽल्पता वा तत्र श्लेष्मवर्द्धनद्रव्योपयोगः। गर्भक्षये गर्भास्पन्दनमनुन्नतकुक्षिता च तत्र प्राप्तवस्तिकालायाः क्षीरवस्तिप्रयोगो मेध्यान्नोपयोगश्चेति॥ १०॥

अत ऊर्द्धमतिवृद्धानां दोषधातुमलानां लक्षणं वक्ष्यामः। वृद्धिः पुनरेषां स्वयोनिवर्द्धनान्युपसेवनाद्भवति। तत्र वातवृद्धौ त्वक्पारुष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता

यथोचितकालेति। यथोचितकालो मासि मासितार्त्तवस्रवणम्। चिकित्सामाह॥ अत्र संशोधनमाग्नेयानाञ्चेति।· संशोधनमिह सामान्यमिति केचित् संशोधनमिह वमनं न विरेक इत्यपरे। कुतः विरेचनेन हि पित्तक्षयादार्त्तवस्य क्षय एवस्यादिति वमनेन तु सौम्यधातोर्निर्हृते आग्नेयधातौ वृद्धे आर्त्तवमाप्याय्यते। आग्नेयानां द्रव्याणामिति तिलमाषसुराशुक्तादीनाम्॥ स्तन्यक्षये स्तनयोर्म्लानतास्तन्यासम्भवोऽल्पेति म्लानता अनुन्नतिः। चिकित्सामाह। अत्र श्लेष्मवर्द्धनेति स्तन्यस्य रसजत्वात्। गर्भक्षये गर्भास्पन्देति अत्र चिकित्सामाह। तत्र प्राप्तवस्तिकालेति। प्राप्तकालाया इति प्राप्ताष्टममासाया इत्यर्थः। मध्यान्नोपयोगश्चेति स्निग्धान्नोपयोगः। मेध्याण्डोपयोग इत्यन्ये पठन्ति। मेध्याण्डानि वृष्याण्डानि, वस्तमत्स्याण्डानीति व्याख्यानयन्ति॥ १०॥

अत ऊर्द्धमतिप्रवृद्धानामिति चकारोऽयं वातस्य प्रकृतिकर्म्मणोऽतिप्रयत्नं समुच्चिनोति, एवं पित्तकफे रसादिष्वपि चकारप्रयोजनम्। वाक्पारुष्यं वचनकार्कश्यम्। केचित् वाक्पारुष्यं न पठन्ति। कार्श्यं मांसक्षयः। कार्ष्ण्यं कृष्णत्वं शरीरे। अल्पबलत्वमुत्साहहानिः पित्तवृद्धौ पीता-

निद्रानाशोऽल्पबलत्वं गाढ़वर्च्चस्त्वञ्च । पित्तवृद्धौ पीतावभासता सन्तापः शीतकामित्वमल्पनिद्रता मूर्च्छा बलहानिरिन्द्रियदौर्ब्बल्यं पीतविण्मूत्रनेत्रत्वञ्च । श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्य्यं गौरवमवसादस्तन्द्रा निद्रासन्ध्यस्थिविश्लेषश्च । रसोऽतिवृद्धो हृदयोत्क्लेदं प्रसेकञ्चापादयति । रक्तं रक्ताङ्गाक्षितां सिरापूर्णत्वञ्च । मांसं स्फिग्गण्डौष्ठोपस्थोरुबाहुजङ्घासु वृद्धिं गुरुगात्रताञ्च । मेदः स्निग्धाङ्गतामुदरपार्श्ववृद्धिं कासश्वासादीन् दौर्गन्ध्यञ्च । अस्थि अध्यस्थीन्यधिदन्तांश्च । मज्जा सर्व्वाङ्गनेत्रगौरवं । शुक्रं शुक्राश्मरीमतिप्रादुर्भावञ्च । पुरीषमाटोपं कुक्षौ शूलञ्च । मूत्रं मुहुर्मुहुः प्रवृत्तिं वस्तितोदमाध्मानञ्च । स्वेदस्त्वचो दौर्गन्ध्यं कण्डूञ्च ।

वभासतेति । अल्पनिद्रता किञ्चित्स्निग्धत्वात् पित्तस्य । मूर्च्छा सर्व्वेन्द्रियशक्तेस्तिरस्कारः । बलहानिरिह ओजोहानिः । सन्तापात्तत्क्षयोपपत्तेः ॥ श्लेष्मवृद्धौ शौक्ल्यमिति शौक्ल्यं शैत्ये त्वगादीनां स्थैर्य्यं गात्राणां स्तम्भः । अवसादः चित्तदेहयोर्ग्लानिः । तन्द्रा निद्राभेदः । सन्धिविश्लेषोऽत्यन्त वृद्धेन विघटनम् । सन्ध्यस्थिश्लिष्टतेति केचित् पठन्ति । व्याख्यानयन्ति च कफोपचितत्वात् सुष्ठुसंघट्टनं सन्ध्यस्थ्नोर्भवति । अध्यस्थिश्लिष्टतेति क्वचित्पाठः । धातूनामतिवृद्धिं दर्शयन्नाह ॥ रसोऽतिवृद्धो हृदयेति । हृदयोत्क्लेदं हृल्लासं अन्ये च्छर्द्दिमाहुः । प्रसेकं लालास्राव इत्यर्थः । आपादयतीति क्रियापदम् । गर्भजठराभिवृद्धिं स्वेदश्चेत्यादि यावदनुवर्त्तते । रक्तं रक्ताङ्गाक्षीति । अध्यस्थि अधिकास्थीति । अधिदन्तानिति अधिकान् दन्तान् । चकारात् केशनखयोरप्यतिवृद्धिर्ज्ञेया ॥ शुक्रं शुक्राश्मरीति । अतिप्रादुर्भावमतिप्रवृत्तिं शुक्रस्येत्यर्थः । मलानामतिवृद्धिं दर्शयन्नाह । पुरीषमाटोपमिति आटोपमाध्मानं क्षोभमित्यन्ये । मूत्रं मुहुर्मुहुःप्रवृत्तिमिति । आध्मानमिह वस्तेरेव । स्वेदस्त्वचो दौर्गन्ध्यमिति उपधातूनामतिवृद्धिं निर्द्दिष्टुमाह । आर्त्तवमङ्गमर्द्दमिति ।

आर्त्तवमङ्गमर्दमतिप्रवृत्तिं दौर्ब्बल्यञ्च। स्तन्यं स्तनयोरापीनत्वं मुहुर्मुहुः प्रवृत्तिं तोदञ्च। गर्भो जठराभिवृद्धिं शोथञ्च। तेषां यथास्वं संशोधनं क्षपणञ्च क्षयादविरुद्धैः क्रियाविशेषैः प्रतिकुर्व्वीत॥ ११॥

पूर्व्वः पूर्व्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परं।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितं॥ १२॥

बललक्षणं बलक्षयलक्षणमत ऊर्द्ध्वं वक्ष्यामः। तत्र रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत्खल्वोजस्तदेव

अङ्गमर्द्दो वेदनाविशेषः। दौर्गन्ध्यं पित्तधर्म्मत्वादार्त्तवस्य। तदुक्तं ईषत् कृष्णं विगन्धञ्चेत्यादि। दौर्ब्बल्यमित्यन्ये पठन्ति। चकाराद्रक्तगुल्मादीनपि। स्तन्यं स्तनयोरापीनत्वमिति चिकित्सासूत्रं निर्दिशन्नाह। तेषां यथास्वमिति। यथास्वं हृदयस्यात्मीयम्। क्षपणमत्र संशमनं क्षयादविरुद्धैः क्रियाविशेषैरिति तन्त्रान्तरोक्तैः। तथाहि "स्निग्धाविस्रादिभिर्वायुं पित्तं क्षौद्रफलत्रिकैः। कफं गुडार्द्रकाद्यैश्च जयेद्दोषाविरोधिभिः।" अन्ये त्वेवं पठन्ति तेषां क्षयादविरुद्धैः क्रियाविशेषैः कुर्व्वीत। क्रियाविशेषैरिति क्रियासंशोधनसंशमनाहाराचाराख्या। स्वयं तावदेते वृद्धाः अनर्थकराः॥ ११॥

परम्परया वर्जिता परधातुभिरपि महानर्थकारिण इति दर्शयन्नाह॥ पूर्व्वः पूर्व्वोऽतिवृद्धत्वादिति हि यस्मादर्थे। ह्रासनमिति ह्रासोऽत्र वृद्धेर्हानिः। पूर्व्वः पूर्व्व इत्याद्युपलक्षणम्। तेन परोऽपि वृद्धः पूर्व्वं वर्द्धयति तथा-परोऽपि क्षीणः पूर्व्वं क्षपयति। केचिदमुं श्लोकं यस्य धातुक्षयाद्वायुरित्यादिश्लोकस्याग्रे पठन्ति॥ १२॥

बललक्षणबलक्षयलक्षणमिति। परमुत्कृष्टं तेज इव तेजः। तेजो घृतादद्घृतं यथा कृत्स्नक्षीरस्नेहः तथैव तेजोऽपि कृत्स्नधातुस्नेह इत्यर्थः। यत्परं तेज इति यदुत्कृष्टं सार इत्यन्ये व्याख्यानयन्ति। तत्खल्वोजस्तदेव बलमिति। इयं विवादोक्तिः चिकित्सैक्यार्था। परमार्थतस्तु बलौजसोर्भेद एव। यथाभेदस्तदुच्यते। सर्वधातुस्नेहभूतस्योपचयलक्षणस्योजसो

बलमित्युच्यते स्वशास्त्रसिद्धान्तात्। तत्र बलेन स्थिरोपचितमांसता सर्वचेष्टास्वप्रतिघातः स्वरवर्णप्रसादो बाह्यानामाभ्यन्तराणाञ्च करणानामात्मकार्य्यप्रतिपत्तिर्भवति ॥१३॥

भवन्ति चात्र।

ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम्।
विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम् ॥
देहस्यावयवस्तेन व्याप्तो भवति देहिनाम्।
तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणाम् ॥

रूपरसशौर्य्यवीर्य्यादि विद्यते बलस्य तु भारहरणादिशक्तिगम्यत्वात् रसवीर्य्यवर्णादिगुणानविद्यन्ते। अतोऽनयोर्भेदोऽस्त्येवेति तथाच बलौजसोर्भेदो वेदोत्पत्तावध्याये उक्तः। प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्चेति। तन्त्रान्तरे तु ओजः शब्देन रसोऽप्युच्यते। जीव शोणितमपि ओजः शब्देनामनन्ति। उष्माणमपि ओजः शब्देनापरे वदन्ति। बलस्य प्रकृतं कर्म्मनिर्देष्टुमाह ॥ तत्र बलेन स्थिरोपचितमांसतेति। एतत्सर्वधातुसारोपचयलक्षणेन बलेन। सर्वचेष्टास्विति कायवाङ्मनोव्यापारेषु अप्रतिघातोऽप्रतिहतत्वम्। एतत् भारहरणादिशक्तिलक्षणेन बलेन। स्वरवर्णप्रसाद इति प्रसादो नैर्म्मल्यम्। एतदुभयात्मकेन। बाह्यानामित्यादि, बाह्यानां करणानां कर्म्मेन्द्रियाणां आभ्यन्तराणां बुद्धीन्द्रियाणाम्। आत्मकार्य्यप्रतिपत्तिः स्वकीयकार्य्याविरोधो भवति। प्रतिपत्तिः चिरानुष्ठानमित्यन्ये। तत्र बाह्यानां वाक्पाणिपादपायूपस्थानामात्मकार्य्याणि वचनादानगमनविसर्गानन्दनानि। आभ्यन्तराणां करणानां श्रोत्रत्वक्चक्षुर्जिह्वानासिकानामात्मकार्य्याणि शब्दस्पर्शरूपरसगन्धग्रहणानि एतदुभयात्मकेन बलेन। केचिदन्यथा व्याख्यानयन्ति बाह्यानां श्रोत्रत्वक्चक्षुर्घ्राणजिह्वावाक्पाणिपायूपस्थपादानां आभ्यन्तराणां मनोबुद्धिप्रभृतीनाम्। बलकारणभूतमोजः ॥१३॥

बलचिकित्सार्थं स्वचिकित्सार्थमपि प्राकृतैर्गुणैर्निर्दिशन्नाह ॥ ओजः

अभिघातात्क्षयात्कोपाच्छोकाद्ध्यानाच्छ्रमात्क्षुधः।
ओजः सङ्क्षीयते ह्येभ्यो धातुग्रहणनिःसृतम्।
तेजः समीरितं तस्माद्विस्रंसयति देहिनः॥ १४॥

सोमात्मकं इति सोमात्मकं सौम्यम्। स्निग्धं स्नेहगुणयुक्तम्। शुक्लमिति श्वेतम्। तत्तु चरके "हृदितिष्ठति यच्छुद्धं रक्तमीषत् सपीतकम्" इत्यादि-श्लोकेन ओजस्त्रिवर्णं पठति। तथाहि शुद्धग्रहणेन शुक्लयुक्तम्। अतः शुक्ल-पीतरक्तवर्णास्त्रय उक्ताः। भेलाप्योजसस्त्रय एव वर्णाः। येनात्र वर्णः शुक्लमोज इति यदुक्तं शुक्रौजसोरभेदात्। अपरं तैलक्षौद्रवर्णद्वयं प्राप्तम्। तेनात्रापि शुक्लरक्तपीतवर्णास्त्रय एवौजस उक्ताः। न चात्र शुक्रौजसोर्भेदोऽङ्गीकर्त्तव्यः तस्मिन् सति अष्टधातुत्वं स्यात्। तस्मात् रसादिधातुस्नेहपरं परहे-तुकः स्नेहः शुक्रं शुक्रस्नेहात् क्षीरस्थघृतमिवाभिन्नमोजः शुक्रेण। अपरे शुक्लस्थाने शुक्रं पठन्ति युक्तं चैतत् शुक्रवर्णेनैवोजोवर्णानां निर्दिष्टत्वात्। शीतं शीतवीर्य्यम्। स्थिरं शरीरावयवस्थैर्य्यकारि। सरं प्रसरणशीलम्। अन्ये-त्वत्र रसमिति पठन्ति। प्रधानरसकल्पनया मधुररसमिति व्याख्यानयन्ति। विविक्तं श्रेष्ठगुणैर्युक्तम्। अन्ये तु विविक्तं प्रत्यग्रमाहुः। ततः प्रत्यग्रैरेवा-न्नादिभिराप्यायनं मृदुकोमलं मृत्स्नश्चेति पिच्छिलम्। चकाराद् गुर्व्वादयो-गुणा अनुक्ताः समुच्चीयन्ते। प्राणानामग्निसोमादीनामायतनं स्थानम्। उत्तमं श्रेष्ठम्। तत्र बलेनेत्यादिवाक्येन स्थितौ हेतुत्वं प्रतिपादयति। देहस्यावयवस्तेन व्याप्तो भवति देहिनामिति। तेन ओजसा भवति उत्-पद्यते। इदानीं प्रलये तस्यैव हेतुत्वं दर्शयन्नाह॥ तदभावादित्यादि। शीर्य्यन्ते विनश्यन्ति। अयं पाठः अभावात् समग्रो न लिखितः इदानीमभि-घातादिभिः हेतुभिरोजसः क्षयं निर्दिशन्नाह॥ अभिघातात् क्षयादिति। एभ्योऽभिघातादिहेतुभ्यः। धातुग्रहणमिति धातवो गृह्यन्ते यैस्तानिति धातुग्रहणानि धातुवाहीनि स्रोतांसि। तेभ्यो निःसृतं निर्गतं सर्व्वधातु-स्नेहपरं पराक्रपेण। अथवा धातुग्रहणं हृदयं धातुस्रोतसां स्थानत्वात् तस्मात् हृदयनिःसृतं स्रोतसां मुखैरेव। अन्ये तु हृदयमेव धातून् गृह्णाति

तस्य विस्रंसो व्यापत्क्षय इति लिङ्गानि व्यापन्नस्य भवन्ति। सन्धिविश्लेषो गात्राणां सदनं दोषच्यवनं क्रियासन्निरोधश्च विस्रंसे। स्तब्धगुरुगात्रता वातशोफो वर्णभेदो ग्लानिस्तन्द्रा निद्रा च व्यापन्ने। मूर्च्छा मांसक्षयो मोहः प्रलापो मरणमिति क्षये॥ १५॥

भवन्ति चात्र।

त्रयो दोषा बलस्योक्ता व्यापद्विस्रंसनक्षयाः।

इति धातुग्रहणशब्देनैव हृदयमुच्यते तेजः समीरितं सम्प्रेरितः सम्यक् प्रेरितं वातेनेति शेषः तस्मात हृदयाद्विस्रंसयति च्यवयति॥ १४॥

तस्यौजसः क्षयभेदात् साध्यासाध्यज्ञानार्थं स्वलक्षणैर्निर्दिशन्नाह॥ तस्य विस्रंसो व्यापत्क्षय इति लिङ्गानीति। विस्रंसः स्थानाच्युतिरभिघातादिभिरेव। व्यापदन्यथापत्तिः। सादुष्टदोषदूष्यसंसर्गात्। क्षयः स्वप्रमाणात् शोकध्यानक्षयादिभिः विस्रंसादीनामोजः क्षयभेदानां किं लिङ्गमित्याह॥ सन्धिविश्लेषागात्राणामिति सन्धिविश्लेषः सन्धीनां विघट्टनम्। दोषच्यवनं स्थानाद्वातादीनां भ्रंशः। अन्ये दोषैः कृत्वा च्यवनमोजस इति वदन्ति। दोषाणां च्यवनं मलानां च्यवनमिति केचित्। क्रियाणां कायवाङ्मानसानाम्। सन्निरोधः क्रियाशब्दादग्रे न लुप्तोद्रष्टव्यः। नञ् ईषदर्थे। तेन क्रियाणामीषत् सन्निरोध इत्यन्ये व्याचक्षते। चकारात् बलस्य प्राकृतकर्महानिः। एवं व्यापत्तौ क्षये च चकारप्रयोजनम्। एतानि लिङ्गानि विस्रंसे भवन्तीति योज्यम्। लिङ्गानि व्यापन्नस्य भवन्तीति केचित् पठन्ति। व्यापन्नस्य दोषदूषितस्य। स्तब्धगुरुगात्रतेति। स्तब्धगुरुभ्यां गात्राणामिति सम्बध्यते। स्तब्धगात्रता जान्वादेरवनमनासामर्थ्यम्। वर्णभेदो गौरादिवर्णान्यत्वम्। ग्लानिरप्रहर्षः तन्द्रा इन्द्रियार्थाकर्म्मण्यता। व्यापन्ने लिङ्गानि भवन्तीत्यनुवर्त्तते॥ मूर्च्छामांसक्षयामोह इति मूर्च्छाविज्ञानेन्द्रियनिरोधः। मोहो वैचित्त्यं प्रलापोऽसंबद्धभाषणम्। क्षये लिङ्गानि भवन्तीत्यनुवर्त्तते॥ १५॥

विश्लेषसादौ गात्राणां दोषविस्रंसनं श्रमः॥
अप्राचुर्य्यं क्रियाणाञ्च बलविस्रंसलक्षणं।
गुरुत्वं स्तब्धताङ्गेषु ग्लानिर्वर्णस्य भेदनम्॥
तन्द्रानिद्रा वातशोफो बलव्यापदिलक्षणम्।
मूर्च्छा मांसक्षयो मोहः प्रलापोऽज्ञानमेव च।
पूर्वोक्तानि च लिङ्गानि मरणञ्च बलक्षये॥

तत्र विस्रंसे व्यापन्ने च क्रियाविशेषैरविरुद्धैर्बलमाप्यायेत्। नष्टसंज्ञमितरञ्च वर्जयेत्।

तेजोप्याग्नेयं क्रमशः पच्यमानानां धातूनामभिनिर्वृत्तमन्तरस्थं स्नेहजातं वसाख्यं स्त्रीणां विशेषतो भवति, तेन मार्दवसौकुमार्य्यमृदुलपरोमतोत्साहदृष्टि स्थितिपक्तिकान्तिदीप्तयोभवन्ति ; तत् कषायतिक्तशीतरूक्षविष्टम्भिवेगविघातव्यवायव्यायामव्याधिकर्षणैश्च विक्रियते। तस्यापि पारुष्यवर्णभेदतोऽनिष्प्रभत्वानि विस्रंसने भवन्ति। कार्श्यं मन्दाग्नितावस्तिर्य्यक् चुगतिव्यापत्तौ इथ्यग्निबलश्चान्यनिलप्रकोप मरणानि क्षये, तत्रापि स्नेहपानाभ्यङ्गप्रदेहपरिषेकस्निग्धलघ्वन्नानि क्षये विदधीत॥ १६॥

गद्योक्तमेवार्थं श्लोकैराह। त्रयोदोषा बलस्योक्ता इति त्रयोदोषास्तिस्रो विकृतयः। विश्लेषसादावित्यादिपूर्व्वोक्तानि विस्रंसव्यापदो लिङ्गानि इत्यर्थः। चिकित्सासूत्रं निर्दिशन्नाह। तत्र विस्रंसे व्यापदे चेति। क्रियाविशेषैः रसायनवाजीकरणादिभिरविरुद्धैरन्नाद्यविरुद्धैः। बलं शक्त्युपचयलक्षणम्। आप्याययेत् वर्द्धयेत्। क्षीणस्यावस्थया वर्जनमाहुः। इतरन्तु इत्यादि, इतरं क्षीणं वर्जयेदित्याह। मूढ़संज्ञं पूर्व्वं मोहस्योक्तत्वात्। पुनरिह मूढ़संज्ञं वर्जयेदित्येतस्याग्रे केचित् सुश्रुताध्यायिनः तेजोप्याग्नेयं

भवन्ति चात्र ।

दोषधातुमलक्षीणो बलक्षीणोपि वा नरः ।
स्वयोनिवर्द्धनं यत्तदन्नपानं प्रकांक्षति ॥
यद्यदाहारजातंहि क्षीणः प्रार्थयते नरः ।
तस्य तस्य स लाभेतु तं तं क्षयमपोहति ॥

क्रमशः इत्यादिकं विदधीत इत्यन्तं न पठन्ति । कुतः निबन्धकारैरस्वीकृतत्वात् । इतरन्तु इत्यादि पाठाग्रे असौ पठितव्यः ॥ १६ ॥

दोषधातुमलक्षीण इति । स्वयोनिवर्द्धनं आत्मकारणवर्द्धनं । यदन्नपानं तदभिलषति ॥ यद्यदाहारजातं हीति आहारजातमाहारसमूहम् । केचिदार्य्या अमुं श्लोकं न पठन्ति । केचित् सुश्रुताध्यायिनोऽत्रदोषधात्वादिक्षयविनाशार्थं देयमन्नादिकं पठन्ति । "यवान् मुद्गान् हरेणूंश्च रूक्षञ्चलघुभोजनम् । कषायकटुतिक्तं च वातक्षीणोऽभिकाङ्क्षति । तिलमाषकुलत्थादिपिष्टान्नविकृतिं तथा । मस्तु शुक्ताम्लतक्राणि पित्तक्षीणस्तथा दधि । मांसं माहिषं वाराहमाजं गुड़गुरूनि च । श्लेष्मक्षीणोऽभिलषतिक्षीरञ्च स्वप्नदधीनि च ॥ इक्षु मांसं रसं मद्यं मधुसर्पिगुड़ोदकम् । अम्लमांसं यवागुञ्च रसक्षीणोऽभिवाञ्छति । द्राक्षादड़िमयुक्तानि सम्नेहलवणानिच । रक्तसिद्धानि मांसानि रक्तक्षीणोऽभिकाङ्क्षति । अम्लानि दधिसिद्धानि तथा खाड़वकानि च । स्थूलक्रव्यादमांसानि मांसक्षीणोऽभिकाङ्क्षति । मेदः सिद्धानि मांसानि ग्राम्यानूपौदकानि च सक्षाराणि विशेषेणमेदःक्षीणोऽभिकाङ्क्षति । रसान् सुसिद्धान् सास्थीनि मांसानीहाभिकाङ्क्षति । अस्थिक्षीणस्तथा मांसं मज्जास्थि स्नेहसंयुम् । स्वादम्लसंयुतं द्रव्यं मज्जक्षीणोऽभिकाङ्क्षति । मयूरकुक्कुटाण्डानि हंससारसयोस्तथा । ग्राम्यानूपौदकानाञ्च शुक्रक्षीणोऽभिकाङ्क्षति । यवानि यवकान्नानि शाकानि विविधानि च । मायूरं मांसयूषञ्च वर्च्चक्षीणोऽभिकाङ्क्षति । पेयानिक्षुरसंक्षीरं सगुड़ं वदरीदकम् । मूत्रक्षीणोऽभिलषति त्रपुसैर्व्वारुकाणि च । अभ्यङ्गो मर्द्दनं यच्च निवात शयनाशनं । गुरुप्रावरणञ्चैव स्वेदक्षीणोऽभिकाङ्क्षति । कट्वम्ललवणा-

यस्य धातुक्षयाद्वायुः संज्ञां कर्म च नाशयेत्।
प्रक्षीणञ्च बलं यस्य नासौ शक्यश्चिकित्सितुम्॥ १७॥

रसनिमित्तमेव स्थौल्यं कार्श्यञ्च तत्र श्लेष्मलाहारसेविनोऽध्यशनशीलस्याव्यायामिनो दिवास्वप्नरतस्यचाम एवान्नरसो मधुरतरश्च शरीरमनुक्रामन्नतिस्नेहान्मेदो जनयति तदतिस्थौल्यमापादयति तमतिस्थूलं क्षुद्रश्वासपिपासाक्षुत-स्वप्नस्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेवावि-

शन्ति विदाहीनि गुरूणि च। फलशाकानुपानानि स्त्रीव्यञ्जनात्तर्वचयात्। मृगाजाविवराहाणां गर्भां वाञ्छति संस्कृतान्। वसाशून्यप्राकारादीन् भोक्तुं गर्भपरिचये। यूषशाल्यान्नमांसानि गोचोरं शर्करान्तथा। आमवं दधिहृद्यानि चयेस्तन्यस्य वाञ्छति।" यस्य धातुचयाद्वायुरिति इतरन्तु मूढसंज्ञम्। वर्जयेदित्यनेनैवास्योक्तार्थत्वात्। केचिदमुं न पठन्ति। सर्वधातुचयव्यापकत्वाद्भिन्नविषयोऽयं श्लोकस्तस्मात् पठनीय इत्यन्ये॥ पूर्वः पूर्वोऽति वृद्धत्वात् वर्द्धयेद्धि परम्परं तस्मादतिवृद्धानां धातूनां ह्रासनं हितम्॥ १७॥

रसनिमित्तमेव स्थौल्यं कार्श्यञ्चेति चकारान्मध्यशरीरं च। ननु कथमेक एवरसः परस्परविरुद्धयोः स्थौल्यकार्श्ययोर्हेतुरित्याह॥ तत्र श्लेष्मलाहारसेविन इत्यादि अध्यशनशीलस्येति अजीर्णभोजनाभ्यासिन इत्यर्थः। ननु मेदस्विनो दीप्ताग्नित्वे कथमामरससम्भवः। नैषदोषः दीप्ताग्नित्वेऽपि अध्यशनशीलत्वादामरसो भवति। तर्हि कथं रसश्चापक्वश्चेति विरोधीयवचनम्। न ह्यपक्वो रसः व्यपदेशं लभते। सत्यं जठरेणाग्निनारसः क्लेदभावेन सकृद् एव किन्तु धात्वग्निभिरपाकादाम इत्युच्यते। शरीरमनुक्रामन्निति शरीरमनुक्रामन्नित्यर्थः। मेदो जनयतीतिविशिष्टाहारवशान्मेदसावृतमार्गत्वाच्च धातुद्वयमतिक्रम्य मेद एव वर्द्धयति। तदतिस्थौल्यमापादयतीति तन्मेद आपादयति करोति। क्रथनं स्वपतःकण्ठे घर्घुरारवः। अन्येतु अकस्मात् श्वासावरोधे क्रथनं कथयन्ति। गद्गदत्वमव्यक्तवचनत्वम्। क्षिप्रमेवाविशन्तिइति। एते क्षुद्रश्वासादयः स्थौल्यं शीघ्रमेव प्रविशन्ति, स्थले

शन्ति सौकुमार्य्यान्मेदसः सर्वक्रियास्वसमर्थः कफमेदोनिरुद्ध-मार्गत्वाच्चाल्पव्यवायो भवत्यावृतमार्गत्वादेवं शेषा धातवो नाप्यायन्तेऽत्यर्थमतोऽल्पप्राणो भवति प्रमेहपिडकाज्वरभगन्दरविद्रधिवातविकाराणामन्यतमं प्राप्य पञ्चत्वमुपयाति सर्व एवचास्य रोगाबलवन्तो भवन्त्यावृतमार्गत्वात् स्रोतसामतस्त-स्योत्पत्तिहेतुं परिहरेत । उत्पन्नेतु शिलाजतुगुग्गुलुगोमूत्र-त्रिफलालोहरजोरसाञ्जनमधुयवमुद्गकोरदूषकश्यामाकोद्दा-लकादीनां विरूक्षणच्छेदनीयानाञ्च द्रव्याणां विधिवदुप-योगो व्यायामो लेखनवस्त्युपयोगश्चेति ॥ १८ ॥

तत्र पुनर्वातलाहारसेविनोऽतिव्यायामव्यवायाध्ययन-भयशोकध्यानरात्रिजागरणपिपासाक्षुत्कषायाल्पाशनप्रस्ट-

भवन्तीत्यर्थः । शेषा धातवो नाप्यायन्ते अत्यर्थमितिशेषधातवोऽस्थ्यादयः । वातविकाराणामिति अत्र वातविकारा मेदःकृतमार्गावरणनिमित्तवात-कोपविकारा इत्यर्थः । अन्यतममिति एषामेकम् । पञ्चत्वमुपयातीतिमरण-मुपगच्छतीत्यर्थः । तस्य चिकित्सामाह । अतस्तस्योत्पत्तिहेतुमिति । तस्योत्पत्तिहेतुं परिहरेदित्यादितस्योत्पत्तिं परिहरेदित्यनेन निदानपरि-वर्ज्जनेनानागतव्याधेश्चिकित्सोक्ता । उत्पन्नेतु जाते पुनरित्यर्थः । उद्दान-कादीनामिति उद्दानक आरण्यकोद्रव्यः । आदिशब्दात् गवेधुकादीनां ग्रहणम् । विरूक्षणच्छेदनीयानामिति विरूक्षणं मेदोघ्नं, छेदनीयं स्रोतोवि-शोधनीयम् । विधिवदुपयोग इति पुरुषाग्निबलमात्राविधानात्तानामुप-योग इत्यर्थः । लेखनवस्त्युपयोगश्चेति लेखनवस्तिश्चिकित्सितोक्ता । "त्रि-फलाक्वाथगोमूत्र चौद्रक्षारसमन्विताः । ऊषकादिप्रतिवापावस्तयो लेखनाः स्मृताः" । चकाराद्व्यायामादयः । मृदवः काङ्कायनशक्तवश्च ॥ १८ ॥

कार्श्यनिमित्तं दर्शयन्नाह ॥ तत्र पुनर्वातलाहारसेविन इति अतिरूक्षाहारसेविनः । अतिव्यायामेत्यादि अतिशब्दो व्यायामादिभिः प्रत्येकं

तिमिरुपशोषितो रसधातुः शरीरमननुक्रामन्नल्पत्वान्नप्रीणयति तस्मादतिकार्श्यञ्च भवति। सोऽतिकृशः क्षुत्पिपासाशीतोष्णवातवर्षभारादानेष्वसहिष्णुः वातरोगप्रायोऽल्पप्राणश्च क्रियासु भवति श्वासकासशोषप्लीहोदराग्निसादगुल्मरक्तपित्तानामन्यतमं प्राप्य मरणमुपयाति सर्व एव चास्य रोगा बलवन्तो भवन्त्यल्पप्राणत्वादतस्तस्योत्पत्तिहेतुं परिहरेत्। उत्पन्ने तु पयस्याश्वगन्धाविदारीगन्धाशतावरीबलातिबलानागबलानां मधुराणामन्यासाञ्चौषधीनामुपयोगः क्षीरदधिघृतमांसशालिषष्टिकयवगोधूमानाञ्च दिवास्वप्नब्रह्मचर्य्याव्यायामबृंहणवस्तुपयोगश्चेति ॥ १९ ॥

यः पुनरुभयसाधारणान्युपसेवेत तस्यान्नरसः शरीरमनुक्रामन् समान् धातूनुपचिनोति समधातुत्वान्मध्यशरीरो भवति सर्वक्रियासु समर्थः क्षुत्पिपासाशीतोष्णवर्षातपसहो बलवांश्च स सततमनुपालयितव्य इति ॥ २० ॥

सम्बध्यते। चयो धातुचयः। उपशोषितो रसधातुरिति अतिरूक्षीकृतः अल्पीकृतश्च न प्रीणाति ईषत्प्रीणातीत्यर्थः। सोऽतिकृश इत्यनेनोपचयलक्षणबलाभावो दर्शितः। वातरोगप्राय इति वातरोगबहुल इत्यर्थः। अल्पप्राणश्च क्रियासु भवतीतिकायवाङ्मानसीषु क्रियासु विषयेऽल्पशक्तिर्भवति। एतेन शक्तिलक्षणबलाभाव उक्तः। शोषो राजयक्ष्मा उत्पद्येतेति। बृंहणद्रव्यतः क्वाथास्तत्कल्कशेह सैन्धवयुक्ताः खजप्रमथिता वस्तयो बृंहणा मता इति चकारात् सन्तर्पणमपि लघुकर्त्तव्यम् ॥ १९ ॥

मध्यशरीरस्य हेतुं गुणं च दर्शयन्नाह। यः पुनरुभयसाधारणानीति उभयसाधारणानि नातिस्निग्धरूक्षाणि। स्वास्थ्यवृत्तिकानि द्रव्याणि षष्टिकरक्तशालिनावकदाडिमतण्डुलीयकादीनि। आदि वा स्वप्नादीश्च विहा-

भवन्ति चात्र ॥

अत्यन्तगर्हितावेतौ सदा स्थूलकृशौ नरौ ।
श्रेष्ठो मध्यशरीरस्तु कृशः स्थूलात्तु पूजितः ॥
दोषः प्रकुपितो धातून् क्षपयत्यात्मतेजसा ।
इद्धः स्वतेजसा वह्निरुखागतमिवोदकम् ॥

रविशेषात् । सर्व्वक्रियासु समर्थ इति अनेनैव बलवत्त्वे लब्धे यद्बलवांश्चेति करोति तन्नियमार्थम् । एवं भूताहारविहारसेवी बलवानेव भवतीत्यर्थः । मध्यशरीरस्य चिकित्सामाह । सततमनुपालयितव्य इति स्वस्थवृत्तानुवर्त्तनेनेति शेषः । तयोर्द्वयोः कृशस्थूलयोर्दोषवत्त्वेऽपि स्थूलस्यातिशयदोषवत्त्वम् ॥ २० ॥

मध्यशरीरस्य च गुणवत्त्वं निर्देष्टुमाह । अत्यन्तकुत्सिताविताविति । कुतस्थूलात् कृशः पूजित ? उच्यते-स्थूलस्य क्रियाक्षमत्वात् अतिशयेन व्याधिपीडनाच्च दोषदीनां क्षयवृद्धिरेकत्र निर्द्दिष्टेऽपि दोषा एवधातुमलक्षयहेतव इति दर्शयन्नाह । दोषप्रकुपितधातूनिति दोषो वातपित्तकफसंज्ञकः । धातूनिति धातुशब्दोऽत्र मलेष्वपि वर्त्तते देहधारणसामर्थ्यात् अथवा धातुशब्द उपलक्षणं तेन मलाः प्राप्यन्ते । क्षपयतीति क्षपणम् । वृद्धिसाम्ययोरजनकम् । आत्मतेजसेति आत्मशक्त्या । तत्र पित्तं कटूष्णत्वात् धातून् क्षपयति । वायुश्च शोषणहेतुत्वात् कफो मार्गावरोधकत्वात् । इद्धोदीप्तः उखागतं स्थालीस्थम् । कुतः पुनः पलादिमानेन दोषादीनां प्रमाणं न निर्द्दिष्टमित्याह । वैलक्षण्यादिसदृशत्वात् । विसदृशत्वं चात्र वातादिप्रकृति रसरक्तादिभारसहनदीर्घकृशादिकायभेदेन । अस्थायित्वात्तथैवेति अनवस्थितत्वात् अस्थायित्वात् । द्विविधेऽपि काले, नित्यगे आवस्थिकेऽपि च । तत्र नित्यगे प्रातः श्लेष्मोपचीयते मध्याह्ने पित्तमित्यादि । प्रत्यहमाह्निकक्षयादिभेदेन । तथा हेमन्ते श्लेष्मोपचीयते । ग्रीष्मे वायुरित्यादि । आर्त्तवचर्यादिभेदेन तथा आवस्थिकेऽपि, बाल्ये श्लेष्माभिवर्द्धते । तथा बाल्ये शुक्राल्पत्वम् । कन्यानामार्त्तवस्तन्याभावः । युवत्सु पित्तमुपचीयते । वृद्धेषु

वैलक्षण्याच्छरीराणामस्थायित्वात्तथैव च।
दोषधातुमलानान्तु परिमाणं न विद्यते॥ २१॥
एषां समत्वं यच्चापि भिषग्भिरवधार्य्यते।
न तत् स्वास्थ्यादृते शक्यं वक्तुमन्येन हेतुना॥
दोषादीनां त्वसमतामनुमानेन लक्षयेत्।
अप्रसन्नेन्द्रियं वीक्ष्य पुरुषं कुशलो भिषक्॥

वायुरित्यादीना। परिमाणमिति सर्व्वतो मानं न विद्यते। येन कस्यचिदेव कचिदेवमानं कर्त्तुं शक्यते न सर्व्वत इत्यर्थः॥ २१॥

ननु दोषादीनां पलादि मानं विना साम्यं कथं ज्ञेयमित्याह। एषां समत्वं यच्चापीति। एषां दोषधातुमलानाम्। तदपि साम्यं स्वास्थ्यं विना क्षयवृद्धिभेदात्मकमसाम्यमनुमानेन दर्शयन्नाह। दोषादीनान्त्वसमतामिति। आदिशब्देन धातुमलानां ग्रहणम्। तुशब्दः पुनरर्थे असमतां क्षयवृद्धिलक्षणाम्। अप्रसन्नेन्द्रियमित्यत्राप्रसन्नतनूमिति यन्नक्तं तदिन्द्रियाधिष्ठानानामिन्द्रियशक्तीनां च प्रसन्नत्वं बोधयति। वीक्ष्येत्यनेन वर्णादिसर्व्वमुक्तं भवति। वीक्ष्येत्यत्र ज्ञात्वा इत्येके पठन्ति असाम्यंवृद्धिक्षयात्मकमित्यनुमानेन प्रतिपाद्य किं कुर्य्यादित्याह। क्षपयेद्बृंहयेच्चापीति। क्षपयेद् वृद्धान् दोषधातुमलान् ह्रासयेदित्यर्थः। बृंहयेत् वृद्धयेत्तानेव क्षीणान् वर्द्धयेत् इति। क्षपणबृंहणयोर्मात्रावधिं दर्शयन्नाह। तावद्यावदिति। कुतः पुनरारोग्यमवधिरित्याह। एतत्साम्यस्य लक्षणमित्यादि। अयं पाठः समग्रोऽभावान्नलिखितः। दोषादिसाम्यं स्वास्थ्यम्। तद्दर्शयितुमाह। समदोषः समग्निश्चेति। ननु द्विविधेऽपि काले नित्यं दोषचयाद्यनुबन्धात् कथं समदोषत्वं? तथाहि नित्यगे आह्निके तावत् प्रातः कफः कुप्यति। मध्याह्ने पित्तमित्यादि तथा आर्त्तवेऽपि, हेमन्ते कफश्चीयते। वसन्ते स एव कुप्यति इति। तथा आवस्थिकेऽपकाले बाल्ये विवर्द्धने श्लेष्मा इत्याद्युक्तत्वात्। उच्यते दोषचयादिवाल्पत्वाद् तद्व्यपदेश इति।

समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥
स्वस्थस्य रक्षणं कुर्य्यादस्वस्थस्य तु बुद्धिमान् ।
क्षपयेद्बृंहयेच्चापि दोषधातुमलान् भिषक् ।
तावद्यावदरोगः स्यान्नरो रोगसमन्वितः ॥ २२ ॥

एकतण्डुलाभ्यवहारो अनशनव्यपदेशवत् । अन्येत्त्वेवं वदन्ति आर्त्तवच-र्य्यादौ स्वस्थवृत्तोक्तविधिभिराहोरात्रिके पुनरनागताबाधोक्तदन्तधावनादि-विधानेन दोषाणां साम्यमुपपन्नमेवेति । समधातुमलक्रिय इति समधातु-मलानां क्रिया यस्य स तथा । क्रिया स्वप्नजागरणादिकेति, केचिन्निश्च-क्रियाशब्दं व्याख्यानयन्ति । प्रसन्नात्मेन्द्रियमना इति, आत्माऽदेहः, अन्य कर्मात्मा बद्धपुरुषः । तस्य निर्विकारस्यापि शरीरगुणदोषाभ्यां बद्धत्व-माचार्य्यैर्बहुधोक्तम् । अस्माभिर्ग्रन्थगौरवभयान्नोच्यते । इन्द्रियाणि भौति-काधिष्ठानशक्तिरूपाणि । मनस्तु इन्द्रियानुग्राहकमन्तःकरणम् । एवम्भूतः पुरुषः सुस्थ इत्यभिधीयते । पूर्वाचार्य्यैरितिशेषः । दोषसाम्ये नैवाग्न्या-दिसाम्यं लब्धम् । तत् किं पृथगाचार्य्यः प्राह । उच्यते न दोषैः समा अग्न्यादयो भवितुमर्हन्तीति । कुतः ? पृथक् चिकित्सितत्वात् । पित्तहरण-मपि सर्पिरजापयश्चाग्निं वर्द्धयति । अत्र श्रीमाधवः प्राह "लब्धाश्च सम-दोषत्वे समाग्नित्वादयस्तथा । पृथगुक्ताः किमर्थं ते भक्तिमेतन्निरर्थक-मिति" समाधानमाह । "दोषेभ्यस्ते यतो भिन्ना पृथगुक्ता अतस्तु ते । प्रकृत्या तादृशाः केचिदत्यर्थं वा न दूषितमिति ।" दोषादीनां त्वसमतामित्यादि श्लोकं वैलक्षण्याच्छरीराणामित्यादिश्लोकाग्रे केचिदन्यथा पठन्ति । तथा हि पलादिमानाभावात् कथमेषां साम्यं ज्ञेयमित्याह । दोषादीनात्त्वस-मतामनुमानेन लक्षयेदिति, श्लोकार्थमेव दोषसाम्यज्ञानार्थं पठन्ति । यदनु-मानेन समताज्ञेया तदेव दर्शयन्नाह । एषां समत्वं यच्चापीत्यादि । एतेन साम्यकार्य्येण स्वास्थ्येन दोषाणां समता ज्ञातव्येत्यर्थः । अतोऽन्तरं समदोषः

षोड़शोऽध्यायः ॥

अथातः कर्णव्यधबन्धविधिमध्यायं व्याख्यास्यामः ॥

रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते षष्ठे मासि सप्तमे वा शुक्लपक्षे प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु कृत-मङ्गलस्वस्तिवाचनं धात्र्यङ्के कुमारमुपवेश्य बालक्रीड़नकैः प्रलोभ्याभिसान्त्वयन् भिषग्वामहस्तेनाकृष्य कर्णं दैवकृते

समाग्निश्चेत्यादि पठन्ति। व्याख्यानञ्चास्य पूर्व्वमेवोक्तम्। इदानीं स्वास्थ्य-प्रतिपालनाय अस्वास्थ्यस्य च स्वास्थ्यकरणाय आह स्वस्थस्य रक्षणं कुर्य्यात् कुर्य्यादस्वस्थस्य च बुद्धिमान् क्षपयेद्बृंहयेच्चेत्यादि ईदृशम् कृत्वा केचित् पाठक्रमं पठन्ति ॥ २२ ॥

इति निबन्धसंग्रहे सूत्रस्थाने पञ्चदशोऽध्यायः ।

अथातः कर्णव्यधबन्धविधिमध्यायं व्याख्यास्यामः। रक्षाभूषणनिमित्त-मिति निमित्तशब्दो रक्षाभूषणाभ्यां सह प्रत्येकं सम्बध्यते अन्ये तु रक्षार्थं भूषणानि रक्षाभूषणानि तन्निमित्तमित्यर्थः यद्यपि विद्धकर्णत्वाद्बलिनि बाले रक्तमांसप्रियत्वात् रक्षोभयमस्त्येव तथापि व्रणस्याल्पकालत्वाद्वैकृतच्छिद्र-त्वाद्वा रक्षणार्थं भवति। कस्मिन् काले कर्णस्य व्यधः कर्त्तव्य इत्याह। तौ षष्ठे मासे सप्तमे वा शुक्लपक्षे इति। ताविति तौ कर्णौ षष्ठे मासे सप्तमे वेति नायं जन्मकालादूर्द्ध्वं किन्तु संवत्सरादेः भाद्रपदात् यः षष्ठोमासः माघः सप्तमः फाल्गुनः तयोर्मध्ये एकस्मिन्निति मङ्गलं गीतादिस्वस्तिवाचनं आशीर्वादोच्चारणम्। धात्र्यङ्क इति धात्री कुमारपरिचारिका कुमारमाता-द्वेति बालपाद्विपुरुषस्योत्सङ्गे बालक्रीड़नकैरिति कृत्रिमहस्त्यश्वबलीवर्द-

छिद्रे आदित्यकरावभासिते शनैः शनैर्दक्षिणहस्तेन ऋजु-विध्येत् प्रतनुकं सूच्या बहलमारया पूर्वं दक्षिणं कुमारस्य वामं कन्यायास्ततः पिचुवर्त्तिं प्रवेश्य सम्यक् विद्धमामतैलेन परिषेचयेत्। शोणितबहुत्वेन वेदनया वान्यदेशविद्धमिति जानीयान्निरुपद्रवतया तद्देशविद्धमिति ॥ १ ॥

तत्राज्ञेन यदृच्छया विद्धासु सिरासु कालिकामर्म्मरिका-लोहितिकास्पद्रवा भवन्ति। तत्र कालिकायां ज्वरो दाहः-श्वयथुर्वेदना च भवति। मर्म्मरिकायां वेदनाज्वरो ग्रन्थयश्च।

शकादिभिः अस्याग्रे भक्ष्यविशेषैर्वेति केचित् पठन्ति मोदकादिभिः। दैवकृते छिद्रे इति प्राकृत जन्मकर्म्मकृतं इत्यर्थः ऋजु अवक्रं कर्णविशेषेण सूचीविशेषविषयं नियमयन्नाह॥ प्रतनुकं सूच्येति प्रकर्षेण तनुं कर्णं सूच्या विध्येदित्यर्थः बहुलमारयेति स्थूलकर्णमारया विध्येदित्यर्थः, आरा चर्म्मकाराणां चर्म्मभेदनं शस्त्रं, बहुलं कठिनमिति लक्षणटिप्पनेनोक्तं पुरुष-स्त्रीभेदेन प्राक् कर्णव्यधने प्रशस्तत्वेन विशेषमाह। पूर्वं दक्षिणमिति। कर्णे विद्धे सति किं कार्य्यमित्याह। ततो वर्त्तिं प्रवेश्य सम्यगिति। विद्धा च पिचुवर्त्तिं प्रवेशयेत्। अन्यदेशविध्यस्य विज्ञानोपायमाह। शोणितबहु-त्वेनेति। दैवकृतच्छिद्रविद्धस्य विज्ञानमाह। निरुपद्रवतयेति। तद्देशविद्ध-मिति दैवकृतच्छिद्रं जानीयादित्यनुवर्त्तते ॥ १ ॥

सिरासु दोषं वक्तुमाह। तत्राज्ञेनेति। अज्ञेन तु कालिकालोहिति-कयोर्वर्णो नैव परिहारः कर्त्तव्यः मर्म्मरिकायास्तु वर्णानुक्तौ दैवकृत-च्छिद्रव्यधनेनेति प्रत्येकमुपद्रवान् वक्तुमाह। तत्र कालिकायां ज्वर इति। कालिकादिव्यधोपद्रवचिकित्सामाह। तेषु यथास्वमिति। तेषु ज्वरा-दिषु व्याधिषु यथास्वं प्रतिकुर्वीतेति यस्य ज्वरादिव्याधेर्यः प्रतीकारः तेन तं प्रतिकुर्वीतेत्यर्थः कालिकादिव्यधादन्यत्रापि व्यापदं चिकित्सां च निर्दिश-न्नाह। क्लिष्टा जिह्माप्रशस्तेति। क्लिष्टा असनोज्ञा जिह्माया वक्रतमा

लोहितिकायां मन्यास्तम्भापतानकशिरोग्रहकर्णशूलानि भवन्ति। तेषु यथास्वं प्रतिकुर्वीत। क्लिष्टजिह्माप्रशस्तसूची-व्यधाद्गाढ़तरवर्त्तित्वाद्द दोषप्रकोपादप्रशस्तव्यधाद्वा यत्र संरम्भो वेदना वा भवति तत्र वर्त्तिमुपहृत्याशु मधुकैरण्डमूलमञ्जिष्ठायवतिलकल्कैर्मधुघृतप्रगाढ़ैरालेपयेत्तावद्यावत्सुरूढ इति सुरूढं चैनं पुनर्विध्येत् विधानन्तु पूर्वोक्तमेव। त्र्यहात्त्र्यहाच्च वर्त्तिञ्च स्थूलतरां दद्यात्परिषेकं तमेव। अथ व्यपगतदोषोपद्रवे कर्णे वर्द्धनार्थं लघुवर्द्धनकं कुर्य्यात् ॥२॥

भवति चात्र॥

एवं विवर्द्धितः कर्णश्छिद्यते तु द्विधा नृणां।
दोषतो वाभिघाताद्वा सन्धानं तस्य मे शृणु॥

तत्र समासेन पञ्चदशकर्णबन्धनाकृतयः। तद्यथा नेमि-

अप्रशस्ता यथोक्तगुणहीना दोषसमुदायादिति दोषप्रकोपात् अप्रशस्तव्यधाद्वेति अदैवकृतच्छिद्रे व्यधाद्वर्हितशस्त्रादिव्यधाद्वा। संरम्भ श्वयथुः केचित्क्लिष्टजिह्मा प्रशस्तसूचीव्यधाद्गाढ़तरवर्त्तित्वादिति न पठन्ति दोषसमुदायादित्यादि च पठन्ति। सुरूढ़ञ्चैनं पुनर्विध्येदिति। दुर्विद्धापच्चिकित्सां प्रतिपाद्य सम्यग्विद्धे चिकित्सामाह तत्र सम्यग्विद्धमामतैलेन परिषेचयेत्। त्र्यहात्त्र्यहाच्च वर्त्तिं स्थूलां स्थूलतरां दद्यात् परिषेकञ्च तमेव आमतैलेनेति अपक्वतैलेन तिलकल्कनिपीड़नेन सुष्टितः परिस्रुतेनेत्यर्थः। तमेवेति आमतैलपरिषेकमेव इत्यर्थः गतोपद्रवे कर्णे वर्द्धनोपायमाह। अथ व्यपगत दोषोपद्रवेति। लघुवर्द्धनकमिति दोषविशेषादपामार्गनिम्बकार्पासादीनां काष्ठानामन्यतमस्य अथवा सीसकादिघटितां धातुपुष्पाकृतिं कुर्य्यात् ॥ २ ॥

एवं विवर्द्धित इति दोषशब्दो व्याधिष्वपि वर्त्तते तेन दोषैः वातादिभिस्तज्जनितव्याधिभिरित्यर्थः अभिघातादिति पतनपीड़नादिभिः इदानीं·

सन्धानक उत्पलभेद्यको वल्लूरक आसङ्गिमो गण्डकर्ण आहार्य्यो निर्वेधिमो व्यायोजिमः कपाटसन्धिकोऽर्द्धकपाटसन्धिकः सङ्क्षिप्तो हीनकर्णो वल्लीकर्णो यष्टिकर्णः काकौष्ठक इति। तेषु पृथुलायतसमोभयपालिर्नेमिसन्धानकः। वृत्तायतसमोभयपालिरुत्पलभेद्यकः। ह्रस्ववृत्तसमोभयपालिर्वल्लूरकः। अभ्यन्तरदीर्घैकपालिरासङ्गिमः। बाह्यदीर्घैकपालिर्गण्डकर्णः। अपालिरुभयतोऽप्याहार्य्यः। पीठोपमपालि-

सम्बधितस्य सन्धानाय सम्बेधयस्य च परिहाराय चाह। तत्र समासेन पञ्चदश कर्णेति। समासेन संक्षेपेण विस्तरेण तु कर्णबन्धा अमिताः यद्यपि पञ्चदशसु कर्णेषु मध्ये दश एव बन्धास्तथापि बन्ध्यबाहुल्याद्बन्धेष्वपि बन्धशब्दो वर्त्तते यथा छत्रिणो यान्तीत्यत्र छत्रिबाहुल्यादच्छत्रिष्वपि छत्रिव्यपदेशः तत्र समासेन पञ्चदशकर्णाकृतय इत्यन्ये पठन्ति तानेव बन्धान्नामभिर्निर्दिशन्नाह। तद्यथा नेमिसन्धानक इत्यादि। तद्यथेति निदर्शने तत्रामीबन्धविकल्पाः नित्यकर्मदर्शनादभ्यासाच्च सर्वे जायन्ते यद्यपि एषां नामभिरेवाकृतयः प्रायेण व्याख्यातास्तथापि लक्षणसूत्रं निर्दिशन्नाह। तेषु पृथुलायतेति। पृथुलो विस्तीर्णः आयतो दीर्घः समस्तुल्यः इत्यम्भूते द्वे पाल्यौ यस्य स तथा। पालिः कर्णलतिका। नेमिसन्धानक इति नेमीचक्रधारा, तद्वत् सन्धानं यस्य स नेमीसन्धानकः। एतत् कर्णबन्धत्रयं समोभयपालिविषतया ज्ञेयम्। अभ्यन्तरदीर्घैकेति। यस्त्वभ्यन्तरदीर्घैकपालिः कथञ्चिच्छिन्नो भवति तस्येतरं पाल्यभावाद्बाह्यपालिमूले व्यासङ्गः आसङ्गिमः। गण्डकर्ण इति, सानुबन्धकपोलमांसमुत्कृत्य बाह्यदीर्घपाल्यग्रभागः सन्धीयते यस्मिन् स गण्डकर्णः एतद्बन्धद्वयमेकपालिकम्। अपालिरीति, ईषत्पालि उभयतो गण्डप्रदेशान् सानुबन्धमांसमाहृत्य पाल्याकारं कृत्वा सन्धानं यस्य क्रियते स आहार्य्यः। पीठोपमपालिरिति। यस्य तु पालिद्वयं मूलत एवच्छिन्नं भवति स पीठोपमपालिः निर्वेधिम इति वेधेन निष्पन्न इत्यर्थः पालिद्वय-

उभयतः क्षीणपुत्रिकाश्रितो निर्वेधिमः। स्थूलाणुसमविषमपालिर्व्यायोजिमः। अभ्यन्तरदीर्घैकपालिरितराल्पपालिः कपाटसन्धिकः। बाह्यदीर्घैकपालिरितराल्पपालिरर्द्धकपाटसन्धिकः। तत्र दशैते कर्णबन्धविकल्पाः साध्यास्तेषां स्वनामभिरेवाकृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चासाध्यास्तत्र शुष्कशष्कुलिरुत्सन्नपालिरितराल्पपालिः संक्षिप्तः। अनधिष्ठानपालिः पर्य्यन्तयोः क्षीणमांसो हीनकर्णः। तनुविषमाल्पपालिर्वल्लीकर्णः। ग्रथितमांसस्तब्धसिराततः। सूक्ष्मपालिर्यष्टीकर्णः। निर्मांससंक्षिप्ताग्राल्पशोणितपालिः काकौष्ठकपालिरिति। बद्धेष्वपि तु शोफदाहरागपाकपिड़कास्रावयुक्ता न सिद्धिमुपयान्ति॥ ३ ॥

हीनं कर्णपुत्रिकाया उपरि विद्धो यो निर्वेधनीय इत्यर्थः इदमपलिकं कर्णबन्धद्वयम्। स्थूलाणुसमेति। स्थूलाणुत्वाभ्यामेका पालि समा अपरा विषमा ते उल्लिख्य नानाप्रकारयोजनात् व्यायोजिम इति। अभ्यन्तरदीर्घैकपालिरिति। अभ्यन्तरदीर्घैकपालिरितराल्पपाल्या सह बहिःसन्धानात् कपाटवत्सन्धाने यत्र कपाटसन्धिकः। अर्द्धकपाटसन्धिक इति। बाह्यदीर्घैकपालिरितराल्पपाल्यसहाभ्यन्तरसन्धानेन अर्द्धकपाटवत् यत्र सन्धीयते सोऽर्द्धकपाटसन्धिकः इदं कर्णबेधत्रयं विषमोभयपालिकम्। तत्र दशैते कर्णबन्धेति। तत्र तेषु पञ्चदशसु कर्णबन्धविकल्पेषु मध्ये तेषामाकारज्ञानमधिकृत्याह तेषां नामभिरेवेति। शेषाणां परिहारार्थमाह। संक्षिप्तादय पञ्चासाध्या इति। तेषां लक्षणमाह। शुष्कशष्कुलिरिति शुष्कबाह्यपाल्यधिष्ठानः इतराल्पपालिरिति इतरा गण्डदेशानुगता अल्पापालिर्यस्य स तथा। अनधिष्ठानपालिपर्य्यन्तयोश्च क्षीणमांसः क्षीणकर्णः अनधिष्ठानपालिरिति अविद्यमानोऽधिष्ठानपालीयस्य स तथा पर्य्यन्तयोश्च गण्डबाह्यपार्श्वयोः। तनुविषमाल्पेति। विषमास्तनुत्वस्थूलत्वाभ्याम्। तत्र ते पञ्चकर्णबन्धाः सपालयो

भवन्ति चात्र।

यस्य पालिद्वयमपि कर्णस्य न भवेदिह।
कर्णपीठं समे मध्ये तस्य विद्धा विवर्द्धयेत्॥
वाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत्।
आभ्यन्तरायां दीर्घायां वाह्यसन्धिरुदाहृतः॥
एकैवतु भवेत्पालिः स्थूला पृथ्वी स्थिरा च या।
तां द्विधा पाटयित्वा तु छित्त्वा चोपरिसन्धयेत्॥
गण्डादुत्पाद्य मांसेन सानुबन्धेन जीवता।
कर्णपालिमपालेस्तु कुर्य्यान्निर्लिख्य शास्त्रवित्॥ ४॥
अतोन्यतमं बन्धं चिकीर्षुरग्रोपहरणीयोक्तोपसंस्कृत·

ऽथ साध्या असाध्या इति साधनाय अशक्याः केचिदत्र पाठं न पठन्ति एतेषां पञ्चानामसाध्यत्वे हेतुमाह। बन्धेष्वपि तु शोफेति अन्ये तु शोफाद्युपद्रवोपेतानां पूर्वेषां दशानां बन्धानां साध्यानामप्यसाध्यत्वमाहुः॥ ३॥

बन्धानां गदोक्तानां कर्णबन्धानां मध्ये निर्वेधिमस्य सन्धानसूत्रमाह यस्य पालिद्वयमपीति। इहेति कर्णबन्धमध्ये कर्णपीठं पुत्रिकोपरिप्रदेशम्। व्यायोजिम कपाटसन्धिकार्द्धकपाटसन्धिकानां सन्धानसूत्रमाह। वाह्यायामिह दीर्घायामिति। यदा पालिर्दीर्घाभवेत् तदा अभ्यन्तरः सन्धिकर्त्तव्य इत्यर्थः अभ्यन्तरा च पालिर्यदा दीर्घास्यात् तदा वाह्यसन्धिर्विधेय इति कपाटसन्धिकार्द्धकपाटसन्धिकयोरेवेदं सन्धानसूत्रं न तु व्यायोजिमस्येत्यन्ये। इदानीमासङ्गिमस्य सन्धानसूत्रमाह। एकैवतु भवेत्पालिरिति। वल्लूरकस्येदं सन्धानसूत्रं सम्भाव्यते इत्यन्ये वदन्ति आहार्य्यस्य सन्धिसूत्रं निर्देष्टुमाह। गण्डादुत्पाद्यमांसेनेति। सानुबन्धेनेति गण्डप्रदेशलग्नेनेत्यर्थः। जीवतेति शोणितसहितेनेत्यर्थः अन्ये तु गण्डकर्णास्यापातत सन्धानसूत्रमिति वदन्ति॥ ४॥

अतःपरं सम्बन्धविधिः। अग्रोपहरणीयोक्तमन्मृतमिति अग्रोपहरणीयाक्तो

म्भारं विशेषतश्चात्रोपहारेत् सुरां मण्डं क्षीरमुदकं धान्याम्लं कपालचूर्णञ्चेति । ततोऽङ्गनां पुरुषं वा ग्रथितकेशान्तं लघुभुक्तवन्तमाप्तैः सुपरिगृहीतञ्च कृत्वा बन्धमुपधार्य्य छेद्यभेद्यलेख्यव्यधनैरुपपन्नैरुपपाद्यकर्णं शोणितमवेक्षेत तद्दुष्टमदुष्टं चेति । तत्र वातदुष्टे धान्याम्लोष्णोदकाभ्यां पित्तदुष्टे शीतोदकपयोभ्यां श्लेष्मदुष्टे सुरामण्डोष्णोदकाभ्यां प्रक्षाल्यकर्णौ पुनरवलिख्यानुन्नतमहीनमविषमञ्च कर्णसन्धिं सन्निवेश्य स्थितरक्तं सन्दध्यात् । ततो मधुतेनाभ्यज्य पिचुप्लोतयोरन्यतरेणावगुण्ठ्य सूत्रेणानवगाढ़मशिथिलञ्च बद्धा कपालचूर्णेनावकीर्य्याचारिकमुपदिशेद्द्विव्रणीयोक्तेन च विधानेनोपचरेत् ॥ ५ ॥

भवतश्चात्र ।

विघट्टनं दिवास्वप्नं व्यायाममतिभोजनम् ।

यन्त्रशस्त्रादि उपसमीपे सम्भृतःसम्यक् कृत्वा धृतः सम्भारः समूहो यत्र । सुरामण्डं मद्यस्योपरि अच्छभागं कपालचूर्णञ्च मृण्मयभाण्डखण्डचूर्णम् । ततोऽङ्गनां पुरुषञ्चेति अङ्गनाया भूषणप्राधान्यात् प्राङ्निर्देशः । ग्रथितकेशान्तमिति ग्रथितकेशावयवं अन्यथा केशव्याकुलतया कर्म्माभिघातः स्यात् बन्धविशेषो वा । लघुभुक्तवन्तमिति भुक्तवान् कर्म्मपीड़ां सहते आहारलघुत्वात् वेदनया रात्रिजागरितवतोऽपि नाजीर्णबाधास्यात् । आप्तैः सुपरिगृहीतं कृत्वेति आप्तैर्हितैर्बन्धमुपधार्य्यते अयं बन्धोऽत्र कर्त्तव्य इति निश्चित्य च्छेद्याद्यैरुपपन्नैरिति युक्तैः । उपपाद्येति संयोज्य सन्निवेश्य आरोप्य सन्दध्यात् सन्धानं कुर्य्यात् । पिचुप्लोतयोरिति तूलकर्पटयोरिति । अवगुण्ठ्येति आवेष्ट्य । आचारिकमिति आहारविहाराख्यम् । द्विव्रणीयोक्तेन विधानेनेति आलेपनादिना ॥ ५ ॥

व्यवायमग्निसन्तापं वाक्श्रमञ्च विवर्जयेत्॥
आमतैलपरीषेकं विरावमवचारयेत्।
ततस्तैलेन संसृष्टं व्यहादपनयेत्पिचुम्॥

न चासंशुद्धरक्तमतिप्रवृत्तरक्तं क्षीणरक्तं वा सन्दध्यात्। सहिवातदुष्टे रक्ते रूढ़ोऽपि परिपुटनवान्। पित्तदुष्टे दाहपाकरागवेदनावान्। श्लेष्मदुष्टे स्तब्धः कण्डूमान्। अतिप्रवृत्तरक्तो श्यावशोफवान्। क्षीणोऽल्पमांसो न वृद्धिमुपैति। स यदा सुरूढो निरुपद्रवः सवर्णो भवति तदैनं शनैशनैरभि

परिहार्य्याण्युपदिशन्नाह। विघट्टनं दिवास्वप्नमिति। विघट्टनं चालनं परिहार्य्यसामान्यादन्यमपि विरुद्धं प्रतिपादयन्नाह नचासंशुद्धरक्तमिति। अशुद्धरक्तमिति दुष्टरक्तं, अतिप्रवृत्तमिति शुद्धरक्तमपि यदातिप्रवृत्तं स्यात्तदा न सन्धेयं अशुद्धरक्तसन्धाने दोषमाह। स हि वातदुष्टइति। परिपुटनं त्वच उद्वटनं मिश्रकाध्यायोक्तः सशोफः कर्णलतिकारोगो वा। अतिप्रवृत्तरक्तस्य सन्धाने दोषमाह। अतिप्रवृत्तरक्ते इति अतिस्रवद्रक्ते इत्यर्थः। श्यावशोफोऽत्र वातकृतः। क्षीणकर्णस्य सन्धाने दोषमाह। क्षीणोऽल्पमांस इति। क्षीणोऽत्र शुद्धरक्तातिप्रवृत्त्या नतु दोषोपद्रवैः सदोषोपद्रववर्द्धनेच्छिद्यत एव विव्रणीयोक्तसामान्यविधिमुद्दिश्यविशेषविधिं निर्दिशन्नाह। आमतैलेन विरावमिति। प्रतूदालदादयः श्रेष्ठलात् विष्किरालावादयः आनूपाः वराहमहिषादयः औदकाः रोहितमत्स्यादयः एषां वसामज्जानौ वसामांसस्नेहः। गौरसर्षपजस्थाने राजसर्षपजमिति केचित् पठन्ति राजसर्षपाः श्वेतसर्षपाः वसामित्यग्रे वसामज्जासर्पिर्गौरसर्षपतैलमेतत् स्नेहचतुष्टयं अर्कादिकल्कमावाप्य चतुर्गुणेन दुग्धेनैव पचनीयमिति। अन्येऽत्र सर्पिर्न पठन्ति अपरे वसादिस्नेहचतुष्टयं परं पठन्ति नतु पयः। द्रवानुक्तौ च जलं चतुर्गुणं न पठन्ति स्नेहपाके यदान्यत्रापि केवलं दुग्धं

वर्द्धयेत्। अतोऽन्यथा संरम्भदाहपाकरागवेदनावान् पुनश्छिद्यते वा। अथास्यामदुष्टस्याभिवर्द्धनार्थमभ्यङ्गः तद्यथा गोधाप्रतुदविष्किरानूपौदकवसामज्जानौ पयः सर्पिस्तैलं गौरसर्षपजञ्च यथालाभं संहृत्यार्कालर्कबलातिबलानन्तापामार्गाश्वगन्धाविदारिगन्धाक्षीरशुक्लाजलशूकमधुरवर्गप्रतिवापं तैलं वा पाचयित्वा स्वनुगुप्तं निदध्यात्॥ ६॥

स्वेदितोन्मर्दितं कर्णं स्नेहेनानेन योजयेत्।
अथानुपद्रवः सम्यक् बलवांश्च विवर्द्धते॥
यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम्।
शतावर्य्यश्वगन्धाभ्यां पयस्यैरण्डजीवनैः॥

स्यात् तदा स्नेहाच्चतुर्गुणं दुग्धं यदा पुनरन्योऽपि द्रवो भवेत् तदा स्नेहसममेव दुग्धं कार्य्यमित्याचार्य्या भाषन्ते। यथालाभं संहृत्येति यस्य यस्य लाभस्तं तमेकत्रकृत्वेत्यर्थः। एतेन द्वित्रयाणामपि ग्रहणमुक्तम्। अलर्को मन्दारः मन्दारशब्देनात्र श्वेतार्को ग्राह्यो न तु पारिभद्रो इति अलर्कशब्दस्य श्वेतार्कपर्य्यायपठितत्वात्। अनन्ता उत्पलसारिवा। विदारिगन्धा शालपर्णी। क्षीरशुक्लाक्षीरविदारी। जलशूको जलनीलिका जलान्तर्वर्त्तिरोमयुक्त सविषप्राणो वा जलशूको जलसंस्थस्तृणशुक्तो जन्तुविरचितः शूकसंघातवान् निर्मोड़ुटुक इत्यन्ये जलचारीकृष्णकीट इति लक्षणं टीप्पनेनोक्तं। मधुरवर्गः काकोल्यादिः। पयस्या विदारीभेदः केचिदर्कपुष्पीत्याहुः, अन्ये मधुरवर्गं पयस्यां च न पठन्ति। तैलञ्चेति तिलतैलं वा पचेत् एकैकं स्वनुगुप्तमिति निरुपद्रवस्थाने इत्यर्थः॥ ६॥

अस्य तैलस्यावचारणमाह। स्वेदितोन्मर्दित इत्यादि। अभ्यक्तस्योद्वर्त्तनमाह। यवाश्वगन्धायष्ट्याह्वैरिति। कर्णपालिविवृद्ध्यर्थमपरं तैलमाह। शतावर्य्यश्वगन्धाभ्यामिति शतावर्य्यादिकल्केन स्नेहचतुर्थांशेनकेवलक्षीरेण

तैलं विपक्वं सक्षीरमभ्यङ्गात्पालिवर्द्धनम्।
ये तु कर्णा न वर्द्धन्ते विधिनानेन योजिताः॥
तेषामपाङ्गदेशेषु कुर्य्यात् प्रच्छानमेव तु।
वाह्यच्छेदं न कुर्वीत व्यापदस्तु ततो ध्रुवाः॥
वर्द्धमानन्तु यः कर्णं सहसैवाभिवर्द्धयेत्
आमकोशीसमाध्मातः क्षिप्रमेव विमुच्यते॥
जातरोमा सुवर्त्मा च श्लिष्टसन्धिः समः स्थिरः।
सुरूढ़ोऽवेदनो यस्तु तं कर्णं वर्द्धयेच्छनैः॥ ७॥
अमिताः कर्णबन्धास्तु विज्ञेया कुशलैरिह।
यो यथा सुनिविष्टः स्यात्तं तथा विनियोजयेत्॥

चतुर्गुणेन तैलमतपचनीयं पयस्या. अर्कपुष्पीजीवनैः काकोल्यादिद्रव्यैः एवमप्यवर्द्धमानानां कर्णानां वर्द्धनोपायं दर्शयन्नाह। ये तु कर्णा न वर्द्धन्ते इति। उपपादिताः संयोजिताः। अपाङ्गदेशेष्विति कर्णपुत्रिकायाः अधः। तु शब्दः एवार्थः प्रच्छानमेवत्विति प्रशब्द ईषदर्थे ईषच्छेदनं तुशब्दोऽयमप्यर्थः तेन कर्णपुत्रिकाया अध एवच्छेदनमपोषदेवकार्य्यमित्युक्तं भवति तेषामपाङ्गच्छेद्य हि कार्य्यमाभ्यन्तरं भवेदिति केचित्पठन्ति अपाङ्गपुत्रिकायाः अधः कर्णानुकूलमाभ्यन्तरं छेदं प्रच्छयेत्। वाह्यच्छेद्यामिति। वाह्यच्छेद्यं कर्णवाह्यलतिकाच्छेद्यम्। व्यापदः कर्णलतिकास्फटनादयः व्याधयः स्युरित्यन्ये पठन्ति। आरूढकर्णस्य वर्द्धने दोषमाह। वर्द्धमानन्तुयं कर्णमिति आमकोशीति असम्यगरूढ़मध्यः केचिदमुं न पठन्ति कीदृशः पुनर्वर्द्धनीयस्तमाह। जातरोमासुवर्त्मा चेति। सुवर्त्मेति शोभनछिद्रः श्लिष्टसन्धि संलग्नसन्धिः समो निम्नोन्नतत्वरहितः स्थिरोदृढ़ः कर्णपालिच्छेदः॥ ७॥

विशेषणकर्णसन्धिबन्धानामपरिमितत्वादनुक्तमपि प्रकारं दर्शयन्नाह।

कर्णपाल्यामयान्नृणां पुनर्वक्ष्यामि सुश्रुत:।
कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रय: ॥
द्विधा वाप्यथ संसृष्टा: कुर्वन्ति विविधा रुज:।
विस्फोट: स्तब्धता शोफ:पाल्यां दोषेतु वातिके ॥
दाहविस्फोटजननं शोफ: पाकश्च पैत्तिके।
कण्डू: सश्वयथुस्तम्भो गुरुत्वञ्च कफात्मके ॥
यथादोषञ्च संशोध्य कुर्य्यात्तेषां चिकित्सितम्।
स्वेदाभ्यङ्गपरीषेकै: प्रलेपासृग्विमोक्षणै: ॥
मृद्वीं क्रियां बृंहणीयैर्यथास्वं भोजनैस्तथा।
य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति ॥
अत ऊर्द्धं नामलिङ्गैर्वक्ष्ये पाल्यामुपद्रवान्।
उत्पाटकश्चोत्पुटक: श्यावः कण्डुयुतो भृशम् ॥
अवमन्थ: सकण्डुको ग्रन्थिको जम्बुलस्तथा।
स्रावी च दाहवांश्चैव प्रृणुष्वेषां क्रमश: क्रियाम् ॥
अपामार्ग: सर्जरस: पाटलालकुचत्वचौ।
उत्पाटके प्रलेप: स्यात्तैलमेभिश्च पाचयेत् ॥
शम्पाकशिग्रुपूतीकगोधामेदोऽथ तद्रसा।

अमिता: कर्णबन्धास्त्विति। सुविश्लिष्ट इत्यत्र केचित्सुनिविष्ट इति पठन्ति केचिदत्रैवाध्याये कर्णपाल्यामयान् परिपोटादीन् पठन्ति अन्ये तु चिकित्सिते मिश्रे कलिङ्गचिकित्सितान् पठन्ति तांश्च तत्रैव व्याख्यास्याम:। अन्ये तु सुश्रुताध्यायिनोऽत्र कर्णपाल्यामयानीत्यादिकं ग्रन्थं चिकित्सितं पठन्ति सत्वाचार्य्यैरव्याख्यातत्वात्तस्मान्न पठनीय:। अपरे पुनरत्रैवोत्तरवलादीन् सचिकित्सितान् पठन्ति अमुमपिपाठमनार्षमाचार्य्या वर्णयन्ति अतोऽयमपि

वाराहं गव्यमैणेयं पित्तं सर्पिश्च संसृजेत् ।
लेपस्तत्पुटके दद्यात्तैलमेभिश्च साधितम् ॥
गौरीं सुगन्धां श्यामामनन्तां तण्डुलीयकम् ।
श्रावे प्रलेपनं दद्यात्तैलमेभिश्च साधितम् ॥
पाठां रसाञ्जनं क्षौद्रं तथा स्यादुष्णकाञ्जिकम् ।
दद्याल्लेपं सकण्डूके तैलमेभिश्च साधितम् ॥
व्रणीभूतस्य देयं स्यादिदं तैलं विजानता ।
मधुकं क्षीरकाकोली जीवकाद्यैर्विपाचितम् ॥
गोधावराहसर्पाणां वसाः स्युः क्षतेऽन्तरणे ।
प्रलेपनमिदं दद्यादवसिच्यावमन्थके ॥
प्रपौण्डरीकं मधुकं समङ्गां धवमेव च ।
तैलमेभिश्च सम्पक्वं पृष्णु कण्डूमतः क्रियाम् ॥
सहदेवा विश्वदेवा अजाक्षीरं ससैन्धवम् ।
एतैरालेपनं दद्यात्तैलमेभिश्च साधितम् ॥
ग्रथिके गुटिकां पूर्वं स्रावयेदवपाद्यतु ।
ततः सैन्धवचूर्णेन्तु घृष्ट्वा लेपं प्रदापयेत् ॥
लिखित्वा ततस्तं तं घृष्ट्वा चूर्णैरोध्रस्य जम्बुले ।
क्षीरेण प्रतिसार्य्यैनं शुद्धं संरोपयेत्ततः ॥
मधुपर्णी मधुकञ्च मधुकं मधुना सह ।
लेपः स्याविणि दातव्यस्तैलमेभिश्च साधितम् ॥
पञ्चवल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः ।
जीवकाद्यैः ससर्पिष्कैर्दह्यमानं प्रलेपयेत् ॥ ८ ॥

विश्लेषितायास्त्वथ नासिकाया वक्ष्यामि सन्धानविधिं यथावत्।
नासाप्रमाणं पृथिवीरुहाणां पत्रं गृहीत्वा त्ववलम्बितस्य।
तेन प्रमाणेन हि गण्डपार्श्वादुत्कृत्य बद्धं त्वथनासिकाग्रम्।
विलिख्य चाशु प्रतिसन्दधीत तत्साधुबन्धैर्भिषगप्रमत्तः।
सुसंहितं सम्यगथो यथावन्नाडीद्वयेनाभिसमीक्ष्य बद्ध्वा।
प्रोन्नम्य चैनामवचूर्णयेच्च पत्तङ्गयष्टीमधुकाञ्जनैश्च।
सञ्छाद्य सम्यक् पिचुना सितेन तैलेन सिञ्चेदसकृत्तिलानां।
घृतञ्च पाय्यः स नरः सुजीर्णे स्निग्धो विरेच्यः स यथोपदेशम्।
रूढञ्च सन्धानमुपागतं स्यात्तदर्द्धशेषन्तु पुनर्निकृन्तेत्।
हीनां पुनर्वर्द्धयितुं यतेत समाञ्च कुर्य्यादतिवृद्धमांसाम् ॥९॥

नाड़ीयोगं विनौष्ठस्य नासासन्धानवद्विधिम्।
य एवमेवं जानीयात् स राज्ञः कर्त्तुमर्हति ॥१०॥

न पठितव्यः। विश्लेषितायास्त्वथेति। विश्लेषिताया इति छिन्नायाः। पृथिवीरुहाणां वृक्षाणां, तस्येति छिन्ननासिकस्य पुरुषस्य तेन प्रमाणेनेति वृक्षपत्रप्रमाणेन उत्कृत्येति ऊर्द्धं छेदयित्वा बद्धमितिसंलग्नं यथास्यात् मांसमिति शेषः तदिति नासिकाग्रं साधुबन्धैरिति शोभनबन्धैः कृत्वा अप्रमत्तः सावधानः सुसंहितं सम्यगभिसमीक्ष्य नाड़ीद्वयेन यथावद्बद्ध्वा प्रोन्नम्य च प्रकृष्टं यथास्यात् एवमुत्थाप्य एनां नासिकामवचूर्णयेदिति सम्बन्धः नाड़ीद्वयमत्र नलकृतं एरण्डपत्रनालकृतं वा न तु सीसकादिवटिकाकृतः साहि गुरुत्वादधो गच्छति। पतङ्गं रक्तचन्दनं अञ्जनं रसाञ्जनं सितेन शुक्लेन तैलेनेत्युक्ते तिलतैलं लभ्यम्। तिलानामिति यत्कृतं तत्प्रतिनिधितैलनिषेधार्थं पाय्यः पायितव्यः सुजीर्णे भोजने अन्येत्वेवं पठन्ति "छिन्नां तु नासिकां दृष्ट्वा वयस्यस्य शरीरिणः। नासानुरूपं संछिद्यपत्रं गण्डे निवेशयेत्" इत्यादि ॥ ८ ॥ ९ ॥

अतः छिन्नस्योष्ठस्य सन्धानमाह। नाड़ीयोगं विनौष्ठस्येति ओष्ठस्य

सप्तदशोऽध्यायः।

अथात आमपक्वैषणीयमध्यायं व्याख्यास्यामः।

शोफसमुत्थाना ग्रन्थिविद्रध्यलजीप्रभृतयः प्रायेण व्याधयोऽभिधास्यन्तेऽनेकाकृतयस्तैर्विलक्षणः पृथुर्ग्रथितः समो विषमो वा त्वङ्मांसस्थायी दोषसङ्घातः शरीरैकदेशोत्थितः शोफ इत्युच्यते॥ १॥

सन्धानविधिः नासासन्धानवत्कर्त्तव्यः। परं नाड़ीयोगं विना अर्हति योग्यो भवति इदं नासासन्धानोष्ठसन्धानसूत्रं पूर्वाचार्य्यैरङ्गीकृतमपिजेजझटगयदासादिभिरङ्गीकृतं सुबोधत्वेन व्याख्यातम् तैरङ्गीकृतत्वादस्माभिरपि संगृहीतं सुबोधमपि च वैद्यपुत्रबोधार्थं व्याख्यातं दाक्षिणात्यास्तुभिषजः कर्णस्योपरि कोटिव्यधमत्र पठन्ति सोऽप्यत्राप्रसिद्धो नार्षः॥ १०॥

इति सूत्रस्थाने निबन्धसंग्रहे षोड़शोऽध्यायः।

समाप्तः।

अथातः आमपक्वैषणीयमध्यायं व्याख्यास्यामः।

आमशब्दात् पच्यमानोऽप्यत्र बोद्धव्यः आमस्य पच्यमानस्य पक्वस्य तेषामेषणं विज्ञानं तद्विद्यते यस्मिन्नध्यायेऽस्ति तं तथा। अथ शोथसमुत्थाना इत्यादि। शोथसमुत्थाना इति शोथकारणाः शोथस्यैव समुत्थानं येषामित्यन्ये प्रायेणेति बाहुल्येन कदाचिद्भिन्न समुत्थाना अपि भवन्तितैर्विलक्षण इति तेभ्यो ग्रन्थ्यादिभ्यो व्याधिभ्यः पृथगित्यर्थः तैर्ग्रन्थ्यादिव्याधिभिः कृत्वा विलक्षणो नानाप्रकार इत्यन्ये। पृथुर्विस्तीर्णः ग्रथितो ग्रन्थिरिवोन्नतः

स षड्विधो वातपित्तकफशोणितसन्निपातागन्तुनिमित्तः। तस्य दोषरूपव्यञ्जनैर्लक्षणानि व्याख्यास्यामः। तत्र वातशोफोऽरुणः कृष्णो वा परुषो मृदुरनवस्थितास्तोदादयश्चात्र वेदनाविशेषा भवन्ति। पित्तशोफः पीतो मृदुः सरक्तो वा शीघ्रानुसारी चोषादयश्चात्र वेदनाविशेषा भवन्ति। श्लेष्मशोफः पाण्डुः शुक्लो वा कठिनः शीतः स्निग्धो मन्दानुसारी कण्ड्वादयश्चात्र वेदनाविशेषाभवन्ति। सर्ववर्णवेदनः सन्निपातजः। पित्तवच्छोणितजोऽतिकृष्णश्च पित्तरक्तलक्षण आगन्तुर्लोहितावभासश्च॥ २॥

स यदा वाह्याभ्यन्तरैः क्रियाविशेषैर्न सम्भावितः प्रशमयितुं क्रियाविपर्य्ययाद्बहुत्वाद्वा दोषाणां तदा पाकाभि-

जातबहुग्रन्थिरित्यन्ये। समः समस्थानः विषमो वेति विषमसंस्थानो वा एतेन व्रणशोथस्याकृतेरनियम उक्तः। त्वङ्मांसस्थायीति एतत्तु प्रायेण कुतः शेषव्रणवस्तुष्वपि व्रणशोथस्य सम्भवात् दोषसंघात इति एकस्य द्वयोर्वा बहूनां वा दोषाणां संघातः दोषसंघातः संघात उच्छ्रायः शरीरैकदेशोत्थित इति एतेन सर्वशरीरत्वाद्भिन्नत्वं प्रतिपादयति॥ १॥

स षड्विधो वातेत्यादि। तस्य व्रणशोथस्य दोषरूपव्यञ्जनैरिति वातादिरूपैर्वर्णादिभिः वातादिलक्षणैस्तोदादिभिश्चेत्यर्थः दोषरूपव्यञ्जनैर्दोषाणां वातादीनां रूपाण्याकृतयो व्यज्यन्ते एभिरिति व्यञ्जनानीत्यन्ये। तत्र वातशोथकृष्ण इत्यादि अनवस्थितश्चलः तोदादयश्चेत्यादि शब्दाद्भेदनच्छेदादयः। पित्तशोथपीत इत्यादि ओषादयश्चेत्यादिशब्दात् चोषपरिदाहधूमायनानि गृह्यन्ते। श्लेष्मश्वयथु पाण्डुरित्यादिकण्ड्वादयश्चेत्यादिशब्दाद्गुरुत्वसुप्तत्वादयः। आगन्तुरिति पतनपीड़नादिकृतः॥ २॥

वाह्याभ्यन्तरैर्वेति वाह्या आलेपनादयः आभ्यन्तराः क्वाथपानवमन-

सुखो भवति। तस्यामस्य पच्यमानस्य पक्वस्य च लक्षणमुच्यमानमवधारय। तत्र मन्दोष्मता त्वक्सवर्णता शीतशोफता स्थैर्य्यं मन्दवेदनताल्पशोफता चामलक्षणमुद्दिष्टम्। सूचिभिरिव निस्तुद्यते दंश्यत इव पिपीलिकाभिस्ताभिश्च संसृप्यत इव छिद्यत इव शस्त्रेण भिद्यत इव शक्तिभिस्ताड्यत इव दण्डेन पीड्यत इव पाणिना घट्टयत इव चाङ्गुल्या दह्यते पच्यत इव चाग्निक्षाराभ्यामोषचोषपरीदाहाश्च भवन्ति वृश्चिकविद्ध इव च स्थानासनशयनेषु न शान्तिमुपैति। आध्मातवस्तिरिवाततश्च शोफो भवति त्वग्वैवर्ण्यं शोफाभिवृद्धिर्ज्वरदाहपिपासाभक्तारुचिश्च पच्यमानलिङ्गम् ॥ ३ ॥

विरेचनादयः तैः प्रशमयितुं न सम्भाविताः न पारिताः न प्राप्ता इत्यन्ये। क्रियाविपर्य्ययादिति अतर्पणादीनां अन्यथाभावात्। हेत्वन्तरमाह बहुत्वाद्वा दोषाणामिति न हि बहुदोषाविकारा शोणितावसेकादिभिरेव प्रशमं यान्तीत्युक्तं आलेपनस्रावणशोधनैश्च सम्यक्प्रयुक्तैर्यदि नोपशाम्येत्। तत्र मन्दोष्मतेति। स्थैर्य्यं काठिन्यम्। सूचीभिर्निस्तुद्यते इत्यादि। निस्तुद्यते भृशं व्यथते निःशब्दोऽत्र भृशार्थे ताभिरिति पिपीलिकाभिः छिद्यत इव द्विधाक्रियत इव भिद्यन्ते विदार्य्यत इव शक्तिरायुधविशेषः ताड्यते आहन्यत इव। दण्डोलगुडः। मर्द्यते चाल्यत इव क्षाराग्निभ्यामिति यथासंख्यं वाख्येयं तेन दह्यते भस्मसात् क्रियत इव अग्निनापच्यत इव अङ्गारतापैरूपतप्यत इव क्षारेण। ओषः एकदेशिको दाहः चोषश्चूष्यत इव वेदनाविशेषः परितमन्ताद्दाहः परिदाहः आततस्त्वक्सङ्कोचरहितः ॥ ३ ॥

वेदनोपशान्तिः पाण्डुताल्पशोफता वलीप्रादुर्भावस्त्वक्परिपुटनं निम्नदर्शनमङ्गुल्यावपीडिते प्रत्युन्नमनं वस्ताविवोदकसञ्चरणं पूयस्य प्रपीडयत्येकमन्तमन्ते वावपीडिते मुहुर्मुहुस्तोदः कण्डूरनुन्नतता च व्याधेरुपद्रवशान्तिर्भक्ताभिकाङ्क्षा च पक्वलिङ्गम् ॥ ४ ॥

कफजेषु तु रोगेषु गम्भीरगतित्वादभिघातजेषु वा केषुचिदसमस्तं पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति मन्यमानो भिषग्मोहमुपैति यत्र हि त्वक्सवर्णता शीतशोफता स्थौल्यमल्परुजताश्मवद्घनता न तत्र मोहमुपेयादिति ॥ ५ ॥

वेदनोपशान्तिरित्यादि। त्वक्परिपूटनं त्वच उच्चटनं प्रत्युन्नमनमाभिमुख्येनोर्द्धं नमनं वस्ताविवेत्यादि यथावस्तावुदकसञ्चरणं भवति तद्वदेव एकमन्तमवयवं प्रपीड़यति सति पूयस्य सञ्चरणं शोथे भवतीत्यर्थः। मुहुर्मुहुस्तोदो वातवेदना कण्डुः श्लेष्मवेदना पक्वशोथे विदाहापगमेन पित्ताभावात्तल्लिङ्गाभावः उन्नतव्याधिः उन्नतशोथ उपद्रवः शोषपरिदाहादयः॥ ४ ॥

कफजेषु रोगेष्विति रोगोऽत्र शोथः तत्र विषये कफजेष्विति गम्भीरगतित्वात् अभिघातजेषु केषु वा विवराणुप्रविष्टशल्यादिहेतुत्वात्। तत्र हि त्वक् सवर्णतेत्यादि। तत्रेति कफजेऽभिघातजे च शोथे त्वक् सवर्णता न तु त्वग्वैवर्ण्यं गम्भीरगतित्वात् पाकोवहिः पुनः त्वक् सावर्ण्यमेव शीतशोफतावहिः अन्तः पुनरुष्णत्वं गम्भीरगतित्वात् कफारब्धत्वाच्च अल्परुजता कफारब्धात् अश्मवद्घनता शिलावत्काठिन्यं कफारब्धत्वादुर्वाहिः पाकत्वाच्चेति न मोहमुपेयादिति न तत्र मोहं गच्छेत् एभिः पक्वलक्षणैः पक्वमेव जानीयादित्यर्थः। न मोहमुपेयाद् यतस्तं रक्तं पाकमवेक्षते द्रष्टा इत्यन्ये ॥ ५ ॥

भवन्तिचात्र।

आमं विपच्यमानञ्च सम्यक् पक्वञ्च यो भिषक्
जानीयात्स भवेद्वैद्यः शेषास्तस्करवृत्तयः ॥ ६ ॥

वाताहते नास्ति रुजा न पाकः
पित्तादृते नास्ति कफाच्च पूयः।
तस्मात्समस्ताः परि पाककाले
पचन्ति शोफांस्त्रय एव दोषाः।
कालान्तरेणाभ्युदितन्तु पित्तं
कृत्वा वशे वातकफौ प्रसह्य।
पचत्यतः शोणितमेष पाको
मतोऽपरेषां विदुषां द्वितीयः ॥ ७ ॥

तत्रामच्छेदे मांसशिरास्नायुस्थिसन्धिव्यापादनमतिमात्रं

आमादिलक्षणज्ञाने गुणमज्ञाने दोषं दर्शयन्नाह। आमं विपच्यमानञ्चेति। शेषा अन्ये आमादिज्ञानवर्जिताः तस्कराश्चौराः तेषामिव वृत्तिर्येषां प्राणानपहारित्वात् ॥ ६ ॥

एकदोषारब्धा अपि पाककाले सर्वदोषाश्लिष्टा भवन्तीत्याह। वाताहते नास्ति रुजेति। ऋतेशब्दः कफाच्चेत्यत्रापि सम्बध्यते त्रिभिरेव शोणितचतुर्थैः शरीरमिदं धार्य्यत इति द्वितीयं दर्शयन्नाह। कालान्तरेणेति अन्तरशब्दोऽत्रावधिवाची पित्तप्रकोपप्रसरस्थानसंश्रयकालावधिना अभ्युदितन्तु पित्तमिति समन्ततो भावेन पुनरुद्गतं पित्तं कृत्वावशे वातकफौ वातश्लेष्माणौ हीनौ कृत्वा प्रसह्यबलात्कारेण वा वशे कृत्वा क्रोड़ीकृत्येत्यनेन एषमतः सम्मतः ॥ ७ ॥

आमं न छिन्द्यात्पक्वं नोपेक्षेतेति दर्शयन्नाह तत्रामच्छेदे मांसशिरेति। आमशब्दात् पच्यमानस्यापि ग्रहणात् तत्रापि एते दोषाः व्यापादनं हिंसनं अवदरणं विदरणं क्षतविद्रधिः तैस्तैर्भावैरभिहते

शोणितातिप्रवृत्तिर्वेदनाप्रादुर्भावोऽवदरणमनेकोपद्रवदर्शनं
क्षतविद्रधिर्वा भवति। स यदा भयमोहाभ्यां पक्वमप्यक्व-
मिति मन्यमानश्चिरमपेक्षते व्याधिं वैद्यस्तदा गम्भीरानुगतो
द्वारमलभमानः पूयः स्वमाश्रयमवदीर्य्योत्सङ्गं महान्तम-
वकाशं कृत्वा नाड़ीं जनयित्वा कृच्छ्रसाध्योभवत्यसाध्यो
वेति॥ ८॥

भवन्तिचात्र।

यश्छिनत्त्याममज्ञानाद्यश्च पक्वमुपेक्षते।
श्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ॥
प्राक्शस्त्रकर्म्मणश्चेष्टं भोजयेदातुरं भिषक्।

क्षते वेत्यादि विद्रधिनिदानोक्तः। सयदा भयमोहाभ्यामित्यादिर्मोहोऽज्ञानं चिरं प्रभूतकालं गम्भीरानुगतो दूरानुप्रविष्टः उत्सङ्ग इवोत्सङ्गः व्रणाशये हि चिरकालं पूयावस्थाने नावदारितमन्तःप्रदेशान्तरं निम्नमुत्सङ्गतुल्य-त्वादुत्सङ्ग इत्युच्यते उत् ऊर्द्धं पूयस्य सङ्ग उत्सङ्ग इत्यन्ये अवकाशमन्तरालं अस्यैवार्थस्य निदानार्थं चापरं श्लोकमाह॥ ८॥

यश्छिनत्यामिति। श्वपचाविवचण्डालाविवमन्तव्यौ ज्ञातव्यौ तौ द्वौ अनिश्चितकारिणौ आमच्छेदनपक्वोपेक्षणत्वात् अन्ये तु तौ नरौ श्वपच-तुल्यौ आतुरव्यापादनात् तद्व्यापादनं तौ कुतो विधत्त इत्याह अनिश्चि-तकारिणौ असमीक्ष्यविधायिनौ वैद्यौ। यतः पक्वे शोथे शस्त्रकर्माहर्पूर्व्व-कमाह। प्राक् शस्त्रकर्म्मणश्चेष्टमिति। इष्टं हितं हितकारि अन्ये तु इष्टम-भिप्रेतमपथ्यमपि तद्बलाधानार्थं भोजयेत् यो वेदनां न सहते तं तीक्ष्णं मद्यं पाययेत् परं मद्यपं। अस्यैव फलमाह न मूर्च्छत्यन्नसंयोगादिति। शस्त्रं न बुध्यते शस्त्रवेदनां न जानातीत्यर्थः रोगेषूक्तेष्विति मूढ़गर्भोद-राशोश्मर्य्यादिवर्जितेषु कर्म्मणि शस्त्रप्रयोगे प्राप्ते अवश्यं भोक्तव्यं कस्मादुक्तेषु रोगेषु भोजयेदित्याह। प्राणोह्याभ्यन्तर इति अत्राभ्यन्तरः प्राणो बलं

मद्यपं पाययेन्मद्यं तीक्ष्णां योऽवेदनासहः ॥
न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न बुध्यते ।
तस्मादवश्यं भोक्तव्यं रोगेषूक्तेषु कर्मणि ॥
प्राणो ह्याभ्यन्तरो नृणां बाह्यप्राणगुणान्वितः ।
धारयत्यविरोधेन शरीरं पाञ्चभौतिकम् ॥ ९ ॥

अल्पो महान्वा क्रियया विना यः
समुच्छ्रितः पाकमुपैति शोफः ।
विशालमूलो विषमो विदग्धः
स कृच्छ्रतां यात्यवगाढदोषः ॥

तत्रौजोजनितं भारहरणादिशक्तिलक्षणं बाह्यप्राणगुणान्वित इति बाह्य प्राणोऽत्र बाह्यं बलमुपचयलक्षणं पाञ्चभौतिकाहारजनितं गुणाः शरीरदार्ढ्यादिकाः तैरन्वितः सन् आभ्यन्तरं प्राणशक्तिलक्षणं शरीरं धारयतीत्यर्थः । अन्ये त्वन्यथा व्याख्यानयन्ति । प्राणोह्याभ्यन्तर इति । सम्पन्नो यव इतिवत् जातिविवक्षया इहैकवचनं तेनात्र अग्निः सोमो वायुः सत्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मा आभ्यन्तराप्राणा बाह्यप्राणा आग्नेयसौम्यवायव्यद्रव्याणि दिवसो वायुरात्रिः शब्दस्पर्शरूपरसगन्धाश्चेति तेषां गुणास्तैरन्वितोऽनुगतः सन् आभ्यन्तरः प्राणः शरीरं धारयतीत्यर्थः । तत्र बाह्यप्राणस्य अग्नेर्गुणैः कटूष्णलवणादिभिरनुगतः सन् अन्तराग्निः शरीरं धारयतीत्यादिना बाह्यप्राणगुणानुगतत्वेनाभ्यन्तरप्राणस्य शरीरधारकत्वं दर्शयति, अस्माभिस्तु विस्तरभयान्न दर्शितं लक्षणटीप्पनकारस्तु आभ्यन्तरः प्राणः अग्निसोमादिः येन प्राणी जीवति बाह्यप्राणोऽन्नं तद्गुणाः प्रीणनादयः तैरन्वितः सन् आभ्यन्तरः प्राणःशरीरं धारयतीत्यर्थः ॥ ९ ॥

महतिशोथेऽल्पे वा अप्रतिक्रियमाणे सति बहुं दोषमाह । यो ह्युत्थित इति । विषमो विदग्ध इति विषमोविदाहः विषमपाक इत्यर्थः अवगाढदोष इति अभ्यन्तरपूय इत्यर्थः "अल्पो महान् वा कियया विना यः समुत्थितः

आलेपविस्रावणशोधनैश्च
सम्यक्प्रयुक्तैर्यदि नोपशाम्येत् ।
पच्येत शीघ्रं सममल्पमूलः
सपिण्डितश्चोपरि चोन्नतः स्यात् ।
कक्षं समासाद्य यथैव वह्नि-
र्वाय्वीरितः सन्दहति प्रसह्य ।
तथैव पूयोऽप्यविनिःसृतो हि
मांसं शिरास्नायु च खादतीह ॥ १०॥
आदौ विम्लापनं कुर्य्याद् द्वितीयमवसेचनम् ।
तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियाम् ॥

पाकमुपैतिशोथ" इति केचित् पठन्ति शोथानां शोणितावचारणादिक्रिया-समूहोऽपि पक्वानामुपक्रमसाफल्यं दर्शयन्नाह । पच्येतशीघ्रं सममिति एतेन समपाकत्वमुक्तं सशोथः पीड़ितो वर्त्तूलीभूतः पक्वस्याप्युपेक्षणे शोथस्य पाशुक्रमेव दोषं दृष्टान्तेन दर्शयन्नाह । कक्षं समासाद्येति कक्षस्तृ-णादिबहुलः प्रदेश, इहेति पक्वशोथे व्रणस्य षष्टिरुपक्रमाणां सूत्रस्थाने सूत्र-णार्थम् ॥ १० ॥

विम्लापनादीनुपक्रमान्निर्देष्टुमाह । आदौ विम्लापनं कुर्य्यादिति । विम्लापनं अङ्गुल्यादिमर्दनेन शोथविलयनं अवचोषणं जलौकादिभिः रक्तवि-स्रावणं उपनाहो बन्धनं एवं पाटनाय वैकृतापहमिति सवर्णकरणरोमसञ्ज-ननमित्यादि अन्येत्वन्यथा आप्यतनिकां गच्छन्ति अन्यथैव च व्याख्यानयन्ति अत्र व्रणस्य षष्टिरुपक्रमाणां सुखबोधार्थं लक्षणान्तरेण समत्वं दर्शयन्नाह आदौ विम्लापनमित्यादिविम्लापनशब्दोऽत्र बहिः प्रमार्जने शोथविलयनक-रलेपपरिषेकाभ्यङ्गस्वेदादौ वर्त्तते नतु मन्दवेदनस्य स्निग्धस्विन्नस्य शोथस्य छिन्नणीयपठिते वेणुनलाङ्गुष्ठादिमर्दने अवसेचनं विस्रावणं अवसेचनशब्दो;

पञ्चमं शोधनं कुर्य्यात् षष्ठं रोपणमिष्यते।
एते क्रमा व्रणस्योक्ताः सप्तमं वैकृतापहम्॥ ११॥

ऽप्यत्र वमनविरेकशोणितविस्रावणाद्यस्सर्वहिःप्रमार्जने वर्त्तते न तु केवल एव विस्रावणे एवं शेषेष्वपि उपक्रमेषु उपक्रमान्तराणि समासेषु समानानि अन्तर्भाव्यानि॥ ११॥

इति सूत्रस्थाने निबन्धसंग्रहे सप्तदशोऽध्यायः समाप्तः।

अष्टादशोऽध्यायः।

अथातो व्रणालेपनबन्धविधिमध्यायं व्याख्यास्यामः।

आलेप आद्य उपक्रम एष सर्वशोफानां सामान्यः प्रधानतमश्च तञ्च प्रतिरोगं वक्ष्यामः। ततो बन्धः प्रधानं तेन शुद्धिर्व्रणरोपणमस्थिसन्धिस्थैर्य्यञ्च तत्र प्रतिलोममालिम्पेत् नानुलोमं प्रतिलोमे हि सम्यगौषधमवतिष्ठतेऽनुप्रविशति रोमकूपान् स्वेदवाहिभिः सिरामुखैश्च वीर्य्यं प्राप्नोति।

अथातो व्रणालेपनबन्धविधिमध्यायं व्याख्यास्यामः।

आलेप आद्य उपक्रम एष सर्वशोफानां सामान्यः प्रधानतमश्च।

एष आलेपः आद्य उपक्रमः कथं द्विव्रणीयेऽतर्पणस्य आद्यत्वेन पठितत्वात्। औषधद्रव्येभ्यो वहिरन्तःप्रमार्जनेभ्य आलेपः आद्य इत्यर्थः, आद्यसमीपत्वात् श्रेष्ठत्वाद्वा आलेपस्त्वाद्य इत्युच्यते। सर्वशोथानां सामान्य इति

न च शुष्यमाणमुपेक्षेतान्यत्र पीड़यितव्यात्। शुष्को ह्यपार्थकोऽरुक्करश्च। स त्रिविधः प्रलेपः प्रदेह आलेपश्च तेषामन्तरं प्रलेपः शीतस्तनुरविशोषी विशोषी च। प्रदेहस्तूष्णः शीतो वा वहलोऽवहुरविशोषी च। मध्यमोऽत्रालेपः। तत्र रक्तपित्तप्रसादकृदालेपः। प्रदेहो वातश्लेष्मप्रशमनः सन्धानः शोधनो रोपणः शोफवेदनापहश्च तस्योपयोगः

वातादिशोथानां तुल्यः आलेपनाभेदात् प्रधानतमश्च सर्वोपक्रमेभ्यः आशुपीड़ाहरणात्। तच्च प्रतिरोगमिति तमालेपं प्रतिरोगं रोगे रोगे वक्ष्यामः कथयिष्यामः अस्मिन्नत्र स्थाने चिकित्सिते च। ततो बन्धप्रधानं तेन शुद्धिर्व्रणरोपणमस्थिसन्धिस्थैर्य्यञ्चेति। ततस्तस्मादालेपात् अस्थिसन्धिस्थैर्य्यञ्चेति अस्तु: सन्धिदार्ढ्यं भवतीत्यध्याहारः। केचिदाचार्य्या इमं न पठन्ति इदानीमालेपावचारणं तत्फलं च निर्दिष्टुमाह। ततः प्रतिलोममालिम्पेदिति प्रतिलोमं लोमाभिमुखमालिम्पेत् हि यस्मादर्थे। अवतिष्ठते अवस्थितिं करोति अनुप्रविशति च औषधमित्यनुवर्त्तते आलेपस्यावस्थायां कर्त्तव्यतामाह। न च शुष्यमाणमुपेक्षेतेति। पीड़यितव्यादिति पीड़नद्रव्यैर्मिश्रकोक्तैर्यो व्रणः पीड़नीयो भवति तस्मादन्यत्र शुष्यमाणं नोपेक्षेतेत्यर्थः हि यस्मादर्थे। अपार्थको निष्फलः। स त्रिविधः प्रलेपः प्रदेह आलेपश्च। प्रलेपप्रदेहयोर्वास्तवाभेदेऽपि व्यवहारिकं भेदं दर्शयन्नाह प्रलेपप्रदेहयोरन्तरमिति। अन्तरं भेदस्थानासनवत्प्रलेपं लक्षणैर्निर्दिशन्नाह। तत्र प्रलेपः शीतस्तनुरिति। अविशोषी अपीड़यितव्ये व्रणशोफे, विशोषी पीड़यितव्ये एतेन येन कल्केन चन्दनवल्लिप्यते स प्रलेपः अन्ये शीतस्तनुरित्यादिलक्षणं प्रदेहस्य इति वदन्ति लक्षणैः प्रदेहं निर्दिशन्नाह। प्रदेहस्तूष्णः शीतोवेति। उष्णः शीतोवेति विषयापेक्षया तत्र वातकफबहुले वा उष्णः पित्तरक्तबहुले शीतः। बहुलः स्थूलः एतेन यस्तु कल्कः पिण्डीकृत्य व्रणस्योपरि दीयते सप्रदेहः उष्णः शीतोवेत्यादिलक्षणं प्रलेपस्येति

क्षताक्षतेषु। यस्तु क्षतेषूपयुज्यते स भूयः कल्क इति संज्ञां लभते निरुद्धालेपनसंज्ञस्तेनास्रावसन्निरोधो मृदुता पूतिमांसापकर्षणमन्तर्निर्दोषता व्रणशुद्धिश्च भवति ॥१॥

अविदग्धेषु शोफेषु हितमालेपनं भवेत्।
यथास्वं दोषशमनं दाहकण्डूरुजापहम् ॥
त्वक्प्रसादनमेवाग्र्यं मांसरक्तप्रसादनम्।
दाहप्रशमनं श्रेष्ठं तोदकण्डूविनाशनम् ॥
मर्म्मदेशेषु ये रोगा गुह्येष्वपि तथा नृणाम्।
संशोधनाय तेषां हि कुर्य्यादालेपनं भिषक् ॥

केचिन्मन्यन्ते लक्षणान्तरं निर्दिश्य कार्य्यभेदं निर्दिशन्नाह। मध्यमोऽत्रालेपः। तत्र रक्तपित्तेति तत्र तयोर्म्मध्ये केचिदत्रालेपनस्थाने प्रदेह इति पठन्ति। प्रदेहो वातश्लेष्मेति अन्ये प्रदेहस्थाने आलेपं पठन्ति आलेपस्य सामान्यविषयं दर्शयन्नाह। तस्योपयोग इति। क्षताक्षतेषु व्रणशोथेष्वित्यर्थः। विषयान्तरेणालेपस्य नामान्तरमाह। यस्तुक्षतेषूपयुज्यते इति। तुशब्दोऽवधारणे, भूयः शब्दो पुनरर्थे निरुद्धा निषिद्धा अन्ये त्वत्र निरोध्यालेपनसंज्ञमिति पठन्ति तत्रापि स एवार्थः कल्कसंज्ञस्यालेपस्य कर्म्म आह। तेनास्रावः सन्निरोध इति। आस्रावो रक्ताद्यास्रावः अन्तर्दोषतेति दोषोऽत्र पूयः तेनाभ्यन्तरपूयवर्जितत्वं व्रणशुद्धिश्चेति दोषदुष्टिनिवृत्तिः चकाराद्व्रणरोपणस्य ग्रहणम् ॥ १ ॥

आलेपस्यात्मविषये कालावधिमाह। अविदग्धेषु शोथेष्विति। अविदग्धेषु आलेपनं हितं विदग्धेषु पुनः प्रदेह एव यस्य उपनाह इति संज्ञान्तरम्। यथास्वं दोषशमनमिति दाहः पित्तस्य कण्डूः कफस्य रुजावातस्य एता अपहन्ति। रुजाकण्डूविनाशनं दूष्यप्रसाधनत्वं आलेपस्य निर्दिष्टमाह त्वक्प्रसादनमेवाग्र्यमिति। अग्र्यं प्रधानं दाहकण्डुरुजापहमिति पूर्व्वस्मिन्नेव श्लोके दाहादीनां पठितत्वात् इह पुनः पाठो दूष्यकृता अपि

षड्भागं पैत्तिके स्नेहं चतुर्भागन्तु वातिके।
अष्टभागन्तु कफजे स्नेहमात्रां प्रदापयेत्॥

तस्य प्रमाणमार्द्रमाहिषचर्म्मोत्सेधमुपदिशन्ति। न चालेपं रात्रौ प्रयुञ्जीत माभूच्छैत्यपिहितोष्मणस्तदनिर्गमाद्विकारप्रवृत्तिरिति।

प्रदेहसाध्ये व्याधौ तु हितमालेपनं दिवा।
पित्तरक्ताभिघातोत्थे सविषे च विशेषतः॥
न च पर्य्युषितं लेपं कदाचिदवचारयेत्।
उपर्य्युपरिलेपन्तु न कदाचित् प्रदापयेत्॥
उष्माणं वेदनां दाहं घनत्वाज्जनयेत् सहि॥
न च तेनैव लेपेन प्रदेहं दापयेत् पुनः।
शुष्कभावात् स निर्वीर्य्यो युक्तोऽपि स्यादपार्थकः॥२॥

अत ऊर्द्धं व्रणबन्धनद्रव्याण्युपदेक्ष्यामः। तद्यथा क्षौम-

दाहादयो भवन्तीति बोधनार्थम्। तनुत्वमालेपस्य गुणः तनुत्वं किम्प्रमाणमित्याह। तस्य प्रमाणं महिषार्द्रचर्म्मोच्छ्रायापेक्षया स्थूल इति येतु तनुत्वं प्रदेहगुणं मन्यन्ते तेषां मते प्रदेहे तत्प्रमाणविशिष्टे काले आलेपावचारणविधिनिषेधकथञ्चित् क्रियमाणे च दोषमाह। न चालेपनं रात्राविति। शैत्यापहितोष्मण शोथस्येति शेषः तदनिर्गमात् शोथोष्मानिःसरणात् विकारप्रवृत्तिर्विकाराभिवृद्धिः शैत्यरुद्धरोमकूपत्वादनिर्गच्छन्नुष्मा आलेपेनातोऽत्यर्थं शोफं पचतीत्यर्थः स्वेदवाहिभिश्च शिरामुखैर्वीर्य्यं प्राप्नोतीत्यत ऊर्द्धं बहुषु प्रतिषु निबन्धपातक्रमाद्व्यतिक्रमेण पाठः अधिकश्च पाठः स उच्यते। अयं पाठो वर्त्तमानेषु पुस्तकेषु सर्व्वेष्वेव पठ्यते इत्यस्माभिःक्रममात्रं दर्शितं न त्वयं पठनीयः पुनः प्राक्तनपाठ एव सर्व्वपूर्व्वाचार्य्यां सम्मतत्वात्॥ २॥

कार्पासाविकदुकूलकौशेयपत्रोर्णचीनपट्टचर्मान्तर्वल्कलालाबुशकललताविदलरज्जुतूलफलसन्तानिकालौहानीति ॥ ३ ॥

तेषां व्याधिं कालं चावेक्ष्योपयोगः प्रकरणतश्चैषामा-

इदानीं व्रणबन्धविधिः प्रस्तूयते स च द्रव्याधीनः अतस्तान्येव प्रागुपदेष्टुमाह। क्षौम्यकार्पासाविकेति। क्षौममतसीतन्तुभिर्युतं अन्ये वस्त्रान्तरमाहुः कार्पासं कार्पासतन्तुरचितं आविकं उरभ्ररोमयुतं, दुकूलं पट्टवस्त्रं अन्ये वल्कलमाहुः। कौशेयं कोशकारकृमिणाद्भवं यन्त्रसरमिति लोके पत्रोर्णोरल्लकाख्यः कम्बलः अन्ये तु येहरितादीनि देवाङ्गानि उच्यन्ते ते पत्रोर्णाः धौतकौशेयमित्यपरे मागधे पौण्ड्रकादिदेशेषु नागवृक्षादयश्चत्वारो वृक्षाः तत्पत्रेभ्यो जातैः हरिततन्तुभिरूर्णारूपैरूयते यत् तत्पत्रोर्णमित्येके चीनपट्टं चीनदेश एवोत्पद्यते तद्देशजातांस्तु चीनयुगपट्टमिति वदन्ति स च पत्रोर्णस्यैव भेदः अन्ये नेत्रमाहुः चर्मणादीनां अपरे चर्मबद्धं धनद्रव्यं अथवा सुवर्णपिष्टिकादिति लिप्तचर्मतन्तुभिस्तुरुष्कैर्यानि व्युयन्ते तानि चर्मशब्देनोच्यन्ते बाह्यवल्कलमन्त्यस्त्वचं त्यक्त्वा मध्यं यदुद्गृह्यते तदन्तर्वल्कलं अलाबुशकलं तुम्बीफलकर्परिकालताविदलं श्यामलतादिपाटितार्द्धं केचिद्विदलशब्दः चर्मादिभिः सह सम्बध्नन्ति अन्ये तु विदलशब्देन वंशवेत्रादिकञ्च कामाहुः लताशब्देन च श्यामलतादीनां ग्रहणं रज्जुर्मुञ्जवल्वजादिवलितः तूलफलं शाल्मलीफलादि सन्तानिका क्षीरसन्तानिका अन्ये कुशलसन्तानिकेति पठन्ति कुशलसन्तानिका कोकिलवृत्तिः द्विवितन्तुरचिताचय इति लोके प्रसिद्धा सघुटिवासां केचिदाहुः लौहानि सुवर्णत्रपुसादीनि ॥ ३ ॥

क्व पुनस्तेषामुपयोग इत्याह। तेषां क्षौमादीनां व्याधिं कालं चावेक्ष्योपयोग इति वातश्लैष्मिकं व्याधिमवेक्ष्य व्रणबन्धनद्रव्याणां घनानामुपयोगः उष्णं च कालमवेक्ष्यतनूनामुपयोगः चकाराद्गाढस्थानमवेक्ष्य घनानामुपयोगः शिथिलस्थानमवेक्ष्यतनूनामुपयोग इति वर्गोक्तानां व्रणबन्धनद्रव्याणां संक्षेपेणादेशमाह। प्रकरणतश्चैषामिति। प्रकरणतः प्रकरणमवेक्ष्य एषां व्रण-

देशः। तत्र कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलस्थगि-
कायमकखट्टाचीनविबन्धवितानगोफणाः पञ्चाङ्गी चेति चतु-
र्दशबन्धविशेषाः। तेषां नामभिरेवाकृतयः प्रायेण व्या-
ख्याताः॥ ४॥

तत्र कोशमङ्गुष्ठाङ्गुलिपर्व्वसु विदध्यात्। दामसम्बाधेऽङ्गे।

बन्धनद्रव्याणां प्रादेशनं यद्यथा सर्पादिदष्टस्य अरिष्टबन्धोरज्वादिभिः रक्तातिप्रवृत्तौ रक्तनिवृत्त्यर्थं सनालिकयावभ्नीयात् पाटितश्यामलतायद्वै भ-ग्नसन्धानायबन्धः कर्त्तव्यः लोहैः सुवर्णादिभिः तान् बध्नीयात् त्रयादिभिर-र्वुदग्रन्थ्यादीन् आलावुशकलेन शिरोव्रणान् बध्नीयात् एवमन्येषामपि यथार्थ-मादेशनं इदानीं बन्धविशेषान् संख्ययानिर्द्देष्टुमाह। तत्र कोषदामस्वस्ति-कानुवेल्लितेति। एषामाकारं निर्द्देष्टुमाह। तेषां नामभिरिति। प्रायोग्रह-णान्नाम्नैव सर्व्वेषामाकृतीर्वक्तुं न शक्यते तस्मात् परतन्त्रोक्तलक्षणमप्यत्रैव सम्यगाकृतिविज्ञानाय श्लोकैरुपदेक्ष्यामः तद्यथा "पूरयित्वौषधैर्बन्धः क्रियते कोशकाकृतिः। कोशकाख्यः सविज्ञेयो वैद्यैर्बन्धेन वर्जितम्। दामाकृतिं चतुष्पादां दामाख्यं स्वस्तिकं पुनः। स्वस्तिकाकृतिमासीव्य पश्चादाविध्य-वध्यते। अनुवेल्लितं तद्दिद्यात् प्रतोलीलक्षणं शृणु। वद्वङ्घ्रिमुटिकाकारो जालवद्‌बहुरन्ध्रकः। प्रतोलीबन्ध एष स्यात् संज्ञान्तरमतः शृणु। गोतू-ण्डिकां चालनीं च तामेवाहुर्भिषग्वराः। मण्डलं वेष्टनाकारं विदध्यात् मण्डलाख्यके। स्थगिकादिभिपूर्य्यभेषजैः पट्टकेन च। बध्यते मण्डला-कारो यमलव्रणयोस्तुसः। बन्धं यमकनामानां भिषजो वर्णयन्तितम्॥" "चीनबन्धं विजानीयात् चिराभिर्व्बहुभिर्व्वृताम्। विबन्धो विविधो बन्धः स च षड्विकायुता। ज्ञेयो वितानसंज्ञस्तु वितानाकारसंयुतः। पाषाणगुड़-कोत्क्षेपकारार्णीं गोफलं विदुः। तदाकृतिं भिषक् कुर्य्यात् फलस्य पञ्चकं रिभिः। पञ्चाङ्गीं तु इतां कुर्य्यात् सन्धानाय चिकित्सक" इति॥ ४॥

बन्धविषयमाह। तत्र कोषमङ्गुष्ठाङ्गुलिपर्वस्विति॥ तत्रेति चतुर्दश-

सन्धिकूर्चकभ्रूस्तनान्तरतलकर्णेषु स्वस्तिकम्। अनुवेल्लितन्तु शाखासु। ग्रीवामेढ्रयोः प्रतोलीम्। वृत्तेऽङ्गे मण्डलम्। अङ्गुष्ठाङ्गुलिमेढ्राग्रेषु स्थगिकाम्। यमलव्रणयोर्यमकम्। हनुशङ्खगण्डेषु खट्वाम्। अपाङ्गयोश्चीनम्। पृष्ठोदरोरःसु विबन्धम्। मूर्द्धनि वितानम्। चिबुकनासौष्ठांसवस्तिषु गोफणाम्। जत्रुण ऊर्द्ध्वं पञ्चाङ्गीमिति। यो वा यस्मिन् शरीरप्रदेशे सुनिविष्टो भवति तं तस्मिन् विदध्यात्। यन्त्रणमत ऊर्द्ध्वमधस्तिर्य्यक् च॥ ५॥

बन्धेषु मध्ये पर्वशब्दोऽङ्गुष्ठाङ्गुलिभिः सह सम्बध्यते। दामसम्बाधेऽङ्गे सम्बाधेऽङ्गसङ्कटे। सन्धिकूर्चकभ्रूस्तनान्तरेति। चिप्रं मर्म्मोपरिष्टादुभयतः कूर्चकपादाङ्गुष्ठाङ्गुल्योर्म्मध्ये चिप्र इति मर्म्मभ्रूस्तनान्तरम् इति अन्तरशब्दः प्रत्येकं सम्बध्यते तलमिह हस्तपदतलम्। अनुवेल्लितन्तु शाखास्विति शाखासु सक्थिबाहुषु। ग्रीवामेढ्रयोः प्रतोलीं वृत्तेऽङ्गे मण्डलं बाहुपार्श्वोदरोरुपृष्ठादिकं वृत्तम्। अग्रशब्दोऽत्राङ्गुष्ठादिभिः सह प्रत्येकं सम्बध्यते। यमलव्रणयोर्यमकं हनुशङ्खेति हनुर्मुखसन्धिः शङ्खोभ्रूकर्णयोरन्तरं गण्डोगल्लः। अपाङ्गयोश्चीनं अपाङ्गयोर्नेत्रान्तप्रदेशयोः। पृष्ठोदरोरःसु विबन्धः हृदयोर्द्ध्वं स्तनयोर्म्मध्यं ग्रीवामूलादधस्तादुरः। मूर्द्धामस्तकम्। चिबुकनासौष्ठांसवस्तिषु गोफणाम्। चिबुकमोष्ठाधोनासास्थिपिण्डिका अंसोबाहुशिरःवस्तिर्मूत्राशयः उक्तं देशनियमं प्रयोजनवशेन व्यभिचारयन्नाह। यो वा यस्मिन् शरीरप्रदेश इति सुनिविष्टः शोभनाकारः बन्धो मृदुसमावगाढभेदात्त्रिविधः स च यन्त्रणमन्तरेण न सम्भवति अतो यन्त्रणं निर्देष्टुमाह। यन्त्रणमूर्द्धमधस्तिर्य्यक् इति। यन्त्रणं पादग्रन्थिबन्धनं तच्च ऊर्द्ध्वादिभेदेन त्रिप्रकारं व्रणाकृतीनां नानाविधत्वात्। चकार ऊर्द्ध्वादिभेदानेव समुच्चिनोति॥ ५॥

तत्र घनां कवलिकां दत्त्वा वामहस्तपरिक्षेपमृजुमनाविद्धमसङ्कुचितं मृदुपट्टं निवेश्य बध्नीयात्। न च व्रणस्योपरि कुर्य्यात् ग्रन्थिमाबाधकरं वा। न च विकेशिकौषधे अतिस्निग्धे अतिरूक्षे विषमे वा कुर्वीत यस्मादतिस्नेहात् क्लेदो रौक्ष्याच्छेदो दुर्न्यासाद्व्रणवर्त्मावघर्षणमिति॥ ६॥

बन्धावचारणं निर्दिशन्नाह। तत्र घनां कवलिकमिति। तत्रेति वाक्योपक्रमे घनां कवलिकामिति औषधवस्त्रयोरन्तरे यादीयते औषधसंस्थापनार्थं औदुम्बरादित्वक्पत्राणि वा साकवलिकेत्युच्यते अन्ये द्विगुणचतुर्गुणमृदुकर्पटविरचितां कवलिकामाहुः वामहस्तपरिक्षेपमिति वामहस्तपरिक्षेपात् दृष्टारचितो बन्धो मङ्गलमावहति अन्ये तु पदे वामहस्तपरिक्षिप्ते दक्षिणहस्तेन साधुबन्धानिष्पद्यन्त इत्याचक्षते अन्येतु वामदक्षिणपरिक्षेपावुभावपि विषये कर्त्तव्यौ ऋजुत्वं सन्निवेशविशेषापेक्षं अनाविद्धमनाकुलितं असङ्कीर्णमित्यपरे असङ्कुचितं वलिवर्जितं मृदुकोमलं वामहस्तपरिक्षेप ऋजुत्वादिगुणयुक्तं पट्टं सन्निवेश्य संस्थाप्यबध्नीयादित्यर्थः आबाधकरं चेति आसमन्ततः पीड़ाकरं ग्रन्थिं न कुर्य्यादित्यर्थः स च वामदक्षिणपार्श्वयोस्तथा पृष्ठेऽपि क्रियमाणः स्वप्नाबाधकरो भवेदिति तत्रौषधकल्कव्रणवर्त्त्योः स्निग्धादिभावं नियमयन्नाह। न च विकौषधेति। कल्कमधुघृताभ्यक्तवस्त्रस्य सूत्रस्य वा वर्त्तिविकेशिका सा च सद्गतिमांसोत्सङ्गातिपूयगर्भेषु निक्षिप्यते औषधमाह औषधकल्कः स च केवलकल्कः पूतिमांसोत्सङ्गगत्यस्थं अन्तरपूयवर्जितेषु दीयते एष पर्य्यायं व्रणेषु पुनर्विकेशिकौषधकल्कयोरुभयोरप्युपयोगविषमे दुर्न्यस्ते अन्ये विषम इति न पठन्ति विकेशिकौषधयोरतिस्निग्धातिरूक्षदुर्न्यस्तयोर्दोषं वक्तुमाह। यस्मादतिस्नेहात् क्लेद इति। क्लेदो व्रणस्यार्द्रत्वं छेदः संहतयोर्व्रणौष्ठयोर्द्विधाकरणं दुर्न्यासाद्दुष्प्रवेशात् व्रणवर्त्म व्रणमुखम्। गयदासाचार्य्यस्तु अन्यथापातनीकां गृहीत्वा पाठमन्यथा पठति अतिस्नेहा-

तत्र व्रणायतनविशेषाद्बन्धविशेषस्त्रिविधो भवति गाढ़ः समः शिथिल इति ।

पीड़यन्नरुजो गाढ़ः सोच्छ्वासः शिथिल स्मृतः ।
नैव गाढो न शिथिलः समोबन्धः प्रकीर्त्तितः ॥ ७ ॥

तत्र स्फिक्कुक्षिकक्षावङ्क्षणोरःशिरःसु गाढः । शाखा-वदनकर्णकण्ठमेढ्रमुष्कपृष्ठपार्श्वोदरोरःसु समः । अक्ष्णोः सन्धिषु च शिथिल इति । तत्र पैत्तिकं गाढ़स्थाने समं बध्नीयात् समस्थाने शिथिलं शिथिलस्थाने नैवं शोणितदुष्टञ्च । श्लैष्मिकं शिथिलस्थाने समं समस्थाने गाढ़ं गाढ़स्थाने गाढ़तरमेवं वातदुष्टञ्च । तत्र पैत्तिकं शरद्ग्रीष्मे द्विरह्नो बध्नीयाद्रक्तोपद्रुतमप्येवं श्लैष्मिकं हेमन्तवसन्तयोस्त्र्यहाद्वा-

तिरूक्षयोर्विकेशिकौषधयोर्दोषं युक्तियुक्तस्नेहतो गुणबहुलमाह कस्मादिति-स्नेहात्क्लेदो रौक्ष्यात् छेदो युक्तस्नेहात्सम्यग्रोह इति ॥ ६ ॥

इदानीमुक्तसंख्यकमपि बन्धं व्रणाकृतिविशेषेण त्रिविधं दर्शयन्नाह । तत्र व्रणायतनविशेषादिति । व्रणानामायतनं स्थानं अङ्गप्रत्यङ्गादिकं तद्विशेषाद्गाढ़ादयो बन्धविशेषा भवन्ति ननु दोषकालविशेषाद्प्यग्रे बन्धविशेषाणां दर्शितत्वाद्दोषकालावपि अत्र वाच्याविति । दोषकालौ हि व्रणायतो भवति शेषमात्र करावेवेति न पृथगुक्तौ अन्ये तु व्रणायतनविशे-षाद्बन्धविशेषं निर्दिशन्नाह ॥ ७ ॥

तत्र स्फिक्कुक्षीति । स्फिजौ कटिप्रोथौ वङ्क्षणः ऊरुसन्धिः मेढ्रो मेहनं मुष्को अण्डकोषः । दोषविशेषाद् बन्धविशेषं निर्दिष्टमाह । तत्र पैत्तिकं शरदीति कालविशेषादपि बन्धविशेषं दर्शयन्नाह । द्विरह्नोर्बध्नीयादिति दिवसस्य मध्ये द्वौ वारौ बध्नीयादित्यर्थः । एवमभ्यूह्येति । एवमनेन प्रकारेण अभ्यूह्य स्वयमपि वितर्क्य बन्धविपर्ययं बन्धस्यान्यथात्वमवस्थावशात्

तोपद्रुतमप्येवम्। एवमभ्युह्य बन्धविपर्य्ययञ्च कुर्वीत । तत्र समशिथिलस्थानेषु गाढ़बद्धे विकेशिकौषधनैरर्थक्यं शोफवेदनाप्रादुर्भावश्च। गाढ़समस्थानेषु शिथिलबद्धे विकेशिकौषधपतनं पट्टसञ्चाराद्व्रणवर्त्मविघर्षणमिति। गाढ़शिथिलस्थानेषु समं बद्धे च गुणाभाव इति ॥ ८ ॥

अविपरीतबन्धे वेदनोपशान्तिरसृक्प्रसादो मार्दवञ्च। अबध्यमानो दंशमशकतृणकाष्ठोपलपांशुशीतवातातपप्रभृतिभिर्विशेषैरभिहन्यते व्रणो विविधवेदनोपद्रुतश्च दुष्टतामुपैत्यालेपनादीनि चास्य विशोषमुपयान्ति ॥ ९ ॥

चूर्णितं मथितं भग्नं विश्लिष्टमतिपातितम् ।
अस्थिस्नायुसिराच्छिन्नमाशुबन्धेन रोहति ॥
सुखमेवं व्रणी शेते सुखं गच्छति तिष्ठति ।
सुखं शय्यासनस्थस्य क्षिप्रं संरोहति व्रणः ॥ १० ॥

कुर्य्यात् इति तद्यथा पित्तं श्लैष्मिकं बध्नीयात् प्रातर्ग्रीष्मशरदोः हेमन्ते पैत्तिकमहरहः वर्षादिष्वपि पित्तश्लैष्मिकं द्व्यहे सायमिति गाढ़ादिस्थानेऽप्यन्यथा कृतानां बन्धानां दोषं वक्तुमाह। तत्र समशिथिलस्थानेष्विति। चकारोऽत्र रागं समुच्चिनोति गाढ़बन्धदोषोऽयम् ॥ ८ ॥

यथोचितबन्धगुणमाह। अविपरीतबन्धे इति। बन्धव्यतिरेके दोषं वक्तुमाह। अबध्यमानो दंशेति। दंशो वनमक्षिका उपलः पाषाणः पांशुर्धूलिः आतपो घर्मः दुष्टतां वैकृत्यम् ॥ ९ ॥

अथ बन्धस्यात्ययगुणं दर्शयन्नाह। चूर्णितं मथितमिति। चूर्णितं बहुधाखण्डीकृतं मथितं विलोड़ितं भग्नं काण्डभग्नं विश्लिष्टं सन्धिच्युतम् अतिपातितं स्थानाच्युतम अलम्बमानम्। छिन्नशब्दो हस्तादिभिः प्रत्येकं सम्बध्यते चूर्णितादिषु गमनागमनस्थानशयनेष्वपि चतुर्षु बन्धः प्रशस्त

अबन्ध्या: पित्तरक्ताभिघातविषनिमित्ता यदा च शोफदाहपाकरागवेदनाभिभूता: क्षाराग्निदग्धा: पाकात् प्रकुपिता: प्रविशीर्णमांसाश्च भवन्ति॥ ११॥

कुष्ठिनामग्निदग्धानां पिड़का मधुमेहिनाम्।
कर्णिकाश्चोन्दुरुविषे विषजुष्टव्रणाश्च ये॥
मांसपाके न बध्यन्ते गुदपाके च दारुणे।
स्वबुद्ध्या चापि विभजेत् कल्याकल्यांश्च बुद्धिमान्॥
देशं दोषञ्च विज्ञाय व्रणञ्च व्रणकोविद:।
ऋतूंश्च परिसंख्याय ततो बन्धान् निवेशयेत्॥
ऊर्द्धं तिर्य्यगधस्ताच्च यन्त्राणां त्रिविधा मता।
यथा च बध्यते बन्धस्तथा वक्ष्याम्यशेषत:॥

इत्याह। सुखमेव व्रणी शेते शेते स्वपिति तिष्ठति ऊर्द्धीभूत आस्ते शय्यासनस्थस्य सुखं भवतीत्यध्याहार:॥ १०॥

येषु बन्धन एवानर्थकरस्तान् दर्शयन्नाह। अबन्ध्या: पित्तरक्ताभीति। निमित्तशब्द: पित्तादिभि: सह प्रत्येकं सम्बध्यते कदा पुनरेते अबन्धनीया इत्याह यदेत्यादि, शोफाद्यैव वेदनतया अभिभूता: वातानुविद्धा इत्यर्थ: अनबन्धेनात्यर्थं तोदोत्पत्तिरेव स्यात् तस्मान्न बन्ध: कर्त्तव्य इति तोददाहाभिभूता इत्यन्ये पठन्ति यद्वा च शोफतोददाहरागपाकवेदनाभिभूता इति केचित् पठन्ति। पाकात् प्रकुपित प्रशीर्णमांसाश्च भवन्तीति ये व्रणा: पाकात् प्रतिस्रस्तमांसा भवन्ति तेऽपि न बन्ध्या इत्यर्थ:॥ ११॥

उक्तानुक्तमर्थं सुखपाठार्थं श्लोकैर्निर्दिशन्नाह। कुष्ठिनामग्निदग्धानामिति कुष्ठिप्रभृतीनां मांसपाके सति व्रणानबध्यन्ते मधुमेहिनां पिड़का इति गुदपाके दारुणे इति बन्धो न कार्य्य इत्यर्थ: कल्याकल्यान् साध्यासाध्यान् देशं स्फिक्‌चिबुकचादिकं दोषं वातादिकं व्रणकोविदो व्रणविद्वान् ऋतून् शीतोष्णसाधारणान् परिसंख्याय बुद्धा निवेशयेत् कुर्य्यादित्यर्थ:।

घनां कवलिकां दत्त्वा मृदु चैवापि पट्टकम्।
विकेशिकामौषधञ्च नातिस्निग्धं समाचरेत्॥
प्रक्लेदयत्यतिस्निग्धा तथा रूक्षा क्षिणोऽति च।
युक्तस्नेहा रोपयति दुर्न्यस्ता वर्त्म घर्षति।
विषमञ्च व्रणं कुर्य्यात् स्तम्भयेत्स्रावयेत्तथा॥
यथावर्णं विदित्वा तु योगं वैद्यः प्रयोजयेत्॥
पित्तजे रक्तजे वापि सकृदेव परिक्षिपेत्।
असकृत्कफजे वापि वातजे च विचक्षणः॥
तलेन प्रतिपीड्याथ स्रावयेदनुलोमतः।
सर्वांश्चबन्धान् गूढांस्तान् सन्धींश्च विनिवेशयेत्॥
ओष्ठस्याप्येष सन्धाने यथोद्दिष्टो विधिः स्मृतः।
बुद्ध्यात्वभ्युत्थायाभियुक्तेन तथा चास्थिषु जानता॥
उत्तिष्ठतो निषण्णस्य शयनं चापि गच्छतः।
गच्छतो विविधैर्यानैर्नास्य दुष्यति स व्रणः॥
ये च स्युर्मांससंस्था वै त्वग्गताश्च तथा व्रणाः।
सन्ध्यस्थिकोष्ठप्राप्ताश्च सिरास्नायुगतास्तथा॥

केचित् सुश्रुताध्यायिनो गद्योक्तस्यार्थस्य व्यक्त्यर्थं संग्रहश्लोकान् पठन्ति। ऊर्द्ध्वं तिर्य्यगधस्ताच्च यन्त्रास्त्रिविधाः स्मृताः यथा च बध्यते बन्धस्तथा वक्ष्याम्यशेषतः इत्यादि विषमं च व्रणं कुर्य्यादिति वैषम्यमिह निम्नोन्नतत्वेन। स्तम्भयेत् स्रावयेत्तथेति स्तम्भनं स्रावणं वेह च यस्य वेति शकृदेव परिक्षिपेदिति एकवारमेव चेष्टयेदिति सर्वांश्च बन्धानित्यादिसर्वान् बन्धान् सन्धींश्च सर्वान् गुप्तान्तान् विनिवेशयेत् विनियोजयेत् कुर्य्यादित्यर्थः ओष्ठस्येत्यादि एष यथोद्दिष्टो विधिरोष्ठस्यापि सन्धाने स्मृतः बुद्ध्यात्वभ्युत्थेत्यादि अभियुक्तेन जानता वैद्येन बुद्ध्या अभ्युह्य अस्थिष्वपि सन्धानाय यथोद्दिष्टो

तथावगाढगम्भीराः सर्वतो विषमस्थिताः।
नैते साधयितुं शक्या ऋते बन्धाद्भवन्ति हि ॥ १२ ॥

विधिः कर्त्तव्य इति तथेत्यादि अवगाढतया गम्भीरतया इत्यर्थः गयदासाचार्य्येनायं पाठः अनार्ष एवक्तः तन्मतानुसारिणा ब्रह्मदेवेन क्वचिद्व्याख्यातः। ताभ्यां गृहीतत्वात् अस्माभिर्लिखितो व्याख्यातश्च। क्वचिदिति ॥ १२ ॥

इति सूत्रस्थाने निबन्धसंग्रहे अष्टादशोऽध्यायः समाप्तः।

एकोनविंशोऽध्यायः।

अथातो व्रणितोपासनीयमध्यायं व्याख्यास्यामः।

व्रणिनः प्रथममेवागारमन्विच्छेत्तच्चागारं प्रशस्तवास्त्वादिकं कार्य्यम्।
प्रशस्तवास्तुनि गृहे शुचावातपवर्जिते।
निवाते न च रोगाः स्युः शारीरागन्तुमानसाः ॥ १ ॥

अथातो व्रणितोपासनीयमध्यायं व्याख्यास्यामः।

व्रणितस्य सञ्जातव्रणस्य उपासनं सेवनं तच्च गृहशय्यासनादिकं तद्विद्यते यस्मिन् स तथा। शय्यासनादिकं गृहस्थस्य कार्य्यमिति प्रागेव गृहं निर्देष्टुमाह। रणितस्य प्रथममेवेति। व्रणिन इत्यन्ये पठन्ति। तच्चापं प्रशस्तवस्त्वादिकं कार्य्यम्। यतस्तस्मिन् तथा स्थितस्य व्रणिनः शरीरे रोगा न भवेयुरिति दर्शयितुमाह। प्रशस्तवास्तुनीति प्रशस्तवास्तुनिगृहे

तस्मिन् शयनमसम्बाधं स्वास्तीर्णं मनोज्ञं प्राक्शिरस्कं सशस्त्रं कुर्वीत ।

सुखचेष्टाप्रचारः स्यात् स्वास्तीर्णे शयने व्रणी ।
प्राच्यां दिशि स्थिता देवास्तत्पूजार्थं नतं शिरः ॥

तस्मिन् सुहृद्भिरनुकूलैः प्रियम्वदैरुपास्यमानो यथेष्टमासीत ॥ २ ॥

सुहृदो विक्षिपन्त्याशु कथाभिर्व्रणवेदनाः ।
आश्वासयन्तो बहुशस्त्वनुकूलाः प्रियम्वदाः ॥

न च दिवानिद्रावशगः स्यात् ।

इति वास्तुशब्देन प्रदेशः कथ्यते तेन प्रशस्तदेशे गृहे इत्यर्थः प्रशस्तत्वं देशस्य प्राङ्निम्नत्वं सुदिक्स्थितत्वञ्च कृष्णमृत्तिकात्वं सुवर्णवर्णमृत्तिकात्वं चेत्यादिकं गृहसन्निवेशार्थां भूमिस्तदधिष्ठातो पुरुषो वास्तुशब्देनोच्यते। इति अन्ये तस्य प्रशस्तत्वं हि मर्म्मादिरहितत्वं शयनस्थस्य व्रणिनः सव्रणान्यङ्गानि सुखमासत इति तदेव निर्द्दिशन्नाह ॥ १ ॥

तस्मिन् शयनसम्बाधमिति । तस्मिन्नित्यागारे असम्बाधमसङ्कीर्णं शोभनैरास्तरणैस्तूलीगण्डोपधानैराच्छादनैश्चाच्छादितं मनोज्ञं रमणीयं सशस्त्रं शस्त्रसहितं हिंस्रनिवारणार्थम् इत्थंभूतस्य शयनस्य गुणमाह। सुखचेष्टाप्रचारस्यादिति । चेष्टाप्रचार इति शयनपरिवर्त्तनादिगतिः तस्मिन् शयने यथा व्रणितेन स्थातव्यं तथोपदिशन्नाह । तस्मिन् सुहृद्भिरिति । सुहृद्भिरिति मित्रैः अनुकूलैरिति आत्मनोऽनुगतवर्त्तिभिरित्यर्थः उपास्यमानः सेव्यमानः ॥ २ ॥

सुहृदुपासनफलमाह । सुहृदो विक्षिपन्ति । विक्षिपन्ति विशेषेण प्रेरयन्ति स्फुटयन्तीत्यर्थः कथाः पूर्वपुरुषवृत्तान्तप्रबन्धवचनाः आश्वासयन्तः शयनेदोषवन्तमाचारं परिहरन्नाह । न च दिवानिद्रावशगः स्यात् ।

दिवास्वप्नाद्व्रणे कण्डुर्गात्राणां गौरवं तथा।
श्वयथुर्वेदना रागः स्रावश्चैव भृशं भवेत्॥
उत्थानसंवेशनपरिवर्त्तनचंक्रमणोच्चैर्भाषणादिषु चात्म-चेष्टास्वप्रमत्तो व्रणं संरक्षेत्।
स्थानासनं चंक्रमणं यानयानातिभाषणम्।
व्रणवान्न निषेवेत शक्तिमानपि मानवः॥
उत्थानाद्यासनं स्थानं शय्यां चातिनिषेविता।
प्राप्नुयान्मारुताद्रुजस्तस्माद्विवर्जयेत्॥ ३॥
गम्यानाञ्च स्त्रीणां सन्दर्शनसम्भाषणसंस्पर्शनानि दूरतः परिहरेत्।

कथञ्चिद्दिवास्वप्ने कृते दोषमाह। दिवास्वप्नाद्व्रणे कण्डुरिति। अत्र कण्डूगौरवे कफकृते, श्वयथुवेदने वातकृते, रागः पित्तजनितः स्रावो वा रक्तकृतः एतेन दिवास्वप्नस्य अखिलदोषकर्तृत्वं उक्तं सर्व्वास्ववस्थासु व्रणसंरक्षाकरणीयेति दर्शयन्नाह। उत्थानसंवेशनपरिवर्त्तनेति। संवेशनं विस्तरणं परिवर्त्तनं वामदक्षिणकुक्षौविलोटनं चंक्रमणं गतागतं आत्मचेष्टासु उत्थानादिकासु एव अप्रमत्तः व्रणीति शेषः चतुर्व्विधामपि व्रणिनः कायचेष्टां नियमयन्नाह स्थानासनेति। स्थानमूर्द्ध्वीभूतस्य स्थितिः आसनमुपविष्टस्य स्थितिः "स्थानासनं चंक्रमणं यानयानातिभाषणम्। व्रणवान्ननिषेवेत शक्तिमानपि मानव" इति केचित् पठन्ति यानयानं रथादिगमनं उत्थानादीनामतिनिषेवनाद्दोषमाह। उत्थानाद्यासने स्थानमिति। सामान्याकारं नियमविशिष्टं स्पर्शाश्रयं विहारमतिदोषकरं पृथगेव निर्दिशन्नाह॥ ३॥

गम्यानाञ्च तथा स्त्रीणामिति। गम्या गमनार्हा ग्राम्यधर्मयोग्या इत्यर्थः ताश्च भार्य्यावेश्याचेटीप्रभृतयः सन्दर्शनादिषु संस्पर्शे अभिमुख्यार्थः

२७

स्त्रीदर्शनादिभिः शुक्रं कदाचिच्चलितं स्रवेत्।
ग्राम्यधर्मकृतान् दोषान् सोऽसंसर्गोऽप्यवाप्नुयात्॥

नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्ल-लवणकटुकगुडपिष्टविकृतिवल्लूरशुष्कशाकाजाविकानूपौदक-मांसवसाशीतोदककृशरापायसदधिदुग्धतक्रप्रभृतीन् परिहरेत्॥ ४॥

कस्मादस्य स्त्रीणां सन्दर्शनादिपरिहर्त्तव्यमित्याह। स्त्रीदर्शनादिभिरिति। अतिदोषकरमाहारं नियमयाह नवधान्यमाषेति। कलायोऽत्र विपुटः एतेन हरेणुसतीनकयोरप्रतिषेधः निष्पावशब्देनात्र राजशिम्बी हरितकमिति "कुठेरशिग्रुसुरससुमुखासुरिभूस्तृणाः। शुक्राकशङ्खिकाचेति वर्ग्यं हरितकं विदुः" इति। अत्राम्लादयस्त्रयोरसा गुडपिष्टविकृतिरिति विकृतिशब्दो गुड़पिष्टाभ्यां सहसम्बध्यते वल्लूरं शुष्कमांसं अजाविकानूपौदकमांसवसेति अजाविकौ प्रसिद्धौ आनुपशब्दो द्विविधः व्युत्पादितोऽव्युत्पादितश्च तत्र व्युत्पादितः पञ्चसुकूलचरादिषु वर्त्तते। अत्र तु व्युत्पादित एव ग्राह्यः। तदेवाह अनुगता आपो यस्मिन् सोऽनुपदेशः तच्चारिणस्तु अनूपाः. ते च कूलचराः प्लवाश्चेति औदकशब्देन पुनरत्र कोशस्थाः पादिनो मत्स्याश्चोच्यन्ते। वसा शुद्धमांसस्नेहः कृशरातिलतण्डूलमाषैः कृता यवागू, पायसं क्षीरसिद्धास्तण्डुलाः। अन्ये तु अजानूपौदकमांसमिति पठन्ति यद्यपि जाङ्गलादयोऽष्टविधास्तथाप्यत्र जङ्गालविष्किरौ जाङ्गलशब्देनोच्येते कुतस्तयोः प्रधानतमत्वात् यथा लवणशब्दस्याविशेषोक्तावपि प्रधानत्वात् सैन्धवं गृह्यते तद्वत् तेनात्र जङ्गालविष्किरौ विहाय अन्येषां जाङ्गलानां प्रतिषेध इति आनूपौदकयोरपि अजाङ्गलत्वादेव निषेधे सिद्धे पुनरुपादाने तन्मांसानामत्यर्थं दोषत्वप्रतिपादनार्थं अजाङ्गलमांसविकार इति निषेधमुखेन विधिप्रणयनम्। जङ्गालविष्किरयोरप्यवस्थायामुपयोगख्यापनार्थमिति। प्रभृति

तक्रान्तो नवधान्यादिर्येनायं वर्गः प्रकीर्त्तितः।
दोषसञ्जननो ह्येष विज्ञेयः पूयवर्द्धनः॥ ५॥
मद्यपश्च मैरेयाऽरिष्टासवसीधुसुराविकारान् परिहरेत्।
मद्यमम्लं तथा रूक्षं तीक्ष्णमुष्णञ्च वीर्य्यतः।
आशुकारि च तत्पीतं क्षिप्रं व्यापादयेद्व्रणम्॥

ग्रहणाद्दरकोद्दालकादीनां परिहारः एषां भिन्नजातीयानामपि दोषकारत्वं प्रतिपादयन्नाह॥ ४॥

तक्रान्त नवेत्यादि। ननु तक्रप्रभृतीनिपरिहरेदित्यत्र प्रभृतिग्रहणाद्दरकोद्दालकादीनां ग्रहणं अतस्तेषामपि दोषसञ्जननत्वञ्च अतएव पूयवर्द्धनत्वप्रतिपादनार्थमिति दोषसञ्जनन इति ननु नवधान्यादौ वर्गे केचिद्वातहराः केचिच्च पित्तहराः। केचिच्च कफहरास्तत्कथमुच्यते दोषसञ्जनन इति? नैषदोषः, यतोऽत्र दोषशब्देन व्रणदुष्टिरेवोच्यते यद्यपि व्रणदुष्टिरपि दुष्टैरेव दोषैः क्रियते तथापि न दोषः कस्मान्निदानद्रव्याणां त्रिविधत्वात् तद्यथा किञ्चित् द्रव्यं दोषकारि किञ्चित्व्याधिकारि किञ्चिदुभयकारि इति। किं बहुनोक्तेन अत्र निबन्धनकारैर्बहुधा जल्पितं तच्चास्माभिर्विस्तरभयान्न दर्शितमिति॥ ५॥

तत्र विशिष्टविषयेऽतिदोषकरत्वाद्विशिष्टं पानद्रव्यं चाङ्गीकृत्य निषेधार्थमाह। मद्यपश्च मैरेयेत्यादि। शस्त्रकर्म्मादावेकवारं मद्यपस्य मद्यपानं अभिहितं तत्र व्रणे सति निषेध एव मैरेयं सुरासवयोरेकस्मिन् भाजने सन्धानम्। अरिष्टमभयारिष्टादि। आसवा पलासचारोदकासवादयो महाकुष्ठाभिहिताः साधुः सम्यक् सोऽपि तालाकारः (१) पक्वरसिकसीतरसिकादिभेदेन सुरालोहितवर्णा, पिष्टककल्केन किञ्चित्कलुषा अत्र केचिदाचार्य्या एवं ब्रुवते यानि मद्यानि अम्लादिगुणयुक्तानि भवन्ति तानि सर्व्वाण्येव व्रणिभिर्न पातव्यानि यानि पुनर्द्राक्षारसोद्भवानि मद्यानि अम्ला-

(१) साधुर्भेदा इति केचित्।

वातातपरजोधूमावश्यायातिसेवनातिभोजनानिष्टश्रवणदर्शनेर्ष्यामर्षभयक्रोधशोकध्यानरात्रिजागरणविषमाशनानशनशयनोपवासवाग्व्यायामस्थानचंक्रमणशीतवातविरुद्धाशनाजीर्णमक्षिकाद्याबाधाः परिहरेत् ॥ ६ ॥

व्रणिनः सम्प्रतप्तस्य कारणैरेवमादिभिः।
क्षीणशोणितमांसस्य भुक्तं सम्यक् न जीर्य्यति ॥
अजीर्णात्पवनादीनां विभ्रमो बलवान् भवेत्।
ततः शोफरुजास्रावदाहपाकानवाप्नुयात् ॥

सदा नीचनखरोमणा शुचिना शुक्लवाससा शान्ति-

दिगुणविपरीतगुणानि रक्तपित्तादिष्वभिमतानि तानि च व्रणितस्याव-स्थायां कदाचिद्दातव्यानि ग्रन्थकर्तुरभिप्राय इति कुतः पुनर्म्मैरेयादयः परिहरणीया इत्याह। मद्यमम्लमिति। आभ्यन्तराश्रयाहारविहारौ नियम्य बाह्यानपि परिहरन्नाह। वातातपरजोधूमेति ईर्ष्यापरसम्पत्त्यसहिष्णुता, अमर्षः क्रोधः, ध्यानमनवरतकार्य्याकार्य्यचिन्तनं, विषमाशनशयनमिति विषमशब्दः शयनासनाभ्यां सहप्रत्येकं सम्बध्यते बहुस्तोकाकालभोजनं विषमासनं रात्रिजागरणं दिवास्वप्नश्च विषमशयनं तत्र विषमशयनं निषिद्धमपि पुनरत्यन्तापथ्यकारित्वेन नियमार्थं शीतोवातः विरुद्धाशनं समसधुष्टतादिकं कुतः पुनरेते परिहार्य्या इत्याह ॥ ६ ॥

व्रणिनसंप्रतप्तस्येति। संप्रतप्तस्येति सम्यक्प्रकारेण सन्तापितस्य। पवनादीनामिति वातपित्तकफानामित्यर्थः। विभ्रमो व्यापद्विशेषो वातादीनां, स्थानान्तरगमनं वा शोफरुजे वातस्य, आस्रावः कफस्य, दाहपाकौ पित्तस्येति। आधिदैविकं विशिष्टमागन्तुबाधं परिजिहीर्षुराह। सदा नीचनखेति शान्त्यादिपरेण शान्त्यादिकुर्वतेत्यर्थः शिष्यहितार्थं गुरुःस्वयमेव प्रश्नं कुर्वन्नाह। तत्कस्य हेतोरिति। तन्नीचनखरोमादिकारणं अन्येऽपि तत्कस्य हेतोरिति पठन्ति अपिशब्दोऽत्र सानुनयप्रश्ने इति

मङ्गलदेवताब्राह्मणगुरुपरेण भवितव्यमिति। तत्कस्य हेतो-र्हिंसाविहाराणि हि महावीर्य्याणि रक्षांसि पशुपति-कुवेरकुमारानुचराणि मांसशोणितप्रियत्वात् क्षतजनिमित्तं व्रणिनमुपसर्पन्ति सत्कारार्थं जिघांसूनि वा कदाचित् ॥७॥

भवति चात्र।

तेषां सत्कारकामानां प्रयतेतान्तरात्मना।
धूपवल्युपहारांश्च भक्ष्यांश्चैवोपहारयेत् ॥
ते तु सन्तर्पिता आत्मवन्तं न हिंस्युः।
तस्मात्सततमतन्द्रितो जनपरिहृतो नित्यदीपोदकशस्त्र-

च व्याख्यानयन्ति शिष्यहितत्वेन स्वयमेव हेतुसाकाङ्क्षं प्रश्नं कृत्वा सहेतु-मुत्तरमाह। हिंसाविहाराणीति। हिंसाविहाराणि वधक्रीडनानि अन्ये तु हिंसार्थं विहारश्चेष्टा येषां तानि हिंसाविहाराणि हियस्मादर्थे यस्मात् क्षतजनिमित्तं व्रणिनमुपसर्पन्ति तस्मान्नीचनखादिना भवितव्य-मिति हि स्थाने अन्ये तुशब्दं यस्मादर्थे पठन्ति रक्षांसि पशुपतिकुवेर-कुमारानुचराणि महेश्वरधनदकार्त्तिकेयानुगानि तदा हेषकारोऽणीत्यर्थः क्षतजनिमित्तं शोणितार्थं सत्कारार्थं जिघांसुनि च कदाचित्पूजासत्का-रार्थं पूजार्थं आयुष्यं तं व्रणिनमुपसर्पन्ति गतायुसन्तु जिघांसूनीति अन्येत्वन्यथा व्याख्यानयन्ति कदाचिद्वा जिघांसूनि हन्तुमिच्छन्ति उपसर्पन्ति। सत्कारार्थं तेषां सत्कारादानायाह ॥ ७ ॥

तेषां सत्कारणामिति तेषामनुचराणां पूजाभिलाषिणां प्रयतेतान्त-रात्मना विशिष्टो वैद्यो धूपादीनुपहारयेत् दापयेदित्यर्थः वलिः पशुवर्जिता पूजा, उपहारः सपशुर्वलिः। तेषां तर्पणफलमाह। ते तु सन्तर्पिता इति। आत्मवन्तं रक्षांसि हिंसितुं न शक्नुवन्ति। आत्मवांस्तु नीच-नखरोमादिभिर्भवति तस्मात् सततमतन्द्रितो जनपरिहृते नित्यदीपोदक-

स्रग्दामपुष्पलाजाद्यलङ्कृते वेश्मनि सम्पन्मङ्गलमनोऽनुकूला: कथा शृण्वन्नासीत् ॥

सम्पदाद्यनुकूलाभिः कथाभिः प्रीतमानसः।
आशावान् व्याधिमोक्षाय क्षिप्रं सुखमवाप्नुयात् ॥८॥

ऋग्यजुःसामाथर्ववेदाभिहितैरपरैश्चाशीर्विधानैरुपाध्यायाभिषजश्च सन्ध्ययोरक्षां कुर्य्युः ॥

सर्षपारिष्टपत्राभ्यां सर्पिषा लवणेन च।
द्विरह्नः कारयेद्धूपं दशरात्रमतन्द्रितः ॥

छत्रातिच्छत्रे लाङ्गलीं जटिलां ब्रह्मचारिणीं लक्ष्मीं गुहामतिगुहां शतवीर्य्यां सहस्रवीर्य्यां सिद्धार्थांश्च शिरसा धारयेत् ॥

शस्तस्रक्दामपुष्पलाजाद्यलङ्कृते वेश्मनि सम्पन्मङ्गलमनोऽनुकूलाः कथाः शृण्वन्नासीत अतन्द्रितोऽनलसः। स्रक् मूर्द्धार्हा पुष्पमालादाम ग्रैवेयादिष्वाभरणं पुष्पाणि अग्रथितानि आदिशब्दाच्चन्दनादर्शवीणादयः सम्पन्मङ्गलमतानुकूला इति अनुकूलशब्दः सम्पदादिभिः प्रत्येकं सम्बध्यते सम्पदाद्यनुकूलत्वात् अवश्य फलमाह। सम्पदाद्यनुकूलाभिरिति ॥ ८ ॥

अपरामपि कर्त्तव्यतामाह। ऋग्यजुरित्यादि। आशीर्विधानैः आशीःकरणैः आशीर्वादैरित्यर्थः उपाध्यायाः पुरोहिताः मक्षिकादीनां रक्षादीनां च रक्षार्थं धूपमाह। सर्षपारिष्टेति अरिष्टपत्रं निम्बपत्रं लवणेन सैन्धवेन द्विरह्न इति दिनस्य वारद्वयं प्रातः सायञ्च दशरात्रं सर्षपादीनि रक्षोघ्नानि हतौजांसि रक्षांसि नैव पुनर्व्रणिनमुपसर्पन्ति। छत्रातिच्छत्रामिति। छत्रातिच्छत्रे द्रोणपुष्पीद्वयं लाङ्गलीकपिकच्छुः जटिला मांसी ब्रह्मचारिणी मुण्डितिकापत्रङ्काष्ठमित्यपरे; लक्ष्मीसमीलक्ष्मणेत्यन्ये विष्णुक्रान्तेत्यपरे, गुहातिगुहे शालिपर्णी पृश्निपर्ण्यौ, शतवीर्य्या शतावरी, नास दूर्वेत्यन्ये। सहस्रवीर्य्या श्वेतदूर्वा, सिद्धार्थकाः सर्षपाः

व्यजेत वालव्यजनैर्व्रणं न च विघट्टयेत् ।
न तुदेन्न च कण्डूयेच्छयानः परिपालयेत् ॥ ८ ॥
अनेन विधिना युक्तमादावेव निशाचराः ।
वनं केसरिणाक्रान्तं वर्जयन्ति मृगा इव ॥
जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरम् ।
भुञ्जानो जाङ्गलैर्मांसैः शीघ्रं व्रणमपोहति ॥
तण्डुलीयकजीवन्ती सुनिषण्णकवास्तुकैः ।
बालमूलकवार्त्ताकपटोलैः कारवेल्लकैः ॥
सदाडिमैः सामलकैर्घृतभृष्टैः ससैन्धवैः ।

अन्यदप्याह । व्यजेत वालव्यजनैरिति । वालव्यजनैश्चामरैः न च विघट्टयेत् न चालयेत् न तुदेत् न व्यथेत् न कण्डूयेत् न खर्ज्जुयेत् नखविषभयात् । शयानं स्वपन्तं केचिदमुं न पठन्ति एतस्य रक्षोघ्नविधेः फलं दर्शयन्नाह ॥ ८ ॥

अनेन विधिमिति । आहारविधिविधेयमधिकृत्याह । जीर्णशाल्योदनं स्निग्धमिति । जीर्णशाल्योदनमिति नवधान्यनिषेधादेवपुराणशालीनां लब्धे पुनर्जीर्णग्रहणं अपुराणनिषेधार्थं तेन वर्षोषितं तं ग्राह्यं द्रवोत्तरमिति द्रव उत्तरो यस्मिन् स द्रवोत्तरः द्रवप्रधान इति केचिद्व्याख्यानयन्ति इदं च व्याख्यानं गयदासाचार्य्यो न मन्यते कस्मात् व्रणिनां तोयपाननिषेधात् तदुक्तं "व्रणे च मधुमेहे च पानीयं मन्दमाचरेत्" इति तथा भोजेऽपि "व्रणोदरास्थापनपीड़ितानाम् । प्रमेहिणां छर्द्यतीसारिणां च । द्रवं न दद्यादथवापि कोष्णम् । स्वल्पं हितं भेषजसंस्कृतं च" इति । तथा द्वादशाशनप्रविचारेऽपि "प्रक्लिन्नदेहान् व्रणिनः शुष्कैर्मेहिन एव च" इति तस्माद्द्रवादुत्तरः द्रवोत्तरः द्रवहीनमूर्त्तिप्रधान इति व्याख्येयं जाङ्गलमांसभोजनमपि रोपणकाले दातव्यं मांसं मांसेन वर्द्धत इति वचनात् जीवन्ति डोड़िका सुनिषण्णकाः सिरवालिकाः चतुष्पर्णीत्यन्ये । घृतभृष्टै-

अन्यैरेवं गुणैर्वापि मुद्गादीनां रसेन वा ॥
शक्तून् विलेपीं कुल्माषं जलञ्चापि शृतं पिबेत्।
व्रणे श्वयथुरायासात् स च रागश्च जागरात्॥
तौ च रुक् च दिवास्वापात्ताश्च मृत्युश्च मैथुनात्॥ १० ॥
दिवा न निद्रावशगो निवातगृहगोचरः।
व्रणी वैद्यवशे तिष्ठन् शीघ्रं व्रणमपोहति ॥
एवं वृत्तसमाचारो व्रणी सम्पद्यते सुखी।
आयुश्च दीर्घमाप्नोति धन्वन्तरिवचो यथा ॥ ११ ॥

रिति एतेन घृतेनैव संस्कारो विधेयो नान्यैरिति ससैन्धवैरिति सैन्धवमेव लवणेषु ग्राह्यं अन्यैरेवं गुणैर्वेति स्वस्थवृत्तिकैर्व्रीहिभेश्च वेतायमण्डूकपर्णी कर्कोटकप्रभृतिभिः मुद्गादीनां रसेन वेति समीधान्येषु निषेधः वर्जंमुद्गादयः शक्तूनिति यथासात्म्यं यवसात्म्यानां यवशक्तवः शाल्यादिसात्म्यानां तल्लाजशक्तवः इति विलेपीस्वल्पद्रवा, वरमिल्ला कुल्माषाः यवपिष्टमयाः उत्स्विन्नाः यथोक्ताहाराचारानुवर्त्तिनो व्रणितस्य फलोपदर्शनपरं श्लोकद्वयमाह ॥ १० ॥

दिवा न निद्रवशग इति। निवातगृहगोचर इति वातरहितागारविषयः तत्स्थायीत्यर्थः एवमनेन प्रकारेण वृत्तः प्राप्तः सम्यक् आचार आहारो विहारश्च येन अथवा एवमनेन प्रकारेण वृत्तसमाचारः समाचरणं व्यवहरणं यस्य स एवं वृत्तसमाचारः सम्पद्यते सुखीति सुखीभवतीत्यर्थः यथेति सत्यं कश्चिदाद्यस्तु अनयोः श्लोकयोर्मध्ये अमुं श्लोकं पठन्ति। "व्रणे श्वयथुरायास्यात् सच रागश्च जागरात्। तौच रुक्च दिवास्वप्नात् ताश्च मृत्युश्च मैथुनात्"। व्याख्यानयन्ति। स च श्वयथुरागश्च रक्तता च जागरात् रात्रिजागराद्भवतः तौ चेति श्वयथुरागौ रुक्व्यथा वा दिवास्वप्नात् भवन्ति ता इति श्वयथुरागरुजो मृत्युश्च मैथुनात् सम्भवन्तीत्यर्थः

विंशतितमोऽध्यायः।

अथातो हिताहितीयमध्यायं व्याख्यास्यामः।

यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यनेन हेतुना न किञ्चिद्द्रव्यमेकान्तेन हितमहितं वास्तीति केचिदाचार्य्या ब्रुवते तत्तु न सम्यक्। इह खलु यस्माद्द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि च भवन्ति। तत्रैकान्तहितानि जातिसात्म्यात् सलिलघृतदुग्धौ-

श्रीगयदासाचार्य्यप्रभृतयस्तु द्वावेव श्लोकौ मन्यन्ते इमं च कस्मिंश्चित् पुस्तके प्रमादपठितं दृष्ट्वा कश्चिदेवाविहितपाठं व्याख्यानयति। अस्मिंश्चास्वीक्रियमाणे निर्णीतपाठव्याख्यातृभिः श्रीगयदासप्रभृतिभिः सह विरोधः स्यात् तस्मादयं न पठनीय इति ॥११॥

इति सूत्रस्थाने निबन्धसंग्रहे एकोनविंशोऽध्यायः।

अथातो हिताहितीयमित्यादि। हिताहितान्यधिकृत्य कृतोऽध्यायो हिताहितानि वा अस्मिन् विद्यन्ते इति हिताहितीयः। प्रथमं परमतमेव दर्शयन्नाह यद्वायोः पथ्यमित्यादि। यद्वायोः पथ्यं तत्पित्तस्यापथ्यमिति तैलकाञ्जिकमित्यादि। इतिशब्दोऽयमाद्यर्थः। एकान्तेन सातत्येन किञ्चिदपि द्रव्यं हितं नास्ति पित्तस्यापथ्यत्वात्। तत्र एकान्तेन नाहितमस्ति वायोः पथ्यत्वात्। वा शब्दोऽत्र समुच्चयार्थः। परमतनिषेधार्थं स्वमतमाह तत्तु न सम्यगिति। इहेति सौश्रुते तन्त्रे। खलु निश्चयेन। स्वभावतः प्रकृतितः, या सर्वावस्थासु अपरित्याज्या सा द्रव्यस्य प्रकृतिः; यथा वह्नेरुष्णत्वमपां द्रवत्वमित्यादि। संयोगतः एकद्वित्रादिद्रव्येण संहतीभावः। चका-

दनप्रभृतीनि। एकान्ताहितानि दहनपचनमारणादिषु प्रवृत्तान्यग्निक्षारविषादीनि। संयोगादपराणि विषतुल्यानि भवन्ति। हिताऽहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यतः सर्वप्राणिनामयमाहारार्थं वर्ग उपदिश्यते ॥ १ ॥

तद्यथा रक्तशालिषष्टिककङ्गुकमुकुन्दकपाण्डुकपीतकप्रमोदककालकाशनकपुष्पककर्द्दमकशकुनाहृतसुगन्धककलम-

रेण संयोगेष्वपि स्वभावोऽपि हेतुत्वेन समुच्चीयते तथा देशकालमात्रा-संस्काराश्च स्वभावानुसम्बन्धाः समुच्चीयन्ते। एकान्त हितान्येव प्रथमं दर्शयन्नाह तत्रैकान्तहितानीति। तत्रेति हिताहितद्रव्येषु मध्येषु। जातिसात्म्यादिति मनुष्यजातिसात्म्यात्। आत्मना देहेन सह स्थितं द्रव्यमविकारिसात्म्यं। प्रभृतिग्रहणात् यवगोधूमादयः। एकान्ताहितानि दर्शयन्नाह एकान्ताहितानि त्विति। एतान्यग्निक्षारविषादीनि एकान्ताहितानि स्वस्थानां, रोगीणान्तु रोगमात्रादपेक्षया हितान्येवेति। अन्ये त्वेवं पठन्ति,—तेषामेव संयोगतस्त्वपराणि। व्याख्यानयन्ति च एकान्ताहितानि सम्बध्यन्ते। तुशब्दश्चार्थः, तेन स्वभावसंयोगानुसक्तैर्देशादिभिरप्येकान्तहितानि भवन्ति। हिताहितानि दर्शयन्नाह हिताहितानि त्विति। अस्यार्थः प्रागेवात्रैवाध्याये व्याख्यातः॥ १॥

रक्तशालिषष्टिकेत्यादि। रक्तशालिः स्वनाम्ना प्रसिद्धः। षष्टिको गौरषष्टिकः। काङ्गुकः पीततण्डुलः। मुकुन्दकः कृष्णषष्टिकः। पाण्डुकः पाण्डुकशालिः, स च पाण्डुतुषयुक्तः। सुगन्धको देवशालिः। कलमः शालिविशेषः कल्विरिति लोके प्रसिद्धः। एते षष्टिकादयः शूकधान्येषु। नीवारः प्रसातिकाधान्यमध्ये रक्तशूको भवति, तुलजोधान्यमिति लोके प्रसिद्धः। उद्दालकोऽरण्यकोद्रवः। वेणवो वेणुयवाः। नीवारादयस्तु शूकधान्येषु। एणः कृष्णमृगः; हरिणस्ताम्रवर्णमृगः। कुरङ्गः तुरङ्ग

नीवारकोद्रवोद्दालकश्यामाकगोधूमवेणुयवादय:। एणहरिण-कुरङ्गमृगमातृका-श्वदंष्ट्राकरालक्रकरकपोतलावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकादीनां मांसानि। मुद्गवनमुद्गमकुष्ठ-कलायमसूरमङ्गल्यचणकहरेणवाढकीसतीला:। चिल्लिवास्तुक-सुनिषण्णकजीवन्तीतण्डुलीयकमण्डूकपर्ण्य:। गव्यं घृतं क्षौद्र-सैन्धवदाड़िमामलकमित्येष वर्ग: सर्वप्राणिनां सामान्यत: पथ्यतम:। तथा ब्रह्मचर्य्यानिवातशयनोष्णोदकनिशास्वप्नव्यायामाश्चैकान्तत: पथ्यतमा:। एकान्तहितान्येकान्ताहितानि प्रागुपदिष्टानि। हिताहितानि तु यद्वायो: पथ्यं तत्पित्तस्यापथ्यमिति॥ २॥

इति लोके प्रसिद्ध:। मृगमातृका स्वल्पा पृथूदरा च तुरङ्गस्लो। श्वदंष्ट्रा चतुर्दंष्ट्रोऽति दुष्ट: कर्कटका इति लोके। कराल: कस्तूरीमृग:। क्रकर: क्रकसपक्षी, कयारकरवारा इति भाषा। तित्तिरि: कृष्णतित्तिरि:। कपिञ्जलो गौरतित्तिरि:। वर्त्तीर: घर्घर इति लोके; वर्त्तिका तद्भेद:। एणादयो जाङ्गलमृगमांसेषु। लावादयो जाङ्गलपक्षिषु। मङ्गल्या: पाण्डुवर्णा मसूरा:। हरेणु: सतीलभेद: वर्त्तुलकलाय:। आढ़की तुवरी। सतीलो वर्त्तुलक:। मुद्गादयो वैदलसूपेषु। चिल्ली चेलवास्तुक:। वास्तुक: टङ्कणवास्तुक:। सुनिषण्णक: शिरिवालिका:, चतुष्पर्णीत्यपरे। जीवन्ती डुड़िका। मण्डूकपर्णी ब्राह्मी। चिल्लीप्रभृतीनि शाकेषु। गव्यं घृतं स्नेहेषु। आमलकदाड़िमौ फलेषु। किन्तु नीवारकोद्रवोद्दालकादीनां वातकरत्वात् वाताहितत्वं स्यात्, तत्कथं हितानि इत्युच्यन्ते? नैवं, अल्पवातकरत्वाददोषकरत्वव्यपदेश इति। आहारमैकान्तिकं निर्दिश्य विहारं निर्दिशन्नाह तथा ब्रह्मचर्य्येत्यादि। ब्रह्मचर्य्यं स्त्रीसेवानिवृत्ति:। व्यायाम: स्वस्य मात्रया काले च पथ्यतम:। व्यायामश्चेति चकाराद्वेगाविधारणादीनां

संयोगतस्त्वपराणि विषतुल्यानि भवन्ति ; तद्यथा,— वल्लीफलकरककरीराम्लफललवणकुलत्थपिण्याकदधितैलविरोहिपिष्टशुष्कशाकाजाविकमांसमद्यजाम्बवचिलिचिमम-त्स्यगोधावराहांश्च नैकध्यमश्नीयात् पयसा ॥ ३ ॥

रोगं सात्म्यञ्च देशञ्च कालं देहञ्च बुद्धिमान् ।
अवेक्ष्याग्न्यादिकान् भावान् रोगवृत्तेः प्रयोजयेत् ॥

ग्रहणम् । एकान्तहितानीति । एकान्तहितानि सलिलादीनि । एकान्ताहितानि अग्न्यादीनि । एतानि पूर्वकथितानि । हिताहितानि त्वीति तुशब्दसार्थे, तेन हिताहितानि च प्रागुपदिष्टानि । कानि पुनस्तानि हिताहितानि प्रागुपदिष्टानीत्याह यद्वायोः पथ्यं तत्पित्तस्यापथ्यमिति ॥२॥

संयोगतस्त्वित्यादि । विषतुल्यानीति विषतुल्यत्वेन एकान्ताहितत्वमुक्तम् । कुतः स्वस्थे विषस्यैकान्ताहितत्वात् । तान्येव दर्शयन्नाह तद्यथा वल्लीफलेति । वल्लीफलं कुष्माण्डादिवल्लिजं,अन्ये शिम्बादिमाहुः । करकं छत्रकं, छत्रकभेदं सुखण्डकसंज्ञमित्यन्ये । करीरं वंशाङ्कुरम् । अम्लफलानि आम्रातकादीनि । विरोहि विगतरोहणं विगताङ्कुरितञ्च । पिष्टं तण्डुलपिष्टम् । जाम्बवं जम्बूफलम् । चिलिचिममत्स्यः सकलोलोहिताक्षो सर्वतो लोहितराजो प्रायो भूमौ चरति तलनमीनसंज्ञकः । नैकध्यं नैकस्मिन् काले एतानि वल्लीफलादीनि वराहान्तानि समस्तवस्तून्यपि पयसा सह नाश्नीयात् । केचिदेतस्य वर्गस्यान्तेऽजाङ्गलमांसं स्वस्थानामन्यत्र रोगोपसृष्टेभ्य इति पठन्ति व्याख्यानयन्ति च अजाङ्गलमांसं जलेशयानुपादिभेदेन पञ्चप्रकारम् ॥ ३ ॥

विरुद्धस्यापि कचित् प्रयोगं दर्शयन्नाह रोगं सात्म्यञ्चेति । रोगमुदरादिकम् । सात्म्यमष्टविधं जात्यातुरौषधान्नरस-देश-ऋतूदकभेदतः । देशमानूपादिकम् । कालं शीतोष्णवर्षलक्षणम् । देहं स्थूलकृशमध्यभेदभिन्नम् अग्न्यादिकान भावानिति अग्न्यादिकान् पदार्थान । आदि-

अवस्थान्तरबाहुल्याद्रोगादीनां व्यवस्थितम् ।
द्रव्यं नेच्छन्ति भिषज इच्छन्ति स्वस्थरक्षणे ॥
द्वयोरन्यतरादाने वदन्ति विषदुग्धयोः ।
दुग्धस्यैकान्तहिततां विषमेकान्ततोऽहितम् ॥
एवं युक्तरसाद्येषु द्रव्येषु सलिलादिषु ।
एकान्तहिततां विद्धि वत्स सुश्रुत नान्यथा ॥ ४ ॥

अतोऽन्यान्यपि संयोगादहितानि वक्ष्यामः। न च विरूढ़धान्यैर्वसामधुपयोगुड़माषैर्वा ग्राम्यानूपौदकपिशितादीनि नाभ्यवहरेत्। न पयोमधुभ्यां रोहिणीशाकं

शब्दात् प्रकृतिवयोबलस्वत्वादि गृह्यते। रोगवृत्तेः रोगिणः इत्यर्थः। एतेन बुद्धिमानूहापोहवितर्कानुगतधीयुक्तो वैद्यो रोगादीनवेक्ष्य एकान्ताहितमपि रोगिणं प्रयोजयेदिति। तेष्वर्थः,—उद्गरिणस्तिलमाषविषभक्षणम्, कृष्णसर्पदष्टे इक्षुकाण्डभक्षणं चेत्यादिकं बोद्धव्यम्। तस्माद्धिताहितत्वेन व्यवस्थितं द्रव्यं नास्तीत्याह अवस्थान्तरबाहुल्यादिति। अवस्थान्तरं बाहुल्यादवस्थाविशेषाणां प्राचुर्य्यात्। केषां अवस्थाविशेषा इत्याह रोगादीनाम्। आदिशब्दात् सात्म्यदेशादीनां ग्रहण। व्यवस्थितं द्रव्यं नेच्छन्तीति हितमेवेदमहितमेवेदमिति वैद्या नेच्छन्ति, अवस्थाविशेषबाहुल्यात्। किं सर्वत्रैव व्यवस्थितं द्रव्यं नेच्छन्तीत्याह इच्छन्ति स्वस्थरक्षणे इति। स्वस्थरक्षणे पुनर्व्यवस्थितं द्रव्यं वैद्या इच्छन्त्येवेति। अमुमेवार्थं दर्शयन्नाह द्वयोः स्वस्थरोगिणोः। अन्यतरादाने इति सामान्योक्तावपि स्वस्थस्यैव ग्रहणम्। तेन विषदुग्धयोर्मध्ये स्वस्थे दुग्धस्यैकान्तहिततां भिषजा वदन्ति विषं पुनरेकान्ततोऽहितमिति। एवं युक्तरसाद्येष्विति एवमनेन स्वस्थोपयोगप्रकारेण ॥ ४ ॥

अतोऽन्यान्यपीत्यादि। न च विरूढ़धान्यैरिति विरूढ़धान्यादिना सह ग्राम्यादीनां मांसादीनि नाश्नीयादित्यर्थः। न च धान्यादिभिः समस्तैरपि

जातुशाकं वाश्नीयात्। बलाकां वारुणीकुल्माषाभ्याम्। काकमाचीं पिप्पलीमरिचाभ्यां नाड़ीभङ्गशाककुक्कुटदधीनि च नैकध्यम्। मधु चोष्णोदकानुपानं पित्तेन वा मांसानि। सुराकृशरापायसांश्च नैकध्यम्। सौवीरकेण सह तिलशष्कुलीम्। मत्स्यैः सहेक्षुविकारान्। गुड़ेन काकमाचीं मधुना मूलकं गुड़ेन वाराहं मधुना च सह विरुद्धम्। क्षीरेण मूलकम्। आम्रजाम्बवश्वाविच्छूकरगोधांश्च सर्वांश्च मत्स्यान् विशेषेण चिलिचिमं पयसा। कदलीफलं तालफलेन पयसा

ग्राम्यादीनां पिशितादीनि विरुद्धानीति। विरूढ़ं विगताङ्कुरमङ्कुरितञ्च। न पयोमधुभ्यामिति रोहिणीशाकं कटुकाशाकम्। जातुशाकं पौष्करशाकम्। वारुणी-कुल्माषाभ्यामिति बलाका बकभेदः। वारुणी मद्यापरपर्य्यायः, कुल्माषः उत्स्विन्नमाषादिः; आभ्यां सह बलाकां नाश्नीयादिति योज्यम्। काकमाचीमिति पिप्पलीमरिचाभ्यां सह काकमाचीं नाश्नीयादिति योजनीयम्। नाड़ीभङ्गशाकेति नाड़ीभङ्गशाकं नाड़ीपत्रवशाकम्। कुक्कुटस्ताम्रचड़ः। एतानि द्विशस्त्रिशोऽपि वा नाश्नीयात्। मधु चेति न हितमित्यर्थः। पित्तेन चेति पित्तं कालखण्डलग्नम्। सुराकृशरेति।—सुरा मद्यभेदः। कृशरा तिलतण्डुलमाषैः कृताः यवागूः। पायसं क्षीरसिद्धास्तण्डुलाः। अमून्यपि त्रिशो द्विशो वापि विरुद्धानि। सौविरकेन सहेति।—सौवीरकं काञ्जिकविशेषः, विरेचनाधिकारे वक्ष्यते। मत्स्यैः सहेति।—इक्षुविकारान् गुड़ादीन्। गुडेन काकमाचीमित्यादि। अन्ये त्वेवं पठन्ति गुड़ेन काकमाचीं मधुना मूलकं वराहं क्षीरेण मूलकं च। अपरे त्वेवं पठन्ति गुड़ेन काकमाचीं मधुना मूलकं वराहञ्च। चकारात् मधुनेति पदं वाराहेन काकमाच्या च सह सम्बध्नन्ति। आम्रजाम्बवेति नैकध्यं अश्नीयादिति वाक्यशेषः। श्वावित् शेहिका सजारुः। सर्वांश्च मत्स्यानिति ननु सर्वांश्च मत्स्यान् पयसा इत्यनेनैव चिलिचिमत्स्यविरोधः सिद्धः।

दध्ना तक्रेण वा। लकुचफलं पयसा दध्ना माषसूपेन वा मधुना घृतेन च। प्राक्पयसं पयसोऽन्ते वा ॥ ५ ॥

अत: कर्मविरुद्धान् वक्ष्याम:। कपोतान् सर्षपतैल-भृष्टान्नाद्यात्। कपिञ्जलमयूरलावतित्तिरिगोधाश्चैरण्ड-दार्वग्निसिद्धा एरण्डतैलसिद्धा वा नाद्यात्। मधु वान्तरि-क्षोदकानुपानम्। कांस्यभाजने दशरात्रपर्युषितं सर्पिर्मधु चोष्णैरुष्णे वा। मत्स्यपरिपचने शृङ्गवेरपरिपचने वा भाजने सिद्धां काकमाचीम्। तिलकल्कसिद्धमुपोदिकाशा-कम्। नारिकेलेन वराहवसापरिभ्रष्टां बलाकाम् भास-मङ्गार-शूल्यं नाश्नीयादिति ॥ ६ ॥

तत् किमर्थं वल्लीफलादिषु चिलिचिमत्स्यस्य पयसा विरोधपाठ: ? इत्याह विशेषेण चिलिचिममिति। कदलीफलमिति तालादिभि: सह कदलीफलं नाश्नीयादित्यर्थ:। लकुचफलमिति दध्यादिभि: सह लकुचफलं नाश्नीया-दिति। केचिदत्र मधुना घृतेन चेति व्याख्यानयन्ति। अयं पाठो वर्त्तमा-नेषु बहुषु पुस्तकेषु पठ्यते। न तु निबन्धेषु। तस्मान्न पठनीय इति। प्राक् पयसं पयसोऽन्तेर्वेति लकुचफलं नाश्नीयादिति शेष: ॥ ५ ॥

संयोगविरुद्धानभिधाय कर्म्मविरुद्धान् वक्तुमाह अत: कर्म्मविरुद्धानिति। कर्म्मशब्देनात्र संस्कारोऽभिप्रेत:। कपिञ्जलमयूरेति। एरण्डदार्वग्निसिद्धा इति एरण्डदारुहरिद्रादार्वग्निना इत्यन्ये पठन्ति, एरण्डकाष्ठ-वह्निनेति च व्याख्यानयन्ति। नाद्यात् न खादेत्। दशरात्रपर्युषितमिति पर्युषितं दशनिशानिवासितम्। मधु चोष्णैरिति उष्णै: उष्णस्पर्शद्रव्यै:, उष्ण-स्पर्शत्वं चाग्न्यादिजनितं ज्ञेयम्। उष्णे उष्णकाले ग्रीष्मे शरदि चेत्यर्थ:। मत्स्यपरिपचने इति परिपचनं पात्रमुच्यते। नारिकेलेनेति वराहवसापरि-भ्रष्टां बलाकां नारिकेलेन सह नाश्नीयादित्यर्थ:। भासमिति भासो गृध्र-

अतो मानविरुद्धान् वक्ष्यामः। मध्वम्बुनी मधुसर्पिषी मानतस्तुल्ये नाश्नीयात्। मधुस्नेहौ जलस्नेहौ वा तैलसर्पिषी तैलवसे तैलमज्जानौ सर्पिर्वसे सर्पिर्मज्जानौ विशेषादान्तरीक्षोदकानुपानौ॥ ७॥

अत ऊर्द्ध्वं रसद्वन्द्वानि रसतो वीर्य्यतो विपाकतश्च विरुद्धानि वक्ष्यामः। तत्र मधुराम्लौ रसवीर्य्यविरुद्धौ मधुरलवणौ च, मधुरकटुकौ च सर्वतः। मधुरतिक्तौ रसविपाकाभ्यां मधुररसकषायौ च, अम्ललवणौ रसतः। अम्लकटुकौ रसविपाकाभ्यां, अम्लतिक्तावम्लकषायौ च सर्वतः। लवणकटुकौ रसविपाकाभ्यां, लवणतिक्तौ लवणकषायौ च

विशेषः स्वल्पतुण्डो धूसरवर्णः। यत्शूलेन विद्धा अङ्गारेषु पक्वं तदङ्गारशूल्यम्॥ ६॥

मध्वम्बुनी इत्यादि। आन्तरीक्षोदकानुपानौ विशेषतो मधुस्नेहौ नाश्नीयात् तदेवं स्वभावपथ्यं संयोगकालसंस्कारमानैः पञ्चप्रकाराणि विरुद्धानि निर्दिष्टानि॥ ७॥

मधुराम्लावित्यादि। मधुरलवणौ चेति चकारेण रसवीर्य्यविरुद्धाविति समुच्चीयते। सर्वत इति रसवीर्य्यविपाकतः; एवं सर्वत्र रसद्वन्द्वप्रकरणे सर्वतः शब्दो व्याख्यात इति। मधुरकषायौ चेति चकारेण इमावपि रसविपाकाभ्यां विरुद्धाविति समुच्चीयते। कटुकषायौ चेति चकारादेतावपि रसवीर्य्याभ्यां विरुद्धाविति। मधुराम्लावित्यादिपाठेन दधिशर्करादिद्वन्द्वेषु उपयोगार्हेषु न विरोधः। अन्येषु चानुपयोगार्हेषु च विरोध इति सूचितम्। श्रीगयदासादय आचार्य्या अमुं पाठमनार्षं वर्णयन्ति। कस्मात् आदौ मधुरमश्नीयादित्यादिना सर्वरसाभ्यवहारस्य स्वस्थानामुक्तत्वात् नचैकरससेवायामित्यादिना चैकरससेवाया निषिद्धत्वात्। तस्मान्न पठनीय

सर्वतः। कटुतिक्तौ रसवीर्य्याभ्यां कटुकषायौ तिक्तकषायौ च रसतः। तरतमयोगयुक्तांश्च भावानतिरूक्षानतिस्निग्धानत्युष्णानतिशीतानित्येवमादीन् विवर्जयेत् ॥ ७ ॥

भवन्ति चात्र।

विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः।
तान्येकान्ताहितान्येव शेषं विद्याद्धिताहितम् ॥

एवायं ग्रन्थ इति। श्रीब्रह्मदेवस्त्विल्यादौ नार्षं चिन्तां कुर्वन्नमुं ग्रन्थं पठति व्याख्यानयति च। तत्पठितव्याख्यातत्वात् सर्वमतदर्शिभिरस्माभिरपि लिखितः क्वचिद्व्याख्यातश्चेति। अतिशयगुणयोगयुक्तमाहिषचीरादिपदार्था हिता अपि स्वस्थानामेकान्ताहिता भवन्तीति दर्शयन्नाह तरतमेत्यादि। तरतमयोगयुक्तांश्च भावानिति अतिशयस्नेहादिगुणसहितानि द्रव्याणीत्यर्थः। तानेवातिशयगुणयुक्तान् विवृण्वन्नाह अतिस्निग्धानित्यादि। तस्मान्माहिषं दुग्धं गव्यादतिशयस्निग्धं स्वस्थस्य समाग्नेर्वर्ज्यं अस्वस्थस्य च तीक्ष्णाग्नेः सेव्यमित्यादि द्रष्टव्यम्। युक्तांश्चेति चकारः अतिशयगुणयुक्तानामपि पथ्यतमापथ्यतमहृद्यतमान् समुच्चिनोति। एषामेकान्तहितत्वात् एभ्योऽन्येऽतिशयगुणयुक्ताः स्वभावादेवैकान्ताहिता इति। एवमादिनित्यादिशब्दाद्दयोऽन्येऽपि वीर्य्यसंज्ञका गुणाः पिच्छिलविषदतीक्ष्णमृदवो गृह्यन्ते। तथा गुरुलघुवीर्य्यं च। अन्ये तु आदिशब्दादुक्तेभ्योऽन्येऽपि सर्वे गुणा गृह्यन्ते इति वदन्ति ॥ ७ ॥

एवमेवार्थं सुखबोधार्थं संगृह्णाह विरुद्धान्येवमादीनीत्यादि। वीर्य्यत इति वीर्य्यशब्देनात्र स्निग्धादयोऽष्टौ गुणा उच्यन्ते। अथवा विंशतिगुणाः षड्रसा अप्युच्यन्ते. येन कुर्वन्ति तद्वीर्य्यमिति वचनात्। एवमादीनि इत्युक्तिर्यानि कानिचिदिति यत् कृतं तत्तन्त्रान्तरोक्ताशेषविरुद्धोपग्रहार्थम्। अन्ये तु आदिशब्दात्तन्त्रान्तरोक्तानि देशकालमात्रादिविरुद्धानि लभ्यन्त इति मन्यन्ते। अतोऽन्यत् माषादि हिताहितं जानीयात्, कस्यचिद्दोषप्रकोपत्वात् कस्यचिद्दोषहरत्वादिति। किं पुन-

व्याधिमिन्द्रियदौर्बल्यं मरणञ्चाधिगच्छति।
विरुद्धरसवीर्य्यादीन् भुञ्जानोऽनात्मवान्नरः॥ ८॥
यत्किञ्चिद्दोषमुत्क्लेश्य भुक्तं कायान्न निर्हरेत्।
रसादिष्वयथार्थं वा तद्विकाराय कल्पते॥ ९॥

विरुद्धं भुक्तं करोतीत्याह व्याधिमिन्द्रियदौर्बल्यमिति। व्याधिमिति पाण्ड्वाध्यविसर्पदकोदरविस्फोटकोन्मादभगन्दरादिकम्, इन्द्रियदौर्ब्बल्यम् इन्द्रियाधिष्ठानदौर्बल्यं शक्तिदौर्बल्यं वा अधिगच्छति प्राप्नोति। विरुद्धरसवीर्य्याणि भुञ्जान इति रसग्रहणं द्रव्यवीर्य्यपरिहारार्थम्, तेनोष्णस्यापि दुग्धस्य प्रयोगो भवति। क्षीरद्रव्यस्य हि उष्णत्वं तद्गतमधुररसशैत्येन विरोधिनापि न दूष्यति। एवमुष्णपानीयस्यापीति। अनात्मवान् अबुद्धिमान्। अन्ये रसवीर्य्यादिनीति पठन्ति। तेषां मते रसपाकयोरपि गुरुलघुसंश्रयोर्व्विरोधो वर्जनीय इति पूर्व्वप्रतिपादिताध्यायार्थः पिण्डदर्शनपरः श्लोकोऽयम्। तेनास्मिन्नध्याये एव यानि विरुद्धानि द्रव्याण्युक्तानि तेष्वेव रसवीर्य्यविरोधोऽन्वेयः। न पुनरिहानुक्तानि यानि तेष्विति॥ ८॥

न केवलं विरुद्धतो जलमेव व्याधिहेतुः अपि तु हितादिन्यपीति दर्शयन्नाह यत्किञ्चिद्दोषमुत्क्लेश्येति। यत्किञ्चिदित्यनेनाशेषमेवाहितं दोषं वातादिकम्। उत्क्लेश्य प्रकोप्य। निर्हरेदिति मदनफलवद्धतादिवदूर्द्धमधोवा नाकर्षेत् तद्विकाराय कल्पत इति सम्बन्धनीयम्। कल्पते सम्पद्यते। न केवलं दोषकरमेव व्याधये भवति। अपि तु रसादिधातुदुष्टिकरमपि व्याधये भवतीति आह रसादिष्वित्यादि। रसादिष्वयथार्थञ्चेति। रसादिधातुषु यथा प्रयोजनविरुद्धं रसादीनां जीवनादिप्रयोजनविरोधि रसादिधातुदूषणकरमित्यर्थः। दोषदुष्टिकारित्वेन धातुदूषणकरत्वं न लभ्यते। विशिष्टशक्तित्वाद्द्रव्याणां तथा हि कानिचित् दोषदुष्टिकराणि कानिचित् धातुदुष्टिकराणीति। तानि चात्र न कथयिष्यामो विस्तरभयात्। अन्ये तु व्याख्यानयन्ति। रसादिष्विति आदिशब्दाद्वीर्य्यविपाकयोर्ग्रहणम्। तेन रसवीर्य्यविपाकेष यद्भुक्तं तदयथार्थं-

विरुद्धाशजान् रोगान् प्रतिहन्ति विरेचनम् ।
वमनं शमनं वापि पूर्वं वा हितसेवनम् ॥ १० ॥
सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च ।
स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥ ११ ॥

मनर्थकरश्च भवति । तद्विकाराय कल्पते । जेज्झटाचार्य्यस्तु अमुं श्लोकमनार्षं कथयति । गयदासाचार्य्येण चायमङ्गीकृतः । अतोऽस्माभिरपि लिखितो व्याख्यातश्च ॥ ९ ॥

विरुद्धाशनादुत्पन्नानां रोगाणां चिकित्सासूत्रमुद्दिशन्नाह विरुद्धाशनजान् रोगानिति । प्रतिहन्तिविरेचनमिति विरुद्धाशनजव्याधिप्रत्यनीकविरेचनं प्रतिशब्देन द्योत्यते । तेन कुष्ठव्याधिप्रत्यनीकं विरेचनं विरुद्धाशनजं कुष्ठं हन्ति । एवमन्यत्रापि योजनीयम् । वमनं शमनं वापीति तत्र विरेकवमने बहुदोषाणां प्राणवतां च इतरेषान्तु शमनमिति । शमनलक्षणमुच्यते "न शोधयति यद्दोषान् समान्नोदीरयत्यपि । समीकरोति क्रुद्धांश्च तत् संशमनमुच्यते ।" पूर्वं वाहितसेवनमिति सुवर्णलोहादिविरोधे रोगहरं पूर्वमेव सेवेत तदुक्तं न सज्यते । हेमपात्रे विषं पद्मदलेऽम्बुवत् । पूर्व्वं वाहितभोजनम् इत्यन्ये पठन्ति ॥ १० ॥

विरुद्धाशनं कुर्व्वतोऽपि कस्यचित् विरुद्धाशनजा रोगा न भवन्तीत्याह सात्म्यतोऽल्पतया वापि । सात्म्यादिभिर्हेतुभिर्विरुद्धं वितथं निष्फलं भवतीति पिण्डार्थः । स्निग्धव्यायामबलिनामिति स्निग्धव्यायामाभ्यां बलिनामिति सम्बध्यते । तेनायमर्थः—स्निग्धद्रव्याभ्यवहारबलिनां बलवद्व्यायामिनां विरुद्धं निष्फलं भवति । केचिद्बलिनामिति पदं भिन्नं मन्यन्ते । तेनायमर्थः स्निग्धानां व्यायामिनां बलिनां च विरुद्धं वितथं भवेदिति सात्म्यतोऽल्पतयेत्यादि श्लोकस्याग्रे केचिदमुं श्लोकं पठन्ति, "व्यायामशीलो बलवान् स्निग्धश्च । स्निग्धोऽग्निमांश्चापि महाशनश्च । आप्नोति रोगान्न विरुद्धजातानभ्यासतो नाल्पतया च जन्तुः ।" अयं च न पठनीयः सर्व्वनिबन्धकारैरपठितत्वात् । ११ ॥

अतो वातगुणान् वक्ष्यामः।

पूर्व: समधुरः स्निग्धो लवणश्चैव मारुतः।
गुरुर्विदाहजननो रक्तपित्ताभिवर्द्धनः॥
क्षतानां विषजुष्टानां व्रणिनः श्लेष्मला श्च ये।
तेषामेव विशेषेण सदा रोगविवर्द्धनः॥
वातलानां प्रशस्तश्च श्रान्तानां कफशोषिणाम्।
तेषामेव विशेषेण व्रणक्लेदविवर्द्धनः॥
मधुरश्चाविदाही च कषायानुरसो लघुः।
दक्षिणो मारुतः श्रेष्ठश्चक्षुष्यो बलवर्द्धनः।
रक्तपित्तप्रशमनो न च वातप्रकोपणः॥
विशदो रूक्षपरुषः खरः स्नेहबलापहः।
पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः॥

हितस्यापि वातादेर्दिक्संयोगादहितत्वं स्यादिति वातगुणान् निर्दिशन्नाह अत वातगुणान् वक्ष्याम इति। वातस्य दक्षिणोत्तरागतस्य दोषबहुत्वेन हितत्वम्। पूर्वपश्चिमवातस्याहितत्वम्। अतो हिताहितीयाध्याय परिसमाप्तौ। वातस्य गुणोपवर्णनं निर्देष्टुमाह अथ वातगुणानिति इत्यन्ये। खरः प्रचण्डवेगः, अन्ये तु आहारद्रव्यप्रकरणादिभिरसंयोगाऽप्रस्तुत इत्यमुं वातगुणोपवर्णनग्रन्थं न पठन्त्येव। गयदासाचार्य्यस्तु इमं हिताहितीयस्यापाठे पूर्व्वोक्तं पाठं कियन्तं निक्षिप्य पूर्व्वोक्तपाठक्रमव्यतिक्रमेण पठति। यावतिपाठेन व्यतिक्रम स्तावन्तं दर्शयन्नाह। वल्लीफलकवककरीराम्लफललवणकुलत्थपिन्याकदधितिलविरोहि शुष्कशाकाजविकामांस मयजाम्ववचिल्लिचिमिमत्स्यगोधा वराहांश्च नैकध्यमश्नीयात्। पयसा प्राक्पयसोऽन्तरा कपोतांश्च सर्षपतैलभृष्टान्नाद्यात्। कपिञ्जलमयूरलावतित्तिरिगोधाश्चैरण्डदार्व्वग्निसिद्धा एरण्डतैलसंसिद्धा वा मधुष्टतेन

सद्यः प्राणक्षयकरः शोषणस्तु शरीरिणाम् ।
उत्तरो मारुतः स्निग्धो मृदुर्मधुर एव च ॥
कषायानुरसः शीतो दोषाणामप्रकोपणः ।
तस्माच्च प्रकृतिस्थानां क्लेदनो बलवर्द्धनः ।
क्षीणक्षयविषार्त्तानां विशेषेण तु पूजितः ॥ १२ ॥

———

समघृते मधुराम्लरोचोदकानुपानं कांस्यभाजने दशरात्रपर्य्युषितं सर्पिर्म्मधु चोष्णमुष्णेन वा दधिमथवा पित्तेन सह मांसानि पक्वानि आमानि च केवलान्यपि सुरा-कृशरा-पायसांश्च नैकध्यमश्नीयात्। सौवीरकेन सह तिलशष्कुलीः। तक्रेण सह मधुघृते। मत्स्यगोधानां मांसानि मधुना। गोधां मत्स्यान् क्षौद्रासवेन। पृषते मांसं वातेनैव तथा मैरेयमाध्वीकाभ्यां बालायोदकया मत्स्यान् इक्षुविकृतिः सर्वा मत्स्यैः सह सर्पिर्गुड़काकमाचीमधुमूलकानि नैकध्यम्। मधुना वाराहं वृन्ताकीटकः मद्येन बलाकां तिलकल्केन वोपोदिकां सिद्धाम्। न पिप्पलीं मत्स्यं पयसा प्रियंग्वनुलिप्तेन पायसमश्नीयात्। अस्याग्रे च तरतमयोगयुक्तांश्च भावानित्यादि सूत्राणि पठति। तानि पूर्व्वसूत्रैरेव समानानीति नेह प्रदर्शितानि ॥ १२ ॥

सूत्रस्थाने निबन्धसंग्रहे विंशतितमोऽध्यायः
समाप्तः।

———

एकविंशतितमोऽध्यायः ।

अथातो व्रणप्रश्नमध्यायं व्याख्यास्यामः ।

वातपित्तश्लेष्माण एव देहसम्भवहेतवः । तैरेवाव्यापन्नैरधोमध्योर्द्ध्वसन्निविष्टैः शरीरमिदं धार्य्यतेऽगारमिव स्थूणाभिस्तिसृभिरतश्च त्रिस्थूणमाहुरेके । तएव च व्यापन्ना प्रलयहेतवस्तदेभिरेव शोणितचतुर्थैः सम्भवस्थितिप्रलयेष्वविरहितं शरीरं भवति ॥ १ ॥

अथातो व्रणप्रश्नमित्यादि । व्रणविषयः प्रश्नो यस्मिन् स व्रणप्रश्नः । व्रणशब्देनात्र वातादय उच्यन्ते व्रणकारणत्वात् । तेन वातादिविषयः प्रश्नो यस्मिन्नित्युक्तं । अन्ये व्रणमाश्रित्य प्रश्नः व्रणप्रश्नः, स विद्यते यस्मिन्नर्थे उत्पन्नस्य ईयंप्रत्ययस्य लोपं कृत्वा व्रणप्रश्नमिति रूपं पठन्ति । तेनात्र व्रणारम्भकाणां वातादीनां संख्यास्वलक्षणकर्म्मादीनि व्रणस्यैव निरुक्तादिवक्तव्यमित्यर्थः सिद्धः । व्रणकारणानि वातादीन् प्रथमं संख्यादिभिर्निर्दिशन्नाह वातपित्तश्लेष्माण एवेति । देहसम्भवहेतवो देहोत्पत्तिहेतवः । ननु शुक्रशोणिते देहोत्पत्तिहेतुः ? तत्कथं वातादयो देहसम्भवहेतवः कथ्यन्ते ?उच्यते अविकृतवातादयः शुक्रार्त्तवादि-सहकारितया देहजनका अभिप्रेता इत्यर्थः । शरीरसम्भवे वातादीनां हेतुत्वं प्रतिपाद्य स्थितिकारणत्वं दर्शयन्नाह तैरेवाव्यापन्नैरिति । तैरेव वातपित्तश्लेष्मभिः अव्यापन्नैः प्रकृतिस्थैरित्यर्थः । अधोमध्योर्द्ध्वसन्निविष्टैरिति यथाक्रमेण वातपित्तकफैः । दृष्टान्तमाह अगारमिवेत्यादि । अगारं गृहम् । एकीयमतमाह, अतश्च त्रिस्थूनमाहुरेके । चकारोऽयं त्रिस्थूनमित्यत्र योज्यः, तेनायमर्थः त्रिस्थूनमिति च । अतो हेतोरेके । आचार्य्याः देहविनाशहेतुत्वमपि वातादीनां निर्द्दिशन्नाह तएव व्यापन्ना इति । चकारोऽत्र भिन्नक्रमे तेनायमर्थः तएव वातादयः

भवति चात्र ।

नर्त्ते देहः कफादस्ति न पित्तान्न च मारुतात् ।
शोणितादपि वा नित्यं देह एतैस्तु धार्य्यते ॥ २ ॥

तत्र वा गतिगन्धनयोरिति धातुः तप सन्तापे श्लिष

व्यापन्नाः विकृतिस्थाः प्रलयहेतवो भवन्तीत्यध्याहारः । अन्ये तु प्रलयं प्रत्यपिशब्दं पठन्ति । अन्यशास्त्रे व्रणाधिष्टानभूतत्वात् कस्यचिद्‌ग्रन्थस्य प्राधान्यं दर्शयन्नाह तदेभिरेव शोणित चतुर्थैरिति । एभिरेव वातपित्तकफैः शोणितचतुर्थैरिति । ननु पूर्वं शोणितमनुपपन्नं, तत्कथमिह सम्भवादिषु शोणितस्य विरचितत्वमुक्तं ? सत्यं, परमिह शोणितोपादानं कुर्वन्नेकीय-मतमिदमिति दर्शयति । तेन व्रणपाके दर्शनद्वयं भवति । तथाहि नर्त्ते-ऽनिलादस्तिरुजेत्यादिना व्रणपाके दोषाएव व्याप्रियन्त इति दर्शितम् । कालान्तरेणाभ्युदितन्तु पित्तमित्यादीना पुनःशोणित चतुर्थाएव व्रणपाके व्याप्रियन्त इति । अविरहितं संयुक्तमित्यर्थः ॥ १ ॥

एतदेव द्वितीयदर्शनं श्लोकेनापि दर्शयन्नाह नर्त्ते देहः कफादस्तीति । ननु वातादिक्रमं परित्यज्य कफादिक्रमेण सूत्रणं कस्मादिह कृतं ? उच्यते, देहस्योर्द्ध्वमूलत्वमधःशाखत्वं प्रतिपादितं । ऊर्द्ध्वभागे च कफाधिष्ठानमस्ति, तेनेह कफ एव प्रथमं दर्शितः । तदुक्तं "ऊर्द्ध्वमूलमधःशाखं त्रिस्थूनं पञ्च-दैवतं । क्षेत्रज्ञाधिष्ठितं विद्वान् यो वै वेद स वेदवित्" । न केवलं कफादीन् विना देहो भवति अपि तु धारणमपि एतैरेव क्रियत इत्याह देह एतैस्तु धार्य्यत इति । तुशब्दश्चार्थः भिन्नक्रमश्च । तेनायमर्थः धार्य्यते च एतैरेवा-व्यापन्नैः कफपित्तवातरक्तैरित्यर्थः । नर्त्ते देहः कफादित्येतस्यादौ अतो गद्योक्तस्यार्थस्य संग्रहश्लोक इति । आपतनिकां केचिदाचार्य्याः पठन्ति ॥२॥

वातादीनां चिकित्सोपयोगिनां स्वलक्षणं दर्शयितुं निरुक्तिं कुर्व-न्नाह तत्र गतिगन्धेति । गतिगन्धोपादानार्थस्य वाधातोरस्मदादिभ्य इत्यादि सूत्रोत्पन्ने तमत्यये वात इतिरूपं । एतेन च तत्स्वरूपत्वं वातस्य

आलिङ्गने। एतेषां कृद्विहितैः प्रत्ययैर्वातः पित्तं श्लेष्मेति च रूपाणि भवन्ति ॥ ३ ॥

दोषस्थानान्यत ऊर्द्ध्वं वक्ष्यामः। तत्र समासेन वातः श्रोणिगुदसंश्रयः। श्रोणिगुदयोरुपर्य्यधो नाभेः पक्काशयः पक्कामाशयमध्यं पित्तस्य। आमाशयः श्लेष्मणः ॥ ४ ॥

अतःपरं पञ्चधा विभज्यन्ते तत्र वातस्य वातव्याधौ

दर्शितं। सन्तापार्थस्य तपधाते रिचिप्रत्यये तकारस्येत्वे वर्णविपर्य्यये तस्य चत्वे कृते पित्तमितिरूपं। एतेन पित्तस्य स्वाभाविकं सन्तापलक्षणं दर्शितं। आलिङ्गनार्थस्य श्लिषधातोर्मनिप्रत्यये गुणे च कृते श्लेष्मेति रूपं। एतेन श्लेष्मणः सन्ध्यादियोजनं दर्शितम् ॥ ३ ॥

तत्र कस्य दोषस्य किं स्थानं तदाह दोषस्थानान्यत ऊर्द्ध्वमिति दोषस्थानान्येतत्स्थानि तेषां स्थानानीति केचित् पठन्ति तत्रापि सएवार्थः। तत्रदोषेषु मध्ये समासेन संक्षेपेण। विस्तरेण तु स्थानानि वातस्य नाभिमस्तहृदयकण्ठसर्वाङ्गसन्धयोऽपि वातव्याधौ वक्ष्यन्ते। श्रोणीः कटिः, श्रोणी च गुदञ्च श्रोणीगुदं, तत्संश्रयः स्थानं यस्य स तथा। पक्कामाशययोर्म्मध्यं पित्तस्थानं वक्ष्यति। अतः पक्काशयमेव प्राग्दर्शयन्नाह तदुपर्य्यधोनाभिः पक्काशय इति। तदुपरि श्रोणीगुदयोरुपरि इत्यर्थः। पित्तस्थानं दर्शयन्नाह पक्कामाशययोर्मध्यं पित्तस्येति। समासेनेत्यत्रापि सम्बध्यते। तेनायमर्थः पक्कामाशयमध्यं पित्तस्थानं संक्षेपेण। विस्तरेण तु यकृत्प्लीहाहृदयदृष्टित्वगिन्द्रियाण्यपि पित्तस्य स्थानमिति। कफस्थानं निर्द्देष्टुमाह। आमाशयः श्लेष्मण इति। स्थानमिति शेषः। यत्राशितपीतादिकं पाच्यते स आमाशयः तथा च मुनिः। "नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः।" अत्रापि समासेनेति सम्बध्यते। तेन विस्तरेण उरःशिरःकण्ठसन्धयोऽपि श्लेष्मस्थानम् ॥ ४ ॥

वातादीनां प्रधानानि स्थानानि निर्द्दिश्य प्रधानानि निर्द्देष्टुमाह अतःपरं पञ्चधेति विभज्यन्ते प्रकटीक्रियन्ते वातादीनां स्थानादीत्यर्थः।

वक्ष्यामः । पित्तस्य यकृत्प्लीहानौ हृदयं दृष्टिस्त्वक् पूर्वोक्तञ्च ॥ श्लेष्मणस्तूरःशिरःकण्ठन्धय इति पूर्वोक्तञ्च । एतानि खलु दोषाणां स्थानान्यव्यापन्नानाम् ॥ ५ ॥

भवति चात्र ।

विसर्गादानविक्षेपैः सोमसूर्य्यानिला यथा ।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा ॥ ६ ॥

अत्र जिज्ञास्यं किं पित्तव्यतिरेकादन्योऽग्निराहोस्वित् पित्तमेवाग्निरिति । अत्रोच्यते न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते आग्नेयत्वात् पित्ते दहनपचनादिष्वभि-

कानि पुनर्वातस्य स्थानानीति पृष्ट आह तत्र वातस्येति । निदानस्थाने इति शेषः । पित्तस्य पञ्चस्थानान्याह पित्तस्य यकृत्प्लीहानाविति । यकृत्-कालखण्डं । प्लीहा वामपार्श्वाश्रयं मांसखण्डं । हृदयं कमलमुकुलाकार-मधोमुखं । दृष्टिः कृष्णतारकान्तर्वर्त्तिनी मसूरदलमात्रा । चकारात्पर-तन्त्रोक्तं लसीकाद्यनुक्तं समुच्चीयते । पित्तेन क्लिन्नमांसात् स्रवदुदकं लसी-केत्युच्यते । कफस्य पञ्चस्थानानि निर्दिशन्नाह श्लेष्मणः उरः शिरः कण्ठ इति । उरः स्तनयोरन्तरालं, पूर्वोक्तञ्चेति आमाशयः । चकारात् परतन्त्रोक्तं मेदः समुच्चीयते । एतानि स्थानानि प्रायेण प्रकृतिस्थानामेव दोषाणां भवन्तीत्याह एतानि खल्विति । अव्यापन्नानामकुपितानाम् ॥ ५ ॥

विसर्गादानेति । विसर्गादानविक्षेपैः कर्मभिर्यथासंख्येन चन्द्रादित्यवाता यथा जगद्धारयन्ति तथा कफादयस्त्रयो यथासंख्येन विसर्गादान-विक्षेपैः कर्मभिर्देहं धारयन्तीति समुदायार्थः । विसर्गः सर्जनं बलस्येति शेषः । आदानं ग्रहणं बलस्य । विक्षेपः शीतोष्णादीनां विविधप्रकारेण प्रेरणम् ॥ ६ ॥

इदानीमग्निपित्तयोर्भेदविचारप्रतिपादकं ग्रन्थं निर्देष्टुमाह तत्र जिज्ञास्यं किमित्यादि । तत्रेति पित्ताग्न्योर्भेदाभेदविचारे । तत्रेति तेषु

वर्त्तमानेऽग्निवदुपचारः क्रियतेऽन्तरग्निरिति। क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगादतिवृद्धे शीतक्रियोपयोगादागमाच्च पश्यामो न खलु पित्तव्यतिरेकादन्योऽग्निरिति। तच्चादृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्विधमन्नपानं पचति विरेचयति च रसदोषमूत्रपुरीषाणि, तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्म्मणानुग्रहं करोति; तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा। यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा, स रसस्य रागकृदुक्तः। यत्पित्तं हृदयसंस्थितं तस्मिन् साधकोऽग्निरिति संज्ञा, सोऽभिप्रार्थितमनोरथसाधनकृदुक्तः। यद्दृष्ट्यां पित्तं तस्मि

मध्ये इत्यन्ये। तत्रेति आदानकर्म्मणि। विसर्गादानविक्षेपैरित्यादिश्लोकेनादानं कर्म्म यदुक्तं तत् किं पित्तस्याग्नेरिति जिज्ञास्यमिति अपरे जिज्ञास्यं ज्ञातुमेषणीयम्। अहोस्विदथवार्थः। इति संशये। उत्तरमाह अत्रोच्यते न खल्विति। दहनं दाहः। पचनं पाकः आहारादेः, आदिशब्दात् रञ्जनदर्शनादीनि गृह्यन्ते। अग्निवदुपचारोऽग्निवद्व्यवहारः क्रियतेऽन्तरग्निरिति पित्तमन्तरग्निः उपचर्य्यते। न खल्वित्यादिसूत्रेण प्रत्यक्षेणैव पित्तमग्निरित्युक्तम्। अनुमानेनापि पित्तस्याग्नित्वं साधयन्नाह क्षीणे ह्यग्निगुणे इति। अग्नेर्गुणो यस्य तदग्निगुणं पित्तम्। तस्मिन् क्षीणे। हि यस्मादर्थे, तत्समानद्रव्योपयोगादग्निसमोष्णतीक्ष्णद्रव्योपयोगादित्यर्थः। अग्निगुणशब्देनोष्मा कथ्यत इत्यन्ये। तत्र तत् समानद्रव्योपयोगादित्यर्थः। अतिवृद्धे शीतक्रियोपयोगादिति पित्तमेवाग्निरिति शेषः। प्रत्यक्षानुमानाभ्यां पित्तस्याग्नित्वं प्रसाध्य आगमेनापि प्रसाधयन्नाह आगमाच्चेति। आगमात् समस्तायुर्व्वेद-शास्त्रतः। ननु यदि पित्ताग्न्योर-

आलोचकोऽग्निरिति संज्ञा, स रूपग्रहणेऽधिकृतः। यत्तु त्वचि पित्तं तस्मिन् भ्राजकोऽग्निरिति संज्ञा, सोऽभ्यङ्ग परिषेकावगाहावलेपनादीनां क्रियाद्रव्याणां पक्ता छाया नाञ्च प्रकाशकः॥ ७॥

भेदस्तत्कथं घृतं पित्तप्रशमनम् अग्निदीपनम्, मज्जा पयश्च मत्स्यादयश्च पित्तवृद्धिं कुर्वन्ति न वा दीप्तिकराः, दिवास्वप्नश्च पित्तप्रकोपनोऽप्यग्निशमनः; तथेदमपि कथं स्यात् विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणेति। समदोषः समाग्निश्चेत्यादिकमपि कथं स्यादिति। नैष दोषो येनायमग्निः परमार्थतः पित्तादभिन्न एव सुश्रुतादिभिरङ्गीकृतः। तदुक्तं "क्रोधशोक-श्रमकृतः शरीरोष्मा शिरो गतः। पित्तञ्च केशान् पचति पलितं तेन जायते" इति। शरीरोष्मा अग्निः, स चात्र पित्तादभिन्न एवोक्तः, तथान्यदपि पित्ताग्न्योर्भेदप्रतिपादकतन्त्रमुच्यते,—"द्रव्यं स्निग्धमधोगञ्च पित्तवह्निरतोऽन्यथा" इति। अन्यान्यपि पित्ताग्निभेदप्रतिपादकानि वाक्यानि सन्ति, तानीह विस्तरभयान्न दर्शयिष्यामः। यत्पुनरिहाग्निपित्तयोरभेदकथनं कृतं, तद्रसवीर्य्यादिगुणोपाधियुक्तस्य चिकित्साद्वारेणाग्नेश्चिकित्साकार्य्येति तद्दर्शनार्थम्। अन्यथा रसादिगुणोपाधिरहितस्य वह्नेश्चिकित्सां कर्त्तुं न पार्य्यते इति। अदृष्टहेतुकेन विशेषेणेति विशेषणभेदेन किं विशिष्टेन अदृष्टहेतुकेन प्राक्तनकर्महेतुकेनेत्यर्थः। पक्वामाशयमध्यस्थमिति नाभिस्थं; चतुर्विधमन्नपानं पचतीति अशीतं खादितं तावत्पचति; चतुर्विधमपीति चर्व्य-चोष्य लीढ़पीतमित्यर्थः। विरेचयति च पृथक्करोति दोषरसमूत्रपुरीषाणि; अत्र केचिद्दन्नरसपानमूत्रपुरीषाणीति पठन्ति। वातमूत्रपुरीषाणीत्यरे। अनुग्रहं करोति उपकारं करोति। यत् पित्तं हृदयेति; साधको धर्म्मार्थ-काममोक्षलक्षणपुरुषार्थस्य साधक इत्यर्थः। कस्मात् हृदयस्थकफतमोपनोद-विस्पष्टीकृतमनःप्रागुण्यात्। यत्तु दृष्ट्यां पित्तमित्यादि,—क्रियाद्रव्याणां क्रियानिमित्तानां कर्मनिमित्तानामित्यर्थः। छायानाञ्च प्रकाशक इति छायानां पाञ्चभौतिकानां लीलादीनां प्रकाशक उत्पादकः। चकारात्

भवति चात्र।

पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च।
उष्णं कटुरसञ्चैव विदग्धं चाम्लमेव च ॥ ८ ॥

श्लेष्मस्थानान्यत ऊर्द्ध्वं वक्ष्यामः। तत्रामाशयः पित्ताशयस्योपरिष्टात्तत्प्रत्यनीकत्वादूर्द्ध्वगतित्वात्तेजसश्चन्द्र इवादित्यस्य, स चतुर्विधस्याहारस्याधारः। स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घात सुखजरश्च भवति ॥ ९ ॥

प्रभानां पाञ्चभौतिकानाञ्च प्रकाशकः। ननु छायाप्रभयोः को भेदः? उच्यते, "आसन्ना लक्ष्यते छाया प्रभा दूरात् प्रकाशते। वर्णमाक्रमति छाया प्रभा वर्णप्रकाशिनी" इति ॥ ७ ॥

इदानीं पित्तस्य चिकित्सोपयोगिस्वलक्षणं दर्शयन्नाह पित्तं तीक्ष्णमिति। तीक्ष्णं राजिकामरिचादिवत्। पूति विस्रगन्धि। नीलं सामावस्थायाम्। पीतं निरामावस्थायाम्। कटुरसं प्रकृतिस्थं पित्तम्। विदग्धं चाम्लमेवेति विरुद्धपाकोपपन्नं पुनरम्लरसं भवति। विदग्धं जीर्णं संसृष्टमम्लरसं भवतीत्यन्ये। विदग्धं पित्तमम्लपित्तमिति रोगविशेषं केचिन्मन्यन्ते। द्रवस्थाने केचित् रसमिति पठन्ति ॥ ८ ॥

श्लेष्मस्थानान्यत ऊर्द्ध्वमिति। अनुक्रमेण व्याख्यास्यामः येन च क्रमेण पित्तस्थानान्युक्तानि तेनैव क्रमेणेत्यर्थः। प्राक् आमाशयः श्लेष्मस्थानमुक्तः। तमेव प्रथमं दर्शयन्नाह तत्रामाशयः पित्ताशयस्योपरीति। अत्रेति श्लेष्मस्थानेषु पञ्चसु मध्येषु, उपरिष्टादुपरि। कस्मात् कारणात् पित्ताशयोपरीत्याह तत्प्रत्यनीकत्वादित्यादि। तस्य पित्तस्य प्रत्यनीकत्वात् प्रतिपक्षत्वादिगुणत्वादित्यर्थः। द्वितीयं हेतुमाह ऊर्द्ध्वगतित्वात्तेजस इति। एतेनैतदुक्तं भवति यदि हि पार्श्वयोरधो वा आमाशयो भवेत् तदा उदकस्याधोगतित्वान्निर्ध्वस्त्यनीकत्वम्। ततश्च निष्प्रत्यनीकोऽग्निः शरीरमेव दहेत्, इति प्रत्यक्षेण पित्ताशयस्योपरि आमाशयं प्रसाध्य अनुमानेनापि साधयन्नाह चतुर्विधस्याहारस्येति। चतुर्विधस्याहारस्याधारः चतुर्विधस्याशितपीतलीढ़-

माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च।
आमाशये सम्भवति श्लेष्मा मधुरशीतलः॥ १०॥

स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्मणानुग्रहं करोति। उरःस्थस्त्रिकसन्धारणमात्मवीर्य्येणान्नरससहितेन हृदयावलम्बनं करोति। जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते। शिरस्थः स्नेहसन्तर्पणाधिकृतत्वादिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति। सन्धिस्थस्तु श्लेष्मा सर्वसन्धिसंश्लेषात् सर्वसन्ध्यनुग्रहं करोति॥ ११॥

खादितस्याधारः स्थानम्। तेजस्त्वादूर्द्ध्वगामि। यदि वाधः आमाशयो भवेत्, तदा चतुर्व्विधमाहारं न पचेत्। पचति च तेनानुमीयते आमाशयः पित्ताशयस्योपर्य्येवेति। स चेति चतुर्विधाहारः। औदकैर्गुणैरिति द्रवस्नेहादिभिः द्रवगुणैर्भिन्नसंघातः स्नेहेन मक्लिन्न इति बोद्धव्यः। सुखजरो भवति सुखेन परिणामं गच्छतीत्यर्थः॥ ८॥

अथ के औदका गुणा इत्याह माधुर्य्यादित्यादि। माधुर्य्यादय आहारस्येति शेषः। चकारद्वयेन द्रवस्नेहादयो गुणा अनुक्ता अपि समुच्चीयन्ते। सम्भवतीति प्रकुप्यति न पुनरभूतप्रादुर्भावेण। कफस्य रसधातुत एव उत्पन्नत्वात्॥ १०॥

स तत्रस्थ एवेत्यादि। स श्लेष्मा तत्रस्थ आमाशयस्थः स्वशक्त्या आत्मवीर्य्येण। उदककर्म्मणेति क्लेदनपूरणादिना। द्वितीयस्थानस्य कर्मदर्शयन्नाह उरस्थ त्रिकसन्धारणमिति। त्रिकं शिरोबाहुहृदयसन्धानस्थानम्। आत्मवीर्य्येणेति प्राकृतगुणेन। हृदयावलम्बनं हृदयस्य स्वकार्य्यसामर्थ्यं करोति। शिरस्थः स्नेहसन्तर्पणेति। स्नेहसन्तर्पणाधिकृतत्वात् स्नेहेन सन्तर्पणेन चाधिकृतत्वात्; अथवा स्नेहेन सन्तर्पणं तत्रा-

भवति चात्र।

श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च।
मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः॥ १२॥

शोणितस्य स्थानं यकृत्प्लीहानौ, तच्च प्रागभिहितं, तत्रस्थमेव शोणितस्थानानामनुग्रहं करोति॥ १३॥

भवति चात्र।

अनुष्णशीतं मधुरं स्निग्धं रक्तञ्च वर्णतः।
शोणितं गुरु विस्रं स्याद्विदाहश्चास्य पित्तवत्॥ १४॥

एतानि खलु दोषस्थानान्येषु सञ्चीयन्ते दोषाः, प्राक्-

धिकृतत्वात्। अन्ये तु व्याख्यानयन्ति स्नेहो मस्तकमज्जा, तस्य सन्तर्पणं तत्राधिकृतत्वात्। इन्द्रियाणां श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामनुग्रहं करोति स्वकार्य्यसामर्थ्यं जनयति। सन्धिस्थस्तु श्लेष्मेति;—स्पष्टम्॥ ११॥

इदानीं कफलिङ्गज्ञानार्थं चिकित्सार्थञ्च लक्षणं दर्शयन्नाह श्लेष्मा श्वेत इत्यादि। शीत एव चेति चकारो मृदुस्थिरादिगुणसमुच्चयार्थः। अविदग्धोऽपक्वो मधुररसो भवति। विदग्धः पक्वो लवण इति। अन्ये त्वन्यथा व्याख्यानयन्ति—अविदग्धः प्रकृतिस्थः अप्रदुष्टः मधुररसः श्लेष्मा भवति। विकृतिस्थः प्रदुष्टो लवणरसः। अथवा विदग्धान्नपाकाल्लवण इति॥ १२॥

तदेव दोषान् प्रथमदर्शनोक्तान् विधाय शोणितचतुर्थैरित्यस्य दर्शनस्याभिप्रेतं शोणितस्थानं दर्शयन्नाह शोणितस्य स्थानं यकृदिति। तच्च प्रागभिहितं शोणितवर्णनीये उक्तम्॥ १३॥

शोणितस्य निदानलिङ्गचिकित्साज्ञानार्थं स्वलक्षणं दर्शयन्नाह अनुष्णशीतमिति। अनुष्णशीतसाधारणमित्यर्थः। विस्रं आमगन्धि, विदाहश्चास्य पित्तवदिति पित्तस्यैव येन वस्तुना यथा च विदाहस्तेन वस्तुना तथा च विदाहः शोणितस्यापीत्युक्तम्॥ १४॥

प्रतिपादितं नियमयन्नाह एतानि खलु इत्येषेति। एषु स्थानेषु दोषाः

सञ्चयहेतुरुक्तः। तत्र सञ्चितानां दोषाणां स्तब्धपूर्णकोष्ठता पितावभासता मन्दोष्मता चाङ्गानां गौरवमालस्यं चयकारणविद्वेषश्चेति लिङ्गानि भवन्ति। तत्र प्रथमः क्रियाकालः॥ १५ ॥

अत ऊर्द्ध्वं प्रकोपणानि वक्ष्यामः। तत्र बलवद्विग्रहातिव्यायामव्यवायाध्ययनप्रपतन-प्रधावनप्रपीड़नाभिघात लङ्घनप्लवनतरणरात्रिजागरणभारवहनगजतुरङ्गरथपदातिचर्य्याकटुकषायतिक्तरूक्षलघुशीतवीर्य्यशुष्कशाकवल्लूरवरकोद्दा-

सञ्चयं यान्तीत्यर्थः। किं पुनर्दोषाणां सञ्चये हेतुरित्याह प्राक् सञ्चयहेतुरिति। प्रागिति ऋतुचर्य्याध्याये। सञ्चितानां वातादीनां यथासंख्यं लिङ्गदर्शयन्नाह तत्र सञ्चितानां दोषाणामिति। सामान्येन सर्वेषां सञ्चितानां सञ्चीयन्ते देहेऽतिरूपा वृद्धिश्चयः विलयनरूपा वृद्धिश्चयः विलयनरूपावृद्धिः प्रकोपः। स्तब्धपूर्णकोष्टतेति कोष्टताशब्दः स्तब्धपूर्णाभ्यां प्रत्येकं सम्बध्यते। तेन स्तब्धकोष्ठता पूर्णकोष्ठता। वायोर्लिङ्गं पीतावभासता मन्दोष्मता च। पित्तस्य गौरवमालस्यञ्च। श्लेष्मणः एतानि स्तब्धपूर्णकोष्ठतादिलिङ्गानि सामान्येन सर्वेषामेव सञ्चितानामित्यपि केचिन्मन्यन्ते। चयकारणद्वेषश्चेति सामान्ये सर्वेषां वातादीनामिदं लिङ्गम्। चयकारणद्वेषश्चेति केचित् पठन्ति। केचिदाचार्य्या अस्याग्रे चयप्रकोपयोर्लक्षणं श्लोकेन पठन्ति स्वस्थानवृद्धिर्दोषाणामित्यादि अयं श्लोकोऽभावात् समग्रो न लिखित इति। तत्र प्रथमः क्रियाकाल इति। तत्र वातादीनां सञ्चये, प्रथमः क्रियाकाल आद्य कर्म्मावसरः॥ १५ ॥

कानि पुनस्तानीत्याह तत्र बलवद्विग्रहेत्यादि। बलवद्भिर्विग्रहो बलवद्विग्रहः, मल्लादिभिः सह बाहुयुद्धादिः। अतिशब्दो व्यायामादिभिः सम्बध्यते। व्यवायः स्त्रीसेवा। अभिघातो लगुड़ादिभिः प्रहारः। लङ्घनं रयेण गर्त्ताद्युत्क्रमणम्। प्लवनमुत्प्लुत्योत्प्लुत्य गमनम्। प्रतरणं नद्यादीनां

सक्तकोरदूषश्यामाकनीवारमुद्गमसूराढ़की-हरेणुकलायनिष्-पावानशनविषमाशनाध्यशनवातमूत्रपुरीषशुक्र-च्छर्दिक्षवथू-द्गारवाष्पवेगविघातादिभिर्विशेषैर्वायु: प्रकोपमापद्यते ॥१६॥

स शीताभ्रप्रवातेषु घर्मान्ते च विशेषतः ।
प्रत्यूषस्यपराह्णे तु जीर्णेऽन्ने च प्रकुप्यति ॥ १७ ॥

क्रोधशोकभयायासोपवासविदग्धमैथुनोपगमनकट्वम्ल-लवणतीक्ष्णोष्णलघुविदाहितिलतैलपिण्याककुलत्थसर्षपातसी-हरितकशाकगोधामत्स्याजाविकमांस दधितक्रकूर्चिकामस्तु-सौवीरकसुराविकाराम्लफलकट्वराकप्रभृतिभिः पित्तं प्रको-पमापद्यते ॥ १८ ॥

बाहुभ्यां तरणम् । प्रतिचर्य्या अत्यटनम्, सा च गजादिभिः पदातैः प्रत्येकं सम्बध्यते । वल्लूरं शुष्कमांसम् । वरको वरदिका कुधान्यविशेषः । उद्दालकः आरण्यकोद्रवः । नीवारः प्रसातिका धान्यमध्ये रक्तशुको भवति ; उलजिधान्यमिति लोके । आढ़की तुवरी । हरेणुर्वर्त्तलकी । कलायस्त्रि-पूटकः । निष्पावको राजसिम्बिः । अनशनमल्पभोजनमुपवासश्च । विष-माशनं बहुल्याकालभोजनम् । अध्यशनं साजीर्णभोजनम् । वेगावरोध । स च वातमूत्रादिभिः प्रत्येकं सम्बध्यते । क्षवथुः हिक्का । वाष्पशब्देन रोदनजलं कथ्यते । आदिशब्दात् क्षुदादिवेगविघातादयो गृह्यन्ते ॥ १६ ॥

वातप्रकोपहेतुं कालं पृथगुपदिशन्नाह स शीते इत्यादि । स वायुः शीते शीतकाले, अभ्रे मेघोपलक्षितकाले, प्रवाते प्रकृष्टवाते काले, घर्म्मान्ते वर्षाकाले, विशेषतोऽतिशयेन । आर्त्तवं कालमुक्त्वा आह्निकमाह प्रत्यूषस्य-पराह्णे चेति । भुक्तापेक्षया कालमाह जीर्णेऽन्ने च प्रकुप्यतीति ॥ १७ ॥

पित्तप्रकोपनानि दर्शयन्नाह क्रोधशोकभयेत्यादि । आयासः शरीरपीड़ा । विदग्धं विदाहः स च शीघ्ररोमाहारादिकृतः । विदाहीति यदम्लोद्गार-दाहतृष्णाप्रभृतीनुदीर्य्य कृच्छ्रात् पाकमुपगच्छति तद्विदाहि । हरित-

तदुष्णैरुष्णकाले च मेघान्ते च विशेषतः।
मध्याह्ने चार्द्धरात्रे च जीर्य्यत्यन्ने च कुप्यति ॥१६॥

दिवास्वप्नाव्यायामालस्यमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवकनैषधेत्कटमाषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाविसमृणालकशेरुक-शृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते ॥ २० ॥

शाकमिति कुठेरशिग्रुसुरससुमुखासुरिभूस्तृणाः। क्षुत्रकक्षुत्रिका चेति वर्गं हरितकं विदुः। दधि सस्नेहं गव्यम्। दधिकूर्चिका विमथितं तक्रम्। मस्तु दधिमस्तु। सौवीरकं निस्तुषयवनिवृत्तादिकृतं साधनं धान्याम्लं वा। सुराविकारा पैष्टिकादयः। अम्लफलानि आम्रातकादीनि। कट्वरमिति सस्नेहं दधि। अन्ये भाषन्ते सौवीराम्लमथात्यम्लं काञ्जिकं कटरं विदुः। अन्ये तु तदग्रभागं तक्रचतुःत्यक्तताङ्गतम्। समेहं दधिजं तक्रनाहुरन्ये तु कट्वरम्। प्रभृतिशब्दाच्चुक्रादीनां ग्रहणम् ॥ १८ ॥

पित्तकोपस्य कालं दर्शयन्नाह तदुष्णैरित्यादि। तदिति पित्तम्। उष्णैरिति उष्णत्वमत्र चर्मादिकृतं। उष्णकाले ग्रीष्मे। मेघान्ते शरदि। आह्निकं पित्तकोपस्य कालमाह मध्याह्ने इत्यादि। भुक्तापेक्षं पित्तप्रकोपस्य कालमाह जीर्य्यत्यन्ने कुप्यतीति, पित्तप्रकोपनेषु मध्ये शोकभययोर्वातप्रकोपनयोः पाठोऽनार्ष इति जेज्झटः। स चान्यैर्निबन्धकारैरनपठित-त्वादस्माभिरपि गृहीत इति ॥ १९ ॥

कफप्रकोपनानि निर्दिशन्नाह दिवास्वप्नाव्यायामेत्यादि। अभिष्यन्दि दोषधातुमलस्रोतसामतिशयक्लेदप्राप्तिजननम्। हायनकः घोटकपुच्छः, स च शालिविशेषः। यवकः शूकधान्यविशेषः, तस्य च यवाकारास्तण्डुलाः। नैषधः कोरक इत्याख्यायते, स च धान्यविशेषः। इत्कटः खगलो। पिष्टं तण्डुलपिष्टम्। कृशरा तिलतण्डुलमाषैः कृता यवागूः। पायसः क्षीरसिद्धास्तण्डुलाः। विसं पद्ममूलं, विशाल इति लोके। मृणालं

स शीतैः शीतकाले च वसन्ते च विशेषतः।
पूर्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति ॥ २१ ॥

पित्तप्रकोपणैरेव चाभीक्ष्णं द्रवस्निग्धगुरुभिश्चाहारैर्दिवास्वप्नक्रोधानलातपश्रमाभिघाताजीर्णविरुद्धाध्यशनादिभिरसृक् प्रकोपमापद्यते।

यस्माद्रक्तं विना दोषैर्न कदाचित् प्रकुप्यति।
तस्मात्तस्य यथादोषं कालं विद्यात्प्रकोपणे ॥ २२ ॥

तेषां प्रकोपात्कोष्ठतोदसञ्चरणाम्लिकापिपासापरिदाहान्नद्वेषहृदयोत्क्लेदाश्च जायन्ते। तत्र द्वितीयः क्रियाकालः ॥ २३ ॥

पद्ममूलस्यप्ररोहाङ्कुरः। शृङ्गाटकं जलमध्ये त्रिकण्टकम्। मधुरवल्लीफलमिति मधुरफलं तालनारिकेलादि; वल्लीफलम् अलाबूप्रभृति। अन्ये कुष्माण्डकादीनि ॥ २० ॥

कफकोपकालविशेषं निर्दिशन्नाह स शीतैः शीतकाले चेत्यादि। शीतैः शीतलद्रव्यैः। पूर्वाह्णे प्रथमप्रहरे। प्रदोषे रजनीमुखे ॥ २१ ॥

द्वितीये दर्शने शोणितचतुर्थैरित्युक्तैः शोणितस्य चतुर्थस्य कोपनानि दर्शयन्नाह पित्तप्रकोपणैरेव चेति। पित्तशोणितयोः सामान्यत्वात्। तस्यैव विशिष्टमपि हेतुं दर्शयन्नाह पुनः अभीक्ष्णद्रवैरित्यादि। अभीक्ष्णं च पुनः पुनः सेवितैरिति शेषः। न च स्वातन्त्र्येणास्य प्रकोपः सर्वदा परतन्त्रत्वेनैव। तत्प्रतिपादयन्नाह यस्माद्रक्तं विनेति। तत्र वातदुष्टं वातप्रकोपकाले कुप्यति। एवं पित्तकफदुष्टस्य रक्तस्य पित्तकफकाला इति ॥ २२ ॥

तेषां प्रकोपलिङ्गानि दर्शयन्नाह तेषां प्रकोपादिति। कोष्ठतोदसञ्चरणे वातस्य। सञ्चरणमिति कोष्ठे वातपरिभ्रमणमित्यर्थः। अम्लिका-पिपासा-परिदाहाः पित्तस्य। अम्लिका अम्लोद्गारः, परिदाहः सर्वतो दाहः। अन्येऽपरिदाह इति अकारप्रश्लेषं मन्यन्ते। तत्र नञ ईषदर्थे यथाऽनु-

अत ऊर्द्ध्वं प्रसरं वक्ष्यामः। तेषामेभिरातङ्कविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति, तेषां वायुर्गतिमत्त्वात्प्रसरणहेतुः, सत्यप्यचैतन्ये स हि रजोभूयिष्ठो रजश्च प्रवर्त्तकं सर्व्वभावानां। यथा महानुदकसञ्चयोऽतिवृद्धः सेतुमवदार्य्यापरेणोदकेन व्यामिश्रः सर्व्वतः प्रधावति, एवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति। तद्यथा,—वातः पित्तं श्लेष्मा शोणितं; वातपित्ते वातश्लेष्माणौ पित्तश्लेष्माणौ; वातशोणिते पित्तशोणिते श्लेष्मशोणिते, वातपित्तशोणितानि वातश्लेष्मशोणितानि पित्तश्लेष्मशोणितानि, वातपित्तकफा वातपित्तकफशोणितानि। इत्येवं पञ्चदशधा प्रसरन्ति ॥ २४ ॥

दराकन्येति, तेनैवह्राह इति व्याख्यानयन्ति। अन्नद्वेषहृदयोत्क्लेदौ कफस्य, हृदयोत्क्लेदो हृल्लासः। द्वितीयः क्रियाकाल इति द्वितीयचिकित्सावसरः॥ २३।

अत ऊर्द्ध्वं प्रकोपविशेषमेव प्रसराख्यं दर्शयन्नाह अत ऊर्द्ध्वं प्रसरमिति। तेषामेभिरित्यादि।—तेषां वातपित्तश्लेष्मणाम्, एभिरातङ्कविशेषैः प्रकुपितानामिति पूर्व्वोक्तैर्व्वलवद्विग्रहादिभिः कोष्ठतोदसञ्चरणादिभिर्व्वा कथ्यन्ते। प्रसरन्तीत्यत आह किण्वोदकपिष्टेत्यादि। अन्योन्यगुणानुप्रवेशाद्यथा किण्वोदकपिष्टानामुद्रेकः, एवं दुष्टिहेतूनां समवाये वातादीनामुद्रेको भवति। किण्वं सुरावीजम्। पिष्टं तण्डुलपिष्टम्। समवायः संयोगः। कुतो दोषाणां मध्ये वायुरेव प्रसरणहेतुरित्याह तेषां वायुर्गतिमत्त्वादित्यादि। स हि रजोभूयिष्ठ इति स वायुः, हि यस्मादर्थे रजोभूयिष्ठो रजोबहुलो वायुरित्युक्तत्वात्। सर्व्वभावानां सर्व्वपदार्थानाम्। एतेन वाय्वो-

कृत्स्नेऽर्द्धेऽवयवे वापि यत्राङ्गे कुपितो भृशम्।
दोषो विकारं नभसि मेघवत्तत्र वर्षति॥
नात्यर्थं कुपितश्चापि लीनो मार्गेषु तिष्ठति।
निष्प्रत्यनीकः कालेन हेतुमासाद्य कुप्यति॥ २५॥

तत्र वायोः पित्तस्थानगतस्य पित्तवत् प्रतीकारः, पित्तस्य कफस्थानगतस्य कफवत्, कफस्य च वातस्थानगतस्य वातवत्, एष क्रियाविभागः॥ २६॥

एवं प्रकुपितानां प्रसरतां च वायोर्विमार्गगमनाटोपौ। ओषचोषपरिदाहधूमायनानि पित्तस्य। अरोचकाविपाका-

ऽर्तिमत्त्वे हेतुरुक्तः। प्रसरस्य पुनर्दृष्टान्तमाह यथा महानुदकसञ्चयोऽतिप्रवृद्ध इत्यादि। सेतुमवदार्य्येति आलीं भित्त्वा। तमेव प्रसरणोपयोगिनां संयोगं संख्यया दर्शयन्नाह तद्यथा वातपित्तमित्यादि॥ २४॥

तेषामेकदेशप्रसरणेन दृष्टान्तेन एकदेशैर्विकारं दर्शयन्नाह कृत्स्नेऽर्द्धेऽवयवेति। अत्राङ्गशब्देन शिरोबाहुजङ्घाः कथ्यन्ते। किं विशिष्टेऽङ्गे इत्याह कृत्स्ने इत्यादि। कृत्स्न समस्ते अङ्गे। अवयवे चिबुकचरणादौ। प्रभूतोऽपि कोऽपि कोपाल्पत्वान्न सहसा विकारकारीति दर्शयन्नाह नात्यर्थं कुपितश्चापीति। लीन एकदेशस्थितः। निष्प्रत्यनीको निष्क्रियः॥ २५॥

तत्र प्रसरेणान्यदोषस्थानगतस्य दोषस्थानीवत् प्रतिकारातिदेशं दर्शयन्नाह तत्र वायोः पित्तस्थानेति। तेषां प्रसरणलिङ्गानि दर्शयन्नाह एवं प्रकुपितानामिति। प्रसरप्रस्तावेऽत्र प्रकुपितानामिति यत् कृतं तत् प्रकोपविशेष एव। प्रसर इति ज्ञापनार्थम्। प्रकोप-प्रसरणयोः कोभेदः? उच्यते,—स्थानगतस्य सर्पिषः क्वाथ्यमानस्य प्रथमं सञ्चलनमात्रमेव प्रकोपः; तस्यैव चातिक्वाथ्यमानस्य फेनमण्डलेनोत्सर्पता देशान्तरसरणमिव प्रसरः। वायोर्विमार्गगमनमित्यादि। विमार्गगमनाटोपौ वायोः। वायोः अप्रकृतवायोः, मार्गादन्यो विमार्गः; आटोपो रुजापूर्वक उदरक्षोभः।

ङ्गसादश्छर्दिश्चेति श्लेष्मणो लिङ्गानि भवन्ति। तत्र तृतीयः क्रियाकालः ॥ २७ ॥

अत ऊर्द्ध्वं स्थानसंश्रयं वक्ष्यामः॥ एवं कुपितास्तांस्तान् शरीरप्रदेशानागत्य तांस्तान् व्याधीन् जनयन्ति। ते यदो-दरसन्निवेशं कुर्वन्ति तदा गुल्मविद्रध्युदराग्निसङ्गानाहवि-सूचिकातीसारप्रभृतीन् जनयन्ति। वस्तिगताः प्रमेहाश्मरी-मूत्राघातमूत्रदोषप्रभृतीन्। मेढ्रगता निरुद्धप्रकाशोपदंशशू-कदोषप्रभृतीन्। गुदगता भगन्दरार्शःप्रभृतीन्। वृषणगता वृद्धीः। ऊर्द्ध्वजत्रुगतास्तूर्द्ध्वजान्। त्वङ्मांसशोणितस्थाः क्षुद्र-रोगान् कुष्ठानि विसर्पांश्च। मेदोगता ग्रन्थ्यपच्यर्बुदगल-

ओषादीनि पित्तस्य, ओष एकदेशिको दाहः, चोषश्चूषत इव वेदनावि-शेषः। धूमायनं धूमोद्गमनमिव। केचिदोष-चोषे न पठन्ति। दाहो धूमायनं पित्तस्येति च पठन्ति। अरोचकादयः कफस्य। अङ्गसादोऽङ्गग्लानिः। अविपाकाङ्गसादौ केचिन्न पठन्ति, अरोचकश्छर्दिश्चेत्येतदेव च पठन्ति। तत्र प्रसरणं यावद्दोषाणामेव हेतुलिङ्गचिकित्सास्तदनन्तरं व्याधिरिति ॥ २६ ॥ २७ ॥

प्रसृतानां पुनर्दोषाणां स्रोतोवैगुण्याद् यत्र सङ्गस्थानं संश्रयस्तं निर्दिश-न्नाह अत ऊर्द्ध्वमित्यादि। तत्र स्रोतोवैगुण्याद् यत्र यत्रागत्य यान् कुर्वन्ति तांस्तान् निर्देष्टुमाह ते यदोदरसन्निवेशमिति। सन्निवेशं सम्यक् स्थितिम्। प्रभृतिग्रहणात् प्रवाहिका-विलम्बिकाप्रभृतयः। ऊर्द्ध्वजत्रुगतास्तीति जत्रु-ग्रीवामूलम्। त्वङ्मांसशोणितस्था इति त्वक्शब्देनात्र स्वरसो विवक्षितः। मेदो गतदोषव्याधिः पाठान्तरम्, अस्थिगता विद्रध्यादिनीति पाठो युक्तः सूत्रेण दर्शनात्, समस्तो न लिखितः। मज्जशुक्रगतानां दोषाणां व्याधयो न निर्दिष्टाः स्वल्पत्वात् कादाचित्कत्वाच्चेति। सर्वाङ्गगता ज्वरसर्वाङ्ग इति,—

गण्डालजीप्रभृतीन्। अस्थिगता विद्रध्यनुशयीप्रभृतीन्। पादगताः श्लीपदवातशोणितवातकण्टकप्रभृतीन्। सर्वाङ्गगता ज्वरसर्वाङ्गरोगप्रभृतीन्। तेषामेवमभिनिविष्टानां पूर्व्वरूपप्रादुर्भावस्तत्प्रतिरोगं वक्ष्यामः। तत्र पूर्व्वरूपगतेषु चतुर्थः क्रियाकालः॥ २८॥

अत ऊर्द्ध्वं व्याधिदर्शनं वक्ष्यामः। शोफार्ब्बुदग्रन्थिविद्रधिविसर्पप्रभृतीनां प्रव्यक्तलक्षणता ज्वरातिसारप्रभृतीनाञ्च। तत्र पञ्चमः क्रियाकालः॥ २९॥

सर्वाङ्गरोगः वातव्याधिः प्रमेहपाण्डुशोषणादयो वा। सूक्ष्मत्वात् स्थानसंश्रयस्य न पृथगुक्तं लक्षणं, नापि क्रियाकाल इति। तेषामेवमभिनिविष्टानामिति।—अभिनिविष्टानामत्यर्थं सन्निवेशं कृतवताम्। पूर्वरूपप्रादुर्भाव इति व्याधेरिति शेषः, किन्तत् पूर्वरूपमिति पृष्टोव्याधिभेदबाहुल्येन पूर्वरूपभेदबाहुल्यात् साक्षान्निर्द्देशेन दर्शयितुमशक्यमित्यतिदेशेन दर्शयन्नाह ते प्रतिरोगं वक्ष्यामः। तं पूर्वरूपप्रादुर्भावं रोगे रोगे प्रतिवक्ष्याम इत्यर्थः, न प्रतिदोषं चयादिलिङ्गवदित्यर्थः। तत्र पूर्वरूपगतेष्विति।—गतेषु ज्ञातेषु पूर्वरूपेषु वर्त्तमानेष्विति केचित् पठन्ति। चतुर्थः क्रियाकाल इति चतुर्थश्चिकित्सावसरः। चिकित्सा चात्र दोषस्य दूष्यस्य चेत्युभयस्थिता चिकित्सितव्याधेः॥ २८॥

प्रव्यक्तं रूपं व्यक्तिस्तां दर्शयन्नाह व्याधिदर्शनं वक्ष्याम इति। व्याधेर्दर्शनं व्याध्युपलब्धिः शोफादीनां ज्वरादीनां च प्रव्यक्तलक्षणतेति। सा च प्रव्यक्तलक्षणता च व्याधिजातिलक्षणकथनं, तद्यथा शोफार्वुदादीनां त्वङ्मांससंस्थानस्य दोषस्य सङ्घाततमा। तथा सन्तापलक्षणो ज्वरः। रसस्रावलक्षणोऽतीसारः, पूरणलक्षणमुदरमिति। तत्र व्याधिप्रत्यनीकैव चिकित्सा॥ २९॥

अत ऊर्द्ध्वमेतेषामवदीर्णानां व्रणभावमापन्नानां षष्ठः क्रियाकालः। ज्वरातीसारप्रभृतीनाञ्च दीर्घकालानुबन्धः। तत्राप्रतिक्रियमाणेऽसाध्यतामुपयान्ति ॥ ३० ॥

भवन्ति चात्र।

सञ्चयञ्च प्रकोपञ्च प्रसरं स्थानसंश्रयम्।
व्यक्तिं भेदञ्च यो वेत्ति दोषाणां स भवेद्भिषक् ॥ ३१ ॥
सञ्चयेऽपहृता दोषा लभन्ते नोत्तरा गतिः।
ते तूत्तरासु गतिषु भवन्ति बलवत्तराः ॥ ३२ ॥

व्यक्तिमभिसन्धाय भेदं कथयन्नाह अत ऊर्द्ध्वमेतेषामवदीर्णानामिति। एतेषां शोफादीनामित्यर्थः। अवदीर्णानां विदरणगतानां भिन्नानामित्यर्थः। अवदीर्णत्वञ्च शोफादीनां विशेषलक्षणम्, अतएव व्रणभावमापन्नानामिति। यत एव विदीर्णा अतएव व्रणत्वं गता इत्यर्थः। ज्वरातीसारप्रभृतीनाञ्च दीर्घकालानुबन्ध इति यथाव्यक्तिप्रस्तावे ज्वरादीनां सन्तापसरणपूरणादिकं सामान्यलक्षणमुक्तम्। तथात्र भेदप्रस्तावाद्विशेषणलक्षणं दीर्घकालानुबन्धो ज्वरादिजातिषु भेद इति ज्ञातव्यः। केचिदनुबन्धवीर्य्यकालानुबन्धो न प्रतिव्याधिजातिषु सम्भवतीति वातादिलक्षणभेदाद्भिन्नत्वं भेद इत्याचक्षते, यथा अष्टानां ज्वराणामित्यादि। अत्र पक्षे दीर्घकालानुबन्ध इति स्वरूपकथनम्, एतेन सञ्चयादिषु अप्रतीकारात् दीर्घकालानुबन्धोऽसाध्यता च भवतीत्युक्तं, पूर्वासु गतिषु अप्रतिकारेऽपि प्रतीकारावसरोऽस्त्येव, अत्र तूत्तरगत्यभावात् पश्चात् प्रतीकाराशा नास्त्येवेति दर्शयन्नाह तत्राप्रतिक्रियमाण इति। तत्रेति भेदे इत्यर्थः ॥ ३० ॥

अतीतं सञ्चितसंग्रहं प्रतिपादयन्नाह सञ्चयञ्च प्रकोपञ्चेत्यादि। चकारेण सञ्चयादिहेतुस्थानाद्यनुक्तं सर्वमुच्चीयते। यथा पूर्वं प्रतीकाराल्पत्वं यथोत्तरं प्रतिकारबाहुल्यं दर्शयन्नाह सञ्चयापहृता दोषा इति। तेषा-

सर्वै र्भावैस्त्रिभिर्वापि द्वाभ्यामेकेन वा पुनः।
संसर्गे कुपितः क्रुद्धं दोषं दोषोऽनुधावति॥ ३३॥

मपहरणं च बहुदोषे शोधनं, मध्यदोषे लङ्घनपाचनम्, अल्पदोषे संशमनमिति॥ ३१॥ ३२॥

इदानीं संसर्गे सन्निपाते च प्रसराभिहिते अंशांशबलविकल्पेनानुबन्धानुबन्धिभावं चिकित्सार्थं दर्शयन्नाह सर्वैर्भावैस्त्रिभिर्वेति। अनुधावति अनुलग्नो भवति। कोऽसौ? दोषः, किं विशिष्टः? कुपितः, कैः कृत्वा भावैः, कोऽर्थः? स्वभावैः रूक्षोष्णस्निग्धादिभिः, कतिसंख्योपेतैः? त्रिभिः, न केवलं, त्रिभिर्द्वाभ्यामेकेन वा; एतेन त्वादिस्वभावकुपितोऽस्वभावकुपितोऽप्रधानोऽनुबन्धभूतः, प्रधानदोषमार्गानुलग्नो भवतीत्युक्तम्। कमनुधावति? इत्याह दोषं, किं विशिष्टं? क्रुद्धं प्रकोपं गतम्। कैः कृत्वा भावैः, कतिसंख्यैः? इत्याह सर्वैः, कोऽर्थः समस्तैरुक्षोष्णस्निग्धादिभिः, एतेन सर्वभावक्रुद्धः प्रधानभूतो व्यक्त लिङ्गोऽनुबन्ध्योदोष उक्तः। अनुबन्ध्याभूतस्य दोषस्य चिकित्सा कर्त्तव्या, तत्प्रशमादेवाप्रधानस्यानुबन्धीभूतस्य प्रशमो भविष्यतीति। यदा सर्वैर्भावैः कुप्यन्ति तदा सर्वे प्रधानभूताः परस्परम् अनुबन्धभूताश्च भवन्ति, एवं च समसन्निपातो भवति। अपरे तु रसगुणवीर्य्यविपाकांश्चतुरो भावान् कथयन्ति। द्रव्यगुणकर्माणि भावा इति चरकव्याख्यातारो भट्टारक-हरिश्चन्द्रप्रभृतयः प्रतिपादयन्ति। अन्येतु सर्वैर्भागैरिति पठन्ति। तत्र वातस्य रूक्षलघुविशद विष्टम्भा भागाः। पित्तस्य तीक्ष्णद्रवपूतीनीलपीतभागाः, श्लेष्मणः शीतगुरुपिच्छिलस्निग्धादयो भागाः, तत्र वातादयो यदा सर्वैस्त्रिभिर्द्वाभ्यामेकेन वा भागेन कुप्यति तदा तावद्भिस्तद्विपरीतैर्भागैश्चिकित्सा कर्त्तव्या। तत्र श्लेष्मणः चये बलवद्विग्रहादिभिः क्रियमाणे यदा रूक्षोभागो वातस्य कुप्यति तदा स्निग्धेनैकेन भागेन तद्विपरीतेन प्रतिकर्त्तव्यः। यदा तु रूक्षशीतौ द्वौ भागौ कुप्यतस्तदा स्निग्धोष्णाभ्यां द्वाभ्यां भागाभ्यां चिकित्सा इत्यादि रिति। सर्वैर्वेति स्वयमुह्य संसर्गे दोषद्वयसंयोगे इत्यर्थः, एतेनैतदुक्तं भवति। यदा क्रुद्धं कुपितोऽनु-

संसर्गे यो गरीयान् स्यादुपक्रम्य स वै भवेत्।
शेषदोषाविरोधेन सन्निपाते तथैव च ॥ ३४ ॥
वृणोति यस्माद्रूढेऽपि व्रणवस्तु न नश्यति।
आदेहधारणात्तस्माद्व्रण इत्युच्यते बुधैः ॥ ३५ ॥

गच्छति तदा संसर्गो भवति, सच संसर्गो द्विधा भवति प्रकृति समसमवेत तथा विकृतिविषमसमवेततया च, यदा वायुपित्तयोः संसर्गः तदा शोषणात्मकतया स्वभावसदृशेन पित्तेन वायुः समवेतसम इति प्रकृतिसमवेत उच्यते, यदा तु पित्तश्लेष्मणोः संयोगः तदा पित्तमुष्णं शीतेन श्लेष्मणा युक्तं अतः स्वभाव विपरीतेन समवेत इति विकृतिविषम समवेत उच्यते ॥ ३३ ॥

संसर्ग सन्निपातयोश्चिकित्सा सूत्रमाह संसर्गेयो गरीयानिति। गरीयान् गुरुतरः, कथमुपक्रमणीय इत्याह शेषदोषाविरोधेनेति यथा न कुप्यतीत्यर्थः। संसर्गक्रियां सन्निपातेष्वतिदेशयन्नाह सन्निपाते तथैवचेति, ननु यद्विशेष दोषाविरोधेन संसर्गे यो गरीयान् स्यादुपक्रम्यस्तर्हि कथमिदमुच्यते, समयेत्पित्तमेवादौ ज्वरेषु समवायिषु दुर्निवारतमत्वाद्धि ज्वरार्त्तेषु विशेषतः। तथा, समवाये हि दोषानां पूर्व्वं पित्तमुपाचरेत्। ज्वरे चैवातिसारे च सर्व्वत्रान्यत्र मारुतमिति, सत्यं समसन्निपातमाश्रित्य तदोक्तं न पुनरन्यात् "स्वदेशेति पुस्तकान्तरं" द्वादशेति दपः ॥ ३४ ॥

कथमस्मात् पुनरयं शरीरैकदेशोत्थित दोषसंघातो व्रण इत्युच्यते इत्याह। वृणोतीति संवृणोति आच्छादयति यस्मात्तस्माद्व्रण इति अथवा व्रणवस्तु व्रणचिह्नं रूढेऽपि न नश्यति तथैवास्ते आदेहधारणाद् यावज्जीवं तस्मात् व्रण इति ॥ ३५ ॥

इति सूत्रस्थाने निबन्ध संग्रहे एकविंशोऽध्यायः समाप्तः ॥ २१ ॥

द्वाविंशोऽध्यायः ।

अथातो व्रणास्रावविज्ञानीयमध्यायं व्याख्यास्यामः ।

त्वङ्मांससिरास्नाय्वस्थिसन्धिकोष्ठमर्माणीत्यष्टौ व्रणवस्तूनि । अत्र सर्वव्रणसन्निवेशः । तत्राद्यैकवस्तुसन्निवेशी त्वग्भेदी व्रणः सूपचरः शेषाः स्वयमवदीर्य्यमाणा दुरुपचाराः ॥ तत्रायतश्चतुरस्रो वृत्तस्त्रिपुटक इति व्रणाकृतिसमासः शेषास्तु विकृताकृतयो दुरुपक्रमा भवन्ति ॥१ ॥

त्वगिति व्रणवस्तूनि व्रणाधिष्ठानानि । अत्रेति तत्रष्वित्यर्थः । व्रणसन्निवेशः व्रणसंस्थानं तेषां मध्ये एकस्मिन्नेव वस्तूनि व्रणस्य सुखोपचर्य्यत्वं दर्शयन्नाह तत्रेति । आद्यैक वस्तु सन्निवेशीत्वक्सन्निवेशीत्यर्थः । त्वग्भेदीति पुनर्नियमार्थः एतेन त्वगाश्रितमांसभेदी न सूपचरः । अन्ये तु आद्यैकवस्तु सन्निवेशी त्वग्भेदी च अनयोः पदयोर्मध्ये एकतरपदेनैव त्वग्वस्तु प्राप्यते किं पदद्वयेनेति यत्पदद्वयं तदर्थाधिक्यादर्थाधिक्यं बोधयति तेन विकृताकृतयोऽपि त्वग्भेदिनो व्रणाः सूपचर इत्यधिकोऽर्थ उक्तो भवतीति मन्यन्ति अपरवस्तु सन्निवेशिनः किं विशिष्टा इत्याह । शेषा इति मांसाद्यधिष्ठानाः स्वयमवदीर्य्यमाणा इति आलेपस्रावणादिभिर्विना स्वयमेव पक्वाः पश्चाद्भिन्ना इत्यर्थः । यथा स्रावज्ञानं चिकित्साहेतुस्तथा व्रणाकृतिरपीति तां दर्शयन्नाह तत्रायत इति । आयतो दीर्घश्चतुरस्रश्चतुष्कोणः, वृत्तो वर्त्तुलः, त्रिपुटकस्त्रिकोण इति शब्द उपसंहारे दोषजव्रणाकृतीनां समासः संक्षेपः । शेषा इति उक्तेभ्योऽन्या अर्द्धचन्द्रलतिकाद्याः व्रणाकृतयो विकृता इत्यर्थः ॥ १ ॥

सर्व एव व्रणाः क्षिप्रं संरोहन्त्यात्मवतां सुभिषग्भिश्चोपक्रान्ताः। अनात्मवतामज्ञैश्चोपक्रान्ताः प्रदुष्यन्ति प्रवृद्धत्वाद्दोषाणाम् ॥ २ ॥

तत्रातिसंवृतोऽतिविवृतोऽतिकठिनोऽतिमृदुरुत्सन्नोऽवसन्नोऽतिशीतोऽत्युष्णः कृष्णरक्तपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरवः पूतिपूयमांससिरास्नायुप्रभृतिपूर्णः पूतिपूयास्राव्युन्मार्ग्युत्सङ्गमनोज्ञदर्शनगन्धोऽत्यर्थं वेदनावान्

व्रणिनामात्मवतां भिषजां गुणसम्पदोऽपि चिकित्सा हेतव इतिदर्शयन्नाह सर्वेति आत्मवतां हिताहारविहारसेविनाम्। अनात्मवतामिति अनात्मवतामहिताहारविहारसेविनां अज्ञैश्चोपक्रान्त इति चकारेणात्मवतां सुभिषग्भिरुपक्रान्तानामपि कुष्ठिप्रमेहिनां कदाचित् शुक्रप्रवृत्तिमात्रादेवव्रणदुष्टिरनुक्ता समुच्चीयते कुतः पुनरणात्मवतामज्ञभिषगुपक्रान्तानां व्रणानां दुष्टिरित्याह प्रवृद्धत्वाद्दोषाणामिति अन्येत्वेवं योजयन्ति न केवलमज्ञैरुपक्रान्ताः प्रदूष्यन्त्येवकुतः प्रवृद्धत्वाद्दोषाणां ॥ २ ॥

प्रायेण दुष्टेष्वेव व्रणेषु स्रावा भवन्ति अतस्तेषां दुष्टव्रणानां लक्षणमाह तत्रातिसंवृते इति अतिसंवृतः अति सङ्कुचितो वातेन, अति विवृत व्यक्तमुख: पित्तशोणितेन, काठिन्यं वातेन, अतिमार्दवं कफेन, अन्ये पित्तशोणितेन मार्दवमिच्छन्ति, उत्सन्न उन्नतमांस:, अवसन्न हिनमांसः निम्नाकार: एतेन रक्तपित्तेन, अन्ये वातेन उत्सन्नावसन्नतरमिच्छन्ति। अतीत्सन्नत्वं कफेनेति केचित् अतिशैत्यं कफवातात् अत्यौष्ण्यं रक्तपित्तात् कृष्णादयो वर्णा यथासम्भवं वातादिभिर्ज्ञेया:, भैरवोऽनवधारितलिङ्गः पूतिपूयमांससिरास्नायु प्रभृतिभि पूर्ण इति पूतिशब्दः प्रत्येकं पूयादिभिरभिसम्बध्यते। पूतिमांस सिरास्नायुप्रतिपूर्ण इत्येके पठन्ति-पूतिमांससिरास्नायु प्रतिपूर्णत्वं तत् स्राविलक्ष यथासम्भवं वेदितव्यं उन्मार्गी तिर्य्यग्गति: उत्सङ्गी ऊर्द्धगति: अन्ये पूयो पेचवदारित मांसादि-

दाहपाकरागकण्डुशोफपिडकोपद्रुतोऽत्यर्थं दुष्टशोणितास्रावी दीर्घकालानुबन्धी चेति दुष्टव्रणलिङ्गानि। तस्य दोषोच्छ्रायेण षट्त्वं विभज्य यथास्वं प्रतिकारे प्रयतेत ॥ ३ ॥

अत ऊर्द्धं सर्वस्रावान् वक्ष्यामः। तत्र घृष्टासु छिन्नासु वा त्वक्षु स्फोटेषु भिन्नेषु विदारितेषु वा सलिलप्रकाशो भवत्यास्रावः किञ्चिद्विस्रः पीतावभासश्च। मांसगतः सर्पिःप्रकाशः सान्द्रः श्वेतः पिच्छिलश्च। सिरागतः सद्यश्छिन्नासु सिरासु

देशत्वेनाति निम्नत्वादुत्सङ्गः तुल्यत्वादुत्सङ्गः सोऽस्यास्तीति उत्सङ्गीति कफेन अमनोज्ञदर्शन गन्ध इति अमनोज्ञ दर्शनं मनोज्ञगन्धत्वं रक्तपित्तेन अन्ये-दोषत्रयेण मन्यन्ते अत्यर्थं वेदनावानिति वातेन दाहपाकरागकण्डू-शोफेत्यादि अत्रदाहादिभिःसह उपद्रुत शब्दः प्रत्येकं सम्बध्यते अत्रदाह पाक-रागोपद्रुतत्वं पित्तरक्तेन कण्डूपद्रुतत्वं कफेन शोफोपद्रुतत्वात् वातेन पित्त-पिडकोपद्रुतो दुष्ट शोणितास्रावश्च रक्तपित्तेन दीर्घकालानुबन्धित्वं दोषत्रयेण दीर्घकालानुबन्धी चेति चकारेण रोप्यादयो दुष्टव्रण विशेषागृ-ह्यन्ते, रोप्यलक्षणन्तु वहिःशुद्ध इवाभाति सव्रणो रोप्यमुच्यते इति चरके-णोक्तं। व्रणदुष्टौ चिकित्सा सूत्रं दर्शयन्नाह तस्येति, तस्य व्रणस्य उच्छ्रायेण औत्कट्येन षट्त्वं वातपित्तकफरक्तसन्निपातागन्तुभेदतः यथास्वं स्वस्व-दोषस्यानतिक्रमेण प्रतिकारे चिकित्सिते प्रयतेत प्रयत्नं कुर्वीत। अन्ये तु अत्र दोषोच्छ्रायमवेक्ष्येति पठन्ति ॥ ३ ॥

अत्र व्रणदुष्टिरस्रविता उक्ता कफेऽक्रान्तां निर्दिश्यव्रणास्रावान्निर्दिश-न्नाह ॥ अत ऊर्द्धमिति। सर्वं स्रावानिति सर्वव्रणवस्तूनां सर्वदोषाणा-मागन्तोश्च व्रणस्य स्रावानित्यर्थः। घृष्टासु छिन्नासु इत्यागन्तोः त्वक्षु इति सम्बन्धः। बहुवचनन्तु समस्तत्वगपेक्षया। अत्र त्वग्ग्रहणात् तल्लक्षणया तदधिष्ठानो व्रण उक्तः। स्फोटेष्विति त्वक् स्थिते व्रणे, भिन्ने स्वयं भिन्ने, विदारिते यत्नेन विदारिते इत्यर्थः। अत्र भिन्ने विदारिते इति शरीर

रक्तातिप्रवृत्तिः पक्वासु च तोयनाडीभिरिव तोयागमनं पूय-
स्रावश्चात्र तनुर्विच्छिन्नः पिच्छिलोऽवलम्बी श्यावोऽवश्याप्रतिमश्च। स्नायुगतः स्निग्धो घनः सिंहाणकप्रतिमः सरक्तश्च। अस्थिगतोऽस्थन्यभिहते स्फुटिते भिन्ने दोषावदारिते वा दोषभक्षितत्वादस्थिनिःसारं शुक्तिधौतमिवाभाति। आस्रावश्चात्र मज्जमिश्रः सरुधिरः स्निग्धश्च॥ सन्धिगतः पीड्यमानो न प्रवर्त्तते आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्कासनप्रवाहणैश्च स्रवति। आस्रावश्चात्र पिच्छिलोऽवलम्बी सफेनपूयरुधिरोन्मथितश्च। कोष्ठगतोऽसृङ्मूत्रपुरीषपूयोदकानि स्रवति। मर्मगतस्त्वगादिष्ववरुद्धत्वान्नोच्यते॥ तत्र त्वगादिगतानामास्रावाणां यथाक्रमं पारुष्यस्रावा-

व्रणस्य। सलिलप्रकाश इति उदकरसयो रक्तयोः त्वचामधिष्ठानत्वात् विस्रः आमगन्धिः पीताविभासः पाकारम्भकेण पित्तेनेत्यर्थः॥ मांस सर्पिरिति। मांसगत आस्राव इत्यर्थः सर्पिः प्रकाशवत्त्वङ्मांसगतः सान्द्रत्वेत पिच्छिलत्वं शरीरस्य॥ सिरागतः सद्यच्छिन्ने ष्विति सिराग्रहणेन रक्ताधिष्ठानो व्रण उक्तः, सद्यश्छिन्नास्वित्यागन्तोः पक्वास्वित्यादि शारीरस्य विच्छिन्न इति अल्पाल्पप्रवर्त्तनं। अवलम्बी अवलम्बनशीलः॥ स्नायुगत स्निग्ध इति। स्नायुग्रहणेन मेदोऽधिष्ठानो व्रण उक्तः। अन्ये तु मेदो मज्जानौ। घृतवद्विलीयते अतो व्रणाधिष्ठानत्वं नैवतयोरिति वदन्ति। सिंहानकं रक्तमिश्रो घनीभूतश्लेष्मा॥ अस्थिगतोऽस्थिनीति। अभिहत इति अभिघातजे व्रणे भिन्ने विदारिते चेति शारीरे। अस्थिनिःसारं कोऽर्थः? लघु भवतीत्यध्याहारः। शुक्तिधौतमिवाभाति शुक्तिरिवशोभनं तथा धौतमिवशोभते अस्थीति सम्बध्यते॥ सन्धिगत पीड्यमान इति। उन्नमनमिति वाहुजङ्घादीनामुर्द्ध्वं नयनं। विनमनमिति निकुञ्चनं गात्राणामधःप्रापनिवाहनं सरुधिरोन्मथितश्चेति रुधिरेणैवोन्मथितश्च॥

वश्यायदधिमस्तुक्षारोदकमांसधावनपुलाकोदकसन्निभत्वानि मारुताद्भवन्ति ॥ पित्ताद्गोमेदगोमूत्रभस्मशङ्खकषायोदकमाध्वीकतैलसन्निभत्वानि । पित्तवद्रक्तादतिविस्रत्वञ्च । कफान्नवनीतकासीसमज्जपिष्टतिलनारिकेलोदकवराहवसासन्निभत्वानि ॥ सन्निपातात्तिलनारिकेलदकैर्वारुकरसकाञ्जिकप्रसादकोदकप्रियङ्गुफलयकृन्मुद्गयूषसवर्णत्वानीति ॥ ४ ॥

श्लोकौचात्र भवतः ।

पक्वाशयादसाध्यस्तु पुलाकोदकसन्निभः ।
क्षारोदकनिभः स्रावो वर्ज्यो रक्ताशयस्रवन् ॥
आमाशयात्कलायाम्भोनिभश्च त्रिसन्धिजः ।
स्रावानेतान् परीक्ष्यादौ ततः कर्माचरेद्भिषक् ॥ ५ ॥

कोष्ठगतोऽसृगिति । कोष्ठगत इति मलधातुसमुदायाधिष्ठानो वणउक्तः । उदकमत्र रसक्लेद एव गृह्यते पित्तं वा ॥ मर्म्मगतस्त्वगादिर्भ्निति अवरुद्ध इति संगृहीत इत्यर्थः । दोषास्रावनिर्द्दिश्यन्नाह तत्र त्वगादिगतानामिति तत्रमर्म्मवर्ज्जितेषु समस्त त्वगादिव्रणस्तुस्त वातपित्तकफसन्निपातानां समस्तस्रावा यथाक्रमेण द्रष्टव्या इत्येके । अन्ये तु त्वगादिषु वातादिलिङ्गानां मध्ये किञ्चित् क्वचिदिति वर्णयन्ति ॥ पित्तादगोमेदेत्यादि । गोमेदक इति मणिवापितः ॥ एर्वारुकरसः कर्कटीकारसः । काञ्जिकप्रसाद इति काञ्जिकस्योपर्य्यच्छः । यकृतं अनेनैवनाम्ना प्रसिद्ध ॥ ४ ॥

स्थानभेदात् स्रावस्यासाध्यत्वख्यापनाय श्लोकौप्राह ॥ पक्वाशयादित्यादि । पुलाकोदकं गवेधुकोदकं, गवेधुकः तृणविशेषः जलगोधूम इति लोके, अन्ये तु पुलाकशब्देनाप्राप्तपाकं धान्यमाहः । आमाशयादिति । कलायोऽत्र त्रिपुटकः त्रिकसन्धिज इति वाहुग्रीवास्थित्रयसंघातोऽत्रत्रिकं तस्य सन्धौजात इति ॥ ५ ॥

अतऊर्द्ध्वं सर्व्वव्रणवेदनां वक्ष्यामः॥

तोदनभेदनताड़नच्छेदनायमनमन्थनविक्षेपणचुमुचुमायननिर्द्दहनावभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधशूलविश्लेषणविकिरणपूरणस्तम्भनस्वप्नावकुञ्चनाङ्कुशिका सम्भवन्ति। अनिमित्तविविधवेदनाप्रादुर्भावो वा मुहुर्मुहुर्यत्रागच्छन्ति वेदनाविशेषास्तं वातिकमिति विद्यात्॥ ओषचोषपरिदाहधूमायनानि यत्र गात्रमङ्गारावकीर्णमिव पच्यते यत्र चोष्माभिवृद्धिः क्षते क्षारावसिक्तवच्च वेदनाविशेषास्तं पैत्तिकमिति विद्यात्॥ पित्तवद्रक्तसमुत्थं जानीयात्॥ कण्डूर्गुरुत्वं सुप्तत्वमुपदेहोऽल्पवेदनत्वं स्तम्भःशैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात्॥ यत्र सर्व्वासां वेदनानां समुत्पत्तिस्तं सान्निपातिकमिति विद्यात्॥ ६॥

स्रावानन्तरं वातादिवेदना निर्दिशन्नाह॥ अत ऊर्द्ध्वं सर्व्वव्रणवेदना इति, तोदनं सूचिभिरिव भेदनं त्वग्विदारणं इव वेदनाविशेषः, ताड़नं दण्डादिभिराहन्यत इवेत्यर्थः, छेदनं द्विधा क्रियत इव शस्त्रादिभिः। आयामनं शङ्कुचिताङ्गदेशस्य दीर्घीकरणमिव, मन्थनं मन्थाकादिभिर्व्रणात्तमथ्यत इव, विक्षेपणं प्रेर्य्यत इव। चुमुचुमायनं सर्षपराजिकाकल्कलिप्त इव, निर्द्दहणं निःशेषं वह्निना दह्यतइव, अवभञ्जनं संचूर्ण्यत इव, स्फोटनं पाषाणादिभिरिव विदारनं नखादिभिः शीर्य्यत इव वा उत्पाटनं उर्द्ध्वमाकृष्यत इव, कम्पनं वेप्यत इव, विविधशूलविश्लेषणं नाना प्रकारार्त्तिशूलायित गात्रस्येव वेदना विशेषः, विकरणं व्रणाचयमानां नानास्थानेषु स्तम्भनं स्तब्धता, पूरणं भरणं, स्वपनं प्रसुप्तिः आकुञ्चनं कुटीकरणमिव। अङ्कुशिका खञ्जीविशेषः, अन्ये अङ्कुशनिपाताकर्षणमिवाङ्कुशिकान्याहुः। क्षते ओष चोष परिदाहेत्यादि ओष एकदेशिको दाहः चोष आचुषणं सम-

अतऊर्द्धं व्रणवर्णान् वक्ष्यामः॥ भस्मकपोतास्थिवर्णः परुषोऽरुणः कृष्ण इति मारुतजस्य। नीलः पीतो हरितः श्यावः कृष्णो रक्तः कपिलः पिङ्गल इति रक्तपित्तसमुत्थयोः। श्वेतः स्निग्धः पाण्डुरिति श्लेष्मजस्य। सर्ववर्णोपेतः सान्निपातिक इति॥ ७॥

भवति चात्र॥

न केवलं व्रणेषूक्तो वेदनावर्णसंग्रहः।
सर्वशोफविकारेषु व्रणवल्लक्षयेद्भिषक्॥ ८॥

त्वादित्येके पिपासेत्यन्ये। परिसमन्ततोदाहः परिदाहः धूमायनं धूमोद्गमनमिवाङ्गानां। कण्डुरुत्वमित्यादि सुगमं नखमक्षिकामशकादिदंशवेदनानभिज्ञत्वं उपदेहो लिप्तमिवेति॥ ६॥

यत्र सर्वासां वेदनानामुत्पत्तिस्तत्र वेदनाः प्रतिपाद्य व्रणवर्णान् निर्दिशन्नाह। अत ऊर्द्धमिति सामान्यव्रणनिर्दिष्टान् दोषदुष्टिस्राववेदनावर्णान् शोफविशेष्वपि विद्रध्यलजीग्रन्थ्यर्शादिषु निर्दिशन्नाह। न केवलं व्रणेषूक्त इत्यादि दोषदूष्यसंयोगराशेरन्यत्ववता मारुतजेऽपि व्रणे वर्णसद्भावः। शोफविकारेष्विति शोफारब्धविकारेषु विद्रध्यादिष्विति॥७॥८॥

इति सूत्रस्थाने निबन्धसंग्रहे द्वाविंशोऽध्यायः

समाप्तः।

त्रयोविंशतितमोऽध्यायः ॥

अथातो कृत्याकृत्यविधिमध्यायं व्याख्यास्यामः ।

तत्र वयस्थानां दृढ़ानां प्राणवतां सत्ववताञ्च सुचिकित्स्यास्त्रणा एकस्मिन् वा पुरुषे यत्रैतद्गुणचतुष्टयं तस्य सुखसाधनीयतमाः । तत्र वयस्थानां प्रत्यग्रधातुत्वादाशुव्रणा रोहन्ति । दृढ़ानां स्थिरवङ्गमांसत्वाच्छ्रमवच्चार्य्यमाणं सिरास्नाय्वादिविशेषान्न प्राप्नोति । प्राणवतां वेदनाभिघाताहारयन्त्रणादिभिर्न ग्लानिरुत्पद्यते । सत्ववतां दारुणैरपि क्रियाविशेषैर्न व्यथा भवति । तस्मादेतेषां सुखसाधनीयतमाः ॥ १ ॥

अथातः कृत्याकृत्यविधिमध्यायं व्याख्यास्यामः ।

तत्र कृत्याः साध्याः ते द्विविधाः सुखसाध्याः कृच्छ्रसाध्याश्च । अकृत्याः असाध्याः । तेऽपि द्विविधाः याप्याः प्रत्याख्येयाश्च । इति कृत्याकृत्यपदद्वयेन सर्वमुक्तं तत्र यथाव्रणस्याकृतिगन्धवर्णादिविशेषाः साध्यासाध्यविधौ भवन्ति तथातुरस्यापि केऽपि गुणा भवन्ति तान् दर्शयन्नाह । तत्र वयस्थानां दृढ़ानामित्यादि । वयस्थानां, तरुणानां दृढ़ा गूढ़सन्धिसिरास्नायवः एतेन संहतशरीरा अभिप्रेताः । प्राणवतां शक्तियुक्तानां सत्ववतां व्यसनेऽप्यनाकुलानां चकारादनुक्ता अपि आतुरोपक्रमणीयोक्ताः आतुरस्य गुणसम्पत् समुच्चयते । प्राणवतामित्यस्याग्रे आत्मवतामिति पञ्चमं गुणं केचित् पठन्ति । तत्रात्मवतां जितेन्द्रियाणामित्यर्थः तत्रैकगुणेन सुखसाधत्वं द्वाभ्यां त्रिभिश्च सुखसाध्यतरत्वं चतुर्भिःसुखसाध्यतमत्वञ्च एतदेव प्रकटयन्नाह । एकस्मिन् वा पुरुष इति । वाशब्द एकत्र सर्व्वगुणानां दुष्प्रापत्वख्यापनार्थः । तस्येति पुरुषस्येत्यर्थः सुखसाधनीयतमा व्रणा इति शेषः, तत्र तेषां गुणानां येन

तएव विपरीतगुणा वृद्धकृशाल्पप्राणभीरुषु द्रष्टव्याः ॥
स्फिक्पायुप्रजननललाटगण्डौष्ठकर्णफलकोषोदरजत्रुमुखा-
भ्यन्तरसंस्थाः सुखरोपणीया व्रणाः ॥ २ ॥

अक्षिदन्तनासापाङ्गश्रोत्रनाभिजठरसेवनीनितम्बपार्श्व-
कुक्षिवक्षःकक्षास्तनसन्धिभागगताः सफेनपूयरक्तानिलवा-

सुखसाध्यत्वं कृतं तन्निर्दिशयन्नाह। तत्र वयस्थानामिति। प्रत्यग्रं नूतनं। दृढ़ानां स्थिरेति। स्थिरं अचलं। प्राणवतां वेदनेति। ग्लानिरत्र शरीर-शैथिल्यं। अत्रापि आत्मवतामिति पञ्चमगुणस्य केचिदमुं पाठं पठन्ति सचाभावान्न लिखितः। सत्त्ववतामिति। दारुणैः दुःसहैः क्रियाविशेषै-श्चिकित्साप्रकारैः। तस्मादिति। एतेषां पुरुषाणामित्यर्थः। सुखसाध-नीयतमा व्रणा इति शेषः॥ १ ॥

पूर्वोक्तगुणानां विपर्य्ययमाह। तत्र विपरीतगुणा इति। एकगुणाभावात् कृच्छ्रसाध्यत्वं द्वित्रिगुणाभावात् कृच्छ्रतरसाध्यत्वं चतुर्गुणाभावात् कृच्छ्र-तमसाध्यत्वं। अत्र केचिदनात्मवत्सुचेति पञ्चमं विपरीतगुणं पठन्ति, तेषां मते चकारेण आतुरोपक्रमणीयोक्ता गुणसम्पूर्णता अनुक्ता अपि समुच्चीयन्ते आतुरविशेषेण कृत्याकृत्यान् प्रतिपाद्य तदवयवसम्भवेन व्रणानां कृत्यत्वं दर्शयन्नाह। स्फिक्प्रजननमिति। स्फिजौ कटिप्रोथौ पोंदाविति लोके पायुर्गुदं प्रजननं गुह्यप्रदेशः गण्डो गल्लो फलकोषः अण्डकोषः जत्रुः ग्रीवा-मूलं ॥ २ ॥

साध्यभेदान् कृच्छ्रसाध्यान् दर्शयन्नाह। अक्षिदन्तानामिति। अपाङ्गो भ्रूपुच्छान्तः। नितम्बः कटेः पश्चाद्भागः। वक्ष उरः, सन्धिभागः सन्धि-प्रदेशः। वाहिशब्दः सफेणपूयादिभिः सह प्रत्येकं सम्बध्यते, अन्तःशल्या ऽभ्यन्तरशल्या अधोभागाश्चोर्द्ध्वभागनिर्वाहिन इति अधोभागगता ये व्रणा यदा ऊर्द्ध्वमुखाभवन्ति तदोर्द्ध्वभागनिर्वाहिन उच्यन्ते। रोमान्तो-ष्वपीति रोमान्तःकेशान्तः चानखं नखसमीपं जङ्घास्थिपुरकजान्वन्त-

छिनोऽन्तःशल्याश्च दुश्चिकित्स्याः। अधोभागाश्चोर्द्धभागनिर्वाहिणो रोमान्तोपनखमर्म्मजङ्घास्थिसंश्रिताश्च। भगन्दरमपि चान्तर्मुखं सेवनीकुटकास्थिसंश्रितम्॥

भवति चात्र॥

कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनां।
व्रणाः कृच्छ्रेण सिद्ध्यन्ति येषां चापि व्रणे व्रणाः॥३॥

अवपाटिकानिरुद्धप्रकाशसन्निरुद्धगुदजठरग्रन्थिक्षतक्रिमयः प्रतिश्यायजाः कोष्ठजाश्च त्वगदोषिणां प्रमेहिनां वा ये परिक्षतेषु दृश्यन्ते शर्करासिकतामेहवातकुण्डलिकाष्ठीलादन्तशर्करोपकुशकण्ठशालूकनिष्कोषणदूषिताश्च दन्तवेष्टाविसर्पास्थिक्षयोरःक्षतव्रणग्रन्थिप्रभृतयश्च याप्याः॥ ४॥

रास्थि भगन्दरमपि चान्तर्मुखमिति गुदे अभ्यन्तरं मुखं यस्येत्यर्थः सेवणीमुकुटास्थिसंश्रितं भगन्दरमिति शेषः, कुटकास्थि श्रोणिकाण्डास्थि मयुरास्थीति लोके ब्रुते। अन्येतु उदकास्थिसंश्रितमिति पठन्ति। तेषां मते उपस्थो मूत्रमार्गः विषजुष्टानामिति दुषीविषजुष्टानां पुरुषाणां ये व्रणाः इत्यर्थः॥ ३॥

साध्यान् द्विविधानभिधायासाध्यभेदं याप्यं दर्शयन्नाह। अवपाटिकानिकेत्यादि। ग्रन्थिक्षतक्रिमय इति ग्रन्थ्युपलक्षितः क्षतोऽन्वये क्रमय इत्यर्थः, प्रतिश्यायजाः कोष्ठाजाश्च क्रमय इति सम्बन्धः त्वग्दोषिणां प्रमेहिनां वा ये परिक्षतेषु दृश्यन्ते इति त्वग्दोषप्रमेहरोगयोः क्षते सति ये क्रमयो दृश्यन्ते इत्यर्थः। शर्करेति अश्मरी वातभिन्नेत्यर्थः। सिकता मेहो मेहविशेषः। वात कुण्डलीकाष्ठीले मूत्राघातविशेषे निष्कोषण दूषिताश्च दन्तवेष्टा इति निष्कोषणं सविषदन्तरञ्जकानां दन्तशानं शानमिशि इति वङ्गभाषायामभिधीयते एतेनैतदुक्तं भवति दन्तान् रञ्जयन्ति ये पुरुषास्तेषां

साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावतां ॥
यापनीयं विजानीयात् क्रिया धारयते तु यं ।
क्रियायान्तु निवृत्तायां सद्य एव विनश्यति ॥
प्राप्ता क्रिया धारयति याप्यव्याधितमातुरं ।
प्रपतिष्यद्दिवागारं विष्कम्भः साधुयोजितः ॥ ५ ॥

अतऊर्द्धमसाध्यान् वक्ष्यामः ॥ मांसपिण्डवदुद्गताः प्रसेकिनोऽन्तः पूयवेदनावन्तोऽश्वापानवदुद्वृत्तौष्ठाः। केचित्कठिना गोश्टङ्गवदुन्नतमृदुमांसप्ररोहाः। अपरे दुष्टरुधिरास्राविणस्तनुपिच्छिलास्राविणो वा मध्योन्नताः। केचिदवसन्नशुषिरपर्य्यन्ताः। शणतूलवत् स्नायु जालवन्तोदुर्दर्शा

यद्दन्तनिपातनार्थं सविषदण्डकाष्ठं तेन यदा दूषिता दन्तवेष्टा इत्यर्थः। निश्वकूनमिश्रि इति वङ्गभाषा दूषिता इत्यन्ये पठन्ति निष्कर्षणदूषिता इत्यपरे तत्रापि सएवार्थः। अत्र अवपाटिका इत्यादौ पाठे ये व्रणाएव याप्याः ये च व्याधयस्तेषु व्याधिषु सत्सु येयेव्रणास्ते याप्या इत्यभिप्रायः ॥४॥

तत्र ते निर्द्दिष्टाः नियमेन साध्याः असाध्या एव याप्या एवेत्युक्तेषु नियमं क्रियया दर्शयन्नाह॥ साध्यायाप्यत्वमायान्तीति घ्नन्तिप्राणानसाध्यास्त्विति कालान्तरप्राणहारिणः सद्यःप्राणान्घ्नन्तीत्यर्थः, अक्रियावतां क्रियारहितानां विरुद्धक्रियाकारिणाञ्च। अथ कीदृशो याप्यस्तमाह॥ यापनीयं विजानीयादिति। यापनीयं प्राणधारणमेव क्रियां करोति न पुनर्व्याधिमूलच्छेदमिति दर्शयन्नाह॥ प्राप्ताक्रियाधारयतीति। प्राप्ता वैद्येनप्रयुक्ताः विष्कम्भः स्थूणा। ५॥

मांसपिण्डवत् उद्गत इत्यादि। प्रसेकिनः स्रावबहुलाः। अश्वापानवदड़वायोनिवत् उद्वृत्तौष्ठाः उत्सन्नवर्त्मानः केचिदवसन्न शुषिरपर्य्यन्ता इति

वसामेदोमज्जमस्तुलुङ्गस्राविणश्च दोषसमुत्थाः। पीतासित-मूत्रपुरीषवातवाहिनश्च कोष्ठस्थाः चीणमांसानाञ्च सर्व्वतोगतयश्चाणुमुखा मांसवुद्बुदवन्त सशब्दवातवाहिनश्चशिरः-कण्ठस्थाः। चीणमांसानाञ्च पूयरक्तनिर्वाहिणोऽरोचका-विपाककासश्वासोपद्रवयुक्ताः। भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं त्रिदोषलिङ्गप्रादुर्भावः कासश्वासौवा यस्येति॥ ६॥

भवन्ति चात्र॥

वसां मेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत्।
आगन्तुस्तु व्रणः सिद्ध्येन्नसिद्ध्येद्दोषसम्भवः॥

निम्नछिद्रावसाना इत्यर्थः। वसामांसनिर्य्यासः मस्तुलुङ्गोर्द्दविलीनघृता-कारो मस्तकमज्जा। दोषसमुत्था इति वातादिदोषजाः न पुनरभिघातजा तर्हि एवम्भूता अपि सिद्ध्यन्ति दोषजान् साध्यानभिधाय कोष्ठस्थान् दर्श-यितुमाह॥ पीतसितमूत्रेत्यादि। अतएव कोष्ठस्था एव उभयतो भाग-व्रणमुखेष्विति गुदवदनोभयमार्गाभ्यां व्रणमुखमार्गेण पूयादि वाहिनः सर्व्वव्रणवस्तुगताव्रणाः कीदृशा असाध्या इत्याह। शिरः कण्ठस्थाः कीदृशा असाध्य इत्याह। चीणमांसानां कीदृशा इत्याह। शिरःकपाले भिन्ने कीदृशा असाध्या इत्याह। भिन्ने वा शिरःकपालेति अपरिगृहीतानामपि व्रणानां अवस्थाविशेष प्राप्ता॥ ६॥

असाध्यत्व दर्शयन्नाह अमर्म्मोपहिते देशे न मर्म्मसमीपव्यवस्थिते देशे, शरीरावयवे त्वचीत्यर्थः। सिरासन्ध्यस्थिवर्ज्जिता इति अत्रादिशब्दो लुप्तो द्रष्टव्यः तेन सिरासन्ध्यस्थ्यादि वर्ज्जित इत्यर्थः, एतेन स्नायुधमनीवर्ज्जित इत्युक्तं अन्ये सिरादिपदेन स्थूलवर्ज्जित इत्याहुः विकारोयोऽनुपर्य्येतिवि-कारोऽत्र व्रणः अनुपर्य्येति सर्व्वतोधातून् व्याप्नोति चिकित्स्यमानोऽपि तस्-

अमर्मोपहिते देशे शिरास्नाय्वस्थिवर्जिते।
विकारो योऽनुपर्य्येति तदसाध्यस्य लक्षणं॥
क्रमेणोपचयं प्राप्य धातूननुगतः शनैः।
न शक्य उन्मूलयितुं वृद्धो वृक्ष इवामयः॥
स स्थिरत्वान्महत्त्वाच्च धात्वनुक्रमणेन च।
निहन्त्यौषधवीर्य्याणि मन्त्रान् दुष्टग्रहो यथा॥ ७॥
अतो यो विपरीतः स्यात्सुखसाध्यः स उच्यते।
अवद्धमूलः क्षुपको यद्वदुत्पाठने सुखः॥

साध्यस्य लक्षणं एतेन सुवैद्योपक्रमोऽपि सुप्रदेशजातोऽपि यदा सर्वधातुव्याप्तिर्दृश्यते तदा ज्ञायते कर्मजोऽयं व्याधिरिति अन्ये तु विकारशब्देन कुष्ठवातरक्तक्षयादीनपि कथयन्ति एवं साध्यस्य व्याधेः कस्यचिदुत्पत्तावेवासाध्यत्वं प्रतिपाद्य परस्यापि व्याधेः साध्यस्यापि उपेक्षया साध्यत्वं दर्शयन्नाह। कुतः पुनःकारणात् दृष्टफलैरौषधैः सव्याधिर्नोपशाम्यतीत्याह। सस्थिरत्वादिति। स इति उपेक्षितो व्याधिरित्यर्थः स्थिरत्वादिति स्थिरत्वमपथ्यकारिणो दोषबाहुल्यात् कश्चिदनुपेक्षितोऽपि उत्पत्तावेव व्याधिरौषधवीर्य्याणि हन्तीत्यत हेत्वन्तरमाह महत्वाच्चेति महत्वं चोदरादिव्याधिनिदानवलप्राक्तनकर्मपरिणामसम्प्राप्तिविशेषैर्द्रष्टव्यं चकारेण रोहिकावलयमुखरोगिणामौषधवीर्य्योपघाते स्वभावोऽपि हेतुरिति समुच्चीयते धात्वनुक्रमनेन चेति कुष्ठादिषु चैतद्द्रष्टव्यं। दुष्टग्रह इति स्कन्दापस्मारादिक इत्यर्थः॥ ७॥

एतन्निर्दिष्टार्थप्रकरणविपर्य्ययेणापि सुखसाध्यत्वं दर्शयन्नाह। अतो यो विपरीतः स्यादित्यादिमर्म्मशिरास्नायुसन्ध्यस्थिधमनीस्थितो यो नानुपर्य्येति स सुखसाध्य उच्यते किञ्चित् अतस्त्वाह अवद्धमूलेत्यादि क्षुपकोऽतिवान् वृक्षः, इदानीं व्रणस्य शुद्धिलक्षणमाह। त्रिभिर्दोषैरनाक्रान्त इति।

त्रिभिर्दोषैरनाक्रान्तः श्यावौष्ठः पिडकी समः।
अवेदनो निरास्रावो व्रणः शुद्ध इहोच्यते॥
कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः।
स्थिराश्चिपिटिकावन्तो रोहतीति तमादिशेत्॥
रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम्।
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्॥
दोषप्रकोपाद्व्यायामादभिघातादजीर्णतः।
हर्षात्क्रोधाद्भयाद्वापि व्रणो रूढोऽपि दीर्य्यते॥८॥

दोषशब्दोऽत्र दोषः कार्य्येषु व्रणाकृतिगन्धवर्णस्राववेदनासु वर्त्तते कार्य्यकारणोपचारात् घृतमायुरेवेति यथा तैर्दोषाकृतिगन्धादिभिरनाक्रान्ताः त्रिभिर्द्वन्द्वैरित्यन्ये पठन्ति ते तु द्वन्द्वशब्दामभिव्यक्तौ वर्णयन्ति तेन दोष एवाभिव्यक्तिराकृत्यादिवलाक्रान्त इति स एवार्थः। अन्ये तु शीतोष्णं मृदु कठिनं संवृतविवृतमिति द्वन्द्वत्रयं मन्यन्ते अपरे द्वन्द्वानि दोषास्ते चात्र वातादयस्तैर्वलाक्रान्त इति व्याख्यानयन्ति श्यावौष्ठ इति केचित् कृष्णः किञ्चित् पाण्डुः प्रसादाच्छोणितत्वात् अन्ये श्यावौष्ठतां कषायपरिषेकाभ्यङ्गादिकृतां वदन्ति। पीड़का यस्या सन्ति सापीड़की पिड़काव्रणौष्ठे मांसाङ्कुराः अपीड़कीत्यन्ये पठन्ति तत्र न विद्यन्ते पीड़का अस्येति समः समतल अवेदन इति न विद्यते वातादीनां तोदादिवेदना यस्य सोऽवेदनः सामान्य शुद्धव्रणवेदना तु विद्यत एवायं न संरूढ़े वक्ष्यति अशूलमरुजं व्रणमिति रोहद्व्रणमिति रोहद्व्रणलक्षणं निर्दिशन्नाह। कपोतवर्णप्रतिमा इति कपोतवर्णप्रतिमाः पाण्डुधुसराः स्थिराः कठिना इत्यर्थः चिपिटिकावन्त इति चर्म्मचेलीयुक्ताः विशुष्यमाणत्वात् त्वचश्चर्म्मचेलो सम्भवः रोहन्ति रोहं गच्छन्ति व्रणे शुष्का सूक्ष्मा श्वेता या उच्चटति त्वक् सा चर्म्मचेली कथ्यते अन्ये तु अपिटिकावन्त इति पठन्ति सम्यग्रूढ़ व्रणस्य लक्षणं दर्शय-

चतुर्विंशतितमोऽध्यायः ॥

अथातो व्याधिसमुद्देशीयमध्यायं व्याख्यास्यामः ।

द्विविधा व्याधयः शस्त्रसाध्याः स्नेहादिक्रियासाध्याश्च । तत्र शस्त्रसाध्येषु स्नेहादिक्रिया न प्रतिषिध्यते । स्नेहादिक्रियासाध्येषु शस्त्रकर्म न क्रियते । अस्मिन् पुनः शास्त्रे सर्वत-

त्राह । रूढ़वर्त्मानमग्रन्थिमिति । रूढ़वर्त्मानं रूढ़व्रणवर्त्मित्यर्थः अग्रन्थि-पदेनोपरिष्टात् शूनता निषिद्धा त्वक् सवर्णं त्वचा सवर्णमित्यर्थः समतलमिति सदृशकरतलेन जिह्वातलेन चवेत्यर्थः समतलशब्देनाधोऽनिम्नता निषिध्यत इति वदन्ति तेषां मते समतलोऽसमतल इति योज्यते केचिदत्राध्यायान्ते रूढ़व्रणव्यापदं पाठं पठन्ति दोषप्रकोपते । इत्ययञ्च श्लोकः सर्वेष्वपि निबन्धेष्वपरिगृहीत इत्यनार्षः तस्मान्न पठनीय इति ॥ ८ ॥

इति निबन्धसंग्रहे त्रयोविंशोऽध्यायः समाप्तः ।

अथातो व्याधिसमुद्देशीयमध्यायं व्याख्यास्यामः ।

व्याधिसमुद्देशीयमित्यादि व्याधिसमुद्देशीयः व्याधीनां संक्षेपोद्देशीय इत्यर्थः । शस्त्रसाध्यत्वेन स्नेहादिसाध्यत्वेन च द्वैविध्यं दर्शयन्नाह ॥

शस्त्रसाध्या इति छेद्यादिप्रकारेण स्नेहादिक्रियासाध्या इति । आदि-शब्देन स्वेदनवमनविरेचनादयः । तत्रेति तयोर्मध्ये शस्त्रसाध्येषु अष्ट-विध शस्त्रकर्मोक्तेषु भगन्दरग्रन्थिप्रभृतिषु । शल्यतन्त्रत्वादस्य तन्त्रस्य शस्त्र-क्रियैवोहति न स्नेहादिक्रियेत्याशङ्क्य उभयक्रियाधिकारं दर्शयन्नाह ।

न्नसामान्यात्सर्वेषां व्याधीनां यथा स्थूलमवरोधः क्रियते ।
प्रागभिहितं तद्दुःखसंयोगो व्याधिरिति तच्च दुःखं त्रिविध-
माध्यात्मिकमाधिभौतिकमाधिदैविकमिति तत्तु सप्तविधे व्या-
धावुपनिपतति । ते पुनः सप्तविधा व्याधयः । तद्यथा आ-
दिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ताः संघातबलप्र-
वृत्ताः कालबलप्रवृत्ताः दैवबलप्रवृत्ताः स्वभावबलप्रवृत्ता इति ।
तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृ-

अस्मिन्निति सौश्रुते शल्यतन्त्रे । पुनःशब्दोऽत्र एवार्थे । सर्वतन्त्रेति शालाक्यादीनां सामान्यात् तुल्यत्वात् । यथास्थूलमिति स्थूलदृष्ट्या न सूक्ष्मदृष्ट्येत्यर्थः । एतेन ये सनामका व्याधयस्तेषामवरोधः । निर्नामकानां पुनर्लक्षणाद्द्वारेणावरोधः । कः पुनरयं व्याधिरित्याह । प्रागभिहितमिति । तदिति तयोः शरीरशरीरिणोः शरीरमनसोरिति केचित् । तच्च दुःखं त्रिविधमिति चकारान्न केवलं त्रिविधं सप्तविधञ्च । आत्मशब्देन समनस्कं शरीरमुच्यते । तत्र वातपित्तकफोत्थाः शरीरभवाः आध्यात्मिकास्तथा-रजस्तमोभवाश्च । आत्मन्यधयात्मं तत्र भवमाध्यात्मिकं । भूतानि प्राणिनो भूतेषु अधिकृत्य यत्प्रवर्त्तते तदाधिभौतिकं । देवाः सुराः सुरयोनयश्च देवेष्वधिकृत्य यद्वर्त्तते तदाधिदैविकं । तदेवत्रिविधं दुःखं भेदान्तरहेतुभिर्बहुप्रकारभूतेव्याधौ सम्भवतीत्याह । तदिति त्रिविधं दुःखं उपनिपतति मध्ये निपतति । ते पुनरिति ते त्रिविधाव्याधयः पुनः सप्तविधा भवन्तीत्यर्थः । तेषां सप्तविधानां व्याधीनां क्रमेण नामाह । तत्र आदिबलप्रवृत्ता इत्यादि । तत्र तेषु मध्ये आदिबलप्रवृत्ता दुष्टशोणितबलजाताः । केते इत्याह ये शुक्रशोणितदोषान्वया इति शुक्रशोणितस्थित वातादिदोषजनितास्तानेव नामतो दर्शयति । कुष्ठार्शःप्रभृतय इति प्रभृति ग्रहणान्मेहक्षयादयः । मातृजा इति मातुः शोणितजाः पितृजाश्चेति पितुः शुक्रजाः । जन्मबलप्रवृत्ता इत्यादि । जन्मबल प्रवृत्ता इति शुक्रशोणित-

तय:। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातुरपचारात्पङ्गुजात्यन्धबधिरमूकमिन्मिनवामनप्रभृतयो जायन्ते तेऽपि द्विविधा रसकृता दौहृदापचारकृताश्च। दोषबलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्थाःपक्वाशयसमुत्थाश्च पुनश्च द्विविधा: शरीरा मानसाश्च त एत आध्यात्मिकाः॥१॥

सङ्घातबलप्रवृत्ता ये आगन्तवो दुर्बलस्य बलवद्विग्रहात्तेऽपि द्विविधाः शस्त्रकृता व्यालादिकृताश्च। एते आधिभौतिकाः। कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनि-

दुष्टिं विनापि मातुरपचारबलजाताः। अपचार इति दुष्टाहाराचारोऽपचारः। मूकाः अवाचः। मिन्मिनिकाःसानुनासिकाः। वामना अत्यन्तह्रस्वशरीराः। दौहृदापचारकृताश्चेति गर्भस्वभावात् मातुश्चतुर्थादिमासेष्विन्द्रियार्थप्रार्थना दौहृदमित्याचक्षते। तस्यापचारस्तु दौहृदापमानितं अपमानितमलब्धं गर्भस्याहितं वा। अतमूकमिन्मिनिकवामनप्रभृतयो जायन्ते। अस्याग्रे केचिदुक्त इत्यादिपाठं पठन्ति सच पूर्णो न दृश्यते निबन्धेषु इति न लिखितः। तृतीयं व्याधिभेदं निर्दिशन्नाह। दोषावातादयो रजस्तमश्च। बलंशक्तिः। प्रवृत्ताजाताः। आतङ्कारोगाः के पुनस्ते इत्याह प्रतिश्यायकासचयादयः। एते आध्यात्मिका इति एते आदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्तास्त्रय आध्यात्मिकाः। शरीरस्थवातादिरजःप्रभृतिदोषजनितत्वात्॥ १॥

चतुर्थं व्याधिभेदं निर्दिशन्नाह। संघातबलप्रवृत्ता इति प्रहारशक्तिजाताः। के पुनस्ते इत्याह ये आगन्तव इति। व्यालकृता इति व्याला दुष्टव्याघ्रादयः एते आधिभौतिका इति एते पूर्वोक्ता आगन्तवः। आधिभौतिकत्वं भूतेषु प्राणेषु अधिकृतत्वात्। पञ्चमं व्याधिं निर्दिशन्नाह

मित्तास्तेऽपि द्विविधा व्यापन्नर्त्तुकृता अव्यापन्नर्त्तुकृताश्च। दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वकृता उपसर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशाचादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ताः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयस्तेऽपि द्विविधाः कालकृता

कालबलप्रवृत्ता इत्यादि। कालः शीतोष्णवर्षलक्षणः षड्तुकः। के पुनस्ते इत्याह शीतोष्णवातवर्षातपप्रभृतिनिमित्ताः। ते पुनर्जाड्यदाहकम्पादयः, तथा व्रणज्वराश्चात्र व्यापान्नर्त्तुकृतानां पूर्वोक्तान्नपानौषधिभिरुपचारः यथास्वञ्च व्याधिविहितं भेषजं ऋतुव्यापन्नु प्रशमनञ्च, दैवव्यापाश्रयं होमादि अव्यापन्नर्त्तुकृतानां पुनर्यथादोषं यथा रोगमेव उपचारः। षष्ठव्याधिं निर्दिशन्नाह। दैवबलप्रवृत्ता इत्यादि। दैवबलप्रवृत्ता इति देवशक्तिजाता इत्यर्थः। के पुनस्ते इत्याह ये देवद्रोहादित्यादि। देवगोगुरुसिद्धानां द्रोहात्। अभिशस्तका इति ऋषीणामाक्रोशजाः। अथर्वणकृता इति अथर्ववेदप्रणिताभिचारिकमन्त्रैः कृता मारणात्मकाव्याधयः। उपसर्गजा इति उपसृज्यन्ते इत्युपसर्गाः पीड़ितजनसमीपोत्पन्ना ज्वरादयः। विद्युदशनिकृता इति लताकारा तिर्य्यक्पतन्ती वह्निरूपा विद्युन्मूलवदधःपतनशीलामारणात्मकोऽशनिः। संसर्गजा इति देवादिद्रोहकजनसम्पर्कजा इत्यर्थः। आकस्मिका इति विनैव संसर्गं प्राक्तनकर्म्मपीड़ितत्वेन जाता इत्यर्थः। उपसर्गजसंसर्गजयोरियं विशेषः उपसर्गजा ज्वरादिपीड़ितजनसम्पर्काद्भवन्ति। ये देवद्रोहाभिशस्तका इत्यत्र केचित् उपसर्गाभिः शापाभिचाराभिषङ्गजा इति पठन्ति स चाभावान्न लिखितः। सप्तमं व्याधिभेदं दर्शयन्नाह। स्वभावबलप्रवृत्ता इत्यादि स्वभावबलप्रवृत्ता इति प्रकृतिशक्तिजाता इत्यर्थः। के पुनस्ते इत्याह क्षुत्पिपासेत्यादिकालजा इति ये समये प्राप्ता भवन्ति। अकालजा असमये जाता इत्यर्थः। तत्र कालजाकालजयोर्हेतुभेदेन भेद इति दर्शयति। तत्र परिरक्षणकृत इत्यादिपरिरिच्चणं रक्षाप्रयत्नः

अकालकृताश्च तत्र परिरक्षणकृताः कालकृता अपरिरक्षण-कृता अकालकृता एते आधिदैविकाः॥ तत्र सर्वव्याध्यव-रोधः॥ २॥

सर्वेषाञ्च व्याधीनां वातपित्तश्लेष्माण एव मूलं तल्लि-ङ्गत्वाद्दृष्टफलत्वादागमाच्च तथाहि कृत्स्नं विकारजातं विश्वरूपेणावस्थितं सत्वरजस्तमांसि न व्यतिरिच्यन्ते। एव-

तस्मिन्नपि परिरक्षणे ये भवन्ति ते कालकृताः। अतएव कालकृतानां नोप-चारोऽस्ति याप्यतैवास्ति भोजनपानरसायनादिभिः। अत्यन्तप्रतिकारे च स्वभावव्याधिचिकित्सितोक्त रसायनाविधिना। परिरक्षणकृता इति अप-रिरक्षणोऽयत्नतः तस्मिन् ये भवन्ति ते अकालकृताः। तेषाञ्च यथादोषं प्रतिकारः। एते आधिदैविका इति एते क्षुत्पिपासादयो दैवमधिकृत्य भव-न्तीति आधिदैविकाः। केचित् एते आधिदैविका अमुं पाठं न पठन्ति। तेषां मते स्वभावबलप्रवृत्ताः क्षुत्पिपासादयः आध्यात्मिकमध्ये निपतन्ति। तत्र तेष्वेव सप्तसु व्याधिभेदेषु सर्वव्याध्युपरोधं दर्शयन्नाह। सर्वव्याध्युप-रोधमिति तत्रेति सप्तविधे व्याधौ उपरोधः संग्रहः॥ २॥

कथं पुनः सर्वव्याध्युपरोध इत्याह सर्वेषां च व्याधीनामित्यादि मूलमिति कारणमित्यर्थः। तल्लिङ्गत्वादिति वातादिलिङ्गत्वात् लिङ्गन्तु वातादीनां रौक्ष्याल्पस्नेहादयः तथा तोददाहकण्ड्वादीनां कार्य्याणि च दृष्टफलत्वादिति वातादेरुपशमनदर्शनात् आगमाच्च सविंशत्येकादशशतानां व्याधीनां का-र्य्यभूतानां वातपित्तश्लेष्माणो हि कारणम्। यथा कृत्स्नमित्यादि विकारजा-तमिति विकारसमूहः विकाराश्चात्र त्रयोविंशतिर्महदाद्याः। विश्वरूपेणाव-स्थितमिति जाग्रद्रूपेण व्याप्यस्थितमित्यर्थः। न व्यतिरिच्यन्त इति न पृथ-ग्भवतीत्यर्थः। एवमेव कृत्स्नविकारजातमिति रोगसमूहोऽव्यतिरिच्य इति अपरित्यज्य इत्यर्थः। एतेन तल्लिङ्गत्वादित्यादिना अनुमानप्रत्यक्षापगमोप-

मेव कृत्स्नं विकारजातं विश्वरूपेणावस्थितमव्यतिरिच्य वातपित्तश्लेष्माणो वर्त्तन्ते ॥ दोषधातुमलसंसर्गादायतनविशेषान्निमित्ततश्चैषां विकल्पा भवन्ति। दोषदूषितेष्वत्यर्थं धातुषु संज्ञा क्रियते रसजोऽयं शोणितजोऽयं मांसजोऽयं मेदोजोऽयमस्थिजोऽयं मज्जजोऽयं शुक्रजोऽयं व्याधिरिति ॥ ३ ॥

तत्रान्नाश्रद्धारोचकाविपाकाङ्गमर्दज्वरहृल्लासतृप्तिगौरवहृत्पाण्डुरोगमार्गोपरोधकार्श्यवैरस्याङ्गसादकालवलिपलितदर्शनप्रभृतयो रसदोषजा विकाराः ॥ ४ ॥

मानानि चत्वारि प्रमाणान्युक्तानि। ननु दोषत्रयात् कथमादिबलप्रवृत्तादयोऽनेकव्याधय इत्याह। दोषधातुमलसंसर्गादिति। संसर्गः संयोग तद्यथा वातादिदोषरसधातु मूत्रपुरीषमलसंसर्गादतीसारादयः। वातादिदोषरसधातुसंसर्गात् ज्वरादयोरसादिदूष्यमूत्रमलसंसर्गाद्विंशतिमेहाः। तथा वातादिदोषरक्तधातुविदुधिरक्तगुल्मादयः। आयतनविशेषादिति आयतनानि स्थानानि तेषां विशेषो भेद इत्यर्थः। तद्यथा सप्तस्वायतनेषु पञ्चषष्टिर्मुखरोगाः चक्षुरिन्द्रियायतनेषु सप्ततिः। निमित्ततश्चेति निमित्तानि वातादयः। तद्यथाप्रत्येकं वातादिज्वरास्त्रयः सान्निपातिक एकः। द्वन्द्वजास्त्रयः। आगन्तुश्चाष्टमः। अन्यदपि निमित्ततो व्याधीनां नानात्वं ज्ञेयं एषामिति व्याधीनां विकल्पोभेदेन नानात्वमित्यर्थः। दूष्यजन्मसंज्ञा लक्षणया भवन्तीति दर्शयन्नाह। दोषदूषितेष्वित्यर्थमित्यादि। दोषैरेव दूषितेषु धातूषु अत्यर्थं दोषजेषु विकारेषु रसजादिसंज्ञा यथा घृतदग्धस्तैलदग्धस्ताम्रदग्धो लोहदग्ध इत्यत्र घृतादिशब्देन घृतादिस्थो वह्निर्लक्ष्यते एवं रसादिव्याधिरित्यत्र रसादिस्थितवातादि दोषा लक्ष्यन्ते ॥३॥

चिकित्साविशेषविज्ञानार्थं सुखसाध्यत्वादिकर्मबोधार्थं प्रत्येकं रसादिधातुविकारान् दर्शयितुमाह। तत्रान्नश्रद्धारोचकेत्यादि। अन्नाश्रद्धा अन्नविद्वेषः। अङ्गमर्द इति वेदनाविशेषः स्फुटनिकेति लोके। हृल्लासः

कुष्ठविसर्पपिडकामशकनीलिकातिलकालकन्यच्छव्यङ्गेन्द्रलुप्तप्लीहविद्रधिगुल्मवातशोणितार्शोऽर्बुदाङ्गमर्दासृग्दररक्तपित्त प्रभृतयो रक्तदोषजा॥ ५॥

गुदमुखमेढ्रपाकाश्च॥ अधिमांसार्बुदार्शोऽधिजिह्वोपजिह्वोपकुशगलशुण्डिकालजीमांससंघातौष्ठप्रकोपगलगण्डमालाप्रभृतयो मांसदोषजाः॥ ६॥

ग्रन्थिवृद्धिगलगण्डार्बुदमेदोजौष्ठप्रकोपमधुमेहातिस्थौल्यातिस्वेदप्रभृतयो मेदोदोषजाः॥ ७॥

अध्यस्थ्यधिदन्तास्थितोदशूलकुनखप्रभृतयोऽस्थिदोषजाः॥ ८॥

तमोदर्शनमूर्च्छाभ्रमपर्वगौरवस्थुलमूलोरुजङ्घानेत्राभिष्यन्दप्रभृतयो मज्जदोषजाः॥ ९॥

क्लैव्याप्रहर्षशुक्राश्मरीशक्रमेहशुक्रदोषादयश्चतद्दोषजा॥

हृदयोत्क्लेदः प्रसक्तनिष्ठीवनं। अङ्गसाद इति अङ्गानामनुत्साहो। रसदोषजा इति दोषदूषितरसजाताः। रसजानभिधाय रक्तजानभिधातुमाह। अधिमांसार्बुदेति। रक्तजानुक्त्वा मांसजानाह। मांससंघात इति मांससंघातो नाम मुखरोगेषु मांसोच्छ्रायः सामान्य एवेत्यन्ये मांसजान् कथयित्वा मेदोजानाह। मेदोजानुक्त्वाऽस्थिजानाह। अध्यस्थ्यधिदन्तेत्यादि। अध्यस्थीनि अधिकास्थानीत्यर्थः। तोदशूलाभ्यां सह अस्थिशब्दः प्रत्येकं सम्बध्यते अस्थिदोषाणभिधाय मज्जजानाह। तमदर्शनेत्यादि। तमोदर्शनमन्धकारदर्शनं। मूर्च्छा चेतनाच्युतिः। भ्रमश्चक्रारूढस्येव पर्वस्थूलमूलारुजन्मेति स्थूलमूलानां अरुषां व्रणानां पर्वसुजन्मेत्यर्थः अन्येतु अत्र पर्वगौरवस्थूलमूलोरुजंघेति पठन्ति मज्जदोषानभिधाय शुक्रदोषान् दर्शयति॥ क्लैव्यप्रहर्षेत्ति। क्लैव्यमिति षण्डता इत्यर्थः। अप्रहर्ष इति

त्वग्दोषाः सङ्गोऽतिप्रवृत्तिर्वा मलायतनदोषाः ॥ इन्द्रियाणामप्रवृत्तिरयथाप्रवृत्तिर्वेन्द्रियायतनदोषाः ॥ १० ॥

इत्येवं समासउक्तो विस्तरनिमित्तानि चैषां प्रति रोगं वक्ष्यामः ॥

भवति चात्र ॥

कुपितानां हि दोषाणां शरीरे परिधावतां ।
यत्र सङ्गः खवैगुण्याद्व्याधिस्तत्रोपजायते ॥ ११ ॥

भूयोऽत्र जिज्ञास्यं किं वातादीनां ज्वरादीनाञ्च नित्यः

स्त्रीविषयेऽनभिलाषः शुक्रजानुक्ता मलायतनदोषनाह ॥ त्वग्दोषा इति ।
त्वग्दोषाः कुष्ठानि । कर्णनासाक्षि मुखायतनेषु अन्येषु च प्रजननाद्यपत्यपथेषु आवृत्तिःसाङ्गच्यते । मलायतनदोषानभिधाय इन्द्रियायतन दोषानाह ॥ इन्द्रियानामप्रवृत्तिरिति ॥४।५।६।७।८।९।१०॥

समासः संक्षेपः दोषधातुमलसंसर्गादि यत्प्रागुक्तं व्याधीनां कारणं तथा आयतनादि विशेषादि यद्द्वितीयं व्याधीनां कारणत्वमुक्तं एतद्द्वयमपि संक्षेपेणाभिधाय निमित्ततश्चेति यदुक्तं तृतीयं व्याधीनां कारणं तदभिधातुमाह । निमित्तानिचैषामिति । निमित्तानि वातादयः । तत्कारणानि बलवद्विग्रहादीनि मिथ्याप्रयुक्तानि स्नेहादीनिचये तद्यथा कामजयो क्रोधजयो मृत्पाण्डुरोग इत्यादि । अथातीसारे गुर्व्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैरित्यादि प्रतिरोगं निर्द्दिष्टानि प्रतिरोगं वक्ष्याम इतिरोगे वक्ष्यामः । वातादीनां शरीरे प्रसरस्थानसंश्रयस्य व्याधिनानात्व कारणस्य हेतुं दर्शयन्नाह ॥ कुपितानामिति । खवैगुण्यात् स्रोतोवैगुण्यादित्यर्थः ॥ ११ ॥

प्रतिपाद्य व्याधीनां दोषाणाञ्च कार्य्यकारणसम्बन्धं पुनरन्यथा जिज्ञास्यमाह । भूयोऽत्रजिज्ञास्यमिति । भूयःशब्दः पुनरर्थे । जिज्ञास्यं ज्ञातुमभिलषणीयं एतेनैतदुक्तं भवति प्राक्किलव्याधीनां वातादिमूलत्वं

संश्लेषः परिच्छेदो वेति यदि संश्लेषः स्यात्तर्हि नित्यातुराः सर्व्व एव प्राणिनः स्युः। अथाप्यन्यथा वातादीनां ज्वरादीनां चान्यत्र वर्त्तमानानामन्यत्र लिङ्गं न भवतीति कृत्वा यदुच्यते वातादयो ज्वरादीनां मूलानीति तन्न। अत्रोच्यते। दोषान् प्रत्याख्याय ज्वरादयो न भवन्ति। अथ च न नित्यः सम्बन्धो यथाहि विद्युद्वाताशनिवर्षाण्याकाशं प्रत्याख्याय न भवन्ति। सत्यप्याकाशे कदाचिन्नभवन्ति। अथ च निमि-

जिज्ञासितं अत्रान्यत्पुनरपि ज्ञातुमिष्टमित्यर्थः। अत्रैभूयो बहुतर-मिति व्याख्यानयन्ति केचिद्भूयोऽत्र जिज्ञास्यते इति पठन्ति। नित्य संश्लेष इति सर्व्वदा अपृथक्त्वं यथा सूर्य्यातपयोश्चन्द्रज्योत्स्नयोः पावकोष्णत्वयो-रिति। परिच्छेदो विश्लेषः पृथक्त्व यथा पटकुविन्दकयोर्घटकुम्भका-रयोः कुण्डलसुवर्णकारयोरित्यादि। अथाप्यन्यथेति कोऽर्थः अनित्य-संश्लेषः सर्व्वपक्षमाशङ्क्य समाधानमाह अत्रोच्यते इत्यादि प्रत्याख्यायेति परित्यज्येत्यर्थः। ननु यदि दोषान् परित्यज्य ज्वरादयो भवन्ति इत्यत्र पुस्तकान्तारेणेति इति पाठः तर्हि सम्बन्धोऽस्तीत्याशङ्का निराकरणायाह। अथच न नित्यः सम्बन्ध इति नित्यः सर्व्वदा इति स कथं न सर्व्वदा सम्बन्ध इति दृष्टान्तमाह विद्युद्वातेत्यादि। आकाशशब्देन आकाशस्थो मेघ उच्यते। सत्यप्याकाशे इति विद्यमानेऽपि जलद इत्यर्थः। निमित्तत इति साम-ग्रीत इत्यर्थः। तत एवेति तस्याः सामग्र्या इत्यर्थः। अपरदृष्टान्तमाह तरङ्ग-बुद्बुदादय इति तरङ्गो जलहरिः। शाश्वतिक इति नित्य इत्यर्थः। विस्तरं निमित्तानि चैषां प्रतिरोगं वक्ष्याम इति यदुक्तं प्राक् तत्प्रतिपादयन्नाह॥ विकारपरिमाणमिति। विकारपरिमाणञ्चेति इयं समुदाय सङ्ज्ञा तथाच व्याधीनान्तु सहस्रं यच्छतं विंशतिरेव चेत्युत्तरे तन्त्रे वक्ष्यते। संख्या चैषां पृथक् पृथगितिद्वयमवयवसंख्या तथाच षड्शांसि षतस्रोऽश्मर्य्य अष्टा-दश कुष्ठानीति निदानं स्थाने वक्ष्यते सर्व्वाबाधश्च वक्ष्यत इति ज्वरातीसार

ततस्तत एवोत्पत्तिरिति　तरङ्गबुद्बुदादयश्चोदकविशेषा एव। वातादीनां ज्वरादीनाञ्च नाप्येवं संश्लेषो न परिच्छेद: शाश्वतिक:। अथ च निमित्तत एवोत्पत्तिरिति ॥

भवति चात्र ॥

विकारपरिमाणञ्च सङ्ख्या चैषां पृथक् पृथक्।
विस्तरेणोत्तरे तन्त्रे सर्वाबाधाश्च वक्ष्यते ॥ १२ ॥

पञ्चविंशोऽध्याय।

अथातोऽष्टविधशस्त्रकर्म्मीयमध्यायं व्याख्यास्याम:।

छेद्या भगन्दरा ग्रन्थि: श्लैष्मिकस्तिलकालक:।
व्रणवर्त्मार्बुदान्यर्शश्चर्मकीलोऽस्थिमांसगं ॥

शोषादय:। चकारोऽत्र भिन्नक्रमे। तेन विकारपरिमाणं च सर्वाबाधाश्चोत्तरे तन्त्रे वक्ष्यत इति सम्बध्यते। न पुनरुत्तरे संख्याचैषां पृथक् पृथगित्यत्र सम्बध्यते। अन्ये तु व्याख्यानयन्ति विकारा ज्वरादीनामुपद्रवरूपतया छर्द्दिप्रभृतय:। तत्परिमाणमधिकमध्यहीनभेदेन विकारपरिमाणं। अष्टौज्वरा: षड़तीसारादित्यादि संख्या च पृथक् पृथक् सर्वाबाधाश्च शारीरमानसा इति सर्वमेतदुत्तरे वक्ष्यते। व्याख्यास्यति आचार्य्य इति ॥१२

इति सूत्रस्थाने निबन्धसंग्रहे चतुर्विंशति-
तमोऽध्याय: समाप्त: ॥

तत्र पूर्वं छेद्यकर्म्मण एव दर्शितत्वात् तद्विषयमेवदर्शयन्नाह। छेद्याभगन्दरा इत्यादि। ग्रन्थि: श्लैष्मिक इति। आमोमत्तु पक्व:। तिलकालक इति क्षुद्र-

शल्यं जतुमणिर्मांससंघातो गलशुण्डिका।
स्नायुमांससिराकोथो वल्मीकं शतपोनक:॥
अध्रुषश्चोपदंशाश्च मांसकन्दाधिमांसक:॥ १॥
भेद्या विद्रधयोऽन्यत्र सर्वजाद्ग्रन्थयस्त्रय:॥
आदितो ये विसर्पाश्च वृद्धय: सविदारिका:।
प्रमेहपिडकाशोफस्तनरोगाववमन्थका:।
कुम्भीकानुशयीनाड्यो वृन्दौ पुष्करिकालजी॥
प्रायश: क्षुद्ररोगाश्च पुप्पुटौ तालुदन्तजौ॥
तुण्डिकेरी गिलायुश्च पूर्व्वं ये च प्रपाकिण:।
वस्तिस्तथाश्मरीहेतोर्मेदोजा ये च केचन॥ २॥

रोगपरिपठितं न तु शूकदोषोक्त:। तस्यासाध्यत्वात् व्रणवर्त्मेति शूकदोष: पठित: क्लिन्नो व्रणोष्ठ: अर्बुदानि सर्वाणि। अग्रश्चर्मकील इति गुदपार्श्व-वर्त्तिमांसाङ्कुर:। स्नायुादिभि: सह कोथशब्द: प्रत्येकं सम्बध्यते। कोथ: पूतिभाव:। शतपोनक इति शूकदोषपठित:। अन्ये तु भगन्दरग्रहणेना-भ्युपन्नस्य शतपोनस्य पुनरुपादानं मन्यन्ते छेदनार्थमप्यस्यप्रतीकार-त्वात्॥ १॥

भेद्यविषयं दर्शयन्नाह। भेद्याविद्रध्यादय:। ग्रन्थयस्त्रय इति वात-पित्तकफजा:। आदितो ये विसर्पाश्चेति वातपित्तश्लेष्मजा:, विदारिका-क्षुद्ररोगेषु, अवमन्थक इति शूकदोषेषु, वृन्दाविति एकवृन्दोवृन्दश्च कण्ठगत रोगेषु पुष्करिका शूकदोषेषु; पुप्पटौ तालुदन्तजाविति तालुपुप्पुटो दन्त-पुप्पुटश्च। पूर्वं ये च प्रपाकिण इति भगन्दरा। वस्तिस्तथाश्मरीहेतु-रिति अश्मरीनिमित्तमेव वस्तिर्भेद्योनान्यहेतो:। अभेदेषु मरणात् भेदे च संशयात्॥ २॥

लेख्याश्चतस्रो रोहिण्यः किलासमुपजिह्विका ॥
अर्शांसि मण्डलं मांसकन्दी मांसोन्नतिस्तथा ।
वेध्याः सिरा बहुविधा मूत्रवृद्धिर्दकोदरं ॥
एष्या नाड्यः सशल्याश्च व्रणा उन्मार्गिणश्च ये ॥ ३ ॥
आहार्य्याः शर्करास्तिस्रो दन्तकर्णमलाश्मरी ॥
शल्यानि मूढगर्भाश्च वर्चश्च निचितं गुदे ।
स्राव्या विद्रधयः पञ्च भवेयुः सर्वजादृते ॥
कुष्ठानि वायुः सरुजः शोफो यश्चैकदेशजः ।
पाल्यामयाः श्लीपदानि विषजुष्टञ्च शोणितम् ॥
अर्बुदानि विसर्पाश्च ग्रन्थयश्चादितस्तु ये ।
त्रयस्त्रयश्चोपदंशाः स्तनरोगा विदारिका ॥
शौषिरो गलशालूकं कण्टकाः क्रिमिदन्तकः ।
दन्तवेष्टः सोपकुशः शीतादो दन्तपुप्पटः ॥
पित्तासृक्कफजाश्चोष्ठ्याः क्षुद्ररोगाश्च भूयशः ॥ ४ ॥
सीव्यामेदःसमुत्थाश्च भिन्नाः सुलिखिता गदाः ।
सद्योव्रणाश्च ये चैव चलसन्ध्यपाश्रयाः ।

लेख्यविषयं दर्शयन्नाह । लेख्याश्चतस्र इत्यादि । चतस्रो रोहिण्य इति वातपित्तश्लेष्मसन्निपातोत्थाः रक्तजाः पुनरेकान्तासाध्यत्वादिह नोक्ताः वर्त्म इति व्रणवर्त्मनेत्रवर्त्म चेत्यर्थः । मण्डलं कण्डु कुष्ठादीनां मांसकन्दी स्वल्पमांसाङ्कुरः । वेध्यविषयं दर्शयन्नाह । वेध्याश्शिराबहुविधा इति । एष्यविषयं दर्शयन्नाह । एष्यानाड्य इति लोहादिशलाकया अन्तरन्वेषणीया इत्यर्थः अल्पाक्षिलज्ञापनार्थम् ॥ ३ ॥

आहार्य्या इति आकर्षणीयाः शर्करास्तिस्र इति मूत्रशर्करा पदशर्करा चेति विस्राव्यविषयं दर्शयन्नाह । स्राव्या इति ॥ ४ ॥

न क्षाराग्निविषैर्जुष्टा नवा मारुतवाहिनः॥
नाम्लतोऽहिनयस्याश्च तेषु सम्यग्विशोधनं॥
पांशुरोमनखादीनि चलमस्थि भवेच्च यत्।
अहृतानि यतोऽमूनि पाचयेयुर्भृशं व्रणं॥
रुजश्च विविधाः कुर्युस्तस्मादेतान्विशोधयेत्।
ततो व्रणं समुन्नम्य स्थापयित्वा यथास्थितं॥
सीव्येत् सूक्ष्मेण सूत्रेण वल्केनाश्मन्तकस्य वा।
शणजक्षौमसूत्राभ्यां स्नायुवालेन वा पुनः॥
मूर्वागुडूचीतानैर्वा सीव्यद्वेल्लितकं शनैः।
गोफणिकां वापि सीव्येद्वा तुन्नसेवनीं॥
ऋजुग्रन्थिमथो वापि यथायोगमथापि वा।
देशेऽल्पमांसे सन्धौ च सूची वृत्ताङ्गुलद्वयं॥
आयता त्र्यङ्गुला त्र्यस्रा मांसले वापि पूजिता।
धनुर्वक्रा हिता मर्मफलकोशोदरोपरि॥

आचार्य्यो सीव्यविषयं दर्शयन्नाह। सीव्यमेदः समुत्था इति ये केवलमेदो भवा विकारा भिन्ना इति विद्दोर्णा इत्यर्थः सुलिखिता गदा इति निरवशेषलिखिता इत्यर्थः व्यापाश्रिता इति विशेषेणानाश्रिता इत्यर्थः साध्या इति केचित् पठन्ति अथ केन सीव्या इत्याह न क्षार इति, किं कर्त्तव्यमित्याह तेष्विति कानिविशोधयेदित्याह पांश्विति अन्ये तृणादिनीति पठन्ति। कस्माद्दते विशोध्यन्ते इत्यत आह। अहृतानीति तत्र सन्तमानां छेद्यादिकर्मणामवचारणस्यान्यत्रदर्शितत्वात् सीव्य पुनरत्रैव विस्तरेण निर्दिशन्नाह। ततो व्रणमिति समुन्नम्य उन्नतं कृत्वा अश्मन्तकः अश्मलोटकसदृशो वृक्षः क्षौममिति क्षुमा अतसी तस्या

इत्येतास्त्रिविधाः सूचीस्तीक्ष्णाग्राः सुसमाहिताः।
कारयेन्मालतीपुष्पवृन्ताग्रपरिमण्डलाः॥
नातिदूरे निकृष्टे वा सूचीं कर्मणि पातयेत्।
दूराद्रुजो व्रणौष्ठस्य सन्निकृष्टेऽवलुञ्चनं॥ ५॥
अथ क्षौमपिचुच्छन्नं सुस्यूतं प्रतिसारयेत्।
प्रियङ्ग्वञ्जनयष्ट्याह्वरोध्रचूर्णैः समन्ततः॥
सल्लकीफलचूर्णैर्वा क्षौमध्यामेन वा पुनः।
ततो व्रणं यथायोगं बद्ध्वाचारिकमादिशेत्॥

इदं क्षौमं स्नायुरिति अशाकारं उपधातुविशेषः येन धनूंषि नह्यन्ते मूर्वाचीरस्नायुः यया पूर्वदेशे गुणान् कुर्वन्ति धनुषाम् अन्येकोविदार-सदृशायुग्मपत्रलता विशेषमश्मन्तकमाचक्षते ताभिरिति तन्तुभिरित्यर्थः। वेल्लितकस्य गोः फणिकामिति शोफणाकारां तुन्नसेवनीमिति यथा वस्त्रं तन्तुवायकाः सन्दधति तद्वत्तन्नसेवनीं सीव्येत् ऋजुग्रन्थिमिति ऋजुग्रन्थिः बन्धसदृशो यस्यां सेवन्यां सा, ऋजुग्रन्थिभिः तास्व इति त्रिविधा इत्यर्थः। फलकोषः अण्डकोषः सुसमाहिता इति सुदृढा इत्यर्थः। परिमण्डला इति वर्त्तुला इत्यर्थः। सन्निकृष्टे निकटे इत्यर्थः। अवलुञ्चनमिति पुटनमित्यर्थः॥ ५॥

सीवनस्य पश्चात् कर्मदर्शयन्नाह। अथ क्षौमेति, क्षौमेन अतसीवस्त्रेण पिचुना कार्पासतूलेन आभ्यां द्वाभ्यां छन्नमित्यर्थः। संस्यूतमिति, सम्यक् सीवितमिति लोके, प्रतिसारयेदवचूर्णयेदित्यर्थः अवचूर्ण-नद्रव्याणि प्रियङ्ग्वञ्जनमित्यादि अञ्जनं सौवीराञ्जनं समन्तत इति सर्व्वतेत्यर्थः क्षौमध्यामेनेति अतसीभव वस्त्रभस्मना आचारिकमादि-शेदिति व्रणितोपासनीयोक्तमाचारं कथयेदित्यर्थः केचिदिहावन्धादीनि-गयेनैव पठन्ति यावदाचरिकमादिशेत्। संक्षेपोक्तिरियं विस्तरोऽस्य वक्ष्यत इति दर्शयन्नाह। एतदिति अष्टग्रहणं पुनर्यदिह्कृतं तच्चरकोक्त-

एतदष्टविधं कर्म समासेन प्रकीर्त्तितम् ।
चिकित्सितेषु कार्त्स्न्येन विस्तरस्तस्य वक्ष्यते ॥
हीनातिरिक्तं तिर्य्यक् च गात्रच्छेदनमात्मनः ।
एतास्तत्रोऽष्टविधे कर्म्मणि व्यापदः स्मृताः ॥

अज्ञानलोभाहितवाक्ययोगभयप्रमोहैरपरैश्च भावैः । यदा प्रयुञ्जीतभिषक्कुशस्त्रं तदा सशेषान् कुरुते विकारान् ॥ तं चारशस्त्राग्निभिरौषधैश्च भूयोऽभियुञ्जानमयुक्तियुक्तम् । जिजीविषुर्दूरतएव वैद्यं विवर्ज्जयेदुग्रविषाग्नितुल्यम् ॥ ७ ॥

तदेव युक्तन्त्वतिमर्मसन्धीन् हिंस्यात्सिरास्नायुमथास्थि-

षट्संख्यानिराकरणार्थं तत्राष्टानामपि कर्मणां व्यापदं दर्शयन्नाह । हीनातिरिक्तमिति । गात्रच्छेदनमात्मन इति कुर्वतः स्वशरीरे छेदनमित्यर्थः । चतस्रोव्यापद इति अन्ये तु एताश्चितिस्र इति पठन्ति । स तु प्रमादपाठः ॥ ६ ॥

व्यापदो हेतून् दर्शयन्नाह । अज्ञानेति, अहितवाक्ययोगः अनृतवचनप्रयोगः, प्रमोहो वैचित्यम्, अपरैश्चभावैरिति प्रयोजनव्यग्रत्वादिभिरित्यर्थः । कुशस्त्रमिति ईषच्छस्त्रं स शेषानिति स इति वैद्यः शेषान् परानित्यर्थः । प्रागुक्ताज्ञानादिदोषदूषितं वैद्यं प्रति आतुरः किं कुर्य्यादित्याह, तदिति शस्त्रचाराग्निरिति तथाविधं भिषक् कुश्चरम् अयुक्तियुक्तं यथा भवतीत्यर्थं जिजीविषुर्जीवितुमिच्छुः दूरत एव वैद्यं विवर्जयेदिति तस्मै दर्शनमपि न दद्यात् हीनव्यापदमभिधाय अतिरिक्तशस्त्रव्यापदं दर्शयन्नाह । तदेवेति तदेव शस्त्रं युक्तन्तु पुनरर्थे हन्तीत्यति शयेन प्राणैर्वियुञ्ज्यादिति प्राणैः सहवियोगं कारयेदित्यर्थः ॥ ७ ॥

मर्मसन्धिशिरास्नायुस्थिपञ्चानां छेदनात् पञ्चप्रकारमतिरिक्तशस्त्रव्यापदं

चैव। मूर्च्छयन्ति पुरुषं क्षणेन प्राणैर्वियुज्यादथवा कथञ्चित्॥ भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं संलपनोष्णता च। स्रस्ताङ्गता मूर्च्छनमूर्द्धवातस्तीव्रारुजो वातकृताश्च तास्ताः॥ मांसोदकाभं रुधिरञ्च गच्छेत्सर्वेन्द्रियार्थोपरमस्तथैवदशार्द्धसङ्ख्येष्वपि हि क्षतेषु सामान्यतो मर्मसु लिङ्गमुक्तम्॥ ८॥

सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेद्द्दैक्षततश्च वायुः। करोति रोगान् विविधान् यथोक्तान् छिन्नासु भिन्नास्वथवा

दर्शयित्वा इदानीं तेष्वेव मर्मादिषु विद्धेषु यानि लिङ्गानि भवन्ति तानि सामान्येन दर्शयन्नाह। भ्रमेति भ्रमश्चक्रारूढ़स्येव प्रलापोऽसम्बद्ध भाषणं पतनम् अनूर्द्ध्वस्थितिः प्रमोहो नैवात्यन्तचित्तनाशः विचेष्टनं विगतपरिकायस्पन्दनं स्वपनं स्वप्नं, वा सुषुप्तावस्थस्येव चित्तस्या कर्मण्यता उष्णता शरीरस्य परितापः स्रस्ताङ्गता शरीरशैथिल्यं मूर्च्छनं चेतनाच्युतिः ऊर्द्ध्ववात इति श्वासोऽत्राभिप्रेतः न रोगविशेषः मांसोदकाभं मांसधावनजलसदृशः उपरतिः निवृत्तिः दशार्द्धसंख्येषु तदेव युक्तम्। क्षतेत्यादि, श्लोकोक्तेषु मर्म सन्धि शिरास्नायुस्थिषुपञ्चसुक्षतेषु विद्धेषु, ॥ ८॥

अमर्म्म विद्ध शिरादिलिङ्गं दर्शयन्नाह। सुरेन्द्रेति सुरेन्द्रगोप प्रतिममिति इन्द्र गोप कीट सन्निभमित्यर्थः। यथोक्तानिति शोणितवर्णनीयोक्त शिरो रोगाधि मन्यादीन् कौरज शरीर मित्यादि कौरज मिति अन्तर्बहिरायामजं द्विधा, अवयवावसाद इति अवयवस्य स्वकर्म्मण्यसामर्थ्यक्रिया स्वशक्तिरिति सामान्येन सर्वशरीरस्य क्रिया अत्रोत्क्षेपणावक्षेपणप्रसारणाकुञ्चनलक्षणास्तुमुलागहनाः अन्ये तु वातपित्तश्लेषजनिता एककव्याकुलीभूतवेदना तुमुला उच्यन्ते इति वदन्ति व्यवस्थेज्ज्ञानीयादित्यर्थः। शोफातिवृद्धिस्त्विति पर्वस्थितिसन्धिषु भेदः स्फुटनमिव,

सिरासु ॥ कौब्‌ज्य' शरीरावयवावसादः । क्रियास्वशक्तिस्तु-
मुलारुजश्च । चिराद्व्रणो रोहति यस्य चापि त' स्नायुविद्ध'
मनुजं व्यवस्येत् ॥ शोफातिवृद्धिस्तुमुला रुजश्च बलक्षयः
पर्वसु भेदशोफौ । क्षते सन्धिष्वचलाचलेषु स्यात्सन्धिक-
र्मापरतिश्च लिङ्गम् ॥ घोरा रुजो यस्य निशादिनेषु सर्वा-
स्ववस्थासु न शान्तिरस्ति । तृष्णाङ्गशादौश्वयथुश्च रुक्‌च
तमस्थिविद्ध' मनुज' व्यवस्येत् ॥ यथास्वमेतानि विभावये-
च्च लिङ्गानि मर्मस्वभिताडितेषु । स्पर्शन्न जानाति विपाण्डु-
वर्णो यो मांसमर्मण्यभिताडितः स्यात् ॥ ८ ॥

शोफः प्रसिद्धः चलेति शाखा हनुकटिग्रीवासु चलाः सन्धयः । घोरारुजो
यस्येति । शिरादीनां मर्मरहितानां विद्धलक्षणमभिधाय शिरादिमर्मविद्ध-
लक्षणमतिदेशेन दर्शयन्नाह । यथा स्वमेतानीति चकारोऽयं भिन्नक्रमेण ।
एतानि चेत्यत्र द्रष्टव्यः तेन न केवलं भ्रमप्रलापादीनि पूर्वोक्तानि
चमर्मविद्धशिरादिलिङ्गान्यपि यथास्व' बोद्धव्यानित्यर्थः । अनुक्तस्य मांसस्य
मर्मविद्धलक्षण' दर्शयन्नाह । स्पर्शनजानातीति शिरादिमांसमपि कुतो
न निर्दिष्टमिति केचित् केवलं मांसविद्धस्याव्यापकत्वात् केचिदाचार्या भ्रम-
प्रलापादीनि लिङ्गानि सद्यः प्राणहरादीनां मर्मणां मन्यन्ते अतएव तेषां
मते दर्शितसंख्येष्वित्यत्र सद्यः प्राणहरवैकल्यकररुजाकराख्येषु पञ्चसु मर्म-
स्विति व्याख्यानं तथा तेषां मते यानि शिरादीनि सुरेन्द्रगोपप्रतिममि-
त्यादिलक्षणान्युक्तानि तान्यपि शिरादिमर्मविद्धेषु ज्ञातव्यानि न पुनर्मर्म-
रहितशिरादिविद्धेषु अतएव तेषां मते यथा स्वमेतानि विभावयेच्चेत्यत्र
चकारार्थं कथयन्ति किन्तु सुरेन्द्रगोपप्रतिममित्याद्युक्तलक्षणेष्वन्तर्भावयन्ति
यथा स्वमित्यादिपाठ' ॥ ८ ॥

आत्मानमेवाथ जघन्यकारी शस्त्रेण यो हन्ति हि कर्म्मकुर्वन्
तमात्मवानात्महनं कुवैद्यं विवर्ज्जयेदायुरभीप्समानः॥
तिर्य्यक्प्रणिहिते शस्त्रे दोषाः पूर्व्वमुदाहृताः।
तस्मात्परिचरन् दोषान् कुर्य्याच्छस्त्रनिपातनम्॥
मातरं पितरं पुत्रान् बान्धवानपि चातुरः।
अप्येतानभिशङ्केत वैद्ये विश्वासमेति च॥
विसृजत्यात्मनात्मानं न चैनं परिशङ्कते।
तस्मात्पुत्रवदेवैनं पालयेदातुरं भिषक्॥
कर्म्मणा कश्चिदेकेन द्वाभ्यां कश्चित्त्रिभिस्तथा।
विकारः साध्यते कश्चिच्चतुर्भिरपि कर्म्मभिः॥
धर्म्मार्थौ कीर्त्तिमत्यर्थं सतां ग्रहणमुत्तमम्।
प्राप्नुयात्स्वर्गवासञ्च हितमारभ्य कर्म्मणा॥ १०॥

अतिरिक्तशस्त्रव्यापदमभिधाय वैद्यस्यैवात्मगात्रच्छेदनव्यापदं दर्शयन्नाह। आत्मानमेवेति स्वाङ्गमेवेत्यर्थः। शस्त्रग्रहणधारणाचरणानभिज्ञत्वाद्धिनस्तीत्यर्थः। जघन्यकारी अतिहीनकर्म्मकारी तथाविधं कुवैद्यं आत्मवान् बुद्धिमान् आतुर इति शेषः आत्महनमात्मच्छेदिनं आत्मतुदमिति केचित् पठन्ति आयुर्जीवितं तिर्य्यक्शस्त्रप्रणिधाने कर्म्मव्यापदं दर्शयन्नाह। तिर्य्यगप्रणिहिते इत्यादि। अग्रोपहरणीयाध्याये शिरास्नायुच्छेदनमित्यादयो दोषाः, दोषपरिहारं दर्शयन्नाह तस्मादिति इदानीं वैद्यं प्रत्यातुरेण किं कर्त्तव्यमित्याह। मातरमिति तत्र श्लोके प्रथमोऽपि शब्दसमुच्चये द्वितीयस्तु सम्भावनायां विसृजति ददाति आत्मना स्वयमेव आत्मानं शरीरं एतं वैद्यं वैद्ये न एवम्विधे आतुरे विश्वस्ते यत् कर्त्तव्यं तदाह तस्मात्पुत्रवदिति एनमातुरं पुत्रवत् पालयेदित्यर्थः सम्यक्पालने महदेव फलं भवतीति दर्शयन्नाह। धर्म्मार्थाविति सतां ग्रहणमुत्तममिति। शिष्टानां मध्ये

षड्विंशतितमोऽध्यायः।

अथातो प्रणष्टशल्यविज्ञानीयमध्यायं व्याख्यास्यामः।

शल स्खल आशुगमने धातुस्तस्य शल्यमिति रूपम्। तद्द्विविधं शारीरमागन्तुकञ्च॥ सर्वशरीराबाधकरं शल्यं तदिहोपदिश्यत इत्यतः शल्यशास्त्रं तत्र शरीरं रोमनखादि धातवोऽन्नमला दोषाश्च दुष्टाः। आगन्त्वपि शारीरशल्य-

ग्रहणमपादानमुत्तमं भवतीत्यर्थः। साध्योऽपि व्याधिरनेककर्मसाध्यो भवति दर्शयन्नाह। कर्सनातिकेद्यादिकेनस्नेहादिकेन वा, अपिशब्दात् पञ्चादिभिरपि केचित् धर्मार्थावित्यादिश्लोकमध्यायान्ते पठन्ति॥ १०॥

इति सूत्रस्थाने निबन्धसंग्रहे पञ्चविंशतितमोऽध्यायः।

अथातः प्रणष्टशल्येत्यादि। तत्र शल्यस्य स्वकीयलक्षणबोधार्थं निरुक्तिं दर्शयन्नाह। शलस्खल आशुगमन इति शलस्खल आशुगतौ धातू अनयोराशुगमनादित्यर्थः तयोराद्यस्य शलधातोः शल्यमिति रूपं निरुच्यत इत्यर्थः। शलहिंसायां धातुस्तस्य शल्यमितिरूपमिति केचित् पठन्ति अपरे शल्यरुजायामिति पठन्ति तस्य चिकित्सोपयोगिभेदं दर्शयन्नाह तद्द्विविधमिति कथं पुनः शल्यशास्त्रमेतदुच्यते इत्याह। सर्वशरीरेति सर्वशरीरे येन बाधा भवति तत शल्यमिहोपदिश्यते कथ्यते तत् शल्यशास्त्रमेतदित्यर्थः। शारीरागन्तुकयोर्भेदमाह। तत्रेति आदिशब्दात् केचित् श्मश्रुभ्रूपक्ष्माणि गृह्णन्ते धातवो रसादयः मलमूत्रपुरीषकर्णमलस्वेदनेत्रविट्प्रभृतयः दोषा वातादयः परमेते धात्वन्नदोषा दुष्टाःसन्तः शल्यभूताः अमुमेवार्थं केचिद्दुष्टाश्चेति चकारेण कथयन्ति धातवोऽन्नमला इत्यादि असमस्तानां पृथगुपादानं यत्कृतं तद्गुणधात्वग्रहणार्थं आगन्तु शल्यं प्रतिपादयन्नाह आगन्त्वपि शरीरशल्यव्यति-

व्यतिरेकेण यावन्तो भावा दुःखमुत्पादयन्ति। अधिकारो हि लोहवेणुवृक्षतृणशृङ्गास्थिमयेषु तत्रापि विशेषतो लोहमयेष्वेव विशसनार्थोपपन्नत्वाल्लोहस्य लोहानामपि दुर्वारत्वादनुमुखत्वाद्दूरप्रयोजनकत्वाच्च शर एवाधिकृतः, स द्विविधः कर्णी श्लक्ष्णश्च प्रायेण विविधवृक्षपत्रपुष्पफलतुल्याकृतयो व्याख्याता व्यालमृगपक्षिवक्त्रसदृशाश्च ॥ १ ॥

रेकेणेति। भावा इति पदार्थास्तृणकाष्ठपाषाणलोहलोष्ट्रप्रभृतयः तत्रापि प्रसिद्धशल्यभेदान् दर्शयितुमाह। अधिकारो हीति। अधिकारो योग्यत्वं शल्यत्वेन लोहादिभिर्मयशब्दः प्रत्येकं सम्बध्यते तेषां मध्ये लोहस्य प्राधान्यं दर्शयन्नाह तत्रापीति तेषामपि मध्ये विशेषतोऽतिशयेन लोहस्यैवेति, अधिकार इत्यनुवर्त्तते कथं पुनर्लोहेष्वेवाधिकार इत्यत्र हेतुमाह। विशसनार्थोपपन्नत्वादिति मारणार्थेऽपि युक्तत्वात् लोहस्येत्यर्थः। लोहेष्वपि कान्तादिभेदेनानेकप्रकारेषु शरस्यैव प्राधान्यं दर्शयन्नाह। लोहानामिति लोहादीनामपि कान्तादीनामपि मध्ये इत्यर्थः। शरः काण्डः अधिकृत इति योग्य इत्यर्थः। अन्ये तु दुर्वारत्वादित्यत्र निर्वाहित्वादिति पठन्ति व्याख्यानयन्ति देशाद्देशान्तरप्रापणशीलत्वादित्यर्थः। अन्ये त्वनिर्य्यासित्वादिति पठन्ति तत्रापि स एवार्थः तस्य शरस्यापहरणोपयोगिभेदं दर्शयन्नाह। कर्णपालीति कर्णयुक्तः स च द्विविधा इति श्लक्ष्णः अकर्ण इत्यर्थः कर्णीत्यन्ये पठन्ति तत्रापि स एवार्थः तदाकृतीनामानन्त्येन दर्शयितुमशक्यत्वात् संक्षेपेण सदृश नानाविधवर्णाकृतिसारूप्येण दर्शयन्नाह। प्रायेणेति बाहुल्येनेत्यर्थः। विविधवृक्षपत्राकृतयः पिप्पलपत्रकरवीरपत्राकाराः पुष्पाकृतयो मालतीकुमुदोत्पलपत्राद्याकाराः वृक्षफलाकृतयः एलाकारस्थावरेवाकृतिं प्रतिपाद्य जङ्गमे दर्शयन्नाह व्यालवक्त्रसदृशाः सृगालमार्ज्जारादिमुखसमाना, पक्षिवक्त्रसदृशाः काककङ्कादिवक्त्रसदृशाः ॥ १ ॥

सर्वशल्यानान्तु महतामणूनां वा पञ्चविधो गतिविशेष ऊर्द्धमधोऽर्वाचीनस्तिर्य्यगृजुरिति। तानि यदा वेगक्षयात् प्रतिघाताद्वा त्वगादिषु व्रणवस्तुष्ववतिष्ठन्ते धमनीस्रोतोऽस्थितद्विवरपेशीप्रभृतिषु वा शरीरप्रदेशेषु तत्र शल्यलक्षणमुच्यमानमुपधारय। तत्तु द्विविधं सामान्यं वैशेषिकञ्च॥ श्यावं पिड़कावन्तं शोफवेदनावन्तं मुहुर्मुहुः शोणितास्राविणं वुद्वुदवदुन्नतं मृदुमांसञ्च व्रणं जानीयात् सशल्योऽयमिति सामान्यलक्षणमेतदुक्तम्॥ २॥

शराणामाहरणनोपयोगिगतिभेदान् दर्शयितुमाह। सर्वशल्यानामिति तत्र ऊर्द्धगतिविशेषः अधस्तादागतस्य शरस्य अधोगतिविशेषः, अग्रप्रदेशादागतस्य शरस्य अर्वाचीनगतिविशेषः। उपरिष्टादागतस्य शरस्य अर्वाचीनगतिविशेषः, पश्चादागतस्य शरस्य तिर्य्यगतिविशेषः। पार्श्वाभ्यामागतस्य ऋजुगतिविशेषः, अन्ये तु व्यत्ययेन पञ्चविंशतिं पाठं पठन्ति। किञ्चिदन्यथाव्याख्यानयन्ति तच्चास्माभिविस्तरभयान्नलिखितम्, अन्ये तु शरीरे सर्व्वशल्यानामित्यादिपाठं पठन्ति, यथा शल्यानि शरीरे स्थितिं कुर्व्वन्ति तथा हेतुं दर्शयन्नाह तानीति। तानि शल्यानि प्रतिघाताद्वेगनिवृत्तेरित्यर्थः। त्वगादिष्वित्यत्रादिशब्दान्मांससिरास्नायुसन्धिकोष्ठास्थिमर्म्माणि गृह्यन्ते अवतिष्ठन्त इति शल्यानीति शेषः। शल्यावस्थाने त्वगादिभ्योऽधिकमपि स्थानं सम्भवतीति पक्षान्तरमाह। धमनीति धमन्यादिभिस्त्रिभिः सह विवरशब्दः प्रत्येकमभिसम्बध्यते। विवरं छिद्रं पेशीमांसखण्डः, वा शब्देन पक्षान्तरं सूचयति, शरीरप्रदेशेष्विति धमन्यादय एव शरीरप्रदेशास्तेष्वित्यर्थः। अवतिष्ठन्ते शल्यानीति सम्बध्यते त्वगादिशल्यानां लक्षणानि निर्द्दिशन्नाह। तत्रेति तत्र तेषु त्वगादिष्वित्यर्थः लक्षणं चिह्नम्। तद्द्विविधमिति उप-

वैशेषिकन्तु त्वग्गते विवर्णः शोफोऽभवत्यायतः कठिनश्च । मांसगते शोफाभिवृद्धिः शस्त्रमार्गानुपसंरोह पीड़नासहिष्णुता चोषपाकौ च । पेश्यन्तरस्थेऽप्येतदेव चोषशोफवर्ज्जं । सिरागते सिराध्मानं सिराशूलं सिराशोफश्च । स्नायुगते स्नायुजालोत्क्षेपणं संरम्भश्चोग्रारुक् च । स्रोतोगते स्रोतसां स्वकर्मगुणहानिः ॥ धमनीस्थे सफेन रक्तमीरयन्ननिलः सशब्दो निर्गच्छत्यङ्गमर्दः पिपासा हृल्लासश्च । अस्थिगते विविधवेदनाप्रादुर्भावः शोफश्च ॥ अस्थिविवरगतेऽस्थिपूर्णतास्थितोदः संहर्षो बलवांश्च । सन्धिगतेऽस्थिवच्चेष्टोपरमश्च ॥ कोष्ठगते आटोपानाहौ मूत्रपुरीषाहारदर्शनञ्च व्रणमुखात् । मर्मगते मर्मविद्धवच्चेष्टते ॥ सूक्ष्मगतिषु शल्येषु तान्येव लक्षणान्यस्पष्टानि भवन्ति ॥ ३ ॥

धारय शृणु तत्र प्रथमं सामान्यलक्षणमाह पिड़काचितमितिपिड़काव्याप्तम् ॥ २ ॥

सामान्यमभिधायवैशेषिकं लक्षणमाह । वैशेषिकन्त्विति चोषः चुष्यत इव वेदनाविशेषःपिपासेत्यन्ये । पेशीति पाकाभावात् । शिरागत इति स्नायुजालोत्क्षेपणं स्नायुसमूहस्योर्द्ध नयनं संरम्भः श्वयथुः । स्रोतसां स्वकर्म्मगुणहानिरिति, रसवहानां स्रोतसां रसादिवहकर्म्मगुणाः पुनरेषां वातादिवहानाम् अरुणपीतसितरक्तादयो वर्णाः तेषां हानिरित्यर्थः । धमनीस्थ इति अङ्गमर्द्दः स्फुटनिका हृल्लासःअसक्तनिष्ठीवनम् संहर्ष इति मारुतोपद्रवो रोमाञ्चप्रायोवेदनाविशेषः संहर्षः सङ्कटनमित्यन्ये, चेष्टोपरम इति आकुञ्चनप्रसारणादिहानिः । कोष्ठगते इति आटोपः सतोदो वातसंक्षोभः आनाहो वातमूत्रपुरीषादिनिरोधः । मर्मविद्धवच्चेष्टत इति शिरादिमर्मविद्धे यानि लिङ्गानि भवन्ति तानीत्यर्थः । चेष्टते चेष्टां कुरुते

महान्ति स्वल्पानि वा शुद्धदेहानामनुलोमसन्निविष्टानि रोहन्ति विशेषतः कण्ठस्रोतःसिरात्वक्पेश्यस्थि विवरेषु दोषप्रकोपव्यायामाभिघातेभ्यः प्रचलितानि पुनर्बाधन्ते ॥ तत्र त्वक्प्रणष्टे स्निग्धस्विन्नायां मृन्माषयवगोधूमगोमयमृदितायां त्वचि यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात् ॥ स्त्यानघृतमृच्चन्दनकल्कैर्वा प्रदिग्धायां शल्येषु विसरति घृतमुपशुष्यति वालेपो यत्र तत्र शल्यं विजानीयात् ॥ मांसप्रणष्टे स्नेहस्वेदादिभिः क्रियाविशेषैरविरुद्धैरातुरमुपपादयेत्। कर्शितस्य तु शिथिलीभूतमनबद्धं क्षुभ्यमाणं यत्र संरम्भो वेदना वा भवति तत्र च शल्यं विजानीयात्। कोष्ठास्थिसन्धिपेशीविवरेष्ववस्थितमेवं परीक्षेत। सिराधमनीस्रोतःस्नायुप्रणष्टे खण्डचक्रसंयुक्ते याने व्याधितमारोप्याशु विषमेऽध्वनि यायाद्यत्र संरम्भो वेदना वा

स्थूलशल्यानां लक्षणमभिधाय सूक्ष्मशल्यलक्षणमाह। सूक्ष्मगतिषु शल्येषु अस्पष्टानीति अस्फुटानीत्यर्थः ॥ २ ॥

इदानीं शल्यप्रणष्टस्य हेतुं दर्शयन्नाह। महान्ति स्वल्पानि वा शुद्धदेहानामिति वाताद्यदूषितं देहानां पाकाभावाद्रोहन्तीत्यर्थः। अनुलोमसन्निविष्टानीति रोमानुकूल्येन प्रविष्टानीत्यर्थः। विशेषत इति अतिशयेन कण्ठादिषु प्रविष्टानि शल्यानि रोहन्तीति शेषः। केचिन्महान्तीत्यत्र स्थाने मृदून्यल्पानीति पाठं पठन्ति यदि रूढ़ान्यप्यदोषकराणि तत् किन्तेषां विज्ञानेनाहरणे चेत्याह। दोषप्रकोपेति त्वगादिप्रविष्टानां विज्ञानोपायं दर्शयन्नाह। तत्र त्वगिति संरम्भो रागशोथाभिसम्भवः आशुविसरतीति शीघ्रं विलीयते। मांसेति क्रियाविशेषैः सह आतुरमुपपादयेत् योजयेदित्यर्थः। कर्शितस्य आतुरस्येत्यर्थः शिथि-

भवति तत्र शल्यं जानीयात्॥ अस्थिप्रणष्टे स्नेहस्वेदोपपन्नान्यस्थीनि बन्धनपीड़नाभ्यां भृशमुपचरेद्यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात्॥ सन्धिप्रनष्टे स्नेहस्वेदोपपन्नान् सन्धीन् प्रसारणाकुञ्चनबन्धनपीड़नैर्भृशमुपचरेद्यत्र संरम्भो वेदना वा भवति तत्र शल्यमिति जानीयात्॥ मर्मप्रणष्टे त्वनन्यभावान्मर्म्मणामुक्तं परीक्षणं भवति॥ ४॥

सामान्यलक्षणमपि च हस्तिस्कन्धाश्वपृष्ठपर्वतद्रुमारोहणधनुर्व्यायामद्रुतयाननियुद्धाध्वगमनलङ्घनप्रतरणप्लवनव्यायामैर्जृम्भोद्गारकासक्षवथुष्ठीवनहसनप्राणायामैर्वातमूत्रपुरीषशुक्रोत्सर्गैर्वा यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात्॥ ५॥

लीभूतमनवबद्धं क्षुभ्यमाणं शल्यमिति शेषः क्षुभ्यमाणं चलदित्यर्थः। एवमेवेति पूर्व्वोक्तन्यायेनेत्यर्थः, खण्डचक्रसंयुक्ते याने इति खण्डितचक्रसमन्विते रथे इत्यर्थः। आरोप्येति आरोह्येत्यर्थः, विषमेऽध्वनि निम्नोन्नतमार्गे इत्यर्थः, स्वेदोपपन्नानि स्वेदयुक्तानीत्यर्थः। मर्मप्रणष्टेइत्यादिमर्माणि त्वगादिषु अष्टसु व्रणेष्वेव भवन्ति नान्यत्र भवन्ति इति, अनन्यभावान्मर्माणांप्रणष्टशल्ये त्वगाद्युक्तमेव परीक्षणं कर्त्तव्यमित्यर्थः॥ ४॥

सामान्यविज्ञानोपायमपि दर्शयन्नाह सामान्यलक्षणमिति अष्टस्वपि त्वगादिव्रणवस्तुषु अवस्थितशल्यस्य लक्षणं सामान्यलक्षणं हस्तिस्कन्धादिभिः सहारोहणशब्दः प्रत्येकं सम्बध्यते, धनुर्व्यायाम इति धनुराकर्षणजनितश्रमः, द्रुतयानमिति शीघ्रगमनं, नियुद्धं बाहुयुद्धं, लङ्घनमिति कुड्यादीनामुत्प्लुत्यातिक्रमणं, प्लवनमुत्पतनं, प्रतरणं नद्यादौ व्यायामः शरीरायासजनकं कर्म जृम्भेत् पीतैकमारुतोच्छ्वासस्य व्यात्तमुखेन परिमोचणम्, उद्गारेति उद्गतस्य

भवन्ति चात्र ॥

यस्मिंस्तोदादयो देशे सुप्तता गुरुतापि च ।
घट्टयते बहुशो यत्र स्रुयते तुद्यतेऽपि च ॥
आतुरस्यापि यं देशमभीक्ष्णं परिरक्षति ।
संवाह्यमानो बहुशस्तत्र शल्यं विनिर्दिशेत् ॥
अल्पबाधमशूनञ्च निरुजं निरुपद्रवम् ।
प्रसन्नं मृदुपर्य्यन्तं निराघट्टमनुन्नतम् ॥

वायोरुद्गिरणमुद्गारः, कासेति दोषदुष्टोदानानुगतप्राणवायोर्निर्गमनं भिन्नकांस्यध्वनिकं कासः, क्षवथुरिति ऊर्द्ध्वस्रोतोऽवस्थितप्राणोदानयोराकुलितयोर्नासाविवरतो निर्गमनं क्षवथुः, ष्ठीवनं कफादेः थुत्कारणं, हसनं हासो विकृताकृत्यजातस्य रसस्य स्थायीभावोऽङ्गकपोलनासौष्ठस्पन्दनलक्षणः प्राणायाममिति प्राणवायोरायामनमवबोधनं प्राणायामः उत्सर्गशब्दो वातादिभिः सह प्रत्येकं सम्बध्यते उत्सर्गः प्रमोचनं केचिदुयत्र संरम्भो वेदना वेत्यत्र स्थाने उत्सर्गे वा यत्र तोदादयस्तत्र शल्यं विजानीयादिति पाठं पठन्ति व्याख्यानयन्ति च, आदिशब्दात् पाकरागशोथादयः श्यावं पिड़काचितमित्यादीनि पूर्व्वोक्तसामान्यलक्षणानि सन्निकृष्टानि एतानि पुनर्हस्तिस्कन्धारोहणादीनि विप्रकृष्टानि यत एभिरेवं श्यावं पिड़काचितमित्यादिलक्षयितव्यम् इत्यनयोः सामान्यलक्षणपाठयोर्न पौनरुक्त्यम् ॥ ५ ॥

प्रणष्टशल्यविज्ञानोपायमुद्दिश्यान्यान्यपराणि पुनर्लिङ्गानि निश्चयार्थमाह यस्मिन्निति, यस्मिन्देशे शरीरावयवे तोदादयो भवन्तीत्यध्याहारः आदिग्रहणात् रागपाकादयः, सुप्तता स्पर्शनानभिज्ञत्वं घटते बहुशो यत्रेति यस्मिन् प्रदेशे बहुशो वारंवारं पुरुषः स्वयमेव घट्टते चालयति रुज्यतेऽपि च तुद्यतेऽपि च इति पुस्तकान्तरम् इत्यस्य पीड़ाया अतिशयख्यापनं न पुनरुक्तिः, । आतुरस्यापि यं देशमित्यादि आतुरोऽयं देशमभीक्ष्णम् रक्षति अनवरतं किं विशिष्टः संवाह्यमानः मृद्यमानः एतेन यदा यदा आतुरो मृद्यते

एषण्या सर्वतो दृष्ट्वा यथामार्गं चिकित्सकः।
प्रसाराकुञ्चनान्नूनं निःशल्यमिति निर्दिशेत्॥
अस्थ्यात्मकं भज्यते तु शल्यमन्तश्च शीर्य्यते।
प्रायो निर्भुज्यते शार्ङ्गमायसञ्चेति निश्चयः॥
वार्क्ष्यवैणवतार्णानि निर्ह्रियन्ते तु नो यदि।
पचन्ति रक्तं मांसञ्च क्षिप्रमेतानि देहिनां॥
कानकं राजतं ताम्रं रैतिकं त्रपु सौसकं।
चिरस्थानाद्विलीयन्ते पित्ततेजःप्रतापनात्॥

सदा तदा तं देशं रक्षतीत्यर्थः निःशल्यस्य लक्षणं दर्शयन्नाह। अल्पवाधेति अल्पबाधमल्पं दुःखं, निरुजं निर्गतशूलादिवेदनं, मृदुपर्य्यन्तं मृद्वन्तं, निरावद्दमनिश्चलम्॥

एषण्येत्यादि एषण्या लोहादिशलाकया, सर्वतः सर्वत्र, यथामार्गं मार्गमनतिक्रमेण। चिकित्सको वैद्यः, निःशल्यमिति निर्दिशेत्कथयेत् नूनं निश्चितं कस्मात् प्रसारणादाकुञ्चनाच्च अत्रापि यदि बाधा न भवतीत्यर्थः अल्पाबाधमित्यत्र अल्पतापमित्यन्ये पठन्ति केचिदनुन्नतमिति पठन्ति अशूलमित्यनेनैव गतार्थत्वात् आहरणोपयोगिनीं हेतुभेदेनान्तरशल्यावस्थां दर्शयन्नाह। अस्थ्यात्मकमिति अस्थ्यात्मकमस्थिभज्यते इति स्वयं द्विधा त्रिधा वा भवतीत्यर्थः एतेनैवास्याहरणेऽवयवान्तरं विचार्य्याहरणं कर्त्तव्यमित्यभिप्रायः शीर्य्यत इति शरतीत्यर्थः। न तु केशास्थिवेणुदारुपत्राणि तु न विशीर्य्यन्ते इत्यग्रे वक्ष्यति तु अत्र अन्तश्च शीर्य्यत इति कथयति तत्कथं न विरोधः? उच्यते, अन्तश्च शीर्य्यत इति चकारो विषयभेदप्रतिपादनार्थः तेन केषाञ्चिदेवास्थ्नां शीर्णत्वं न सर्वेषाम् इति नास्ति विरोधः, निर्भुज्यत इति कुटिलीभवति। शार्ङ्गमिति शृङ्गमयम्। आयसञ्चेति लौहमयमपि निर्भुज्यत इत्यर्थः वार्क्ष्यादीनां विशल्यघ्ने मर्मणिपाकात् स्वयं पतितानामवश्यमनिर्हरणे-

स्वभावशीता मृदवो ये चान्येऽपीदृशा मताः।
द्रवीभूताः शरीरेऽस्मिन्नेकत्वं यान्ति धातुभिः॥
विषाणदन्तकेशास्थिवेणु दारूपलानि तु।
शल्यानि न विशीर्य्यन्ते शरीरे मृण्मयानि च॥
द्विविधं पञ्चगतिकं त्वगादिव्रणवस्तुषु॥
यो वेत्त्यधिष्ठितं शल्यं स राज्ञः कर्त्तुमर्हति॥ ६॥

एवं दर्शयन्नाह। वार्क्ष इति वार्क्षं वृक्षमयं वैणवं वेणुमयं तार्णं तृण-मयं निर्ह्रियन्ते तु नो यदीति अनिर्हरणञ्च विशल्यप्राणहरप्रदेशे बोद्धव्यं, रक्तमांसञ्चेत्यादिना वार्क्षादीनि शल्यानि पाकात् स्वयं पतन्तीत्युक्तं भवतीति विशल्यप्राणहरादिषु प्रदेशेषु कालकादीनामनाहरणे अदोषं दर्शयन्नाह। कालकं राजतमिति। रैतिकमिति पित्तलभेदः ताम्रमयं रैतिकं केचिदत्र रैतिकमिति पदं विहाय त्रपुसीसकमिति पठन्ति। अन्येषामपि कांस्यप्रभृतीनां कालकादिधर्म्मं दर्शयन्नाह। स्वभावेति अपरेषां चिरकालस्थितावपि शरीरधातुभिरेकत्वमिति दर्शयन्नाह। विषाणेति, विषाणं शृङ्गं, दारु काष्ठं, उपलं पाषाणं, न विशीर्य्यन्ते इति न शठन्तीत्यर्थः। मृण्मयानि मृत्तिकामयानि अध्यायपिण्डार्थं ज्ञाने न वैद्यः स्मृतिं दर्शयन्नाह। द्विविधमिति द्विविधं द्विप्रकारं कर्ण्णि श्लक्ष्णञ्चेति अन्ये शारीरागन्तुभेदेन द्वैविध्यं मन्यन्ते पञ्चगतिकमिति ऊर्द्धाधोऽर्वाचीन तिर्य्यगृजुं गतिकं, त्वगादिव्रणवस्तुष्विति त्वगादिव्रणवस्तुष्वष्टासु विश्लिष्टं तं विविध प्रकारं स्थितं राजग्रहणं प्रधानसंग्रहार्थं कर्त्तुमिति प्रतिकारं कर्त्तुमित्यर्थः॥६॥

अर्हति योग्यो भवति यो वेत्त्यधिष्ठितं शल्यमिति केचित् पठन्ति।

इति सूत्रस्थाने निबन्धसंग्रहे षड्विंशतितमोऽध्यायः।

सप्तविंशतितमोऽध्यायः।

अथातः शल्यापनयनीयमध्यायं व्याख्यास्यामः।

शल्यं द्विविधमवबद्धमनवबद्धञ्च। तत्र समासेनावबद्धशल्योद्धरणार्थं पञ्चदशहेतून् वक्ष्यामः॥ तद्यथा। स्वभावः, पाचनं, भेदनं, पीडनं, दारणं, प्रमार्जनं, निर्ध्मापनं, वमनं, विरेचनं, प्रक्षालनं, प्रतिमर्षः, प्रवाहणं, माचूषणमयस्कान्तो हर्षश्चेति॥ १॥

तत्राश्रुक्षवथूद्गारकासमूत्रपुरीषानिलैः स्वभावतःप्रवृत्तैर्नयनादिभ्यः पतति। सावगाढं शल्यमभिदह्यपाचयित्वा

अवबद्धमनवबद्धञ्चेति। तत्रावबद्धं विशेषेणासक्तम् अन्ये तु अस्थ्यादिप्रविष्टमवबद्धम् इतरानवबद्धमिति मन्यन्ते अत्रानवबद्धस्यैव प्रथममङ्गीकृत्यपरिसंख्यां हेतून् परिहरणे दर्शयन्नाह। तत्रेति तयोर्मध्ये स्वभावःप्रकृतिः, पाचनमिति अपक्वशल्यस्य पाचनद्रव्यैः पाकविधानं, भेदनमिति ह्रिपत्रादिभिः शस्त्रैः स्फोटनं, दारणमिति चिरविल्वादिभिः मिश्रकोक्तौषधैर्विदारणं, पीड़नमिति द्रव्याणां पिच्छिलानामित्यादि मिश्रकोक्तद्रव्यैः कृत्वापीड़येत्, प्रमार्जनमिति वालवस्त्राभिः प्रोञ्छनं, निर्ध्मापनमिति प्रधमनं, एतदुक्तं भवति पिप्पलीकटफलादिचूर्णस्य नाड्यतासान्तः प्रापणं प्रतिमर्षोऽङ्गुल्यादिघर्षणं प्रवाहणं विकुन्थनं, आचूषणं मुखशृङ्गैः कृत्वाचूष्यते अयस्कान्तः पाषाणविशेषः, यद्यप्ययस्कान्त इति सामान्येनोपात्तस्तथाप्यत्र कर्षको ग्राह्यः, हर्षस्तुष्टिः॥ १॥

स्वभावादि हेतोर्विषयमाह। तत्राश्रुक्षवथुद्गार इति। तत्र तेषां

प्रकोपात्तस्य पूयशोणितवेगाद्गौरवाद्वा पतति ॥ पक्कमभिद्यमानं भेदयेद्दारयेद्वा भिन्नमनिरस्यमानं पीडनीयैः पीडयेत्पाणिभिर्वा ॥ अणून्यक्षशल्यानि परिषेचनाध्मापनैर्बालव्यपाणिभिः प्रमार्जयेत् ॥ आहारशेषश्लेष्महीनाणुशल्यानि श्वसनोत्कासनप्रधमनैर्निर्हृमेव ॥ अन्नशल्यानि वमनाङ्गुलिप्रतिमर्षप्रभृतिभिर्विरेचनैः पक्वाशयगतानि ॥ २ ॥

व्रणदोषाश्रयगतानिप्रक्षालनैः। वातमूत्रपुरीषगर्भसङ्गेषु प्रवाहणमुक्तं। मारुतोदकसविषरुधिरदुष्टस्तन्येष्वाचूषणमास्येन

पञ्चदशानां मध्ये एतैरश्मादिभिः स्वभावबलं स्वभावशक्तिः ततः प्रवृत्तैरागतैर्हेतुभिर्नयनादिभ्यः शरीरप्रदेशेभ्यो रजःप्रभृतिशल्यं पततीत्यर्थः पाचनविषयमाह। सावगाढमिति अवगाढमभ्यन्तरगतं अविदह्यमानमपच्यमानं प्रकोपात्तस्येति पूतिभावान्मांसस्येत्यर्थः भेदनदारणयोर्विषयमाह। पक्वभिद्यमानामिति भिन्नमनिरस्यमानमिति। अनिरस्यमानं अनिष्क्रामन्तं प्रमार्जनविषयमाह। अनून्यक्षशल्यानीति अक्षाणि इन्द्रियाणि परिषेचनम्, धाराभिषेचनम् आध्मापनमक्षिषु मुखमारुतस्य प्रापणं निर्ध्मापनविषयमाह। आहारशेष इति भुञ्जानस्य मासान्तरादिस्थितमन्नं आहारशेषः हीनानां पतितानां भ्रष्टानां शल्यानामित्यावयवादीनि अनुशल्यानि उच्यन्तेश्वसनं श्वासः उत्कासनं- उत्कृष्टं कासनं निर्धमेन्निष्कासयेत् वमनप्रतिमर्षीयविषयमाह अन्नशल्यानीति। अन्नशाल्यं वमनेन पतति अङ्गुलिप्रतिमर्षेण च अङ्गुलिप्रतिमर्षः अङ्गुल्यादिघर्षणं विरेचनविषयं दर्शयन्नाह। विरेचनैः पक्वाशयगतानीति, पक्वाशयगतानि शल्यानीति शेषः ॥ २ ॥

प्रक्षालनविषयमाह। व्रणेति व्रणदोष पूयः व्रणाशयगतान्यान्यपि शल्यानीत्यर्थः प्रवाहणविषयमाह। वातेति सङ्गो प्रवृत्तिः चूषण-

त्रिषाणैर्वा ॥ अनुलोममनवबद्धमकर्णमनल्पव्रणमुखमयस्कान्तेन। हृद्यवस्थितमनेककारणोत्पन्नं शोकशल्यं हर्षेणेति ॥ सर्वशल्यानान्तु महतामणूनां वा द्वावेवाहरणहेतू भवतः प्रतिलोमोऽनुलोमश्च तत्र प्रतिलोममर्वाचीनमानयेदनुलोमं पराचीनं ॥ ३ ॥

उत्तुण्डितं छित्त्वा निर्घातयेच्छेदनीयमुखं ॥ छेदनीयमुखान्यपि कुक्षिवक्षःकक्षावङ्क्षणपर्शुकान्तरपतितानि च हस्तशक्यं यथामार्गं हस्तेनैवापहर्त्तुं प्रयतेत।

विषयमाह मारुतेति। अयस्कान्तविषयमाह अनुलोमिति हर्षविषयमाह हृद्यवस्थेति। केचिदवबद्धशल्यमध्ये भेदनदारणपीड़नवमनविरेचनप्रक्षालनानि न मन्यन्ते तेषां भेदनदारणयोरवबद्धशल्यविषयत्वं पीड़नादीनां चतुर्णां यथासम्भवमुक्तेष्वेवान्तर्भावः पञ्चमीगतानां शल्यानामपि सर्वेषाममार्गमार्गभेदेन द्विविधमाहरणं दर्शयन्नाह सर्वशल्यानामिति। प्रवेशमार्गेनैवाहरणं प्रतिलोमं तद्विपरीतं चानुलोमं प्रतिलोमानुलोमाहरणयोर्विषयमाह तत्रेति। तयोर्मध्ये अर्वाचीनमिति नातिदूरप्रवेशात् निविष्टशल्यद्वारापेक्षया कायस्य पूर्वार्द्धस्थितं शल्यमर्वाचीनमुच्यते तत्तु शल्यं प्रतिलोममानयेत्। कोऽर्थः अर्वाचीनदेशे आनयेत् प्रवेश मार्गे नैवानयेत् अनुलोमेन हि परार्द्धेन निष्क्रीयमाणं विद्धमपि बहुतरं प्रदेशं वेधयेत् तत्र मरणमुपद्रवा वा भवन्ति पराचीनमिति दूरप्रविष्ट कायस्य परार्द्धनिर्गतशल्यमुच्यते तच्छल्यमनुलोममानयेत् कोऽर्थः? अग्रेतले पराचीने प्रदेशे आनयेत् ॥ ३ ॥

यदातु अनतिवेगात् शल्यमग्रेतले प्रदेशेन निर्गतमुत्तुण्डितमुखञ्च भवति तदा तस्य छेदनीयमुखस्य प्रदेशपराचीनानुलोमहरणे तादृशं विधानमिति दर्शयन्नाह उत्तुण्डितमिति। ऊर्द्धं निःसरन्मुखमिव निर्घा-

अनुत्तुण्डितशल्यानि छेदनीयमुखानि च।
अनिर्घात्यानि जानीयाद्भूयश्छेदानुबन्धतः॥
हस्तेनापहर्त्तुमशक्यं विमृष्यशस्त्रेण यन्त्रेण वाप-
हरेत् ॥४॥

भवति चात्र।
शीतलेन जलेनैनं मूर्च्छन्तमवसेचयेत्।
संरक्षेदस्य मर्माणि मुहुराश्वासयेच्च तं॥

तयेदिति इतस्ततश्चालयेद्धस्तेन मुद्गरादिना वा ततश्चानुलोममाहरेत् छेद-नीयमुखमिति कण्टकखर्जुरीपत्रप्रभृतिकं एतेन उत्तुण्डितं छेदनीयमुखं पराग्निर्गतमुखं छेद्यप्रदेशप्रकटितञ्च शल्यं पराचीनानुलोमाहरणविषय इत्युक्तं भवति किं छेदनीयमुखस्य सर्व्वत्रायं विधिनेत्याह। वक्ष इति हृदयं हस्तेनाहर्त्तुं यच्छक्यते शल्यं तदस्य शक्यं यथामार्गेणेति प्रवेश-मार्गेणेत्यर्थः हस्तेनैवेति हस्तेनैवोद्धरेत् न कदाचिन्मुद्गरादिभिश्चालयेत् प्रयतेतेति प्रयत्नं कुर्वीत अन्ये तु अच्छेदनीय मुखानि इत्यादि पाठं पठन्ति व्याख्यानयन्ति च न केवलमनुत्तुण्डितान्यनिर्घात्यमुखा-न्यपीति समुच्चीयते तुशब्देन तानि कुचादि पतितानि सर्वाण्येवाच्छेद्य-त्वादनिर्घात्याहरणीयानि एतेनैतदुक्तं भवति पराचीनानामपि शल्याना-मनुलोममाहरणीयानामपि प्रतिलोममेवाहरणं कर्त्तव्यम् अनुलोमाहरणे कुचादिषु महान् छेदानुबन्धो भवेत् पार्श्वकान्तरपतितानि चेत्यस्याग्रे अनुत्तुण्डितशल्यानि छेदनीयमुखानि च अनिर्घात्यानि जानीयाद्भूय-श्छेदानुबन्धत इति भोजसंहितोक्तं केचित्पाठं पठन्ति स च प्रमादपाठः निबन्धेष्वदर्शनात् हस्तेनापहर्त्तुमशक्ये शल्ये किं विधानमिति दर्शयति हस्तेनेति विशस्य छित्वा शस्त्रेणेत्यर्थः क्वचित् हस्तेन वापहर्त्तुमशक्ये अविशस्य यन्त्रेणापहरेदिति पाठं मन्यन्ते तेषां मते अविशस्य इति इत-स्ततश्चालयेत् यन्त्रेणापहरेदिति पाठं मन्यन्ते तेषां मते अविशस्य अच्छि-त्वेत्यर्थः हस्तेन वेति चकारेण यन्त्राहरणाशक्यस्य विशस्येत्युपलभ्यते ॥४॥

ततः शल्यमुद्धृत्य निर्लोहितं व्रणं ज्ञात्वाऽस्वेद्यमग्निघृतप्रभृतिभिः संस्वेद्य विदह्य प्रदिह्य सर्पिर्मधुभ्यां बद्ध्वाचारिकमुपदिशेत् ॥ सिरास्नायु विलग्नं शलाकादिभिर्विमोच्यापनयेत् श्वयथुग्रस्तवारङ्गं समवपीड्यश्वयथुं दुर्बलवारङ्गं कुशादिभिर्बद्ध्वा। हृदयमभितो वर्त्तमानं शल्यं शीतजलादिभिरुद्वेजितस्यापहरेद्यथामार्गं दुरपहरमन्यतोऽपबाध्यमानं पाटयित्वोद्धरेत् ॥ ५ ॥

शल्याहरणे उपद्रव चिकित्सासूत्रं निर्दिशन्नाह। शीतलेन जलेनेति। एतमिति शल्यातुरं अवसेचयेदिति सिञ्चेदित्यर्थः। आश्वासयेदिति क्षीरतर्पणादिदानेनन बाहुल्येनानुपलेभ्य केचित्पठन्ति गयदासेन तु पठित्वाऽयं पाठोऽन्यान्तरे व्याख्यातः युक्तश्चायं तस्मात् पठनीय एव हृते शल्ये पश्चात्कर्म्मदर्शयन्नाह ततः शल्यमुद्धृत्य इति। निर्लोहितमिति रुधिरवर्जितं संस्वेद्येति अतिनिसृतं शोणितमवेदनं सुखोष्णेन घृतेन तदितरमग्निना संस्वेद्येति सम्बन्धः अवदह्येति अग्निकृत्यान् व्रणान् इत्यर्थः प्रदिह्येति लेपयित्वा अस्वेद्यमपि स्रुतशोणितञ्च अत्र केचिद्विदह्य न पठन्ति प्रदिह्येत्यस्य स्थाने तर्पयित्वेति पठन्ति अत्र केचिदुद्विकाप्रवाहेण भोजोक्तं शिरास्नायुविलग्नं शलाकाभिर्विमोच्यापनयेत् श्वयथु ग्रस्तवारङ्गसमवपीड्य श्वयथुं दुर्बलवारङ्गं कुशादिभिर्बद्ध्वा इति पाठं पठन्ति प्रवाहपठिता। व्याख्यानयन्ति वारङ्गं शस्त्रनालम् अवपीड्य श्वयथुमिति सम्बन्धः कुशादिभिः अपनयेदित्यत्रापि योज्यते। कुशावंशवेत्रादिकं वा तन्त्रान्तरादवसेयामस्तितन्त्रान्तरदर्शनालसैस्तु अत्रैवानीय न पाठनीय अयं चतुर्विध-एव वचः पतितेषु विशेषविधिमाह। हृदयमभितो वर्त्तमानमिति हृदयसमीपे स्थितमित्यर्थः उद्वेजितस्य उद्विग्नहृदयस्य शीतजलादुद्वेजनञ्च क्षमपरिहाराय यथामार्गमिति य नैवमार्गेण प्रविष्टं तेनैवाहरेदित्यर्थः। तेनाशक्ये उपायान्तरं दर्शयन्नाह। अन्यत इति अन्यस्मिन्नपि प्रदेशे

अस्थिविवरप्रविष्टमस्थिविदष्टं वा,वगृह्यपादाभ्यां यन्त्रेणा-पहरेद् शक्यमेवं वा बलवद्भिः सुपरिगृहीतस्य यन्त्रेण ग्राहयित्वा शल्यशाङ्गं प्रविभुज्य धनुर्गुणैर्बद्धैकतश्चास्य पञ्चाङ्गया-सुप्रसंयतस्याश्ववक्त्रकटके वा बध्नीयादथैनं कशया ताड़येद्यथोन्नमयन् शिरो वेगेन शल्यमुद्धरति। दृढां वा वृक्षशाखामवनम्य

दुःखेनापक्रियते दूरपहरम् अबाध्यमानमिति मर्मपीड़ाकरं शल्यमिति शेषः पाटयित्वेति दारयित्वेत्यर्थः॥ ५॥

अनवबद्धशल्यस्य हस्तेनापहर्त्तुमशक्यस्य निर्हरणोपायं दर्शयन्नाह। अस्थिविवरप्रविष्टमिति अस्थिच्छिद्रान्तर्गतं विदष्टमिति अत्यासक्तम् अशक्यमिति सुपरिगृहीतस्यातुरस्येत्यर्थः प्रविभज्यवक्रीकृत्यधनुर्गुणैरिति मूर्व्वा वार्कसूत्रमयैः एकतः एकस्मिन् प्रदेशे अस्येति शल्यवतो नरस्य पञ्चाङ्गामिति बन्धविशेषः उपसंयतस्य बद्धस्य अश्वस्य घोटकस्य वक्त्रं मुखं तत्र कविकाकटकं तत्र बध्नीयात् शल्यमिति सम्बन्धः एनम् अश्वं कशया सदया उन्नामयन्निति उच्चैः कुर्व्वन् पचान्तरमाह दृढां वा वृक्ष-शाखामित्यादि अचलस्येति नमयित्वा तस्यामिति वृक्षशाखायां अन्ये तु दृढ़ामित्यस्य स्थाने पञ्चाङ्गीमिति मन्यन्ते तत्र पञ्चाङ्गीं पञ्चभिः शाखान्तरैर्युतं शाखां वदन्ति अन्ये तु पञ्चाङ्गीप्लचाश्वत्थोडुम्बरन्यग्रोधचे-तसनामिति कथयन्ति अन्ये त्वेवं पठन्ति अशक्यमेवं वा बलवद्भिः सुपरिगृहीतस्य यन्त्रेणैनं ग्राहयित्वा शल्यमाबद्धं प्रविभुज्य धनुर्गुणैर्ब्बद्धैकतः शाखाश्ववक्त्रकटके बध्नीयात् अथैनं इत्यत्र कारके पाठः कशया ताड़येत् यथोन्नामयनशिरो वेगेण शल्य मुद्धरति नामितायां पञ्चाङ्गां वृक्षशाखायां वा पूर्व्ववद्बद्धोद्धरेदिति कुत्राप्यच्छेदनीयप्रदेशोत्तुण्डिता-नामस्थ्यादिविदष्टानां यथामार्गापहरणोपायं दर्शयन्नाह। यथामार्गमेवं यन्त्रेणेति अपहरेदिति शेषः अस्थिदेशोत्तुण्डितमित्यन्ये पठन्ति कर्णवता-माहरणं च दर्शयन्नाह। यन्त्रेणेति कर्णवत् यत्शल्यं तद्नाबाधकरप्रदेशो-त्तुण्डितं यदा भवति तदा विमृदितकर्णिकं कृत्वा कोऽर्थः संकुचितकर्णिकं

तस्यां पूर्ववद्द्बद्धोरेत् ॥ अस्थिदेशोत्तुण्डितमष्ठीलाश्ममुद्गराणामन्यतमस्य प्रहारेण विचाल्य यथामार्गमेव । यन्त्रेण विमृदितकर्णानि कर्णवन्त्यनाबाधकरदेशोत्तुण्डितानि पुरस्तादेव ॥ ६ ॥

जातुषे कण्ठासक्ते कण्ठे नाड़ीं प्रवेश्याग्नितप्तान्तु शलाकां तथावगृह्य शीताभिरद्भिः परिषिच्य स्थिरीभूतमुद्धरेत् । अजातुषं जतुमधूच्छिष्टलिप्तया शलाकया पूर्वकल्पेनेत्येके । अस्थिशल्यमन्यद्वा तिर्य्यक्कण्ठासक्तमवेक्ष्य केशोण्डुकं दृढैकसूत्रबद्धं द्रवभक्तोपहितं पाययेदाकण्ठाच्च पूर्णकोष्ठं वामयेद्गतस्य शल्यैकदेशसक्तं ज्ञात्वा सूत्रं सहसात्वाक्षि-

कत्वा पूरस्तादेव कोऽर्थः मये तत्प्रदेशे एव आकर्षयेदिति शेषः॥ ६ ॥

जातुषशल्यस्य विधानं दर्शयन्नाह । जातुष इति जातुषे लाचामये, कण्ठासक्ते गललग्ने नाड़ीमिति ताम्रादिरचितनलिकां स्थिरीभूतामुत्पन्नगाढ़तां शिशिरो जातुषैः शल्यैः क्रीड़न्ति ते यदाप्रमादान्निगिलन्ति तदायं विधिर्वेदितव्यः, अन्ये तु जातुषाणि शिवादिष्वेव घटितानि मन्यन्ते, अजातुषकण्ठासक्ते विधिमाह अजातुषमिति जतुलाचा, मधूच्छिष्टं सिकथकं पूर्वकल्पेनेति, शीतोदकस्थिरीभूतमित्यर्थः। अस्थ्यादि शल्यस्यान्तं कण्ठासक्तस्यास्याहरणमुद्दिशन्नाह। अस्थिशल्यमिति केशोण्डुकं वाण्कतं विदुकम् उपहितं सहसा त्वाक्षिपेदिति शल्यनिर्गमनार्थं दन्तधावनकूर्चकेन इति दन्तधावनानां करञ्जकादीनां कुटिताग्रं कूर्चिका तेनापहरेदित्यर्थः। प्रणुदेद्वान्त इति बहिरनिर्गच्छतः प्रणुदेत् प्रवेशयेदित्यर्थः, केशोन्दुकमित्यादि केचित् पाठं पठन्ति। अपहृतकण्ठशल्यस्य पश्चात् कर्मदर्शयन्नाह—चतकण्ठायेति उदकं यदन्तर्निविष्टं

पेत्। मृदुना वा दन्तधावनकूर्च्चकेनापहरेत् प्रणुदेद्वान्तः-क्षतकण्ठाया च मधुसर्पिषौ लेढुं प्रयच्छेत्त्रिफलाचूर्णं वा मधुशर्करामिश्रं ॥ उदकपूर्णमवाक्शिरसमवपीडयेद्वमनीयाद्वामयेद्वा भस्मराशौ वा निखनेदामुखात्॥ ७॥

ग्रासशल्ये तु कण्ठासक्ते निःशङ्कमनवबुद्धस्कन्धे मुष्टिनाभिहन्यात् स्नेहं मद्यं पानीयं वा पाययेत्॥ वाहुरज्जुलतापाशशल्ये तु कण्ठपीडनाद्वायुः प्रकुपितः श्लेष्माणं कोपयित्वा स्रोतो निरुणद्धि लालास्रावं फेनागमनं संज्ञानाशं चापादयति। तमभ्यज्य संस्वेद्य शिरोविरेचनं तस्मै तीक्ष्णं दद्याद्रसञ्च वातघ्नं विदध्यादिति॥ ८॥

भवन्ति चात्र॥

शल्याकृतिविशेषांश्च स्थानान्यवेक्ष्य बुद्धिमान्।

जलभूतादीनामुदरे भवन्ति तदा तत्पापहरणोपायं दर्शयन्नाह। उदकेति अवाक् शिरसमधोमुखो कृतम् अवपीड़येदुदरं धुनीयात् कम्पयेत् वामयेत् तार्षणैर्घर्षणैरिति वाऽवाक्शिरसमेव लिखनेत् प्रवेशयेत् आमुखादिति मुखपर्य्यन्तं॥ ७॥

कण्ठा[illegible]क्तं ग्रासाहरणोपायमाह। ग्रासशल्ये इति अनवबुद्धमिति अज्ञातं [illegible]या भवति अभिहन्यादिति प्रहारं दद्यादित्यर्थः वाहुरज्ज्वादिपीड़ितकण्ठप्रकुपितवायुस्तं आपरणोपायमाह वाहुरज्जुलतापाशं कण्ठपीड़नाद्वायुप्रकुपितः श्लेष्माणं कोपयित्वा स्रोतोनिरुणद्धि। नानास्रावफेनागमनं संज्ञानाशं चापादयति तमभ्यज्यसंस्वेद्यशिरोविरेचनं तस्मैः तीक्ष्णं विदद्यात्। रसञ्च वातघ्नं विदध्यात्। वाह्विति पाशशल्पो वाह्वादिभिः सह प्रत्येकं सम्बध्यते केचिदमुं पाठं पठन्ति॥ ८॥

तथा यन्त्रपृथक्त्वाच्च सम्यक् शल्यमथाहरेत् ॥
कर्णवन्ति तु शल्यानि दुःखाहार्य्याणि यानि च।
आददीत भिषक् तस्मात्तानि युक्त्या समाहितः॥
एतैरुपायैः शल्यन्तु नैव निर्घात्यते यदि।
मत्या निपुणया वैद्यो यन्त्रयोगैश्च निर्हरेत् ॥
शोथपाकौ रुजश्चोग्राः कुर्य्याच्छल्यमनिर्हृतं।
वैकल्यं मरणञ्चापि तस्माद्यत्नाद्विनिर्हरेत् ॥ ९ ॥

शल्याहृतीनामानन्त्यादनुक्तमपि कर्त्तव्यं दर्शयन्नाह—शल्याहृतीति स्थानानि शिरोऽक्षिकर्णनासाहृदयादीनि कर्णवतां दुराहरत्वं दर्शयन्नाह। आददीतेति संगृह्णीयादित्यर्थः युक्तेति योगेन न तु हीनयोगातियोगमिथ्यायोगैः समाहितः सावधानः चवश्यं निर्हरणीयस्य शल्यस्योक्तैः प्रकारैरनाहरणे अनुक्तोपायमनुक्तयन्त्रकरणे सूत्रमुद्दिशन्नाह। एतैरिति नैव निर्घात्यते यदीति नैव निष्काश्यते यदीत्यर्थः। मत्या निपुनया वैद्य इति मत्या निपुणया स्वकर्म्मणि प्रवीणया बुद्ध्यायुक्तः यन्त्रयोगैश्च निर्हरेदिति योगैः संयोगैश्चेति चकारादनुक्तगुणातिबन्धनादिसमुच्चीयते। शल्यस्यानाहरणे दोषं दर्शयन्नाह। शोथपाकाविति अमुं श्लोकं केचिदत्र न पठन्ति न्यायचन्द्रिकायान्तु पठितत्वादवश्यं पठनीय एव ॥ ९ ॥

इति सूत्रस्थाने निबन्धसंग्रहे सप्तविंशतितमोऽध्यायः।

॥ अष्टाविंशतितमोऽध्यायः ॥

—:*:—

अथातो विपरीताविपरीतव्रणविज्ञानीयमध्यायं व्याख्यास्यामः।

फलाग्निजलवृष्टीनां पुष्पधूमाम्बुदा यथा।
ख्यापयन्ति भविष्यत्त्वं तथा रिष्टानि पञ्चतां॥
तानि सौक्ष्म्यात्प्रमादाद्वा तथैवाशुव्यतिक्रमात्।
गृह्यन्ते नोद्गतान्यज्ञैर्मुमूर्षोर्नत्वसम्भवात्॥

नियतानियतभेदेन द्विविधमरिष्टं प्रकाशयितुमाह—फलाग्नीति अत्र यथा पुष्पं फलस्य भविष्यत्त्वं ख्यापयति कोऽर्थः पुष्पं फलस्य भविष्यत्त्वं ख्यापयति कोऽर्थः पुष्पं फलं भविष्यतीति यथा च धूमोऽग्निं ख्यापयति यथाम्बुदो जलवृष्टिं एवमरिष्टानि पञ्चतां मृत्युं ख्यापयन्ति। भाविनीमिति शेषः अरिष्टान्यत्र मरणलक्षणानि नन्वत्र किमर्थं पुष्पधूमाम्बुदा इति बहवो दृष्टान्ता उक्ताः एकेनैव गतार्थत्वात् उच्यते पुष्पाम्बुदौ हेतूफलजलवृष्ट्यो-र्ज्ञापकावनियतौ न ह्यवश्यं कारणेन कार्य्यं कर्त्तव्यमेव इत्यनेन नियतदृष्टा-न्तेन हेत्वादिनिमित्तजमनियतमुक्तं धूमात् कार्य्यादग्नेः कारणस्य यतो ज्ञानं तन्नियतं एतेन नियतदृष्टान्तेन दोषजमरिष्टं नियतमिति अनियत-नियतभेदेन द्विविधमरिष्टं प्रकाशयन्ति बहवो दृष्टान्ता इति न दोषः अवश्यमेवारिष्टस्य मरणभवनं दर्शयन्नाह तानीति मुमूर्षोर्मर्त्तुमिच्छोः उद्गतान्यपि प्रकटितान्यप्यरिष्टान्यज्ञैर्मनुष्यैर्न गृह्यन्ते न ज्ञायते कुतो हेतोरित्याह सौक्ष्म्यादिति परमाणुवत् प्रमादाद्वेति मदिरा मदमत्तस्य वस्तूनि अविमर्शं इव आशुव्यतिक्रमादिति तदैवारिष्टमुत्पन्नं तदैव मर-

ध्रुवन्तु मरणं रिष्टे ब्राह्मणैस्तत्किलामलैः।
रसायनतपोजप्यतत्परैर्वा निवार्य्यते॥ १॥
नक्षत्रपीड़ा बहुधा यथाकालाद्विपच्यते।
तथैवारिष्टपाकञ्च ब्रूवते बहुधा जनाः॥
असिद्धिमाप्नुयाल्लोके प्रतिकुर्वन् गतायुषः।
अतोरिष्टानि यत्नेन लक्षयेत् कुशलो भिषक्॥
गन्धवर्णरसादीनां विशेषाणां समासतः।
वैकृतं यत्तदाचष्टे व्रणिनः पक्वलक्षणं॥

णादिति उत्पलशतपत्रभेदिवत् अन्ये त्वाशुव्यतिक्रमं दैवारिष्टमुत्पन्नं तदैव निवर्त्तत इति मन्यन्ते न त्वसम्भवादिति न पुनरसम्भवान्न गृह्यन्ते अपि तु सम्भवन्त्यप्यरिष्टानि उक्तैः कारणैस्तैर्न गृह्यन्ते इत्यभिप्रायः। दोषजमरिष्टैः मरणस्य नियतत्वं दर्शयन्नाह ध्रुवमिति रिष्टेऽपि मरणनिवृत्तिमुपायविशेषैराह ब्राह्मणैरिति किलशब्दोऽत्रागमनार्थं सूचयति एवं किलागमे प्रतिपादितमित्यर्थः अमलैरिति रागादिदोषरहितैः ब्राह्मणेभ्यो परानपि दर्शयन्नाह रसायनतपोजप्येत्यादिरसायनपरा इति स्वभावव्याधिनिवारणविशिष्टौषधवितर्काः तपोवीर्य्यौषधप्रभावेन मरणं निवारयन्ति एतच्च नियतानियतरिष्टविषयं॥ १॥

कथं पुनः कालान्तरे पञ्चविंशवर्षादावरिष्टपीड़ा भवतीत्याह नक्षत्रेति विपच्यते फलतीत्यर्थः पाकफलं अरिष्टपरिज्ञानदोषं दर्शयन्नाह। असिद्धमिति असिद्धिधर्मार्थकामादीनां हानिः अस्य तन्त्रस्याल्पत्वात्तत्र च व्रणस्य प्राधान्यात्तस्यैवारिष्टानि प्राक् निर्दिष्टुमाह। गन्धवर्णरसादीनामिति आदिग्रहणेनैवशब्दस्पर्शयोरपि संग्रहः. एतेन पञ्चापीन्द्रियार्था उक्ता भवन्ति. रूपस्य वर्णस्य वर्णग्रहणेन गृहीतत्वात्तं स्वभवतः प्रकृतितः वैकृतं यत् अन्यथात्वं यत्तदाचष्टे तत्कथयति व्रणिनः पुरुषस्य पक्वलक्षणं

कटुस्तीक्ष्णश्च विस्रश्च गन्धस्तु पवनादिभिः।
लोहगन्धिस्तु रक्तेन व्यामिश्रः सान्निपातिकः॥
लाजातसीतैलसमाः किञ्चिद्विस्राश्च गन्धतः।
ज्ञेयाः प्रकृतिगन्धाः स्युरतोऽन्यद्गन्धवैकृतं॥ २॥
मद्यागुर्वाज्यसुमनःपद्मचन्दनचम्पकैः।
सगन्धाः दिव्यगन्धाश्च मुमूर्षूणां व्रणाः स्मृताः॥
श्यावाजिमूषिकध्वाङ्क्षपूतिवल्लूरमत्कुणैः।

पातलक्षणं यथा पक्वफलं पतत्येव तत्र प्राकृतं गन्धं दर्शयन्नाह। अत्र लाजातसीति तैलसमानास्त्रयोगन्धा यथासंख्येन वातपैत्तिकवातश्लैष्मिकपित्तश्लैष्मिकाद्द्वन्द्वजाज्ज्ञेयाः एते त्रयोऽपीषद्विस्राः स्वभावाज्ज्ञेयाः अतसीशब्देनातसीतैलं ज्ञेयं प्रकृतिगन्धाः स्युरितिज्ञातव्याः प्रकृतिगन्धाभवेयुरित्यर्थः कटुस्तीव्रश्चेत्यादि इति केचित् पठन्ति विकृतिगन्धान् दर्शयन्नाह। अत इति सगन्धाः पक्वगन्धाश्च भूमिगन्धाच गर्हिता अतोऽन्यद्गन्धवैकृतमिति अतएव पूर्वोक्तेभ्यः कट्वादिप्राकृतगन्धेभ्योऽन्यद्गन्धवैकृतं॥ २॥

तानेवविकृतगन्धान्नाह। मद्यमित्यादिसुमनाजाती सगन्धाः दैव्यगन्धाः इति अपरोऽपि य उत्तमगन्धः मुमूर्षूणामिति मर्त्तुमिच्छूनां प्राणिनां श्वाकुक्कुरः ध्वाङ्क्षः पूति वल्लूरं पूयसहितं शुष्कमांसं मत्कुणाः क्षुद्रकीटाः एतैः समानगन्धा इत्यर्थः। वर्णान्निर्देष्टुमाह। श्यामेत्यादिश्याम ईषत् कृष्णाः न दह्यन्ते नदाहयुक्ताभवन्ति चूष्यन्त इति चूषणमिववेदनाविशेषः पित्तवर्णे सति यत् पित्तवेदनादाहादिकान् भवन्ति तद्वैकृतं वर्णस्य केचित् श्यामाकुङ्कुमकङ्कुष्ठ सवर्णाः पित्तदोषतः न दह्यन्ते न चूष्यन्ते भिषक्तान् परिवर्ज्जयेत् इति पाठं पटन्ति व्याख्यानयन्ति श्यामाप्रियङ्गुः कङ्कुष्ठः सुवर्णचीरिनिर्यासः न दह्यन्ते नातितपन्ते किन्तु परितापभावयुक्ता भव:

सगन्धाः पङ्कगन्धाश्च भूमिगन्धाश्च गर्हिताः ॥
श्यामकुङ्कुमकङ्कुष्ठसवर्णाः पित्तकोपतः।
न दह्यन्ते न चूष्यन्ते भिषक्तान्परिवर्जयेत् ॥
कण्डूमन्तः स्थिराः श्वेताः स्निग्धाःकफनिमित्ततः।
दूयन्ते च विदह्यन्ते भिषक् तान्परिवर्जयेत् ॥
कृष्णास्तु ये तनुस्रावा वातजा मर्म्मतापिनः।
स्वल्पामपि न कुर्वन्ति रुजं तान् परिवर्जयेत् ॥ ३ ॥
च्वेड़न्ति घुर्घुरायन्ते ज्वलन्तीव च ये व्रणाः।
त्वग्मांसस्थाश्चपवनं सशब्दं विसृजन्ति ये ॥
ये च मर्मस्वसम्भूता भवन्त्यत्यर्थवेदनाः।
दह्यन्ते चान्तरत्यर्थं वहिः शीताश्च ये व्रणाः ॥

न्तीति स च निबन्धेषु न दृश्यते अत्र तु दृश्यते तत्र गुड्डुरिकाप्रवाह: तस्मात् पूर्व्वः पाठो न्याय्यः। कण्डूमन्तः इत्यादिकाः कफेन तेषां दाहरुजा-वर्णवैकृतं दूयन्ते इति पीड़ां कुर्वन्ति। कृष्णास्विति ये वातजाव्रणाः कृष्णा-स्तनुस्रावामर्म्मतापिनश्च यदा स्वल्पामपि पीड़ां न कुर्वन्ति तदा वातजे वर्णवैकृतं अत्र रसे वैकृतं यद्यपि नोक्तं तथापि वातपित्तकफव्रणेषु यथा-क्रमं कषायकटुमधुरेषु पिपीलिकाद्युपसर्पणादनुक्तामपि ज्ञेयं गन्धवर्ण-रसादीनामित्यत्रोद्देश सूत्रे रसस्योक्तत्वात् ॥ ३ ॥

शब्दवैकृतं दर्शयन्नाह। च्वेड़न्तीति खटखटाशब्दं कुर्वन्ति घुर्घुरायन्त इति श्वमार्जारादीनां कोपादन्तर्गतशब्दो घुर्घुरा शब्द उच्यते ज्वलन्तीव इति ज्वलन्त इव दृश्यन्ते त्वङ्मांसस्थानां व्रणानां सशब्दपवनवाहित्वं प्रकृतिरेव स्पर्शवैकृतमधिकृत्याह दह्यन्त इति आकृतिविशेषवैकृतमधिकृत्याह शक्तीति शक्तिरायुधविशेषः ध्वजः पताकादण्डः येषु व्रणेषु अवभासेरन्

दह्यन्ते बहिरत्यर्थं भवन्त्यन्तश्च शीतलाः।
शक्तिकुन्तध्वजरथा वाजिवारणगोदृषाः॥
येषु चाप्यवभासेरन् प्रासादाकृतयस्तथा।
चूर्णावकीर्णा इव ये भान्ति वा न च चूर्णिताः॥
प्राणमांसक्षयश्वासकासारोचकपीड़िताः।
प्रवृद्धपूयरुधिरा व्रणा येषाञ्च मर्मसु॥
क्रियाभिः सम्यगारब्धा न सिद्ध्यन्ति च ये व्रणाः।
वर्जयेत्तान् भिषक् प्राज्ञः संरक्षन्नात्मनो यशः॥ ४॥

एकोनत्रिंशत्तमोऽध्यायः॥

—:*:—

अथातो विपरीताविपरीतदूतशकुनस्वप्ननिदर्श-
नीयमध्यायं व्याख्यास्यामः।

दूतदर्शनसम्भाषा वेशाश्चेष्टितमेव च।
ऋक्षं वेला तिथिश्चैव निमित्तं शकुनोऽनिलः॥

शोभन्ते प्रासादो देवता नरेन्द्राणामधिष्ठानं आकृतिरत्न रूपमेव रूपञ्च पञ्चेन्द्रियार्थमाह अपरमपि रूपविशेषमाह। चूर्णावकीर्णा इति अत्रापि सामान्याकारेण रूपमेव बोद्धव्यं गन्धादिवैकृतं समाप्य उपद्रवासाध्यत्वं प्रसङ्गतो युक्त्यागतं दर्शयन्नाह। प्राणेत्यादि प्राणक्षयः शक्तिलक्षणबलक्षयः मांसक्षय. उपचयलक्षणबलक्षयः अनुक्तमप्यशेषरिष्टामुष्टङ्गन्नाह॥ ४॥

इति सूत्रस्थाने निबन्धसंग्रहेऽष्टाविंशोऽध्यायः।

देशो वैद्यस्य वाग्देहमनसाञ्च विचेष्टितम्।
कथयन्त्यातुरगतं शुभं वा यदिवाऽशुभम्॥
पाषण्डाश्रमवर्णानां स्वपक्षाः कर्म्मसिद्धये।
त एव विपरीताः स्युर्दूताः कर्मविपत्तये॥
नपुंसकं स्त्रीबहवो नैककार्य्या असूयकाः।
गर्द्दभोष्ट्ररथप्राप्ताः प्राप्ता वा स्युः परम्पराः॥
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः॥ १॥

अथात इति स्वप्नशब्दानन्तरं शुभादिशब्दनिर्द्देशान्नचत्रवेलातिथिनिमित्तशकुनानिलदेशवैद्यवाग्देहमनश्चेष्टापि गृह्यन्ते, अत्राध्याये निर्द्देशाद् दूतादीनुपशन्नाह दूतदर्शनेति, दूतशब्दोऽत्र दर्शनसम्भाषवेशचेष्टितैः, सह सम्बध्यते गमनाय प्रश्नाय वा आगतः पुरुषो दूतः, चेष्टा चात्र कायकृतो व्यापारः, ऋक्षाणि आर्द्रादीनि, वेलामध्याह्नादिकाः, तिथयश्चतुर्थ्यादयः, निमित्तं सर्पादिदर्शनं, देशो वैद्यस्य भूमिभागः, वाग्देहमनसाञ्च चेष्टितमपि वैद्यस्यैव, आतुरगतमिति आतुराश्रितमित्यर्थः। स्वप्नाः पश्चान्निर्द्देश्याः प्रथमं दूतदर्शनमधिकृत्याह पाषण्डाश्रमवर्णानामिति, पाषण्डाः कापालिकादयः, आश्रमाब्रह्मचारिगृहस्थवानप्रस्थप्रभृतयः, वर्णा ब्राह्मणादयः, स्वपक्षा इति तद्यथा, कापालीकापालिकस्य, ब्रह्मचारी ब्रह्मचारिणः, विप्रो विप्रस्येत्यादयः। कर्मसिद्धये कार्य्यसिद्ध्यर्थं, तत्र च विपरीता इति, कापालिकस्य ब्रह्मचारी ब्रह्मचारिणः, कापालीति, कर्म विपत्तये इति चिकित्सितनाशाय, नपुंसकमिति न पुमान् न च स्त्रीस्त्रीति योषिदित्यर्थः बहव इति प्रभूता इत्यर्थः, नैककार्य्य इति न एकस्मिन्कार्य्ये येदूताः समागता इत्यर्थः। असूयका इति परस्परं कलहं कुर्व्वाणाः, गर्द्दभोष्ट्ररथाप्राप्ता इति गर्द्दभोष्ट्रयुक्तेन रथेनागता इत्यर्थः, प्राप्ता वा स्युः परम्परा इति आगता वा भवेयुः परम्पराः पङ्क्तौ एतेन पङ्क्तिं कृत्वा यदा आगता भवन्तीत्युक्तं, वैद्यं य

पाशदण्डायुधधराः पाण्डरेतरवाससः ॥
आर्द्रजीर्णापसव्यैकमलिनध्वस्तवाससः।
न्यूनाधिकाङ्गा उद्विग्ना विकृता रौद्ररूपिणः ॥
रूक्षनिष्ठुरवादाश्चाप्यमाङ्गल्याभिधायिनः।
छिन्दन्तस्तृणकाष्ठानि स्पृशन्तो नासिकां स्तनम् ॥
वस्त्रान्तानामिकाकेशनखरोमदशास्पृशः।
स्रोतोऽवरोधहृद्गण्डमूर्द्धोरःकुक्षिपाणयः ॥

उपसर्पन्तीत्यादि एतेदूता एवं गुणविशिष्टा वैद्यमुपसर्पन्तो समीपमागच्छन्तिते गर्हिता एवेति सम्भावनीयाः अत्र च शब्द एवकारार्थः अपि शब्दः सम्भावनायां ॥ १ ॥

वैद्यमधिकृत्याह। पाशेत्यादि पाशःपाशः दीर्घः पशुनां वन्धनो रज्जुवलयः, दन्तो लौहादिवलयैर्निवन्ध दीर्घ निष्ठुरकाष्ठ यष्टिः आयुधानि खड्गशक्त्यादीनि, पौण्डरेतरवासस इति कृष्ण पीतरक्तवस्त्राः, आर्द्रजीर्णापसव्यैकमलिनोद्ध्वस्तवासस इति आर्द्रं स्तिमितं, जीर्णं पुरातनं, अपसव्यं दक्षिणाश्रितमुत्तरीयं, वास एकमेव वस्त्रधारिणः, मलिनमधौतं, उद्ध्वस्तं पाटितं, न्यूनाधिकाङ्गा इति हस्ताद्यवयवैर्हीनाः अधिकाङ्गा इति एकविंशत्यङ्गुलादि युक्ताः, उद्विग्ना इति भीताः, विकृता इति पङ्गु कुष्ठवामनादयः, रौद्ररूपिण इति भैरवोद्धतकर्कशाः, दूतसम्भाषमधिकुर्व्वन्नाह। रूक्षेत्यादि रूक्षं मैत्री रहितं वचः, निष्ठुरं कर्कशवचनं, अमङ्गल्याभिधायिन इति गतस्तनष्टः रुधिरेत्यादि वचनमङ्गलं, चेष्टितमधिकृत्याह छिन्देत्यादि वस्त्रान्तो दशाहीनस्य वस्त्रस्यान्तः, अनामिका पवित्राङ्गुलिः, केशामस्तकवाला, रोमाणि शरीरोद्भवा वालाः, दशासदशस्य वस्त्रस्य प्रन्ताः, स्रोतोऽवरोध इत्यादि स्रोतोऽवरोधादिषु निक्षिप्त गणयः स्रोतः कर्णादि छिद्रं अवरोधः स्तन्धदेशः हृत्कमलमुकुलाकारमधोमुखं, गण्डः गल्लः, मूर्द्धा मस्तकं, उरः कण्ठ

कपालोपलभस्मास्थितुषाङ्गारकराश्चये ।
विलिखन्तो महीं किञ्चिन्मुञ्चन्तो लोष्ट्रभेदिनः ॥२॥
तैलकर्दमदिग्धाङ्गा रक्तस्रगनुलेपनाः ।
फलं पक्वमसारं वा गृहीत्वान्यच्च तद्विधं ॥
नखैर्नखान्तरं वापि करेण चरणं तथा ।
उपानच्चर्म्महस्ता वा विकृतव्याधिपीड़िताः ॥
वामाचारा रुदन्तश्च श्वासिनो विकृतेक्षणाः ।
याम्यां दिशं प्राञ्जलयो विषमैकपदे स्थिताः ॥
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः ॥ ३ ॥

हृदयान्तरालः, कुक्षिः वङ्क्षण पार्श्वान्तरालः, कपालोपले इत्यादि करशब्दः कपालादिभिः प्रत्येकं सम्बध्यते तेन कपालादिकरा इत्यादि बोध्यव्यं, कपालो मूर्द्धास्थि खण्डः, उपलः पाषाणः, भस्मेति दग्धकाष्ठादि क्षारः, अस्थि हड्डुः, तुषं धान्यादित्वचः, अङ्गारो भस्मीकृतार्द्धकाष्ठ खण्डः, विलिखन्तो महीं मित्यादिविलिखन्तो नखादिना विदारयन्त पृथिवीमित्यर्थः,किञ्चिन्मुञ्चन्त इति किञ्चिद्वस्तुहस्तेन गृहीतं मुञ्चतः । लोष्ट्रभेदिन इति मृत्पिण्डस्फोटन शीला इत्यर्थः ॥ २ ॥

दिग्धाङ्गा इति लिप्ताङ्गा इत्यर्थः । रक्तस्रगनुलेपनारक्तमालाधारिणो रक्तविलेपनाश्चेत्यर्थः, फलमित्यादि असारमिति अभ्यन्तर सारवर्ज्जितं, अन्यच्च तद्विधमिति अन्यदपि वस्तु पक्वमसारञ्च, नखैर्नखान्तरं वापि करेण चरणं तथा इत्यत्र गृहीत्वा इति सम्बन्धः उपानदित्यादि उपानत् प्रथि-हिता चर्म्महस्ता वा इति चर्म्ममयसदादि- धारिणः, विकृतव्यधिपीड़िता इति गलत्कुष्ठादि विकृतव्याधिपीड़िता, वामाचारा इति विपरीत व्यवहाराः, श्वसिन इति श्रमजनित श्वासयुक्ताः, विकृतेक्षणा इति पुष्पित नेत्रादयः, विषमैक पदेस्थिता इति विषमे एकस्मिन् स्थाने जर्द्धीभूता, उप-

दक्षिणाभिमुखं देशे त्वशुचौ वा हुताशनं ॥
ज्वलयन्तं पचन्तं वा क्रूरकर्मणि चोद्यतं।
नग्नं भूमौ शयानं वा वेगोत्सर्गेषु वाऽशुचिं ॥
प्रकीर्णकेशमभ्यक्तं खिन्नं विक्लवमेव च ॥
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः।
वैद्यस्य पैत्र्ये दैवे वा कार्य्ये चोत्पातदर्शने ॥
मध्याह्ने चार्द्धरात्रे वा सन्ध्ययोः कृत्तिकासु च।
आर्द्राश्लेषामघामूलपूर्वासु भरणीषु च ॥
चतुर्थ्यां वा नवम्यां वा षष्ठ्यां सन्धिदिनेषु च।
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः ॥ ४ ॥

सर्पन्ति समीपं गच्छन्ति, चेष्टितमेव चेति चकारेणानुक्तमपि वैद्यचेष्टासमुच्चीयते ॥ ३ ॥

तां दूतदर्शने निर्दिशन्नाह। दक्षिणाभिमुखमिति दक्षिणदिङ्मुखं, देशे प्रदेशे, अशुचौ अपवित्रे, हुताशनं ज्वलयन्तं, पचन्तमिति पाकं कुर्वाणं, क्रूरकर्म्मणि पशुबधादिके, उद्यन्तमुद्यमं कुर्वाणं, क्षुरकर्मणि त्वेके पठन्ति अत्र मुण्डादिकर्मणि उद्यमं कुर्वाणमित्यर्थः, वेगोत्सर्गेषु इति मूत्रपुरीषोत्सर्गेषु, अशुचिमिति अपवित्रं, प्रकीर्णकेशं विमुक्तकेशं, अभ्यक्तं तैलादिना, खिन्नं प्रस्वेदसहितं, विक्लवं विह्वलं, वैद्यं य उपसर्पन्ति इत्यादि इत्थंभूतं वैद्यं ये दूता उपसर्पन्ति ते गर्हिता निन्दिता भवन्तीत्यर्थः, वैद्यकार्य्यविक्रमत्वाह वैद्यस्येति पैत्रे पितुः कार्य्ये दैवे देवकार्य्ये, उत्पातदर्शन इति उत्पातानां भूमिदिव्यान्तरिक्षाणां दर्शने, नक्षत्रमधिकृत्याह। कृत्तिकास्विति, तिथिमधिकृत्याह चतुर्थ्यामिति सन्धिदिनानि देवपितकार्य्यदिनानि ॥ ४ ॥

खिन्नाभितप्ता मध्याह्ने ज्वलनस्य समीपतः।
गर्हिता पित्तरोगेषु दूता वैद्यमुपागताः॥
त एव कफरोगेषु कर्मसिद्धिकराः स्मृताः।
एतेन शेषं व्याख्यातं बुद्धा संविभजेत्तु तत्॥
रक्तपित्तातिसारेषु प्रमेहेषु तथैव च।
प्रशस्तो जलरोधेषु दूतवैद्यसमागमः॥
विज्ञायैव विभागं तु शेषं बुध्येत पण्डितः॥ ५॥
शुक्लवासाः शुचिर्गौरः श्यामो वा प्रियदर्शनः॥
स्वस्यां जातौ स्वगोत्रो वा दूतः कार्य्यकरः स्मृतः।
गोयानेनागतस्तुष्टः पादाभ्यां शुभचेष्टितः॥
धृतिमान् विधिकालज्ञः स्वतन्त्रः प्रतिपत्तिमान्।
अलङ्कृतो मङ्गलवान् दूतःकार्य्यकरः स्मृतः॥

विशिष्टरोगेषु विशिष्टस्थानादिदर्शयन्नाह खिन्नेति खिन्नाभितप्ता दूताः ज्वलनस्य समीपतः सन्निधानात् यदा वैद्यं मध्याह्ने उपसर्पन्ति तदा गर्हिता इति सम्बन्धः, एतेन शेषमित्यादि वातरोगे शीतप्रवातादिष्विति ज्ञेयं अशुभमित्यर्थः। रक्तपित्त इत्यादिजलरोधेषु जलनिरोधयुक्तप्रदेशेषु विज्ञायेत्यादिशेषं बुध्येतेति उदावर्त्तमूत्रकृच्छ्रादौ जलवेगदर्शनादिकं प्रशस्तमिति जानीयात्॥ ५॥

तथा विपरीतदूतदर्शनादिकं निर्दिशन्नाह शुक्लवासा इति गोयानेनेति वृषभारूढ़ो वृषभयुक्तयानारूढ़ो वेत्यर्थः, अन्ये तु गोयानेन पशुयानेनेत्यर्थमाहुः। गोशब्दस्य पशुवाचित्वात्, एतेन याम्यादियानखरोष्ट्रादिकवर्जमश्वादियानयुक्तं, स्वतन्त्रः स्वप्रधानः, प्रतिपत्तिमानिति प्रतिपत्तिरत्रज्ञानं प्रगल्भता वा शुक्लवासाः शुचिर्गौर इत्यादिदर्शनमुक्तं शुभचेष्टित इत्यनेन चेष्टा

स्वस्थं प्राङ्मुखमासीनं समे देशे शुचौ शुचिं।
उपसर्पति यो वैद्यं स च कार्य्यकरः स्मृतः॥ ६॥
मांसोदकुम्भातपत्रविप्रवारणगोवृषाः।
शुक्लवर्णाश्च पूज्यन्ते प्रस्थाने दर्शनं गताः॥
स्त्रीपुत्रिणी सवत्सा गौर्वर्द्धमानमलङ्कृता।
कन्या मत्स्याः फलं चामं स्वस्तिकं मोदका दधि॥
हिरण्याक्षतपात्रं वा रत्नानि सुमनो नृपः।
अप्रशान्तोऽनलो वाजी हंसश्चाषः शिखी तथा॥

उक्ता, अलङ्कृत इति वेश उक्तः,सम्भाषणात् विपरीतसम्भाषविषयाद्दावुक्तोऽपि ज्ञेयः,तथाहि तत्र रुचनिष्ठुरवक्तारं इत्युक्तं,अत्र तु तद्विपर्य्ययेण स्निग्धकोमलाभिधायि न इत्यविपरीतसम्भाषो ज्ञेयः तथा वेला नक्षत्रतिथीनामेव विपरीतत्वं ततोऽन्यदविपरीतत्वमिति कथम्भूतं वैद्यं उपसर्पनभूतः कार्य्यकारोभवति इत्याह स्वस्थमिति, स्वस्थमाधिव्याधिवर्जितं आसिनमुपविष्टं शुचौ पवित्रे देशे शुचिं वैद्यं इत्यम्भूतं वैद्यं यो दूत उपसर्पति सकार्य्यकारी केचिन्निबन्धकारा अमुं पाठं न पठन्ति॥ ६॥

तथा विपरीतलक्षणान्याह। मांसमाममत्र, उदकुम्भ इति अत्रोदकुम्भशब्देन पूर्णोरिक्तश्च घटो गृह्यते, तत्रातुरगृहे प्रविशनपूर्णः आतुरगृहान्निःसरन् रिक्त इति गृह्यते, आतपत्रं छत्रं, वृषो वृषभः शुक्लवर्णाः पदार्थाः कार्पासास्थितक्रभस्मक्षारादिव्यतिरिक्ताः, सुमनोदध्यक्षतमौक्तिकादयः, पूज्यन्ते श्लाघ्यन्ते, गताः प्राप्ताः, वर्द्धमानं शरावं अन्ये तु विशिष्टमेव मङ्गल्यर्थं चषकं वर्द्धमानमाचक्षते, अलङ्कृता कन्याभूषणवतीकन्या, केचिद्वर्द्धमानास्वलङ्कृता इति पठन्ति व्याख्यानयन्ति च आलेपनधवलत्वादिस्वलङ्कृतात्वया वर्द्धमाना इति, स्वस्तिकं मुक्तादामविशेषः, अन्ये स्वस्तिकं स्वस्तिकाकारं दुर्वासकलमण्डितं धवल अपर्ण

ब्रह्मदुन्दुभिजीमूतशङ्खवेणुरथस्वनाः।
सिंहगोवृषनादाश्च ह्रेषितं गजबृंहितं॥
शस्तं हंसरुतं नृणां कौशिकञ्चैव वामतः।
प्रस्थाने यायिनः श्रेष्ठा वाचश्च हृदयङ्गमाः॥ ७॥
पत्रपुष्पफलोपेतान् सच्छीरान्निरुजो द्रुमान्।
आश्रिता वा नभोवेश्मध्वजतोरणवेदिकाः॥
दिक्षु शान्तासु वक्तारो मधुरं पृष्ठतोऽनुगाः।
वामा वा दक्षिणा वापि शकुनाः कर्मसिद्धये॥
शुष्कोऽशनिहते पत्रे वल्लीनद्धे सकण्टके।
वृक्षेऽथवाश्मभस्मास्थिविट्तुषाङ्गारपांशुषु॥
चैत्यवल्मीकविषमस्थिता दीप्तखरस्वराः।
पुरतो दिक्षु दीप्तासु वक्तारो नार्थसाधकाः॥ ८॥

सिक्तं मृन्मयं गोमयकृतं वा मङ्गल्यमवतारणकार्थं कुर्वते माङ्गलिककृत्स्त्रियः, मोदकाः लड्डुकाः, हिरण्यं स्वर्णं, अन्ये कपर्दकान्याहुः, अक्षतं लाजाः अन्ये अक्षतानि यवधान्यान्याहुः, पात्रं तण्डुलभृतशरावादिकं, अन्ये तु अक्षतपात्रमिति एकमेव तण्डुलभृतशरावमिच्छन्ति, रत्नानिमाणिक्यादीनि, सुमन इति शोभनमानसमित्यर्थः, वैद्यस्येति शेषः, नृपःपृथ्वीपतिः, अन्ये तु शोभनचित्तो राजेति आहुः, अप्रशान्तोऽनलः प्रज्वलितवैश्वानरः, वाजीघोटकः, चाषः कषटासः, शिखीमयूरः, ब्रह्मदुन्दुभि इत्यादि, ब्रह्मेति वेदः दुन्दुभिर्भेरी, जीमूतो मेघः एतेषां स्वनाः शब्दाः, सिंहेत्यादिह्रेषितं वाजिध्वनिः, गजबृंहितं हस्तिस्वनः, रुतं शब्दः, कौशिकं चेति उलूकस्य रुतमित्यर्थः। यायिन इति राजभवतीत्यर्थः बध्येत बन्धनं प्राप्नुयादित्यर्थः॥ ७॥

पुन्नामानःखगा वामाः स्त्रीसंज्ञा दक्षिणाःशुभाः ॥
दक्षिणाद्वामगमनं प्रशस्तं श्वशृगालयोः।
वामं नकुलचाषाणां नोभयं शशसर्पयोः।
भासकौशिकयोश्चैव न प्रशस्तं किलोभयम् ॥
दर्शनं वा रुतञ्चापि न गोधाकृकलासयोः।
दूतैरनिष्टैस्तुल्यानामशस्तं दर्शनं नृणां ॥
कुलत्थतिलकार्पासतुषपाषाणभस्मनाम् ॥
पात्रं नेष्टं तथाङ्गारतैलकर्दमपूरितं।
प्रसन्नेतरमद्यानां पूर्णं वा रक्तसर्षपैः ॥
शवकाष्ठपलाशानां शुष्काणां पथि सङ्गमाः।
नेष्यन्ते पतितान्तस्थदीनान्धरिपवस्तथा॥
मृदुशीतोऽनुकूलश्च सुगन्धिश्चानिलः शुभः ॥ ९ ॥
खरोष्णोऽनिष्टगन्धश्च प्रतिलोमश्च गर्हितः ॥
ग्रन्थ्यर्ब्बुदादिषु सदा छेदशब्दश्च पूजितः।
विद्रध्युदरगुल्मेषु भेदशब्दस्तथैव च ॥
रक्तपित्तातिसारेषु रुद्धशब्दः प्रशस्यते।
एवं व्याधिविशेषेण निमित्तमुपधारयेत् ॥
तथैवाक्रुष्टहाकष्टमाक्रन्दरुदितस्वनाः।
छर्द्यां वातपुरीषाणां शब्दो वै गर्दभोष्ट्रयोः ॥
प्रतिषिद्धं तथाभग्नं क्षुतं स्खलितमाहतं।
दौर्म्मनस्यञ्च वैद्यस्य यात्रायां न प्रशस्यते ॥ १० ॥
प्रवेशेप्येतदुद्देशादवेक्ष्यञ्च तथातुरे।
प्रतिद्वारं गृहे वास्य पुनरेतन्न गण्यते ॥

केशभस्मास्थिकाष्ठाश्मतुषकार्पासकण्टकाः।
खट्वोर्ध्वपादा मद्यापो वसा तैलं तिलास्तृणं॥
नपुंसकव्यङ्गभग्ननग्नमुण्डासिताम्बराः।
प्रस्थाने वा प्रवेशे वा नेष्यन्ते दर्शनं गताः॥ ११॥
भाण्डानां सङ्करस्थानां स्थानात् सञ्चरणं तथा।
निखातोत्पाटनं भङ्गः पतनं निर्गमस्तथा॥
वैद्यासनावसादो वा रोगी वा स्यादधोमुखः।
वैद्यं सम्भाषमाणोऽङ्गं कुड्यमास्तरणानि वा॥
प्रमृज्याद्वा धुनीयाद्वा करौ पृष्ठं शिरस्तथा।
हस्तं चाकृष्य वैद्यस्य न्यसेच्छिरसि चोरसि॥
यो वैद्यमुन्मुखः पृच्छेदुन्माष्टि स्वाङ्गमातुरः।
न स सिध्यति वैद्यो वा गृहे यस्य न पूज्यते॥
भवने पूज्यते वापि यस्य वैद्यः स सिध्यति।
शुभं शुभेषु दूतादिष्वशुभं ह्यशुभेषु च॥
आतुरस्य ध्रुवं तस्माद्दूतादीन् लक्षयेद्भिषक्॥ १२॥
स्वप्नानतः प्रवक्ष्यामि मरणाय शुभाय च॥
सुहृदो यांश्च पश्यन्ति व्याधितो वा स्वयं तथा।
स्नेहाभ्यक्तशरीरस्तु करभव्यालगर्दभैः॥
वराहैर्महिषैर्वापि यो यायाद्दक्षिणामुखः।
रक्ताम्बरधरा कृष्णा हसन्ती मुक्तमूर्द्धजा॥
यं वाकर्षति बद्ध्वा स्त्री नृत्यन्ती दक्षिणामुखम्।
अन्त्यावसायिभिर्यो वाकृष्यते दक्षिणामुखः॥
परिष्वजेरन् ये वापि प्रेताः प्रव्रजितास्तथा।

मूर्द्धन्याघ्रायते यस्तु श्वापदैर्विकृताननैः ॥
पिबेन्मधु च तैलञ्च यो वा पङ्केऽवसीदति।
पङ्कप्रदिग्धगात्रो वा प्रनृत्येत्प्रहसेत्तथा ॥
निरम्बरश्च यो रक्तां धारयेच्छिरसि स्रजं।
यस्य वंशो नलो वापि तालो वोरसि जायते ॥
यं वा मत्स्यो ग्रसेद्यो वा जननीं प्रविशेन्नरः।
पर्व्वताग्रात्पतेद्यो वा श्वभ्रे वा तमसावृते ॥
ह्रियते स्रोतसा योवा योवा मौण्ड्यमवाप्नुयात्।
पराजीयेत वध्येत काकाद्यैर्वाभिभूयते ॥
पतनं तारकादीनां प्रणाशं दीपचक्षुषोः।
यः पश्येद्देवतानां वा प्रकम्पमवनेस्तथा ॥
यस्य छर्द्दिर्विरेको वा दशनाः प्रपतन्ति वा।
शाल्मलीं किंशुकं यूपं वल्मीकं पारिभद्रकं ॥
पुष्पाढ्यं कोविदारं वा चितां वायोऽधिरोहति।
कार्पासतैलपिण्याकलोहानि लवणं तिलान् ॥
लभेताश्नीत वा पक्वमन्नं यश्च पिवेत्सुरां।
स्वस्थः स लभते व्याधिं व्याधितो म्लृत्युमृच्छति ॥ १३ ॥

पत्रपुष्पफलोपेतानित्यादि * * * । ८ । ९ । १० । १२ । * * *
पराजीयेत पराजितो भवतीत्यर्थः, तारकादीनां आदिग्रहणाच्चन्द्रादिग्रहणं, प्रनाशं दीपचक्षुषोरिति स्वप्नेऽकस्माद्दीपनं नष्टं पश्यति चक्षुषी विगलिते पश्यतीत्यर्थः देवतानां प्रकम्पमिति देवतानां प्रतिमानां कम्प इत्यर्थः। अवनेः पृथिव्याः, यूपो यज्ञपशुहिंसनकाष्ठं, पारिभाद्रके निम्बवृक्षे, कोविदारः काञ्चनारः, लौहानि लौहामयानि वस्तूनि, पक्वमन्नं सिद्धमित्यर्थः, केचि-

यथास्वं प्रकृतिस्वप्नो विस्मृतो विहतश्च यः ।
चिन्ताकृतो दिवा दृष्टो भवन्त्यफलदास्तु ते ॥
ज्वरितानां शुना सख्यं कपिसख्यन्तु शोषिणां ।
उन्मादे राक्षसैः प्रेतैरपस्मारे प्रवर्त्तनं ॥
मेहातिसारिणां तोयपानं स्नेहस्य कुष्ठिनां ।
गुल्मेषु स्थावरोत्पत्तिः कोष्ठे मूर्ध्नि शिरोरुजि ॥
शष्कुलीभक्षणं छर्द्यामध्वा श्वासपिपासयोः ।
हारिद्रं भोजनं वापि यस्य स्यात्पाण्डुरोगिणः ॥
रक्तपित्ती पिबेद्यश्च शोणितं स विनश्यति ॥ १४ ॥

द्रवस्थाने मांसमिति पठन्ति सुरापिष्टमयी न तु मद्य इति पुस्तकान्तरं । तस्य शोभनत्वात्, ऋच्छतिप्राप्नोतीत्यर्थः ॥ १३ ॥

विकलान् स्वप्नारिष्टभूतान् दर्शयन्नाह । यथास्वमिति स्वस्याः प्रकृतेरणतिक्रमेण यथास्वं, यथा वातप्रकृतौ विगच्छतिसम्भ्रमेण च पित्तप्रकृतौ स्वम्पश्येदपि च हुताशविद्युदुल्का श्लेष्मप्रकृतौ प्रसुप्तः सन् कमलहंसचक्रवाकं सम्पश्येदपिच जलाशयान् मनोज्ञान् विस्मृतः अतिशयेन न स्मृतः, विहतः पूर्वं विरूपो दुष्टस्यानन्तरं विशिष्टेन स्वप्नेन हतः, उक्तञ्च अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव यः पुनः । सौम्यं तस्य विद्यात् शुभं फलमिति यथा ग्रहणात् सुस्वप्नं अस्वप्नतां सद्यः फलत्वं महाफलत्वं सूच्यते, अन्ये तु वितथश्च इति पठन्ति । दिवादृष्ट इति स्वप्न इति शेषः, भवन्त्यफलदास्तुते इति तुशब्दः चकारार्थः, तेनाति ह्रस्वातिदीर्घप्रथम यामदृष्टाश्च फलाः समुच्चीयन्ते, भवत्यफल एव स केचित्पठन्ति । उत्तर तन्त्रपठित विशिष्टव्याधिषु विशिष्टमेव स्वप्नदर्शनारिष्टं दर्शयन्नाह । ज्वरितानामिति शुनासख्यमिति कुक्कुरेण सहसैव, कपिसख्यमिति वानरमैत्रं, प्रवर्त्तनशब्द उन्मादापस्माराभ्यां सह प्रत्येकं सम्बध्यते, गुल्मरोगेषु स्थावरोत्पत्तिः वृक्षोत्पत्तिः कोष्ठे उदरे मूर्द्धि-

स्वप्नानेवंविधान् दृष्ट्वा प्रातरुत्थाय यत्नवान् ॥
दद्यान्माषांस्तिलांल्लोहं विप्रेभ्यः काञ्चनं तथा।
जपेच्चापि शुभान्मन्त्रान् गायत्रीं त्रिपदां तथा ॥
दृष्ट्वा च प्रथमे यामे सुप्याद्ध्यात्वा पुनः शुभं।
जपेद्वान्यतमं देवं ब्रह्मचारी समाहितः ॥
नचाचक्षीत कस्मैचिद्दृष्ट्वा स्वप्नमशोभनं।
देवतायतने चैव वसेद्रात्रित्रयं तथा ॥
विप्रांश्च पूजयेन्नित्यं दुःस्वप्नात्प्रविमुच्यते ॥ १५ ॥
अतऊर्द्धं प्रवक्ष्यामि प्रशस्तं स्वप्नदर्शनं।
देवान्द्विजान्गोवृषभान् जीवतःसुहृदोन्नृपान्।
समिद्धमग्निं विप्रांश्च निर्मलानि जलानि च ॥
पश्येत्कल्याणलाभाय व्याधेरपगमाय च।
मांसं मत्स्यान् स्रजःश्वेता वासांसि च फलानि च।
लभन्ते धनलाभाय व्याधेरपगमाय च।
महाप्रासादसफलवृक्षवारणपर्वतान् ॥

मस्तके स्थावरोत्पत्तिः, शिरोरुजिमस्तकव्याथायां छर्द्यां चनकादिपिष्टकृता सतिलभृष्टाशष्कुलीत्युच्यते, अध्वामार्गः तत्र गमनं श्वासपिपासयोः हरिद्रमिति हरिद्रारक्तभोजनलक्षणमित्यर्थः ॥ १४ ॥

अशुभस्वप्नदर्शने किञ्चिच्चिकित्सितमाह। स्वप्नानिति प्रथमे यामे प्रथमप्रहरे दृष्ट्वाविलोक्यदुःस्वप्नं सुप्यात्शयीत किं कृत्वा ? ध्यात्वाशुभं कल्याणमित्यर्थः। यद्यपि प्रथमयामलब्धस्वप्नस्य निष्फलत्वं कथितं तथापि दुःस्वप्नभयादयं विधिः कर्त्तव्यः, अन्यतममतः एकतममतः, समाहितः सावधानः, नचाचक्षीत नच कथयेत्। अत ऊर्द्धमिति सुहृदो मित्राणि

आरोहेद्‌द्रव्यलाभाय व्याधेरपगमाय च ॥
नदीनदसमुद्रांश्च क्षुभितान् कलुषोदकान्।
तरेत्कल्याणलाभाय व्याधेरपगमाय च ॥
उरगो वा जलौको वा भ्रमरो वापि यं दशेत्।
आरोग्यं निर्दिशेत्तस्य धनलाभञ्च बुद्धिमान् ॥
एवं रूपान् शुभान् स्वप्नान् यः पश्येद्व्याधितोनरः।
स दीर्घायुरिति ज्ञेयस्तस्मै कर्म समाचरेत् ॥ १६ ॥

——:*:——

विंशत्तमोऽध्यायः ॥

अथातः पञ्चेन्द्रियार्थविप्रतिपत्तिमध्यायं व्याख्यास्यामः।

शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत्।
तत्त्वरिष्टं समासेन व्यासतस्तु निबोध मे ॥ १ ॥

समिद्धमग्निं प्रज्वलितं वह्निं कल्याणलाभायेति शुभवस्तुप्राप्तये इत्यर्थः। अपगमोनिवृत्तिः, नद्यो गङ्गाद्याः, नदाः प्रसिद्धाः, क्षुभितान् प्रचलितान् वृद्धिं गतानित्यर्थः। कलुषोदकान् यतएव क्षुभितान् अतएवाप्रशस्तोदकानित्यर्थः। उरगः सर्पः दंशेद्भक्षयेत् ॥ १५ ॥ १६ ॥

इति सूत्रस्थाने निबन्धसंग्रहे एकोनविंशोऽध्यायः।

———

पञ्चेन्द्रियाणि श्रोत्रादीनि तेषामर्थाः शब्दादयः, अर्थानां शब्दादीनां विप्रतिपत्तिर्विपरीतावबोधो हीनातियोगेनेत्यर्थः, पञ्चग्रहणं कर्मेन्द्रियाणां उभयात्मकस्य मनसश्च निषेधार्थं कर्मेन्द्रियाणां शरीरग्रहणेनैव ग्रहणात् मनसस्तु इन्द्रियग्रहणेनैव ग्रहणं मनोव्यतिरेकेण इन्द्रियाणां

शृणोति विविधान् शब्दान् यो दिव्यानामभावतः।
तांश्च समुद्रपुरमेघानामसम्पत्तौ च निःस्वनान् ॥

विषयग्रहणाभावात् प्रागध्याये दूतादिद्वैयवाह्यारिष्टप्रतिपाद्यास्मिन्नध्याये आभ्यन्तरमरिष्टमाश्रयभेदेन त्रिविधं संक्षेपेण दर्शयन्नाह। शरीरशील-योरित्यादि। शरीरं पाञ्चभौतिकं प्राणिकायः शीलं मानसो भावः अन्ये तु शीलं समाधानयुक्तं मन इत्याचक्षते, प्रकृतिः स्वाभाविकः प्राणिनो निजोधर्मः एतेषां शरीरशीलप्रकृतीनां त्रयाणां भावानां विकृतिवैपरीत्यं यद्भवेत्तदरिष्टं मरणलक्षणं भवति, समासेन संक्षेपेण अन्ये तु शरीर-शीलयोर्या प्रकृतिस्तदरिष्टं मरणलक्षणं भवति इत्याचक्षते। प्रकृतेः प्रस्ता-वात् किञ्चिद्विचारः क्रियते, सा हि प्रकृतिजात्यादीन् सदृशुपाधौ अपेक्षते तदुक्तं चरके प्रकृतिर्हि जातिप्रसक्ता च कुलप्रसक्ता च देशानुपातिनी च कालानुपातिनी च वयोनुपातिनी च प्रत्यात्मनियता चेति सर्वदेहेषुचका-रकरणमन्योन्यसमावेशार्थं तत्र जातिप्रसक्तानाम् तद्यथा तासु तासु मनुष्यादिजातिषु ते ते करणादयः स्वभावविशेषाः वचनेषु वचनानि विविधा एव. व्यक्ताद्यो धर्मः मनसि च धर्ममैथुनाहारप्रभृतयोऽपि भावः कुलप्रसक्तानाम् द्विजकुले तपःप्रियतादयः क्षत्रियकुले समर-प्रियतादयो धर्मविशेषा भवन्ति देशानुपातिनीनाम् तद्यथा लाटकर्णाटा-दीनां काये वाचि मनसि ते ते स्वभावविशेषा भवन्ति कालानुपातिनीनां देहादिषु दौर्बल्यादि आदानाद्यपेक्षगदेषु च दोषमताद्यपेक्षिणी वयोनु-पातिनीनाम् बाल्याद्यवस्थासु कालादौ सौकुमार्य्यादयो धर्माः एतेषु त्विष्व-नुपातिशब्दप्रयोगात् सम्बारित्वं स्वभावगुणानामिष्टं प्रत्यात्मनियतेति आत्म नियताप्रतिपुरुषनियतेत्यर्थः ते पुनः काये वाचि मनसि च स्वभावविशेषाः प्रतिपुरुषभेदभिन्ना दृश्यन्ते एवं तावत् षोढ़ाप्रकृतिर्भवत्येव अन्ये तु सम-स्यपि भवेत् प्रायो देहे लक्षणहेतुकं उत्तमाधममध्यायुर्लिङ्गानां कारण हिमेति मन्यन्ते अन्ये तु प्रकृतिं सत्वरजस्तमोमयी मन्यन्ते तस्याविकृति-वैपरीत्यं यथा प्रथमं सत्वप्रकृतिरनन्तरं रजस्तमःप्रकृति ॥ १ ॥

तान् स्वनान्नावगृह्णाति मन्यते चान्यशब्दवत् ।
ग्राम्यारण्यस्वनांश्चापि विपरीतान् शृणोत्यपि ॥
द्विषच्छब्देषु रमते सुहृच्छब्देषु कुप्यति ।
न शृणोति च योऽकस्मात्तं ब्रुवन्ति गतायुषं ॥
यस्तूष्णमिव गृह्णाति शीतमुष्णञ्च शीतवत् ।
सञ्जातशीतपिड़को यश्च दाहेन पीड्यते ॥
उष्णगात्रोऽतिमात्रञ्च यः शीतेन प्रवेपते ।
प्रहारान्नाभिजानाति योऽङ्गच्छेदमथापिवा ॥
पांशुनेवावकीर्णानि यस्य गात्राणि मन्यते ।
वर्णान्यभावो राज्यो वा यस्य गात्रे भवन्ति हि ॥ २ ॥
स्नातानुलिप्तं यञ्चापि भजन्ते नीलमक्षिकाः ।

विप्रतिपत्तिं निर्दिशन्नाह। शृणोतीति विविधान् बहुप्रकारान् संजल्पपाठगीतवाद्यादीन् दिव्यानां सिद्धकिन्नरगन्धर्वादीनां समुद्रपुरमेघानामित्यत्र समुद्रादिभिः सहनिस्वनशब्दः प्रत्येकं सम्बध्यते एतेन समुद्रादीनामसम्पत्तौ सम्पत्तावभावेऽपि तेषां शब्दान् शृणोतीत्यर्थः, पुरस्वनः पुरवासिप्राणिशब्दः अन्ये तु पुरस्थाने नुनिति पठन्ति अपरे चातमिति पठन्ति तान् स्वनानित्यादिविद्यमानेषु वासमुद्रादिस्वनेषु तान्न गृह्णाति गृह्णाति वा अन्यप्रतिध्वनीन् विपरीतानिति, ग्राम्यानारण्यांश्च शृणोति आरण्यान् ग्राम्यांश्च शृणोतीत्यर्थः द्विषच्छब्देषु शत्रुशब्देषु सुहृत्मित्रादि अकस्मात् अत्र आतुरग्राह्यनिरुद्धस्पर्शप्रतिपत्तिं दर्शयन्नाह। यस्तूष्णमिति अत्र शीतपीड़काहि कफकृता, तासां याश्चादयो वेदनाविशेषाः प्राकृताः दाहस्तु वैकृत इति प्रहारो वा लगुड़ादिकृतः शस्त्रादिकृतः। आतुरकृतग्राह्यरूपविरुद्धप्रतिपत्तिं दर्शयन्नाह। पांशुनेति पांशुः धूलिः अवकीर्णानि व्याप्तानि राज्योलेखा नीललोहितादयः ॥ २ ॥

सुगन्धिर्वातियोऽकस्मात्तं ब्रुवन्ति गतायुषं ॥
विपरीतेन गृह्णाति रसान् यश्चोपयोजितान् ।
उपयुक्ताः क्रमाद्यस्य रसा दोषाभिवृद्धये ॥
यस्य दोषाग्निसाम्यञ्च कुर्य्युर्मिथ्योपयोजिताः।
यो वा रसान्न संवेत्ति गतासुं तं प्रचक्षते ॥
सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम् ।
यो वा गन्धान्न जानाति गतासुं तं विनिर्दिशेत् ॥ ४ ॥
द्वन्द्वान्युष्णहिमादीनि कालावस्था दिशस्तथा ।
विपरीतेन गृह्णाति भावानन्यांश्च यो नरः ॥
दिवाज्योतींषि यश्चापि ज्वलितानीव पश्यति ।

आतुरगतामेव विरुद्धरसप्रतिपत्तिं दर्शयन्नाह । स्नातेति पूर्वं स्नातः पश्चादनुलिप्तः इत्थम्भूतमपि सुगन्धिकायं वह्निर्मलवर्जितं यदा नीलमक्षिकाः श्रयन्ते तदासौ कालपक्वत्वादतिमधुरीभूतशरीरः येन निर्मलशरीरं मक्षिकाभिः काम्यते इति स्नातानुलिप्तमित्येतदरिष्टं वर्षावधिः । आतुरगतघ्राणगन्धविरुद्धप्रतिपत्तिं दर्शयन्नाह सुगन्धिरिति सुगन्धिर्वा अकस्मात् सुगन्धिप्रयोगं विना भवतीति शेषः, इदमपि वार्षिकमरिष्टं, आतुरगतपञ्चेन्द्रियार्थप्रतिपत्तिं निर्दिश्य आतुरग्राह्यपञ्चेन्द्रियार्थविप्रतिपत्तिं निर्दिश्यायमभिप्रायः । रसदेहमूलत्वेन प्रधानत्वात् तस्यैव विप्रतिपत्तिं दर्शयन्नाह । विपरीतेनेति मधुरोऽम्लः अम्लो मधुर इत्यादि उपयुक्ताः क्रमादिति पूर्वं मधुरमम्लीयादित्यादि क्रमः, गतासुं गतप्राणं एतदरिष्टं मासिकं, गन्धग्रहणमधिकृत्याह सुगन्धमिति शान्ते दीपे निर्वाणे प्रदीपे यो गन्धं न जानाति निरुजो नीरोगः पीनसादिरोगवर्ज्जितः ॥ ३ ॥

. स्पर्शग्रहणमधिकृत्याह द्वन्द्वानीति द्वन्द्वानि कष्टकराणि आदिग्रहणात् स्पर्शग्राह्याणि स्निग्धादिवीर्य्याणि कालावस्था प्रवातनिर्वातवर्षादि, दिश

रात्रौ सूर्य्यं ज्वलन्तं वा दिवा वा चन्द्रवर्चसं ॥
अमेघोपप्लवे यश्च शक्रचापतडिद्गुणान्।
तडित्वतोऽसितान् यो वा निर्मले गगने घनान्॥
विमानयानप्रासादैर्यश्च सङ्कुलमम्बरं।
यश्चानिलं मूर्त्तिमन्तमन्तरीक्षञ्च पश्यति॥
धूमनीहारवासोभिरावृतामिव मेदिनीम्।
प्रदीप्तमिव लोकञ्च यो वा लुतमिवाम्भसा॥
भूमिमष्टापदाकारां लेखाभिर्यश्च पश्यति।
न पश्यति सनक्षत्रां यश्च देवीमरुन्धतीम्॥

इति अनेन मानसः स्पर्श उक्त, द्विविधो हि स्पर्शः स्पर्शेन्द्रियो ग्राह्यो मानसश्च तथा च तन्त्रान्तरं। स्पर्शनेन्द्रियसंस्पर्शस्पर्शो मानस एव च अन्यांश्च भावान् द्रव्यगुणकर्माणि विद्यात्, इदानि एतदरिष्टमेकमासिकमिति दिशो वैपरीत्ये त्रिमासिकं रूपग्रहणमधिकृत्याह। दिवाज्योतीमिति सूर्य्यमेव ज्योतींषि तारकादीनि चन्द्रवर्चसमिति सूर्य्यमेव चन्द्रतेजः समं पश्यतीत्यर्थः। अमेघोपप्लव इत्यादिर्मेघैरनावृतेऽपि नभसि इन्द्रधनुर्विद्युल्लतापश्यतीति शेषः, तडित्वतो विद्युद्युक्तान् असितान् कृष्णान् मेघानिति सम्बन्धः अमेघोपप्लव शक्रचापतडिल्लतारिष्टं द्वित्रिमासिकं, सङ्कुलं व्याप्तं अम्बरमाकाशं मूर्त्तिमन्तं देवताकारं अन्य पुरुषाकारमित्याहुः कुहयेम नीहारव प्रत्यूषकामेदिनीं धूमावृतमिव विभातिनीवरोगं विनापि धूमादिभिरावृतां मेदिनीं पश्यतीत्यर्थः लोकं जगत् प्रदीप्तमिव ग्रीष्मकालादृतेऽपि ज्वलितमिव आप्लुतमिव क्रीडितमिव अम्भसा पानीयेन भूमिं अष्टापदशब्देन लेखाभिः कोष्ठसन्ताननिर्माणचत्वरं क्रीड़नार्थमुच्यते। अरुन्धतीं वशिष्ठभार्य्यां ध्रुवं तारकविशेषः आकाशगङ्गाशब्देन श्लक्ष्णघनतारकसन्ततिर्नद्याकारोच्यते प्रतिबिम्बदर्शनार्थं सम्पूर्णचन्द्रमाकारकांश्यकय उच्यते उष्ण घर्मः ज्योत्स्नातपयोस्तु प्रतिच्छायां छाया-

ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषम् ।
ज्योत्स्नादर्शोष्णतोयेषु छायां यश्च न पश्यति ॥
पश्यत्येकाङ्गहीनां वा विकृतां वाऽन्यसत्वजाम् ।
श्वकाककङ्कगृध्राणां प्रेतानां यक्षरक्षसाम् ॥
पिशाचोरगनागानां भूतानां विकृतामपि ।
यो वा मयूरकण्ठाभं विधूमं वह्निमीक्षते ॥
आतुरस्य भवेन्मृत्युः स्वस्थो व्याधिमवाप्नुयात् ॥ ४ ॥

पुरुषं केचिन्मन्यन्ते विकृतां प्रकृतेरन्यथा भूतां अन्यसत्वजां श्वाकुक्कुरः कङ्कः कङ्कमल्लः तस्य लक्षणमाह । कङ्कः स्यात् कङ्कमल्लाख्यो वाणपक्षार्हो मत्स्यकः लोहपृष्ठो दीर्घपादः पक्षाधःपाण्डुवर्णभा इति भूतानां देवयोनीनां विकृतामपि भूतानि प्राणिनास्तेषां विकृतां विकृतिं गतां छायां पश्यतीति सम्बन्धः । योवा मयूरकण्ठाभमित्यादिसुदीप्तखदिराङ्गारज्वलितं धूमरहितमपि मयूरकण्ठाभं नीलं धूमसदृशं पश्यतीत्यर्थः अत्र दिवा ज्योतिंषीत्यादिविधूमं वह्निमीक्षत इत्येतत्पर्य्यन्तेन ग्रन्थेन पञ्चविधं रूपमुक्तं तथाहि दिवा ज्योतिंषीत्यादिना आकाशस्य रूपिद्रव्यरूपमुक्तं आकाशरूपं सम्भवति यथानिलमित्यादिना वायुरूपमुक्तं धूमनीहारेत्यादिना पृथ्वीरूपमुक्तं प्रदीप्तमित्यादिना वह्निरूपमुक्तं प्लुतमिवाम्भसेत्यनेनापां रूपमुक्तं एवं पञ्चधारूपमुक्तं भूमिमष्टापदाकारामित्यनेन भूमेर्विकृतिदर्शनमुक्तं पूर्वन्तु धूमाद्यावरणदर्शनमवेति न पौनरुक्त्यं तदुक्तं न पश्यन्ति स नक्षत्रामित्यनेन व्योमस्थानमदर्शनमुक्तं । दिवाज्योतिंषीत्यादि तु पूर्वदर्शितमुक्तं अतो न पौनरुक्तं । ज्योत्स्ना दर्शोष्णा तोयेष्वित्यादिना रूपस्यायोग उक्तः । अन्ते मिथ्याग्रहणमधिकृत्योक्तं योवा मयूरकण्ठाभमित्यादिना एतदरिष्टफलं दर्शयन्नाह आतुरस्य भवेन्मृत्युरिति ॥ ४ ॥

इति सूत्रस्थाने निबन्धसंग्रहे त्रिंशत्तमोऽध्यायः समाप्तः ।

एकविंशत्तमोऽध्यायः।

अथातश्छायाविप्रतिपत्तिमध्यायं व्याख्यास्यामः।

श्यावा लोहितिका नीला पीतिका वापि मानवं।
अभिद्रवन्ति यं छायाः स परासुरसंशयम् ॥
ह्रीश्रियौ नश्यतो यस्य तेज ओजः स्मृतिःप्रभा।

अत्र छायाशब्दानन्तरं लुप्तादिशब्दनिर्देशात् ह्रीश्रीतुष्ट्यादिविप्रतिपत्तयो ग्राह्याः वर्णप्रभाश्रिताया भवति सा च्छायाशब्देनोच्यते छायाप्रभयोऽस्तु भेदः शास्त्रकारैरुक्तः तथा च वर्णमाक्रामति छायाप्रभावर्णप्रकाशिनी। आसन्ना लक्ष्यते छायाप्रभादूरात्त लक्ष्यते प्रभादूरात्तु इत्यत्र प्रभाद्दूरात्यलक्ष्यते इति क्वचित् पुस्तके पाठोऽस्ति। न केवलं वर्णप्रभाच्छायानां लक्षणभेदः संख्याभेदोऽप्यस्ति तथा हि चतुर्विधो वर्णः गौरः कृष्णः श्यामो गौरश्याम इति प्रभा सप्तविधा रक्ता पीता सिता श्यावा हरिता पाण्डुवासिता इति छाया पञ्चविधा स्निग्धा विमला रूक्षा मलिना संक्षिप्ता इति छाया विरुद्धप्रतिपत्तिं दर्शयन्नाह। श्यावेत्यादि अत्र यदि श्यावा लोहितिका नीलेत्यादयः प्राकृताच्छायास्तथाप्यभूतपूर्वा आकस्मिका विपर्य्ययेन यं पुरुषमभिद्रवन्ति ता इह गृह्यन्ते: अभिद्रवन्ति अनुसरन्ति उपतिष्ठन्ति इत्यर्थः, परासुः गतप्राणः पूर्वाध्याय निर्दिष्टशीलविकृतिः तथा छायासदृशीं प्रभानिर्दिशन्नाह। ह्रीति, ह्रीर्लज्जा, प्रभापूर्वोक्तलक्षणा, स्मृतिः पूर्वानुभूतस्मरनं, धृतिनियमात्मिका, तुष्टिः सन्तोष इत्यर्थः, श्रीःकमनीयता प्रभाविकृतिं विहाय अपराः शीलविकृतयः केचित् पठन्ति ह्रीश्रियौ नश्यतो यस्य तेज ओजः स्मृतिः प्रभा शेषं समं पठन्ति व्याख्यानयन्ति च श्रीर्धृतिं तेजोऽत्र चेष्टा लक्षणं बलमभिधीयते ओजस्तु शुक्लं हृदयस्थधातुधामशोभत्यति तेजसां वैपरीत्यं वार्षिकमरिष्टं छायादिविप्रतिपत्त्यनन्तरं

अकस्माद्यं भजन्ते वा स परासुरसंशयम् ॥
यस्याधरौष्ठः पतितः क्षिप्तश्चोर्द्धं तथोत्तरः।
उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितम् ॥ १ ॥
आरक्ता दशना यस्य श्यावा वा स्युः पतन्ति च।
खञ्जनप्रतिमा वापि तं गतायुषमादिशेत् ॥
कृष्णा स्तब्धावलिप्ता वा जिह्वा शूना च यस्य वै।
कर्कशा वा भवेद्यस्य सोऽचिराद्विजहात्यसून् ॥
कुटिलास्फुटिता वापि शुष्का वा यस्य नासिका।
अवस्फूर्जति मग्ना वा न स जीवति मानवः ॥
सङ्क्षिप्ते विषमे स्तब्धे रक्ते स्रस्ते च लोचने।
स्यातां वा प्रस्रुते यस्य स गतायुर्नरो ध्रुवं ॥

वैपरीत्य सामान्यादोष्ठादीनामवयवानां विकृतिं दर्शयन्नाह। यस्येति अधर ओष्ठः अधस्तन ओष्ठः पतितः लम्बायमानः उत्तर उपरितन ओष्ठः ऊर्द्धं क्षिप्तः पतित इत्यर्थः। जाम्बवाभाभाविति जम्बूफलसदृशौ, ओष्ठारिष्टेन दन्तारिष्टेन च सान्निपातिककालप्रमाणेन ते ॥ १ ॥

आरक्तेत्यादि अत्र श्यावदन्तत्वमरिष्टं सामान्यं विषयं न पुनर्विसूचीविषमेव खञ्जनप्रतिमा इति मर्द्दनादीनामगारधूमान्तरचितमुपस्तरणं खञ्जनमुच्यते यस्य खरजिह्वामित्याहु मृदङ्गवादकाः अन्ये खञ्जरीटमाहुः तद्वर्णः शुक्लकृष्णा इत्यर्थः कृष्णेत्यादि विशेषतस्तु जिह्वावलिप्ता न पुनर्लेपोत्पत्त्यादिना अन्ये तु प्रमेह पूर्वरूपे तु मलोत्पत्त्यानुलेपो लक्ष्यनिमित्तत्वात् अरिष्टं न भवति शूलाश्वयथुयुक्ता विजहाति विशेषेण त्यजति असून् प्राणान् एतदरिष्टं पाचिकम्। कुटिलेत्यादिकुटिला वक्रा स्फुटिता विकसिता अवस्फूर्जतिशब्दायते भग्नात्रुटिता एतदरिष्टं चक्षुररिष्टञ्च सप्तरात्रिकं। सङ्क्षिप्ते इति सङ्क्षिप्ते सङ्कुचिते विषमेनिम्नोन्नते स्तब्धेऽत्र निश्चे-

केशाः सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ ।
लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे ॥ २ ॥
नाहरत्यन्नमास्यस्थं न धारयति यः शिरः ।
एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान् जहाति सः ॥
बलवान् दुर्बलो वापि सम्मोहं योऽधिगच्छति ।
उत्थाप्यमानो बहुशस्तं धीरः परिवर्जयेत् ॥
उत्तानः सर्वदा शेते पादौ विकुरुते च यः ।
विप्रसारणशीलो वा न स जीवति मानवः ॥
शीतपादकरोच्छ्वासश्छिन्नश्वासश्च यो भवेत् ।
काकोच्छ्वासश्च यो मर्त्यस्तं धीरः परिवर्जयेत् ॥
निद्रा न छिद्यते यस्य यो वा जागर्त्ति सर्वदा ।
मुह्येद्वा वक्तुकामस्तु प्रत्याख्येयः स जानता ॥

क्षे, स्रस्तेऽधः पतिते स्यातां भवेतां । केशा इति सीमन्तः केशमार्गः सङ्क्षिप्ते सङ्कुचिते विनतेऽधः पतितेऽलुनन्ति अनवरतं चलन्तीत्यर्थः । पक्ष्माणि चक्षुराच्छादनरोमाणिभ्रुवावभिसीमन्ति न्याविति सम्बध्नन्ति केचित् एतदरिष्टं स्वस्थस्य षड्मासादातुरस्य चिरात्तांमरणाय केचिदत्र सीमन्तारिष्टं तथा जिह्वा नेत्रविकारारिष्टं एतदन्तरञ्चतुरविषयमेवाचक्ष्यते । चरयेवैषान्तेषु प्रदिशिष्कृतत्वात् नैतदित्यन्ये पुनर्वचनात् तेषां चर एवोक्तत्वात् इति कश्चिन् पुस्तके पाठोऽस्ति । चक्षुषोरेवोक्तत्वात् पुनरिहतद्वचनमनर्थकमेव स्यात् ॥ २ ॥

कायावयवक्रियाविप्रतिपत्तिमधिकृत्याह । नाहरतीति नाहरति न गिलति, आस्यस्थं मुखस्थं मूढात्मा विस्मृतशीलः सद्य इति तस्मिन्नेवाहनि प्राणत्यय इत्यवगन्तव्यं बलवानिति अत्र संमोहं मूर्च्छां बहुशो वारम्वारं

उत्तरौष्ठञ्च यो लिह्यादुद्गारांश्च करोति यः।
प्रेतैर्वा भासते सार्द्धं प्रेतरूपं तमादिशेत् ॥ ३ ॥
खेभ्यः सरोमकूपेभ्यो यस्य रक्तं प्रवर्त्तते।
पुरुषस्याविषार्त्तस्य सद्यो जह्यात्स जीवितम् ॥
वाताष्ठीला तु हृदये यस्योर्द्ध्वमनुयायिनी।
रुजान्नविद्वेषकरी स परासुरसंशयं ॥
अनन्योपद्रवकृतः शोफः पादसमुत्थितः।
पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयं ॥
अतिसारो ज्वरो हिक्का छर्द्दिः शूनाण्डमेढ़ता।
श्वासिनः कासिनो वापि यस्य तं परिवर्ज्जयेत् ॥

पक्वं कालपक्वं मृत्युग्रस्तमित्यर्थः एतदरिष्टं सप्तरात्रं जीवितावधि उत्तान इति शेते स्वपिति विकुरुते मुहुर्मुहुस्तत् प्रसारण सङ्कोचौकरोति विप्रसारणशीलः पादसङ्कोचन शीलः एतदरिष्टं सद्योमरणकरः। शीतपाद इति पादौ करौ उच्छ्वासश्च त्रयमेतद्यथा एकदैवशीतं भवति तदा एतदरिष्टं ज्ञेयं छिन्नोच्छ्वासश्च छिन्नश्छिन्न ऊर्द्धं श्वसितीत्यर्थः। काकोच्छ्वास इति काकवद्व्याननः श्वसितीत्यर्थः एतदरिष्टं सद्योमरणकरं निद्रेत्यादिलिह्यात् स्वादयेत् उत्करान् उद्गारानित्यर्थः प्रेतैर्भूतैः सार्द्धं सहेत्यर्थः ॥ ३ ॥

शरीरदेशविशेषाश्रितव्याधिविशेषानरिष्टकृतान् दर्शयन्नाह। खेभ्य इति खेभ्यः स्रोतोभ्यः जह्यात् त्यजेत् वातष्ठीलेतिवातष्ठीलेववातष्ठीलानतु वातव्याधिपठितावातष्ठीलेव गृह्यते अपसैव हृदयमागत्य एवं लक्षणा यदाभवति तदा अरिष्टमिति, रुजान्नविद्वेष करोति अन्नविद्वेषकरीत्यर्थः। अनन्येति अनन्योपद्रवैः कृतः कोऽर्थं शोफस्यैवोपद्रवैः श्वासपिपासा दौर्बल्यादिभिः कृत इत्यर्थः इत्यम्भूतः शोफः पादसमुत्थितः पुरुषं हन्ति इत्थंभूतः श्वयथुर्मुखजो नारीं, इत्थंभूत

स्वेदो दाहश्च बलवान् हिक्का श्वासश्च मानवं ।
बलवन्तमपि प्राणैर्वियुञ्जन्ति न संशयः ॥
श्यावा जिह्वा भवेद्यस्य सव्यं चाक्षिनिमज्जति ।
मुखञ्च जायते पूति यस्य तं परिवर्जयेत् ॥ ४ ॥
वक्त्रमापूर्य्यतेऽश्रूणां स्विद्यतश्चरणावुभौ ।
चक्षुश्चाकुलतां याति यमराष्ट्रं गमिष्यतः ॥
अतिमात्रं लघूनि स्युर्गात्राणि गुरुकाणि च ।
यस्याकस्मात्स विज्ञेयो गन्ता वैवस्वतालयं ॥

एवशोफो गुह्यजोऽयं पुरुषं नारीञ्च हन्तीति सम्बन्धः अन्ये तु अन्यैरुपद्रवैः पाण्डुरोगादिभिः कृतः पाण्डुरोगोदरार्शः प्रभृतिश्वयथुकारणं विहायान्यकारणसमुत्थः पादशोफोऽसाध्यः पाण्डुरोगादि कृतस्तु साध्य इति अपरे तु अनन्योपद्रवगत इति पठन्ति अत्र अनन्यः स्वकीयोपद्रव उच्यते अनन्योपद्रवं स्वकीयोपद्रवं श्वासपिपासा दौर्बल्यादिकं गतःप्राप्त इत्यर्थः स्वकीयोपद्रवं विहायान्योपद्रवं पाण्डुरोगादिगतो नारिष्टमिति भावः अपरे आननोपद्रवगत इति मन्यन्ते तत्र पादतलाच्छोफ आननं मुखमुपद्रवैः सहप्राप्त इत्यर्थः । अतिसार इति काशवतः श्वासवतो वा पुरुषस्य यदा अतिसारादयो भवन्ति तदार्त पुरुषं क्षीणं मृतमादिशेत्कथयेदित्यर्थः एतदरिष्टं समरात्रिकं, स्वेद इति बलवानतिशयेन वियुञ्जन्तिप्राणैः सहवियोगं कुर्वन्तिमारयन्तीत्यर्थः । एतदरिष्टं त्रिरात्रिकं श्यावेति यस्य पूतिमुखं सटितं भवतीत्यर्थः । एतत्त्रितयमपि समुदाये नैवारिष्टं केचिदिदमरिष्टं सान्निपातिकमाहुः अतएव मरणमर्य्यादापि तत् प्रमाणिनैव ॥ ४ ॥

वक्त्रेति आपूर्य्यते क्रियते अश्रूणां चक्षुरम्भसां स्विद्यत इति स्वेदयुक्तौ आकुलतां यातीति ओदनमण्डादिनेव पूर्णोऽचिरेणेगमिष्यतः गन्तुमिच्छतः पुरुषस्य चरणाविति द्विवचने लब्धे उभशब्दो यौगपद्यस्य ज्ञापक इत्यर्थः ।

पङ्कमत्स्यवसातैलघृतगन्धांश्च ये नराः।
मृष्टगन्धांश्च ये वान्ति गन्तारस्ते यमालयं॥
यूका ललाटमायान्ति वलिं नाश्नन्ति वायसाः।
येषां वापि रतिर्नास्ति यातारस्ते यमालयं॥
ज्वरातिसारशोफाः स्युर्यस्यान्योन्यावसादिनः।
प्रक्षीणबलमांसस्य नासौ शक्यश्चिकित्सितुं॥
क्षीणस्य यस्य क्षुत्तृष्णे हृद्यैर्मिष्टैर्हितैस्तथा।
न शाम्यतोऽन्नपानैश्च तस्य मृत्युरुपस्थितः॥
प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणं।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः॥ ५ ॥
विषमेणोपचारेण कर्मभिश्च पुराकृतैः।
अनित्यत्वाच्च जन्तूनां जीवितं निधनं व्रजेत्॥

एतदरिष्टं मौहूर्त्तिकं प्राहरिकञ्च। अतिमात्रमिति अत्र गात्राणि परिचारकैः सम्बाहकैश्चोत्थाप्यमानान्यकस्मात् कारणं विना लघूनिलघुतराणि अथवा गुरूणि स्थूलानि अथवा लघूनि कृशानि स्युर्भवेयुः वैवस्वतो यमः आलयं गृहं गन्ताः गमिष्यतीत्यर्थः। पङ्केत्यादिमृष्टान् गन्धान् ये पुरुषावन्ति शोभनगन्धान् वमन्तीत्यर्थः एतदरिष्टं वार्षिकं। युकेत्यादिवलिं काकवलिं यस्य रतिर्नास्ति यस्य सुखं नास्ति न रमते क्कापोत्यर्थः परलोके बद्धरतित्वात् एतदरिष्टं वार्षिकं। ज्वरेत्यादि अन्योन्यावसादिनः परस्परोपद्रविणः बलमुत्साहलक्षणं क्षीणस्येति प्रवाहिका अतिसारभेदः उपसमीपेस्थित इत्यर्थः॥ ५॥

कस्मादेतान्यरिष्टान्युत्पद्यन्ते येभ्योनियतं यातीत्याह। विषमेनेति प्रकृतेर्बलादीन् भावा न वेत्त्यकृत उपचारः समोपचारः तद्विपरीतो विषमोपचारः पुराकृतैः पूर्वजन्मार्ज्जितैः कर्मभिः शरीरस्थापकैः क्षीणैरित्य-

प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च ।
मरणाभिमुखं नित्यमुपसर्पन्ति मानवं ॥
तानि भेषजवीर्य्याणि प्रतिघ्नन्ति जिघांसया ।
तस्मान्मोघाः क्रियाः सर्वा भवन्त्येव गतायुषः ॥ ६ ॥

——:*:——

ख्याहारः अनित्यत्वाद्विनाशित्वादित्यर्थः, निधनं विनाशः, अन्येऽरिष्टाद्न्यतोऽपि मरणमुत्पद्यत इत्याहुः तथा हि युक्तिव्यपाश्रयं मरणमुक्तं विषमेणोपचारेणेत्यनेन दैवव्यपाश्रयन्तु मरणं कर्म्मभिः पुराकृतैरित्यनेनोक्तं स्वभावादप्यनित्यं जीवितं अनित्यत्वाच्चेत्यनेनोच्यते एतेन त्रिहेतुकं मरणमुक्तं । ननु सर्व्वत्रारिष्टमन्तमरणायोत्पद्यते तत् कथं मरणे हेत्वन्तराण्युक्तानि ? सत्यं उल्लङ्घित चिकित्सामार्गे दोषैर्जन्यते मरणं रिष्टमपि च तथाविधैरेव दोषैर्जन्यते अतएव एकसामग्रीजनितमेवारिष्टमिति न दोष इति मन्यन्ते, कस्मात्पुनर्मरणमप्रतिसाधनमित्यत आह । प्रेता इति प्रेताः प्राणिनां विगतिं प्राप्ताः, भूताग्रभानुचराः, पिशाचाः पिशिताः देवयोनयः, रक्षांसि-रावणानुचराः हीनि, उपसर्पन्ति समीपं गच्छन्ति, जिघांसया हन्तुमिच्छया, मोघा निष्फला अन्ये व्याख्यानयन्ति शरीरव्याधिषु क्रिया वैफल्यहेतवः प्रागुक्ताः तथा हि सस्थिरत्वान्महत्वाच्च धात्वनुक्रमणेन चानिहन्तौषधवीर्य्याणि मन्त्रान् दुष्टग्रहो यथेति आगन्तुषु पुनरत्र भूतानुबन्धाच्च क्रियावैफल्यं दर्शयति प्रेता इत्यादिना तत्र प्रेता अकृतैकोद्दिष्टा भविष्यत् पितृभेदाः भूताः पिशाचभेदाः, रक्षांसिविविधानि च इति ब्रह्मराक्षसादिभेदा विविधानि नानाप्रकाराणि इत्यर्थः चकारद्वयमौषधवीर्य्यापद्यते तुल्यसामर्थ्यं समुच्चिनोति तथा हि यथा सस्थिरत्वादित्यादौ शारीरव्याधिक्रिया प्रतिघातसामर्थ्यमुक्तं तथा आगन्तुव्याधिक्रियाप्रतिघातसामर्थ्यमप्यत्र प्रेतात्यादौ ॥ ६ ॥

इति सूत्रस्थाने निबन्धसंग्रहे एकत्रिंशत्तमोऽध्यायः ।

द्वात्रिंशत्तमोऽध्यायः ॥

अथातः स्वभावविप्रतिपत्तिमध्यायं व्याख्यास्यामः ।

स्वभावप्रसिद्धानां शरीरैकदेशानामन्यभावित्वं मरणाय । तद्यथा । शुक्लानां कृष्णता, कृष्णानां शुक्लता, रक्तानामन्यवर्णत्वं, स्थिराणामस्थिरत्वं, मृदूनां स्थिरता, चलानामचलत्व-

स्वभावशब्दानन्तरमादिशब्दो लुप्तो द्रष्टव्यः तेन स्वभावादिविप्रतिपत्तिरित्यर्थः । स्वभावशब्देनात्र प्रकृतिरुच्यते तां स्वभावविप्रतिपत्तिं संक्षेपेण तावन्निर्दिष्टुमाह । स्वभावसिद्धानामिति अन्यभावित्वं गुणकर्मभ्यां कृत्वा तथा विशिष्टद्रव्यान्तरसंयोगश्च शिरानां दर्शनं ललाटे नासावंशे वा पिड़कोत्पत्तिरित्यादिना वक्ष्यमाणः तत्र स्वभावसिद्धानां शरीरैकदेशानामन्यथाभावित्वं विस्तारेणोपदर्शयन्नाह । तद्यथेति अकस्माच्च शुक्लानां दृश्यैकदेशानां निर्मितं कार्ष्ण्यं मरणाय कृष्णानां लोचनमध्यस्य तारुण्ये केशश्मश्रुलोम्नाञ्च शुक्लत्वमरिष्टं रक्तानां नेत्रत्रिपादकरतात्वोष्ठ-जिह्वानामाकस्मिकमन्यवर्णत्वं श्वेतपीतकृष्णनीलत्वमरिष्टमिति स्थिराणां कठिनानां केशश्मश्रुनखदन्तशिरास्नायुस्रोतःप्रभृतीनां मृदुत्वं कोमलत्वमरिष्टमिति, मृदूनां मांसशोणितमेदोमज्जशुक्रनाभिहृदययकृत्प्लीहप्रभृतीनां स्थिरत्वं काठिन्यं विकृतिरिति केचिन्मृदूनामित्यत्र अदृढानामिति, पठन्ति चलानां वाताश्रयात् शिरासन्धिजिह्वादीनामस्पन्दत्वमरिष्टमिति शिरादयैव चला भवन्ति तासु शारीरे च वक्ष्यति अचलामांसमेदोऽस्थिनाभयस्तेषां चलत्वमरिष्टं अन्येतु नासाकर्णमांसादीनामित्याहुः । पृथूनां संक्षिप्तत्वमिति विस्तीर्णानां स्वल्पत्वं अत्र शिरो ललाटवक्त्रांसोरःपृष्ठादीनि च तेषां संक्षिप्तत्वमरिष्टं संक्षिप्तानां दृष्टिमण्डलनखरोमगुल्फादीनां पृथुत्वमरिष्टं दीर्घानां नयनभुजाङ्गुलिपर्वोच्छ्वासनादीनां ह्रस्वत्वमरिष्टं,

मचलानां चलता, पृथूनां सङ्क्षिप्तत्वं, सङ्क्षिप्तानां पृथुता, दीर्घाणां ह्रस्वत्वं, ह्रस्वानां दीर्घताऽपतनधर्मिणां पतनधर्मित्वं, पतनधर्मिणामपतनधर्मित्वमकस्माच्च शैत्यौष्ण्यस्नैग्ध्यरौक्ष्यप्रस्तम्भवैवर्ण्यावसदनञ्चाङ्गानां ॥ १ ॥

स्वेभ्यस्थानेभ्यः शरीरैकदेशानामवस्रस्तोत्क्षिप्तभ्रान्तावक्षिप्तपतितविमुक्तनिर्गतान्तर्गतगुरुलघुत्वानि। प्रवालवर्णव्यङ्गप्रादुर्भावोऽप्यकस्मात्। सिराणाञ्च दर्शनं ललाटे नासावंशे वा पिडकोत्पत्तिः। ललाटे प्रभातकाले वा

ह्रस्वानां जङ्घामेढ्रग्रीवादीनां दीर्घत्वमरिष्टं अपतनधर्मिणां पतनधर्मित्वमिति पतनधर्मित्यादिभिर्वक्ष्यमाणैश्च शैत्योष्ण्यादिभिः सह प्रत्येकं सम्बध्यते। शैत्येत्यादि-हस्तपादोच्छासादिषु स्वभावोष्णता युक्तेषु शैत्यं शीतत्वयुक्तेषु फुत्कारादिषु च औष्ण्यं स्निग्धतायुक्तेषु नयनतारकादिषु रौक्ष्यं अनभ्यक्तकेशत्वगादिषु स्वेषु स्निग्धत्वं: प्रस्तम्भः प्रकर्षेण स्तब्धता, नेत्रयोरङ्गावयवानां च वैवर्ण्यं गौरश्यामादिवर्णानां वैपरीत्यं अवसादोऽप्रवृत्तिः वैकल्यमित्यर्थः केचिद्वैवर्ण्योपसर्जनं जगतामिति पठन्ति व्याख्यानयन्ति च उपसर्जनं तद्भावापत्तिरित्यर्थः ॥ १ ॥

स्वेभ्य इति अवस्रस्तत्वं भ्रूपक्ष्मप्रभृतीनां स्थानादयः, प्रलम्बनं उत्क्षिप्तत्वं तेषामेवोर्द्धगमनं, भ्रान्तत्वं चक्षुरादीनां भ्रमणं, अवक्षिप्तत्वं तेषामेव तिर्य्यक्क्षिप्तत्वं, पतित्वं शिरोग्रीवादीनामवधार्य्यमानता विमुक्तत्वं सन्धीनां मोक्षः, निर्गतत्वं वहिःनिःसरणं जिह्वा नेत्रप्रभृतीनां अन्तर्गतत्वं, जिह्वानेत्रनासादीनामन्तःप्रवेशः, अनिर्गतत्वमिति केचित् पठन्ति तत्रापि सएवार्थः गुरुलघुत्वानि बाहुशिरः शकथ्यादीनि, लघून्यक्षिपक्ष्मादीनि, तेषां विपरीतत्वमरिष्टं अक्षिप्तत्वमित्यत्रावक्षिप्तमिति केचित् पठन्ति तत्रापि स एवार्थः। प्रवालवर्णेत्यादिव्यङ्गानां क्षुद्ररोगविशेषाणामकस्मादनिमित्तं प्रवालसदृशवर्णता प्रादुर्भावो भवती-

स्वेदः। नेत्ररोगाद्विना वाष्पप्रवृत्तिः। गोमयचूर्णप्रकाशस्य वा रजसो दर्शनमुत्तमाङ्गे निलयनं वा कपोतकङ्कप्रभृतीनां। मूत्रपुरीषवृद्धिरभुञ्जानानां तत्प्रणाशो भुञ्जानानां। स्तनमूलहृदयोरःसु च शूलोत्पत्तयः मध्ये शूनत्वमन्तेषु परिम्लायित्वं विपर्य्ययो वा तथार्द्धाङ्गे श्वयथुः। शोषोऽङ्गपक्षयोर्वा नष्टहीनविकलविकृतस्वरता॥२॥

विवर्णपुष्पप्रादुर्भावो वा दन्तमुखनखशरीरेषु। यस्य वाप्सु कफपुरीषरेतांसि निमज्जन्ति। यस्य वा दृष्टि-

त्यर्थः। प्रवालो विद्रुमः स च समुद्रजातोऽत्यन्तरक्तो वल्लीविशेषः व्यङ्गरोगस्य श्यावत्वं प्राकृतं रक्तत्वं वैकृतं सिराणामिति प्रवालवर्णानामित्यत्रापि चकारात् सम्बन्धनीयः। अथवा प्राकृतं तत् सिराणां दर्शनमरिष्टमिति नासेत्यादिपिड़काया: प्रवालवर्णाया इत्यत्रापि ज्ञेयं नासावंशो नासास्थिदण्डः अन्ये तु नासावंशे ललाटे च पिड़काया: उत्पत्तिं वा शब्दात्मन्यन्ते। ललाट इति अत्र प्रलेप ज्वरणो इति शेषो ज्ञेयस्तन्त्रान्तरे दर्शनात्। नेत्ररोगादिति अयं पाठो निबन्धेषु न पठितं वृद्धैः पठितत्वादस्माभिरपि पठितः। गोमयेत्यादिर्गोमयं गोपुरीषं तस्य रजःप्रकाशस्येत्यादिप्रथमं मासिकं रिष्टं निलयनं वेत्यादिर्द्वितीयन्तु उत्तमाङ्ग इत्यत्रापि सम्बध्यते निलयनमिति उपवेशनं, मूत्रेति अत्रापि भुञ्जानानां वेति बोद्धव्यं एतच्च तत्प्रणाशेन सह यदा सनृदितं भवति तदा अरिष्टमिति ज्ञेयम्। मध्य इति मध्ये शूनत्वं अन्तेषु शूनत्वं मध्ये च परिम्लायित्वं एतद्रिष्टं मासिकं। तथेति अर्द्धाङ्गे श्वयथौ सति अर्द्धे परिम्लायित्वमिति योज्यं अङ्गपक्षयोरिति पक्षः शरीरार्द्धम्। नष्टहीनेति नष्टस्वरता अत्यन्तस्वराभावः, हीनस्वरता शब्दक्षत्वं, विकलस्वरता गद्गदादिस्वरत्वं विकृतस्वरता स्वाभाविकस्य वैपरीत्यम्॥२॥

विवर्णेति विवर्णपुष्पप्रदुर्भावः अनुज्ज्वलनवर्णविन्दुप्रादुर्भावो दन्तादि-

मण्डले भिन्नविकृतानि रूपाण्यालोकयन्ते। स्नेहाभ्यक्तकेशाङ्ग इव यो भाति। यश्च दुर्बलो भक्तद्वेषातिसाराभ्यां पीड्यते। कासमानश्च तृष्णाभिभूतः। क्षीणश्छर्दिभक्तद्वेषयुक्तः सफेनपूयरुधिरोद्वामी हतस्वरः शूलाभिपन्नश्च मनुष्यः शूनकरचरणवदनः क्षीणोऽन्नद्वेषी स्रस्तपिण्डिकांसपाणिपादो ज्वरकासाभिभूतः यस्तु पूर्वाह्णे भुक्तमपराह्णे छर्दयत्यविदग्धमतिसार्य्यते वा ज्वरकासाभिभूतः स श्वासान्म्रियते। बस्तवद्विलपन् यश्च भूमौ पतति स्रस्तमुष्कस्तब्धमेढ्रो भग्नग्रीवः प्रनष्टमेहनश्च मनुष्यः॥ ३॥

यस्येति यस्य पुरुषस्य अप्सु पानीयेषु निमज्जन्तिप्रणन्ति एतदरिष्टन्तु यत्र त्रयाणां अपि मज्जनं भवति तदरिष्टमिति ज्ञेयं मासिकञ्चैतदरिष्टम्। यस्येति भिन्नानि नानाविधानि गवाक्षप्रभृतीनां विकृतानि विभक्तानि त्रिभुजत्रिशिर आदित्वेन अधिकाङ्गानि एकाक्षि एकभुजैककर्णादित्वेन वा न्यूनाङ्गानि यस्य पुरुषस्य दृष्टिमण्डलाभ्यन्तर एवम्विधानि रूपाणि आलोकयन्ते दृश्यन्ते तस्यारिष्टम्, अन्ये तु यस्य वा दृष्टि मण्डले अभिन्ने इति दृष्टिमण्डलविशेषणमभिन्ने इति कुर्वन्ति अत्र भिन्न इत्यत्र अभिहत यो भेदः आध्यात्मिकदोषेभ्यो वा भेदोऽभिप्रेतः तत्र विकृतरूपावलोकनं स योऽरिष्टं पाञ्चवार्षिकं वा इति व्याख्यानयन्ति स्नेहेति सर्वदा यद्येवं भवति तदाऽपीदमरिष्टम्। यस्येति यः पुमान् दुर्वलो वलहीन मांसहीनो वा तत्र कासतृष्णारुच्यतीसार इति समुदितमरिष्टं दुर्बले नरे। क्षीणेति क्षीणे नरे यदा छर्य्यादय उपद्रवाः समुदिता भवन्ति तदारिष्टं। शूनेति ज्वरकासाभिभूते क्षीणे नरे यदा शूनकरचरणाद्युपद्रवा भवन्ति तदा अरिष्टम्। स्रस्तपिण्डिकः शिथिलजानून्यन्तरालस्थितमांसपिण्डः स्रस्तशब्दः पिण्डिकादिभिः सह प्रत्येकं सम्बध्यते अंसःस्कन्धः। यस्त्विति यथा शौनिकेन व्यापाद्यमानो वस्तश्छगलको विलपन् शब्दं कुर्व्वन् भूमौ

प्राग्विशुष्यमाणहृदय आर्द्रशरीरो यश्च लोष्टं लोष्ठेनाभिहन्ति काष्ठं काष्ठेन तृणानि वा छिनत्ति। अधरोष्ठं दशत्युत्तरोष्ठं वा लेढि। आलुञ्चति वा कर्णौ केशांश्च। देवद्विजगुरुसुहृद्वैद्यांश्च द्वेष्टि यस्य वक्रानुवक्रगा ग्रहा गर्हितस्थानगताः पीड़यन्ति जन्मर्क्षं वा यस्योल्काशनिभ्यामभिहन्यते होरा वा। गृहदारशयनासनयानवाहनमणिरत्नोपकरणगर्हितलक्षणनिमित्तप्रादुर्भावेनेति।

भवन्ति चात्र।

चिकित्स्यमानः सम्यक् च विकारो योऽभिवर्द्धते।
प्रक्षीणबलमांसस्य लक्षणं तद्गतायुषः॥

पतति तद्दन्मनुष्योऽप्यरिष्टयुक्त इति, अस्तमुष्क इति स्थानाच्च्युताण्डः, स्तब्धमेढ्रः स्तब्धलिङ्गः, भग्नग्रीव इति नतग्रीवः, प्रणष्टमेहनश्चेति अन्तःप्रविष्टलिङ्ग इत्यर्थः, अत्र चकारो वा शब्दार्थः तेन स्तब्धमेढ्रो भवति प्रणष्टमेहनो भवतीत्यर्थः॥ २॥

प्रागिति यस्य शरीरमार्द्रमेवावतिष्ठते हृदयं प्रथममेव शुष्यति तस्यारिष्टं एतदरिष्टं पाक्षिकं, यश्चेति तृणानिच्छिनत्तिनखैरिति शेषः। अधरोष्ठं दशतीति अधस्तनमोष्ठं दन्तैर्गृह्णातीत्यर्थः देवेति सुहृन्मित्रं द्वेष्टि। भवति एतदरिष्टं वार्षिकम्। यस्येति समालन्तं राशिमुक्त्वा पुनः पूर्वमेवमुक्तराशिं नक्षत्रं वा यातिसवक्रगः पुनश्चानुगमनमेवोत्तरस्थाने अनुवक्रगा गर्हितस्थानगता इति ग्रहा इति सम्बध्यते तत्र गर्हितं निन्दितं स्थानं ज्योतिः शास्त्रादेवावगन्तव्यं जन्मर्क्षं जन्मनक्षत्रं, तेजःपिण्डनिपतनमुल्का, अशनिविद्युद्विभेदः, एताभ्यां यदा आकाशे उदितं जन्मनक्षत्रं तदपि यदा उल्काशनिभ्यां हन्यत इत्यर्थं, गृहेत्यादिगृहादीनां यानिगर्हितलक्षणानि वास्तुविद्यादिप्रोक्तानि तन्निमित्तसूत्कारणः प्रादुर्भाव उत्पत्तिररिष्टस्येत्यर्थः, दाराभार्या, यानं शिबिकारथादि, वाहनं

निवर्त्तते महाव्याधिः सहसा यस्य देहिनः।
न चाहारफलं यस्य दृश्यते स विनश्यति॥
एतान्यरिष्टरूपाणि सम्यग्बुध्येत यो भिषक्।
साध्यासाध्यपरीक्षायां स राज्ञः सम्मतो भवेत्॥

त्रयस्त्रिंशत्तमोऽध्यायः॥

अथातोऽवारणीयमध्यायं व्याख्यास्यामः।

उपद्रवैस्तु ये जुष्टा व्याधयो यान्त्यवार्य्यताम्।
रसायनाद्विना वत्स तान् शृणुष्वैकमना मम॥

हस्त्यादि, मणयः स्फटिकादयः रत्नशब्दो गृहादिभिः सहप्रत्येकं सम्बध्यते, उपकरणानि घटपिठरसूर्प्यादीनि। सर्वविकाराणामनुक्तमरिष्टमभिनिर्द्दि-श्नाह। चिकित्स्येत्यादिमहाव्याधिः वातव्याधिः प्रमेहादिरष्टविधशो-षादिः काय्यचिकित्सा पठितः सहसा वेगेनेत्यर्थः, अरिष्टज्ञानफलं दर्शय-न्नाह। एतानीति साध्यासाध्येत्यादि सवैद्यः साध्यासाध्यौ यः नृपते श्लाघ्य भवति॥ ४॥

इति सूत्रस्थाने निबन्धसंग्रहे द्वात्रिंशत्तमोऽध्यायः समाप्तः।

एतेनासाध्यव्याधीनधिकृत्योक्ततोऽध्यायोऽवारणीय इत्यर्थः। उपद्रवै-रिति यः पूर्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूल एवोपद्रवसंज्ञः, कालजातः पश्चात्कालजात इत्यर्थः। उपद्रवैस्त्विति तु शब्दोऽत्रावधारणार्थः। तेनेदमवधारयतिपूर्वाध्यायेऽरिष्टैर्मरणमभिहितं अत्र

वातव्याधिः प्रमेहश्च कुष्ठमर्शो भगन्दरः।
अश्मरी मूढगर्भश्च तथैवोदरमष्टमं॥
अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदाः।
प्राणमांसक्षयश्वासतृष्णाशोषवमीज्वरैः॥
मूर्च्छातिसारहिक्काभिः पुनश्चैतैरुपद्रुताः।
वर्जनीया विशेषेण भिषजा सिद्धिमिच्छता॥ १॥
शूनं सुप्तत्वचं भग्नं कम्पाध्माननिपीड़ितं।
नरं रुजार्त्तिमन्तञ्च वातव्याधिर्विनाशयेत्॥

तूपद्रवैरिति केचिदुपद्रवैश्चेति तुशब्दस्थाने चकारं पठन्ति चकारस्तुलचणेऽर्थे तेन उपद्रवैर्लचणैर्जुष्टा इत्यर्थः। जुष्टाः सहिताः रसायणाद्विनेति रसायणेनह्यसाध्यो व्याधिरपि साध्यते प्रायशः एकमनाः सावधानः ममेति मम पार्श्वात्, व्याधियो यान्यसाध्यतामिति केचित् पठन्ति प्रथममूलव्याधयो भवन्ति पश्चादुपद्रवा इति मूलव्याधीन् दर्शयति। वातव्याधिरिति वातव्याधिरभिप्रेतो महत्शब्दालापात् अष्टावेते इत्यत्र द्वितीयं पुनरष्टग्रहणं सर्वेषां तुल्यत्वख्यापनार्थं अन्ये त्वन्यथा समादधति। तत्तु विस्तरभयान्न लिखितं, प्रकृत्यैव स्वभावेनैव महागदा इति मारणात्मकत्वात् असाध्यत्वाच्च महत्त्वमेषामिति अष्टावेते महान्तस्तु व्याधयो दुस्तराः सदा इति केचित् पठन्ति यैरुपद्रवैर्जुष्टा असाध्या भवन्ति वातव्याध्यादयो रोगास्तानुपद्रवानाह प्राणमांसक्षय इति उत्साहापचयः क्षय इत्यर्थः, चकारस्त्वयं वक्ष्यमाणशोफत्वक्स्वापादीनां समुच्चयार्थं एतैरुपद्रवैर्जुष्टामिति अत्र बहुवचनं त्रिभिर्वा जुष्टा इति ख्यापनार्थं अन्ये प्राणमांसक्षयश्वासतृष्णाशोषवमीज्वरैः मूर्च्छातिसारहिक्काभिःपुनश्चैतैरुपद्रवाः वर्जनीयाविशेषेण भिषजासिद्धिमिच्छता इति पठन्ति॥ १॥

वर्जनीयेति प्रतिव्याधिनियतमरिष्टं विशिष्टं दर्शयन्नाह। शूनमिति शूनाद्युपद्रवसहितं पुरुषं वातव्याधिर्विनाशयेदिति सम्बन्धः। सुप्तत्वं

यथोक्तोपद्रवाविष्टमतिप्रस्नुतमेव वा।
पिडकापीड़ितं गाढ़ं प्रमेहो हन्ति मानवं॥
प्रभिन्नं प्रस्नुताङ्गञ्च रक्तनेत्रं हतस्वरं।
पञ्चकर्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनं॥
तृष्णारोचकशूलार्त्तमतिप्रस्नुतशोणितं।
शोफातीसारसंयुक्तमर्शोव्याधिर्विनाशयेत्॥
वातमूत्रपुरीषाणि क्रिमयः शुक्रमेवच।
भगन्दरात्प्रस्रवन्ति यस्य तं परिवर्जयेत्॥

वधिरत्वं, भग्नं वातेन त्रुटितं, रुजार्त्तिमन्तञ्चेति अन्तर्मध्ये रुजार्त्तिं गभीरवेदनापीड़ितं केचित्तरं रुजार्त्तिमन्तश्चेति पठन्ति तत्र रुजा तोदादिलक्षणा, आर्त्तिः शूलं। यथेति यथोक्तोपद्रवारिष्टमिति मक्षिकोपसर्पणादयः श्लेष्मिकाणां, छवणावदरणादयः पैत्तिकानां, हृद्ग्रहादयो वातिकानां, तैराविष्टं संयुक्तं मानवं प्रमेहो हन्ति, अतिप्रस्नुतमिति सुष्ठुस्रवन्मात्रं पिड़का पीड़ितमिति पिड़काः शराविका कच्छपिकादयः गाढ़मतिशयेन। प्रभिन्नमिति प्रभिन्नप्रस्नुताभ्यां सह अङ्गशब्दः प्रत्येकं सम्बध्यते हतस्वरमिति नष्टस्वरं पञ्चकर्मगुणातीतमिति अत्र वमनादीनां पञ्चकर्मणामप्राप्तं फलमित्येके। तत्तु न सम्यक् यतः पञ्चशब्देन पञ्चमधातवस्थिस्थितं कुष्ठमुक्तं तत्र कर्माणि संशोधनसंशमनाभ्यङ्गगुग्गुलुशिलाजतुप्रभृतीनि तेषां गुणाः फलानि तेभ्योऽतीतं एतदुक्तं भवति अस्थिगतकुष्ठं संशोधनादिभिरप्यप्राप्तविशेषं कुष्ठिनं हन्ति अन्ये तु पूर्वरूपक्रिया सह रसादिधातूनां चतुर्णां क्रियामसूहः पञ्चकर्माणीतिमन्यन्ते तद्यथा पूर्वरूपेषु संशोधनमुभयतः सेवेत त्वक्प्राप्ते संशोधनालेपनानि अत्र त्वक्शब्देन रसोऽभिधीयते एवं शोणितमांसमेदसामपि चिकित्सितनिर्दिष्टं दर्शनीयमिहेति अस्मिन् शास्त्रे तृष्णेत्यादि तृष्णारोचकाद्युपद्रवसहितं पुरुषमर्शोव्याधिर्विनाशयेदिति सम्बन्धः। वातेत्यादिमशूननाभीत्याद्युपसहित पुरुषमश्मरी चपयति

प्रशूनेनाभिहृषणं बद्धमूत्रं रुगन्वितं।
अश्मरी क्षपयत्याशु सिकता शर्करान्विता॥ २॥
गर्भकोषपरासङ्गो मक्कल्लो योनिसंहतिः।
हन्यात् स्त्रियं मूढगर्भे यथोक्ताश्चाप्युपद्रवाः॥
पार्श्वभङ्गान्नविद्वेषशोफातीसारपीड़ितं।
विरिक्तं पूर्य्यमाणञ्च वर्जयेदुदरार्द्दितं॥ ३॥
यस्ताम्यति विसंज्ञश्च शेते निपतितोऽपि वा।
शीतार्द्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः॥

विनाशयति आशु शीघ्रं सिकता शर्करान्वितेति सिकता वालुका तत्सदृशाया शर्करा तया सहिता अश्मरीत्यर्थः॥ २॥

गर्भेत्यादि—गर्भकोषपरासङ्गप्रभृत्य पद्रवाः स्त्रियं हन्युर्विनाशयेयुः कस्मिन् सतिमूढ़गर्भे गर्भकोषपरासङ्ग इति गर्भाशयस्य परः अत्यर्थं आसङ्गः अतिशयेन विरोध इत्यर्थः अन्ये तु स्वस्थानात् परस्थानं गत्वा गर्भस्य सङ्गो निरोधं उत्पद्यते अनेन प्रकारेण परासङ्ग इति कथयन्ति मक्कल्ल इति गर्भिणी व्याकरणोक्तो ज्ञेयः तत्राप्रजातायाश्चेति चकारान्नकेवलं प्रजाताया अप्रजाताया अपि मक्कल्लो भवति तथा गर्भाशयाच्युतगर्भाया योनिद्वारसक्तगर्भाशयाच्च रक्तं स्रुतमन्तःस्थितं पच्यमानं मक्कल्लसंज्ञं भवतीति ज्ञेयं योनिसंहृति योनिसङ्कोचनं यथोक्ताश्चाप्युपद्रवा इति आक्षेपक कासश्वासभ्रमादयो मूढ़गर्भं निदाने पठिताः हन्युः स्त्रियं मूढ़गर्भामिति केचित् पठन्ति मूढ़गर्भां मूढ़गर्भसहितां पार्श्वेत्यादिपार्श्वौ भज्यतेऽनेनेति पार्श्वभङ्गो वेदना विशेषः, पूर्य्यमाणं विरिक्तं चेति विरेचनद्रव्यैर्बहुशो विरिक्तं पुनः पूर्य्यमाणं उदरार्द्दितं वर्ज्जयेदिति॥ ३॥

कायचिकित्सामुपद्रवैरसाध्यानिर्द्दिशन्नाह यस्ताम्यतीति यस्ताम्यति मुहुर्मुहुरिति विसंज्ञः शेते संज्ञारहितः स्वपितीत्यर्थः। निपातितोऽपि वेति संज्ञारहित इति शेषः अन्तरुष्णश्चेति अन्तर्दाहयुक्तः। शो हृष्टरोमा

यो हृष्टरोमा रक्ताक्षो हृदि सङ्घातशूलवान्।
नित्यं वक्त्रेण चोच्छ्वस्यात् तं ज्वरोऽहन्तिमानवं॥
हिक्काश्वासपिपासार्त्तं मूढं विभ्रान्तलोचनं।
सन्ततोच्छासिनं क्षीणं नरं क्षपयति ज्वरः॥
आविलाक्षं प्रताम्यन्तं निद्रायुक्तमतीव च।
क्षीणशोणितमांसञ्च नरं क्षपयति ज्वरः॥
श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितं।
विशेषेण नरं हृद्धमतीसारो विनाशयेत्॥
शुक्लाक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीड़ितं।
कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवं॥ ४॥
श्वासशूलपिपासान्नविद्वेषग्रन्थिमूढ़ताः।

इति हृष्टरोमा उद्धर्षितरोमा हृदिसङ्घातशूलवानिति अष्ठिलावद्धवस्तुशूलवानित्यर्थः, अन्ये तु मर्म्माशूलवानितिमन्यन्ते नित्यं वक्त्रेण चोच्छ्वस्यादिति सर्व्वदामुखेनोर्द्ध्वं श्वासं कुर्य्यादित्यर्थः। तं ज्वरो हन्ति मानवमिति तं मानवं ज्वरो हन्ति विनाशयतीत्यर्थः। हिक्केत्यादिमूढ़ व्यामोहयुक्तमनसं विभ्रान्तलोचनमुच्छ्वतिकाक्षं क्षपयति ज्वर इति तत्क्षणादेवेति शेषः। आविलाक्षमिति आविलाक्षं घोरनमहरतश्रुपूर्णेक्षणं प्रताम्यन्तं प्रकर्षेण मोहं गच्छन्तं अतीव चेति अहर्निशमित्यर्थः इत्यम्भूतमाविलाक्षतायुपद्रव सहितं नरं नाशयति ज्वर इति सम्बन्धः ज्वरनिपीड़ितमित्यत्र स्थाने क्षीणं विशेष पीड़ितमिति पठन्ति केचित् अत्र विशेष शब्देन प्रवाहिका उच्यन्ते भेदेनावोक्तं प्रवाहिकामिति विदुःविविशं त्वपरे बुधाः॥ ४॥

कृच्छ्रेण बहुमेहन्तमिति कृच्छ्रेण कष्टेन बहुमेहन्तक्षरन्तं मलमिति शेषः, एतेनाहारस्यातिशयमलीभावः यस्य चातिशयमलीभिवत्यते

भवन्ति दुर्बलत्वञ्च गुल्मिनो मृत्युमेष्यतः॥
आध्मातं बहुनिष्यन्दं छर्द्दिहिक्काटङ्न्वितं।
रुजाश्वाससमाविष्टं विद्रधिर्नाशयेन्नरं॥
पाण्डुदन्तनखो यस्य पाण्डुनेत्रस्य मानवः।
पाण्डुसङ्घातदर्शी च पाण्डुरोगी विनश्यति॥
लोहितं छर्दयेद्यस्तु बहुशो लोहितेक्षणः।
रक्तानाञ्च दिशां द्रष्टा रक्तपित्ती विनश्यति॥
अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः।
जागरिष्णुरसन्देहमुन्मादेन विनश्यति॥

तस्य मांसरक्तक्षयो भवति पुनरशुक्लत्वाद्युपद्रव संहितं यक्ष्मा हन्तीति सम्बन्धः, इहेति अस्मिन् शास्त्रे। श्वासेत्यादि—ग्रन्थिमूढ़तेतिगुल्मस्यादर्शनं एतेन श्वासाद्युपद्रवा भवन्ति कस्येत्याह गुल्मिनो मृत्युमेष्यत इति गुल्मिनो गुल्मयुक्तस्य पुरुषस्य मृत्युं मरणमेष्यतः गमिष्यत इत्यर्थः। आध्मातमिति बहुनिष्यन्दं बहुमूत्रं रुद्धपूयगतिकं वा कायचिकित्सायां यद्यपि विद्रधिर्न पठितः तथापि हृद्गुल्मान्तरमुपद्रवैः सोऽप्यसाध्यो भवति इति पठितं समाविष्टमिति संहितं नरं विद्रधिर्नाशयेदिति सम्बन्धः। पाण्डुरिति च मज्जगतदोषेण पाण्डुसङ्घातदर्शी चेति चैतद्द्रव्याणां सङ्घातः समूहः तं सर्वासु दिक्षुपश्यतीत्यर्थः। लोहितमिति बहुश इति बहुवारं लोहितेक्षण इति रक्तनेत्रः एतच्च पूर्ववन्मज्जगतदोषेणेति रक्तानां च दिशां द्रष्टेति एतदपि मज्जगतदोषेण रक्ता दृष्टेत्यत्र केचिल्लोहितोद्गारदश्च चेति पठन्ति तच्चोद्गारेऽपि लोहितागमत्वेन लोहितदर्शित्वं च मज्जगतदोषेणैव लोहितं रक्तं सर्वं वस्तुपश्यतीत्यर्थः लोहितकारदर्शी चेत्यपरे पठन्ति। अवाङ्गिति अवाङ्मुखस्त्वधोमुखः उन्मुखश्चेति ऊर्द्ध्वमुखः बलग्रन्थे नात्रोत्साहः कथ्यते जागरिष्णुः जागरणशीलः अन्ये अवाञ्चो वा उदञ्चीवेति तत्रापि सएवार्थः। बहुश इति बहुशो बहुवारान् अपस्मारन्तमपस्मारवेगवन्तं

बहुशोऽपस्मरन्तन्तु प्रक्षीणं चलितभ्रुवं।
नेत्राभ्याञ्च विकुर्वाणमपस्मारो विनाशयेत्॥ ५॥

चतुस्त्रिंशत्तमोऽध्यायः।

अथातो युक्तसेनीयमध्यायं व्याख्यास्यामः।

युक्तसेनस्य नृपतेः परानभिजिगीषतः।
भिषजा रक्षणं कार्य्यं यथा तदुपदेक्ष्यते॥
विजिगीषुः सहामात्यैर्यात्रायुक्तः प्रयत्नतः।
रक्षितव्यो विशेषेण विषादेव नराधिपः॥

प्रक्षीणं पुरुषमिति शेषः नेत्राभ्याञ्च विकुर्वाणमिति नेत्रद्वयं विकृतियुक्तं करोतीत्यर्थः इत्यञ्च पुरुषं अपस्मार वेगाद्युपद्रव सहितं अपस्मारो विनाशयेदिति सम्बन्धः एतेकायचिकित्सा रोगोपद्रवात्ते समस्ता एवासाध्या इति ज्ञेयाः॥ ५॥

इति सूत्रस्थाने निबन्धसंग्रहे त्रयस्त्रिंशोऽध्यायः।

युक्तसेनीयमिति युक्तासेना यस्य सयुक्त सेनो राजा इत्यर्थः तमधिकृत्यो कृतोऽध्यायो युक्तसेनीयः। नृपतेर्युक्तसेनस्येति ससेनस्य गजतुरगरथपदातिलक्षणचतुरङ्गस्येत्यर्थः अन्ये युक्तसेनस्येकमिलितसेनस्येति कथयन्ति परान् शत्रून् अभिजिगीषतः जेतुमिच्छत इत्यर्थः। विजिगीषुर्जेतुमिच्छुः सहामात्यैरिति क्रमागतैः पुरुषैः सहेत्यर्थः यात्रा पुरुष इति दत्तप्रयाण इत्यर्थः रक्षितव्य इति सर्वेभ्य आगन्तु मृत्युभ्यः विशेषेणा-

पन्थानमुदकं छायां भक्तं यवसमिन्धनं।
दूषयन्त्यरयो यस्माज्जानीयाच्छोधयेत्तथा॥
तस्य लिङ्गं चिकित्सा च कल्पस्थाने प्रवक्ष्यते॥ १॥
एकोत्तरं मृत्युशतमथर्वाणः प्रचक्षते।
तत्रैकः कालसंयुक्तस्तु शेषास्त्वागन्तवः स्मृताः॥

तिशयेन विषं स्थावरजङ्गमकृत्रिमं विषप्रयोगाय भेदं चिकित्सार्थं दश-नाद्य। पन्थानमिति पन्थानं मार्गं स च विषेण दूषितः स चाश्वादि खुर-खुररेणुना रोमकूपनासाविवरादिषु विकारं जनयति छायामिति विषेण हत्वादिदूषणाच्छायादोषः द्रव्यस्वभावाद्वा छायामपि विषं दूषयति यवस-मिति तृणमश्वादीनां मारणार्थं अरयः शत्रवः तच्चेति पन्थादिजानीया-ल्लिङ्गैः कृत्वेति शेषः शोधयेत् चिकित्सेत् तस्य लिङ्गं चिकित्साच्च कल्प-स्थाने प्रवक्ष्यते॥ १॥

ननु यद्यप्यकालमृत्युरस्ति तदाविषादिभ्यो नृपतिरक्षणं युक्तं विष-भक्षकस्य लिङ्गचिकित्से च युक्ते अथनास्त्यकालमृत्युस्तदा किं फलप्रया-सेन इत्याशङ्काकालमृत्युप्रमाणैः साधयन्नादावागममेव प्रमाणमाह। एकोत्तरमिति एकेनाधिकं मृत्युशतमथर्वाणोऽथर्ववेदविदः पुरुषाः प्रचक्षते कथयन्ति तत्रैकःकालसंयुक्तः कालमृत्युरित्यर्थः, शेषाः आगन्तवः स्मृता इति शेषा उद्दरिता आगन्तवोऽपमृत्यवः कथिताः स्मृता इत्यर्थः, तत्र गर्भ-वर्षेण सहितोत्तरशतवर्षैरेकोत्तरशतं मृत्यवः पूर्य्यन्ते ततः शतादर्वाग-कालमृत्यवः शतादनन्तरं कालमृत्युरिति केचिद्व्याख्यान्त अपरे ब्रूवते शतशब्दोऽत्रासंख्यावाचकः उत्तरशब्दस्तु प्रधानवाचनतेनासंख्यामृत्यवः कारणानामसंख्येयत्वात् एकश्च मृत्युः प्रधानश्च कालमृत्युः कथ्यते ननु यो यस्मिन् काले म्रियते स तस्य कालमृत्युरेव च, तत्कथमकालमृत्युरित्युच्यते? तथाचोक्तं नाकाले म्रियते कश्चित् नास्तिमृत्युरकालजः। यो यस्मिन् म्रियते काले मृत्युकालः स तस्य हि। व्यासभट्टारकेनाप्युक्तं नाकाले म्रियते

दोषागन्तुजमृत्युभ्यो रसमन्त्रविशारदौ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ॥ २॥
ब्रह्मा वेदाङ्गमष्टाङ्गमायुर्वेदमभाषत।
पुरोहितमते तस्माद्वर्त्तेत भिषगात्मवान्।
सङ्करः सर्ववर्णानां प्रणाशो धर्मकर्मणां॥

कश्चिदिह शरशतैरपि कालप्राप्तस्य कौन्तेय वज्रायन्ते तृणान्यपीति, नैतदस्ति उपमानादिप्रमाणैर्बहुधा आचार्य्यैरकालमृत्योः स्थापितत्वात् तथाच यथावर्षमकाले च यथापुष्पं यथाफलं। यथा स्याद्दीपनिर्वाणमकाले मरणन्तथा। व्यासवचनमपि अर्जुनपौत्साहकमकालमृत्युस्थापकं दृश्यते तथा हि जलमग्निर्विषं शस्त्रं स्त्रियो राजकुलानि च। अकालमृत्यवो ह्येते तेभ्यो बिभ्यतिपण्डिताः। अन्यैरप्युक्तं : कालः सुरैरपि हि वञ्चयितुं न शक्यो वचेऽभिधानमपमृत्युविनाशाय मृत्युर्भविष्यति कथं च नापमृत्युर्व्यर्थास्तदाचरकसुश्रुतवाग्भटाद्याः इति तस्मात्कालाकालयोर्मृत्युर्भवत्येवेति अपरे शेषा आगन्तवः स्मृता इत्यस्यायतो विस्रग्वातादिभिर्यद्वत्दीपो वातादि संयुतः निर्वात्यचरणाद्देहो तथैवागन्तु मृत्युभिरिति श्लोकं पठन्ति च विस्रग्वातः प्रवलवातः अतस्तयो राजरक्षणे व्यापारं दर्शयन्नाह। दोषेत्यादि दोषा वातादयः आगन्तवो विषाभिघातादयः रसमन्त्रविशारदौ वैद्यः मन्त्रविशारदः पुरोधा तत्र केचिद्रसविशारद इत्यत्रादिशब्दलोपात् रसवीर्य्यविपाकविशारदः अथवा रसशब्देनरसवन्तिद्रव्याणि कथ्यन्ते तेषां विशारदः अथवा रसशब्दोऽत्र विषवाचकः तद्विशारदः इति कथयन्ति विशारदः पण्डितः मन्त्राणामृग्यजुः सामोक्तानां वेत्यर्थः यत्नो यत्नपरो पुरोहितो वेदानधीते वैद्यस्तु तदङ्गमायुर्वेदमिति॥ २॥

वैद्यात् पुरोधसः प्राधान्यं दर्शयन्नाह। ब्रह्मेति ब्रह्मा आयुर्वेदमभाषत; किं विशिष्टं ? अष्टाङ्गं, पुनः किं विशिष्टं ? वेदाङ्गं वर्त्तेत व्यवहरेदित्यर्थः आत्मवान् बुद्धिमान् सर्वप्रजानां राजायत्तास्थितिरिति राजरक्षणं यत्नेन

प्रजानामपि चोच्छित्तिर्नृपव्यसनहेतुतः।
पुरुषाणां नृपाणाञ्च केवलं तुल्यमूर्त्तिता।
आज्ञा त्यागः क्षमा धैर्य्यं विक्रमश्चाप्यमानुषः॥
तस्माद्देवमिवाभीक्ष्णं वाङ्मनःकर्म्मभिः शुभैः।
चिन्तयेन्नृपतिं नित्यं श्रेयांसीच्छन् विचक्षणः॥ ३॥
स्कन्धावारे च महति राजगेहादनन्तरं।
भवेत्सन्निहितो वैद्यः सर्व्वोपकरणान्वितः॥

कार्य्यमिति दर्शयन्नाह। सङ्कर इति सङ्करः एकत्वं ब्राह्मणादीनां वर्णानां दण्डाभावेनाचारलोपात् धर्म्मकर्म्मणामिति वर्णानामेव धर्म्मस्य कर्म्मणामन्येषामपि, अन्ये तु धर्म्मकर्म्मणामिति पठन्ति तत्र धर्म्मयोगादाश्रमाश्चत्वारो धर्म्मिणः ब्रह्मचारी, गृहस्थ, वानप्रस्थ, यतयश्चत्वार आश्रमाः तत्कर्म्मणां प्रणाशः प्रजानामुच्छित्तिरिति दण्डाभावेन कृषिपाशुपाल्यवाणिज्यराजोपसेवानामभावादुच्छित्तिरुच्छेदो भवतीत्यर्थः नृपव्यसनहेतुत इति वर्णसङ्करादयोऽनर्था राजव्यसनात् कारणाद्भवन्ति तस्मात् राजा यत्नेन रक्षणीय इत्यर्थः अन्ये नृपव्यसनहेतुका इति पठन्ति तत्र उच्छित्तिरिति सम्बध्यते राज्ञोमनुजत्वसमानेऽपि अमानुषानुवर्त्तिभिर्गुणैर्देवत्वं साधयन्नाह। पुरुषाणामिति केवलं निश्चितं मूर्त्तिराकृतिः आज्ञा अनुल्लङ्घनीय आदेशः त्यागः कीर्त्तिधर्म्मार्थं बहुप्रकारो वित्तविसर्गः, क्षमा सर्वसहता, धैर्य्यं व्यसनेषु धीरता, विक्रमः पराक्रमः, अमानुष एषगुणसमूहः अमानुषः मानुषेषु न सम्भवति इत्यर्थः। तस्मादिति अभीक्ष्णमनवरतं तस्मात् कारणाद्देवमिव नृपतिं वैद्यश्चिन्तयेदिति सम्बन्धः। कैः कृत्वा चिन्तयेदित्याह वाङ्मनःकर्म्मभिः शुभैरिति शुभैः शोभनैरित्यर्थः॥ ३॥

वैद्यस्य सन्ततोपयोगित्वादुचितप्रदेशपार्श्वं निर्द्दिशन्नाह। स्कन्धावार इति स्कन्दवारे कर्कटके, महति गुरुतरे, अनन्तरमिति अनन्तराय वर्जिते, सर्वोप-

तत्रस्थमेनं ध्वजवद्यशःख्यातिसमुच्छ्रितं।
उपसर्पन्त्यमोहेन विषशल्यामयार्दिताः॥
स्वतन्त्रकुशलोऽन्येषु शास्त्रार्थेष्ववहिष्कृतः।
वैद्यो ध्वज इवाभाति नृपतद्विधपूजितः॥
वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः।
एते पादाश्चिकित्सायाः कर्मसाधनहेतवः॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक्।
व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः।
उद्गातृहोतृब्रह्माणो यथाध्वर्युं विनाध्वरे॥ ४॥
वैद्यस्तु गुणवानेकस्तारयेदातुरान् सदा।
प्लवं प्रतितरैर्हीनं कर्णधार इवाम्भसि॥

करणान्वित इति यन्त्रशस्त्रचारौषधागदादियुक्तः, तत्रेति तत्रस्थमेनं ध्वजवत् पताकावत् निर्मलगुणकीर्त्तनं यशः ख्यातिः स्वाभाविकी स्तुतिः, समुच्छ्रितं वृद्धिं गतं उपसर्पन्तिसमीपं गच्छन्ति, अमोहेन निश्चिन्तमनसा, विषशल्यामयार्दिता इति अर्दिताः पीड़िताः तेन विषार्दिताः शल्यार्दिता आमयार्दिताश्चेत्यर्थः वैद्यंबहुश्रुतं स्तुवन्नाह। स्वतन्त्रेति कुशलः प्रवीणः अवहिष्कृत इति नात्यन्तमकुशलः नृपतद्विधपूजित इति नृपैस्तद्विधैश्च पूजितः सम्मानितः तद्विधैर्बाह्यैरित्यर्थः। पादचतुष्टयं चिकित्सासाधकं दर्शयन्नाह। वैद्य इति व्याध्युपसृष्टो रोगी, परिचारकः शुश्रूषकः, पुरुषः कर्मसाधनहेतव इति आरोग्यहेतव इत्यर्थः। गुणवदिति वैद्यस्य प्राधान्यं दर्शयन्नाह। वैद्येत्यादि यथा आध्वर्य्यविदुः उपाध्यायः सर्वेषामुपदेष्टा अध्वरे यज्ञे॥ ४॥

पादत्रय व्यतिरेकेऽपि वैद्यक्रियायाः साफल्यं दर्शयन्नाह वैद्यस्त्विति। प्लवं नावं प्रतितरैः अन्तः प्रविष्टजलोत्क्षेपकैः पुरुषैः कर्णधारो नौकायानेता,

तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयङ्कृती।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्यधर्मपरो यश्च स भिषक् पाद उच्यते॥ ५॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतं।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितं॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते॥

वैद्यादीनां गुणानाह। तत्त्विति तत्त्वाधिगतशास्त्रार्थ इति यथावदधीतशास्त्रो यथावज्ज्ञात तदर्थश्चेत्यर्थः, दृष्टकर्मेति छेदादौ स्नेहादौ च कुशल इत्यर्थः, स्वयं कृतीस्वप्रज्ञया चिकित्सायां प्रवृत्तः, लघुहस्त इति छेद्यादिक्रियासु वेपनादिदोषरहितः, शुचिरिति वाह्याभ्यन्तरशौचयुक्तः, शूरः विषादरहितः सज्जोपस्करभेषज इति सज्जानि प्रस्तुतानि उपस्कराणि अग्रोपहरणीय पठितानि यन्त्रशस्त्रादीनि भेषजानि च यस्य स तथा, प्रत्युत्पन्नमतिः योऽवस्थासु न मुह्यति धीमानिति अनुक्तदुरूहोहापोहलक्षणबुद्धियुक्तः, व्यवसायोविषमावस्थास्वपिचिकित्सां कुर्वन्नमुह्यति, अन्ये उत्साहीतिमन्यन्ते, विशारदः पण्डितः कृच्छ्रपदमात्रेषु न मुह्यति, सत्यं मिथ्याभाषणनिवृत्तिः, धर्मः अनेकसाधनसाध्यः॥ ५॥

आयुष्मानिति, आयुष्मान् दीर्घायुः, सत्त्ववान् क्लेशसहिष्णुः, साध्यः साध्यव्याधियुक्त इत्यर्थः। आत्मवान् लोलुपः, आस्तिक इति दत्तमस्ति हुतमस्ति परलोकोऽस्तिःएवं मतिर्यस्य स आस्तिकः, वैद्यवाक्यस्थः वैद्यवचनकर इत्यर्थः। प्रशस्तदेशसम्भूतमिति युक्तमात्रं युक्तप्रमाणं, मनस्कान्तं मनः प्रियं, दोषघ्नमिति दोषशब्देन वातादय इत्युच्यन्ते, तैतद्दूषिता धातुमलाश्च

स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः॥ ६ ॥

पञ्चत्रिंशदध्यायः।

अथातः आतुरोपक्रमणीयमध्यायं व्याख्यास्यामः।

आतुरमुपक्रममाणेन भिषजायुरेवादौ परीक्ष्येत। सत्यप्यायुषि व्याध्यृत्वग्निवयोदेहबलसत्त्वसात्म्यप्रकृतिभेषजदेशान् परीक्षेत॥ १॥

अथवा दोषहरं दुष्टिहरमिति अदुष्टं न च कोपयति अग्लानिकरं हर्षनं करोतीत्यर्थः अविकारिविपर्यये इति विपर्यये व्यापत्तावप्यविकारं निर्विकारं वा समीक्ष्यदत्तमिति किमभिसमीक्ष्य आतुरोपक्रमोक्तं परीक्ष्यानायुरादीन् देशान्तान् कालावस्थापूर्वाह्णादिका वा। स्निग्ध इति स्निग्धः प्रीतियुक्तः, अजुगुप्सुरिति अनिन्दकः एतेन कष्टव्याध्यवस्थास्वपि आतुरं न निन्दतीत्यर्थः, बलवानिति बलवत्वात् सर्वक्लेशसहः युक्तो व्याधितरक्षणे इति युक्तो निपुणः एतेन व्याधितस्य रक्षणे तत्पर इत्यर्थः, वैद्यवाक्यकृदिति वैद्यवाक्यमविकल्पं करोतीत्यर्थः, अश्रान्त इति खेदरहितः पादैश्चतुर्भिः सम्पूर्णैरेभिः कर्मप्रसिध्यतीति केचिदध्यायान्ते पठन्ति। एतच्च पठनीयं सर्वेषु निबन्धेष्वदर्शनात्॥ ६ ॥

इति सूत्रस्थाने निबन्धसंग्रहे चतुस्त्रिंशोऽध्यायः समाप्तः।

यादृश आतुर उपक्रम्यो भवति तादृशोपक्रमणमधिकृत्य कृतोऽध्याय इत्यर्थः, उपक्रमणं चिकित्सा, सा तु दीर्घायुषि कर्त्तव्येत्याह। सत्यप्यायुषीति सति विद्यमाने जीविते व्याध्यादीनां परीक्षा कर्त्तव्या तत्र व्याधिः साध्यासाध्यभेदेन, ऋतव इति अग्निवायु देहबलानामृत्वायत्तत्वात्, अग्निरिति दोषा-

तत्र महापाणिपादपार्श्वपृष्ठस्तनाग्रदशनवदनस्कन्धललाटं दीर्घाङ्गुलिपर्वोच्छ्वासप्रेक्षणबाहुं विस्तीर्णभ्रूस्तनान्तरोरस्कं ह्रस्वजङ्घामेढ्रग्रीवं गम्भीरसत्त्वस्वरनाभिमनुच्चैर्बद्धस्तनमुपचितमहारोमशकर्णं पश्चान्मस्तिष्कं स्नातानुलिप्तं मूर्द्धानुपूर्व्या विशुष्यमाणशरीरं पश्चाच्च विशुष्यमाणहृदयं

ग्निमन्दाग्न्यादिभेदेन, वयः बाल्याद्यवस्थाभेदेन, देहबलं कृशस्थूलादिभेदेन, सत्त्वं गुणः स चोत्तमादिभेदेन, सात्म्यं प्राणिना सेवितो यो मधुरादिरसो व्यायामादिर्वा सुखायभवति तत्सात्म्यमुच्यते एतदपि परीक्ष्यं, प्रकृतिर्वातादिका, भेषजमौषधं, परीक्ष्यमिति सम्बन्धः, दोषसात्म्यप्रकृताद्यपेक्षाणि बलवन्ति भेषजानि भवन्ति इति परीक्षा, देशो जाङ्गलानूपभेदेन देशशब्दानन्तरं लुप्तादिशब्दनिर्द्देशादौषधकालादीन् परीक्षेत इति केचिद्वदन्ति ॥ १ ॥

तत्रदीर्घायुषो लक्षणानि निर्द्दिष्टुमाह। तत्र महापाणीतिमहच्छब्दः पादादिभिर्ललाटान्तैः सह प्रत्येकं सम्बध्यते महत्त्वञ्च स्वैरङ्गुलैरुक्तप्रमाणत्वात् किञ्चिदाधिक्यं दीर्घशब्दोऽङ्गुलिप्रभृतिभिर्बाह्वन्तैः प्रत्येकं सम्बध्यते दीर्घत्वमपि उक्तप्रमाणात् किञ्चिदाधिक्यं ज्ञेयं तत्र महत्त्वं विस्तारेण सह, दैर्घ्यं विस्तारं विना, अङ्गुलिपर्व्वाणि अङ्गुलिग्रन्थय, प्रेक्षणानि लोचनानि, विस्तीर्णशब्दो भ्रूप्रभृतिभिरुरोऽन्तैः सह प्रत्येकं सम्बध्यते मेढ्रं लिङ्गं, गम्भीरशब्दोऽपि सत्त्वादिभिर्नाभ्यन्तैः। गम्भीरं गहनं सत्त्वस्य गाम्भीर्यं प्राचुर्य्यमुच्यते स्वरस्य गाम्भीर्यं सन्निग्धानुनादित्वं नाभेर्गाम्भीरत्वं निम्नता, अनुच्चैर्बद्धस्तनमिति किञ्चिदुच्च निविड़स्तनं, पचितमाहारोमशकर्णमिति उपचितौ मांसलौ महान्तौ विस्तीर्णौ लोमशौ कर्णौ यस्य तं पश्चान्मस्तिष्कमिति पश्चाद्ग्रीवा भागे मस्तिष्को रोमावर्त्तो यस्य तं पार्श्वमस्तिष्कमन्ये पठन्ति तत्र पार्श्वयोर्मस्तिष्कौ द्वौ आवर्त्तौ घण्डाभागे यस्य इत्यर्थः अपरे मस्तिष्कशब्देन मस्तकस्नेहं घृतिकमिति वदन्ति स पश्चाद्भागे भवतीत्यर्थः अन्येतु उपचितमहारोमशकर्णपार्श्वन्यस्तमस्तिष्कमिति। समुदितं पदं पठन्ति व्याख्यानयन्ति च, उपचिता मांसला महान्तो

पुरुषं जानीयाद्दीर्घायुः खल्वयमिति। तमेकान्तेनोपक्रमेत्
एभिर्लक्षणैर्विपरीतैरल्पायुर्मिश्रैर्मध्यमायुरिति ॥ २ ॥
भवन्ति चात्र।

गूढ़सन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः।
उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते ॥
गर्भात्प्रभृत्यरोगो यः शनैः समुपचीयते।
शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥ ३ ॥
मध्यमस्यायुषो ज्ञानमत ऊर्द्धं निबोध मे।
अधस्तादक्षयोर्यस्य लेखाः स्युर्व्यक्तमायताः ॥
द्वे वा तिस्रोऽधिका वापि पादौ कर्णौ च मांसलौ।
नासाग्रमूर्द्ध्वञ्च भवेदूर्द्धं लेखाश्च पृष्ठतः ॥

विस्तीर्णा, रोमशा लोमवन्तः, पार्श्वमस्तिष्का यस्य तं कर्णपार्श्वमस्तिष्कशब्देन कर्णस्य पार्श्वौ द्वौ तयोरेवोपरितनभागो मस्तिष्कं कालमस्तकमित्यन्ये पठन्ति स्नातानुलिप्तमित्यादिमूर्द्धानुपूर्व्या मस्तकानुक्रमेण एतेन प्रथमं मस्तकादि- शरीरं शुष्यति पश्चात् हृदयमित्यर्थः खल्वयमिति खलुनिश्चयेन अयं पुरुषः दीर्घायुषं ज्ञात्वा किं कुर्य्यादित्याह। तमिति तं पुरुषं एकान्तेन एकनिश्च- येन अदोलायमानहृदयेनेत्यर्थः उपक्रमेत् चिकित्सेत् अन्ये एकान्तेन सात- त्येनेत्यर्थः, अल्पस्यायुषो लक्षणमतिदेशेन निर्द्दिशन्नाह। एभिरिति- अन्ये तत्रैतैर्लक्षणैरित्यादि पाठं पठन्ति। मध्यमायुषो लक्षणमाह। मिश्रै- रिति अल्पायुर्दीर्घायुर्लक्षणैरित्यर्थः ॥ २ ॥

प्रागनुक्तं दीर्घायुषो लक्षणमाह। गूढ़ेत्यादि गूढ़ाः गुप्ताः सन्धिशिरास्ना- यवो यस्येत्यर्थः संहताङ्गो गूढ़ाङ्गः स्थिरेन्द्रिय इति अचलेन्द्रियइत्यर्थः अन्येतु इन्द्रियशब्देन इन्द्रियाधिष्ठानं वदन्ति तेन स्थिरेन्द्रियाधिष्ठान इत्यर्थः। एतेन विमुक्ताचिलादयो भावास्तस्य न सन्तीत्युक्तं उत्तरो- त्तरसुक्षेत्र इति उत्तरोत्तरं श्रेष्ठात् श्रेष्ठं सुक्षेत्रः शोभनशरीरः तत्र

यस्य सुप्तस्य परममायुर्भवति सप्ततिः॥
जघन्यस्यायुषो ज्ञानमत ऊर्द्धं निबोध मे॥
ह्रस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनं।
तथोरस्यवलीढ़ानि न च स्यात्पृष्ठमायतं।
ऊर्द्धञ्च श्रवणौ स्थानान्नासा चोच्चा शरीरिणः।
हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते।
प्रेक्षते यश्च विभ्रान्तं स जीवेत्पञ्चविंशतिं॥ ४॥

अथ पुनरायुषो विज्ञानार्थमङ्गप्रत्यङ्गप्रमाणसारानुपदेक्ष्यामः। तत्राङ्गान्यन्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानीति। तत्र स्वैरङ्गुलैः पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुला-

पादाङ्गुल्यौ प्रथमं क्षेत्रं जङ्घे च जानुनोचेति द्वितीयमित्यादि यावत् केशान्तञ्च शिरश्चेत्र दशमं क्षेत्रमुच्यते इति। गर्भादिति शनैरिति क्रमेण समुपचीयते वृद्धिं याति कैः कृत्वा इत्याह शरीरज्ञानविज्ञानैः तत्र शरीरवृद्धिः मेद्रःप्रभृतिका ज्ञानविज्ञाने मानसौ धर्म्मौ ज्ञानं तत्त्वाववोधः विज्ञानं चित्रकादिकर्मकौशल्यं समासतः संक्षेपतः विज्ञानशब्दानन्तरं शुभादिशब्दनिर्द्देशादन्येऽपि शुभादयः तदुक्तं व्यञ्जनादिशुभाविद्या मेदो वैधादन यशः। अल्पे वयसि यस्यैतत्र जीवेदितरन्निति॥ ३॥

प्रागनुक्तस्य मध्यमायुषो लक्षणं निर्द्दिशन्नाह। मध्यमेति अक्षयोः कोष्ठकाख्योः लेखा राजयः, अधस्ताद्वस्तयोरित्यादि पाठं केचित् पठन्ति प्रागनुक्तस्य स्वल्पायुषो लक्षणनिर्देष्टुमाह। जघन्यस्येति जघन्यस्य अल्पस्य मेहनं मेढ्रं, तथोरस्य वलीढ़ानीत्यत्र स्थाने केचिदन्यथा पाठं पठन्ति स चाभावान्नलिखितः तथोरस्य वलीढ़ानीति उरसि वक्षःस्थले अवलीढ़ानि आवर्त्तभेदः प्रतिलोमानुलोमत्वेन विभ्रान्तं विशेषेण मोहयुक्तं यथा भवति पञ्चविंशति वर्षानीति शेषः, यदपेक्षया ललाटादीनां महत्त्वमुक्तमत्वादुक्तं॥ ४॥

यते । प्रदेशिन्यास्तु मध्यमाऽनामिका कनिष्ठिका यथोत्तरं पञ्चमभागहीना । चतुरङ्गुलायते पञ्चाङ्गुलविस्तृते प्रपदपादतले । पञ्चचतुरङ्गुलायतविस्तृता पार्ष्णिः । चतुर्दशाङ्गुलायतः पादः ॥ ५ ॥

चतुर्दशाङ्गुलपरिणाहानि पादगुल्फजङ्घाजानुमध्यानि । अष्टादशाङ्गुलाजङ्घाजानूपरिष्टाद्द्वात्रिंशदङ्गुलमेवं पञ्चाशत् । जङ्घायामसमावूरू । द्व्यङ्गुलानिवृषणचिवुकदशननासापुटभागकर्णमूलनयनान्तराणि । चतुरङ्गुलानिमेहनवदनान्तरनासाकर्णललाटग्रीवोच्छ्रायदृष्ट्यन्तराणि ॥ ६ ॥

तदेवाङ्गुलिमानेन निर्द्दिशन्नाह अथेति सारा:सत्वादिकाः, कानि-पुनस्तान्यङ्गानि प्रत्यङ्गानि चेत्याह तत्रेति अन्तराधिः शरीरमध्यभागः कटिसन्धिमारभ्य पादाङ्गुलीर्यावत् शकथि उच्यते तदवयवा इति अन्तराधि-बाहुहृदयशक्थिहृदयशिरसामवयवा इत्यर्थः। तत्र पादाङ्गुष्ठात् प्रभृति यावन्मस्तकमनुक्रमेण मानं दर्शयन्नाह। तत्रेति तत्र तेषां प्रत्यङ्गानां मध्ये पादाङ्गुष्ठः पादस्यैव प्रदेशिनी च द्व्यङ्गुलायते अङ्गुलद्वयदीर्घे नखं विहायेति शेषः। प्रदेशिन्यास्तु इति प्रदेशिन्याः सकाशात् मध्यमाङ्गुली-पञ्चमभागहीनाः ततोऽपि मध्यमायाः सकाशादनामिका पञ्चमभागहीना वा ततोऽपि अनामिकायाः कनिष्ठिका पञ्चमभागहीनेत्यर्थः पञ्चमभागस्तु अङ्गाङ्गुलमात्रः चतुरङ्गुलायत इति पञ्चाङ्गुलेति। प्रपदं पादाग्रं, पादतलं पादमध्यं, अन्ये षडङ्गुलविस्तृते प्रपदपादतले इति पठन्ति व्याख्यानयन्ति च, प्रपदं षडङ्गुलविस्तारं पादतलमिति पञ्च चतुरङ्गुलेति पञ्चाङ्गुलायता चतुरङ्गुलविस्तारा इत्यर्थः॥ ५ ॥

चतुर्द्दशेत्यादिपादमध्य, गुल्फमध्य, जङ्घामध्य, जानुमध्यानीत्यर्थः परिणाहो वर्त्तुलता, चतुर्द्दशाङ्गुलमानरज्ज्वावेष्टानां इत्यर्थः अन्येत्वयो-

द्वादशाङ्गुलानि भगविस्तारमेढ़ननाभिहृदयग्रीवास्तनान्तरमुखायाममणिबन्धप्रकोष्ठस्थौल्यानि। इन्द्र वस्तिपरिणाहांसपीठकूर्पारान्तरायामः षोड़शाङ्गुलः। चतुर्विंशत्यङ्गुलो हस्तः। द्वात्रिंशदङ्गुलपरिमाणौ भुजौ द्वात्रिंशत्परिणाहावुरू। मणिवन्धकूर्परान्तरं षोड़शाङ्गुलं। तलं षट्चतुरङ्गुलायामविस्तारं। अङ्गुष्ठमूलप्रदेशिनीश्रवणापाङ्गान्तरमध्यमाङ्गुल्यौ पञ्चाङ्गुले। अर्द्धपञ्चाङ्गुले प्रदेशिन्यनामिके। सार्द्धत्र्यङ्गुलौ कनिष्ठाङ्गुष्ठौ। चतुर्विंशतिविस्तारपरिणाहं मुखग्रीवं त्रिभागाङ्गुलिविस्तारा नासा-

दशाङ्गुलपरिणाहानीति पठन्ति अष्टेत्यादि, जङ्घाशब्देन गुल्फजानु[illegible]मुच्यते सा अष्टादशाङ्गुलप्रमाणा दैर्घेन अन्ये चतुर्विंशत्यङ्गुला जङ्घेति पठन्ति जानूपरिष्टाच्चेत्यादि उपरिष्टादुपरितन विभागः जानुनोऽधः सन्धिमारभ्य कटिसन्धि यावत् द्वात्रिंशदङ्गुलो दैर्घ्येणेत्यर्थः एते पञ्चाशत् जङ्घाजानूपरिष्टाच्चेत्येकत्रमिलिताः पञ्चदशाङ्गुला भवन्ति। जङ्घेति जङ्घयोरायामेन दैर्घ्येण समावूरू अपि अष्टादशाङ्गुलावित्यर्थः जानुन उपरिवङ्क्षणसन्धिपर्य्यन्तमूरुः। द्व्यङ्गुलानीति वृषणं अण्ड विस्तारे द्व्यङ्गुलं अधरोष्ठाधस्ताच्चिबुकं तदपि द्व्यङ्गुलं अर्द्धं वहिरर्द्धं मांसवेष्टितमिति दन्ताद्व्यङ्गुलाः नासापुटभाग इति द्वयोर्नासापुटयोर्भागो वहिर्भागः प्रत्येकमङ्गुलद्वयप्रमाणमित्यर्थः नयनान्तराणि नयनयोर्मध्यं अत्रापि पाठान्तराणि सन्ति तान्यभावान्नलिखितानि। चतुरङ्गुलानीति मेढ़्न मुच्छ्रायहीनं चतुराङ्गुलं प्रप्रजातेः पुनः सोच्छ्रायन्तु षड़ङ्गुलं व्यात्तस्य मुखस्यान्तरमपि चतुरङ्गुलं नासावंशो दैर्घ्येण चतुरङ्गुलः कर्णललाटग्रीवानामुच्छ्रायदीर्घत्वं चतुरङ्गुलं दृष्टन्तरानीति दृष्टा अत्र कृष्णतारकेमशूरदलप्रमाणे भवतः तयो दृष्टोरन्तरं चतुरङ्गुलं॥ ६॥

द्वादशेत्यादिभगो योनिः तस्य विस्तारोरन्ध्रः तस्य परिणाहो द्वादशाङ्गुलः

पुटमर्य्यादा। नयनत्रिभागपरिणाहा तारका। नवमस्तारकांशो दृष्टिः। केशान्तमस्तकान्तरमेकादशाङ्गुलं। मस्तकादवटुकेशान्तो दशाङ्गुलः कर्णावट्वन्तरं चतुर्दशाङ्गुलं। पृथु-

इदन्तु भगप्रमाणं हस्तिनीजातिस्त्रियाज्ञेयं कामशास्त्रोक्तत्वात्; मेहननाभ्योरन्तरं द्वादशाङ्गुलं तथा नाभिहृदययोर्ग्रीवाहृदययोःस्तनयोश्चान्तरमितिज्ञेयं, मुखायामो मुखदैर्घ्यं एतच्चचिवुकादारभ्य ललाटं यावद् द्वादशाङ्गुलं मणिबन्धप्रकोष्ठाभ्यां सह स्थौल्यशब्दः प्रत्येकं सम्बध्यते। तत्र मणिवन्धस्य पाणिमूलस्य परिणाहो द्वादशाङ्गुलः प्रकोष्ठपरिणाहो द्वादशाङ्गुलः प्रकोष्ठो मणिबन्धोपविष्टा चतुरङ्गुलिकलाचैकेत्यर्थः। इन्द्रवस्तीति इन्द्रवस्तेर्जङ्घामध्यस्य परिणाहः षोड़शाङ्गुलः अंसपीठः वाहुशिरः कूर्परः भुजमध्यं तयोरन्तरायामो दैर्घ्यं षोड़शाङ्गुल इत्यर्थः षोड़शाङ्गुल इत्यस्यस्थाने केचिद्विंशत्यङ्गुल इति पठन्ति पूर्वं जङ्घामध्यं चतुर्द्दशाङ्गुल परिणाहमिति यत्प्रोक्तं तद्गुल्फाश्रितं जङ्घामध्यं ज्ञेयं इहतुजान्वाश्रितं अतो नाविरोधः। चतुर्विंशतीति हस्तोऽत्र कूर्परादिमध्यमाङ्गुल्यन्तपर्य्यन्तो ज्ञेयः द्वात्रिंशदिति मनिवन्धः पाणिमूलं कूर्परं कुहनिकातयोरन्तरं मध्यं षोड़शाङ्गुलं अष्टादशाङ्गुलमित्यपरे। तलमिति तलमत्रहस्ततलं षड़ङ्गुलायामं चतुरङ्गुलविस्तारम्। अङ्गुष्ठेति अङ्गुष्ठमूलस्य प्रदेशिन्याश्चान्तरं पञ्चाङ्गुलं मध्यमाङ्गुली पञ्चाङ्गुलावित्यर्थः। अङ्गुष्ठमूलकनिष्ठिकेत्यादि पाठं केचित् पठन्ति। अर्द्धेत्यादि सार्द्धचतुरङ्गुलेप्रदेशिन्यनामिके अङ्गुल्यौ दैर्घ्येणेत्यर्थः। सार्द्धेति दैर्घ्येणेति शेषः। चतुर्विंशतीति चतुरङ्गुलिविस्तारं मुखं विंशत्यङ्गुलिपरिणाहाग्रीवेत्यर्थः अन्ये चतुर्विंशत्यङ्गुलिविस्तारमुरः चतुर्विंशत्यङ्गुलविस्ताराग्रीवा इति पाठान्तरार्थं मन्यन्ते। त्रिभागेति अङ्गुलस्य त्रिभागेन सहाङ्गुलं तावन्मात्र तिर्य्यङ्मिति एकोनासापुटः अन्ये तु त्रिभागहीनाङ्गुलविस्तारानासापुटमर्य्यादा इति पाठं मन्यन्ते तेषां मते तरुणास्थिहीनस्य एकस्यैव नासारन्ध्रस्य प्रमाणन्तु तरुणासहितयोर्द्वयोरपिनासापुटयोः। नवनेति नयनत्रिभागोद्वियवप्रमाणं तत्परिणाहातारका कृष्ण-

षोर प्रमाणविस्तीर्णा स्त्रियाः श्रोणिः। अष्टादशाङ्गुलविस्तीर्णमुरः। तत्प्रमाणा पुरुषस्य कटी। सविंशमङ्गुलशतं पुरुषायाम इति॥ ७॥

भवन्ति चात्र॥

पञ्चविंशे ततो वर्षे पुमान् नारी तु षोड़शे।
समत्वागतवीर्य्यौ तौ जानीयात् कुशलो भिषक्॥

भाग इत्यर्थः। नवमेतितारका नवमांशो दृष्टिमण्डलं शल्यतन्त्राभिहितप्रमाणं शालाक्यतन्त्रप्रमान्तुमसूरदलमात्रमेव अथवा तारकानवांशेनापिमसूरदलमात्रमेव भवति तारकाशब्देनात्रापि कृष्ण विभागः। केशान्तेति केशान्तः सङ्घयोरुपरिमस्तकमध्यविभागो रोमावर्त्तान्वितः तत्र केशान्तः मस्तकयोरन्यतरमेकादशाङ्गुलम्। मस्तकादिति मस्तकात् मस्तकमध्यविभागात् अवटुः केशान्त इति अवटुः कृकाटिका किरिड़िकेति लोके, केशान्तस्तत् केशपर्य्यन्तः तयोरन्तरं दशाङ्गुलम्। कर्णेत्यादि कर्णद्वयस्य योऽवटुः तयोरन्तरं चतुर्द्दशाङ्गुलं पश्चात्कर्णयो रित्यर्थः न पुनः कर्णावट्टोरेवान्तरं तदन्तरस्याल्पप्रमाणत्वात्। पुरुषोर इति श्रोणिरत्र उरुसन्धेरधस्तात्स्मरमन्दिरोपरितनदिग्भागः हृदयादूर्द्ध्वं कण्ठस्याधः पुरुषोरो द्वाशाङ्गुलं तत्प्रमाणास्त्रीश्रोणिरित्यर्थः अन्येषां मते चतुर्विंशत्यङ्गुल विस्तारमुर इति तन्मतेस्त्रीश्रोणिरपि तत्प्रमाणैरिति। अष्टादशेत्यादि अष्टादशाङ्गुल विस्तीर्णमुरः स्त्रिया इत्यर्थः तत्प्रमाणा अष्टादशाङ्गुलविस्तीर्णापुरुषस्य कटी। पूर्वोक्त प्रमाणमेकत्वेनाह। सविंशेति विंशत्या अङ्गुलैः सह शतं सविंशमङ्गुलशतं पुरुषायामः पादाग्रावस्थितस्योर्द्ध्ववाहोः पुरुषस्य दैर्घ्यं ततः स्त्रीश्रोणि पुरुषोरः प्रभृतीनां यौवन एवयथोक्तप्रमाणता भवति नत्वल्पे वयसि इत्याह॥ ७॥

पञ्चविंश इति। एतेन पञ्चविंशेवर्षेपुरुषं समत्वागतवीर्य्यं जानीयात् तयोश्चसमत्वागतवीर्य्ययोरेव यथोक्तं प्रमाणं भवति अन्यत्राप्युक्तं "वर्षेऽथ पञ्चविंशे नरः समन्वितवलः षोड़शेनारी।" अर्हति मानोन्मानं

देहः स्वैरङ्गुलैरेष यथावदनुकीर्त्तितः।
युक्तप्रमाणेनानेन पुमान् वा यदि वाऽङ्गना॥
दीर्घमायुरवाप्नोति वित्तञ्च महदृच्छति।
मध्यमं मध्यमैरायुर्वित्तं हीनैस्तथाऽवरम्॥ ८॥

अथसारान् वक्ष्यामः। स्मृतिभक्तिप्रज्ञाशौर्य्यशौचोपेतं कल्याणाभिनिवेशं सत्त्वसारं विद्यात्। स्निग्धं संहतश्वेतास्थिदन्तनखं बहुलकामप्रजं शुक्रेण। अकृशमुत्तमबलं स्निग्धगम्भीरस्वरं सौभाग्योपपन्नं महानेत्रञ्च मज्ज्ञा। महाशिरःस्कन्धदृढ़दन्तहन्वस्थिनखमस्थिभिः स्निग्धमूत्र-

जीवितभागी चतुर्थं वा समत्वागतवीर्य्याविति समत्वं परिपूर्णत्वमागतं वीर्य्यं ययोस्तौ समत्वागतवीर्य्यौ रसादिधातु परिपूर्त्त्या वीर्य्यपूर्त्तिः परिपूर्णं सर्व्वधातुकावित्यर्थः अन्ये त्वेवं पठन्ति समत्वागतवीर्य्याविति सम्यगनुपश्चादागतं वीर्य्यमुपचय लक्षणं ययोरितिचव्याख्यानयन्ति। कैः पुनरङ्गुलैरिदं मानमुक्तमित्याह। देह इति एष देहः स्वैरङ्गुर्यथावदुपक्रममाने नानुकीर्त्तितः कथित इत्यर्थः उक्तप्रमाण प्रयोजनंदर्शयन्नाह। उक्तेत्यादि मध्यमैरिति मध्यमलक्षणैः। वित्तं धनं, अवरं हीनं भवति तथा- तेन प्रकारेण कैरित्याह हीनैर्हीनलक्षणै रित्यर्थः॥ ८॥

सारेणाप्यायुर्निर्द्दिशन्नाह। अथेति स्मरणं स्मृतिः, प्रज्ञा काललग्नात्मिका बुद्धिः, शौर्य्यं सर्वकर्मस्वविषादिता, कल्यानाभिनिवेशं कल्याणविषये यत्नपरं सत्वसारं विद्यादिति सत्वगुणबहुलं जानीयादित्यर्थः। स्निग्धेति=स्निग्धसंहतश्वेतशब्दास्त्रिभिरपि अस्थिदन्तनखैः सहप्रत्येकं सम्बध्यते। संहतं घनं बहुलकामप्रजमिति बहुलकामं बहुप्रजमित्यर्थः शुक्रेणेति शुक्रेणकत्वासारं विद्यादितिसम्बन्धः। अकृशमिति उत्पन्न मितियुक्त मित्यर्थः मज्ज्ञेतिमज्जधातुना कत्वासारं विद्यादितिसम्बन्धः। महाशिर इति। महाशब्दः शिरःस्कन्धाभ्यां सहसम्बध्यते, दृढ़शब्दः दन्तहन्वस्थिनखैः सहप्रत्येकं सम्बध्यते

स्वेदस्वरं बृहच्छरीरमायाससहिष्णुं मेदसा। अच्छिद्रगात्रं गूढ़ास्थिसन्धिं मांसोपचितञ्च मांसेन। स्निग्धताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलं रक्तेन। सुप्रसन्नमृदुत्वग्रोमाणं त्वक्सारं विद्यादित्येषां पूर्वं पूर्वं प्रधानमायुःसौभाग्ययोरपि॥

भवति चात्र।

सामान्यतोऽङ्गप्रत्यङ्गप्रमाणादथ सारतः।
परीक्ष्यायुः सुनिपुणो भिषक्सिध्यति कर्मसु॥ ९॥

अस्थिभिः हड्डैः ज्ञात्वासारं विद्यादिति सम्बन्धः स्निग्धेति स्निग्धशब्दः मूत्रस्वेदस्वरैः सहप्रत्येकं सम्बध्यते बृहच्छरीरमिति प्रबलकायं आयाससहिष्णुमिति कष्टकारिकर्मक्षमं मेदसेतिमेदसा ज्ञात्वासारं जानीयादितिसम्बन्धः अच्छिद्रगात्रमिति अनिम्नशरीरमित्यर्थः गूढ़ेत्यादि गूढ़ास्थिसन्धिः गूढ़हड्डसन्धिरित्यर्थः मांसोपचितमिति मांसलशरीरमित्यर्थः, मांसेनेति मांसेनज्ञात्वासारं विद्यादिति सम्बन्धः स्निग्धेतिस्निग्धताम्रशब्दौ पाणितलान्तैर्नखादिभिः सहप्रत्येकं सम्बध्यते, रक्तेनेति रुधिरेण ज्ञात्वासारं विद्यादित्यर्थः, सुप्रसन्नेति सुप्रसन्नमृदुशब्दौत्वग्रोमभ्यां सहप्रत्येकं सम्बध्यते, त्वक्सारं रससारं त्वक्शब्देन त्वक्स्थोरसोऽभिहितः। इत्येषामिति एषां पूर्व्वोक्तसाराणां मध्यात् पूर्व्वं पूर्वं प्रधानं योयः पूर्वःसारः सप्रधानमित्यर्थः, कयोः प्रधानं श्रेष्ठमित्याह आयुःसौभाग्ययोरिति सौभाग्यं सर्वस्यापि प्रतिभासमानत्वात् अङ्गप्रत्यङ्गसानसारजातफलमाह। विशेषत इति परस्परव्यावर्त्तन इत्यर्थः। एतेनविपरीतव्रणदूतादिच्छायाशरीरस्वभाव विप्रतिपत्तिउपद्रवासाध्यतादिभिरायुर्निश्चित्य विशेषतो महाललाटेत्यादि लक्षणभेदेन प्रवरावरमध्यमान्यायूंषि परीक्ष्य भिषक्सिध्यतीत्यर्थः क्वचित्। सामान्यतोऽङ्गप्रत्यङ्गेत्यादि पठन्ति। तेषां मतेसामान्यतः स्थूलत इत्यर्थः॥ ९॥

व्याधिविशेषास्तु प्रागभिहिताः सर्व्व एवैते त्रिविधाः साध्या याप्याः प्रत्याख्येयाश्च तत्रैतान् भूयस्त्रिधा परीक्षेत किमसावौपसर्गिकः प्राक्केवलोऽन्यलक्षण इति। तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूल एवोपद्रवसंज्ञः। प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्व्वरूपोऽनुपद्रवश्च। अन्यलक्षणो यो भविष्यद्व्याधिख्यापकः स पूर्व्वरूपसंज्ञः। तत्र सोपद्रवमन्योन्या-

व्याधिपरीक्षां निर्द्दिशन्नाह। प्रागुक्ता इति वेदोत्पत्त्यध्याये व्याधिसमुद्देशीयेचयेउक्ताः प्रत्याख्येयाश्चेतिचकारात् प्रत्याख्येयानामपि साध्यत्वं दर्शयति यथा वल्यामभ्यन्तरायान्तु प्रत्याख्याय समाचरेत् तथा मुखरोगेषु मांसगतानां नासा प्रभृतिषूक्तं तेषुचापि क्रियां वैद्यः प्रत्याख्याय समाचरेदिति। तत्रैतानिति किमयमौपसर्गिक इति किमयमनुपद्रव इत्यर्थः। किमयं प्राक्केवल इति किमयं पूर्व्वरूपेणोपद्रवेणचरहित इत्यर्थः। अन्यलक्षण इति किमयं व्याधिः पुर्व्वरूपमित्यर्थः तेषां लक्षणमाह। तत्रेति तत्रतेषां मध्ये उपसर्गिकस्तावत् कथ्यते जघन्यकालजातो व्यधिरिति पश्चात्कालजातो रोग इतयर्थः। उपसृजति समीपे आत्मनं नयतीतुरक्तं। एतेन तेन सहमिलतीतुरक्तं स इति पश्चात्कालजातोरोग इतयर्थः तन्मूल एवेति प्रागुत्पन्न व्याधिहेतुक एवेतयर्थः पश्चादुत्पन्नो व्याधिरेव उपद्रवोभवति न पुनर्मूल व्याधिना सहभूतानि लिङ्गान्युपद्रवसंज्ञानि लिङ्गान्यपि यदि चिरकालानुबन्धिनी भवन्तितदातानुयपद्रवाभवन्ति उपसृजतीति अत्रैकवचनादेव एकव्याधिरुपद्रव इति न मन्तव्यं अपरेऽपि ये मूलव्याधिरन्तरमुत्पद्यन्ते व्याधयस्तेऽप्युपद्रवा एकवचनस्याप्राधान्यात्, उपद्रव संज्ञ इति उपसर्ग इति एकैवसंज्ञा इतयर्थः। प्रागिति अपूर्व्वरूपः पूर्व्वरूप रहितः अनुपद्रवश्चेति उपद्रवरहितः एतेनमशकतिलकानन्यच्छव्यङ्गादयः प्राक्केवलाव्याधयः कथ्यन्ते व्याधिस्वभावात् पूर्व्वरूपमन्तरेणापि प्रागेवोत्पद्यन्त इतयर्थः। अन्ये-

विरोधेनोपक्रमेत बलवन्तमुपद्रवं वा। प्राक्केवलं यथास्वं प्रतिकुर्वीत। अन्यलक्षणेत्यादिव्याधौ प्रयतेत॥ १०॥

भवति चात्र।

नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्॥

तियोभाविनं व्याधिं प्रत्यावर्तति सपूर्वरूपसञ्ज्ञः व्याधीनां बहुत्वात् कः प्रथमं प्रतिकरणयमित्याह। तत्रेति सह उपद्रवेन इति सोपद्रवोऽस्य व्याधिरित्यर्थं तथा उपद्रव उत्तरकालव्याधि सहित इत्यर्थः। अन्योन्याविरोधेन उभयाविरोधेनेत्यर्थः बलवन्तमुपद्रवं वेति बलवन्तमुपद्रवं प्रथमं नोपक्रमेत् अन्योन्याविरोधेनेति सम्बन्धः। यथास्वमिति यथास्वं यथात्मीयचिकित्सितं, अन्यलक्षणेत्यादि अन्यलक्षणे पुनः पूर्व्वरूप संज्ञिते आदिव्याधौप्रयतेत प्रयत्नं कुर्व्वीत यथास्वमित्यनुवर्त्तते॥ १०॥

व्याधीना मानन्त्याद्दोषभेदेनानुक्तस्यव्याधेर्दोष सव्यपेक्षया चिकित्सार्थं तथा रोगकृतस्यापि रोगस्य दोष चिकित्सामपि कर्त्तुं न कार्य्यव्याधिमात्रस्यापि हेतु व्याधिमात्रस्येति कथयन्नाह। नास्तीति अनुक्तमपि व्याधिं दोषाणां लिङ्गैः कृत्वोपाचरेदिति सम्बन्धः, ऋतुपरीक्षां निर्द्दिशन्नाह। प्रागिति ऋतुचर्य्याध्याये विशद्देशकालजस्यात्ययिकस्य व्याधेर्विध्यन्तरमुपदिशन्नाह। शीते शीत इति, शीते शीतकाले शीतप्रतिकारं शीतविपर्य्ययं कृत्वोष्णमित्यर्थः उष्णे उष्णकाले उष्णनिवारणं उष्णविपर्य्ययं कृत्वा शीतमित्यर्थः, कुर्य्यात्क्रियामिति क्रियामग्निकर्म्मादिकं तदुक्तं तत्राप्यत्ययिके व्याधौ तत्प्रत्यनीकं विधिं कृत्वेदि प्राप्तामिति योग्यां कालएवावश्यं क्रियाकरणीयेत्याह क्रियाकालं नहापयेत्। नहापयेन्नोल्लङ्घयेत् देशवैफल्यव्याध्यसाध्यत्वभायात् कालशक्तेरनतिशय्यप्रभविष्णुत्वात् तद्यथा अप्राप्ते काले आमज्वरे भेषजं ह्यामदोषस्य भूयोज्वलयति ज्वरमित्यादि उष्णे दोष निवारणमित्यत्र चकारादुष्टे दुष्टीप्रतीकारोऽनुक्तोऽपि समुच्चीयते अन्ये तुदृष्टेरपि शीतत्वात् शीते शीत प्रतिकारमित्यनेनैव तद्-

प्रागभिहिता ऋतवः।
शीतेशीतप्रतीकार उष्णे चोष्णनिवारणम्।
कृत्वाकुर्य्यात्क्रियां प्राप्तां क्रियाकालं न हापयेत्॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया।
क्रियाहीनाऽतिरिक्ता वा साध्येष्वपि न सिध्यति॥
यात्युदीर्णं शमयति नान्यं व्याधिं करोति च।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्॥ ११॥

प्रागभिहितोऽग्निरन्नस्य पाचकः। स चतुर्विधो भवति दोषानभिपन्न एको विक्रियामापन्नस्त्रिविधो भवति विषमो

ग्रहणमिति मन्यन्ते कीदृशी क्रिया न सिध्यतीत्याह। अप्राप्तेवेति अप्राप्तकाले अनागते काले क्रियाकृतासाध्येष्वपि न सिध्यतीति सम्बन्धः अनागते हि काले क्रियाकृतान् सिध्यति तथाच प्रागुक्तं भेषजं ह्यामदोषस्येत्यादि प्राप्तेवानकृता क्रियेति अतीते काले क्रियाकृतेत्यर्थः सापि साध्येष्वपि व्याधिषु न सिध्यति यथाजीर्णं ज्वरे चीरमांसरसस्निहसाध्ये लङ्घनमिति क्रियाहीनातिरिक्ताचेति बहुदोषेहीनाक्रिया किञ्चित्करी अल्पदोषेमहती रोगिजीवितहरी रोगान्तकारिणी च चकारान्मिथ्या क्रियाचानुक्ता समुच्चीयते तद्यथा शीतसाध्ये उष्णा उष्णसाध्ये शीताचेति क्रिया क्रिययोर्लक्षणमाह। यात्वीति उदीर्णं उत्कटं न तु याव्याधिं हरत्यन्यमुदिरयेदिति न पुनः सा क्रिया कथ्यते याएकं व्याधिं हरति अन्यं प्रकोपयतीत्यर्थः यथाकृशबृंहणे अग्निसादमेहातीसारादयः यथा वास्यैव्यापकर्पणेमेह च यक्ष्मावातरोगादयः चिकित्सापतर्पणे॥ ११॥

अग्निपरीक्षां निर्दिशन्नाह। प्रागिति प्रागब्रण प्रश्ने प्रश्नप्रकारो भ्राजकादिभेदेन कथं पुनश्चतुर्विध इत्याह दोषानिति ननु दोषाभिपन्नत्वनेव विक्रियामापन्न इति प्राप्यते तत्किमयं विक्रियामापन्न इत्युक्तं? नैषदोषः, वातादिकप्रकृतीनां पुरुषाणां वातादिदोषाभिपन्नं

वातेन तीक्ष्णः पित्तेन मन्दः श्लेष्मणा चतुर्थः समः सर्व्वसा-म्यादिति। तत्रयो यथा कालमन्नमुपयुक्तं सम्यक्पचति स समः समैर्दोषैः। यः कदाचित्सम्यक्पचति कदाचिदाध्मान-शूलोदावर्त्तातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा स विषमः। यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः स एवाभिवर्द्धमानोऽत्यग्निरित्याभाष्यते स मुहुर्मुहुः प्रभूत-मप्युपयुक्तमाशुतरं पचति पाकान्ते च गलताल्वोष्ठशोषदा-हसन्तापान् जनयति। यः स्वल्पमप्युपयुक्तमुदरशिरोगौर-वकासश्वासप्रसेकच्छर्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः॥ विषमोवातजान्रोगान् तीक्ष्णः पित्तनि-मित्तजान्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भ-वान्॥ तत्र समे परिरक्षणं कुर्व्वीत, विषमे स्निग्धाम्ललवणैः

भवति नच विक्रिया, काचिद् भवतीति तेषां चतुर्णामग्नीनां लक्षण-माह। तत्रेति यथाकालमिति कालस्यानुल्लङ्घनेन प्रथमंप्रकृतिः प्रकृतेरन-न्तरं विकृतिः इति ज्ञापनार्थं प्रथमं व्यत्ययेनसमाग्निलक्षणमुक्तम्। य इति विषमः विषमाग्नेर्वायुर्य्यदा न विक्षिपतितदाग्निः सम्यक् पचति यदापुनरितश्चेतश्चभागशो विक्षिप्तः स्यात्तदासम्यक् न पचति एतान्याध्मा-नादीनिकृत्वा यः पचति सविषम इति सम्बन्धः कूजनं गुड़गुड़ायनशब्दः प्रवाहणानिकुन्थनानि। उपयुक्तमुतीक्ष्ण इति तीक्ष्णस्तु त्रिविधः एकस्तीक्ष्णः अन्यः उपचितोऽत्याग्निसंज्ञः भस्मकापरपर्य्यायः अपर उपचितस्तीक्ष्णतमः मुहुर्मुहुरित्यादिना कथितः यत्र मुहुर्मुहुः पचति वह्निः तत्र पाकान्ते ग-लादि शोषादीन् जनयतीतिसम्बन्धः सन्तापान् जनयतीत्यस्याग्रे केचिद्यथा-वातेनानुध्यते पित्तं तदर्थं द्रवोपितमित्यादि पाठं पठन्ति सचाभावात्र लिखितः। यस्त्विति प्रसेको लालास्रावः गात्रसदनमङ्गग्लानिः एतेविषमा-दयोऽग्ने य उत्पन्नाः किंकुर्व्वन्तीत्याह—विषम इति। समाग्न्यादीनां चिकि-

क्रियाविशेषैः प्रतिकुर्वीत,तीक्ष्णे मधुरस्निग्धशीतैर्विरेकैश्च। एवमेवात्यग्नौविशेषेण माहिषैश्च क्षीरदधिसर्पिर्भिर्मन्दे कटुतिक्तकषायैर्वमनैश्च ॥

जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः।
सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥
प्राणापानसमानैस्तु सर्वतः पवनैस्त्रिभिः।
ध्मायते पाल्यते चापि स्वे स्वे स्थाने व्यवस्थितैः॥ १२॥

वयस्तु त्रिविधं बालं मध्यं वृद्धमिति। तत्रोनषोड़शवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः, क्षीरान्नादा, अन्नादा

स्थितमाह—तत्रेति, परिरक्षणमिति यथायथासममेवाग्निस्तिष्ठतीत्यर्थः; अग्नेरिदानीं प्रत्यक्षानुपलभ्याद्यस्तित्वमाह। जठर इति जठरः भगवानितिमाहात्म्यवानित्यर्थः, ईश्वर इति अष्टमहैश्वर्य्यगुणयुक्तः अतएव अनिमादिगुणयुक्त इति सूक्ष्मत्वान्न दृश्यते कार्य्यैरुपलभ्यते, ननुयद्यसौईश्वरः तत्कथमस्य मान्द्यादयो दोषा भवन्ति ? सत्यं पुरुषस्य प्राक्तनकर्म्मणामान्द्यादयः क्रियन्ते अथवाग्निः पित्ताश्रितः ततःपित्तविघातादग्निमान्द्यादयो न दोषा, स्वत इति सौक्ष्म्यादणिमादिगुणयुक्तत्वात् रसान् मधुरादीनिति, परिपक्तुं गृह्णीयात् विवेक्तुं नैवशक्यत इति सौक्ष्म्यान्नोपलभ्यत इत्यर्थः अपितु अन्नपाकलक्षणेनकार्य्येनानुमीयतेऽग्निरिति। यथावाह्यस्याग्नेर्वायुः सहायो भवति तद्वज्जाठरस्यापिवायु सहायत्वं दर्शयन्नाह। प्राणेत्यादि सर्वतः सर्वासु दिक्षु अन्ये सर्वत इति सर्वेभ्यो वायुभ्य इत्यर्थः वदन्तितेसर्वेभ्योऽपि वायुभ्यः सकाशात् त्रय एववाताधमनपालनसमर्थान्व्यानोदानावित्युक्तं भवति ध्मायते प्राणापानाभ्यां पाल्यते समानेन स्वां स्वां गतिमवस्थितैः स्वस्वमार्गे स्वस्याः स्वस्याः क्रियायाः कारकैरविकृतैरित्यर्थः। स्वां स्वां गतिमवस्थितैरित्यस्याग्रे वङ्गैः प्राधान्यख्यापनाय केचित् युक्तोऽन्नावित्यादि पाठं पठन्ति सचाभावान्न लिखितः॥ १२ ॥

इति। तेषु सम्वत्सरपराः क्षीरपा द्विसम्वत्सरपरा क्षीरान्नादाः परतोऽन्नादा इति॥ षोड़शसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति। तत्राविंशतेर्वृद्धिरात्रिंशतो यौवनमाचत्वारिंशतः सर्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता॥ अत ऊर्द्ध्वमीषत् परिहाणिर्य्यावत्सप्ततिरिति। सप्ततेरूर्द्ध्वं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साहमहन्यहनि बलीपलितखालित्यजुष्टं कासश्वास-

इदानीं वयः परीक्षां निर्द्दिशन्नाह। वयस्त्विति तत्रोनषोड़शवर्षीया बाला इति पञ्चदशवर्षीया इत्यर्थः, क्षीरान्नादा इति दुग्धान्नभोजिन इत्यर्थः, अन्नादा इति केवलान्नभक्षका इति, क्षीरपाः स्तननिःसृतामृतक्षीर-भक्षका इत्यर्थः तेषामधिकृत्याह। तेष्विति तेषु सम्वत्सर पर इति परश-ब्देनात्र विभिरुक्तः परतोऽन्नादा इति तृतीयादि सम्वत्सरेष्वित्यर्थः। अत्रापि केचित् पाठान्तरं मन्यन्ते तच्चाभावान्नलिखितं मध्यमवयसोऽधि-भेदांश्च कथयन्नाह। षोड़शेति अन्तरे अन्तराले, मध्यं वयः कथ्यत इति शेषः, विकल्पो भेद इत्यर्थः,वृद्धिर्बलं यौवनमिति वृद्धिसम्पूर्णतयोर्मिश्रीभावः मूर्त्तो विकारा यौवनमित्येके सम्पूर्णतेति वृद्धानामवयवानामाप्यायनं सम्पूर्णता, आविंशतेरिति विंशतिवर्षाणि मर्य्यादीकृत्य इत्यर्थः, यावत् सप्ततिरिति अत्र स्थाने यावत् षष्ठिरिति केचित् पठन्ति सप्ततेरनन्तरं यादृशो भवति यन्नाम्ना च कथ्यते तदाह। सप्ततेरिति वीर्य्यं रेतः, बली-त्वक् सङ्कोचः, पलितं केशशुक्लत्वं, खालित्यं खल्वाटत्वं चान्दिनत्वमिति लोके, अभिवृष्टं मेघवृष्टा सिक्तमित्यर्थः। अवसीदन्तं पतन्तं वयोज्ञानस्य, भेषजस्य मात्रा प्रयोगफलमिति दर्शयन्नाह। तत्रेति तत्र वयो ज्ञाने उत्तरोत्तरासु वयोवस्थास्विति वाल्ययौवनादिकासु उत्तरोत्तरा इति उत्कृष्टोत्कृष्टा, उत्तरोत्तर भेषजमात्रा विशेषा इति औषधप्रमाण-विशेषाः ऋते च परिहानेरिति सप्ततेरूर्द्ध्वमूर्द्ध्वमित्येवेत्यर्थः तत्राद्यपेक्षया प्रति-

प्रभृतिभिरुपद्रवैरभिभूयमानं सर्वक्रियास्वसमर्थं जिर्णा-गारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते ॥ ततोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्रतेच परि-हाणेस्तत्राद्यपेक्षया प्रतिकुर्व्वीत ॥ १३ ॥

भवन्ति चात्र ॥

बालेविवर्द्धते श्लेष्मा मध्यमे पित्तमेवतु ।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥
अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्ज्जयेत् ।
तत्साध्येषु विकारेषु मृद्वीं कुर्य्यात्क्रियां शनैः ॥

कुर्वीतेति तत्र परिहानौ आद्यापेक्षया बालापेक्षया षोड़शवर्षवद्भेषजमात्रा इत्यर्थः। भेषजमात्रा च तन्त्रान्तरोक्ता ग्राह्या तद्यथा "प्रथमेमासि जा-तस्य शिशोर्भेषजरक्तिका ॥ अवलेह्या तु कर्त्तव्या मधुक्षीरसिताघृतैः एकैकां वर्द्धयेत्तावत् यावत् सम्वत्सरोभवेत्। तदूर्द्ध्वं माषवृद्धिः स्यात् यावत् षोड़-शकाब्दिकाः ॥ षोड़शाब्दात्ततस्तूर्द्धं यावद्वासप्ततेरिति एवमेव। विभागो-ऽयं तदूर्द्धं बालवत् क्रिया। स्वतन्त्रेऽपि साम्वत्सरिकाद्वृद्धिरब्दवर्षाणामि-त्यादि अन्ये तत्राद्यापेक्षया इति अत्राद्यापेक्षयेति पठन्ति व्याख्यानयन्ति च। परिहाणि वल्यावृद्धिरुच्यते तदपेक्षयेत्यर्थः, एतेन षोड़शवर्षवन्मात्रा प्रयोक्तव्या इत्यर्थः ॥ १३ ॥

दोषचयादावपि वयोज्ञानफलं दर्शयन्नाह। बाल इति भूयिष्ठं बहुतरं एतेन यथा बाले श्लेष्मा तथा पित्तवाताविल्यर्थः। एवं शेषयोरपि वयोज्ञानफलं क्रियाविशेषेऽपि भवतीत्याह। अग्नीति मृद्वीं कुर्य्यात् क्रियामिति, अजाशकृदादिमृदुद्रव्यसंश्रयोऽग्निरपि मृदुः आश्रमविशेषाद-प्येषां मार्द्दवादि भवति तदुक्तं बालवृद्ध सह क्षीणभीरूणां योषितामपि। मर्म्मोपरि च जातेषूक्तेषु दारुणमिति। स्नेहादधिकारुजो भवन्ति अथवा मृद्वीमिति छेद्यभेद्यादिकां प्रतिनियतभेषजेन उक्तेषु दारुणमिति मिश्र-

देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः।
कर्षयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ।
रक्षणञ्चैव मध्यस्य कुर्वीत सततं भिषक्॥

बलमभिहितगुणं दौर्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यं। यस्माद्बलवतः सर्वक्रियाप्रवृत्तिस्तस्माद्बलमेवप्रधानमधिकरणानां॥ १४॥

केचित्कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः।
तस्मात् स्थिरत्वव्यायामैर्बलंवैद्यः प्रतर्कयेत्॥
सत्त्वन्तु व्यसनाभ्युदयक्रियादिस्थानेष्ववैकल्यकरम्।

कोष्ठेषु तद्यथा कपोतकङ्कगृध्राणां पुरीषाणि च दारुणं क्षारोऽपि आवापप्रतिवापहीनो मृदुः एवं विरेकोऽपि चतुरङ्गुलादिमृदुद्रव्याश्रयो मृदुःशनैर्मन्दमित्यर्थः देहपरीक्षां निर्द्दिशन्नाह। देहेति प्रागुपदिष्ट इति दोषधातुमलक्षयवृद्धिविज्ञानीयेऽपि। करणीयतां निर्द्दिशन्नाह। कर्षयेदिति बलपरीक्षां निर्द्दिशन्नाह। बलमिति अभिहितं गुणं ओजः सोमात्मकमित्यादिना अनुपदिष्टमपि चिकित्सोपयोगिदौर्बल्यं कारणभेदेन निर्द्दिशन्नाह। दौर्बल्यमिति स्वभावान्मातृपितृशोणितशुक्रस्वभावादित्यर्थः दोषैर्वातादिभिः जरयावार्द्धक्येनेत्यर्थः अवेक्षितव्यं स्वभावादिभिर्ज्ञातव्यमित्यर्थः अन्ये तु अवेक्षितव्यमित्यत्र स्थाने जरापेक्षितं भवतीति पठन्ति व्याख्यानयन्ति च यथा चौरपात् चौरात्रादः चौरात्रादादन्नादः। कृश इति बलप्राधान्यं निदर्शयन्नाह। यस्मादिति प्रवृत्तिरनुष्ठानं करणमित्यर्थः अन्ये प्रतिपत्तिरिति पठन्ति। तत्रापि स एवार्थः॥ १४॥

अधिकरणानां क्रियाधाराणां तत्र बलयोरुपचयशक्तिलक्षणयोर्व्यभिचारमाह केचिदिति स्थिरत्वमिति स्थैर्यलक्षणं यद्बलं व्यायामैः कृत्वा प्रतर्कयेद्विचारयेदित्यर्थः, सत्त्वं दर्शयन्नाह, सत्वमिति सत्वं मनोबलं, गुणविशेषो रजस्तमसोर्विपक्षः सत्त्वे सति पीड़ादिसहिष्णुत्वलक्षणमनो

सत्त्ववान् सहते सर्वं संस्तभ्यात्मानमात्मना।
राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः॥ १५॥
प्रकृतिं भेषजं चोपरिष्टाद्वक्ष्यामः॥ सात्म्यानि तु देशकालजात्यृतुरोगव्यायामोदकदिवास्वप्नरसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति।

बलं भवति, व्यसनं दुःखं सुखस्य हेतुरभ्युदयः तयोः क्रियास्थानानि येषु स्थानेषु व्यसनाभ्युदयः क्रिये भवतः, तानि व्यसनाभ्युदयक्रियास्थानानि तेष्वविक्लवकरमग्लानिकरमहर्षकरं च सात्त्वमुत्तमं मनोबलं रजसि मध्यमं मनोबलं तमसिमनोदौर्बल्यमेवेति त्रयमपि श्लोकेन निर्दिशन्नाह। सर्वमिति काये पीड़ादिकं दुखमित्यर्थः। संस्तभ्यात्मानमिति आत्मानं मनः संस्तभ्यदृढ़ीकृत्य कृत्य आत्मानं मन इत्यर्थःकेवलं संस्तभ्य आह आत्मना बुद्ध्या इत्यर्थः। स्तभ्यमानोऽन्यैरिति अन्यैः पुरुषैः दृढ़ीक्रियमाणनैव तामस इति तामसस्तमसो गुणबहुलः अन्यैरप्यवष्टभ्यमान्यैन सहत इत्यर्थः॥ १५॥

प्रकृतेर्भेषजस्य कारणं पुनः परीक्ष्येत्याह प्रकृतीति प्रकृतिं शरीरे भेषजं भूमिप्रविभागीये आतुरोपक्रमणीयाध्यायादनन्तरं सूत्रस्थानसमाप्तिं यावत् भेषजपरीक्षेवेत्येके सात्म्यपरीक्षां निर्दिशन्नाह। सात्म्यानीति सात्म्यमात्मसुखं यत् करोति तदुच्यते तत्र देशसात्म्यं यथादेशो हि द्विविधः भूमिरातुरशरीरञ्च तत्रातुरशरीरसात्म्यं द्विविधं समुदायस्यैकं अन्यदवयवस्य तत्र समुदायस्य यथा मधुरो रसः सर्वधातुवर्द्धनः अवयवसात्म्यं यथा चक्षुष्य केशकण्ठादिद्रव्यं भूमिसात्म्यमपि समुदायैकदेशभेदेन द्विविधं तत्र समुदायस्य यथा जाङ्गलदेशे यौ आहाराचारौ आनूपेऽपि तौ विपरीतौ देशावयवानामपि यथा वाह्लीकवल्लभचितादीनां माषगोधूममाध्वीकादिभिः सात्म्यं यानि सात्म्य यथा मनुष्यजातेः सात्म्यं शाल्यादयः मृगपक्षिजातीनां च तृणपतङ्गादीनि ऋतुसात्म्यं यथा धात्वग्निहितमन्नपानादि, रोगसात्म्यं यथा गुल्मिनां क्षीरं उदावर्त्तिनां घृतं प्रमेहिनां क्षौद्रमित्यादिव्यायाम

यो रसः कल्पते यस्य सुखायैव निषेवितः।
व्यायामजातमन्यद्वा तत्सात्म्यमिति निर्द्दिशेत्॥ १६॥

देशस्त्वानूपो जाङ्गलः साधारण इति॥ तत्र बहूदक-निम्नोन्नत नदीवर्षगहनो मृदुशीतानिलो बहुमहापर्वतवृक्षो मृदुसुकुमारोपचितशरीरमनुष्यप्रायः कफवातरोगभूयिष्ठश्चा-नूपः॥ आकाशसमः प्रविरलाल्पकण्टकिवृक्षप्रायोऽल्पवर्ष-प्रस्रवणोदपानोदकप्राय उष्णदारुणवातः प्रविरलाल्पशैलः स्थिरकृशशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गल उभयदेशलक्षणः साधारण इति॥

त्रिविधः कायवाङ्मनोभेदात् उदकग्रहणाद्दिवास्वप्नग्रहणाज्जागरणादीनां ग्रहणं दिवास्वप्नरसप्रभृतीनीति केचिद्रसशब्दं पठन्ति तेषां मते रसोदकग्रह-णात् रसनेन्द्रियग्राह्यं दुग्धदधिघृतसलिलाद्यन्नपानं गृह्यते प्रकृतिविरुद्धानि स्वभावेन विरुद्धानीत्यर्थः अन्ये तु प्रकृतिस्वभावतो भेदेन भिन्नादित्याचक्षते तदेवसात्म्यं विस्तरोक्तमाहाराचारभेदेन द्विभेदं सङ्क्षिप्य श्लोकेन दर्शय-न्नाह—यो रस इति यो रसः सुखकारणमेव सेवितः सन्नित्यर्थः अन्ये सुखायैवातिसेवित इति पठन्ति व्यायामजातमिति व्यायामसमूहः अन्य-द्वा इति॥ १६॥

देशजात्यादिदेशपरीक्षां निर्द्दिशन्नाह—देशेति तेषां लक्षणमाह। तत्रेति बहुशब्द उदकादिभिर्वर्षान्तैः सह प्रत्येकं सम्बध्यते गहन इति एतैः कृत्वा गहनीभूत इत्यर्थः। आकाशसम इति निवारणत्वान्निम्नो-न्नततारहितत्वेन समभूमिभाग इत्यर्थः प्रविरलाल्पकण्टकिवृक्षप्राय इति प्रविरला अल्पा कण्टकिनो वृक्षा प्रायेण यत्र देशे स तथा, अल्पवर्षाप्रस्रव-णोदपानोदकप्राय इति अल्पवर्षायाः प्रस्रवणानां निर्झराणामुदपानानाञ्च कूपानां उदकं प्रायेण यत्र स तथा उभयेति त्रिविधदेशपरिज्ञाने दोषचया-

भवन्ति चात्र ॥

समाः साधारणे यस्माच्छीतवर्षोष्णमारुताः ।

दोषाणां समता जन्तोस्तस्मात्साधारणो मतः ॥

न तथा बलवन्तः स्युर्जलजा वा स्थलाहृताः ।

स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः ॥

उचिते वर्त्तमानस्य नास्ति देशकृतं भयं

आहारस्वप्नचेष्टादौ तद्देशस्य गुणे सति ॥ १७ ॥

देशप्रकृतिसात्म्यर्त्तुविपरीतोऽचिरोत्थितः ।

सम्पत्तौ भिषगादीनां बलसत्वायुषां तथा ॥

केवलः समदेहाग्नेः सुखसाध्यतमो गदः ।

अतोऽन्यथात्वसाध्यः स्यात्कृच्छ्रो व्यामिश्रलक्षणः ॥

दिफलं दर्शयन्नाह । समा इति तुल्यगुणदेशजातस्य रोगस्य विपरीतगुणे देशे सुचिकित्स्यतां दर्शयन्नाह । न तथेति जलजा इति आनूपदेशजाताः श्लीपदादयः स्थलाहृता इति जाङ्गलदेशं नीता इत्यर्थः, उक्तव्याधिकारणं दोषचयादेर्विसदृशदेशाश्रयं प्रथमं दर्शयन्नाह । स्वदेश इति यथा आनूपे देशे सञ्चितं कफः जाङ्गलदेशे कुपित,उचिते इति न्याय्ये इत्यर्थः यदि पुनराहारादावनुचिते वर्त्तते तदाभवत्येव भयं यथानूपदेशे सञ्चिते कफे जाङ्गलदेशेऽपि दिवास्वप्नादिकुर्वतः पुरुषस्य भयं भवत्येव, आहारस्वप्नेत्यादितद्देशस्य गुणे सति जाङ्गलदेशस्य रौक्ष्योष्ण्यादौगुणे सत्यप्युचिते वर्त्तेत एतदुक्तं भवति यद्यपि आहारस्वप्नचेष्टादयस्तद्देशगुणा अपि सन्ति तथापि उचिते वर्त्तते कफविपरीतगुणैर्वर्त्तेत इत्यर्थः ॥ १७ ॥

सुखसाध्यादीनां लक्षणमाह—देशेत्यादि, देशविपरीतो यथा जाङ्गलदेशे कफरोगोत्पत्तिः, प्रकृतिविपरीतो यथा पित्तप्रकृतेः कफरोगत्पत्तिः, सात्म्यविपरीते यथा कटुसात्म्यस्य कफरोगोत्पत्तिः ऋतुविरोधेनो यथा शरदि वातिकस्य हेमन्ते पैत्तिकस्य ग्रीष्मे श्लैष्मिकस्य

क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् ।
पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥
गुणालाभेऽपि सपदि यदि सैव क्रिया हिता ।
कर्त्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि ॥
य एवमेनं विधिमेकरूपं बिभर्त्ति कालादिवशेन धीमान् ।
स मृत्युपाशान् जगतो गदौघान् छिनत्ति भैषज्यपरश्वधेन ॥१८॥

व्याधेः प्रादुर्भाव इति, अचिरोत्थितो नव इत्यर्थः अन्ये तु नवा निर्द्दिष्टत्वात् रक्तगुल्मादिः पुराणोऽपि साध्य इति, सम्पत्ताविति परिपूर्णत्वे बलसत्वायुषां तथा इत्यत्रापि सम्पत्ताविति सम्बध्यते केवलः एकदोषजनिते निरुपद्रवो समदेहाग्नेः, अत इति क्रियाफलं यदा न दृश्यते तदा अन्यो क्रियाकर्त्तव्या, साध्यकालान्तरिता सेति कर्त्तव्येति दर्शयन्नाह । क्रियाया इति पञ्चरात्रान्तरिता षड्रात्रान्तरिता वा अन्या क्रियाप्रयोक्तव्या सङ्करो युगपद्द्वयोः प्रयोगः यस्यापि फलं न दृश्यते सापि सप्तरात्रमप्रकर्त्तव्येत्याह । गुणालाभ इति सम्पदि शीघ्रं यदा पुनः कृच्छ्रसाध्यो व्याधिः तदा गुणस्य क्रियाफलस्यालाभेऽपि हितायाः क्रियासैव सपदि शीघ्रं प्रयोक्तव्या अस्मिन् श्लोके पाठान्तरमस्ति तच्चाभावान्नलिखितं तत्र तुस्त्वर्थे श्लोकमाह य एवमिति एवमनेन प्रकारेण एनं विधिं पूर्वोक्तं विधानं एकरूपं बिभर्त्ति अप्रकल्पं धारयतिकालादिवशेन कालादिसामर्थ्येनेत्यर्थः गदौघान् विकारसमूहान् भैषज्यपरस्वधेनेति औषधकुठारेणेत्यर्थः, केचिदमुं श्लोकं न पठन्ति एके आचार्य्या विपरीता विपरीतव्रणनादि अवारणीयपर्य्यन्तमरिष्टाध्यायाश्च वदन्ति अपरेतु आतुरोपक्रमणीयमरिष्टमिति वदन्ति वृद्धाश्चात्रैवमुपदिशन्ति अरिष्टाध्याया विघ्नभया गृहादिः पावनीयः देवालयादिषु ॥१८॥

इति सूत्रस्थाने निबन्धसंग्रहे पञ्चत्रिंशत्तमोऽध्यायः ।

षट्त्रिंशदध्यायः ।

अथातो मिश्रकमध्यायं व्याख्यास्यामः ।

मातुलुङ्गाग्निमन्थौ च देवदारु महौषधं ।
अहिंस्राचैव रास्ना च प्रलेपो वातशोफहृत् ॥
दूर्वा च नलमूलञ्च मधुकं चन्दनं तथा ।
शीतलाश्च गणाः सर्वे प्रलेपः पित्तशोफहृत् ॥
आगन्तुजे रक्तजे च एष एव विधिः स्मृतः ।
विधिर्विषघ्नो विषजे पित्तघ्नोऽपि हितस्तथा ॥
अजगन्धाश्वगन्धा च काला सरलया सह ।
एकैषिकाजशृङ्गी च प्रलेपः श्लेष्मशोफहृत् ॥
एते वर्गास्त्रयो लोध्रं पथ्या पिण्डीतकानि च ।

षष्ठ्युपक्रमाणां मध्ये विम्लापनपाचनदारणपीडनशोधनरोपणोत्सादनानामष्टानां प्रधानानामिहनिर्दिष्टानां मिश्रीकृत्य कथनान्मिश्रकाख्योऽध्याय इत्यर्थः, अन्ये तु शोफस्य व्रणस्य च मिश्रयोगकथनान्मिश्रक इत्युच्यते, तत्र प्रथमं विम्लापनं क्रमेण वातादिदोषशोफप्रत्यनीकं दर्शयन्नाह । मातुलुङ्गेति मातुलुङ्गं वीजपूरकः, अग्निमन्थः अरणी, भद्रदारु देवदारु, महौषधं शुण्ठी, अहिंस्रा बृहद्हिंस्रा, रास्ना सुरभि । दूर्वेति दूर्वादीनि द्रव्याणि प्रसिद्धानि । शीतलाश्च गणा इति काकोल्याद्युत्पलादि न्यग्रोधादयः पित्तविम्लापनवदागन्तुजरक्तजयोरत्रापि दर्शयन्नाह । आगन्तुज इति आगन्तुज पाकप्रतिबन्धाय शीतविधिः स्मृतः । विषजनितशोथस्यागन्तुभेदस्य वक्ष्यमाणातिदेशेन चिकित्सां दर्शयन्नाह । विधीति विधिर्विषघ्नः विषजेति विधिः कल्पोक्तः । अजगन्धेत्यादि अजगन्धा वैथयिका लतौषधीत्येके, अन्ये

अनन्ताचेति लेपोऽयं सान्निपातिकशोफहृत्।
स्निग्धाम्ललवणो वाते कोष्णः शीतः पयोयुतः।
पित्ते दोषाः कफे क्षारमूत्राढ्यस्तत्प्रशान्तये ॥ १ ॥
शणमूलकशिग्रूणां फलानि तिलसर्षपाः।
शक्तवः किण्वमतसी द्रव्याण्युष्णानि पाचनं ॥
चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतगृध्रकङ्कानां पुरीषाणि च दारणं ॥ २ ॥

यवानिकामाहुः, अश्वगन्धा प्रसिद्धा, काला अहिंस्रा, असरला अरुणमूला त्रिवृत्, एकेषिका शुक्लमूला त्रिवृत्, अजशृङ्गीकर्कटशृङ्गी अन्ये अजवलोमेटिकेति लोके,प्रत्येकदोषजशोथविम्लापनमभिधाय सान्निपातिकस्य विम्लापनं निर्देष्टुमाह—एत इति एते वर्गास्त्रयः मातुलुङ्गादयः, रोध्रं प्रसिद्धं, पथ्या हरीतकी, पिण्डितकी मदनः,अनन्तादुरालभा, केचित् पिण्डीतकत्रयमित्यादि पाठं पठन्ति, दोषभेदेन, लेपस्य संस्कारविशेषं निर्द्दिशन्नाह। स्निग्धेत्यादि आज्योबहुल इत्यर्थः ॥ १ ॥

विम्लापनमभिधाय पाचनानि निर्द्दिशन्नाह। शणमूलकेति फलशब्दः शणादिभिः सर्षपान्तैः प्रत्येकं सम्बध्यते, शणः परिपाके सस्वनफलः, शिग्रुः शोभाञ्जनकः, किण्वं सुराबीजं तद्बहिःप्रक्षिप्यते, अतसीमसिना इति लोके प्रसिद्धा, द्रव्याण्युष्णानि उष्णवीर्य्याणि कुष्ठागुरुप्रभृतीनि एतेनानुक्तपाचनद्रव्यं संग्रह उक्तः, पाचनं शोथस्य शेषं प्रसिद्धं, एतेषां व्यस्तानां समस्तानाञ्च पाचनत्वं शक्तूनां शीतवीर्य्यत्वेऽपि प्रभावविशेषात् पाचनकत्वं संयोगविशेषाद्वा, पाचनमभिधायदारणं निर्द्दिशन्नाह। चिरविल्व इति चिरविल्वो हस्तकरञ्जः चिरिञ्चिलि इति लोके, अग्निकः कलिकारिका अन्ये भल्लातकमाहुः, दन्तीदन्तिनीचित्रकः प्रसिद्धः हयमारः करवीरः,पुरीषशब्दः कपोतादिभिः सह प्रत्येकं सम्बध्यते कपोतो वनवासोपाण्डुकः, कङ्कः कङ्कमल्लः न पुनः काकोऽटभा मांसाशीपक्षिविशेषः, दारणं विदारणं पक्वशोथस्य दारणं ॥ २ ॥

क्षारद्रव्याणि वा यानि क्षारो वा दारणं परं।
द्रव्याणां पिच्छिलानान्तु त्वङ्मूलानि प्रपीड़नं ॥
यवगोधूममाषाणां चूर्णानि च समासतः।
शङ्खिन्यङ्कोठसुमनः करवीरसुवर्च्चलाः ॥
शोधनानि कषायाणि वर्गश्चारग्वधादिकः ॥ ३ ॥
अजगन्धाजशृङ्गी च गवाक्षी लाङ्गलाह्वया ॥
पूतीकश्चित्रकः पाटा विड़ङ्गैलाहरेणवः।

द्रव्ययोगभेदं दर्शयन्नाह क्षारद्रव्याणीत्यादि—क्षारद्रव्याणि मुष्कक-कुटजपलाशाश्वकर्णपारिभद्रादीनि क्षारोवेति एतैर्द्रव्यैः सिद्धः प्रतिसार-णीयः परमिति कृच्छ्रेण दारणमित्यर्थः, वल्लहकादिष्वयोजनीयं द्विविधं हि पक्वशोथदारणमित्यर्थः। सुकुमारं कृच्छ्रं चेति तत्र कापोतपुरीषादि-सुकुमारक्षारः, कृच्छ्रमिति ततःपरं पीड़नं दर्शयन्नाह द्रव्याणामिति पिच्छिलद्रव्याणि शाल्मलीशेलुवटपर्णादीनि, प्रपीड़नं मर्मादिसमीपसूक्ष्म-मुखव्रणपीड़नं, समासतः सङ्क्षेपतः प्रपीड़नञ्चेत्थं कर्त्तव्यं व्रणमुखं वहिः कृत्य लेपयेत् लिप्ताच शोषयेत् शुष्कं सत् पीड़णं भवति। अथ शोधनं दर्शय-न्नाह। शङ्खिनीति यवतिक्ताभेदः सुदुग्धा हृहत्पत्राः अङ्कोटः संशाखी-चिरितखलपत्रः अङ्कोल्ल इति लोके, सुमनाः जाती, करवीरः प्रसिद्धः, सुव-र्च्चला सूर्य्यावर्त्तः सोञ्चलीति लोके शङ्खिन्यादीनां कषायाः आरग्वधादिश्च धावनादिद्वारेण शोधनः, शोधनं पुनरष्टविधं कषायवर्त्ति, कल्कघृततैलरस-क्रियाचूर्णधूपनभेदेन एतच्चाष्टविधमपि क्रमेणात्रैव वक्ष्यति, कषायस्तु शृतशीतफाण्टस्वरसभेदेन चतुर्विधो ग्राह्यः, कल्कश्चात्र पञ्चमं पृथगेव वक्ष्यति ॥ ३ ॥

कषायमभिधाय वर्त्तिमाह। अजगन्धेति गवाक्षी इन्द्रवारुणी,लाङ्गला-ह्वया कलिकारिका, पूतिकश्चिरविल्वः, कण्टकोविटपकरञ्ज इत्येके, हरेणवः रेणुकाः, लवणानि सैन्धवसौवर्च्चलविड़मौद्भिदसामुद्रिकानि पञ्च,अन्ये विड़-

कटुत्रिकं यवक्षारो लवणानि मनःशिला ॥
कासीसं त्रिवृता दन्ती हरितालं सुराष्ट्रजा।
संशोधनीनां वर्त्तीनां द्रव्याण्येतानि निर्द्दिशेत् ॥
एतैरेवौषधैः कुर्य्यात्कल्कानपि च शोधनान्।
कासीसकटुरोहिण्योर्जातीकन्दहरिद्रयोः ॥
पूर्व्वोद्दिष्टेषु चाङ्गेषु कुर्य्यात्तैलघृतानि वै ॥ ४ ॥
अर्कोत्तमां स्नुहीक्षीरं पिष्ट्वा क्षारोत्तमानपि ॥
जातीमूलं हरिद्रे द्वे कासीसं कटुरोहिणीं।
पूर्व्वोद्दिष्टानि चान्यानि कुर्य्यात्संशोधनं घृतं ॥

स्थाने काललवणेन सह पञ्चसंख्यामाहुः काललवणन्तु निर्गन्धः सौवर्च्चलभेदः,सुराष्ट्रजातुम्बुरुमृत्तुरीति लोके,अपरे सामान्येन कृष्णमृत्तिकामाहुः, एतैर्द्रव्यैः तत्र वर्त्तिं लिप्त्वा व्रणे निक्षिपेत् एवं वर्त्तिर्भवति। वर्त्तिमुक्त्वा कल्कमाह। एतैरेवौषधैः कुर्य्यादिति। एतैरौषधैः अजगन्धादिभिः सुराष्ट्रजान्तैः ॥ ४ ॥

कल्कमभिधाय शोधनघृतमाह। अर्कोत्तमामिति, अर्कः अर्कमूलं, उत्तमात्रिफला, अन्ये तु पुनरर्कोत्तमां इत्यभिन्नपदेन मन्दारकमाहुः। सुधाक्षीरं सीहुण्डदुग्धं क्षारोत्तमान्क्षारश्रेष्ठद्रव्याणि, मुष्कककुटजपलाशाश्वकर्णादीनि जातीमूलं जात्याजटा अन्ये जातुकन्द इति पठन्ति तत्र जातुकन्दोगुग्गुलुकः उत्तरापथे प्रसिद्धः,पूर्व्वोद्दिष्टानि शोधनवर्त्तिनिर्द्दिष्टानि, शेषं सुगमं, तैलशोधनं निर्द्दिशन्नाह मयूरकराजवृक्ष इत्यादि, मयूरकोऽपामार्गः, राजवृक्षः किरमालकः, कोषातकीघोषकः घुघुण्डीति लोके, शोधनानिच योज्यानि इति। शोधनवर्त्तिनिर्द्दिष्टानि मलविरेचननिर्द्दिष्टानीत्यन्ये शेषं प्रसिद्धं। शोधनचूर्णंनिर्द्दिशति काशीसे सैन्धवे किण्वे इति, शोधनाङ्गेषु शोधनवर्त्तिनिर्द्दिष्टेषु विरेचनाङ्गद्रव्येषु रसक्रियां निर्द्दिशति। सालसारादिसारेषु इति रसक्रियाफलिताकृतिः,

मयूरको राजवृक्षो निम्बः कोषातकी तिलाः।
बृहती कण्टकारी च हरितालं मनःशिला॥
शोधनानि च योज्यानि तैले द्रव्याणि शोधने।
कासीसे सैन्धवे किण्वे वचायां रजनीद्वये॥
शोधनाङ्गेषु चान्येषु चूर्णं कुर्वीत शोधनं॥
शालसारादिसारेषु पटोलत्रिफलासु च।
रसक्रिया विधातव्या शोधनी शोधनेषु च।
श्रीवेष्टके सर्जरसे सरले देवदारुणि।
सारेष्वपि च कुर्वीत मतिमान् व्रणधूपनं॥ ५ ॥
कषायाणामनुष्णानां वृक्षाणां त्वक्षु साधितं।
शृतशीतं कषायं वा रोपणार्थेषु शस्यते।

काकोलीति लोके,शोधनेषु चेति शोधनवर्त्तिनिर्द्दिष्टेषु अथवा ऊर्द्धाधः शोधनेषु वमनविरेचनद्रव्येषु शेषं प्रसिद्धं, रसक्रियाकल्पना चेयं, द्रव्यापेक्षयाष्टगुणं षोड़शगुणं वा जलं दत्त्वाऽष्टभागावशेषं षोड़शभागावशेषो वा क्वाथः कार्य्यः। ततः पूतं कषायं पुनस्तावत् यावत् फलिताकृतिः परिशिष्टमष्टमं धूपनं दर्शयन्नाह श्रीवेष्टके सर्जरसे इति श्रीवेष्टकः सरलरसः, नवनीतप्रायः गुग्गुलीति लोके प्रसिद्धः, सरलोवाला इति लोके प्रसिद्धा, सालसारादिष्वित्यर्थः, शेषं प्रसिद्धं, अत्र शोधनप्रकरणे केचित् एतैरेवौषधैः कुर्य्यात्, कल्कानपि शोधनान् अस्याग्रे कासीसकटुरोहिण्योर्जातीकन्दहरिद्रयोः पूर्वोद्दिष्टेषु चाङ्गेषु कुर्य्यात्तैलघृतानि वै इति पाठं पठन्ति व्याख्यानयन्ति च कन्दहरिद्रयोरित्यत्र कन्दशब्दो दारुहरिद्रापरिहाराय जानुकन्दहरिद्रयोरित्यन्ये पठन्ति। अत्र जानुकन्दो गुग्गुलुः पूर्वोद्दिष्टेषु चाङ्गेष्विति शङ्खिन्यादिषु अजगन्धादिषु च एषां कषायादीनां व्रणधावनादौ द्विव्रणीये यथोक्तविषयतावचारणं रोपणमपि धूपवर्जं॥ ५ ॥

शोधनमिव सप्तविधं कषायादिभेदेन दर्शयन्नाह। कषायानां अनुष्णा-

सोमाम्टताश्वगन्धासु काकोल्यादौगणे तथा ॥
क्षौरिप्ररोहेष्वपि च वर्त्तयो रोपणाः स्मृताः।
समङ्गा सोमसरला सोमकल्का सचन्दना ॥
काकोल्यादिश्च कल्कः स्यात् प्रशस्तो व्रणरोपणे।
पृथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता ॥
काकोल्यादिश्च योज्यः स्यात्प्रशस्तो रोपणे घृते ॥ ६ ॥
कालानुसार्य्यागुरुणी हरिद्रे देवदारु च ॥
प्रियङ्गवश्च रोध्रञ्च तैले योज्यानि रोपणे।
कङ्गुका त्रिफलारोध्रं कासीसं श्रवणाह्वया ॥

नामिति न्यग्रोधो उदुम्बराश्वत्थप्लक्षप्रभृतीनां शृतशीतकषायश्चेत्युपलक्षणं, तेन फाण्टस्वरसावपि गृह्यते द्रव्यमुष्णोदके रात्रौ स्थापितं शीतकषाय इत्युच्यते रोपणार्थं संरोहणार्थं, रोपणवर्त्तनद्रव्याणि निर्द्दिशन्नाह। सोमेत्यादि- सोमः सोम एव सोमवल्कल इत्यन्ये, अपरे सोमा ब्राह्मीत्याहुः, अमृता गुडूची, क्षीरिप्ररोहान्यग्रोधोदुम्बरादीनामङ्कुरः, शेषं प्रसिद्धं, रोपणकल्कद्रव्यं निर्द्दिशन्नाह समङ्गेति समङ्गाः अञ्जलिकारिका नजानुकोति लोके प्रसिद्धा वराहक्रान्ता अपरे सोमः सोम एव, सरलासरलविशेषसिकामन्ये सोमवल्कः, कट्फलं शेषं प्रसिद्धं, रोपणघृतं निर्द्दिशन्नाह। पृथगिति पृथक्पर्णी पृश्निपर्णी, आत्मगुप्ता कपिकच्छुः,मालतीजातिः, सिताशर्करा श्वेतदूर्वेत्यन्ये, शेषं प्रसिद्धं ॥ ६ ॥

रोपणतैलमुद्दिशन्नाह। कालानुसार्य्येति कालानुसार्य्यातगरं, शैलजमिति केचित्, शेषं प्रसिद्धं, रोपणचूर्णमाह। कङ्गुकेति कङ्गुका- कङ्गवोऽन्नविशेषा इत्यपरे, श्रवणाह्वयामुण्डितिका, धवः शकयाख्यः अनेनैव नाम्ना प्रसिद्धः, अश्वकर्णः पूर्वदेशे गन्धमुण्डोऽश्वत्थसदृशवृक्षः, शेषः प्रसिद्धः, कङ्गुकास्थाने केचित् किंशुका इति पठन्ति, द्वितीयं रोपणचूर्णमाह। प्रियङ्गुकेति अत्र सर्वं सुबोधं, रसक्रियां रोपणीमाह यथाक्रममिति रस-

धवाश्वकर्णयोस्त्वक् च रोपणं चूर्णमिष्यते ।
प्रियङ्गुका सर्जरसः पुष्पं कासीसमेव च ॥
त्वक्चूर्णं धवजं चैव रोपणार्थं प्रशस्यते ।
त्वङ् न्यग्रोधवर्गस्य त्रिफलायास्तथैव च ॥
रसक्रियां रोपणार्थे विदधीत यथाक्रमं ।
अपामार्गोऽश्वगन्धा च तालपत्री सुवर्चला ॥
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः ।
कासीसं सैन्धवं किण्वं कुरुविन्दो मनःशिला ॥
कुक्कुटाण्डकपालानि सुमनोमुकुलानि च ।
फले शैरीषकारञ्जे धातुचूर्णानि यानि च ॥
व्रणेषूत्सन्नमांसेषु प्रशस्तान्यवसादने ॥ ७ ॥
समस्तं वर्गमर्द्धं वा यथालाभमथापि वा ।
प्रयुञ्जीत भिषक् प्राज्ञो यथोद्दिष्टेषु कर्मसु ॥ ८ ॥

क्रियावस्थायां रोपणरसक्रियाकर्त्तव्येत्यर्थः, शेषं सुगमं, इदानीमुत्सादनमाह। अपामार्ग इति आपामार्गस्य मूलं शीतलं गृह्यते न तु फलं तस्योष्णवीर्य्यत्वात्, तालपत्रोमुषलीसुवर्चलासूर्य्यावर्त्ति अस्या अपि मूलं नतु फलं तस्योष्णवीर्य्यत्वात्. उत्सादने इति उत्सादनं मांसवर्द्धनं लेपप्रयोगादुत्सादनं भवति.शेषं सुगमं, अवसादनं निर्दिशन्नाह । कासीसमिति कुरुविन्दो लोहित, रत्नं पद्मराग उच्यते, कुक्कुटाण्डकपालानि कुक्कुटाण्डकर्पराणि, सुमनो मुकुलानि चेति जातिकलिका इत्यर्थः, धातुचूर्णानि यानि चेति हरितालपुष्पकाशीशरसाञ्जनप्रभृतीनि उत्सन्नमांसेष्वित्यर्थः, अवसादने इति मांसस्फोटने ॥ ७ ॥

एषां शोधनरोपणादिवर्गाणां समस्तानामलाभे कल्पान्तरं दर्शयन्नाह ।

सप्तत्रिंशत्तमोऽध्यायः ।

अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः ।

श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाघातनदेवतायतनसिकताभिरनुपहतामनूषरामभङ्गुरामदूरोदकां स्निग्धां प्ररोहवतीं मृद्वीं स्थिरां समां कृष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत, तस्यां जातमपि कृमिविषशस्त्रातप-

समस्तमिति मिश्रकीयेषु द्रव्यगणेषु तथा द्रव्यसंग्रहणीयोक्तेषु तथा संशोधनसंशमनीयोक्तेषु यानि द्रव्याणि तेषां समस्तानामलाभे त्रिचतुः पञ्चषड़ादिद्रव्याणामपि योगः कर्त्तव्य इत्यर्थः, तेनाध्यायत्रयनिर्दिष्टगणविषयिणी एव इयं परिभाषा, न समस्ततन्त्रव्यापिनी, अन्ये समस्तमुत्तमबलव्याधौ अर्द्धं मध्यमबले यथालाभं हीनबले इति कथयन्ति अयं पचो गयादासाचार्य्येण दूषितः यथालाभमिति यस्य लाभः स्यात्तत् प्रयुञ्जीतेत्यर्थः । यथोद्दिष्टेषु कर्म्मस्विति उक्तेषु विम्लापनादिकर्म्मस्वित्यर्थः ॥ ८ ॥

इति सूत्रस्थाने निबन्धसंग्रहे षट्त्रिंशत्तमोऽध्यायः ।

भूमेः प्रकृष्टो भागो भूमिप्रविभागः भूमिप्रविभागार्थोऽध्यायो भूमिप्रविभागीयः, पूर्वाध्याये भूमिपरीक्षा भूतकार्य्यैः शीतोष्णवर्षादिभिस्तथा पर्वतवृक्षादिभिः कृता इहतु अध्याये भूतगुणैरेव परीक्षाकर्त्तव्या इति केचिदत्रान्तराले मिश्रकाध्यायं पठन्ति तन्न, पूर्वाचार्य्यैव पठितत्वात्, सभूमिविभागो द्विविधः सामान्यो विशिष्टश्च तत्र प्रथमं सामान्यमेव भूमिविभागमाह । अनुपहतमिति श्वभ्रादिभिः सिकतान्तैः सह प्रत्येकं सम्बध्यते श्वभ्रशर्कराश्मभिर्विषमः निम्नोन्नतः तेनानुपहतामिति सम्बन्धः श्वभ्रं बिलं शर्करा पक्वानाष्टसूक्ष्मखण्डं शर्करेति लोके अश्मापाषाणः वल्मीक इति ननु

पवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढ़मूलमुदीच्यां चौषधमाददीतेत्यौषधभूमिपरीक्षाविशेषः सामान्यः॥ १ ॥

विशेषतस्तु। तत्राश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया स्वगुणभूयिष्ठा। स्निग्धा शीतला सन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाम्बुगुणभूयिष्ठा। नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा। रूक्षा भस्मरासभवर्णा तनुरूक्षकोटराल्परसवृक्षप्रायाऽनिलगुणभूयिष्ठा। मृद्वी समा श्वभ्रवत्य-

वल्मीकमूर्द्धनि श्वेतकपोतोऽवच्छाते तत्कथं वल्मीकजातौषधिनिषेधः, सत्यं आशीविषविषैस्तस्यादिव्यौषधैर्वीर्य्यं न हन्यते अथवा तत्रैव विशेषेण वीर्य्यवती भवति इति अदोषः। श्मशानं मृतमर्त्त्यदाहस्थानं, आयतनं वधस्थानं, सिकता वालुका, अनुपहतामनुपद्रुतां, अनूषरामूषरावर्जितां, अभङ्गुरां राजिरहितां, अदूरोदकलेन साधारणत्वमुक्तं, स्निग्धां चिक्कणां, प्ररोहवतीं वीजाङ्कुरजननीं, मृद्वीं कोमलां, स्थिरां वाततोयादिभिरचलितमृत्तिकां, समामनिम्नोन्नतां, गौरीं सुवर्णवर्णां, औषधग्रहणायेति औषधग्रहणार्थं, न केवलं भूमिगुणैरेव भेषजानि विभजनीयानि किन्तर्हि सदोषगुणैरपीति दर्शयन्नाह। तस्यां जातमित्यादिक्रिम्यादिभिः सम्बाधमार्गान्तैः सह प्रत्येकमुपहतशब्दः सम्बध्यते, सम्बाधः सङ्कटः, एकरसमुत्कृष्टरसं, पृथ्ववगाढ़मूलञ्चेति, पृथुवल्कलं, अवगाढ़मूलं भूम्यन्तःस्थितं मूलं यस्य तत् तथा, चकारादनुपहतं प्रशस्तमूलत्वञ्च समुच्चीयते, उदीच्यामिति उत्तरस्यां दिशि एतेन उत्तराभिमुखो गच्छेदित्यर्थः॥ १ ॥

विशेषो भेदः, सामान्यभूमिगुणं प्रदर्श्य विशिष्टं प्रतिभूतगुणं निर्द्दिशन्नाह। स्वगुणभूयिष्ठेति पृथ्वीगुणभूयिष्ठेत्यर्थः। स्निग्धेति तनुत्वचा श्लक्ष्णत्वर्थः। मृद्वीति अस्य पाञ्चभौतिकविशेष गुणकथनस्यायमभि-

व्यक्तरसजला सर्वतोऽसारदृष्ठा महापर्वतदृच्छप्राया श्यामा चाकाशगुणभूयिष्टा।

तत्र केचिदाङ्गराचार्य्याः। प्राहट्वर्षाशरद्वेमन्तवसन्त-ग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्चीरसारफलान्याददीतेति तत्तु न सम्यक् कस्मात् सौम्याग्नेयत्वाज्जगतः। सौम्यान्यौषधानि सौम्येष्वृतुष्वाददीताग्नेयान्याग्नेयेष्वेवमव्यापन्न-गुणानि भवन्ति। सौम्यान्यौषधानि सौम्येषु ऋतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्ध-शीतानि जायन्ते। एतेन शेषं व्याख्यातं।

तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचन-द्रव्याण्याददीताग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि। उभयगुणभूयिष्ठायामुभयतो भागानि। आकाशगुण-भूयिष्ठायां संशमनान्येवं बलवत्तराणि भवन्ति। सर्वाण्येव चाभिनवान्यन्यत्र मधुघृतगुडपिप्पलीविड़ङ्गेभ्यः। सर्वाण्येव सचीराणि वीर्य्यवन्ति तेषामसम्पत्तावनतिक्रान्तसंवत्सराण्याददीतेति।

भवन्ति चात्र॥ २॥

प्रायः, पृथिव्यामुत्कटत्वेन द्रव्याणां स्वस्यां भूमौ जातं ग्राह्यं एवं बल-वत्तराणि औषधानि भवन्ति तत्रेति वमनादिद्रव्याणि कीदृशायां भूमौग्ट-हीतव्याणीत्याह। तत्रेति संशमनानीति यद्द्रव्यं न वामयति न विरेचयति व्याधिना सह एकीभूय तत्स्वयमेव व्याधिमुपशमयति तत्संशमनमुच्यते। सर्वाणीति यानि सर्वाण्येवाभिनवानि बलवत्तराणीत्यत्रापि सम्बध्यते अत्र परिणतिकालानन्तरत्वमभिप्रेतं. न पुनर्जन्मनवत्वं। एतस्यैवापवादसूत्रं प्रदर्शयन्नाह। विड़ङ्गेति दोषवर्जितमिति क्रिमिविषशस्त्राद्युपघातादिदोषै-

गोपालास्तापसा व्याधाये चान्ये वनचारिण: ।
मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते ॥
सर्वावयवसाध्येषु पलाशलवणादिषु ।
व्यवस्थितो न कालोऽस्ति तत्र सर्वो विधीयते ॥ ॥ ३ ॥
गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते ।
तस्माद्भूमिस्वभावेन वीजिन: षड्रसायुता: ॥
अव्यक्त: किल तोयस्य रसो निश्चयनिश्चित: ।
रस एव सचाव्यक्तो व्यक्तो भूमिरसाद्भवेत् ॥

स्यत्र । अत्रान्तरे वृद्धै: पठित: पाठ: । सर्वाणीति तच्च सचीराणि सरसानीत्यर्थ: मध्वादीनि यथोक्तानि यदा न प्राप्यन्ते तदा किं कर्त्तव्यमित्याह । तेषामिति । तेषां मधुघृतादीनामसम्पत्तौ अत्यन्तपुराणानामप्राप्तौ ॥ २ ॥

कुत: पुनर्भेषजानि ज्ञातव्यानि इत्याह । गोपाला इति, गोपाला गोमहिष्यजादिपालका: प्रोच्यन्ते, तापसास्तपस्विनो जटाधारीप्रभृतय:, व्याधा वागुरिकादय:, वनचारिणो म्लेच्छादय:, तत्र केचिदाहुराचार्य्या: प्रावृड्वर्षाशरद्धेमन्तेत्यादिग्रन्थेन व्यभिचार्य्ये श्लोके व्यभिचारयितुमाह । सर्वेति सर्वावयवसाध्येषु अशेषमूलाद्यवयवग्राह्येषु योगेष्वित्यर्थ: । पलाशलवणादिष्विति पत्रलवणादिष्वित्यर्थ: पत्रलवणयोगश्च वातव्याधि पठितो ज्ञेय:, तत्र सर्वोविधीयत इति तत्र तेषु पत्रलवणादियोगेषु सर्व: समस्तोऽपि काल: प्रावृड़ादिर्विधीयते कथ्यते इत्यर्थ:, एतेन सर्वस्मिन्नपि काले मेलापक: क्रियते इत्यर्थ: ॥ ३ ॥

येन च हेतुना स्वगुणपरित्यागस्तमाह । गन्धवर्णरसोपेता इति लुटादिशब्दनिर्द्देशात् वर्णगन्धरसस्पर्शशब्दोपेता कथिता, षड्विधा षड्प्रकारा, पञ्चभूतात्मिका सर्वलक्षणा च वीजिनो वृक्षादय:, तेच भूमिस्वभावेन युता: षड्रसोपेता भवन्ति अथवा एते षड्रसा भूमिस्वभावेन युता

सर्वलक्षणसम्पन्ना भूमिः साधारणा स्मृता।
द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः॥
विगन्धेनापरामृष्टमविपन्नं रसादिभिः।
नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्द्दिशेत्॥
विड़ङ्गं पिप्पली क्षौद्रं सर्पिश्चाप्यनवं हितं।
शेषमन्यत्त्वभिनवं गृह्णीयाद्दोषवर्ज्जितं॥ ४॥
जङ्गमानां वयःस्थानां रक्तरोमनखादिकं।
क्षीरमूत्रपुरीषाणि जीर्णाहारेषु संहरेत्॥
प्लोतमृद्भाण्डफलकशङ्कुविन्यस्तभेषजं।
प्रशस्तायां दिशि शुचौ भेषजागारमिष्यते॥ ५॥

मिलिताः सन्तः वीजिनो भवन्ति, वृक्षादिरूपा भवन्तीत्यर्थः, यद्द्रिव्याणां परिणामविशेषेण मधुरादिरसता तत्कथमुच्यते आप्योरस इत्याह अव्यक्त इति मधुरादिभावेनापरिस्फुट इत्यर्थः, किलावधारणे निश्चयनिश्चित इति प्रमाणनिश्चितो रसोऽस्तीत्यर्थः यद्येवं मधुरादिभेदानुपपत्तिरित्यत आह रसः स एवेत्यादि स एवाव्यक्तो रसः व्यक्तो भवति मधुरादिभावं याति कस्माद्भूमिरसादिति सम्बन्धः, भूमिद्रव्ययोः कारणमाह। सर्वलक्षणसम्पन्नेति सर्वलक्षणसम्पन्ना पृथिव्यादिपञ्चमहाभूतलक्षणयुक्तेत्यर्थः, तद्गुणानि साधारणगुणानि द्रव्याणीत्यर्थः। नवं वा पुराणं वा कीदृशं द्रव्यं गृह्यत इत्याह। विगन्धेनेति विगन्धेनापरामृष्टमिति विरोधिना गन्धेन न स्पृष्टमित्यर्थः, अविपन्नं अक्षीणं रसादिभिरित्यर्थः॥ ४॥

स्थावराणि नियम्य जङ्गमानि नियन्तुमाह। जङ्गमानां वयस्थानामिति तरुणानां न बालवृद्धानामित्यर्थः, गृहीतौषधसंस्थापनोपायं दर्शयन्नाह। प्लोतेति प्लोतः कर्पटखण्डं, मृद्भाण्डं मृत्भाण्डं, फलकं पट्टकं इति पुस्तकान्तरे पाठः, शङ्कुकीलकः, एतेषु प्लोतादिषु विन्यस्तं धृतं भेषजं यस्मिन्

अष्टात्रिंशत्तमोऽध्यायः।

अथातो द्रव्यसंग्रहणीयमध्यायं व्याख्यास्यामः।

समासेन सप्तत्रिंशद्द्रव्यगणा भवन्ति तद्यथा। विदारिगन्धा विदारी सहदेवा विश्वदेवा श्वदंष्ट्रा पृथक्पर्णी शता-

गृहे तत्र भेषजागारं भेषजगृहमिष्यते इति सम्बन्धः। प्रशस्तायां दिशि पूर्वस्यामुत्तरस्यां वा शुचौ देशे अस्मिन् भूमिप्रविभागीयाध्याये निबन्धेषु व्यत्ययेन न पाठो दृश्यते। अस्माभिस्तु वृद्धक्रमरीत्यैव पाठो लिखित इति. सर्वावयवसाध्येष्वित्यादि यावन्नवं द्रव्यं पुराणञ्चेति पाठं केचिदाचार्या न पठन्ति ॥ ५ ॥

इति सूत्रस्थाने निबन्धसंग्रहे सप्तत्रिंशोऽध्यायः।

=*=

द्रव्याणां संग्रहः संक्षेपः तमधिकृत्य कृतोऽध्याय इत्यर्थः,विस्तरस्तु चिकित्सिते कथ्यते, तदुक्तं समासेन गणा ह्येते प्रोक्तास्तेषान्तु विस्तरं। चिकित्सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलमिति ॥ तत्रादावध्यायस्य पिण्डार्थं निर्दिशन्नाह समासेनेति समासेन संक्षेपेण, गण्यन्त इति गणाः समूहाः तत्रद्वात्रिंशदनियतावयवाः पुनः पञ्चपञ्चावयवाः केचित् पञ्चत्रिंशदिति पठन्ति, त्रिंशद्वामलकादीनि विहायेति तत्र प्रथमं दोषक्रमेणाद्यं गणं निर्दिशन्नाह। तद्यथेति विदारिगन्धा शालपर्णी, विदारि विदारिकन्दः, कोहलाकारो लोहितकुसुमः स च द्विविधः दीर्घकन्दो बहुक्षीरः, हस्तिपादको महाल्पक्षीर इति विश्वदेवा गाङ्गेरुकी प्रसिद्धा गुडशर्करेति पूर्वदेशे अन्येपि सितपीत कुसुमं बलामाहुः, सहदेवा बलाभेदः पीतपुष्पकाङ्कसी इति लोके अन्ये बलां नीलपुष्पमाहुः श्वदंष्ट्रा गोक्षुरकः, पृश्निपर्णी पृथक्पर्णी पीठवनीति लोके, शतावरी सूक्ष्मपत्रा शताउरि इति

र्यौ सारिवाकृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्र-
सहा बृहत्यौ पुनर्नवैरण्डौ हंसपादी वृश्चिकाल्यृषभी चेति।

विदारीगन्धादिरयं गणः पित्तानिलापहः।
शोषगुल्माङ्गमर्द्दोर्द्ध्वश्वासकासविनाशनः॥ १॥

आरग्वधमदनगोपघोण्टाकुटजपाठाकण्टकीपाटलामूर्वे-

लोके, सारिवा जम्बुपत्रा, दुग्धगर्भा वल्ली स्वनाम प्रसिद्धा कृष्णसारिवा छलहिण्टापत्रसदृश च चन्दनगन्धा कालवेलि इति लोके केचित् कृष्णसारिवां न पठन्ति जीवकः कूर्च्चशीर्षकः स्वनामख्यातः ऋषभक वृषभकौः एतावपि स्वनामख्यातौ, महासहा माषपर्णी, क्षुद्रसहा मुद्गपर्णी, बृहत्यौ सूक्ष्मफला स्थूलफला च, पुनर्नवा वर्षाभूः साउड़ि इति लोके, एरण्डः स्वनामप्रसिद्धः, हंसपादी मधुस्रवा हंसपदाकारपत्रा पीतपुष्पा जलमुक्तदेशजाता हंसपदी इति लोके प्रसिद्धा, वृश्चिकाली कण्टकित मेषशृङ्गतुङ्गाकारफला, पाठापत्रा ईषद्रोमशाश्वेतपुष्पपुच्छा दक्षिणावर्त्तवल्ली मेषशृङ्गीभेदः वृश्चिपायाकमन्ये, ऋषभी कपिकच्छुः शृगालविन्नामेके विदारिगन्धादौ पठन्ति तामपठनीयामेके मन्यन्ते, अन्ये पृश्निपर्णीभेदं, दीर्घपत्रं सिंहपुच्छमाहुः, शोषो राजयक्ष्मा, अङ्गमर्द्दः स्फुटनिका, पित्तानिलहरत्वेन दोषप्रत्यनीकता उक्ता, शोषादिनाशकत्वेन व्याधिप्रत्यनीकत्वं चोक्तं एवं दोषयोरुक्तयो व्याधिषु चोक्तेष्ववस्थाकालदेशादिभेदेन समस्तैरेतैर्द्रव्यैर्यथालाभं लब्धैर्वाश्रृतशीतफाण्टस्वरसकल्कचूर्णगुटिकोत्कारिका रसक्रियालेपप्रदेहनपरिषेकावगाहनघृततैलादीनि यथायोगं साधनीयानि एवमन्येष्वपि गणेषु योज्यं, येषां जीवकर्षभकादिद्रव्याणामन्नपानादौ गुणो न निर्द्दिष्टः, तेषां समुदितस्य गणस्य गुणाभिधानेनैव पृथग्द्रव्यगुणो ज्ञातव्य इति॥ १॥

आरग्वधेत्यादि आरग्वधः किरमालकः, मदनः पिण्डीतकः मयनहल इति लोके, गोपघोण्टा कर्कोटीवरदरभेद इत्यन्ये यामकोलिकेति प्रसिद्धा पूगभेदमपरे, कण्टकी विकङ्कतवृक्षः कण्टकारिकेति प्रसिद्धा

न्द्रयवसप्तपर्णनिम्बकुरुण्टकदासी। कुरुण्टकगुडूचीचित्रक-शार्ङ्गेष्टाकरञ्जद्वयपटोलकिराततिक्तकानि सुषवी चेति।

आरग्वधादिरित्येष गणः श्लेष्मविषापहः।
मेहकुष्ठज्वरवमी कण्डूघ्नो व्रणशोधनः॥ २॥

काकड़ इति लोके, कुटजः इन्द्रवृक्षः, पाठा अविद्धकर्णी पाढ़ इति लोके पाटला वसन्तदूतीस्वनाम प्रसिद्धा, मूर्वाधनुर्गुणीपर्यायात्मूर्ध्वढ़म इति लोके। अन्ये चीरस्नायुमाहुः, इन्द्रयवः कुटजफलं, सप्तपर्णीशाल्मली-सदृशपर्णो गजमदगन्धपुष्पः शरदिविकशनशीलः। उच्चैर्वृक्षः सालतन इति लोके, निम्बः प्रसिद्धः, कुरुण्टकः पीतपुष्पः, कण्टा झिंलुया इति लोके, नीलपुष्पः स एवदासीकुरुण्टकः, गुडूची प्रसिद्धा, चित्रकः प्रसिद्धः, शार्ङ्गेष्टा काकजङ्घाविकसवनीति लोके काकमाचीत्यन्ये अन्ये तु शार्ङ्गेष्टा काकतिक्ता गौरवर्त्तुलावगुण्ठितफला चिरपोटिकेति प्रसिद्धा, झंझरुदाकीति पूर्वदेशे काकादनीत्यपरे सा च गुञ्जेति प्रसिद्धा, करञ्जद्वयमिति एकश्चिरविल्व-द्वितीयः कर्कटी, विटपः करञ्जः, पटोलः कुलकः स्वनामख्यातः, किरात-तिक्तकोभूनिम्बः, सुषवी कारवेल्लकः अन्ये तु पानीयवल्लीमाहुः। सालसार इति सालः शङ्कुस्तस्य सारः सालसारः अजकर्णः सर्जःसालभेद एव, खदिरो गायत्रीस्वनामख्यातः, कदरः खदिराकारः श्वेतसारः, क्रमुकः पूगः केचित् क्रमुग इति पठन्ति अत्रापि स वार्थः, वृक्षरोम इत्यन्ये साराधिकारात् भूर्जो मृदुत्वक् स्वनामाख्यातः केचित् भूर्जस्थाने स्फूर्जक इति पठन्ति तत्र स्फूर्जकः स्योनाक वा स्योनाकनाम्ना प्रसिद्धः, लकुचाकारपत्रकाण्डः मेषशृङ्गः कर्कटशृङ्गः सच पुत्रञ्जीवकसदृशस्तरुविशेषः तिनिशः स्यन्दनः सादन इति लोके प्रसिद्धः, अगुरुस्वनामख्यातं, चन्दनं श्रीचन्दनं श्रीखण्ड इति प्रसिद्धं, कुचन्दनं रक्तचन्दनं, शिंशपा कृष्णसारा-सांस इति लोके, शिरीषो विषघाती शिरस इति लोके, असनोवीजकः पूर्वदेशे प्रसिद्धः,कटाख्यः स्वनामप्रसिद्धः,अर्जुनः ककुभः तालस्वनामख्यातः, शाकः पूर्वदेशे प्रसिद्धः, अगुरुस्वनामख्यातं कालीयकं मनेन्द्रोदन्दनमिति

वरुणार्त्तगलशिग्रुमधुशिग्रुतर्कारीमेषशृङ्गीपूतीकनक्त-मालमोरटाग्निमन्थसैरीयकद्वयबिम्बीवसुकवसिरचित्रकशता-वरीबिल्वाजशृङ्गीदर्भा बृहतीद्वयञ्चेति।

वरुणादिर्गणोह्येष कफमेदोनिवारणः।

विनिहन्ति शिरःशूलं गुल्माभ्यन्तरविद्रधीन्॥ ३॥

वीरतरुसहचरद्वयदर्भवृक्षादनीगुन्द्रानलकुशकाशाश्मभेद-काग्निमन्थमोरटावसुकवसिरभल्लूककुरुण्टकेन्दीवरकपोतवङ्का श्वदंष्ट्राचेति।

प्रसिद्धं विनाशनहरणविशेषणानामर्थभेदमाह तत्र कुष्ठविनाशनो मूलो-च्छेदनः हरणो मेहपाण्ड्वादेः संशमनत्वेन निर्मूलत्वेन शोषणः कफमेदसो द्रव्यविग्धयोः॥ २॥

वरुणेति वरुणस्तिक्तशाकद्रुमः वरुण इति लोके, आर्त्तगलः ककुभः सुगन्धमूलं कांवहाः इति नाम्ना पूर्वदेशे प्रसिद्धः, शिग्रुःशोभाञ्जनकः, मधुशिग्रुः रक्तशोभाञ्जनकः, तर्कारी अरणिका मेषशृङ्गीपूतिकश्चिरबिल्वः, नक्तमालः बृहत्करञ्जः मोरटः अवकाल्पपुष्पा योद्रक्षर इति लोके, हस्ति-कर्णपलाश इत्यन्ये, अग्निमन्थस्तेजो वृत्तपूर्वदेशे अग्नेथ इति प्रसिद्धः, सैरेयकद्वयं रक्तपुष्पनीलपुष्पकण्टशेलुद्वयं,बिम्बी ओष्ठोपमफला तिन्दुरिकेति प्रसिद्धा, चित्रकः प्रसिद्धः शतावरी प्रसिद्धा, वसुकोवुकः वकपुष्प इति लोके अन्ये तु वसुकोऽर्कवसिरो मर्कटपिप्पलीतृणजातिः अपामार्ग इति प्रसिद्धः, बिल्वः श्रीफलः अजशृङ्गीऊगलविषाणिका उत्तमारणी मेण्डिकेति लोके, दर्भः कुशः बृहतीद्वयं कण्टकारिकाद्वयं एका स्थूलफला द्वितीया ह्रस्वफला॥ ३॥

वीरेति वीरतरुः शवः अन्ये तु वीरतरुर्वेल्लन्तर इति नाम्ना प्रसिद्धः जाङ्गलदेशे नर्म्मदातटे चर्म्मण्वतीनदीसमीपे च तल्लक्षणमुच्यते वेल्लन्तरज-गति वीरतरुः प्रसिद्धः श्वेता सितारुणविलोहित पीतपुष्पा माद्राविटल्प कुसुमः, अमिसूक्ष्मपत्रः स्यात् कण्टकीविजलदेशज एषवृक्ष इति सहचरद्वयं

वीरतर्वादिरित्येष गणो वातविकारनुत्।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः॥

सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीतिनिशचन्दनकुचन्दनशिंशपाशिरीषासनधवार्जुनतालशाककनक्रमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति।

सालसारादिरित्येष गणः कुष्ठविनाशनः।
मेहपाण्डामयहरः कफमेदोविशोषणः॥ ४॥

रोध्रसावररोध्रपलाशकुटन्नटाशोकफञ्जीकट्फलैलवालुकसल्लकीजिङ्गिनीकदम्बसालाः कदली चेति।

एष रोध्रादिरित्युक्तो मेदःकफहरो गणः।
योनिदोषहरस्तम्भी वर्ण्यो विषविनाशनः॥ ५॥

कण्टगेलुद्वयं, दर्भः प्रसिद्धः, वृचादनीवन्दाकः कवलेख इति लोके, वृचक-लम्बुकमलमपरे गुन्द्रारकभेदो गोदर इति लोके, नलोदूर्वाकाराङ्कुरोऽन्तः-शुषिरः स्वनामाख्यातः, कुशोऽल्पदर्भः, काशश्चामरपुष्पः, अश्मभेदकः पाषाणभेदकः, अग्निमन्थस्तेजो वृचः अङ्गेशूर इति लोके, वसुकोवुकः वकपुष्प इति लोके, वसिरः अपामार्गः, सूर्य्यावर्त्तभेदमित्येके, भल्लुकः शोनाक इति लोके, कुरण्टिका कृष्णसूक्ष्मफला सिरवालिका इति लोके, इन्दोवरोऽपि तद्भेदो, दीर्घपत्री बहुलपुष्पा, कपोतवङ्का सुवर्चला अन्ये शिरीषसदृशपत्रा स्वल्पविटपा इति द्रव्यान्तरमाहुः, श्वदंष्ट्रा गोक्षुरकः, अश्मरीवस्तिपाषाणः सैववातभिन्ना, शर्करामूत्रकृच्छ्रः, मूत्रं मूत्राघातः मूत्रावरोधः, रुजाशब्दः रोगवाचनः स च अश्मर्य्यादिषु प्रत्येकं सम्ब-ध्यते॥ ४॥

रोध्रेति रोध्रः लाचाप्रसादनः रक्तः सरेव लोध्रः श्वेतस्थूलत्वक,पलाशः किंशुकः, कुटन्नटः श्योनाकः, फञ्जीभार्गी, अशोकः लोहित कुसुमः स्वनाम-ख्यातः, कट्फलः काश्मरीकायफल इति लोके, एलवालुकं हरिवालुकं

अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पी-क्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणास्तापसवृक्षश्चेति।

अर्कादिको गणो ह्येष कफमेदोविषापहः।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः॥ ६ ॥

सुरसाश्वेतसुरसाफणिज्झकार्जकभूस्तृणसुगन्धकसुमुखका-लमालकासमर्दक्षवकखरपुष्पाविडङ्गकट्फलसुरसीनिर्गुण्डी-कुलाहलोन्दुरुकर्णिकाफञ्जीप्राचीवलकाकमाच्यो विषमुष्टि-कश्चेति।

कृष्णगन्धिकफलवृक्षः, सल्लकी गजभक्ष्या साल इति लोके, जिङ्गिनी गुड़मञ्जनिका गुलदुल्लि इति लोके पूर्वदेशे स्वनामप्रसिद्धा, कदम्बो वृक्षकदम्बः, सालः सर्जः कदलीरम्भास्वनामप्रसिद्धा, स्तम्भो अतिसारादेः स्तम्भनं॥ ५॥

अर्केति अर्कोरक्तपुष्पः प्रसिद्धः,अलर्कोमदावार्क यस्य चीरं न विनश्यति, करञ्जद्वयं वृक्षविटपकरञ्जौ, नागदन्तीदन्ती, मयूरकोपामार्गः,भार्गीस्वनाम-ख्याता रास्ना सुरभी स्वनामख्याता, इन्द्रपुष्पी कण्टकी, कृष्णपुष्पकरञ्जः, कलिकारिकेत्यन्ये, क्षुद्रश्वेता श्वेतस्यन्दा, श्वेतपुष्पा सेफन्द इति लोके, महाश्वेता नीलपुष्पः, सङ्कन्दः बन्ध्या वार्कोटिकेत्यन्ये,वृश्चिकाली वृश्चियाकः, अलवणा ज्योतिष्मतीवर्त्तुलपक्वरक्तफला, पीततैला काकमर्द्दनीकेति लोके प्रसिद्धा, तापसवृक्षः इङ्गुदः पुत्रञ्जीवक इत्यन्ये॥ ६॥

सुरसेति सुरसेद्वे श्वेतकृष्णकुसुमे ते च लोके तुलसीति प्रसिद्धे, फणि-ज्झकस्तीक्ष्णगन्धोमरवक इति लोके अन्येतु अनेनैव नाम्ना प्रसिद्धः,अर्जकः वर्वरिकाकारो लघुमंरीकः,सूक्ष्मपत्नो निर्गन्धः श्वेतकुटेरकः भूस्तृणोङ्गुदाक-नामधेयो द्रोणपुष्पसदृशः, सुगन्धको द्रोणपुष्पः अन्येतु भूस्तृणं रोहिषं सुग-न्धको वृहत्सुगन्धतृणं, सुमुखं राजिका अन्येतु वनवर्वरिका सञ्जा इति नाम्ना जेर्जीभुक्ते प्रसिद्धा,कालमालः कृष्णमल्लिका वर्वरिकेति लोके, कास-

सुरसादिर्गणो ह्येष कफहृत् क्रिमिसूदनः।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः॥ ७॥
मुष्ककपलाशधवचित्रकमदनवृक्षशिंशपावज्रवृक्षास्त्रिफला-
चेति।
मुष्ककादिर्गणो ह्येष मेदोघ्नः शुक्रदोषहृत्।
मेहार्शःपाण्डुरोगघ्नः शर्कराश्मरीनाशनः॥ ८॥
पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्प-

मरुः स्वनामख्यातः, चरकः चवशुकं फणिज्झकाकारः जिह्वारियाक इति पारियात्रे प्रसिद्धः टङ्किनोति लोके, खरपुष्पपत्रं तस्यैव भेदः वीवइकामपरे मरुवकमन्ये, विडङ्गः प्रसिद्धः, कट्फलः सोमवल्कः कायफल इति लोके, सुरसीकपित्थसदृशपत्रा विल्वनासीति लोके प्रसिद्धा श्वेतनिर्गुण्डीत्यन्ये, निर्गुण्डीनीलनिर्गुण्डी कुलाहली मुण्डिकेति प्रसिद्धः, उन्दुरुकर्णिका मूषिककर्णिका उन्दुरीति लोके उन्दुरकर्णी इवन्तिमाहुरन्ये अपरे दन्तिनीमाहुः उन्दुरकर्णी इत्येके पठन्ति तत्रापि स एवार्थः, फञ्जीभार्गी-प्राचीवली मत्स्याचकः, काकजङ्घानदीपिप्पलीत्यपरे, केचिदाचार्य्या एवं वदन्ति यद्यपि प्राचीवलशब्देन काकजङ्घा गण्डदूर्वा जलपिप्पली चोच्यते तथाप्यत्र काकजङ्घैव काकमाची सान्निधात् वातकफक्रिमिवाधिर्य्यहर-त्वाच्च काकमाची, मृष्टफला स्वनामप्रसिद्धा विषमुष्टिकोद्रेका राजनिम्ब इति प्रसिद्धः वृहद्लम्बुषामपरे कर्कोटित्यन्ये, क्रिमिसूदन इति क्रिमिघ्न इत्यर्थः॥ ७॥

मुष्ककेति मुष्ककः चारवृक्षः मोषक इति लोके, पलाशः किंशुकः, धवः स्वनामप्रसिद्धः, चित्रकोऽपि स्वनाम्नैव प्रसिद्धः, मदनः पिण्डीतकः, वृक्षकः कुटजः मदनवृक्ष इत्यन्ये पठन्ति मदनवृक्ष इत्यत्र वृक्षशब्दनिर्द्देशः फलप्रतिषेधार्थं इति व्याख्यानयन्ति, शिंशपा कृष्णसारो स्वनामख्याता, वज्रवृक्षः सेहुण्ड इति लोके, त्रिफलाहरितक्यामलकविभीतकानि॥ ८॥

लोध्रहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिङ्गुभार्गीमधुरसातिविषावचाविडङ्गानि कटुरोहिणी चेति।

पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः।
निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः॥ ९॥

एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकवालकगुग्गुलुसर्जरसतुरुष्ककुन्दुरुकाऽगुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानिपुन्नागकेशरञ्चेति।

एलादिको वातकफौ निहन्याद्विषमेव च।
वर्णप्रसादनः कण्डूपिड़काकोठनाशनः॥ १०

पिप्पलीति चव्यहस्तिपिप्पलीमूलं स्वनामख्यातं शृङ्गवेरं शुण्ठी हस्तिपिप्पली, गजपिप्पली अजमोदा स्वनामख्याता अन्ये यवानिकामाहुः, महानिम्बफलमिति महानिम्बोद्रेका पर्वतनिम्ब इति लोके, मधुरसामूर्वा, आमपाचन इति जठरानलदौर्बल्यादविपक्वस्तु यो रसः स आमसंज्ञको देहे सर्वदोषप्रकोपकः, शेषं प्रसिद्धं॥ ९॥

एलेत्यादिध्यामकं कर्त्तृणं रोहिषमिति लोके, त्वकवराङ्गं गुड़तजीति लोके, पत्रं पत्रकं नागपुष्पं नागकेशरं अन्ये नागकेशरपुष्पसमपुष्पो महातरुरित्याहुः,हरेणुका, रेणुका व्याघ्रनखो हट्टनखः हट्टनखीत्यन्ये, शुक्तिस्तद्भेदः अल्पनखं चण्डा स्वनामख्याता ईषत् कृष्णचोरकभेदः अजमोदाकारा। स्थौणेयकं ग्रुणेरकः, श्रीवेष्टकः सरलद्रुमः गुग्गुलीति लोके चोचः त्वग्भेदो वानवासिका त्वक् चोरकः स्वनामख्यातः ग्रन्थिपर्णकभेदो ग्रन्थिपर्णाकार एव, सर्ज्जः सर्ज्जरसः,वालेति प्रसिद्धः अन्तलोपात् रसो गन्धरसः वोल इति लोके, तुरुष्क सिह्लारक,कुन्दुरुकः सल्लकी,चोपः स्पृक्का, कुटिलपुष्पा सुगन्धिद्रव्यामोत्तरपथिके, भद्रदारुर्देवदारुः पुन्नागः सुरपर्णिका, सुगन्धिपुष्पा दक्षिणा पथे सुरपतिनाम्ना प्रतीता, केशरं वकुलं केचित् समुदितं व्याख्या-

वचामुस्तातिविषाभयाभद्रदारूणि नागकेशरञ्चेति ।
हरिद्रादारुहरिद्राकलशीकुटजबीजानि मधुकं चेति ।
एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ ।
आमातीसारशमनौ विशेषाद्दोषपाचनौ ॥ ११ ॥
श्यामामहाश्यामात्रिवृद्दन्तीशङ्खिनीतिल्वककम्पिल्लकरम्य-
ककमुकपुत्रश्रेणीगवाक्षीराजवृक्षकरञ्जद्वयगुडूचीसप्तलाच्छ-
गलान्त्रीसुधाः सुवर्णक्षीरी चेति ।
उक्तः श्यामादिरित्येष गणो गुल्मविषापहः ।
आनाहोदरविड्भेदी तथोदावर्त्तनाशनः ॥
बृहतीकण्टकारिकाकुटजफलपाठा मधुकञ्चेति ।
पाचनीयो बृहत्यादिर्गणः पित्तानिलापहः ।
कफारोचकहृद्रोगमूत्रकृच्छ्ररुजापहः ॥ १२ ॥

नयन्ति पुन्नागकेशरं पद्मकेशरमित्यर्थः अन्ये त्वेवं पठन्ति पुन्नागनागकेशर-ञ्चेति पुन्नागं देवबल्लभं राजपद्मकमिति लोके नागकेशरं स्वनामप्रसिद्धं, कोठनाशन इति तत्र कोठलक्षणमुच्यते वरटीदष्टसङ्काशः कण्डूमान-लोहितोऽस्रकफवातात् चिप्रोत्पादविनाशः कोठ इति निगद्यते सद्भि-रिति ॥ १० ॥

वचेति कलसी पृश्निपर्णी, दोषपाचनाविति आमसंसृष्टानां दोषाणां पाचनौ ॥ ११ ॥

श्यामेति श्यामाश्वेतात्रिवृत्, महाश्यामा वृद्धदारकः, त्रिवृत्रक्तमूला त्रिवृन्निशोत इति लोके, दन्तीदन्तिनी,शङ्खिनी यवतिक्ताभेदः श्वेतबुह्नीमि-त्येके, तिल्वको रोध्रः अन्ये तिल्वको रोध्राकारो वृहत्पत्रो रक्तवैरेचनिकः, कम्पिल्लको रोचनिका स्वनामख्यातः रम्यकोद्रेका महानिम्ब इति लोके प्रसिद्धः, पाठोलमूलमित्येके क्रमुकः पूगफलं, पुत्रश्रेणी द्रव्यन्ति एरण्ड-सदृशफलपत्राल्पविटपा सम्बरीति लोके, गवाक्षी इन्द्रवारुणी, राजवृक्षः

पटोलचन्दनकुचन्दनमूर्व्वागुडूचीपाठाः कटुरोहिणी चेति ।

पाचनः यो ह्यत्यादिर्गणः पित्तानिलापहः ।
ज्वरोपशमनो व्रण्यश्च्छर्द्दिकण्डूविषापहः ॥ १३ ॥

काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदा-महामेदाच्छिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीक-र्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्चेति ॥

काकोल्यादिरयं पित्तशोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ॥ १४ ॥

ऊषकसैन्धवशिलाजतुकासीसद्वयहिङ्गूनि तुत्थकञ्चेति ।

किरमालकः, करञ्जद्वयञ्चविटपकरञ्जौ, गुडूची प्रसिद्धा, सप्तला सातला स्नुहीभेदः, छगलान्त्री वृद्धदारकभेदः वृक्षभेद इत्यपरे, सुधाः सेहुण्डः सुवर्णक्षीरी अनन्तासदृशपत्रा कङ्गुष्ठमित्यपरे वृहतीत्यादिस्पष्टमेव ॥ १२ ॥

पटोलादिगण इति कुचन्दनं रक्तचन्दनं हर्मोड्डः, चोरस्नायुस्फिकः व्रणेभ्यो हिते व्रण्यः, शेषं सुखबोधं ॥ १३ ॥

काकोलीति काकोली क्षीरा स्वनाम्ना प्रसिद्धा क्षीरकाकोली तद्भेदः स्वनामख्यातः, जीवकः स्वनामप्रसिद्धः, ऋषभः स्वनामख्यातः, मुद्गपर्णी मुगवतीति लोके, माषपर्णी माषवतीति लोके, अरण्यमाषस्तम्ब इत्येके, मेदामहामेदा सा च स्वनामख्याता, तुगाक्षीरीवंशलोचना, पद्मकं पद्मकाष्ठं, प्रपौण्डरीकं स्वनामख्यातं यष्टीमधुद्रव्यादीषत्स्थूलं मधररसं नेत्राश्चोतनार्हं द्रव्यम् अन्ये शीपुष्पमाहुः, मृद्वीकाद्राक्षा, जीवन्तीडोड़िका इति लोके लतार्कफलाकारसक्षीरफला अन्ये सुवर्णजीवन्तीमाहुः, जीवनः प्राणधारणः, बृंहणः शरीरवृद्धिकरः, शेषं सुबोधं ॥ १४ ॥

ऊषकेत्यादि ऊषकः क्षारमृत्तिका वाराणसीसमीपे वङ्गदेशे बाहुल्येन भवति अन्ये तद्भवं द्रव्यान्तरमाहुः, कासीसद्वयं कासीसं भस्म-

उषकादिः कफं हन्ति गणो मेदोविशोषणः।
अश्मरीशर्करामूत्रकृच्छ्रगुल्मप्रणाशनः॥ १५॥

सारिवामधुकचन्दनकुचन्दनपद्मककाश्मरीफलमधूकपुष्पा-णुशीरञ्चेति।

सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः।
पित्तज्वरप्रशमनो विशेषाद्दाहनाशनः॥

अञ्जनरसाञ्जननागपुष्पप्रियङ्गुनीलोत्पलनलदनलिनके-शराणिमधुकञ्चेति।

अञ्जनादिर्गणो ह्येष रक्तपित्तनिबर्हणः।
विषोपशमनो दाहं निहन्त्याभ्यन्तरं तथा॥ १६॥

परूषकद्राक्षाकट्फलदाड़िमराजादनकतकफलशाक-फलानि त्रिफलाचेति।

परूषकादिरित्येष गणोऽनिलविनाशनः।
मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः॥

सदृशं किञ्चिदम्लं लवणरसं, द्वितीयं पुष्पकासीसमीषत्पीतन्तुवररसं तद्भेद एव, तुत्थं कर्परिकातुत्थं खपरिया इति लोके अन्ये मयूरग्रीवमाहुः, शेषं सुबोधम्॥ १५॥

सारिवेति, चन्दनं रक्तचन्दनम्, अन्ये पद्ममिति पठन्ति तत्र पद्मं पद्मपुष्पं, शेषं सुबोधम्। अञ्जनमिति अञ्जनं सौवीराञ्जनं रसाञ्जनं दारुहरिद्राक्वाथेन कृत्रिमम् अन्ये त्वेवं वदन्ति रसाञ्जनन्तु द्विविधं स्रोतोऽञ्जनं कृष्णपाषाणाकृतिधातुद्रव्यम् अन्यद् दारुहरिद्राक्वाथेन कृत्रिमं पीतलोहितम् अत्र धातुद्रव्यमेव सौवीराञ्जनसाहचर्यात्, नागपुष्पं नागकेशरं, नलदं मांसी, नलिनकेशराणि पद्मकेशराणि, शेषं सुबोधं॥ १६॥

परुषकेति परुषको धन्वपलकः स्वनाम्नैव प्रसिद्धः सद्विविधोवृक्षविटप-

प्रियङ्गुसमङ्गाधातकीपुन्नागरक्तचन्दनकुचन्दनमोचरस-रसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेशरयोजनवल्ल्यो दीर्घमूला चेति ॥ १७ ॥

अम्बष्ठाधातकीकुसुमसमङ्गाकट्वङ्गमधुकबिल्वपेशिकारोध्रसावररोध्रपलाशनन्दीवृक्षपद्मकेशराणि चेति ।

गणौ प्रियङ्ग्वम्बष्ठादी पक्कातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानाञ्चापि रोपणौ ॥

न्यग्रोधोडुम्बराश्वत्थप्लक्षमधुककपीतनककुभाम्रकोशाम्र-चोरकपत्रजम्बुद्वयपियालमधूकरोहिणीवञ्जुलकदम्बवदरी-

भेदात्, कट्फलः सोमवल्कः कायफल इति लोके, राजादनः क्षीरिकः, कतकफलं स्वनामख्यातं शशकपुरीषप्रतिमफलमम्बुप्रसादनं शाकफलानि शाको महापत्रकर्कशोदरपृष्ठदलो वृक्षविशेषः तस्य फलानि सर्व्वेषां फलानि ग्राह्याणि शेषं सुबोधं प्रियङ्ग्विति समङ्गा अञ्जलिकारिका लज्जालु इति लोके, पुन्नागः तुङ्गः स्वनामख्यातः अन्ये सुरपर्णिका सुगन्धिपुष्पा दक्षिणापथे सुरपतीति प्रसिद्धः नागपुष्पं नागकेशरं चन्दनं रक्तचन्दनं कुचन्दनं मलयाद्रिचन्दनं मोचरसः शाल्मलीचर्म्मः, रसाञ्जनं दार्व्वीक्काथसमुद्भवं स्वनामख्यातं कुम्भीकः श्लक्ष्णलक्षारोमशः कुम्भीनामावृक्षो यस्य त्वग् वल्काकारा भवति अन्ये पाटलामाहुः अपरे स्वल्पविटपमाहुः स्रोतोञ्जनं सौवीराञ्जनं पद्मकेशरं स्वनामख्यातं, योजनवल्ली मञ्जिष्ठा दीर्घमूलादुरालभाशालिपर्णीत्यपरे ॥ १७ ॥

अम्बष्ठेत्यादि अम्बष्ठामाचिकासाङ्कुरवृ इति पश्चिमे प्रसिद्धः पाठामित्यपरे, धातकीकुसुमं धातकीपुष्पं, समङ्गा अञ्जलिकारिकालजालु इति लोक, कट्वङ्गोऽरलुकः बिल्वपेषिकाबालबिल्वगिरः महारोध्रं केचित् पठन्ति सावरलोध्रो लोध्रः तस्यैव ग्राहित्वान्नेतरः तस्यवैरेचनत्वात् । पलाशः किंशुकः, नन्दीवृक्षः काश्मरी अन्ये गर्द्दभाण्डमाहुः पद्मकेशरं

तिन्दुकौसल्लकीरोध्रसावररोध्रभल्लातकपलाशा नन्दीवृक्ष-श्चेति ।

न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः ।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत् ॥
गुडूचीनिम्बकुस्तुम्बुरुचन्दनानि पद्मकञ्चेति ।
एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः ॥
हृल्लासारोचकवमीपिपासादाहनाशनः ॥ १८ ॥

उत्पलरक्तोत्पलकुमुदसौगन्धिककुवलयपुण्डरीकाणि मधुकञ्चेति ।

उत्पलादिरयं दाहपित्तरक्तविनाशनः ।
पिपासाविषहृद्रोगच्छर्दिमूर्च्छाहरो गणः ॥

स्वनामख्यातं । सन्धानीयाविति भग्नसन्धानकारकौ, न्यग्रोधेत्यादिन्यग्रोधो वटः उडुम्बरः प्रसिद्धः अश्वत्थः पिप्पलः प्लक्षः पर्कटीमधुकं कपीतनः आम्रातकः ककुभः अर्जुनः आम्रः प्रसिद्धः कोशाम्रः स्वनामख्यातः चोरकपत्री लाचावृक्षः जम्बूद्वयं एकाराजजम्बुः वृहत्फला द्वितीया काकजम्बुः स्वल्पफलाद्वयं ग्रहणाद् भूमिजम्बास्तृतीयायाः प्रतिषेधः पियालः सारद्रुमः मधुकोगुड़पुष्पः महुया इति लोके रोहिणीकट्फलः वञ्जुलो वेतसः कदम्बः प्रसिद्धः वदरीप्रसिद्धा तिन्दुकीतिन्दुकवृक्षः टिम्बरुयणि इति लोके, नन्दीवृक्षोऽत्र प्ररोही गर्द्दभः अत्र गर्द्दभाण्ड इति पुस्तकान्तरे पाठमस्ति । पार्श्वपिप्पल इति लोके शेषं प्रसिद्धम् । गुडूचीति कुस्तुम्बुरुधान्यकं चन्दनं रक्तचन्दनं हृल्लासः स्थूत्कारणं शेषं प्रसिद्धम् ॥१८॥

उत्पलमिति उत्पलं नीलोत्पलं रक्तोत्पलं लोहितोत्पलं कुमुदं श्वेतोत्पलं सौगन्धिकं नीलोत्पलाकारवर्णमुत्पलं सुगन्धि च कुवलयमीषन्नीलधवलं पुण्डरीकं श्वेतपद्मं मधुकम् यष्टीमधुकम् । मुस्तेत्यादि हैमवती श्वेतवचा, वचा स्वनामख्याता । अरुणवर्णं शार्ङ्गेष्टा तपकनिका गौरवर्णोऽल्पावगुण्ठित-

मुस्ताहरिद्रादारुहरिद्राहरीतक्यामलकविभीतककुष्ठहैमवतीवचापाठाकटुरोहिणीशार्ङ्गष्टातिविषाद्राविड़ीभल्लातकानि चित्रकश्चेति।

एष मुस्तादिको नाम्ना गणः श्लेष्मनिसूदनः।
योनिदोषहरःस्तन्यशोधनः पाचनस्तथा॥

हरितक्यामलकविभीतकानि त्रिफला।
त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशनी।
चक्षुष्या दीपनी चैव विषमज्वरनाशनी॥

पिप्पलीमरिचशृङ्गवेराणि त्रिकटुकं।
त्र्यूषणं कफमेदोघ्नं मेहकुष्ठत्वगामयान्।
निहन्याद्दीपनं गुल्मपीनसाग्न्यल्पतामपि॥

आमलकीहरीतकीपिप्पल्यश्चित्रकश्चेति।
आमलक्यादिरित्येष गणः सर्वज्वरापहः।
चक्षुष्यो दीपनो वृष्यः कफारोचकनाशनः॥

त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलश्चेति।
गणस्त्रप्वादिरित्येष गरक्रिमिहरः परः।
पिपासाविषहृद्रोगपाण्डुमेहहरस्तथा॥

फला चिरबोटिकेति प्रसिद्धा भभरुष इति पूर्व्वदेशे काकजङ्घामन्ये काकमाचीत्यपरे, द्राविड़ी एला, स्तन्यशोधन इति स्त्रीचीरप्रसादनः शेषं प्रसिद्धम्। हरीतकीत्यादिस्त्रिफला प्रसिद्धा त्रिफलात्रिकटुकयोर्यथालाभं परिभाषा न व्याप्रियते अतएवानयोर्न्यकारेण संज्ञा न कृतेति पिप्पलीति त्वगामयान् कुष्ठादीन् शेषं प्रसिद्धम्। आमलकीत्यादिमूले स्पष्टमेव। त्रप्वित्यादि त्रपु वङ्गं, सीसं नागं, ताम्रं प्रसिद्धं रजतं रूप्यं सुवर्णं प्रसिद्धं कृष्णलोहं तीक्ष्णलोहं लोहमलः प्रसिद्धः। कीट इति पुस्तकान्तरम्। काट

लाक्षारेवतकुटजाश्वमारकट्फलहरिद्राद्वयनिम्बसप्तच्छ-
दमालत्यस्त्रायमाणा चेति ।

कषायस्तिक्तमधुरः कफपित्तार्त्तिनाशनः
कुष्ठक्रिमिहरश्चैव दुष्टव्रणविशोधनः ॥ १८ ॥

पञ्च पञ्चमूलान्यत ऊर्द्ध्वं वक्ष्यामः। तत्र त्रिकण्टक-
बृहतीद्वयपृथक्पर्ण्यो विदारिगन्धा चेति कनीयः।

कषायतिक्तमधुरं कनीयः पञ्चमूलकं।
वातघ्नं पित्तशमनं वृंहणं बलवर्द्धनं ॥

विल्वाग्निमन्थटुण्टुकपाटलाकाश्मर्य्यश्चेति महत्।

सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम्।
मधुरानुरसञ्चैव पञ्चमूलं महत् स्मृतम् ॥

अनयोर्दशमूलमुच्यते।

गणः श्वासहरो ह्येष कफपित्तानिलापहः।
आमस्य पाचनञ्चैव सर्वज्वरविनाशनः ॥

इति लोके प्रसिद्धः, गरः कृत्रिमं विषम्। लाक्षेत्यादि आरेवतः किर-
मालकः कुटज इन्द्रयवः अश्वमारकः करवीरः कट्फलः सोमवल्कला काय-
फल इति लोके, सप्तच्छदः सप्तपर्णः सातवन इति लोके, मालतीजाती,
त्रायमाणा स्वनामप्रसिद्धा केचिदत्र त्रिफलां पठन्ति शेषं प्रसिद्धं ॥ १८ ॥

पञ्चेत्यादि त्रिकण्टको गोक्षुरकः, विदारिगन्धा शालपर्णी, कनीयः
लघुपञ्चमूलमित्यर्थः, केचित् गोक्षुरकस्थाने एरण्डं पठन्ति। विल्वेति
अग्निमन्थ अग्निवधू इति लोके, टुण्टुकः श्योनाकः महत्पञ्चमूलमित्यर्थः।
अनयोरिति तस्य गुणमाह। गणेत्यादि विदारीविदारीकन्दः,रजनीहरिद्रा,
अन्ये रजनीति पठन्ति, रजनीशीरहलालाकः, अजशृङ्गीमेढ्रिकः, कर्कट-
शृङ्गीत्यपरे, वल्लीसंज्ञः पञ्चमूलम् इति शेषः। वल्लिजपञ्चमूलन्तु प्रशस्तं कफ-

विदारीसारिवारजनीगुडूच्योऽजशृङ्गी चेति वल्लीसंज्ञ:।
करमर्दत्रिकण्टकसैरीयकशतावरीगृध्रनख्य इति कण्टकसंज्ञ:॥
रक्तपित्तहरौ ह्येतौ शोफत्रयविनाशनौ॥
सर्वमेहहरौ चैव शुक्रदोषविनाशनौ॥
कुशकाशनलदर्भकाण्डेक्षुका इति तृणसंज्ञक:।
मूत्रदोषविकारञ्च रक्तपित्तं तथैव च।
अन्त्य: प्रयुक्त: क्षीरेण शीघ्रमेव विनाशयेत्।
एषां वातहरावाद्यावन्त्य: पित्तविनाशन:।
पञ्चकौ श्लेष्मशमनावितरौ परिकीर्त्तितौ॥ २०॥
त्रिवृतादिकमन्यत्रोपदेक्ष्याम:।
समासेन गणा ह्येते प्रोक्तास्तेषान्तु विस्तरम्।
चिकित्सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलम्॥

नाशनम्। स्पष्टमूत्रानिलहरं हृद्यमिन्द्रियबोधनम्। कण्टकाख्यं पञ्चमूलन्तु कफानिलहरं परम्। मधुरानुरसञ्चैव पक्वाशयविशोधनम्। कुशेत्यादि कुश: ह्रस्वो मृदु: सूचीपत्र:, काशश्चामरपत्र:, नल: स्वनाम्नाख्यात:, दर्भ स्थूल:, खरपत्रो दीर्घ: काण्डेक्षुक:, महती खगानी अन्ये इक्षुमेवाहु: अन्ये तु पठन्ति काण्डश्चेति, तत्र काण्ड: शर: अन्त्यस्तृणपञ्चमूल इत्यर्थ:। ये प्रतिपञ्चकं पुन: श्लोकं न पठन्ति तेषां मते पञ्चकानां गुणानेकेनैव श्लोकेन वक्तुमाह। तेषामिति आद्याविति लघुपञ्चमूलमहापञ्चमूलौ अन्त्यस्तृणपञ्चमूल इत्यर्थ: इतरौ मध्यौ वल्लीसंज्ञ: कण्टकसंज्ञकश्चेत्यर्थ:। केचिदत्र वृद्धा: पठन्ति॥ २०॥

त्रिवृदिति अयमेषां सङ्क्षेप इति दर्शयन्नाह समासेनेति। दोषबलाबलमिति दोषादिबलाबलमित्यर्थ: तेन सर्वेषामेव परीक्षाणामवरोध: कृतो भवति किमेभिर्गणै: कर्त्तव्यमित्याह एभिरिति कषायशब्देनात्र शृतशीतस्वरसफाण्टकल्कभेदा: पञ्चोच्यन्ते पायन्त इति पानकान् यूष:

एभिर्लेपान् कषायांश्च तैलं सर्पींषि पानकान्।
प्रविभज्य यथान्यायं कुर्वीत मतिमान् भिषक्॥
धूमवर्षानिलक्लेदैः सर्वर्त्तुष्वनभिद्रुते।
ग्राहयित्वा गृहे न्यस्येद्विविनौषधसंग्रहं॥
समीक्ष्य दोषभेदांश्च गणान् भिन्नान् प्रयोजयेत्।
पृथङ्मिश्रान् समस्तान् वा गणं वा व्यस्तसंहतं॥२१॥

मण्डादयः कथ्यन्ते कषायाश्चेति चकारादनुक्ता गुड़ादिसंस्काराः समुच्चीयन्ते तत्र केचित् पठन्ति। धूमेत्यादि एतदुक्तं भवति विविधौषधसंग्रहं ग्राहयित्वा धूमादिभिरनुपहते गृहे निक्षिपेत् कथमेषद्रव्यगणो योज्य इत्याह। समीक्ष्येत्यादि अयमर्थः दोषभेदान् पृथकोऽर्थः भिन्नान् दृष्ट्वा गणान् भिन्नान् अमिश्रान् प्रयोजयेत् मिश्रान् वा कोऽर्थः द्वन्द्वान् दोषभेदान् वा समीक्ष्यमिश्रान् गणान् प्रयोजयेत् समस्तान् दोषभेदान् समीक्ष्यसंयुक्तां स्त्रीणिव प्रयोजयेत्। इति गणनापि गणस्य संयोगोऽभिप्रेतः तदुक्तं वर्गमपि वर्गेण सह योजयेदिति अयच्चार्थः प्रतिमणं चकारकरणाल्लभ्यते एकस्यैव गणस्य यथावचारणं करणीयं तथा निर्द्दिशन्नाह गणञ्चेत्यादिव्यस्तं द्वित्रिचतुरादिद्रव्ययोगः संहितः समस्तद्रव्यपोयोगः इयं पुनः परिभाषा गणविषयैव ज्ञेया नान्ययोगेषु केचित् पुनरिमां परिभाषा नाभिधीयत इति॥२१॥

इति सूत्रस्थाने निबन्धसंग्रहे अष्टत्रिंशत्तमोऽध्यायः।

एकोनचत्वारिंशत्तमोऽध्यायः ।

अथातः संशोधनसंशमनीयमध्यायं व्याख्यास्यामः ।

मदनकुटजजीमूतकेक्ष्वाकुधामार्गवकृतवेधनसर्षपविडङ्ग-पिप्पलीकरञ्जप्रपुन्नाड़कोविदारकर्वुदरारिष्टाश्वगन्धाविदुल-वन्धुजीवकश्वेताशणपुष्पीविम्बीवचामृगेर्वारुचित्राचेत्यूर्द्धभा-गहराणि । तत्र कोविदारपूर्वाणां फलानि । कोविदारा-दीनां मूलानि ॥

संशोधनं संशमनं वाधिकृत्य कृतोऽध्यायः । संशोधनं संशमनीयस्तस्यार-भमित्यर्थः । प्राग्द्रव्यसंग्रणीयाध्याये व्याधिप्रत्यनीका द्रव्यगणा उक्ताः संशोधनसंशमनीये तु दोषप्रत्यनीकप्रायाः पञ्चकर्मोपयोगिनः शोधनद्रव्य-संग्रहगणा वातादिशमनद्रव्यगणाश्च कथयितव्या इति शेषः । तत्र द्विविधं सशोधनं वमनं विरेचनञ्च तत्र च पूर्वकत्वाद्विरेचनस्य प्रथमं वमनद्रव्यगण-मभिधातुमाह । मदनेत्यादिजीमूतको देवदाली इच्चाकुः कटुकालाबू-धामार्गवः पीतपुष्प कोषातकीभेदः, कृतवेधनः श्वेतपुष्पघोषकः, सर्षपाः श्वेतसर्षपाः, विशेषेण वमनार्हा कोविदारः काञ्चनारः कर्वुदारः श्लेष्मा-न्तकः वराह इति हमाउका इति च देशभाषया प्रसिद्धः, अरिष्टो निम्बः, विदुलो वेतसः, वन्धुजीवो मध्याह्नपुष्पकः मरुनीया इति लोके, श्वेताश्वे तवचा, शणपुष्पीशणसदृशविटपः सनहुलोति लोके विम्बीकन्दुरिका वचा-द्वितीया अरुणामृगेर्वारुरिन्द्रवारुणी, चित्राचित्राण्डिका पटोलफला कारफला, आरण्यकखण्डका इत्यर्थः अन्ये द्रवन्तीमाहुः शेषं प्रसिद्धं, ऊर्द्धभागहराणि वमनकराणीत्यर्थः, एषां मध्ये कानिद्रव्याणि साक्षाद्वम-यन्ति कानिचिद्वमनद्रव्यमिलितानि केचिदाचार्य्या द्वाविंशतिद्रव्याणीत्यत्र

विवृताश्यामादन्तीद्रवन्तीसप्तलाशङ्खिनीविषाणिकाग-वाक्षीच्छगलान्त्रीस्नुक्सुवर्णक्षीरीचित्रककिणिहीकुशकाश-तिल्वककम्पिल्लकरम्यकपाटलापूगहरीतक्यामलकविभीतक-नीलिनीचतुरङ्गुलैरण्डपूतीकमहावृक्षसप्तच्छदार्कज्योतिष्मती-चेत्यधोभागहराणि ॥ १ ॥

तत्र तिल्वकपूर्वाणां मूलानि। तिल्वकादीनां पाटला-न्तानां त्वचः। कम्पिल्लकफलरजः। पूगादीनामेरण्डान्तानां फलानि। पूतीकारग्वधयोः पत्राणि। शेषाणां क्षीराणीति।

गणे नियममाहुः एषामेवं विभागमाह। तत्रेति विरेचनद्रव्याणि निर्दि-शन्नाह। त्रिवृदित्यादि। त्रिवृत्रक्तमूला त्रिसोढ इति लोके, श्यामा-श्वेता त्रिवृत्, दन्तीदन्तिनी, द्रवन्ती दन्तीभेदः, वरीति लोके, सप्तला सातला—सेहुण्डभेदः अपरे वुध्रामाहुः शङ्खिनी यवतिक्ताभेदः श्वेतवुध्नेत्यपरे विषाणिका मेषशृङ्गी गवाक्षी श्वेतपुष्पा इन्द्रवारुणी छगलान्त्री वृद्ध-दारकः स्नुक् सेहुण्डः सुवर्णक्षीरि अनन्ता सदृशपत्रा झियावलि इति लोके कङ्कुष्ठ इत्यपरे, किनीही कटभी, तिल्वकः स्वल्परोध्रः कम्पिल्लको रोचनिकः स्वनामख्यातः रम्यकोद्रेका इति लोके पटोल मूलमित्य-परे नीलिनी नीलवुध्ना श्रीफलिके चतुरङ्गुलः किरमालकः अत्रैके चतुर-ङ्गुलस्थाने पञ्चाङ्गुल इति पठन्ति, तेषां मते पञ्चाङ्गुल एरण्डः अन्ये तु पञ्चाङ्गुलशब्देन पटोलफलसदृशफलां लतां स्निग्धपत्रां शारदफलामाहुः, पूतीकश्चिरविल्वः महावृक्षः सेहुण्डभेदः तस्य क्षीरं एतेन न पुनरुक्तदोषः सप्तच्छदः सप्तपर्णः, ज्योतिष्मती काकुमर्दनिका, अधोभागहराणीति विरे-चनानीत्यर्थः शेषं सुगमं ॥ १ ॥

एषामवयवविभागमाह तत्रेति, ऊर्द्ध्वभागहराणि निर्दिशन्नाह। कोषा-तकीति कोषातकीघोषातकः, सप्तला स्नुहीभेदः अपरे श्रीफलिकामाहुः,

कोशातकी सप्तला शङ्खिनी देवदाली कारवेल्लिका वेत्युभयतोभागहराणि एषां स्वरसा इति।

पिप्पलीविडङ्गापामार्गशिग्रुसिद्धार्थकशिरीषमरिचकरवीरबिम्बीगिरिकर्णिकाकिणिहीवचाज्योतिष्मतीकरञ्जार्कालर्कलशुनातिविषाशृङ्गवेरतालीशतमालसुरसार्जकेङ्गुदीमेषशृङ्गीमातुलुङ्गीमुरङ्गीपीलुजातीशालतालमधुकलाक्षाहिङ्गुलवणमद्यगोशकृद्रसमूत्राणीति शिरोविरेचनानि ॥ २ ॥

तत्र करवीरपत्राणां फलानि ; करवीरादीनामर्कान्तानां

देवदाली स्वनामख्याता, देवदाली इति लोके उभयतो भागहराणीति वमनानि विरेचनानीत्यर्थः। एतानि कोशातकोप्रभृतीनि नियमेनोभयतो भागहराणि, गवाक्षीप्रभृतीनान्तु पत्रादिविशेषेण कदाचिद्वामकत्वं कदाचिद्विरेचकत्वमिति नतेषामुभयतो भागहरत्वं, एषां कोशातक्यादीनां किं ग्राह्यत इत्याह। एषामिति तत्र स्वरसग्रहणं कषायादिनिवारणार्थं शिरोविरेचनद्रव्याणि निर्द्दिष्टुमाह॥ पिप्पलीति अपामार्गः शिखरी अन्धकुड्क इति लोके शिग्रुः शोभाञ्जनकः सिद्धार्थः सर्षपः शिरीषो विषघाती स्वनामख्यातः करवीरः इति लोके, बिम्बीकुण्डुरुका गिरिकर्णिका सेफन्दः किणिही कटभी ज्यातिष्मती कङ्गुन्दनी, अर्कनाको अर्कद्वयं शृङ्गवेरं शुण्ठी, तालीशं तालीशपत्रं, तमालं तमालपत्रं, पत्रकमिति लोके,सुरसा तुलसीति लोके, अर्जकः कुठेरकः, मेषशृङ्गी मेढ्रशृङ्गं, पुत्रंजीवकसदृशपत्रो वृक्षः अन्ये कर्कटशृङ्गमाहुः, मातुलुङ्गीसुरभिफला, वनजा अरण्यबीज, पुरकः सुरङ्गी, रक्तकुसुमः शोभाञ्जनकः पीलुर्मधुरफलः, पीलु इति लोके, जातीमालती, सकृद्रसः गोमयरसः, मूत्रं गोमूत्रं, शिरोविरेचनानीति नस्य प्रयोगेण शिरस्थं श्लेष्माणं विरेचयन्ति स्रावयन्तीत्यर्थः। शेषं प्रसिद्धं ॥ २॥

एषामवयवविभागमाह तत्रेत्यादि, निर्यासो स्वरसावित्यर्थः,लवणानि पार्थिवविशेषा इति पृथिव्या अवयवविशेषाः, एतेन स्वरूपेणैव लवणानि

मूलानि। तालीशपूर्णाणां कन्दाः। तालीशादीनामर्ज-कान्तानां पत्राणि। इङ्गुदीमेषशृङ्गीत्वचौ। मातुलुङ्गीमुरुङ्गीपीलुजातीनां पुष्पाणि शालतालमधुकानां साराः। हिङ्गुलाचे निर्य्यासौ। लवणानि पार्थिवविशेषाः। मद्यान्यासवसंयोगाः। गोमूत्रशकृद्रसौ मलाविति।

संशमनान्यत ऊर्द्ध्वं वक्ष्यामः। तत्र भद्रदारुकुष्ठहरिद्रावरुणमेषशृङ्गीबलातिबलार्त्तगलकच्छुरासल्लकीकुवेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्येरण्डाश्मभेदकालर्कशतावरीपुनर्नवावसुकवसिरकाञ्चनकभार्गीकार्पासीवृश्चिकालीप-

पाशाणीत्युक्तं, मद्यान्यासवसंयोगा इति सम्भातकसंयोगो मद्यं,अतएव तदपि स्वरूपेणैव ग्राह्यं, सकृद्रसमूत्रे मलाविति एते मलौ तस्मादेते अपि स्वरूपेण ग्राह्ये। संशोधनमभिधाय संशमनं निर्द्दिशन्नाह भद्रदावित्यादि संशमना इति सम्यक् शमयति संशमनः, सम्यक् पञ्चदुष्टदोषस्यानिर्हरणपूर्वकं शमनं अदुष्टस्यानुदीरणं च व्याधिसंशमनोह्यनुपस्तुतव्याधेः, संशमनं अप्रस्तुतव्याधेरनुदीरणं, तदुक्तं "न शोधयति यद्दोषान् समान्नोदीरयत्यपि। समीकरोति च क्रुद्धान् तत्संशमनमुच्यते" दोषशब्दोऽत्र दोषेषु दोषकार्य्येषु व्याधिष्वपि वर्त्तते कार्य्ये कारणोपचारात्। मेषशृङ्गी मेढ्रशृङ्गः,पुत्रञ्जीवकतरुसदृशपत्रो वृक्षः, अन्ये कर्कटशृङ्गमाहुः, बलातिबले शुक्लपीतपुष्पं बलाद्वयं, आर्त्तगलः ककुभः केचिदार्त्तगलं कण्टकीवृक्षमाचक्ष्यते,कच्छुरा कुङ्कुमर्द्दनिका,कच्छुरा शूकशिम्बा इत्यन्ये, कुवेराक्षीकाष्ठपाठला, स्फोटिका इत्यन्ये, वीरतरुविल्वनासिका शर इत्यन्ये सहचरः कण्टासैनीयकः अग्निमन्थः सजोवृक्षः अग्निवधू इति पूर्वदेशे प्रसिद्धः, वत्सादनी गुडूची, कार्य्येण गुडूची वातं हन्ति रसेन कफपित्ते,अश्मभेदकः पाषाणभेदकः, वसुकः शिवमल्लिका वकपुष्पमिति लोके, वसिरः सूर्य्यावर्त्तः अपामार्ग इत्यपरे, काञ्चनको धूस्तूरकः कच्छर इत्यन्ये पठन्ति, कर्वुरः सटीकार्पासी, वनकार्पासिका कार्पास

त्तूरवदरयवकोलकुलत्थप्रभृतीनि विदारिगन्धादिश्च द्वे चाद्ये पञ्चमूल्यौ समासेन वातसंशमनोवर्गः॥ ३॥

चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठापयस्याविदारिशतावरीगुन्द्राशैवालकह्लारकुमुदोत्पलकदलीकन्दलीदूर्वामूर्वाप्रभृतीनि काकोल्यादिर्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्गः।

कालेयकागुरुतिलपर्णीकुष्ठहरिद्राशीतशिवशतपुष्पासरलारास्नाप्रकीर्य्योदकीर्य्येङ्गुदीसुमनःकाकादनीलाङ्गलकीह-

विटपसदृशी, वृश्चिकाली वृश्चिकपाकः, पत्तूरः कुचन्दनं, शेषं प्रसिद्धं, पूर्वं व्याख्यातं, प्रभृतिग्रहणान्माषतिलातसीप्रभृतीनां ग्रहणं, समासेन संक्षेपेण विस्तरेण तु अन्नपानाद्यनिलहरग्रहणश्रुतिप्रतिपादितया भूजलानलगुणबहुलं द्रव्यं वातसंशमनमिति॥ ३॥

पित्तसंशमनानिर्दिशन्नाह चन्दनेत्यादि—चन्दनं श्रीखण्डं, कुचन्दनं रक्तचन्दनं, ह्रीवेरं वालकं, पयस्या क्षीरकाकोली, विदारीविदारीकन्दः, शैवलं शैवालं, कह्लारो रक्तोत्पलं वृहत्पत्रकेति लोके प्रभृतिग्रहणात् अनुक्तमपि मधुरतिक्तकषायं द्रव्यं ग्राह्यं, समासग्रहणेन तु अन्नपानादौ पित्तहरत्वेन यदन्यदप्युदितं खभूमिजलानिलभूयिष्ठं तदपि पित्तशमनं ग्राह्यं, ननु चन्दनकुचन्दने सारिवापयस्याकाकोल्यादौ उत्पलादीनि उत्पलादिगणे पठितान्येव, तत्कथं पृथङ्निर्देश इति? ब्रूमः, समस्तव्यस्तानां त्रिचतुराणां व्रणविशेषज्ञापनाय पृथक् पाठः न यष्टीमधुरन्तु शीतकषायादिकल्पनया पित्तं शमयति शमनीयद्रव्यसंयुतं तु वामनीयमिति दोषः कफसंशमनं निर्दिशन्नाह। कालेयक इति कालेयकः वर्णचन्दनविशेषः मलयाद्रिचन्दनमिति लोके, तिलपर्णीशुलहुलः शीतशिवं कर्पूरं, शतपुष्पाभेदमेके गवेधुकेत्यपरे सरला टहत्, प्रकीर्य्याकरञ्जको, विटपकरञ्जः उदकीर्य्या चिरविल्वः, इङ्गुदी इङ्गुकः पुत्रञ्जीवक इत्यन्ये, सुमनाः जाती, काकादनी

स्तिकर्णमुञ्जातकलामज्जकप्रभृतीनि वल्लीकण्टकपञ्चमूल्यौ पिप्पल्यादिर्बृहत्यादिर्मुष्ककादिर्वचादिः सुरसादिरारग्वधादिरिति समासेन श्लेष्मसंशमनो वर्गः ॥ ४ ॥

तत्र सर्वाण्येवौषधानि व्याध्यग्निपुरुषबलान्यभिसमीक्ष्य विदध्यात् । तत्र व्याधिबलादधिकमौषधमुपयुक्तं तमुपशमय्य व्याधिं व्याधिमन्यमावहति । अग्निबलादधिकमजीर्णं विष्टभ्य वा पच्यते । पुरुषबलादधिकं ग्लानिमूर्च्छामदानावहति । संशमनमेवं संशोधनमतिपातयति । हीनमेभ्यो दत्तमकिञ्चित्करं भवति । तस्मात् सममेव विदध्यात् ॥ ५ ॥

हिंस्रा, लाङ्गलकीकलिकारिका, हस्तिकर्णः गजकर्णाकारैकपत्रः भूपलाश इति लोके रक्तैरण्ड इत्यन्ये, मुञ्जातकः स्वनामख्यातः, स्वल्पकन्द उत्तरापथे, लामज्जकमुशीरभेदः, केषांचिदत्र पिप्पल्यादि वचादि पठितानां पुनर्वचनं विशेषेण कफसंशमनत्वदर्शनार्थं, गुञ्जा गुञ्जातकस्य वातपित्तहरत्वेऽपि श्लेष्महरत्वेऽपरे त्रिदोषहरत्वं दर्शयन्ति, प्रभृतिग्रहणादनुक्तकटुतिक्तकषायानामनुग्रहः, समासेनेति विस्तरेणान्नपानादौ तथा तेजोऽनिलाकाशगुणभूयिष्ठमनुक्तमपि द्रव्यं कफसंशमनमिति ॥ ४ ॥

अतःपरं, संशोधनसंशमनद्रव्यमात्रां नियमयन्नाह । तत्र सर्वानीति संशोधनानि संशमनानि चेति व्याध्यग्निपुरुषाणाञ्च बलं शक्तिमभिसमीक्ष्य न्यूनाधिकभावेन विदध्यात् कुर्य्यात् व्याधिशब्देन दोषा रोगाश्च तेषां व्याध्यादीनां बलादिकमनपेक्ष्य भेषजप्रयोगे क्रियमाणे व्याध्यादिबलाधिक्ये दोषं निर्द्दिशन्नाह । तत्रेति विष्टभ्य वा पच्यत इति चिरकालं स्थिरीभूयबलादि क्लत्वेत्यर्थः । पुरुषबलादिति, ग्लानिः शरीरशैथिल्यं, मूर्च्छाचेतनाच्युतिः, मदोमद्यमत्तस्येव, आवहति करोति, शमनमिति संशमनौषधमित्यर्थः, संशोधनदोषमाह एवं

भवन्ति चात्र।
रोगे शोधनसाध्ये तु यो भवेद्दोषदुर्बलः।
तस्मै दद्याद्भिषक् प्राज्ञो दोषप्रच्यावनं मृदु॥
चले दोषे मृदौ कोष्ठे नेच्छेतात्र बलं नृणां।
अव्याधिदुर्बलस्यापि शोधनं हि तदा भवेत्॥
व्याध्यादिषु तु मध्येषु क्वाथस्याञ्जलिरिष्यते।
विड़ालपदकं चूर्णं देयः कल्कोऽक्षसम्मितः॥

संशोधनमिति एवमितद्दोषं संशोधनमपि करोतीत्यर्थः, अतिपातयति अतिपातनमप्यधिकं करोति आतुरबलस्येत्यर्थः। व्याधिबलन्यूनाया अयौषधमात्राया दाने दोषमाह। हीनेत्यादि अकिञ्चित्करं न किञ्चित्-करोति अनर्थकमित्यर्थः अन्ये अकिञ्चित्करमल्पार्थकरमित्याहुः नञ् ईषदर्थे, सिद्धिहेतुरुपाधिं दर्शयन्नाह। तस्मादिति सममेव रोगविषमबल-मित्यर्थः॥ ५॥

दुर्बलस्य बलवच्छोधनं न कर्त्तव्यमित्याह। रोग इति यो भवे-द्दोषदुर्बलःयः पुरुषो दोषै दुर्बलो नतूपवासादिभिः यः स्यान्नदोषदुर्बलस्तस्य दोषहरणादेवबलं भवति उपवासादिक्षीणेतु अपहृतेऽपि दोषे बलं न भवति दोषप्रच्यावनं विरेचनं, मृद्विति मृदुवीर्यं चतुरङ्गुलविरेकादि अवस्थाविशे-षेणाव्याधिदुर्बलोऽपि शोधनं दर्शयन्नाह। चलेति चले स्वस्थानाच्चलिते इत्यर्थः। अत्रेति चले दोषे मृदौ कोष्ठे इत्यस्यामवस्थायामित्यर्थः। अव्या-धिदुर्बलस्यापि उपवासादिदुर्बलस्यापि, हि यस्मादर्थे तदा भवेत् हितमित्य-ध्याहारः, अव्याधिदुर्बलस्यापीत्यत्र केचिदव्यापद्दुर्बलस्यापीति पठन्ति, अव्यापत् शोधनं हितदा भवतीत्यर्थः, अव्यापत् शोधनं तदुच्यते, शूलादी-नि यन्नकरोति तन्त्रान्तरे केचित् पठन्ति। स्वयमिति न चायं सर्वनिब-न्धेषु दृश्यत इति व्याध्यग्निपुरुषेषु मध्यमबलेषु कियन्मात्रमौषधं दद्यादि-त्याह। व्याध्यादिष्विति, मध्येषु मध्यमबलेषु क्वाथस्याञ्जलिरिष्यत इति

स्वयं प्रवृत्तदोषस्य मृदुकोष्ठस्य शोधनं ।
भवेदल्पबलस्यापि प्रयुक्तं व्याधिनाशनं ॥ ६ ॥

चत्वारिंशत्तमोऽध्यायः ।

अथातो द्रव्यरसगुणवीर्य्यविपाकविज्ञानीयमध्यायं व्याख्यास्यामः ।

केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं कस्माद्व्यवस्थितत्वादिह खलु द्रव्यं व्यवस्थितं न रसादयो यथामे फले ये रसादयस्ते

क्वाथग्रहणात् शृतशीतफाण्टस्य नतु स्वरसचीरयोः,ते हि गुरुत्वादल्पप्रमाणा प्रयोक्तव्या अञ्जलिश्चत्वारिपलानि, विड़ालपदकं कर्षेत्यर्थः, अचसम्मित इति कर्षप्रमाण इत्यर्थः, कल्कोद्रव्यपिष्टः एतेन व्याध्यादिषु हीनबलेषु अञ्जल्या-दयोऽप्यपकर्षणीयाः तेषामेवाधिके बले तूत्कर्षणीया इति अनुवासनास्थापन-शिरोविरेचनादीनां अन्यत्र मानोद्देशःकार्य्य इति ॥ ६ ॥

इति सूत्रस्थाने निबन्धसंग्रहे एकोनचत्वारिंशत्तमोऽध्यायः ।

अथातो द्रव्यरसगुणेत्यादि—द्रव्याणां विज्ञानं विशिष्टज्ञानं तदधिकृत्य कृतोऽध्याय इत्यर्थः, द्रव्यमौषधमुच्यते, रसोमधुरादिकः, गुणाः शीतोष्ण-स्निग्धरूचमन्दतीक्ष्णगुरुलघुपिच्छिलविशदश्लक्ष्णपरुषकठिनमृदुद्रवसान्द्रस्थिर-सरस्थूलसूक्ष्माविंशतिः, वीर्य्यं चाष्टविधं तद्यथा शीतोष्णस्निग्धरूचविशद-पिच्छिलमृदुतीक्ष्णा इति विंशतिगुणानां मध्ये एतेषां अष्टानां गुणानां वीर्य्यमिति संज्ञा । ननु गुणाद्वीर्य्याणां कोभेदः ? उच्यते-यएव गुणा आम-लक्यां तएव गुणा हरीतक्यां, अस्ति च वीर्य्ये विशेषः, तथा हि उष्णवीर्य्या

पक्वे न सन्ति। नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कल्कादिप्रविभागः, सएव सम्पन्नरसगन्धो व्यापन्नरसगन्धोवा भवति ॥ १ ॥

स्वजात्यवस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि। पञ्चेन्द्रियग्रहणाच्चपञ्चभिरिन्द्रियैर्गृह्यते द्रव्यं न रसादयः। आश्रयत्वाच्च द्रव्यमाश्रिता रसादयो

हरीतकीशीतवीर्य्यमामलकमिति एतेनैतदुक्तं भवति द्रव्यरसगुणविपाकैर्यत्कर्मकर्त्तुं न शक्यते तत्कर्मकुर्वन् प्रभावो वीर्य्यमुच्यते। तथा हि वीर्य्यं शक्तिरुत्पत्तिविशेषः, सामर्थ्यं प्रभाव इत्यर्थः यत्द्रव्यं परिणामकाले स्वाभाविकं रसं परित्यज्यरसान्तरं भजते तत्र विपाक इति संज्ञा, तत्र प्रत्येक द्रव्यादिप्राधान्यमेकोयमतेन प्रतिपादयिष्यन् द्रव्यप्राधान्यं प्रथमं कारणं प्रतिपादयन्नाह। केचिदिति, व्यवस्थितत्वादिति द्रव्यं हि व्यवतिष्ठते न रसादयः यथा आम्रफलमेकमेव प्रथमं कषायाम्लं पश्चादम्लं ततो मधुरमपि भवति न तु तद्वदेवाम्रफलमाम्रातकं कोशाम्रं भवति। द्रव्यप्राधान्ये द्वितीयं हेतुमाह। नित्यत्वादिति अनित्यत्वात् कियत्कालावस्थितत्वादित्यर्थः अनित्या विनाशिन इत्यर्थः कल्कादीत्यादि आदिग्रहात् स्वरसशृतशीतफाण्टानामपि ग्रहणं सएव कल्कादिप्रविभाग एव, सम्पन्नरसगन्धो वा भवतोति संयुक्तरसः संयुक्तगन्धो वा भवतीत्यर्थः एतेनैतदुक्तं भवति कल्काद्यवस्थास्वपि द्रव्यं तदेव नान्यतरत् द्रव्यं रसगन्धौ तु अन्यौ संयुक्तौ भवत इति गुणा अनित्या द्रव्यं नित्यं अन्ये कल्कादिस्थाने कालादिप्रविभागादिति पठन्ति तेषां मते आदिग्रहणाज्जलवातदेशसोमसूर्य्या गृह्यन्ते तद्यथा ताएवौषधयो ग्रीष्मे निःसारा रूक्षा इत्यादि ॥ १ ॥

द्रव्यप्राधान्ये तृतीयं हेतुं दर्शयन्नाह। स्वजात्यवस्थानाच्चेति स्वस्यां पार्थिवादिजातावस्थितत्वादित्यर्थः अन्यभावं न गच्छति आप्यादिजातिं न गच्छति, चतुर्थं कारणं दर्शयन्नाह। पञ्चेत्यादि-

भवन्ति। आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिमाहृत्य संक्षुद्य विपचेदित्येवमादिषु न रसादिष्वारम्भः। शास्त्रप्रमाण्याच्च शास्त्रे हि द्रव्यं प्रधानमुपदेशे हि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते। क्रमापेक्षितत्वाच्च रसादीनां रसादयो हि द्रव्यक्रममपेक्षन्ते यथा तरुणे तरुणाः सम्पूर्णे सम्पूर्णा इति ॥ २ ॥

एकदेशसाध्यत्वाच्च द्रव्याणामेकदेशेनापि व्याधयः साध्यन्ते यथा महावृक्षक्षीरेणेति तस्माद्द्रव्यं प्रधानं द्रव्यलक्षणन्तु क्रियागुणवत् समवायिकारणमिति। नेत्याहुरन्ये। रसास्तु प्रधानं कस्मादागमात् आगमो हि शास्त्रमुच्यते शास्त्रे हि रसा अधिकृता यथा रसायत्त आहार इति तस्मिंश्च प्राणाः। उपदेशाच्चोपदिश्यन्ते हि रसा

पञ्चभिरिन्द्रियैर्द्रव्यं गृह्यते, द्रव्ये गृहीते तदाश्रया गुणा गृहीता भवन्ति गुणाश्च शब्दस्पर्शरूपरसगन्धाः द्रव्ये शब्दोऽप्यस्ति यथा पार्थिवद्रव्ये कटकटाशब्दः तैजसे तटतटाशब्द इत्यादिकः, वायव्यद्रव्यमाकाशद्रव्यं वानुमानग्राह्यममूर्त्तत्वात्, नरसादय इति, रसा गुणवीर्य्यविपाकास्तु न पञ्चेन्द्रियग्राह्या इत्यर्थ., पञ्चमं हेतुं दर्शयन्नाह आश्रयत्वादिति, आश्रय इदं द्रव्यं रसादीनां, षष्ठं हेतुं दर्शयन्नाह। आरम्भेति आरम्भसामर्थ्यादुपक्रमसामर्थ्यादित्यर्थः संक्षुद्यचूर्णयित्वेत्यर्थः सप्तमं हेतुं दर्शयन्नाह शास्त्रेति, अष्टमं हेतुं दर्शयन्नाह। क्रमेति तरुणे तरुणा इति अभिनवे अभिनवा इत्यर्थः ॥ २ ॥

नवमं हेतुमाह। एकदेशेति द्रव्यप्राधान्यमभिधायद्रव्यलक्षणमाह— द्रव्यलक्षणमिति क्रियागुणवदिति क्रियावद्गुणवद्द्रव्यमित्यर्थः, क्रियाकर्म्मगुणा

यथा मधुराम्ललवणा वातं शमयन्ति। अनुमानाच्च रसेन-ह्यनुमीयते द्रव्यं यथा मधुरमिति। ऋषिवचनाच्च ऋषिवचनं वेदो यथा किञ्चिदिज्यार्थं मधुरमाहरेदिति। तस्माद्रसाः प्रधानं रसेषु गुणसंज्ञा। रसलक्षणमन्यत्रोपदेक्ष्यामः। नेत्याहुरन्ये। वीर्यं प्रधानमिति कस्मात्तद्वशेनौषधकर्मनिष्पत्तेः॥ ३॥

इहौषधकर्माण्यूर्द्धाधोभागोभयभागसंशमनसंग्राहकाग्निदीपनप्रपीड़नलेखनबृंहणरसायनवाजीकरणश्वयथुकरविलयनदहनदारणमादनप्राणघ्नविषप्रशमनानि वीर्य्यप्राधान्याद्भवन्ति तच्च वीर्य्यं द्विविधमुष्णं शीतं चाग्नीषोमीयत्वा-

ऊक्ता विंशतिः समवायिकारणमपि द्रव्यमेव यथा पटे तन्तवः, घटे मृत्पिण्ड इत्यादि, न च क्रियाया क्रियासमवेता न गुणाश्च समवेता इति रसप्राधान्ये एकीयं दर्शनं निर्द्दिशन्नाह। नेति नेत्याहुरन्ये द्रव्यप्राधान्यमन्ये न ब्रुवते इत्यर्थः, तस्मिंस्तु प्राणा इति आहारे सति प्राणा इत्यर्थः। रसप्राधान्ये द्वितीयं हेतुमाह। उपदेशादिति अत्रैव तृतीयं हेतुमाह। अनुमानादिति, चतुर्थं हेतुमाह--ऋषिवचनादिति इज्यार्थं जागार्थं, मधुरमाहर। वेदानयेत् न तु द्रव्यमानयेदिति गुणस्यापि किमिति न प्राधान्यमाधितमित्याशङ्क्याह। रसेष्विति अत्रादिशब्दो लुप्तो द्रष्टव्यः एतेनैतदुक्तं भवतिरसादिप्राधान्ये नैवसाधितमगुणप्राधान्यं साधितं भवति यथा द्रव्यलक्षणमुक्तं अथ रसस्यापि किमिति नोक्तमित्याह। रसलक्षणमिति अन्यत्र रसविज्ञानीये अपरेषां वीर्य्यवादीनां मतं निर्द्दिशन्नाह। नेत्याहुरन्ये इति इष्टगमन्येन कुर्वन्ति तद्वशेनेति वीर्य्यवशेन॥ ३॥

कानि पुनस्तान्यौषधकर्म्माणीत्याह इहौषधेत्यादिसंशोधनव्रणादीनां संशमनमिति वमनविरेचनादिकं विनातत् स्वयमेव शमयति संशमनं संशमन भेदा एव सांग्राहिकादयः पीड़नमिति शाल्मलीत्वगादीनां

ज्जगत: । केचिदष्टविधमाहुरुष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेत्येतानि वीर्य्याणि स्वबल-गुणोत्कर्षाद्रसमभिभूयात्मकर्म कुर्वन्ति यथा तावन्मह-त्पञ्चमूलं कषायं तिक्तानुरसं वातं शमयेदुष्णवीर्य्यत्वात् । तथा कुलत्थ: कषाय: कटुक: पलाण्डु: स्नेहभावाच्च । मधुरश्चेक्षुरसो वातं वर्द्धयति शीतवीर्य्यत्वात् । कटुका पिप्पली पित्तं शमयति मृदुशीतवीर्य्यत्वादम्लमामलकं लवणं सैन्धवञ्च तिक्ता काकमाची पित्तं वर्द्धयत्यु-

व्रणे कर्मविशेष:, लेखनं पतलीकरणं, वृंहणं शरीरवृद्धिकरं, रसायनं वय:-स्थापनादिकरणं, वाजीकरणं वाजीवत् येनाप्रतिहतं स्त्रियं याति अन्ये तु वाजीशब्देन शुक्रमुच्यते तत: अवाजिन: वाजिन: क्रियन्ते येनेति वाजी-करणं शुक्रोत्पादकमित्याहु:, श्वयथुकरविलयन इति करविलयनशब्दौ श्वयथुशब्देन सह प्रत्येकं सम्बध्यते श्वयथुहरविलयन इत्येके पठन्ति, दहनं क्षारादिना दारणं गृध्रपुरीषादिना, मदनं मत्तताकरणं तच्च मदिरादीनां कर्मप्राणघ्नत्वं, विषादे: विषप्रशमनत्वमगदादीनां विषप्रशमनादीनीति अत्रादिशब्देन व्रणरोपणरोमसञ्जननादयो गृह्यन्ते, स्वबलगुणोत्कर्षादिति स्वबलोत्कर्षात् स्वगुणोत्कर्षाच्चेत्यर्थ:, आत्मकर्मकुर्वन्ति वातादिदोषशमनं कोपनं वा कुर्वन्ति, अभिभूयनिराकरणं कृत्वेत्यर्थ:, स्नेहभावाच्चेत्यत्रापि वातं शमयतीत्यादियोज्यं, मधुरश्चेक्षुरस इत्यादि न केवलं वातं शमयतीति वीर्य्यं रसमभिभूयप्रकोपयत्यपि वातमित्यर्थ: । कटुकापिप्पलीत्यादि अत्र आर्द्रा पिप्पली यदि गृह्यते तदा तस्या: स्वादुशीतत्वात् कटुकेति विशेषणं युक्तं न स्यात् अथ शुष्का तदा तस्या: कटूष्णत्वात् पित्तं हन्तीति विशे-षणमयुक्तं भवेत् सत्यं तेषु गुर्व्वी स्वादुशीता पिप्पल्यार्द्रा कफावहेत्यत्र पाठे शीता चेति चकारो द्रष्टव्य:, तेन न केवलं शीता कटुका चेत्यर्थ:, ततो नार्द्र-पक्षे दोष:, शुष्कपक्षे तु शुष्का कफानिलघ्नी सानुष्णा पित्ताविरोधिनीत्यत्र

ष्णवीर्य्यत्वान्मधुरामत्स्याश्च। कटुकं मूलकं श्लेष्माणं वर्द्धयति स्निग्धवीर्य्यत्वात्। अम्लं कपित्थं श्लेष्माणं शमयति रूक्षवीर्य्यत्वान्मधुरं क्षौद्रञ्च। तदेतन्निदर्शनमात्रमुक्तं॥ ४॥

भवन्ति चात्र।

ये रसा वातशमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणं॥
ये रसाः पित्तशमना भवन्ति यदि तेषु वै।
तैक्ष्ण्यौष्ण्यलघुताश्चैव न ते तत्कर्मकारिणः॥
ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै।
स्नेहगौरवशैत्यानि बलासं वर्द्धयन्ति ते॥

तस्माद्वीर्य्यं प्रधानमिति। नेत्याहुरन्ये। विपाकः

पित्तेन सहसा न विरोधिनीति व्याख्यानान्नदोषः, केषाञ्चिन्मते पित्तप्रकोपनीति पाठः। तेषां मते पित्तशमनीयत्वं पिप्पल्या वीर्य्यवादीनां तु मतं न पुनः सत्यमेषा पित्तं शमयति यद्वा आर्द्रापित्तप्रशमनी शुष्का प्रकोपनीति, अम्लमामलकं लवणं सैन्धवं चेत्यत्रापि मृदुशीतवीर्य्यत्वात् पित्तं शमयतीति योज्यं, तिक्तकाकमाचीत्यादि पित्तं वर्द्धयति केवलं न तु समुदितं तस्या स्त्रीदोषघ्नीत्वात् अन्ये चात्रैवं वदन्ति वीर्य्यवादी एवमुष्णवीर्य्यां काकमाचीं मन्यते आचार्य्यस्तु नात्युष्णशीतां अतएव त्रिदोषघ्नीत्वं काकमाच्या इति मधुरा मत्स्याश्चेति अत्रापि पित्तं वर्द्धयन्तीति योज्यं, मूलकं हृद्यमूलकं न पुनर्बालकं त्रिदोषघ्नत्वात्॥ ४॥

द्रव्याश्रितवीर्य्यकर्माभिधाय रसाश्रितं वीर्य्यकर्माह भवन्ति चात्रेत्यादि ये रसा वातशमना मधुराम्ललवणाः, ये रसाः पित्तशमना मधुरतिक्तकषायाः, ये रसाः श्लेष्मशमनाः कटुतिक्तकषायाः, अपरं वादिमतं निर्द्दिशन्नाह। नेत्याहुरिति नेत्याहुरन्ये वीर्य्यं प्रधानमिति केचिन्न ब्रुवते

प्रधानमिति कस्मात् सम्यङ्मिथ्याविपाकत्वादिह सर्वद्रव्याण्यभ्यवहृतानि सम्यङ्मिथ्या विपक्वानि गुणं दोषं वा जनयन्ति। तत्राहुरन्ये प्रतिरसं पाक इति। केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकञ्चेति। तत्तु न सम्यक् भूतगुणादागमाच्चाम्लो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्याग्नेर्मन्दत्वात्। यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणतामुपैति मधुरो मधुरस्याम्लोऽम्लस्यैवं सर्वेषामिति केचिदाहुर्दृष्टान्तं चोपदिशन्ति यथा तावत् क्षीरं स्थालीगतमभिपच्यमानं मधुरमेव स्यात्तथा शालियवमुद्गादयः प्रकीर्णाः स्वभावमुत्तरकालेऽपि न परित्यजन्ति तद्वदिति। केचिद्वदन्त्यबलवन्तो बलवतां वशमायान्तीत्येवमनवस्थितिस्तस्मादसिद्धान्त एषः। आगमे हि द्विविध एव पाको मधुरः कटुकश्च तयोर्मधुराख्यो गुरुः कटु-

तर्हि किं प्रधानं विपाकः? प्रधानमिति विशिष्टः पाको विपाकः सर्वद्रव्याण्यभ्यवहृतानिति। इह सर्वशब्दो वामनीयद्रव्याणि वर्जयित्वा ज्ञेयः। गुणंदोषं वा जनयन्ति गुणं सम्यग् विपक्वानि दोषं मिथ्याविपक्वानि रसं प्रतिपाक उत्पद्यत इत्यर्थः। तत्तु न सम्यक् त्रैविध्यं सम्यगित्यर्थः, कथं पुनस्त्रैविध्यं न सम्यगित्याह भूतगुणादित्यादि एतेन त्रैविध्यं निरस्तं प्रतिरसं पाक इति पूर्वोक्तं स्थापयन्नाह मधुरो मधुरस्येत्यादि अम्लो अम्लस्यैवं सर्वेषामिति केचिदाहुरिति पदच्छेदः, दृष्टान्तं चोपदिशन्तीति प्रतिरसपाके इत्यर्थः, उखागतं स्थालीगतं, प्रकीर्णा इति भूमौ निक्षिप्ता फलितपर्यन्ता इत्यर्थः, तद्वदिति एवं रसा अपि जठराग्निपक्वाः स्वं रूपं मधुरादिकं न त्यजन्ति, तस्मादित्यादि तस्मात् केचित् प्रतिरसपाकं केचित्त्रिविधः अन्ये बलवन्तो बलवतामिति मतानामनियतत्वं तस्मादसिद्धान्त एष अनागम एष इत्यर्थः। स्वमतमिदानीं दर्शयन्नाह आगम इत्यादि

काख्यो लघुरिति तत्र पृथिव्यप्तेजोवाय्वाकाशानां द्वैविध्यं भवति गुणसाधर्म्याद्गुरुता लघुता च पृथिव्यापश्च गुर्व्यः शेषाणि लघुनि तस्माद्द्विविध एव पाक इति ॥ ५ ॥

भवन्ति चात्र।

द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः।
निर्वर्त्तन्तेऽधिकास्तत्र पाको मधुर उच्यते ॥
तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु।
निर्व्वर्त्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते ॥
पृथक्त्वदर्शिनामेष वादिनां वादसंग्रहः।
चतुर्णामपि सामर्थ्यमिच्छन्त्यत्र विपश्चितः ॥
तद्द्रव्यमात्मना किञ्चित् किञ्चिद्वीर्य्येण सेवितं।
किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा ॥

आगमे शास्त्रे अन्ये आगमस्त्विहेति पठन्ति तत्र तु शब्दोऽर्थः अथवा विशेषार्थस्तु शब्दः, तेन प्रत्यक्षादिप्रमाणानिरुद्धोऽपि शिष्टागम इत्यर्थः। अथवा आगमशब्दोऽयं सिद्धान्तवचनः तेन सिद्धान्तः पुनरिहेत्यर्थः पृथिव्यप्तेज इत्यादि पृथिव्यादीनां गुणसाधर्म्याद्गुणसमानतया द्वैविध्यं भवतीत्यर्थः ॥ ५ ॥

गुणमेवाह गुरुता लघुता चेति भवन्ति चात्रेत्यादिनिर्वर्त्तन्ते अधिका इति जायन्ते उत्कटा इत्यर्थः एवं द्रव्यरसवीर्य्यविपाकवादिनां सविवादहेतूनि सुगतानि निर्दिश्य स्वमतं द्रव्यादिसमग्रलक्षणं निर्दिशन्नाह। पृथक्त्वदर्शिनामिति पृथक्त्वदर्शिनां भेददर्शिनां एष वादसंग्रह इति योज्यं वादसंग्रहश्च द्रव्यं प्रधानं रसाः प्रधानमित्यादिकं स्वमतमाह चतुर्णामित्यादि चतुर्णां रसगुणवीर्य्यविपाकानां अपि शब्दः समुच्चये न केवलमेकस्य द्वयोस्त्रयाणां चतुर्णामपीत्यर्थः सामग्र्य समुदायत्वमिच्छन्ति मन्यन्ते अत्र द्रव्ये विपश्चितः पण्डिताः ननु तर्हि द्रव्यमेव क्रियाकारण-

पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात् ।
रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतं ॥
जन्म तु द्रव्यरसयोरन्योऽन्यापेक्षकं स्मृतं ।
अन्योऽन्यापेक्षकं जन्म यथास्याद्देहदेहिनोः ॥
वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः ।
रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः ॥
द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः ।
श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः ॥

रसादय इत्याशङ्क्याह । तद्द्रव्यमिति आत्मना स्वयमेव द्रव्यमात्मना कृत्वा किञ्चिद्दोषं हन्ति करोति वा । किञ्चिद्द्रव्यमेव वीर्य्येण कृत्वा हन्ति करोति वा । किञ्चिद्धन्ति करोति वा, रसविपाकाभ्यां कृत्वा सर्वत्रद्रव्यं हनने करणे च कर्त्तृकारकं, तत्र द्रव्यमात्मना पार्थिवाप्यतैजसवायवाकाशीयस्वरूपेण दोषं हन्ति यथा खदिरः कुष्ठं, दोषशब्दोऽत्र व्याधावपि वर्त्तते, वीर्य्येण द्विविधेनाष्टविधेन वा सेवितं द्रव्यं दोषं हन्ति तच्च महत्पञ्चमूलादिकमेतस्मिन्नध्याये कथितमेव रसेन कृत्वा द्रव्यं दोषं हन्ति यथा तिक्ता गुड़ूची उष्णवीर्य्यापि पित्तं शमयति विपाकेन कृत्वा द्रव्यं दोषं हन्ति यथा शुण्ठीकटुकापि वातं शमयति मधुरविपाकत्वात् रसादीनां द्रव्यकार्य्यत्वात् द्रव्यस्य प्राधान्यं दर्शयन्नाह । पाक इति श्रेष्ठतमं प्रशस्ततमं एतेनाश्रयो द्रव्यं आश्रयिणो रसादयः कार्य्यकारणभावेऽपि यथा अग्नेर्धूमो जायते तएव रसादयो द्रव्याज्जायन्ते किन्तु द्रव्यरसादीनां रसवज्जन्मेति दर्शयन्नाह । जन्मत्विति अन्योन्यापेक्षिकमिति अन्योन्याश्रितं न केवलोत्पत्तिरित्यर्थः । किमिवेत्याह अन्योन्येत्यादिदेहः शरीरं, देही आत्मा, एवं रसद्रव्याश्रयं निष्पाद्यवीर्य्यमपि द्रव्याश्रयं निष्पादयन्नाह । वीर्य्यसंज्ञेति अपि शब्दादन्येऽपि स्थूलसूक्ष्मादयो गुणा द्रव्याश्रया एव निर्गुणास्तु गुणाः स्मृता एते शीतादयः स्थूलसूक्ष्मादयश्चान्ते गुणाः रसा अपि गुणाः अतो

अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः।
आगमेनोपयोज्यानि भेषजानि विचक्षणैः॥
प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः।
नौषधीर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन॥
सहस्रेणापि हेतूनां नाम्बष्ठादिर्विरेचयेत्।
तस्मात्तिष्ठेत्तु मतिमानागमे न तु हेतुषु॥ ६॥

गुणेषु गुणा न सम्भवन्ति तस्माद्द्रव्यस्यैवैते शीतादयो गुणा इति तथा विपाकमपि द्रव्याश्रयमेव प्रतिपादयन्नाह। द्रव्ये इति द्रव्ये पञ्चभूतात्मकदेहे, द्रव्याण्याहारद्रव्याणि न षड्रसा निरवयवत्वात्, शेषाभावा इति रसादय इत्यर्थः तदाश्रया द्रव्याश्रया इत्यर्थः अत्र पाठान्तराणि तद्व्याख्यानान्तराणि च बहूनि सन्ति तानि विस्तरभयान्नलिखिता यथोक्तभेषजानां बुद्ध्या विचारनिषेधं निर्दिशन्नाह। अमीमांस्यानीति अमीमांस्यानि न विचार्य्याणि अचिन्त्यानि यान्येवाचिन्त्यानि तान्येवामीमांस्यानि कानि पुनस्तानि खदिरतुवरकरसाञ्जनहरिद्रादीनि कुष्ठघ्नानि न तु सर्वाणि अन्यथा वर्गमपि वर्गेणोपसृजेत् यथा वीजेनानेन मतिमान् कुर्य्याद्दश्विशतान्यपीत्यादिविरुद्धं भवेत्, स्वभावतः जन्मतः अन्ये तु आगमे यानि भेषजानि प्रसिद्धानि तान्यमीमांस्यान्यविचारणीयानि कुतो हेतोरविचार्य्याणि यतः स्वभावतोऽचिन्त्यानि तेषां स्वभावश्चिन्तयितुं न शक्यत इत्यर्थः यथा द्रवत्वमपामुष्णत्वमग्नेरित्यादिकमर्थं पुनस्तानि प्रयोज्यानीत्याह आगमेनोपयोज्यानि आगमेनैवैकेनोपयोगः कार्य्य इत्यर्थः ननु अनुमानविरुद्धानि कथमागमैकप्रयोज्यानीत्याशङ्क्य आगमस्य प्रत्यक्षफलत्वेन बलीयस्त्वं दर्शयन्नाह। प्रत्यक्षेत्यादि प्रत्यक्षलक्षणफलाः हिताहितभेदेन कुतः पुनर्हेतुभिर्निरीक्षणीयं भेषजं प्रसिद्धलक्षणफलमित्याह॥ ६॥

इति सूत्रस्थाने निबन्धसंग्रहे चत्वारिंशत्तमोऽध्यायः॥

एकचत्वारिंशत्तमोऽध्यायः ।

अथातो द्रव्यविशेषविज्ञानीयमध्यायं व्याख्यास्यामः ।

पृथिव्यप्तेजोवाय्वाकाशानां समुदायाद्द्रव्याभिनिर्वृत्ति-रुत्कर्षस्त्वभिव्यञ्जको भवतीदं पार्थिवमिदमाप्यमिदं तैजसमिदं वायव्यमिदमाकाशीयमिति । तत्र स्थूलसारसान्द्रमन्दस्थिरखरगुरुकठिनगन्धबहुलमीषत्कषायं प्रायशो मधुरमिति पार्थिवं तत् स्थैर्यबलसङ्घातोपचयकरं विशेषतश्चाधोगतिस्वभावमिति ।

शीतस्तिमितस्निग्धमन्दगुरुसरसान्द्रमृदुपिच्छिलरसबहुलमीषत्कषायाम्ललवणं मधुररसप्रायमाप्यं तत् स्नेहनप्रह्लादनक्लेदनबन्धनविष्यन्दनकरमिति ॥ १ ॥

अथ द्रव्यविशेषभेद इत्यादि द्रव्यस्य विशेषो भेदः पार्थिवादिकः तत्र सर्वेषामेव द्रव्याणां पञ्चभूताभिनिर्वृत्तत्वात् पृथक् द्रव्याणां पृथिव्याद्याकाशान्तानां परमार्थभेदो नास्तीत्युत्कर्षोपाधिभेदं दर्शयन्नाह । बत्वेत्यादि-समुदायात् समवायात् द्रव्याभिनिर्वृत्तिर्द्रव्यजन्म अभिव्यञ्जको अभिज्ञापकः तत्रप्रभूतद्रव्याभिव्यक्तिकारणं पृथिव्यादिभूतगुणोत्कर्षं निर्दिशन्नाह । तत्र स्थूलेति स्थूलः सूक्ष्मः विपरीतः सान्द्रस्तनुविपर्ययः मन्दस्तीक्ष्णविपर्ययः सविपरीतः स्थिरः गुरुश्चिरपाकोकठिनो मृदुविपरीतःपार्थिवस्य लक्षणाभिधानेन गुणवत्त्वमभिधाय क्रियावत्त्वं दर्शयन्नाह तत्र स्थैर्येत्यादि स्थैर्यमचलत्वं सङ्घातः काठिन्यं उपचयो बृंहणं । इदानीमाप्यद्रव्यमपि गुणोत्कर्षेण भेदं दर्शयन्नाह । शीतस्तिमितमिति स्तिमितमार्द्रं जड़त्वमित्यन्ये आप्यस्य लक्षणाभिधानेन गुणवत्त्वमभिधाय क्रियावत्त्वं दर्शयन्नाह ।

उष्णतीक्ष्णसूक्ष्मरूक्षखरलघुविशदं रूपगुणबहुलमौषद्रम्ललवणं कटुकरसप्रायं विशेषतश्चोर्द्ध्वगतिस्वभावमिति तैजसं तद्दहनपचनदारणतापनप्रकाशनप्रभावर्णकरमिति ॥

सूक्ष्मरूक्षखरशिशिरलघुविशदं स्पर्शबहुलमौषत्तिक्तं विशेषतः कषायमिति वायवीयं तद्वैशद्यलाघवग्लपनविरूक्षणविचारणकरमिति ॥

श्लक्ष्णसूक्ष्ममृदुव्यवायिविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयं तन्मार्दवशौषिर्य्यलाघवकरमिति ॥ २ ॥

अनेन निदर्शनेन नानौषधीभूतं जगति किञ्चिद्द्रव्यम-

तत्र ह्लेदनेत्यादिह्लादनं सुखोत्पादनं क्लेदनमार्द्रभावः बन्धनं संहतापादनं विस्यन्दनं द्रवः स्रुतिः ॥ १ ॥

आग्नेयद्रव्यलक्षणं तत्भूतगुणोत्कर्षणदर्शयन्नाह। उष्णेत्यादितीक्ष्णं राजिकामरिचादिकं सूक्ष्मं स्रोतानुसरणशीलं विशदं पिच्छिलविपरीतं तस्य क्रियावत्त्वं दर्शयन्नाह दहनेत्यादिदहनं भस्मसात्करणं, पचनमाहारादिपाकः, दारणं व्रणादेः तापनं शरीरादिसन्तापनः, प्रकाशनमभिव्यक्तिः, प्रभातेजः, वर्णो गौरादिः, वायुगुणोत्कर्षाद्वायव्यं द्रव्यविशेषं दर्शयन्नाह। सूक्ष्मेति खरं कर्कोटकफलवत् शिशिरं शीतं विशदं धूलिवत् तस्यैव कर्म्मदर्शयन्नाह तद्वैशद्येत्यादिग्लपनमवष्वत्वं विचारणं मनसोऽनेकविकल्पकारणं विचरणकरमित्यन्ये पठन्ति तत्र गतिविशेषकरमित्यर्थः विधारणमित्यन्ये आकाशगुणोत्कर्षणाकाशीयं द्रव्यविशेषं दर्शन्नाह। श्लक्ष्ण इति श्लक्ष्णं मसृणं मृदुकोमलं व्यवायीति समस्तदेहं व्याप्यपश्चात्पाकं गच्छतिविषमद्यवत् विविक्तं पृथगभूतं अवयवद्वारेण शून्यमित्यन्ये अव्यक्तरसं मधुरादिरसविशेषानुपलब्धेः तस्य कर्म्माणि निर्द्दिशन्नाह तन्मार्द्दवेत्यादिशौषिर्य्यं छिद्रभावः ॥ २ ॥

इदानीं सर्व्वस्यैव जगतः स्थावरजङ्गमाख्यापाञ्चभौतिकत्वेन सर्व्वमौषधं

स्तीति कृत्वा तं तं युक्तिविशेषमर्थं वाभिसमीक्ष्य स्ववीर्य्य-गुणयुक्तानि द्रव्याणि कर्म्मकराणि भवन्ति। तानि यदा कुर्वन्ति स कालः, यत्कुर्वन्ति तत् कर्म, येन कुर्वन्ति तद्वीर्य्यं, यत्र कुर्वन्ति तदधिकरणं, यथा कुर्वन्ति स उपायो, यन्निष्पादयति तत् फलमिति ॥ ३ ॥

तत्र विरेचनद्रव्याणि पृथिव्यम्बुगुणभूयिष्ठानि पृथिव्यापो गुर्व्व्यो गुरुत्वादधोगच्छन्ति तस्माद्विरेचनमधोगुणभूयिष्ठमनुमानात्। वमनद्रव्याण्यग्निवायुगुणभूयिष्ठान्यग्निवायू हि लघु लघुत्वाच्च तान्यूर्द्ध्वमुत्तिष्ठन्ति तस्माद्वमनमप्यूर्द्ध्व-गुणभूयिष्ठमुक्तं। उभयगुणभूयिष्ठमुभयतोभागं। आकाश-

क्रियागुणयोगादिभिर्द्दर्शयन्नाह, अनेनेति अनौषधिभूतमित्यादि. अनौषधिभूतं द्रव्यं नास्तीति सम्बन्धः, युक्तिविशेषो योजनाविशेषः, तोयाग्निसंस्कारवासमन्थभावनामात्राकालाद्यपेक्षः अर्थञ्चेति अर्थः प्रयोजनं नानाव्याधि निर्वर्त्तनं वीर्य्यं शक्तिः शीतोष्णादयो वा अष्टौ शक्तिमन्तो गुणागुर्व्वादयः अन्ये तु वीर्य्यं प्रधाना गुणवीर्य्यगुणास्ते पुनः सरत्वादयः कर्म्मकराणि कार्य्यकराणि। तानीति तानिद्रव्याणि यस्मिन्काले क्रियां कुर्वन्ति सकालः कालश्च सम्वत्सरात्माकलना द्रव्यः शीतोष्णवर्षलक्षणश्चातुरावस्थिकश्चाभिप्रेतः। यदिति कर्म्मशब्देनात्र भेषजद्रव्यव्यापारः शोधमादिरुक्तः। येनेति, वीर्य्यमिति शक्तिः। यत्रेति अधिकरणमिति पञ्चमहाभूतशरीरसमवायिलक्षणः पुरुषेऽधिकरणं। यथेति येन स्वरसकल्कशृतशीतफाण्टघृततैललेहमोदकोत्कारिकादिप्रकारेण कुर्वन्ति स उपायः। यदिति स्वास्थ्यमस्वास्थ्यम्वा ॥ ३ ॥

तत्रेति गुरुत्वादीति। गुरुत्वं लघुत्वं चेहप्रभावविशेषाधिष्ठिते त्रिवृतादिमदनफलादिद्रव्यसमवेते ग्राह्ये नतु गुरुत्वलघुत्वमात्रे अन्यथा मत्स्यपिष्टान्नमयूरादीनां विरेचकत्वं कपिञ्जललावादीनाञ्च वामनीयत्वं स्यात्

गुणभूयिष्ठं संशमनं। संग्राहकमनिलगुणभूयिष्ठमनिलस्य शोषणात्मकत्वात्। दीपनमग्निगुणभूयिष्ठं। लेखनमनिलानलगुणभूयिष्ठं। बृंहणं पृथिव्यम्बुगुणभूयिष्ठं। एवमौषधकर्माण्यनुमानात् साधयेत्॥

भवन्ति चात्र।

भूतेजोवारिजैर्द्रव्यैः शमं याति समीरणः।
भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्वृतिं॥
खतेजोऽनिलजैः श्लेष्मा शममेति शरीरिणां।
वियत्पवनजाताभ्यां वृद्धिमाप्नोति मारुतः॥
आग्नेयमेव यद्द्रव्यं तेन पित्तमुदीर्य्यते।
वसुधाजलजाताभ्यां बलासः परिवर्द्धते॥
एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये विनिश्चितं।
द्विशो वा बहुशो वापि ज्ञात्वा दोषेऽवचारयेत्॥

तत्र यद्रसे गुणा वीर्य्यसंज्ञकाः शीतोष्णस्निग्धरूक्षमृदुतीक्ष्णपिच्छिलविशदास्तेषां तीक्ष्णोष्णावाग्नेयौ। शीतपिच्छिलावम्बुगुणभूयिष्ठौ। पृथिव्यम्बुगुणभूयिष्ठः स्नेहः। तोयाकाशगुणभूयिष्ठं मृदुत्वं। वायुगुणभूयिष्ठं रौक्ष्यं।

अधोगच्छन्ति उत्पलादिवत् अधोगुणभूयिष्ठं पृथिव्यम्बुगुणभूयिष्ठमित्यर्थः, वमनेत्यादि ऊर्द्ध्वमुत्तिष्ठन्तीति धूमवत् ज्वालावच्च वमनद्रव्यमूर्द्ध्वगुणभूयिष्ठं अग्निवायुगुणभूयिष्ठमित्यर्थः। आकाशेति संशमनमिति न शोधयति यद्दोषान् समान्नोदीरयत्यपि। समीकरोति क्रुद्धांश्च तत्संशमनमुच्यते। संग्राहिकमिति लेखनं कफमेदसोः। बृंहणमिति निर्वृतिं शान्तिं। एवमिति एवमनेन प्रकारेणएतत् पूर्वोक्तं द्विश इति द्वयोर्द्वयो दोषयोः बहुश इति बहूनां दोषाणामित्यर्थः दोषेषु अवचारयेदिति चकाराद्भेषे-

क्षितिसमीरणगुणभूयिष्ठं वैशद्यं। गुरुलघुविपाकावुक्त-गुणौ। तत्रोष्णस्निग्धौ वातघ्नौ। शीतमृदुपिच्छिलाः पित्तघ्नाः। तीक्ष्णरूक्षविशदाः श्लेष्मघ्नाः। गुरुपाको वात-पित्तघ्नः। लघुपाकः श्लेष्मघ्नः। तेषां मृदुशीतोष्णाः स्पर्श-ग्राह्याः। पिच्छिलविशदौ चक्षुःस्पर्शाभ्यां। स्निग्धरूक्षौ चाक्षुषौ। शीतोष्णौ सुखदुःखोत्पादनेन। गुरुपाकः सृष्टविण्मूत्रतया कफोत्क्लेशेन च। लघुर्बद्धविण्मूत्रतया मारुतकोपेन च। तत्र तुल्यगुणेषु भूतेषु रसविशेषमुप-लक्षयेत्। तद्यथा। मधुरो गुरुश्च पार्थिवः मधुरः स्निग्ध-श्चाप्य इति।

भवति चात्र।

गुणा य उक्ता द्रव्येषु शरीरेष्वपि ते तथा।
स्थानवृद्धिक्षयास्तस्माद्देहिनां द्रव्यहेतुकाः ॥ ४ ॥ ५ ॥ ६॥

यथैवमाचरेदिति समुच्चीयते तत्रेति विपाकयोर्मधुरगुरुकयोः प्रागुक्तयोः प्रागुक्तौ गुणौ। तत्रोष्णेति उष्णस्निग्धौ वीर्यसंज्ञौ गुणौ। गुरुपाक इति तेषामष्टानां वीर्याणां मध्ये सुखदुःखोत्पादनादिति अत्र चार्थो द्रष्टव्यः तेन घ्राणदुःखोत्पादनाच्चेति द्रष्टव्यं। गुरुपाक इति स्निग्धश्चेति चकाराद् गुरुश्च। गुणा इति गुणा विंशतिरधिकावास्थानं दोषधातुमलसाम्येनाव-स्थानं वृद्धिर्दोषादेराधिक्यं क्षयो ह्रासो दोषादीनां द्रव्यहेतुकाः पाञ्चभौ-तिकद्रव्यहेतुकाः ॥ ४ ॥ ५ ॥ ६ ॥

इति सूत्रस्थाने निबन्धसंग्रहे एकचत्वारिंशत्तमोऽध्यायः।

द्विचत्वारिंशत्तमोऽध्यायः।

अथातो रसविशेषविज्ञानीयमध्यायं व्याख्यास्यामः।

आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः। तस्मादाप्यो रसः परस्परसंसर्गात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षात्तु ग्रहणं। स खल्वाप्यो रसः शेषभूतसंसर्गाद्विदग्धः षोढा विभज्यते। तद्यथा। मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति ते च भूयः परस्परसंसर्गात्त्रिषष्टिधा भिद्यन्ते। तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः। भूम्यग्निगुणबाहुल्यादम्लः। तोयाग्निगुणबाहुल्याल्लवणः। वाय्वग्निगुणबाहुल्यात् कटुकः। वाय्वाकाशगुणबाहुल्यात् तिक्तः। पृथिव्यनिलगुणबाहुल्यात् कषाय इति। तत्र मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्नाः। तत्र वायुरात्मनै-

अथातो रसविशेषविज्ञानीयमिति,रसविशेषो मधुरादिः, तस्य विज्ञानं विशिष्टं ज्ञानं रससामान्यस्य प्रथमं कारणसम्भवं दर्शयन्नाह। आकाशेत्यादि। आकाशपवनदहनतोयभूमिषु यथासंख्यं शब्दस्पर्शरूपरसगन्धा जायन्त इति शेषः, किं विशिष्टास्ते एकोत्तरपरिवृद्धा इति, तथा हि शब्दगुणमाकाशं, शब्दस्पर्शगुणो वायुः, शब्दस्पर्शरूपगुणं तेजः, शब्दस्पर्शरूपरसगुणा आपः, शब्दस्पर्शरूपरसगन्धगुणा पृथ्वी, परस्परं भूतानुप्रवेशादित्येकोत्तरा वृद्धिर्ज्ञेया, आप्योजलसम्भवः, तत्र सर्व्वेष्वेव भूतेषु सर्वभूतानां सान्निध्यमस्तीति दर्शयन्नाह। परस्परसंसर्गादिति परस्परसंसर्गात् अन्योन्यसंयोगात् परस्परानुग्रहादन्योन्योपकारात्, परस्परानुप्रवेशात्

वात्मा पित्तमाग्नेयं श्लेष्मा सौम्य इति। त एव रसाः स्वयोनिवर्द्धना अन्ययोनिप्रशमनाश्च। केचिदाहुरग्निषोमीयत्वाज्जगतो रसा द्विविधाः सौम्या आग्नेयाश्च। तत्र मधुरतिक्तकषायाः सौम्याः कट्वम्ललवणा आग्नेयाः। मधुराम्ललवणाः स्निग्धा गुरवश्च। कटुतिक्तकषाया रूक्षा लघवश्च। सौम्याः शीता आग्नेयाश्चोष्णाः।

तत्र शैत्यरौक्ष्यलाघववैशद्यवैष्टम्भ्यगुणलक्षणो वायुस्तस्य समानयोनिः कषायो रसः सोऽस्य शैत्यात् शैत्यं वर्द्धयति रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्यात् वैशद्यं वैष्टम्भ्याद्वैष्टम्भ्यमिति।

औष्ण्यतैक्ष्ण्यरौक्ष्यलाघववैशद्यगुणलक्षणं पित्तं तस्य समानयोनिः कटुको रसः सोऽस्यौष्ण्यादौष्ण्यं वर्द्धयति

एकात्मीभावात् सर्व्वेषु भूतेषु सर्व्वेषामाकाशादीनां, सर्व्वेषु द्रव्येषु द्रव्यन्ते सर्व्वेषु भूतेषु सर्व्वभूतानां सान्निध्यमस्तीति, सर्व्वे एवगुणाः सर्व्वेषां भूतानां प्राप्नुवन्तीत्याह। उत्कर्षापकर्षादिति उत्कर्षो वृद्धिः, अपकर्षो ह्रासः, आकाशाधिके द्रव्ये शब्दोऽधिकः, वाताधिके द्रव्ये स्पर्शोऽधिकः, एवं शेषभूतेषु शेषगुणाः, तेन सर्व्वेषामेव भूतानां सर्वात्मकत्वेऽप्युत्कर्षेणाभिधानात्। आप्य एवेति यदि पुनरसौ आप्य एव नान्यभूतजः सएवमपां स्वभावेनाव्यक्तरसत्वात् तेनाप्यव्यक्तरसेन भवितव्यमित्याह। शेषेत्यादि, पानीयादन्यानि भूतानि तेषां संसर्गो मिलनं ततो हेतोरप्सु रसोऽव्यक्तोऽपि कालसहायभूमिवियदनिलानलसंसर्गेण परिपाकान्तरक्रमात् षोढाविभज्यते षड्विधाकारो भवति। तत्रेति तत्र यस्य यस्य शेषभूतस्य संसर्गादयो यो रस उत्पद्यते तं तं रसं दर्शयन्नाह। तत्रेति तत्र च शेषभूतसंसर्गः प्रतिपादनीयः तत्कथमुदकोऽपानमुच्यते निष्पत्तावेतत्तोयप्राधान्यमुक्तं। विशेषेण तु प्राप्नोतीति विशेषेऽपि तोयस्य प्राधान्य

तैक्ष्ण्यात्तैक्ष्ण्यं रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्याद्वैशद्यमिति।

माधुर्य्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणः श्लेष्मा, तस्य समानयोनिर्मधुरो रसः सोऽस्य माधुर्य्यान्माधुर्य्यं वर्द्धयति स्नेहात् स्नेहं गौरवाद्गौरवं शैत्यात् शैत्यं पैच्छिल्यात्पैच्छिल्यमिति। तस्य पुनरन्ययोनिः कटुको रसः स श्लेष्मणः प्रत्यनीकत्वात् कटुकत्वान्माधुर्य्यमभिभवति। रौक्ष्यात् स्नेहं लाघवाद्गौरवमौष्ण्यात् शैत्यं वैशद्यात् पैच्छिल्यमिति। तदेतन्निदर्शनमात्रमुक्तं॥ १॥

रसलक्षणमत ऊर्द्धं वक्ष्यामः। तत्र यः परितोषमुत्पादयति प्रह्लादयति तर्पयति जीवयति मुखोपलेपं जनयति श्लेष्माणां चाभिवर्द्धयति स मधुरः। यो दन्तहर्षमुत्पादयति मुखास्रावं जनयति श्रद्धाञ्चोत्पादयति सोऽम्लः। यो भक्तरुचि-

प्रतिपादनाय पृथिव्यम्बुगुणबाहुल्यादित्युक्तं, तोयाग्निगुणबाहुल्यादित्येके पठन्ति, षण्णां रसानां क्रियाविशेषं दर्शयन्नाह॥ तत्रेति दोषाणामुत्पत्तिकारणमाह। तत्रेति अत्रैवात्मेति आत्मैव योनिः वायुता वातोत्पत्तिरित्यर्थः, पित्तमाग्नेयमिति अनलः पित्तस्य योनिरित्यर्थः, श्लेष्मा सौम्य इति सोमादुत्पद्यत इत्यर्थः। तन्वते इति स्वयोनिवर्द्धना इति येभ्यः कारणेभ्यो मधुरादयो रसा उत्पद्यन्ते तानि वर्द्धयन्तीत्यर्थः। केचिदिति अग्निषोमीयत्वात् अग्निश्च सोमश्च योनिर्जगत इत्यर्थः, सोमश्चाग्नेयाश्चेति चक्र इत्यात् भेदलघुगुरुत्वलघुत्वैरपि द्वैविध्यं सूचयति मधुरेत्यादि। समानयोनिस्तु स्वयोनिरित्यर्थः। औष्ण्येत्यादि तस्य श्लेष्मप्रत्यनीकत्वादित्याह। तदिति निदर्शन मात्रमुक्तमिति दृष्टान्तमात्रमुक्तं॥ १॥

रसलक्षणमिति परितोषस्तु परितुष्टिः, प्रह्लादयति सुखमुत्पादयति, तर्पयति तृप्तिं करोति, जीवयति प्राणान् धारयति, उपलेपो मलवृद्धिः। य

मुत्पादयति कफप्रसेकं जनयति मार्द्दवं चापादयति स लवणः। यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुकः। यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः, यो वक्त्रं परिशोषयति जिह्वां स्तम्भयति कण्ठं बध्नाति हृदयं कर्षति पीड़यति च स कषायः।

रसगुणानत ऊर्द्ध्वं वक्ष्यामः तत्र मधुरो रसो रसरक्तमांसमेदोऽस्थिमज्जौजःशुक्रस्तन्यवर्द्धनश्चक्षुष्यः केश्योवर्ण्यो बलकृत् सन्धानः शोणितरसप्रसादनो बालवृद्धक्षतक्षीणहितः षट्पदपिपीलिकानामिष्टतमस्तृष्णामूर्च्छादाहप्रशमनः षड़िन्द्रियप्रसादनः कृमिकफकरश्चेति स एवं गुणोऽप्येक एवात्यर्थमासेव्यमानः कासश्वासालसकवमथुवदनमाधुर्य्यस्वरोपघातकृमिगलगण्डानापादयति तथार्व्वुदश्लीपदवस्तिगुदोपलेपाभिष्यन्दप्रभृतीन् जनयति ॥ २ ॥

अम्लो जरणः पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठविदाही वहिःशीतः क्लेदनः प्रायशो हृद्यश्चेति। स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्तहर्षनयनसम्मी-

इति दन्तहर्षो दन्तकुण्ठता। य इति कफप्रसेकः श्लेष्मस्रावः। य इति शिरोगृह्णीते उद्वेजकत्वेन च ननु कफवातवेदनाभिः य इति चोष आकर्षणं हर्षो रोमहर्षः। य इति षष्ठमिन्द्रियं मनः तस्येदानीमतिसेव्यमानस्याति सेवां दोषकरीं निदर्शयन्नाह। एवं गुण इत्यादि अम्लस्य सेवितस्य गुणान् दर्शयन्नाह। २ ॥

अम्ल इति जरण आहारस्य पाचनः दोषामय यो शोथस्य वा अनुलोमनो वातमूत्रपुरीषाणां तस्यैकजाति सेवितस्य दोषं निर्दिश-

स्तनरोमसंवेजनकफविलयनगौरवशैथिल्यान्यापादयति तथा शस्त्राभिहतदग्धदष्टभग्नरुग्णप्रच्युतावमूत्रितविसर्पितच्छिन्नभिन्नविद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात् परिदहति कण्ठमुरो हृदयञ्चेति ।

लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृदुष्णः सर्वरसप्रत्यनीको मार्गविशोधनः सर्वशरीरावयवमार्दवकरश्चेति । स एवं गुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथा मुखाक्षिपाकं रक्तपित्तवातशोणिताम्लीकाप्रभृतीनापादयति । ३ ॥

कटुको दीपनः पाचनो रोचनः शोधनः स्थौल्यालस्यकफक्रिमिविषकुष्ठकण्डूपशमनः सन्धिबन्धविच्छेदनोऽवसादनः स्तन्य-

माह । स एवं गुण इत्यादि रोमसंवेजनो रोमाञ्चः अभिहतमभिघातः, दष्टं व्याडादिभिः भग्नं काण्डभग्नाद्यनेकधा, रुग्नं वक्रीप्रच्युतं मूतं स्वस्थानात्, अवमूत्रितं मूत्रविषाणां जन्तूनां मूत्रसङ्गः विसर्पितं सर्पविषाणां जन्तूनां विसर्पितसङ्गः छिन्नं निःशेषतः भिन्नं कोष्ठादि विद्धं शिरादि उत्पिष्टं । प्रहारचूर्णितादि लवणरसगुणकर्म्म निदर्शयन्नाह । लवण इति संशोधनो वमनविरेचनाभ्यां व्रणस्य दुष्टस्य, विश्लेषण इति पृथक् करणः संलग्नावयवानां छेदित्वात् क्लेदनो व्रणस्य सर्वरसानां प्रत्यनीको विपक्षः उच्छेदक इत्यर्थः, मार्गविशोधनः मूत्रनाडीव्रणादिमार्गविशोधनः मूत्रनाडीव्रणादिमार्गशोधनः तस्यातिसेव्यमानस्य दोषं दर्शयन्नाह सर्व्वशरीरेत्यादि कोठः पीडकाः, पुंस्त्वोपघातः शुक्रक्षय, इन्द्रियोपतापश्चक्षुरादीनां स्वकर्म्मगुणहानिः, अम्लिका इति अम्लोद्गारः, आपादयति करोति ॥ २ ॥

कटुकस्य प्रकृतिकर्म्म निर्दिशन्नाह । कटुक इति अवसादनोऽनुत्साहकृत् तस्यैवातिसेवितस्य दोषं निर्दिशन्नाह । स एवं गुण इत्यादि भ्रमश्चक्रारूढ-

शुक्रमेदसामुपहन्ता चेति। स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानो भ्रममदगलताल्वोष्ठशोषगात्रसन्तापवलविघातकम्पतोदभेदकान् करचरणपार्श्वपृष्ठप्रभृतिषु च वातशूलानापादयति॥

तिक्तश्छेदनो रोचनो दीपनः शोधनः कण्डूकोठतृष्णामूर्च्छाज्वरप्रशमनः स्तन्यशोधनो विण्मूत्रक्लेदमेदोवसापूयोपशोषणश्चेति। स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानो गात्रमन्यास्तम्भाक्षेपकार्दितशिरःशूलभ्रमतोदभेदच्छेदास्यवैरस्यान्यापादयति।

कषायः संग्राहको रोपणः स्तम्भनः शोधनो लेखनः शोषणः पीडनः क्लेदोपशोषणश्चेति। स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानो हृत्पीडास्यशोषोदराध्मानवाक्यग्रहमन्यास्तम्भगात्रस्फुरणचुमचुमायनाकुञ्चनाक्षेपणप्रभृतीन् जनयति॥ ४॥

अतः सर्व्वेषामेव द्रव्याण्युपदेक्ष्यामः।

तद्यथा। काकोल्यादिः क्षीरघृतवसामज्जशालिषष्टिक-

स्येव। मदः अपस्मारपूर्व्वरूपं हर्षचयो वा, तिक्त शेषु दाह इत्यादि। रोचन इति इतरभक्ष्यवस्तूनां न पुनः स्वयमेव। मन्यास्तम्भ इति। मन्ये हे तयोस्तम्भ इति कषायस्य प्रकृतिकर्मनिर्द्देशत्वाह। कषाय इति रोपणो व्रणस्य, स्तम्भनो गात्राणां मृदूनां वा दृढ़ीकरणं, शोधनो व्रणस्य, लेखनो व्रणाच्छन्नमांसस्य, शोषणो द्रवधातोः, व्रणमेहादीनां वा पीड़नो व्रणस्य हृदयस्य वा वातकारित्वात् तस्याप्यतिसेवया दोषमाह स एवं गुण इत्यादि चुमचुमायनं राजिकालिप्तस्येव त्वक्पीड़ा आक्षेपणमतिशयकम्पनं प्रभृतिपदग्रहणादन्यानपि वातविकारानर्द्दितादीन् करोति॥ ४॥

यवगोधूममाषशृङ्गाटककसेरुकत्रपुसैर्वारुककर्कारुकालाबुकालिन्दकतकगिलोड्यप्रियालपुष्करबीजकाश्मर्यमधुकद्राक्षाखर्जूरराजादनतालनालिकेरेक्षुविकारबलातिबलात्मगुप्ताविदारीपयस्यागोक्षुरकक्षीरमोरटमधूलिकाकुष्माण्डप्रभृतीनि समासेन मधुरो वर्गः।

दाडिमामलकमातुलुङ्गाम्रातककपित्थकरमर्दबदरकोलप्राचीनामलकतिन्तिडीककोशाम्रभव्यपारावतवेत्रफललकुचाम्लवेतसदन्तशठदधितक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः।

सैन्धवसौवर्च्चलविड़पाक्यरोमकसामुद्रकपाक्तिमयवक्षारोषरप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्गः।

अत इति अतोऽनन्तरं सर्व्वेषां रसानां द्रव्याण्युपदेक्ष्यामः, प्रभृतीनीति शृङ्गाटकं द्विविधं स्थूलाल्पभेदेन त्रपुसं तिरपोति लोके इर्वारुरोमशा कर्कटीकालकलकः गिलोड्यकन्दः प्रावृड्जातः शणपत्रिकाकारः वल्लीयुक्तो गिल्लोठीति लोके कालङ्कतकः अङ्कलोड्य इत्यन्ये पठन्ति चिलाटकमिति च व्याख्यानयन्ति प्रियालश्चारः पुष्करबीजं पद्मबीजं राजादनः क्षीरिकः पयस्या विदारीभेदः क्षीरमोरटः किलाटमस्तु पीलुपर्णीत्येके मधुलिका कर्कटकः दाड़िमेत्यादि पारावतः कामरूपे मधुराम्लरसफलं दन्तशठो जम्बीरः शुक्तं सन्धानकविशेषः चुक्रमित्येके सौवीरकं तुषोदकेनिस्तुषसतुषयवकृते विवृत्कषाय संहिते सन्धाने, धान्याम्लं काञ्जिकं, प्रभृतिग्रहणाच्छाण्डाक्यादीनामवरोधः। सैन्धवेति पाक्यमुद्भिदं, रोमकं शाकम्भरीदेशोत्पन्नं लवणमित्यन्ये, सामुद्रं समुद्रसम्भवं, गुर्जवालायां प्रचुरं भवति, पक्तिमं पाकाभिनिर्वृत्तं, फुल्लालवणमित्युच्यते, ऊषप्रसूतमूषलवणं, प्रभृतिग्रहणादङ्करणकारादीनामवरोधः, पिप्पल्यादिरिति शीतशिवं कर्पूरं अवल्गुजफलं वाकुचीबीजं चण्डा अजमोदा-

पिप्पल्यादिः सुरसादिः शिग्रु मधुशिग्रु मूलकलशुनसुमुख-शीतशिवकुष्ठदेवदारुहरेणुकावल्गुजफलचण्डागुग्गुलुमुस्तला-ङ्गलीशुकनाशापीलुप्रभृतीनि सालसारादिश्च प्रायशः कटुको वर्गः।

आरग्वधादिर्गुडूच्यादिर्मण्डूकपर्णीवेत्रकरीरहरिद्राद्वयेन्द्रयववरुणस्वादुकण्टकसप्तपर्णबृहतीद्वयशङ्खिनीद्रवन्तीत्रिवृत्-कृतवेधनकर्कोटककारवेल्लकवार्त्ताककरीरकरवीरसुमनःशङ्ख-पुष्प्यपामार्गत्रायमाणाऽशोकरोहिणीवैजयन्तीसुवर्चलापुन-र्णवावृश्चिकालीज्योतिष्मतीप्रभृतीनि समासेन तिक्तो वर्गः।

न्यग्रोधादिरम्बष्ठादिः प्रियङ्ग्वादी रोध्रादिस्त्रिफलाशल्ल-कीजम्ब्वाम्रबकुलतिन्दुकफलानि कतकशाकफलपाषाणभेदकवन-स्पतिफलानि सालसारादिश्च प्रायशः कुरवककोविदारकजीव-न्तीचिल्लीपालङ्क्यासुनिषण्णकप्रभृतीनि नीवारकादयो मुद्गा-दयश्च समासेन कषायो वर्गः।

कारा सुगन्धिद्रव्यं लाङ्गलकी कलिकारिका शुकनासा श्योणाकः। आरग्वधादीति मण्डूकपर्णी ब्राह्मी, वेत्रकरीरो वेत्राङ्कुरः स्वादुकण्टको विकङ्कतः वृत्तकण्टकारिकेति प्रसिद्धा शङ्खिनी यवतिक्ताभेदः कृतवेधनः कोशातकी सुमनाः जाती अशोकरोहिणी कटुका वैजयन्ती तर्कारी सुवर्चला सूर्य्यावर्त्तः वृश्चिकाली वृश्चिकपत्री ज्योतिष्मती काकुदमर्दनिका। न्यग्रोधादिरिति कतकः तोयप्रसादनफलः शाकः खरमसृणपत्रपृष्ठोदरः तयोः फलं वनस्पतयो न्यग्रोधादयः तेषां फलानि सालसारादेस्तिक्तानुसरत्वात् कथं कषायवर्गेऽस्य पाठ इत्याह प्रायशः कषाय इति शेषः, कुरुवकः कण्टसेलवाकः कोविदारमपि कीषणावकं मचिकीविचकिलं विदुर्बुधा इति हलायुधः कोविदारः काञ्चनारकः जीवन्ती डोडीचेल्ली चेतवास्तुकाः पालङ्क्या शाक-

तत्रैषां रसानां संयोगास्त्रिषष्टिर्भवन्ति। तद्यथा। पञ्चदशद्विकाविंशतिस्त्रिकाः पञ्चदश चतुष्काः षट् पञ्चका एकशः षड्रसा एकः षट्क इति तेषामन्यत्र प्रयोजनानि वक्ष्यामः।

भवति चात्र।

जग्धाः षड़धिगच्छन्ति बलिनो वशतां रसाः।
यथा प्रकुपिता दोषा वशं यान्ति बलीयसः॥ ५॥

विशेषः पालङ्क इति लोके, सुनिषण्णकः सिरिवालिका चतुःपर्णीत्यपरे, चकारात् कुधान्यानि मुद्गादयो वैदलाः एषान्तु विवरणमुत्तरतन्त्रे स्वयमेवाचार्य्यः करिष्यतीति अस्माभिस्तु ग्रन्थबाहुल्यभयाद्विवरणं न कृतं। तेषामिति द्विषष्टिदोषभेदेषु द्विषष्ठा रसभेदा योज्याः स्वस्थे तु षड्रसमुदिताः। इदानीं रसानामेकैकानामनभ्यासप्रतिपादितबहुतरदोषाणां विशिष्टविषये दोषा न भवन्तीति निर्द्दिशन्नाह—जग्धा इति जग्धा भक्षिताः षड्रसा एकैकशः कृत्वा अभ्यस्ता अपि बलिनः शक्त्युपचयबलयुक्तस्य पुरुषस्य वश्यतां वशभावं गच्छन्ति दोषकारिणो न भवन्तीत्यर्थः यथा दोषा एव बलीयसो बलयुक्त पुरुषस्य कार्य्यकारणक्षमा न भवन्ति एवं रसा अपीत्यर्थः बलिनो रसस्येति क्वचित्॥ ५॥

इति सूत्रस्थाने निबन्धसंग्रहे द्विचत्वारिंशत्तमोऽध्यायः।

त्रिचत्वारिंशत्तमोऽध्यायः ।

अथातो वमनद्रव्यविकल्पविज्ञानीयमध्यायं व्याख्यास्यामः ।

वमनद्रव्याणां फलाद्यानां मदनफलानिश्रेष्ठतमानि भवन्ति। अथ मदनपुष्पाणामातपपरिशुष्काणां चूर्णप्रकुञ्चं प्रत्यक्पुष्पीसदापुष्पीनिम्बकषायाणामन्यतमेनालोड्य मधु-सैन्धवयुक्तां मात्रां पाययित्वा वामयेत् मदनशलाटुचूर्णान्येवं वा वकुलरस्यकोपयुक्तानि मधुलवणयुक्तान्यभिप्रतप्तानि मदन-शलाटुचूर्णसिद्धां वा तिलतण्डुलयवागूं। निर्वृत्तानां वा नातिहरितपाण्डूनां कुशमूढावबद्धमृन्नोमयप्रलिप्तानां यवतुषमुद्गमाषशाल्यादिधान्यराशावष्टरात्रोषितक्लिन्नभिन्नानां

अथात वमनद्रव्येत्यादि—विकल्पः प्रयोगः फलाद्यानामिति फलं मदनफलं आदिग्रहणात् कुटजजीमुतकेक्ष्वाकुधामार्गवकृतवेधनानि गृह्यन्ते, मदनपुष्पाणामिति अत्र पुष्पशब्दः फले वर्त्तते कारणे कार्य्योपचारात् चूर्ण-प्रकुञ्चं पुनरस्य मध्यमा मात्राप्रकुञ्चः पलं मुष्टिरित्येके कराङ्गुलिचतुष्क-मूलावधिमितं चूर्णमित्यपरे, प्रत्यक्पुष्पी अपामार्गः सदापुष्पी अर्कस्तस्य मूलं, निम्बः प्रसिद्धः, कषायाणां तु षट्योगत्रयमुक्तं पुष्पचूर्णमात्रामिति मात्रा च तन्त्रान्तरे चूर्णसरावः अत्र च मात्राशब्दे यथा योगवचनोऽभिप्रेतः अस्याग्रे अकुराशयमुपस्थितदोषं मृदुप्रच्छर्दनमिति केचित् पठन्ति, तन्न निबन्धकारैर-पठितत्वात्। मदनेत्यादि—शलाटु आमं फलं एवमिति एवं शब्दात् प्रत्यक्-पुष्पादीनां त्रयः कषाया ज्ञेया, तेन योगा अपि त्रयः, रम्यको महानिम्बः, अभिप्रतप्तानि उष्णीकृतानि पाययित्वा वामयेदित्यनुवर्त्तनीयं। शलाटुचूर्णेषु योगान्तरं निर्द्दिशन्नाह मदनेति मदनशलाटुचूर्णसिद्धां वा तिलतण्डुल-यवागूं अत्रापि चूर्णस्य प्रकुञ्च एव तिलतण्डुलयोस्तु यवागूप्रमाणेन मात्रा-

फलानां फलपिप्पलीकटुत्यातपे शोषयेत् तासां दधिमधूप-
लविमृदितविशुष्कानां सुभाजनस्थानामन्तर्नखमुष्टिमुष्णो
यष्टीमधुककषाये कोविदारादीनामन्यतमे वा कषाये विमृद्य-
रात्रिपर्य्युषितं मधुसैन्धवयुक्तमाशीर्भिरभिमन्त्रितमुदङ्मुखः
प्राङ्मुखमातुरं पाययेतानेन मन्त्रेणाभिमन्त्र्य ।

ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानलानिलाः ।
ऋषयः सौषधीग्रामा भूतसङ्घास्तु पान्तु ते ॥
रसायनमिवर्षीणां देवानाममृतं यथा ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥ १ ॥

विशेषेण श्लेष्मज्वरप्रतिश्यायान्तर्विद्रधिष्वप्रवर्त्तमाने वा

कल्कनं लेहयित्वा वामयेदिति ज्ञेयं, तेह्यन्वादयवाग्वातदेव शब्दात् चर्ग्गेषु मदनपुष्पस्य चत्वारो योगाः। मदनफलानां पक्वानां प्रधानं योगं निर्दिशन्नाह। निर्वृत्तानामिति निर्वृत्तानां निष्पन्नानां नेनातिहरितपाण्डु-त्वेन परिपाकातिपाण्डुत्वे हि वीर्य्यातिक्रमः साम्यात् कुशमूढ़कुशविर-चितः पुटकः, फलपिप्पलीः मदनफलबीजानि तासामिति तासां फलपिप्प-लीनां अन्तर्नखमुष्टिमिति नखानां मध्ये मुष्टिर्नतु पारिभाषिकं पलाभिधानं अन्तर्नखमुष्टिं यष्टीमधुकषाये आतुरं पाययेदिति सम्बन्धः। कोविदारे-त्यादि कोविदारादीनां संशोधनसंशमनयोक्तानामेकादशानामन्यतम-स्यैकतमस्य कषायैः। एतेन एकादशयोगा उक्ताः प्रत्येषु फलपिप्पली-नामन्तर्नखमुष्टिमिति सम्बन्धः। किम्विशिष्टमन्तर्नखमुष्टिं रात्रिपर्य्युषितं मधुसैन्धवयुक्तञ्च आशिर्भिरभिमन्त्रितमिति इष्टाशा निष्पादनमन्त्रोऽप्याशीः, ताभिर्वैदोक्ताभिरभिमन्त्रितमन्तर्नखमुष्टिं, उदङ्मुख उत्तराभिमुखो वैद्यः प्राङ्मुखं पूर्वाभिमुखमातुरं अभिमन्त्रेण, मन्त्रमाह ब्रह्मदक्षेत्यादि,मन्त्रार्थ-स्त्वदर्शनीयः। आवृत्त्यैव केवलया मन्त्राणां फलदत्वात् ॥ १ ॥

अस्य योगस्य विषयं नियमयन्नाह विशेषेणेत्यादि, विशेषेनातिशयेन

दोषे पिप्पलीवचागौरसर्षपकल्कोन्मिश्रैः सलवणैरुष्णाम्बुभिः पुनः पुनः प्रवर्त्तयेदासम्यग्वान्तलक्षणादिति। मदनफलमज्जचूर्णं वा तत्क्वाथपरिभावितं मदनफलकषायेण मदनमज्जसिद्धस्य वा पयसः सन्तानिकां क्षौद्रयुक्तां मदनफलमज्जसिद्धं वा पयः। मदनफलमज्जसिद्धेन वा पयसा यवागूमधोभागास्रक्पित्तहृद्दाहयोः। मदनफलमज्जसिद्धस्य वा पयसो दधिभावमुपगतस्य दध्युत्तरं दधि वा कफप्रसेकच्छर्दिमूर्च्छातमकेषु। मदनफलमज्जस्नेहं भल्लातकस्नेहवदादाय फाणितीभूतं लेहयेदातपपरिशुष्कं वा मदनफलमज्जचूर्णं जीवन्तीकषायेण पित्ते कफस्थानगते। मदनफलमज्जक्वाथं वा पिप्पल्यादिप्रतीवापं तच्चूर्णं वा निम्बकुलिकाकषाय-

ले षज्वरादिषु शेष इत्यध्याहारः, अप्रवर्त्तमानस्य दोषस्य प्रवर्त्तमाने हेतुं दर्शयन्नाह। अप्रवर्त्तमान इति दुर्मनवद्द्वादोषविषयोगमाह। मदनेति मदनफलमज्जामदनमध्यस्य स्निग्धो भागः सरलसैव मदनफलमित्यन्ये मदनफलकषायेण पाययेदित्यध्याहारः। मदनेति सन्तानिकामिति लेहयेदिति सम्बन्धः सन्तानिका क्षीरस्योपरितनः स्त्यानाभागः। मदनफलमज्जसिद्धं वा पयः पाययेदित्यध्याहारः। अत्रापि प्रकुर्यः मदनफलमज्जसिद्धे वा पयसा यवागूं पयः सन्तानिका अधोभवरक्तपित्ते पित्तकृतहृदयदाहे च। मदनेति दध्युत्तरं रसलेहयेदिति सम्बन्धः, दधि वा पाययेदित्यध्याहारः एतद्योगद्वयमुक्तं। मदनेति मदनफलमज्जरसं फाणितीभूतं काकरीभूतं लेहयेदिति सम्बन्धः, भल्लातकस्नेहवदादायेति छिन्नणोयोक्तेन विधिना आतपेति जीवन्तीकषायेण आतपविशुष्कं तमेव मदनफलं मज्जरसं पाययेदिति शेषः, जीवन्ती शुक्रयवानीलवणालतौषधौ पार्व्वती एतयोर्योगयोर्विषयमाह। पित्ते कफस्थानगते इति मदनफलमज्जक्वाथं वेत्यादि। मदनफलमज्जक्वाथे तृतीयोऽयं योगः। तच्चूर्णं

योरन्यतरेण सन्तर्पणं कफजव्याधिहरं मदनफलमज्जचूर्णं वा मधूककाश्मर्य्यद्राक्षाकषायेण। मदनफलविधानमुक्तं ॥ २ ॥

जीमूतककुसुमचूर्णं वा पूर्व्ववदेवं क्षीरेण निर्वृत्तेषु क्षीरयवागूं रोमशेषु सन्तानिकामरोमशेषु च दध्युत्तरं हरितपाण्डुषु दधि तत्कषायसंसृष्टां वा सुरां कफारोच-

निम्बरूपिकाकषाययोरन्यतरेणेति योगद्वयं तच्चूर्णं मदनफलमज्जचूर्णं रूपिका अर्क: एतेषां त्रयाणां योगानां विषयं नियमयन्नाह। सन्तर्पणेत्यादि द्वात्रिंशत्तमं योगं केचित् पठन्ति तन्नेच्छति गयी व्याख्यातमेवोपसंहरन्नाह। मदनेति एतेन प्रवर्त्तमानव्यापच्चिकित्सां विहाय मदनफलयोगा एकत्रिंशदुक्ता:। २ ॥

मदनफलपश्चाज्जीमूतकं दर्शयन्नाह। जीमूतकेति जीमूतको देवदाली पूर्व्ववदेवेति प्रत्यक्पुष्पादिद्रव्यमयक्वाथैस्त्रयोयोगा: पुष्पचूर्णस्य अन्येतु चरके प्रत्यक्पुष्पादियोगा न सन्तीति क्षीरेणैवात्रमेकं योगमिच्छन्ति पूर्व्ववदित्यनेन प्रकुञ्चं मधुसैन्धवादियुक्तं वा मनन्ति। निर्वृत्तेष्विति निर्वृत्तेषु क्षीरयवागूं रोमशेष्विति रोमशेषु कठिनावस्थां प्राप्तेषु सन्तानिकामिति जीमूतकचूर्णक्वथितसन्तानिकां। अरोमशेष्विति अरोमशेषु वृद्धतमेषु चूर्णक्वथितक्षीरस्य दधिभावं गतस्योत्तरं सरकं, हरितपाण्डुष्विति हरितपाण्डुषु कठिनतमेषु तच्चूर्णक्वथितक्षीरस्य दधि। तदिति तत्कषायसंसृष्टामिति जीमूतकषायकृतां तस्यास्तु कल्पनं जीमूतक्वाथे माषा: भावनीया: जीमूतकस्य क्वाथेनैव शालितण्डुला: प्रक्षालनीया: माषा: शालितण्डुला: ते च संचूर्ण्य एकत्र पिण्डा: कार्य्या: तान् शुष्कचूर्णीतान् कृत्वा अपर शालितण्डुलचूर्णं पिष्टापावनिकायां जीमूतकषायोष्मणा सम्यगुत्स्विद्यावतारयेत्। तत: स्निग्धशीतलस्य तस्य स्विन्नस्य पिष्टस्य द्वौभागा: किट्टभागाश्चतुर्थ:सन्धानार्थे भागौक्वाथ: तत्सर्वं कलसे निधापितं जातरसं सुरा भवति पैष्टीयं तेनात्र नास्तिगुड: न वा मधु अन्ये

कफकासश्वासपाण्डुरोगयक्ष्मासु पर्य्यागतेषु मदनफलमज्जवदुपयोगः तद्वदेव कुटजफलविधानं। कृतवेधनानामप्येष एव कल्पः। इक्ष्वाकुकुसुमचूर्णं वा पूर्ववदेव क्षीरेण कासश्वासच्छर्द्दिकफरोगेषूपयोगः॥ ३॥

धामार्गवस्यापि मदनफलमज्जवदुपयोगो विशेषतस्तु गरगुल्मोदरकासश्वासश्लेष्मामयेषु वायौ वा कफस्थानगते कृतवेधनफलपिप्पलीनां वमनद्रव्यकषायपरिपीतानां बहु-

पुनरत्रानुक्तोऽपि गुड़ो दातव्य इत्याहुः गुड़प्रमाणं त्वस्मिं निर्द्दिष्टाभयारिष्टकाथशेष द्रोणे गुड़पलशतद्वयं प्रक्षेपविभागपरिभाषारूपेण सर्वत्र अन्ये तु जीमूतकषायेण सह सुरामेव न पुनर्जीमूतकषाय साधितामिति वदन्ति जीमूतकुसुमचर्णं चेत्यादीनां योगानां विषयमाह। कफेति इत्यादिति शेषः पर्य्यागतेषु नाति महति हरितपाण्डुष्वतिदेशेन योगं निर्द्दिशन्नाह पर्य्यागतेष्विति पर्य्यागतेषु मदनफलमज्जवदिति वत् करणान्मदनपुष्पशलाटुयोगान् वर्ज्जयित्वा, अन्ये मदनफलयोगाः ते सर्वे पर्य्यागतेषु जीमूतकेषु विज्ञेयाः एतेन पर्य्यागतजीमूतकयोगाश्चतुर्विंशतिरुक्ताः पर्य्यागतेषु परिपक्वेष्वित्यन्ये कुटजफलयोगं निर्द्दिशन्नाह। तद्वदिति अत्रापि जीमूतकवच्चतुर्विंशतियोगा ज्ञेयाः कृतवेधनयोगान्निर्द्दिशन्नाह। कृतवेधनानामिति अत्रापि कुटजवच्चतुर्विंशतियोगा इत्यर्थः कृतवेधनं कोशातकी इक्ष्वाकुयोगान्निर्द्दिशन्नाह। इक्ष्वाकिति इक्ष्वाकुः कटुकालावु एवं क्षीरेण तथा पूर्ववन्मदनफलवत् न पुनः कुटजवत् कृतवेवनवच्च तयोः पुष्पशलाटुवर्ज्जनात् इति मदनफलं वदेक लिंशच्च तथा पूर्वग्रहणेन सुराग्रह्यते एतेनेक्ष्वाकुयोगास्त्रयस्त्रिंशदुक्ताः॥ ३॥

धामार्गवयोगान्निर्द्दिशन्नाह। धामार्गवस्येति एतेन धामार्गवस्य चतुर्विंशतियोगाः। अपि शब्दात् पुष्पशलाटु क्षीरसुरायोगाश्च वचनद्रव्येषु सर्वेषामेवातिदेशयोगानां मदनफलगुल्मकल्पानां मदनफलयोगा विषय एव विषयेनापूर्वः। कृतवेधनेत्यादि कृतवेधन-

श्मशूर्णमुत्पलादिषु दत्तमाघ्रातं वामयति तत्त्वनवबद्धदोषेषु यवागूमाकण्ठात् पीतवत्सु च विदध्यात्। वमनविरेचनशिरोविरेचनद्रव्याण्येवं वा प्रधानतमानि भवन्ति ॥ ४ ॥

भवतश्चात्र।

वमनद्रव्ययोगानां दिगियं सम्प्रकीर्त्तिता।
तां विभज्य यथाव्याधि कालशक्तिविनिश्चयात् ॥
कषायैः स्वरसैः कल्कैश्चूर्णैरपि च वुद्धिमान्।
पेयलेह्याद्यभोज्येषु वमनान्युपकल्पयेत् ॥ ५ ॥

श्रहणं समस्तजीमूतकभेदव्यापकं परिपीतानामिति भावितानां उत्पलादिष्विति आदिग्रहणाद्रक्तोत्पलकुमुदपुण्डरीकसौगन्धिकानि गृह्यन्ते तस्य प्रयोगविशेषस्य विषयं दर्शयन्नाह। तत्त्विति तत्तु प्रागुक्तं चूर्णं विदध्यादिति सम्बन्धः केषु अनवबद्धदोषेषु अत्युद्रिक्तेषु दोषेषु पुरुषेष्वित्यर्थः पुनरपि किंविशिष्टेषु यवागूमाकण्ठात् पीतवत्सुरा तदनवबद्धदोषेष्विति केचित् पठन्ति ॥ ४ ॥

भावनायाः फलातिशयं दर्शयन्नाह। वमनेति एवमिति तद्द्रव्यस्वरसे बहुशोभावितानि। वान्ति द्रव्येति दिगियं सम्प्रकीर्त्तितेति इयं दिक्सम्प्रकीर्त्तित कथितेत्यर्थः, तान् वान्ति द्रव्यविकल्पान् विभज्य पृथक् कृत्य यथाविधिवमनान्युपकल्पयेदित्यग्रेतनेन सम्बन्धः, कस्मात् कालशक्तिविनिश्चयात्। कषायैरिति केषु वमनान्युपकल्पयेदित्याह पेयलेह्याद्यभोज्येषु कैः कृत्वा कषायैरित्यादिभिः कषायैः शृतशीतफाण्टभेदात्त्रिविधैस्वरसैर्यन्त्रादिपीड़ितां द्रव्योत्थैः कल्कैर्दृशदिपिष्टैः चूर्णैः शुष्कपेषणानूकृतावयवैः अपि शब्दाद्वमनद्रव्यपक्वैः स्नेहैरित्यनुक्तं समुच्चीयते भोज्यग्रहणान्मोदकोत्कारिका शुष्कलीप्रभृतीनां ग्रहणं ॥ ५ ॥

इति सूत्रस्थाने निबन्धसंग्रहे त्रिचत्वारिंशत्तमोऽध्यायः।

चतुश्चत्वारिंशत्तमोऽध्यायः ।

अथातो विरेचनद्रव्यविकल्पविज्ञानीयमध्यायं व्याख्यास्यामः ।

अरुणाभं त्रिवृन्मूलं श्रेष्ठं मूलविरेचने ।
प्रधानं तिल्वकस्त्वक्षु फलेष्वपि हरीतकी ॥
तैलेष्वैरण्डजन्तैलं स्वरसे कारवेल्लिका ।
सुधापयः पयःसूक्तमिति प्राधान्यसंग्रहः ॥
तेषां विधानं वक्ष्यामि यथावदनुपूर्वशः ॥ १ ॥
वैरेचनद्रव्यरसानुपीतं मूलं महत्त्रैवृतमस्तदोषं ।
चूर्णीकृतं सैन्धवनागराढ्यमम्लैः पिबेन्मारुतरोगजुष्टः ॥

अथातो विरेचनद्रव्येत्यादि विकल्पोभेदः। अरुणाभमिति अरुणाभमीषल्लोहितं त्रिवृत्निशोत्त इति लोके मूलविरेचने मूलविरेचनानां मध्ये तिल्वकः स्वल्परोध्रः, त्वक्षु इति त्वग्विरेचनानां मध्ये तिल्वकत्वक्प्रधानमित्यर्थः, सुधा सेहुण्ड इति लोके, पयःसूक्तमिति पयः क्षीरविरेचनानां मध्ये सुधा पयः प्रधानमुक्तमिति सम्बन्धः फलेष्वपि हरीतकी अस्याग्रे तैलेष्वैरण्डजं तैलं स्वरसे कारवेल्लिकेतिजेज्जटाचार्य्यः पठति तन्नेच्छति गयी। विधानमिति विधानं प्रयोगकरणं एषां त्रिवृदादीनां यथावत् यथासम्भवं सर्वं अनुपूर्वशः अनुक्रमेणेत्यर्थः॥ १ ॥

वैरेचनेत्यादि वैरेचनद्रव्यरसानुपीतं त्रिवृदादिद्रव्यरसानुभावितं अस्तदोषं क्रिम्यादिदोषरहितं आढ्यं अधिकं अम्लैः शुक्तसौवीरतुषोदकदध्यम्लमद्यमस्तुभिः वैरेचनीयस्वरसक्काथपीतां गाढ़मूलां त्रिवृतां कालदुष्टां चूर्णीकृत्य नागरं सैन्धवाद्यं पिबेदम्लैरनिलव्याधिजुष्ट इति क्वचित् इक्षोरिति इक्षोर्विकारैः खण्डादिभिः पुनर्न गुड़ेन उष्णवीर्य्यत्वात् तस्य न च फाणितेन त्रिदोषकरत्वात्तस्य न चेक्षुरसेन विदाहित्वात्तस्येति

इक्षोर्विकारैर्मधुरैरसैस्तत् पैत्ते गदे क्षीरयुतं पिवेद्वा।
गुडूच्यरिष्टत्रिफलारसेनसव्योषमूत्रं कफजे पिवेद्वा ॥२॥
त्रिवर्णकत्र्यूषणयुक्तमेतद् गुड़ेन लिह्यादनवेन चूर्णं।
प्रस्थे च तन्मूलरसस्य दत्वा तन्मूलकल्कं कुड़वप्रमाणं ॥
कर्षान्विते सैन्धवनागरे च विपाच्य कल्कीकृतमेतदद्यात्।
तत्कल्कभागः समहौषधार्द्धः ससैन्धवो मूत्रयुतश्च पेयः ॥
समास्तुइन्नागराकाऽभयाः स्युर्भागार्द्धकं पूगफलं सुपक्वं।
विड़ङ्गसारो मरिचं सदारुयोगः ससिन्धुद्भवमूत्रयुक्तः ॥

मधुरैः रसैः काकोल्यादिक्वाथैः तदिति त्रिवृणमूलं। स्वादुक्वाथैश्चापि नोक्षोर्विकारैः पैत्ते द्राक्षाक्षीरयुक्तां पिवेदेति केचित् पठन्ति। गुड़ूचीति अरिष्टो निम्बः रसोऽक्वाथः तत्त्रिवृणमूलं अन्ये तु क्षौद्रारिष्ट-त्रिफला क्वाथयुक्ता मूत्रैः पेया कफजे व्योषगाढ़ा इति पठन्ति अत्र पित्तमपि द्रष्टव्यं तेन पित्ताधिके श्लेष्मणि द्राक्षारसेन कफाधिके मूत्रैरिति अयन्तु पाठोऽभवत् समग्रो लिखितः ॥ २ ॥

वातश्लेष्मप्रयोगमाह। त्रिवर्णेति त्रिवर्णं त्रिजातकं एतत्त्रिवृन्मूलं तत्र त्रिवर्णं त्रिकटुकगुड़ानामेको भागः। अपरस्त्रिवृतायाः तस्याः प्रधानत्वात्। वातश्लेष्मविषयमपरमपि प्रयोगमाह। प्रस्थे चेति प्रस्थो द्वात्रिंशत् पलानि द्रवद्रव्यत्वात् तन्मूलरसस्य त्रिवृणमूलक्वाथस्य तन्मूलं त्रिवृन्मूलं कुड़वश्चत्वारिपलानि कर्षान्विते इति प्रत्येकं कर्षप्रमाणे विपाच्यकल्कीकृतमेतदिति एतत् सर्व्वं तावत्पक्तव्यं यावत् कल्कावशेषं भवति वा पाकात् कल्काच्च विशेष भवति अद्यात्भक्षयेत्। अन्ये-त्वेवं पठन्ति क्वाथप्रस्थौ कुड़वं तस्य दद्यात् युक्ता दद्यान्नागरं सभवं पचेत् सर्व्वं यावदेतदनं स्यान्लेह्यीभूतं तत्प्रयोज्यं ततस्तु अन्य कुड़वं घृतस्य दद्यात् इति पठन्ति तत्र कुड़वोऽष्टौ पलानि सैन्धवनागरे च प्रत्येकं पलिके तन्मते घृतमेतद्विरेचनं तच्च वातपित्ते वाताधिक-कफे इत्यन्य वातश्लेष्मविषयमेव योगान्तरमाह। तदिति तत्कल्कस्त्रिवृत्-

विरेचनद्रव्यभवन्तु चूर्णं रसेन तेषां मतिमान् विमृद्य ।
तन्मूलसिद्धेन च सर्पिषाक्तं सेव्यन्तदाज्ये गुटिकीकृतञ्च ॥
गुड़े च पाकाभिमुखे निधाय चूर्णीकृतं सम्यगिदं विपाच्य ।
शीतं त्रिजातात्क्तमथो विमृद्य योगानुरूपा गुटिकाः प्रयोज्याः
॥ ३ ॥
वैरेकीयद्रव्यचूर्णस्य भागं सिद्धं सार्द्धं क्वाथभागैश्चतुर्भिः ।
आमृद्नीयात् सर्पिषा तच्छृतेन तत्क्वाथोष्मस्वेदितं सामितञ्च ॥
पाकप्राप्ते फाणिते चूर्णितं तत्क्षिप्तं पक्वं चावतार्य्यं प्रयत्नात् ।
शीतीभूता मोदकाहृद्यगन्धाः कार्य्यास्त्वेते भक्ष्यकल्पाः समासात् ॥

कल्कः समस्तौषधार्द्धः शुण्ठ्याः पलार्द्धयुक्तः ससैन्धव इति सैन्धवमपि त्रिवृदर्द्धं अन्ये तु पठन्ति त्रिवृत्कल्को नागरभागयुक्तः ससैन्धवो मूत्रयुतः प्रदेयः। सर्व्वविषयान् योगमाह। समा इति भागाद्धिकमिति आदिद्रव्यापेक्षया पूगादिकं प्रत्येकं अर्द्धभागिकं ग्राह्यं विड़ङ्गसारो विड़ङ्गवीजानि सिन्धूद्भवं सैन्धवं तदप्यर्द्धभागेन ग्राह्यं ससैन्धवमूत्रयुक्तो योगः पेय इति सम्बन्धः समे त्रिवृद् नागरे इति केचित् पठन्ति। विरेचनेत्यादि विरेचनद्रव्यभवं चूर्णं यदृच्छया ग्राह्यं रसेन तेषां विमृद्यतेषां वैरेचनद्रव्याणां रसेन भावना कार्य्येत्यर्थः यावता चूर्णमार्द्रीभवति तावद्रसो देयः, भिषजा वैद्येन योगानुरूपवटकाः प्रयोज्या इति सम्बन्धः। तन्मूलसिद्धेन च सर्पिषाक्तमिति विरेचनद्रव्यजटा पक्वेन घृतेन पुनरपि भावना कार्य्येत्यर्थः यावता स्निग्धत्वमुत्पद्यते। तावन्मात्रं घृतं देयमित्यर्थः। सेव्यं सेवनीयं तदाज्ये तस्मिन्नेव घृते गुटिकीकृतं गुटिकारूपं कृतं निधाय निक्षिप्यगुड़ोऽत्र द्विगुणो देयः त्रिजातकमत्र यावता सौगन्ध्यं भवति ॥ ३ ॥

मोदकभक्षान्निर्द्दिशन्नाह। वैरेकीयेति वैरेकीयद्रव्याणां त्रिवृच्छ्यामादीनां ग्रहणं क्वाथभागैरिति विरेचनद्रव्यक्वाथभागैश्चतुर्भिर्मर्द्दयेदग्नौ घृतेन विरेचनद्रव्यसिद्धेन सामितभागं गोधूमचूर्णं तुल्यभागं

रसेन तेषां परिभाव्यमुद्गान् यूषः ससिन्धुत्थवसर्पिरिष्टः।
वैरेचनेऽन्यैरपि वैदलैः स्यादेवं विदध्याद्वमनौषधैश्च॥
भित्त्वा द्विधेत्तुं परिलिप्य कल्कैस्त्रिभण्डिजातैः प्रतिवध्य रज्वा
पक्वञ्च सम्यक् पुटपाकयुक्त्या खादेत्तु तं पित्तगदी सुशीतं॥४॥
सिताजगन्धात्वक्‌क्षीरीविदारीत्रिवृतः समाः।
लिह्यान्मधुघृताभ्यान्तु दड्‌दाहज्वरशान्तये॥
शर्कराक्षौद्रसंयुक्तं ट्टच्छ्चूर्णावचूर्णितं।
रेचनं सुकुमाराणां त्वक्‌पत्रमरिचांशकं॥

अच्छिप्यमर्दयित्वा ऊष्मणा स्वेदयित्वान्यस्मिन् फाणिते पाकप्राप्ते अच्छिप्यमोदकाः कार्य्याः, यूषकल्पं निर्द्दिशन्नाह। रसे चेति तेषामिति तेषां विरेचनद्रव्याणां अन्येस्त्विदं पठन्ति मुद्गानामिति तद्रसे प्रधान· कल्पनया त्रिवृता रसे। वैरेचने इति विरेचनद्रव्यभावितैरन्यैरपि वैद· लैर्मसूरादिभिः यूषः स्याद्भवेदित्यर्थः। एवमिति एष एव वमनीयादि· यूषाणां कर्म्ममार्गः पुटपाकविरेचनं निर्द्दिशन्नाह। भित्त्वादिति भित्त्वा विदर्य्यत्रिफलाटीशुल्का त्रिवृत्पुटपाकयुक्ता पुटपाकक्रमेण शालक्योक्तक्रिया- कल्पनिर्द्दिष्टपुटपाकविधिना तेन काश्मर्य्यादि पत्राच्छादनकुशपरिवेष्टनं मृदावलेपनं निधूमाङ्गारान्तरूपस्वेदनादि सर्वमतिदेशेन लभ्यते अन्येत्वेवं पठन्ति। इत्तुं द्विधा पाठयित्वावलिख्यत्रिवृत्कल्कौ प्रतिसन्धाय वापि पक्वं सम्यक् पुटपाकक्रमेण खादेच्छीतं पित्तरोगाभिभूतः व्याख्यानयन्ति च त्रिवृत्कल्कैरिति बहुवचनात् त्रिवृदादिकल्कैरिति आदिशब्दो लुप्त- निर्द्दिष्टो द्रष्टव्यः तेनान्येषां वैरेचनिकानामयमेव पुटपाकविधिरिति द्योतयति॥ ४॥

इदानीं वैरेचनलेहानाह। सितेत्यादि सिता शर्करा अजगन्धाजावा भिका वोय इत्यन्ये त्वक्‌क्षीरीवंशलोचनाविदारीविरालीत्रिवृत्निशोथा इति लोके, शर्करेति मरिचांशमिति अंशश्चतुर्थी भागः पचेदिति सिताशर्करा- तस्यः पलं, क्षौद्रं मधु, तस्याद्वैकुडवश्चत्वारिपलानि त्रिवृल्लेहस्य चतुर्थांशेन

पचेल्लेहं सिताक्षौद्रपलार्द्धकुड़वान्वितं।
त्रिवृच्चूर्णयुतं शीतं पित्तघ्नं तद्विरेचनं॥
यदृच्छयामाक्षारमुण्ठीपिप्पलीर्मधुनाप्नुयात्।
सर्वश्लेष्मविकाराणां श्रेष्ठमेतद्विरेचनं॥
वीजाढ्यपथ्याकाश्मर्य्यधात्रीदाडिमकोलजान्।
तैलभृष्टान् रसानम्लफलैरावाप्य साधयेत्॥
घनीभूतं त्रिसौगन्ध्यं त्रिवृतक्षौद्रसमन्वितं।
लेह्यमेतत् कफप्रायैः सुकुमारैर्विरेचनं।
नीलीतुल्यं त्वगेलञ्च तैस्त्रिवृत्समसितोपला।
चूर्णं सन्तर्पणं क्षौद्रफलाम्लं सन्निपातनुत्॥ ५॥
यदृच्छयामासिताकृष्णात्रिफलामाक्षिकैः समैः।
मोदकाः सन्निपातोर्द्ध्वरक्तपित्तज्वरापहाः॥

तत्र मधुनोऽग्निसंयोगो न विरुध्यते अनवस्थानाच्च त्रिवृदिति श्यामार्द्धदारकः क्षारो यवक्षारः आप्नुयाल्लिह्यात्। वीजाढ्येति वीजाढ्यान् सुपक्वान् पथ्यादीन् सहैव वीजैः साधयेत् तान् रसान् पथ्याधात्रीदाड़िमकोमलजान् एरण्डतैलभृष्टान् पुनः फलैः वीजपुरादिभिः सहावाप्यप्रक्षिप्यसाधयेत् पथ्यादीनां यदृच्छयामात्राजले तु षोड़शगुणे तेषां क्वाथः कर्त्तव्यः एरण्डतैलमात्रा तु यावता तस्य भर्जनं सम्भवेदिति अम्लफलन्तु क्वाथस्य चतुर्थांशेन त्रिसौगन्ध्यमात्रा तु यावता सौगन्ध्यं भवति त्रिवृत् क्षौद्रन्तु प्रत्येकं लेहस्य चतुर्थांशेन कफप्राये भूयिष्ठकफैः पुरुषैः सेव्यं नीलीतुल्यमिति नीलीफलतुल्यं त्वगेलं नीलीश्रीफलिका तेन नील्यादिभिः सहतुल्या त्रिवृत् सहिता पलाशर्करायुक्ता सन्तर्पणं मोषणं केचित् सन्तर्पणमिति पठन्ति व्याख्यानयन्ति च तर्पणाः शक्तवः तैः सहयुक्तं, क्षौद्रं फलाम्लं मधुवीजपूराम्लरसेन सह चूर्णं देयं सन्निपातनुत्प्रशान्ते सन्निपाते अनुवन्धपरिरक्षणार्थमित्यर्थः॥ ५॥

हृद्भागस्त्रयः प्रोक्तास्त्रिफला तत्समा तथा।
क्षारकृष्णाविडङ्गानि संचूर्ण्य मधुसर्पिषा॥
लिह्याद्गुडेन गुटिकां कृत्वा वाप्यथ भक्षयेत्।
कफवातकृतान् गुल्मान् प्लीहोदरहलीमकान्॥
हन्त्यन्यानपि चाप्येतन्निरपायं विरेचनं।
चूर्णं श्यामात्रिवृन्नीली कट्वी मुस्ता दुरालभा॥
चव्येन्द्रवीजं त्रिफला सर्पिर्मांसरसाम्बुभिः।
पीतं विरेचनं तद्धि रूक्षाणामपि शस्यते॥
वैरेचनिकनिःक्वाथभागाः शीतास्त्रयो मताः।
द्वौ फाणितस्य तच्चापि पुनरग्नावधिश्रयेत॥
तत् साधुसिद्धं विज्ञाय शीतं कृत्वा निधापयेत्।
कलसे कृतसंस्कारे विभज्यर्त्तुं हिमाहिमौ॥

वैरेचनिकमोदकमाह। त्रिवृदिति श्यामात्रिवृद्दारकः त्रिफलायाः प्रत्येकं भागाः समाः यद्यप्यत्र भागश्रुतिर्नास्ति तथापि सिता माक्षिके पक्वा गुटिकाः कार्य्याः सितामाक्षिके समस्तद्रव्येभ्यो द्विगुणे ग्राह्ये लेहगुटिकयोः प्रयोगमाह। त्रिवृदिति त्रिफलाया अपि त्रयो भागाः क्षीरकृष्णाविड़ङ्गानामपि त्रयोभागाः ग्राह्याः। निरुपायं व्यापद्रहितं चूर्णमाह। चूर्णमिति नीलीनिलिनो श्रीफलिकेति लोके, कट्वीकटुरोहिणी रुक्षाणां सर्पिषा मांसरसेन च स्निग्धानां पुनरपि शब्दसमुदितानामम्बुना पानीयेन सह योगो देयः वैरेचनिकं गौड़मासवं निर्द्दिशन्नाह। वैरेचनिकेति वैरेचनिकं द्रव्यं सेहुण्डवर्ज्जितं ग्राह्यं एकैवत्रिवृदित्येके शीता इत्यनेन वैरेचनिकक्वाथे उष्णे फाणितं न योजयेदित्युक्तं भवति द्वौ फाणितस्येति फाणितं शक्तवः एतेन पञ्चभागाः क्वथनीया इत्यर्थः साधुसिद्धमिति अर्द्धावशिष्टं पुनः शीतग्रहणेनोष्णं न स्थातव्यमित्युक्तं त्रिवृदधिकारे वैरेचनिकक्वाथभागा इति सामान्यशब्दप्रयोगादपरवैरेचनिकानामप्यत्रवासव

माषाद्दूर्द्धं जातरसमासवं मधुगन्धिकं।
पिवेदसावेव विधि: क्षारमूत्रासवेष्वपि॥ ६॥
वैरेचनिकमूलानां क्वाथे माषान् सुभावितान्।
सुधौतांस्तत्कषायेण शालीनाञ्चापि तण्डुलान्॥
अवक्षुद्यैकत: पिण्डान् कृत्वा शुष्कान् सुचूर्णितान्।
शालितण्डूलचूर्णञ्च तत्कषायोष्मसाधितं॥
तस्य पिष्टस्य भागांस्त्रीन् किण्वभागविमिश्रितान्।
मण्डोदकार्थे क्वाथञ्च दद्यात्तत्सर्वमेकत:॥
निदध्यात् कलसे तान्तु सुरां जातरसां पिवेत्।
एष एव सुराकल्पो वमनेष्वपि कीर्त्तित:॥ ७॥

इति वोधयति, निधापयेत् क इत्याह कलसे कथंभूते कृतसंस्कारे अन्त:-चालितशुष्कस्य मधुपिप्पलीलेपो गुरुधूपसंस्कारश्चेति संस्कार:। विभज्यर्त्तूर्-हिमाविति हिमे मासं धान्यराशौ स्थाप्यं अहिमे पुनरर्द्धं पक्षमिति जातरसमुत्पन्नरसं वरासवं पिवेदिति सम्बन्ध:। जातरसस्य लक्षणमाह। मधुगन्धमिति असावेव विधि: क्षारमूत्रासवेष्विति अयमेव विधिश्चिकित्सि-तादौ वक्ष्यमाणक्षारोदकासवादि सुगुड़मधुयोनिष्वन्येष्वप्यवलिप्तेष्विति हिमं हिमकालस्थापनस्य च पाकप्राप्तिलक्षणस्य चेति॥ ६॥

पैष्टीं सुरां वैरेचनीं दर्शयन्नाह। वैरेचनिकेति त्रिवृदादिक्वाथेन माषवैदलानि विभावयेदित्यर्थ:। तत्कषायेणेति तेनैव वैरेचनिकक्वाथेन अवक्षुद्यैकत: एकीकृत्यचोदयित्वेत्यर्थ:। पिण्डान्कृत्येति किण्वनिमित्तं पिण्डं कृत्वेत्यर्थ: तत्कषायोष्मसाधितमिति त्रिवृदादि क्वाथोष्मस्वेदितं तस्य पिष्टस्येत्यादिपिष्टा पाचनीयां शीतलीकृत्यपिष्टस्य भागां स्त्रीन् पूर्व्वकिण्वभागेनैकेन मिश्रितान् कृत्वेत्यर्थ: क्वाथं दद्यादिति त्रिवृदादे: तस्य प्रमाणन्तु एतस्यैव योगस्यान्यत्राप्यतिदेशं निर्द्दिशन्नाह एष एवेत्यादि एष एव सर्व्वपिष्टसुराणां विधि: तथा वामनीयेषु मदनफलादिष्वपी-त्यर्थ:॥ ७॥

मूलानि त्रिवृतादीनां प्रथमस्य गणस्य च ।
महतः पञ्चमूलस्य मूर्वाशार्ङ्गष्ठयोरपि ॥
सुधां हैमवतीञ्चैव त्रिफलातिविषे वचां ।
संहृत्यैतानि भागौ द्वौ कारयेदेकमेतयोः ॥
कुर्य्यान्निःक्वाथमेकस्मिन्नेकस्मिन् चूर्णमेव तु
तुषांस्तस्मिंस्तु निःक्वाथे भावयेद्बहुशो यवान् ॥
शुष्काणां मृदुभृष्टानां तेषां भागास्त्रयो मताः ।
चतुर्थं भागमावाप्य चूर्णानामनुकीर्त्तितं ॥
प्रक्षिप्य कलसे सम्यक् समस्तं तदनन्तरं ।
तेषामेव कषायेण शीतलेन सुयोजितं ॥
पूर्ववत् सन्निदध्यात्तु ज्ञेयं सौवीरकं हि तत् ॥ ८ ॥
पूर्वोक्तं वर्गमाहृत्य द्विधा कृत्वैकमेतयोः ।
भागं संक्षुद्य संसृज्य यवान् स्थाल्यामधिश्रयेत् ॥

सौवीरकं वैरेचनमस्लसन्धानं निर्द्दिशन्नाह । मूलानीति त्रिवृदादीनां संशोधनसंशमनीयोक्तानां ग्रहणं प्रथमो गणो विदारिगन्धादिः मूर्वा चोरस्नायुः शार्ङ्गष्ठा काठकरञ्जः विरापाटिकेत्यन्ये अपरे तु काकजङ्घामाहुः सुधासेहुण्डः हैमवती श्वेतवचा एतानि सर्वाण्यपि त्रिवृदादीनां संहृत्य एकीकृत्य द्वौ भागौ कारयेत् ततश्च एतयोर्द्वयोर्भागयोर्मध्ये एकस्मिन् भागे एकं निःक्वाथं कुर्य्यात् एकस्मिंस्तु भागे चूर्णं कुर्य्यात् तुषान् कुट्टितान् पूर्वोक्तेति क्वाथसमाहं यावत् तेषां यवानां आवाप्यनिक्षिप्य चूर्णानां पूर्वोक्तोद्धरितत्रिवृदादिद्रव्यैकभागचूर्णानां, अत्रास्मिन् शास्त्रे कीर्त्तितं कथितं सौवीरकं हितं ज्ञेयमिति सम्बन्धः । ततस्तस्य चूर्णभागनिक्षेपणादनन्तरं कलसे प्रक्षिप्य तत्सौवीरकं सौवीरकसंज्ञं ॥ ८ ॥

तुषोदककल्पं निर्द्दिशन्नाह । पूर्वोक्तमिति त्रिवृतादिमूलं विदारि-

अजशृङ्ग्याः कषायेण तानभ्यासिच्य साधयेत्।
सुसिद्धांश्चावताच्छैतानौषधिभ्यो विरेचयेत्॥
विमृद्य सतुषान् सम्यक् ततस्तान् पूर्ववन्मितान्।
पूर्वोक्तौषधभागस्य चूर्णं दत्वा तु पूर्ववत्॥
तेनैव सह यूषेण कलसे पूर्ववन्न्यसेत्।
ज्ञात्वा जातरसञ्चापि तत्तुषोदकमादिशेत्॥
तुषाम्बुसौवीरकयोर्विधिरेष प्रकीर्त्तितः।
षडाचात् सप्तरात्राद्वा ते च पेये प्रकीर्त्तिते॥
वैरेचनेषु द्रव्येषु त्रिवृन्मूलविधिः स्मृतः॥ ६॥

गन्धादिस्तथा महत्पञ्चमूलं मूर्वाशार्ङ्गष्टा चेति पूर्व्वोक्तो वर्गः। द्विधाकृत्वा द्वौ भागौ कृत्वेत्यर्थः। एतयोर्भागयोर्मध्ये एकं भागं संक्षुद्य कुट्टयित्वा सतुषैर्यवैः सह संसृज्य संवद्धीकृत्य स्थाल्यामधिश्रयेन्निक्षिपेत् यवानामेको भागः अजशृङ्गीविषाणिकेत्यपरे तं पूर्वोक्तं सयवं भागं साधयेत् सन्धयेत् सुसिद्धान् सुखिन्नान् यवानौषधेभ्यो विरेचयेत् पृथक् कुर्य्यात्। तान् यवान् पूर्ववन्मितान् पूर्वोक्तौषधभागस्योद्धरितस्य इति शेषः पूर्ववच्चतुर्थभागे प्रमाणमित्यर्थः तेनैव सह यूषेणेति प्रोक्तखिन्नौषधवर्गयवाजशृङ्गीकषायेणोद्धृत्यौषधं यवेन सपुनरौषधसंसर्गेण घनत्वाद् यूष इव जातः। जातरसं व्यक्ताम्लं तयोः सौवीरकतुषोदकयोः अव्यक्ताम्लत्वे कालावधिं दर्शयन्नाह। षडाचात् सप्तरात्राद्वा षड्रात्र सप्तरात्रविकल्पोऽप्युष्णशीतकालापेक्षः ते चेति सौवीरकतुषोदके सप्रपञ्चमुद्दिश्य त्रिवृद्विधानं प्रकरोति टेशेनावशिष्टवैरेचनमूलानि निर्द्दिष्टुमाह। वैरेचनेष्विति, वैरेचनेषु सर्वेष्विति अवशिष्टेषु श्यामादन्तीद्रवन्ती सप्तलादिषु त्रिवृद्विधिः स्मृत इति यादृशस्त्रिवृन्मूले विधिरुक्तस्तादृशस्तेष्वपि ज्ञेय इत्यर्थः तद्यथा श्यामामूलं श्यामास्वरसभावितं वा चूर्णितं सैन्धवनागरयुक्तो अनिलव्याधौ मधुरक्वाथसहितं शर्करादिभिस्तुल्यभागं गोक्षीरयुक्तं पित्त इत्यादि यावत्

दन्तीद्रवन्त्योर्मूलानि विशेषात् मृत्कुशान्तरे ॥
पिप्पलीक्षौद्रयुक्तानि स्विन्नान्युद्धृत्य शोषयेत ।
ततस्तद्विधानेन योजयेत् श्लेष्मपित्तयोः ॥
तयोः कल्ककषायाभ्यां चक्रतैलं विपाचयेत् ।
सर्पिश्च पक्वं वीसर्पकक्षादाहाञ्जयेत् ॥
मेहगुल्मानिलश्लेष्मविबन्धांस्तैलमेव च ।
चतुःस्नेहं शकृच्छुक्रवातसंरोधजा रुजः ॥१०॥

सौवीरकतुषोदकविधिः। एवं प्रतिशेषं वैरेचनिकमेवलेहोदाहार्य्यं विषयोऽपि तेषां वैरेचनिकमूलकल्पानां प्रतिनिष्ठल्कल्पविषय एवेति सामान्योऽतिदेशं निर्द्दिश्य दन्तीद्रवन्त्योर्विशिष्टं कल्पनमाह ॥ ९ ॥

दन्तीति दन्तीद्रवन्त्योर्मूलान्युद्धृत्य शोषयेदिति सम्बन्धः किं विशिष्टानि अतिशयेन स्विन्नानि कस्माद्विशेषात् अतिशयेन। क्वेत्याह मृत्कुशान्तः मृत्तिकादर्भमध्ये पुटपाकविधानेत्यर्थः पिप्पलीक्षौद्रयुक्तानि स्विन्नानीति सम्बन्धः। दन्तीप्रसिद्धाद्रवन्ती चरितपत्रा सम्बरीति लोके, तयोरिति तयोर्दन्तीद्रवन्त्योः कल्ककषायमात्रायां परिभाषास्मरणीयातामाश्रित्यकल्केनोच्यते। तैलपलानि द्वात्रिंशत्दन्तीकल्कपलान्यष्टौ दन्तीद्रवन्तीक्वाथस्य पलानि शतमेकमष्टाविंशत्यधिकं तावत् क्वाथ्यं यावत्तैलपाकलक्षणं दन्तीद्रवन्तीक्वाथस्यायंविधिः पानीयपलानि पञ्चशतानि, दन्तीद्रवन्ती पलानि शतमेकं क्वाथशेषमेकशतमष्टाविंशत्यधिकं इति क्वाथकल्पना अन्यथाप्यनुक्ततैलादिमाने इयमेव कल्पना ज्ञेया। चक्रतैलमिति चक्रपीड़ितं तिलतैलं हस्तादियन्त्रपीड़ननिषेधार्थं चक्रे ह्यभिष्टा, एवं तिलादयः पीड्यन्ते तेन पुनर्गुणवत्तरा भवन्ति यन्त्रेण भर्ज्जनरूक्षितानां तिलानां स्नेहगुरुत्वादयो गुणाहीयन्ते इति सर्पिश्चेति ताभ्यां दन्तीद्रवन्ती मूलकल्ककषायाभ्यां प्रत्येकं पक्वं सिद्धं सर्पिर्व्विसर्पादीन् जयेत् पुनर्दन्त्याः कल्कं द्रवन्त्यास्तु कषाय इति बोद्धव्यं। तैलमेव चेति चक्रतैलं पुनर्मेहगुल्मादीन्

दन्तीद्रवन्तीमरिचकनकाह्वकयासकैः ।
विश्वभेषजमृद्वीकाचित्रकैर्मूत्रभावितैः ॥
सप्ताहं सर्पिषा चूर्णं योज्यमेतद्विरेचनं ।
जीर्णे सन्तर्पणं चौद्रं पित्तश्लेष्मरुजापहं ।
अजीर्णपार्श्वरुक्पाण्डुप्लीहोदरनिवर्हणं ॥
गुड़स्याष्टपले पथ्या विंशतिः स्युः पलं पलं ।
दन्तीचित्रकयोः कर्षौ पिप्पलीत्रिवृतोर्द्दश ॥
कृत्वैतान्मोदकानेकं दशमे दशमेऽहनि ।
ततः खादेदुष्णतोयसेवी निर्यन्त्रणास्त्विमे ॥
दोषघ्ना ग्रहणीपाण्डुरोगार्शःकुष्ठनाशनाः ॥ ११ ॥
व्योषं त्रिजातकं मुस्ता विड़ङ्गामलके तथा ॥
नवैतानि समांशानि त्रिवृदष्टगुणानि वै ।

जयेत् । चतुरिति चतुःस्नेहमिति घृततैलवसामज्जानश्चत्वारः स्नेहाः सकृत्पुरीषं चतुःस्नेहं दन्तीद्रवन्ती साधितं वातसंरोधजारुजा जयेदिति सम्बन्धः अत्र द्रवस्यानुक्तत्वाच्चतुर्गुणं जलं देयं ॥ १० ॥

दन्तीत्यादि दन्तीसम्बरी कनकाह्वयं कङ्कुष्ठं नागकेशरमित्यन्ये यवासो दुरालभा, विश्वभेषजं शुण्ठी, सप्ताहं मूत्रभावितमिति सम्बन्धः सर्पिषेति अस्य चूर्णस्य घृतेन वा लेहं कार्य्यमित्यर्थः अस्यैव प्रयोगस्य यौगिकमनुसंग्रहमाह जीर्णेत्यादिजीर्णे तस्मिन्नौषधे सन्तर्पणं चौद्रमिति लाजः शक्तुसहितं मधुदेयं मोदकस्य प्रयोगमाह । गुड़स्येति अष्टौ पलानि गुड़स्य विंशतिर्हरीतकीफलानि दन्तीमूलचूर्णपलं चित्रकमूल-चूर्णपलञ्च पिप्पलीकर्षः त्रिवृत्कर्षञ्च अत्र तु सप्तगुञ्जा फलपरिमितमाषक-प्रमाणेन पलादिमानं ग्राह्यं । दशकृत्वैतन्मोदकानित्यादि दशमो मोदकान् कृत्वा एकं मोदकं दशमे दशमेऽहनि खादेदिति सम्बन्धः निर्यन्त्रणा वातातपादिनिषेधरहिता । इमे मोदकाः ॥ ११ ॥

श्लक्ष्णचूर्णीकृतानीह दन्तीभागद्वयं तथा ॥
सर्वाणि चूर्णितानीह गालितानि विमिश्रयेत् ।
षड्भिश्च शर्कराभागैरीषत्सैन्धवमाक्षिकैः ॥
पिण्डितं भक्षयित्वा तु ततः शीताम्बु पाययेत ।
वस्तिरुक् तृड्ज्वरच्छर्दिशोषपाण्डुभ्रमापहं ॥
निर्यन्त्रणामिदं सर्वं विषघ्नन्तु विरेचनं ।
तृष्टदष्टकसंज्ञोऽयं प्रशस्तः पित्तरोगिणां ॥
भक्ष्यः क्षीरानुपानो वा पित्तश्लेश्मातुरैर्नरैः ।
भक्ष्यरूपसधर्मत्वादाढ्येष्वेव विधीयते ॥
तिल्वकस्य त्वचं वाह्यामन्तर्वल्कविवर्जितां ।
चूर्णयित्वा तु तौ भागौ तत्कषायेण गालयेत ॥
तृतीयं भावितं तेन भागं शुष्कन्तु भावितं ।
दशमूलकषायेण तृष्टद्वत्संप्रयोजयेत् ॥
विधानं त्वक्षु निर्दिष्टं फलानामथ वक्ष्यते ॥ १२ ॥

व्योषादिशीतविरेचनं दर्शयन्नाह। व्योषमिति व्योषादीनि शमिद्वानि त्रिवृदष्टगुणानीति त्रिवृदष्टगुणायेषु तानि तथा ईषत् सैन्धवमाक्षिकैरिति ईषच्छब्दश्चतुर्थांशवाचकः। भक्ष्यो भक्षणीयः भक्ष्यरूपसाधर्म्यत्वात् भक्ष्यरूपतुल्यादित्यर्थः वातश्लेश्मातुरैर्नरैरिति केचित् पठन्ति त्वक्प्रधमनकस्य प्रयोगं निर्दिदिक्षुः प्रथमं तस्य संस्कारमेव सर्वप्रयोगविषयमाह। तिल्वकस्येति अन्तर्वल्कविवर्जितामिति अभ्यन्तरकेचनलागेव वर्जितं भागाविति द्वौ भागावित्यर्थः तत्कषायेण तिल्वककषायेण गालयेत् चारत्नलेन गालनं पुनरिहैकविंशतिवारान् पारम्परयति तु तृतीयं भावितं तेन भागमिति अपरं चूर्णस्य स्थापितं तृतीयं भागं तेनैव तिल्वककषाय जलेन चतुर्भागद्वयगालस्यगुणातिशयेन भावितमित्यर्थः शुष्कन्तु भावितं दशमूल;

हरीतक्याः फलं त्वस्थिवियुक्तं दोषवर्जितं ॥
योऽयं दृष्टविधानेन सर्वव्याधिनिवर्हणं।
रसायनं परं मेध्यं दुष्टान्तर्व्रणशोधनं ॥
हरीतकी विडङ्गानि सैन्धवं नागरं त्रिवृत्।
मरिचानि च तत्सर्वं गोमूत्रेण विरेचनं ॥
हरीतकी भद्रदारु कुष्ठं पूगफलं तथा।
सैन्धवं शृङ्गवेरञ्च गोमूत्रेण विरेचनं ॥
नीलिनीफलचूर्णञ्च नागराभययोस्तथा।
लिह्याद्गुडेन सलिलं पश्चादुष्णं पिबेन्नरः ॥
पिप्पल्यादिकषायेण पिबेत् पिष्टां हरीतकीं।
सैन्धवोपहितः सद्य एष योगो विरेचयेत् ॥
हरीतकी भक्ष्यमाणा नागरेण गुडेन वा।
सैन्धवोपहिता वापि सातत्येनाग्निदीपनी ॥
वातानुलोमनी हृद्या चेन्द्रियाणां प्रसादनी।
सन्तर्पणकृतान् रोगान् प्रायो हन्ति हरीतकी ॥
शीतमामलकं रूक्षं पित्तमेदःकफापहं।
विभितकमनुष्णन्तु कफपित्तनिवर्हणं ॥

कषायेणेति तृतीय भागं शुष्कं न पुनः समस्तं दशमूली कषायेण भावितं विडङ्गवत् संप्रयोजयेदिति सम्बन्धः ॥ १२ ॥

फलप्रधानहरीतकी कल्पे नाग्निषवैरेचनिकफलकल्पं निर्दिशन्नाह हरीतक्या इति अधिशब्दोऽयं दोषेषु व्याधिषु च वर्त्तते सर्वेषां हरीतकीयोगानां सामान्यं फलं दर्शयन्नाह। हरीतकीति मात्राप्रमाणं मध्येषु कोष्ठवयोबलेषु चूर्णकर्षः उत्तमाधमयोर्बुद्ध्या विकल्पनीया। हरीतकीति सातत्येन निरन्तरोपयोगेन सन्तर्पणकृता रोगास्तृष्णादयः तानुष्णत्वा-

वीर्य्यमम्लकषायाणि सतिक्तमधुराणि च।
त्रिफला सर्व्वरोगघ्नी त्रिभागष्टतमूर्च्छिता॥
वयसःस्थापनं चापि कुर्य्यात् सततसेविता।
हरीतकीविधानेन फलान्येवं प्रयोजयेत्॥१३॥
विरेचनानि सर्व्वाणि विशेषाच्चतुरङ्गुलात्।
फलं काले समुद्धृत्य सिकतायां निधापयेत्॥
सप्ताहमातपे शुष्कं ततो मज्जानमुद्धरेत्।
तैलं ग्राह्यं जले पक्का तिलवद्वा प्रपीड्य च॥
तस्योपयोगो बालानां यावद्वर्षाणि द्वादश।
लिह्यादेरण्डतैलेन कुष्ठं त्रिकटुकान्वितं॥

दीपनत्वाच्च शमयतीति अत्र नागरगुड़सैन्धवादीनां भिन्नकार्य्याणां दोषदेहधातुबलकालवयोरवस्थान्तरविकारापेचया व्यवस्थित विकल्पः। हरीतकीनिर्द्देशामलकविभीतकयोरपि गुणनिर्द्देशमाह। शीतमिति सतिक्तमधुराणि चेति प्रत्येकं हरीतक्यादिसुक्ता शक्तिर्गुणतः संयोगतः प्रभावतश्च इदानीं त्रिफलायाः प्रयोगमाह। त्रिफलेति दोषशब्दोऽत्र त्रिदोषवचनो व्याधिवचनो वा मूर्च्छिता संयुक्ता॥१३॥

वैरेचनानि सर्व्वानीति चतुरङ्गुलात् किरमालकात् समुद्धृत्य फलमिति शेषः सिकतायां वालुकायां निधापयेन्निचिपेत्। सप्ताहमिति सम्बन्धः अतोऽस्मात् चतुरङ्गुलफलात्। लिह्यादिति अयं योगो वातकफप्रशमनः। एरण्डतैलमिति त्रिगुणेन त्रिफलाक्वाथेन युक्तं तथा चीररसाभ्यां युक्तमिति सम्बन्धः रसो मांसरसः बालादिषु योजितमेरण्डतैलं विरेचयेदिति सम्बन्धः फलानामिति सौधं सेहुण्डभवं कर्म्मविभ्रमात् कर्म्मविज्ञानात् दोषाणां सञ्चयमिति सम्बन्धः आशुवशीघ्रमेव। महत्या इति महतीपञ्चमूलो विल्वादिका बृहत्योरिति स्थूलबृहती लघुबृहती चेति द्वे बृहत्यौ एकश इत्यादि एकीकृत्याहारेषु विशोधयेत् न ज्वलदग्नौ पाक-

सुखोदकञ्चानुपिबेदेष दोषो विरेचयेत्।
एरण्डतैलं त्रिफलाक्काथेन द्विगुणेन तु॥
युक्तं पीतं तथाक्षीररसाभ्यान्तु विरेचयेत्।
बालवृद्धक्षतक्षीणसुकुमारेषु योजितं।
फलानां विधिरुद्दिष्टः॥ १४॥
क्षीराणां शृणु सुश्रुत॥
विरेचनानां तीक्ष्णानां पयः सौधं परं मतं।
अज्ञप्रयुक्तं तद्धन्ति विषवत्कर्मविभ्रमात्॥
विजानता प्रयुक्तन्तु महान्तमपि सञ्चयं।
भिनत्त्याश्वेव दोषाणां रोगान् हन्ति च दुस्तरान्॥
महत्याः पञ्चमूल्यास्तु वृहत्योश्चैकशः पृथक्।
कषायैः समभागन्तु तदङ्गारैर्विशोषितं॥
अम्लादिभिः पूर्ववत्तु प्रयोज्यं कोलसम्मितं।
महावृक्षपयःपीतैर्वा गस्तखण्डलैः कृता॥
पीता विरेचयत्याशु गुडेनोत्कारिका कृता।
लेहो वा साधितः सम्यक् स्नुहीक्षीरसिताघृतैः॥

खरताभयात् ततसेहुण्डदुग्ध पृथक्कषायेः समं भागं ग्राह्यं एतेन पञ्चमूली वृहतीकषायाणां समभागाः अष्टमस्तु सेहुण्डदुग्धस्य अम्लादिभिः काञ्जिकमस्तु सुरादिभिः पूर्ववत् लिहत्कोलसम्मितं कर्षप्रमाणं। महावृक्षेति महावृक्षः सेहुण्डः पीतैर्भावितैः। गुडे चेत्यादि, गुडे च कृता उत्कारिका विरेचयतीति सम्बन्धः। उत्कारिका लपिसिका तस्याः कल्पना गोधूमान् भावयित्वा स्नुहीक्षीरेण चूर्णीकृत्य घृतक्षीरादिभिः संयावत् उत्कारिका पचनीया गुडेन। लेह इति लेहस्य कल्पना कथ्यते स्नुहीक्षीर-भावितस्य गोधूमचूर्णस्य लेहः साध्य अन्ये तु स्नुहीक्षीरसिताघृतैरिति

भावितास्तु स्नुहीक्षीरे पिप्पल्यो लवणान्विताः ।
चूर्णं काम्पिल्लकं वापि तत्पीतं गुटिकीकृतं ॥ १५ ॥
सप्तला शङ्खिनी दन्ती त्रिवृदारग्वधं गवां ।
मूत्रेणाप्लाव्य सप्ताहं स्नुहीक्षीरे ततः परं ।
कीर्णं तेनैव चूर्णेन माल्यं वसनमेव च ॥
आघ्रायाहृत्य वा सम्यक् मृदुकोष्ठो विरिच्यते ।
क्षीरत्वक्फलमूलानां विधानैः परिकीर्त्तितैः ॥
अवेक्ष्य सम्यग्रोगादीन् यथावदुपयोजयेत् ।
त्रिवृच्छ्यामा मितास्तिस्रस्तिस्रश्च त्रिफलात्वचः ॥
विडङ्गपिप्पलीक्षारशाणास्तिस्रश्च चूर्णिताः ।
लिह्यात् सर्पिर्मधुभ्याञ्च मोदकं वा गुड़ेन वा ॥
भक्षयेन्निष्परीहारमेतत् श्रेष्ठविरेचनं ।
गुल्मान् प्लीहोदरं कासं हलीमकमरोचकं ॥

पठन्ति तन्मते पयोऽप्युत्कारिकायामिवानुक्तमपि लेहे देयं लेहो विरेचयतीत्यत्राप्यनुवर्त्तते । भाविता इति, विरेचयतीत्यत्राप्यनुवर्त्तते । चूर्णमिति तत्पीतं स्नुहीक्षीरभावितं अत्रापि विरेचयतीत्यनुवर्त्तते ॥ १४ ॥ १५ ॥

सप्तलेति सप्तलासेहुण्डभेदः शङ्खिनीयवतिक्ता तस्याः फलं मूलञ्च विरेचकं अन्ये शङ्खिनीयवतिक्ताभेदमित्याहुः । इतीदं, अपरेतु श्वेतबुह्मामाहुः, दन्तीदन्तिनी, आरग्वधःकिरमालकः, आप्लाव्य भावयित्वा, कीर्णमवचूर्णितं, तेनैव सप्तलादिचूर्णेन, माल्यं पुष्पं आघ्राय शिरसिष्ठत्वा तेनैव चूर्णेन कीर्णं भावितं वसनं वस्त्रमाहृत्यपरिधाय मृदुकोष्ठो विरिच्यतमान्य इत्यर्थः । क्षीरत्वगिति, शाणःकर्षचतुर्थभागः अनुक्तानुपातेषु प्रयोगकल्पानिहिंशन्नाह । इतेष्विति भक्ष्यं मोदकशष्कुल्यादि, अन्नं भक्तादि, अपरमतिः मतिप्रधानबुद्धिः, क्षीरमिति यन्त्रादिपीड़ितद्रव्यं, रसः स्वरस उच्यते । यः

कफवातकृतांश्चान्यान् व्याधीनेतद्व्यपोहति।
घृतेषु तैलेषु पयःसु चापि मद्येषु मूत्रेषु तथा रसेषु।
भक्ष्यावलेह्येषु च तेषु तेषु विरेचनान्यग्रमतिर्विदध्यात्॥
क्षीरं रसः कल्कमथो कषायः शृतश्च शीतश्च तथैव चूर्णं।
कल्पाः षडेते खलु भेषजानां यथोत्तरं ते लघवः प्रदिष्टाः॥१९॥

पञ्चचत्वारिंशत्तमोऽध्यायः।

अथातो द्रवद्रव्यविधिमध्यायं व्याख्यास्यामः।

पानीयमान्तरीक्षमनिर्द्देश्यरसममृतं जीवनं तर्पणं

पिण्डस्यार्द्रपिष्टानां सकल्कः परिकीर्त्तितः, वह्नौ तु क्वथितं द्रव्यं शृतमाहुः चिकित्सकाः उपोषितं निशायान्तुसोयस्थं शीतमुच्यते चूर्णमुष्णेन संपृक्तं तत्फाण्टमभिधीयते। अभिभूयाम्बुनोष्णेन घनात् पूतमितीतरे फाण्ट-लक्षणन्तु प्रसङ्गादुक्तं कषायो द्विविधः शृतकषायः शीतकषायश्च ते तु षट्-कल्पा भवन्ति कल्पो विधेयः। अन्ये त्वेवं पठन्ति चूर्णं कषायः शिशिरः शृतश्च फाण्टश्च कल्कः स्वरसस्तथैव। षड्वैव कल्पाः खलुभेषजानां यथोत्तरं गुरवः प्रदिष्टा इति ते तु स्वरस एव क्षीरमन्तर्भावयन्ति फाण्टं शीतकषा-येऽन्तर्भावयन्ति॥ १९॥

इति सूत्रस्थाने निबन्धसंग्रहे चतुश्चत्वारिंशत्तमोऽध्यायः।

द्रवद्रव्याणीति पानीयक्षीरादीनि तेषां विधिर्विधानं भेद इत्यर्थः। पानीयमिति अन्तरीक्षादागतं आन्तरीक्षं न तु तत्र भवं कुतो भेषजत्वात्

धारणमाश्वासजननं श्रमश्रं क्लमपिपासामदमूर्च्छातन्द्रानिद्रा-दाहप्रशमनमेकान्ततः पथ्यतमञ्च तदेवावनीपतितमन्यतमं रसमुपलभते स्थानविशेषान्नदीनदसरस्तड़ागवापीकूपचुण्टीप्रस्रवणोद्भिदविकिरकेदारपल्वलादिषु स्थानेष्ववस्थितमिति ॥ १ ॥

तत्र जातञ्चेत्येके अनिर्द्देश्यरसं अव्यक्तरसं अप्रकटरसमित्यर्थः अल्पल्परसत्वात् न पुनस्तस्य रसो नास्ति अमृतमिति अमृतमिवेत्यर्थः अमृतत्वपुनरस्य दोषप्रकोपस्याकारणात्। अमृतं ब्रह्मरूपमित्यन्ये जीवनं प्राणधारणं, सौम्यं धातुवृद्धिकरमिति केचित् ओजोवृद्धिकरमित्यन्ये तर्पणं तृप्तिजनकं धारणमिति शस्त्रपातादिव्यथासु मूर्च्छितं शरीरं दधातीति धारणं आश्वासजननमिति मार्गादिशुष्कदेहानां प्राणजननं श्रमेत्यादिप्रशमनशब्दः श्रमादिभिः सह प्रत्येकमभिसम्बध्यते श्रमादीनां प्रशमनमित्यर्थः बह्वायासकृतं कष्टं श्रमः अल्पायासकृतः श्रमएव क्लमः, मदः पूगफलेनेव मत्तता स च विषमद्यशोणितोद्भवो विकारः, तन्द्रानिद्रयोः कफवातकृतयोरपि प्रशमनं श्रमेण। यातु स्वाभाविका निद्रा तां करोत्येव पीतं सत् तन्द्रानिद्राभेदः निद्राप्रसिद्धैव, एकान्ततः पथ्यतममिति एकान्ततोऽतिशयेनेत्यर्थः तद्धि तमः प्रत्ययः कथमुच्यते स्वार्थिकत्वात् एतेनातिशयेन पथ्यमित्यर्थः अन्येषामाकाशगुणभूयिष्ठभूमिसलिलानां पथ्यानां प्रकृष्टं पथ्यं पथ्यतमः, एकान्तग्रहणेन सर्व्वकालदेशपुरुषव्याधिषु प्रयोगोऽस्यद्योतक इत्येके तमप्रत्ययेन स्वस्थस्यातिशयेन हितमित्यभिहितमित्यपरे, तस्यानिर्द्देश्यरसस्यापि निर्द्देश्यरसत्वे कारणं निर्द्दिशन्नाह। तदिति तदेवावनीपतितं आन्तरिक्षं जलं भूमिप्राप्तं अन्यतमं मधुरादिष्वेकतमं उपलभ्यते प्राप्नोतीत्यर्थः स्थानविशेषाद्देशभेदादित्यर्थः, के पुनःस्ते स्वस्थानविशेषा इत्याह। नदीत्यादि नद्यो गङ्गाद्याः, नदाः सिन्धुशोणादयः, सरोदिव्याख्यातं, पुरुषो व्यापारकृतस्तड़ागः, तलाव इति लोके, केचिद्विपर्य्ययेणार्थमाहुः वापी इष्टकादिभिर्बद्धा ससोपानतीर्था; पुष्क-

तत्र लोहितकपिलपाण्डुपीतनीलशुक्लेष्ववनिप्रदेशेषु मधुराम्ललवणकटुतिक्तकषायाणि यथासङ्ख्यमुदकानि सम्भवन्तीत्येके भाषन्ते तत्तु न सम्यक् तत्र पृथिव्यादीनामन्योन्यानुप्रवेशकृतः सलिलरसो भवत्युत्कर्षापकर्षेण तत्र स्वगुणभूयिष्ठायां भूमावम्लं लवणञ्च। अम्बुगुणभूयिष्ठायां मधुरं तेजोगुणभूयिष्ठायां कटुकं तिक्तञ्च। वायुगुणभूयिष्ठायां कषायञ्च। आकाशगुणायामव्यक्तरसमव्यक्तं ह्याकाशमित्यतस्तत्प्रधानमव्यक्तरसत्वात् तत्पेयमान्तरीक्षालाभे॥ २॥

तत्रान्तरीक्षं चतुर्विधं। तद्यथा। धारं कारं तौषारं हैममिति। तेषां धारं प्रधानं लघुत्वात्तद्द्विविधं गाङ्गं

रिणीति लोके कूपो मृत्तिकेष्टकादिभिर्बद्धसोपानः चूण्टामबद्धकूपः अन्ये भूतागिरिपल्वलं चेत्याहुः श्रूयानद्यादि समीपे तत्कालकृता लघुकूपिका पल्वलमखातगर्त्तः प्रस्रवणमुच्चप्रदेशात् प्रस्रवज्जलस्थानं पर्वताश्रितं उद्भिदं पुनर्निम्नप्रदेशादूर्द्धोत्तिष्ठज्जलस्थानं विकिरं कलुकादिविकीर्य्यगृह्यमाणोदकस्थानं केदारः प्रसिद्धः पल्वलमानूपदेशजं तृणादिच्छन्नं सरः आदिग्रहणात् ह्रदसमुद्रादिग्रहणं परमतमाह ॥ १ ॥

तत्रेति तन्निराकृत्य स्वमतमाह। तत्त्विति तत इति जनितः। उत्कर्षापकर्षेणेति वृद्धिह्रासाभ्यां स्वलक्षणभूयिष्ठायां पृथिव्यंशगुणबहुलायां तत्र पृथिव्यम्बुगुणबाहुल्यान्मधुर इति रसविज्ञानीये उक्तस्य सामान्यविधेरुत्सर्गाख्यस्य। तत्र स्वलक्षणभूयिष्ठायां भूमावम्लमित्यादिको विशेषविधिरपवादाख्योऽत्रोक्तः अन्ये तु भूतद्वयगुणसंयोगं रसविशेषहेतुमाहुः। तथा हि तत्र स्वलक्षणोदकभूयिष्ठायां भूमौ मधुरं पृथिव्यग्निभूयिष्ठायामम्लं जलाग्निगुणभूयिष्ठायां लवणं वाय्वग्निगुणभूयिष्ठायां कटुकं पृथिव्यनिलगुणभूयिष्ठायां कषायं आकाशगुणभूयिष्ठायामव्यक्तरसं अव्यक्तमिति ॥ २ ॥

सामुद्रं चेति। तत्र गाङ्गमाश्वयुजे मासि प्रायशोवर्षति तयोर्द्वयोरपि परीक्षणं कुर्वीत शाल्योदनपिण्डमकुथित-मविदग्धं रजतभाजनोपहितं वर्षति देवे बहिस्कुर्वीत स यदि मुहूर्त्तं स्थितस्तादृशएव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्णान्यत्वे सिकथक्लेदे च सामुद्रमिति विद्यात्तन्नोपादेयं। सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गवद्भवति। गाङ्गं पुनःप्रधानं तदुपाददीताश्वयुजे मासि शुचिशुक्लविततपटैकदेशच्युतमथवा हर्म्यतलपरिभ्र-ष्टमन्यैर्वा शुचिभिर्भाजनैर्गृहीतं सौवर्णे राजते मृन्मये वा पात्रे निदध्यात्तत्सर्वकालमुपयुञ्जीत तस्यालाभे भौमं।

धाराभिः पततीति धारं करोवर्षो पलास्तेषां तोयं कारं तौषारं यत् मवश्यायजं शिशिराजलं तदेव संहतावयवत्वेन स्फटिकशिलाश-कलसदृशावयवं हिमं तद्भवं हैमं। तदिति गाङ्गमाकाशाधिष्ठानं सामुद्रं पुनरब्ध्यधिष्ठानं। यदेति एतेन गाङ्गमाश्वयुजएव गृहीतव्यं न भाद्रपदेमासोत्युक्तं भवति। तयोरिति तयोर्गाङ्गसामुद्रयोरित्यर्थः कथं परीक्षणमित्याह। शाल्योदनेति अविदग्धं अविवर्णं रूप्यमये भाजने अस्त-र्थे सामुद्रनीयं विनाशाल्यन्नं न कोथनेति दिनस्य रात्रेश्च पञ्चदशो भाग मुहूर्त्तः। अवगन्तव्यं ज्ञातव्यमित्यर्थः। वर्णान्यत्वे इति क्लेदः कोथ तन्नोपादेयमिति दोषवत्वात्। सामुद्रमिति एतेन सामुद्रस्यानुपादेयस्यापि कदाचिद्देवोपादेयता दर्शिता। गाङ्गमिति आन्तरीक्षस्य ग्रहणोपायं दर्शयन्नाह। शुचीति शुचिरनुपहतः हर्म्यतलपरिभ्रष्टमिति धवलगृहो-परिभूमिकायाः सकाशादधः पतद्गृहीतं तदिति कौपमित्यादिकं सर्वं प्रागेव व्याख्यातं तच्चेति तत्र वर्षाशब्दो वर्षान्ते अश्वयुजे वर्त्तते न तु भाद्र-पदे तत्रान्तरीक्षजलस्य निषिद्धत्वात् तदुक्तं। वलाहकायाः सदा कीटालुताश्च खेचराः। तद्विषोत्सर्गसंसर्गाद्ग्राह्यं तत्तदाजलं। तर्हि

तत्राकाशगुणबहुलं तत्पुनः सप्तविधं तद्यथा कौपं नादेयं सारसं ताड़ागं प्रास्रवणमौद्भिदं चौण्ट्यमिति तत्र वर्षास्वान्तरिक्षमौद्भिदं वा सेवेत महागुणत्वात् शरदि सर्वं प्रसन्नत्वात् हेमन्ते सारसं ताड़ागं वा वसन्ते कौपं प्रास्रवणं वा ग्रीष्मेष्वेवं प्रावृषि चौण्ट्यमनवमनभिवृष्टं सर्वं चेति ॥ ३ ॥

कीटमूत्रपुरीषाण्डशवकोथप्रदूषितं ।
तृणपर्णोत्करयुतं कलुषं विषसंयुतं ॥
योऽवगाहेत वर्षासु पिवेद्वापि नवं जलं ।
स वाह्याभ्यन्तरान् रोगान् प्राप्नुयात क्षिप्रमेव तु ॥ ४ ॥

भाद्रपदे किं पातव्यं अत्रोच्यते भाद्रपदे मासि आकाशगुणभूयिष्ठभूयान्तरिक्षमान्तरिक्षवद्भवति इति तत्पयःपेयमिति अन्ये पुनस्तमानवरतमर्थां भाद्रपदे पाययन्ति स्वस्थापितं माहेन्द्रं वा अन्येतु वर्षास्वान्तरिक्षमौद्भिदं कौपं वेति पठन्ति तच्च कौपं विदाहपरिहारार्थं स चौद्रं पेयमिति व्याख्यानयन्ति । शरदि सर्वं पातव्यमिति शेषः प्रसन्नत्वादिति प्रसन्नत्वं निर्दोषत्वमगस्त्योदयात् । प्रावृषि चौण्ट्यमनवमनभिवृष्टमवं वेति अनवं पुरातनं तच्च सारसं तड़ागं वा अनभिवृष्टा अनभ्रं तच्च कौपं । परं यत्र न वृष्टो देवः सर्व्वमेव वा पातव्यं यदि संस्कृतं भवेत् क्वथनादिभिः सर्व्वत्रैवाभिनवस्य जलस्य प्रविष्टत्वात् अन्ये तु अनवमित्यस्य स्थाने अनभिनवमिति पठन्ति अत्रापि स एवार्थः । ३ ॥

इदानीं नवस्य सलिलस्य वाह्याभ्यन्तरप्रयोगे वाह्याभ्यन्तरानेव च रोगान्निर्दिशन्नाह ॥ कीटेति कीटादिभिः सह कोथशब्दः प्रत्येकमभिसम्बध्यते । कोथः शटितत्वं कीटाः सविषा वृश्चिकादयः शवो मृतप्राणिशरीरं प्रदूषितं विकृतीकृतं तृणपर्णोत्करयुतमिति तृणपर्णानामुत्करः घनस्तबकेन युतं कलुषं मलिनं विषसंयुतमिति स्थावरजङ्गमवि-

तत्र यत् शैवालपङ्कहटतृणपद्मपत्रप्रभृतिभिरवच्छन्नं शशिसूर्य्यकिरणानिलैर्नाभिजुष्टं गन्धवर्णरसोपसृष्टञ्च तद्व्यापन्नमिति विद्यात्। तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकदोषाः षट् सम्भवन्ति। तत्र खरता पैच्छिल्यमौष्ण्यं दन्तग्राहिता च स्पर्शदोषः। पङ्कसिकताशैवालवहुवर्णता रूपदोषाः। व्यक्तरसता रसदोषः। अनिष्टगन्धता गन्धदोषः। यदुपयुक्तं तृष्णागौरवशूलकफप्रसेकानापादयति स वीर्य्यदोषः। यदुपयुक्तं चिराद्विपच्यते विष्टभ्नाति वा स विपाकदोष इति त एते आन्तरिक्षे न सन्ति। व्यापन्नानामग्निक्वथनं सूर्य्यातपप्रतापनं तप्तायःपिण्डसिकतालोष्टाणां

यक्तमिति। वर्षास्विति आश्वयुजं विहाय आषाढ़श्रावणभाद्रपदा गृह्यन्ते वर्षाशब्दोऽयं प्रावृषिवर्षासु च वर्त्तते। तदाहवर्षासु चतुरो मासान् मालावदुदकं पिवेत्। वाह्याभ्यन्तरान् रोगानिति वाह्याः कुष्ठादयः आभ्यन्तरास्तु ज्वरादयः। ते च यथासंख्यमवगाहपानाभ्यां ज्ञेयः॥ ५॥

व्यापन्नलक्षणमाह। तत्रेति पङ्क. कर्द्दमः शैवलं शैवालं हटोजलकुम्भिका अभूमिलग्नमूलस्तृणविशेष इत्येके अवच्छन्नमाच्छादितं नाभिजुष्टं न स्पृष्टं संयुतं व्यापन्नं दोषाक्रान्तं। तस्येति तानेव षड्दोषान्निर्द्दिशन्नाह। तत्रेति उष्णं भूवाष्पजनित न पुनरग्न्यातपकृतं। दन्तग्राहिता अतिशीतताभिप्रेता। पङ्केति सिकता वालुका अनिष्टेति अनिष्टगन्धताविस्रादिगन्धता। व्यक्तेति व्यक्तरसता रसनेन्द्रियग्राह्यमधुरादिरसता। यदुपयुक्तमिति कफप्रसेकः श्लेष्मस्रवणं वीर्य्यं चिन्त्याचिन्त्यक्रियाहेतुः चिन्त्याचिन्त्यस्थाने शैत्यौष्ण्य इति पुस्तकान्तरे। यदुपयुक्तमिति विष्टम्भो गुड़गुड़ाशब्दः। तत्र इति एते पूर्व्वोक्ताः षड्दोषा आन्तरिक्षे इत्यस्योपलक्षणत्वादाकाशगुणभूयिष्ठेऽपि न सम्भवन्ति व्यापन्नस्य प्रसन्नतोपायं दर्शयन्नाह। व्यापन्नस्येति

वा निर्वापनं प्रसादनञ्च कर्त्तव्यं नागचम्पकोत्पलपाटला-
पुष्पप्रभृतिभिश्चाधिवासनमिति ॥ ५ ॥

सौवर्णे राजते ताम्रे कांस्ये मणिमये तथा।
पुष्पावतंसे भौमे वा सुगन्धि सलिलं पिवेत् ॥
व्यापन्नं वर्जयेन्नित्यं तोयं यच्चाप्यनार्त्तवं।
दोषसञ्जननं ह्येतन्नाददीताहितन्तु तत् ॥
व्यापन्नं सलिलं यस्तु पिवतीहाप्रसाधितं।
श्वयथुं पाण्डुरोगञ्च त्वग्दोषमविपाकतां ॥
श्वासकासप्रतिश्यायशूलगुल्मोदराणि च।
अन्यान् वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव च ॥ ६ ॥

तत्र सप्तकलुषस्य प्रसाधनानि भवन्ति। तद्यथा। कतक-
गोमेदकविसग्रन्थिशैवालमूलवस्त्राणि मुक्तामणिश्चेति। पञ्च

अग्निक्वथनं महादोषदुष्टस्य सूर्य्यातपतापनमल्पदोषे तप्तायः पित्तादिनि-
र्वापणं मध्यदोषे लोष्ट्रनिर्वापणं मध्यदोषे विधापनं जलनिःक्षेपणमि-
त्यर्थः, प्रसादनञ्च कर्त्तव्यमिति अग्निक्वथनादिस्वरूपं प्रसादनं नान्यत्,
गन्धापनयने उपायमाह। नागेत्यादि नागो नागकेशरःचम्पको राज-
चम्पकः उत्पलं सौगन्धिकं प्रभृतिग्रहणात् केतकीमल्लिकादिपुष्पाणि
तदुक्तं ॥ ५ ॥

गुणवदपि किमयः पात्रस्थं पेयमित्याह। सौवर्णे इति पुष्पावतंसं पुष्प-
सुगन्धीकृतं, व्यापन्नादिवर्ज्जनमाह। व्यापन्नमिति अनार्त्तवमिति कल्प-
विशेषानुपयोग्यं अन्यतु दृष्ट इति केचित् अप्रसाधितमिति क्वथनाद्य
संस्कृतं ॥ ६ ॥

सप्तकलुषस्येति कतकं शशकपुरीषप्रतिमफलं गोमेदकः पुष्परागभौममणि
मत्कोलमिति केचित् विसग्रन्थिः पद्ममूलं शैवालमूलं प्रसिद्धं मुक्ता मौक्तिकं

निक्षेपणानि भवन्ति। तद्यथा। फलकं त्र्यष्टकं मुञ्जवलय-
उद‥मञ्चिकाशिक्यञ्चेति। सप्त शीतीकरणानि भवन्ति
प्रवातस्थापन‥कप्रक्षेपणं यष्टिकाभ्रामणं व्यजनं वस्त्रोद्धरनं
वालुकाप्रक्षेपणं शिक्यावलम्बनञ्चेति।

निर्गन्धमव्यक्तरसं तृष्णाघ्नं शुचि शीतलं।
अच्छं लघुच हृद्यञ्च तोयं गुणवदुच्यते ॥ ७ ॥

तत्र नद्यः पश्चिमाभिमुखाः पथ्या लघूदकत्वात्। पूर्वा-
भिमुखास्तु न प्रशस्यन्ते गुरूदकत्वात्। दक्षिणाभिमुखा
नाऽतिदोषलाः साधारणत्वात्। तत्र सह्यप्रभवाः कुष्ठं

मणिः स्फटिकादिः एतेनरूपदोषापनयनोपायो दर्शितः अन्ये तु विसग्रन्थि इत्यस्याग्रे पर्णीमूलमिति पठन्ति तत्र पर्णीपानीयपृष्ठजातस्य मूलं जटा। पञ्चनिक्षेपणानीति निक्षेपणं यत्र जलं निक्षिप्यते स्थाप्यते तेन भूम्यादिस्पर्शा-भावाद्दोषान्तरानुदयफलकं शाल्मलीकाष्ठादिविरचितं त्र्यष्टकं अष्टास्रय-दण्डावयसं‥गः मुञ्जवलयः मुञ्जादिविरचितो वलयाकारः उदकमञ्चिका आकाशान्तराले निरन्तरनिहितवेत्र वेत्रवैणवादिविरचिता वेत्रग्रहाग्र-भिधानाशिक्यं मुञ्जादिविरचितं प्रसिद्धं सप्तेत्यादि उदकप्रक्षेपणमिति सलिलपूर्णे भाजने वस्त्रादिपीड़िते आकण्ठमपरशीतसलिलनिक्षेपः, यष्टिका भ्रामणं यन्त्रयष्ट्यादिभ्रामणं व्यजनमिति व्यजनादिनावातलीकरणं वस्त्रो-द्धरणं वस्त्रेण गलणं वालुकाप्रक्षेपणं उदकपात्रस्य वालुकामध्ये निक्षेपणं शिक्यावलम्बनं प्रसिद्धं कीदृशं पुनरुपादेयं भौममित्याह। निर्गन्धेत्यादि-शुचि अनुपहतं लघुचेति चकारात् समस्तगुणवत्त्वे अत्यन्तगुणकारि अल्प-गुणत्वे तु अल्पगुणकारीति तारतम्यसूचकः। हृद्यञ्चेत्यत्र तु क्वथितजलस्य हृदयाप्रियत्वेऽप्युपग्रहणार्थं गुणवत् प्रशस्तगुणोपेतं ॥ ७ ॥

इदानीं जाङ्गलपश्चिमदेशस्थानूपपूर्व्वदेशस्थसाधारणमध्यदेशस्थानां नदीनां गुणान्निर्द्दिशन्नाह। तत्र नद्य इति पश्चिमाभिमुखा जाङ्गल-

जनयन्ति विन्ध्यप्रभवाः कुष्ठं पाण्डुरोगञ्च मलयप्रभवाः क्रमीन् महेन्द्रप्रभवाः श्लीपदोदराणि हिमवत्प्रभवा हृद्रोग-श्वयथुशिरोरोगश्लीपदगलगण्डान्। प्राच्यावन्त्या अपरा-वन्त्या श्चार्शांस्युपजनयन्ति पारिपात्रप्रभवाः पथ्या बलारोग्य-कर्य्य इति ॥ ८ ॥

नद्यः शीघ्रवहा लघ्व्यः प्रोक्ता याश्चामलोदकाः ।
गुर्व्यः शैवालसञ्छन्ना कलुषा मन्दगाश्च याः ॥
प्रायेण नद्यो मरुषु सतिक्ता लवणान्विताः ।
ईषत्कषाया मधुरा लघुपाकाबले हिताः ॥

पश्चिमदेशस्थाः पश्चिमसमुद्रगाः पूर्वाभिमुखा आनूपपूर्वसमुद्रगाः दक्षिणा-भिमुखा मध्ये देशस्थाः। शैलादिभेदेन गुणान्निर्दिशन्नाह। कुष्ठमिति मलयप्रभवा इति मलयप्रभावाहिनद्यो द्विविधा भवन्ति। पाषाणसिक-तावाहिन्य अपाषाणसिकतावाहिन्यश्च तत्र पाषाणसिकतावाहिन्यश्च पथ्याः अपाषाणसिकतावाहिन्यः क्रमीन् जनयन्ति। हिमवत्प्रभवा इति ता अपि द्विविधाः हिमवदुपरिभागप्रभवाः पथ्याः अधोभागप्रभवास्तु हृद्रोगादिहेतवः। विशिष्टदेशाश्रितपर्वतप्रभवाणां नदीनां सलिलगुणं दर्शयन्नाह। प्राच्येति अवन्ती उज्जयिनी तयोपलक्षितोदेशः तस्य पूर्वस्यां जाताः प्राच्यावन्त्याः पश्चिमस्यां जाता अपरावन्त्याः शैलास्तेषु या नद्यः एतेन विशिष्टदेशाश्रितपर्वते प्रभवाणां नदीनां सलिलगुण उक्तः उज्जयि-न्युपलक्षिते देशे याः प्राचीं पश्चिमांश्चाभिमुखं यान्ति ताः प्राच्यावन्त्याः अप-रावन्त्याश्च न तु उज्जयिनी प्रभवेषु पर्व्वतेष्वित्यन्ये अयमर्थो गयदासेन दूषितः। पारिपात्रेति पारिपात्रः पर्व्वतभेदः तत्र प्रभवानद्यो द्विविधाः तड़ागजाः पथ्याः दरीजा दोषलाः ॥ ८ ॥

नदीनां रूपसाधारणशैलाश्रयाणां सर्वासामेव शोषीभूतं विशेषं दर्शय-न्नाह। नद्य इति इदानीं विशिष्टदेशप्रभवाणां नदीनां गुणविशेषं

तत्र सर्व्वेषां भौमानां ग्रहणं प्रत्यूषसि तत्र ह्यमलत्वं शैत्यञ्चाधिकं भवति स एव चापां परो गुण इति॥ ९

दिवार्क्किरणैर्जुष्टं निशायामिन्दुरश्मिभिः।
अरूक्षमनभिष्यन्दि तत्तुल्यं गगनाम्बुना॥
गगनाम्बु त्रिदोषघ्नं गृहीतं यत्सुभाजने।
बल्यं रसायनं मेध्यं पात्रापेक्षि ततः परं॥
रक्षोघ्नं शीतलं ह्लादि ज्वरदाहविषापहं।
चन्द्रकान्तोद्भवं वारि पित्तघ्नं विमलं स्मृतं॥

दर्शयन्नाह प्रायेणेति मरुषु प्रसिद्धेषु मरुदेशेषु न तु जाङ्गलशब्दाभिहितेषु पौरुषे या ह्रस्य इत्यर्थः अन्ये तु ईषत्कषाया मधुरा लघुपाकावलेहितादति पठन्ति भौमानां दिनापेक्षं ग्रहणकालं नियमयन्नाह। तत्रेति प्रत्यूषसि प्रभाते स चापां परोगुण इति स च शैत्यामलत्वलक्षणोऽपां परमो गुण इत्यर्थः अन्ये तु शैत्यं चापां परोगुण इति पठन्ति तत्र चकारोऽमलसूचनार्थः तत्र भौमानामर्क्कसोमकरसंस्कारजगुणेनान्तरिक्षतुल्यत्वं तद्लाभे उपादानायाह॥ ९॥

दिवार्क्किरणैरिति अर्क्कग्रहणे सिद्धे दिवाग्रहणं समस्तदिनप्राप्त्यर्थं किरणग्रहणं दुर्द्दिनव्युदासार्थं दिवानिशीतिवचनात् सरोऽपि चन्द्रार्क्ककरसम्बन्धं सत्यप्यर्के चन्द्रसम्बन्धारूक्षं सत्यपि चन्द्रेऽर्क्कसम्बन्धादनभिष्यन्दिदोषान् व्याधीन् झटीति यदभिष्यन्दते उत्पादयति तदभिष्यन्दि विपर्य्ययेणानभिष्यन्दि निशाग्रहणं समस्तरात्रिप्राप्त्यर्थं यद्यपि पौर्णमास्यामेव सकलरात्रौ सम्बन्धो नान्यासु तथापि एकयापि पौर्णमास्याऽरा-त्रतिशयी संस्कारः कृतः अन्यास्वप्यनुवर्त्तते एतेनातिशीतोष्णस्निग्धरूक्षं निन्दितमित्युक्तं भवति। किं गुणं पुनर्गगनाम्बु येनैव तुल्यमुच्यते इत्याह। गगनाम्बु त्रिदोषघ्नमिति बल्यमुपचयौजःशक्तिकरत्वात् विशिष्टरसाद्युत्पादनात् रसायनं जराातुरोपयोगि मेध्यं पवित्रं पात्रा-

मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये।
भ्रमक्लमपरीतेषु तमके वमथौ तथा॥
ऊर्द्ध्वगे रक्तपित्ते च शीतमम्भ: प्रशस्यते।
पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे॥
आध्माते स्तिमिते कोष्ठे सद्य:शुद्धे नवज्वरे।
हिक्कायां स्नेहपीते च शीताम्बु परिवर्जयेत्॥ १०॥
नादेयं वातलं रूक्षं दीपनं लघु लेखनं।
तदभिष्यन्दिमधुरं सान्द्रं गुरु कफावहं॥
तृष्णाघ्नं सारसं वल्यं कषायं मधुरं लघु।
ताड़ागं वातलं स्वादु कषायं कटुपाकि च॥

पेचि तत: परमिति अतिश्लेष्मभाजने गृहीतमधिकं गुणं करोतीत्यर्थ: अन्ये तु मध्यस्थाने शीतमिति पठन्ति पूर्वं दोषशमनादिनोक्तं अधुना अगस्त्योदयदर्शनविशेषभावादुक्तं चन्द्रकान्तमणिप्रभवजलस्य गुणमाह। रक्षोघ्नमिति रक्षोघ्नं राक्षसभयहरं ह्लादि सुखावहं चन्द्रकान्तोद्भवमिति चन्द्रकान्तिमणिप्रभं इदन्तु चन्द्रकिरणानुप्रवेशात्तापसंमणिप्रादुर्भूतलघ्नौममित्युभयात्मकं। शीतोष्णविषयमाह। मूर्च्छेति पित्तोष्णदाहेष्विति उष्णे शरदि ग्रीष्मे च मदात्यये मदविकारे भ्रमश्चक्रारूढ़स्येव परीतेषु युक्तेषु तमक: श्वासो मोहोवा वमथौ छर्द्दिरोगे। पार्श्वेति स्तिमिते कोष्ठे आमकोष्ठे इत्यर्थ:। सद्य: शुद्ध इति यस्मिन् दिने शोधनं कृतं तत्रेत्येके अपरे तु सप्ताहमित्याहु:। तदुयथौष्णं य सर्वदोष उक्त: तथा व्यवस्थया व्यवहारत्वेनोपादेयं अन्ये तु पूर्वमौष्णं य भूवाष्पजनितमेव दोषत्वेनोक्तं इदन्त्वग्न्यातपक्वतमिति समादधति॥ १०॥

समस्तनदीनां शेषगुणमाह। नादेयमिति द्विविधं कौपं सक्षारमव्यक्तरसञ्च यत् सक्षारं तत्पित्तलं इतरत्त्वपित्तलं मधुरमिति आनूपधन्वसाधारणगुणान्निर्द्दिशन्नाह। अनेकेति अत्र सर्व्वरूपरसगन्धवीर्य्यवि-

वातश्लेष्महरं वाप्यं सक्षारं कटु पित्तलं।
सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु॥
चौण्ट्यमग्निकरं रुक्षं मधुरं कफकृन्न च।
कफघ्नं दीपनं हृद्यं लघु प्रस्रवणोद्भवं॥
मधुरं पित्तशमनमविदाह्यौद्भिदं स्मृतं।
वैकिरं कटु सक्षारं श्लेष्मघ्नं लघु दीपनं॥
कैदारं मधुरं प्रोक्तं विपाके गुरु दोषलं।
तद्वत् पाल्वलमुद्दिष्टं विशेषाद्दोषलन्तु तत्॥
सामुद्रमुदकं विस्रं लवणं सर्वदोषकृत्।
अनेकदोषमानूपं वार्य्यभिष्यन्दि गर्हितं॥
एभिर्दोषैरसंयुक्तं निरवद्यन्तु जाङ्गलं।
पाके विदाहि तृष्णाघ्नं प्रशस्तं प्रीतिवर्द्धनं॥
दीपनं स्वादु शीतञ्च तोयं साधारणं लघु।
कफमेदोऽनिलामघ्नं दीपनं वस्तिशोधनं॥
श्वासकासज्वरहरं पथ्यमुष्णोदकं सदा।
यत्क्वाथ्यमानं निर्वेगं निःफेनं निर्मलं लघु॥
चतुर्भागावशेषन्तु तत्तोयं गुणवत् स्मृतं।
न च पर्य्युषितं देयं कदाचिद्वारि जानता॥
अम्लीभूतं कफोत्क्लेशि न हितं तत्पिपासवे॥११॥

पाकाः सगुणा दोषा ज्ञेयाः एभिरिति एभिः पूर्वोक्तैः स्पर्शादिभिरित्यर्थः पाके हि विदाही अन्नदहकारीत्यर्थः। उष्णोदकगुणमाह। कफेति पथ्यं हितं उष्णोदकमष्टावशिष्टमुदकं उष्णोदकभेदमाह—यदिति निर्वेगं निश्चलं। पर्य्युषितमुष्णोदकं न देयमित्याह। न चेति पर्य्युषितं रात्र्युषितं॥ ११॥

मद्यपानात्समुद्भूते रोगे पित्तोत्थिते तथा ॥
सन्निपातसमुत्थे च शृतशीतं प्रशस्यते ।
स्निग्धं स्वादु हिमं हृद्यं दीपनं वस्तिशोधनं ॥
वृष्यं पित्तपिपासाघ्नं नारिकेलोदकं गुरु।
दाहातीसारपित्तासृङ्मूर्च्छामद्यविषार्त्तिषु ॥
शृतशीतं जलं शस्तं तृष्णाच्छर्द्दिभ्रमेषु च।
अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये ॥
मन्दाग्नावुदरे कुष्ठे ज्वरे नेत्रामये तथा।
व्रणे च मधुमेहे च पानीयं मन्दमाचरेत् ॥ १२ ॥

इति जलवर्गः।

गव्यमाजन्तथाचौष्ट्रमाविकं माहिषञ्च यत्।
अश्वायाश्चैव नार्य्याश्च करेणूनाञ्च यत्पयः ॥

शृतशीतविषयमाह। मद्यपानादिति पूर्वं मदात्यये शीतं अत्र तु मदात्ययसमुत्थे रोगे शृतशीतं प्रशस्यते शृतशीतं मदात्यये मदात्ययसमुद्भूते रोगे चोभयस्मिन्नपि शृतशीतं प्रयोक्तव्यमित्यर्थः उदकप्रसङ्गेननारिकेलफलसलिलस्यापि गुणं निर्द्दिशन्नाह। स्निग्धमिति नारिकेलोदकं ईषत्पक्वार्द्रनारिकेलफलान्तर्वर्त्तिसलिलमित्यर्थः। जेज्जटस्तु लघ्विति पठन्ति लघुत्वञ्च शीघ्रपरिणामित्वमिच्छति। अधुना शृतशीतस्य शेषविषयमाह। दाहेति केषु रोगेषु जलं मन्दं पेयमित्याह। अरोचके इति यावत् प्रतिषेधयितुमशक्यं तावदाचरेदिति मन्दार्थः अयं पानीयवर्गोनिवन्धकारैर्विपरीतक्रमेण पठितः। एभिस्तु यथैव गुरुभिः कथितस्तथैव क्रमेण व्याख्यातः इति पानीयवर्गः॥ १२ ॥

इदानीं क्षीरस्याष्टविधां योनिमाह। गव्यमिति करेणुर्हस्तिनी अश्वायाय नार्य्याश्च करेणनाञ्चेति चकारत्रयमनुक्तसमानजातीयक्षीराणां

तत्त्वनेकौषधिरसप्रसादं प्राणदं गुरु।
मधुरं पिच्छिलं शीतं स्निग्धं श्लक्ष्णं सरं मृदु॥
सर्वप्राणभृतां तस्मात्सात्म्यं क्षीरमिहोच्यते॥ १३॥

तत्र सर्वमेव क्षीरं प्राणिनामप्रतिषिद्धं जातिसात्म्यात्। वातपित्तशोणितमानसविकारेष्वविरुद्धम्। जीर्णज्वरकासश्वासशोषक्षयगुल्मोन्मादोदरमूर्च्छाभ्रममददाहपिपासाहृद्वस्तिपाण्डुरोगग्रहणीदोषार्शःशूलोदावर्त्तातिसारप्रवाहिकायोनिरोगगर्भस्रावरक्तपित्तश्रमक्लमहरं पाप्मापहं बल्यं वृष्यं वाजीकरणं रसायनं मेध्यं सन्धानमास्थापनं वयःस्थापनमायुष्यं जीवनं बृंहणं वमनं विरेचनञ्च तुल्यगुणत्वाच्चौजसो वर्द्धनमिति बालवृद्धक्षतक्षीणानां क्षुद्व्यवायव्यायामकर्शितानाञ्च पथ्यतमम्।

समुच्चयार्थं तेनाश्वतरी खरीष्ट्रगी खड्गिनी षट्स्त्रीक्षीराणामपि ग्रहणं तत्पुनर्भूयसा लेपे युज्यते इति न क्षतं साक्षात्तुल्यं सर्वेषामेव क्षीराणां दशविधं गुणं निर्द्दिशन्नाह। तत्त्विति तत्त्वनेकौषधिरसप्रसादमिति तु शब्दः पुनरर्थे ओषधिशब्देन सर्वद्रव्याणि न तु फलपाकावसानाः रसः सारः प्रसादः क्लेदभावरहितः इति पाठान्तरं किट्टभावरहितः ओज शुक्रादिवत् एतेन शुक्लत्वं द्योत्यते शुक्लत्वस्योत्पत्तेः प्राणदं अग्निसोमादिधारणादुपचयादिकरणद्वारापिच्छिलं विशदविपरीतं श्लक्ष्णखरविपर्य्ययः एवमित्थं क्षीरं दशगुणयुक्तं भवति जेज्जटस्तु तत्त्वनेकौषधिप्रसादः क्षीरतान्ततः सर्वप्राणभृतां तस्मात् सात्म्यं क्षीरमिहोच्यते इति तदुच्यते सर्वेषामेव समानगुणानां समानकर्म्मनिर्द्दिष्टुमाह॥ १३॥

तत्रेत्यादि सर्वमष्टविधमपीत्यर्थः प्राणिनां जरायुजातानां जातिसात्म्यान्मनुष्यादिजाति सुखकरत्वात् मानसेषु विकारेषु रजस्तमःसंसर्गजेषु

गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनं ।
रक्तपित्तहरं शीतं मधुरं रसपाकयोः ॥
जीवनीयं तथा वातपित्तघ्नं परमं स्मृतं ।
गव्यतुल्यगुणं त्वाजं विशेषाच्छोषिणां हितं ॥

जीर्णज्वरेति जीर्णशब्दमेके ज्वरेण सह संबध्नन्ति अन्ये तु क्षमान्तैर्ज्वरादिभिः सह जीर्णत्वेनैतेषु प्रायेण वातपित्तानुबन्धो भवति हरशब्दो ज्वरादिभिः सह सर्वैः क्षमान्तैः प्रत्येकमभिसम्बध्यते । कासेति कफकासं त्यक्त्वा शोषोऽत्र मुखकण्ठतालूनां, क्षयो राजयक्ष्मा, गुल्मोदरयोः वातपैत्तिकयोः मूर्च्छाभ्रममदपिपासासु कफामरहितासु हृदयदोषाणां वातपित्तप्रायाणां पाण्डुरोगेवातपित्तप्रायौ ग्रहणीप्रदोषे जीर्णावस्थायां गर्भस्रावे आमान्वयादिना रक्तपित्ते कफप्रधाने अग्निमन्दे च न देयं बल्यं मांसोपचयकरं अन्ये ओजसो वर्द्धनमिति तन्मते ओजसो वर्द्धनमिति पाठोऽग्रेण भवति वृष्यं शुक्रजनकं वाजीकरणं शुक्रप्रवर्त्तनं एतेन जनकप्रवर्त्तकमित्युक्तं रसायनं सततोपयोगात् मेध्यं मेधाजनकं पवित्रं वा पाप्मापहं पापोपशमनं विशेषतो गव्यं वयःस्थापनं जरयाविना,आयुष्यमायुषोहितं, सन्धानं भग्नस्य, वमनविरेचनास्थापनानामिति वमनं वमनद्रव्यसंयोगि विरेचनं सरत्वान्मृदुकोष्ठस्य रेचनद्रव्यसंयोगाद्विरेचनमित्यन्ये, आस्थापनं निरूहमित्यनर्थान्तरं तुल्यगुणत्वाच्चौजसो वर्द्धनमिति यावन्त एवौजसो गुणास्तावन्त एव क्षीरस्यापि तेनैतैस्तैरेवात्मगुणैस्तेषां समानानामोजसो गुणानामभिवर्द्धनं जेज्जटस्तु गव्यन्तु शीतं स्निग्धमधुरमविदाहीति पठन्ति शेषन्तु तन्मते गोक्षीरस्यैव गुणाः ॥ १४ ॥

सामान्येन क्षीरस्य गुणमभिधायगव्यस्यैवशिष्टं गुणकर्म्मनिर्द्दिशन्नाह । अल्पेत्यादि दोषधातुमलस्रोतसां मन्दक्लेदशाशिजनकमल्पाभिष्यन्दी । अजाक्षीरगुणमाह । गव्यतुल्यगुणमिति गुणशब्दस्तत्कार्य्ये फले वर्त्तते अल्पाल्पकायत्वादयः स्वरूपविशेषेण न क्षीरपथ्यत्वे हेतवः तेषामल्पकायत्वादीनामगव्यादिष्वपि सम्भवात् । अतोद्वयमेव क्षीरं पथ्यापथ्यविभागे हेतुर्जाति-

दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत्।
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात् ॥
नात्यम्बुपानाद्व्यायामात्सर्वव्याधिहरं पय:।
रूक्षोष्णं लवणं किञ्चिदौष्ट्रं स्वादुरसं लघु ॥
शोफगुल्मोदरार्शोघ्नं क्रमिकुष्ठविषापहं।
आविकं मधुरं स्निग्धं गुरु पित्तकफावहं ॥
पथ्यं केवलवातेषु कासे चानिलसम्भवे।
महाभिष्यन्दि मधुरं माहिषं वह्निनाशनं ॥
निद्राकरं शीतकरं गव्यात्स्निग्धतरं गुरु।
उष्णं चैकशफं बल्यं शाखावातहरं पय: ॥
मधुराम्लरसं रूक्षं लवणानुरसं लघु।
नार्य्यास्तु मधुरं स्तन्यं कषायानुरसं हिमं ॥
नस्याश्च्योतनयो: पथ्यं जीवनं लघु दीपनं ॥ १५ ॥

विशेषो भ्रमणविशेषश्च, सर्वव्याधिहरं सर्वदोषहरं, इदानीमौष्ट्रक्षीरगुण-माह। रूक्षेत्यादि आविकक्षीरगुणमाह। आविकमिति कफावहं कफकरं केवलवातेष्विति केवलेष्वनावृतेषु असंयुक्तेष्वपीत्यर्थ:। अन्ये त्वेवं पठन्ति आविकं मधुरं स्निग्धमुष्णं पित्तकफावहं गुरुसिद्धेऽनिले पथ्यं सेकश्चानिल-शोणिते। शुद्धेऽनिले अनावृते अनिलशोणिते रक्ते वाते वासेक: परिषेक: महिषीक्षीरमाह। महेत्यादिदोषधातुमलस्रोतसामतिशयेन क्लेदप्राप्तिज-नकं महाभिष्यन्दि गव्यात् स्निग्धतरं गोक्षीरात् स्निग्धतरमित्यर्थ: अश्वादि-क्षीरमाह। उष्णमिति एकशफा अश्वादय:, शफ: खुर: शाखावाहु जङ्घे तद्वातहरमित्येके शाखारक्तादयो धातव इत्येके काञ्जिकस्येव प्रभावादा-धारप्रभावाच्च शाखायां हन्ति कोष्ठे करोतीत्यामनन्ति। मानुषं क्षीरमाह। नार्य्यास्त्विति आश्च्योतनमक्षिपूरणं ॥ १५ ॥

हस्तिन्या मधुरं वृष्यं कषायानुरसं गुरु॥
स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनं।
प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीतलं॥
रात्रौ सोमगुणत्वाच्च व्यायामाभावतस्तथा।
दिवाकराभितप्तानां व्यायामानिलसेवनात्॥
वातानुलोमि श्रान्तिघ्नं चक्षुष्यं चापराह्णिकं।
पयोऽभिष्यन्दि गुर्वामं प्रायशः परिकीर्त्तितं॥
तदेवोक्तं लघुतरमनभिष्यन्दि वै शृतं।
वर्जयित्वा स्त्रियाः स्तन्यमाममेव हि तद्धितं॥
धारोष्णं गुणवत् क्षीरं विपरीतमतोऽन्यथा।
तदेवातिशृतं सर्वं गुरु बृंहणमुच्यते॥
अनिष्टगन्धमम्लञ्च विवर्णं विरसञ्च यत्।
वर्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत्॥ ११॥

इति क्षीरवर्गः।

हस्तिनीक्षीरमाह। हस्तिन्या इति स्थैर्य्यकरं शरीरदार्ढ्यकरं अन्ये तारुण्यस्थापकमित्याहुः, प्राभातिकं क्षीरमाह। प्राय इति विष्टम्भी गुड़गुड़ाशब्दः। अपराह्णिक क्षीरमाह। दिवाकरेति अपराह्णो दिवान्तभागः वृद्धानुमतौ पाठाविमौ आमक्षीरमाह। पय इति पक्वस्य गुणमाह। तदिति शृतं पक्वं आवर्त्तितमित्यर्थः, अनभिष्यन्दि किञ्चिदभिष्यन्दि इत्यर्थः। स्त्रीक्षीरे पाकनिषेधमाह। वर्जयित्वेति स्त्रियाः स्तन्यं वर्जयित्वा अन्यदुग्धानि शृतान्येव हितानि भवन्ति इत्यर्थः तत्स्त्रीभवं स्तन्यं नाम क्वथितमेव हितं। तेषां सर्वक्षीराणामेव दोहनकालधारापातोत्थानां गुणविशेषं निर्द्दिशन्नाह। धारोष्णमिति गुणवद् गुणान्वितं विपरीतमगुणवत् अतोऽन्यथेति धारोष्णं यन्नभवति अतिपक्वमाह। तदिति बृंहणं देह-

दधि मधुरमम्लमत्यम्लञ्चेति तत्कषायानुरसं स्निग्ध-मुष्णं पीनसविषमज्वरातिसारारोचकमूत्रकृच्छ्रकार्श्यापहं वृष्यं प्राणकरं मङ्गल्यञ्च।

महाभिष्यन्दि मधुरं कफमेदोविवर्द्धनं।
कफपित्तकृदम्लं स्यादत्यम्लं रक्तदूषणं॥
विदाहि सृष्टविण्मूत्रं मन्दजातं त्रिदोषकृत्।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनं॥
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदं।
दध्याजं कफपित्तघ्नं लघु वातक्षयापहं॥
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनं।
विपाके मधुरं वृष्यं वातपित्तप्रसादनं॥
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषं।
विपाके कटु सक्षारं गुरु भेद्यौष्ट्रिकं दधि॥

वृद्धिकरं कीदृशं क्षीरं वर्ज्यमित्याह। अनिष्टेति विवर्णं शुक्लाद्वर्णान्तरमापन्नं विरसं मधुराद्न्यरसं विग्रथितं अम्लादिद्रव्यसंयोगेन तु विग्रथितावयवं यल्लोके विनष्टमिति प्रसिद्धं इति क्षीरवर्गः॥ १६॥

अथ दधिभेदानाह। दधीति एतेन त्रिप्रकारं दध्युक्तं सामान्यदधिगुण-माह। तदिति उष्णमुष्णवीर्य्यं वृष्यं शुक्रकरं माङ्गल्यं मङ्गलहेतुः अन्ये-त्वेवं पठन्ति दधि तु मधुरं सृष्टं पुरीषं गुर्व्वम्लमभिष्यन्दि श्लेष्मपित्तशोफ-वर्द्धनं कार्श्यापहं रोचनं माङ्गल्यञ्च तदेव चोद्धृतसारं ग्राह्यमनभिष्यन्दि च। ससरं कफमेदः शुक्रकृत् त्रिदोषकृन्मन्दजातमिति अत्र त्रिप्रकारस्यापि दध्नो गुणमाह महेत्यादि महाभिष्यन्दि पूर्व्ववद्व्याख्येयं। मन्दजातगुण-माह। विदाहीति त्रिदोषकृदिति दोषान् वातपित्तश्लेष्मणः करोतीति दोषकृदिति सिद्धे त्रिपदग्रहणमेतज्ज्ञापयतियन्मन्दजातं दधित्रीनपि दोषान्

वातमर्शांसि कुष्ठानि क्रमीन् हन्त्युदराणि च।
कोपनं कफवातानां दुर्नाम्नां चाविकं दधि॥
रसे पाके च मधुरमत्यभिष्यन्दि दोषलं।
दीपनीयमचक्षुष्य वाड़वं दधि वातलं॥
रूक्षमुष्णं कषायञ्च कफमूत्रापहञ्च तत्।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु॥
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरं।
लघुपाके बलासघ्नं वीर्य्योष्णं पक्तिनाशनं॥
कषायानुरसं नाग्या दधि वर्च्चोविवर्द्धनं॥ १७॥
दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक्॥
विज्ञेयमेषु सर्व्वेषु गव्यमेव गुणोत्तरं।
वातघ्नं कफकृत् स्निग्धं वृंहणं न च पित्तकृत्॥
कुर्य्याद्भक्ताभिलाषञ्च दधि यत् सुपरिस्रुतं।
शृतात् क्षीरात्तु यज्जातं गुणवद्दधि तत् स्मृतं॥

यौगपद्येन तुल्यबलत्वेन च कोपयति न पुनः परिपाट्या हीनाधिकभावेन वा, गोदध्याह। स्निग्धमिति अजादध्याह। दध्याजमिति महिषीदध्याह। विपाके मधुरमिति बलासः श्लेष्मा स्निग्धपदं बलासवर्द्धनपदाभ्यां सह विशेषादिति सम्बध्यते, उष्ट्रीदध्याह। विपाके इति सञ्चारमीषत् चारं, मेषीदध्याह। कोपनमिति दुर्नामान्यर्शांसि दोषलं अपथ्यत्वेन विकारकारि। अश्वादध्याह। दीपनीयमिति वाड़वं आश्वं, मानुषीदध्याह। स्निग्धमिति अग्र्यं श्रेष्ठं चक्षुष्यं चक्षुषे हितमित्यर्थः, गुणोत्तरं गुणोत्कृष्टं, हस्तिनीदध्याह। लघ्वित्यादि॥ १७॥

सर्व्वेषां गोर्दधिश्रेष्ठमित्याह। दधीनीति एवमेतेन प्रकारेण गालितं एवावधारणे वस्त्रादिगालितदधिगुणमाह। वातघ्नमिति सुपरिस्रुतं सुष्ठु-

वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनं ।
दध्न: सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशन: ॥
वह्नेर्विधमनश्चापि कफशुक्रविवर्द्धन: ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलं ॥
दीपनीयं लघुतरं सकषायं रुचिप्रदं ।
शरद्‌ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितं ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ।
तृष्णाक्लमहरं मस्तु लघु स्रोतोविशोधनं ॥
अम्लं कषायं मधुरमवृष्यं कफवातनुत् ।
प्रह्लादनं प्रीणनञ्च भिनत्त्याशु मलञ्च तत् ॥
बलमावहते चापि भक्तच्छन्दं करोति च ।
स्वाद्वम्लमत्यम्लकमन्दजातं तथा शृतक्षीरभवं सरञ्च ॥
असारमेवं दधि सप्तधाऽस्मिन् वर्गे स्मृता मस्तु गुणास्तथैव ॥
॥ १८ ॥

इति दधिवर्ग: ।

गालितं वस्त्रादिभि: । क्वथितक्षीरजातस्य दध्नो गुणमाह । शृतक्षीरादिति दध्नवयवविशेषाणां गुणविशेषं दर्शयन्नाह । दध्न इति सरो दध्न उपरितलो भाग: स्नेहबहुल: तर इति प्रसिद्ध: वह्नेर्विधमन: अग्निनाशन: वृष्य: शुक्रवर्द्धन इति चोभयमतिवृद्धिकरत्वप्रामाये एतेन जनकप्रवर्त्तकमुक्तं । उद्धृतघृतस्य दध्नो गुणमाह । दधित्विति असारं तररहितं विष्टम्भीति सवाततोदशूलानिलमलस्याप्रवृत्तिविष्टम्भ: अन्ये विष्टम्भा गुड़गुड़ाशब्द इति प्राहु: । धातुभेदेन हेयोपादेयतामाह । तृष्णा क्लमहरमिति मस्तु अथोदधिजलमिश्रं तच्च सप्तविधं दधिभेदात् । स्वादिति तद्यथा स्वाद्वम्लमत्यम्लं मन्दजातं शृतक्षीरभवं सारमसारञ्च ॥ अन्ये तु क्वथितदधिसक्तजभेदेन मस्तु त्रिविधमिच्छन्ति मलं मूत्रपुरीषे । इति दधिवर्ग: ॥ १८ ॥

तक्रं मधुरमम्लं कषायानुरसमुष्णवीर्य्यं लघु रूक्षमग्नि-
दीपनं गरशोफातीसारग्रहणीपाण्डुरोगार्शःप्लीहगुल्मारोच-
कविषमज्वरतृष्णाच्छर्दिप्रसेकशूलमेदःश्लेष्मानिलहरं मधुरवि-
पाकं हृद्यं मूत्रकृच्छ्रस्नेहव्यापत्प्रशमनमवृष्यञ्च ।

मन्थनादिपृथग्भूतस्नेहमर्द्धोदकञ्च यत् ।
नातिसान्द्रद्रवं तक्रं स्वाद्वम्लं तुवरं रसे ॥
यत्तु सस्नेहमजलं मथितं घोलमुच्यते ।
तक्रं नैव क्षते दद्यान्नोष्णकाले न दुर्बले ॥
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ।
शीतकालेऽग्निमान्द्ये च कफोत्थेष्वामयेषु च ॥
मार्गावरोधे दुष्टे च वायौ तक्रं प्रशस्यते ॥१६॥

तत् पुनर्मधुरं श्लेष्मप्रकोपणं पित्तप्रशमनञ्च । अम्लं
वातघ्नं पित्तकरञ्च ।

अथ तक्रगुणानाह । तक्रमित्यादि गरं कृत्रिमं विषं सदाभाविनं वर्ज्ज-
यित्वा अन्ये विषमज्वराः प्रसेको लालास्रावः स्नेहव्यापत् स्नेहातियोगायोग-
समुत्थो विकारः अवृष्यं अशुक्रलं तच्च तन्त्रान्तरे त्रिविधं रूक्षमर्द्धोद्धृतस्नेहं
यतस्त्वनुद्धृतं घृतं तक्रं दोषाग्निबलवत्त्रिविधं तत्प्रयोजयेत् तन्त्रान्तरे सर्वे-
षामेवैतेषां पृथग्गुणोपवर्णनं कृतं । अथ कीदृक्तक्रं यस्यायं गुणनिर्द्देशः
कृतः उच्यते । मन्थनादीति तत्तु दधिगुणमेव सस्नेहं सजलं उदश्वित्
यद्गुणास्तु मतान्तराद्बोद्धव्याः तस्य तक्रस्य निषेधविषयमाह । नैव तक्र-
मिति उष्णकाले शरद्ग्रीष्मयोः केषु प्रशस्तमित्याह । शीतकाले इति
मार्गावरोधे स्रोतः शोधकत्वात् दुष्टे च वायौ विकृते वाते स च प्रायः-
कोष्ठस्थो ज्ञेयः ॥ १६ ॥

तक्रस्य रसविशेषेण विशेषमाह । तदिति संयोगविशेषेण दोषह-

वातेऽम्लं सैन्धवोपेतं स्वादु पित्ते सशर्करं।
पिवेत्तक्रं कफे चापि व्योषक्षारसमायुतं॥
ग्राहिणी वातला रूक्षा दुर्ज्जरा तक्रकूर्च्चिका।
तक्राल्लघुतरो मण्डः कूर्च्चिकाद्दधितक्रजः॥
गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः।
मधुरौ वृंहणौ दृष्यौ तद्वत्पीयूषमोरटौ॥

रत्वमाह। वाते इति तस्य हेत्वन्तरे विग्रथितस्य स्थानाच्च न भूता यस्य सगुणानिर्दिश्यन्नाह। ग्राहिणीति विनष्टतक्रं घनावयवं तक्रकूर्च्चिका इदानीं तक्राद्दधिमस्तुनः तथा तक्रमस्तुनोऽपि विशेषं गुणेषु दर्शयन्नाह। तक्रादिति मस्तुनो मण्डः कूर्च्चीकीभूतं यद्दधितक्रञ्च ताभ्यां यतो यो मण्डः सतक्राल्लघुतरः प्राकृतदधिजातं पुनर्मस्तु लाघवात्तक्रसममेव अन्ये त्वेवं पठन्ति दधिकूर्च्चिकातक्रज इति तक्रात् प्राकृतदधिजः कूर्च्चीकीभूतदधिजः कूर्च्चीकीभूततक्रज इति मस्तुत्रयसंग्रहः तक्रतुल्योदधिमण्डो विष्टम्भारुचि-विनाशन इति च क्वचित्पठ्यते। प्राकृते मस्तु पीषादिदाहे मस्तुजात-स्यापि दध्नः अच्छोभाग उच्यते। तक्रकूर्च्चिका प्रस्तावे क्षीरकूर्च्चिकामाह। गुरुरिति कूर्च्चिकीक्षीरभूतस्य घनभागः किलाटः यल्लोकाः क्षीराम्रुमित्याहुः सुदाम्रु किलाटीति पुंस्त्वं शुक्रं पीयूषमोरटावाह। मधुराविति तद्वत् पीयूषमोरटौ किलाटतुल्यौ पीयूषः सद्यः प्रसूताया गोःक्षीरं सप्ताहं यावत् तदेव सप्ताहात् परतो यावत् प्रसन्नतां न गच्छति तावन्मोरट-मित्याह। सद्यस्कं नवनीतमाह। नवनीतमिति सद्यस्कं सद्योभवं सुकु-मारं देहसौकुमार्य्यकरं संग्राहिप्रभावात् तक्रावयवसम्बन्धाच्च अतएवाल्प चिरोत्थितं नवनीतमाह। गुर्व्विति बलकरमोजस्करं वृंहणं देहोपचय-करं विशेषेणातिशयेनेत्यर्थः क्षीरमथनोत्थितस्य नवनीतस्य गुणमाह। क्षीरोत्थमिति दध्युत्थितनवनीतापेक्षया उत्कृष्टे स्नेहमाधुर्य्ये यस्मिन् तत्तथा अतिशीतमपि तदपेक्षयेव प्रसादनञ्चेति रक्तपित्तनेत्ररोगयोः प्रसा-

नवनीतं पुनः सद्यस्कं लघु सुकुमारं मधुरं कषायमीषदम्लं शीतलं मेध्यं दीपनं हृद्यं संग्राहि पित्तानिलहरं वृष्यमविदाहि क्षयकासश्वासव्रणार्शोऽर्द्दितापहं गुरुकफमेदोविवर्द्धनं बलकरं वृंहणं शोषघ्नं विशेषतो बालानां प्रशस्यते। क्षीरोत्थं पुनर्नवनीतमुत्कृष्टस्नेहं माधुर्य्ययुक्तमतिशीतं सौकुमार्य्यकरं चक्षुष्यं संग्राहि रक्तपित्तनेत्ररोगहरं प्रसादनञ्च। सन्तानिका पुनर्वातघ्नी तर्पणी बल्या वृष्या स्निग्धा रुच्या मधुरा मधुरविपाका रक्तपित्तप्रसादनी गुर्व्वी च।

विकल्प एष दध्यादिः श्रेष्ठो गव्योऽभिवर्णितः।
विकल्पानवशिष्टांस्तु क्षीरवीर्य्यात् समादिशेत् ॥ ३० ॥

अथ घृतं।

घृतन्तु सौम्यं शीतवीर्य्यं मृदु मधुरमल्पाभिष्यन्दि

दनं स्थाने वर्णप्रसादनीत्यमिति केचित् पठन्ति क्षीरोत्थनवनीतप्रसङ्गेन क्षीरोत्थसन्तानिकामाह। सन्तानिकेति सन्तानिकाक्षीरस्योपरिस्त्यानो भागः क्षीरसर इति, तर्पणी तृप्तिजनिका ननु चाष्टानां क्षीराणां निर्द्दिष्टत्वादिह तक्रमस्तु तक्रकूर्चिकाकिलाटपीयूषमोरटनवनीतसन्तानिकादयः कस्यक्षीरस्योक्ता इत्याह। विकल्पेति विकल्पोभेदः प्रकाराः दधि आदिर्यस्य सदध्यादिः गव्य इति गोरेव अभिवर्णितः कथितः न पुनरजाविप्रभृतीनां यतः श्रेष्ठः सर्व्वेभ्यः प्रधानं तत्किमजादीनां दध्यादि न सम्भवतीत्याह विकल्पेत्यादि अवशिष्टान् उद्वरितान् क्षीरवीर्य्यादिति क्षीरवीर्य्यं गुण इत्यर्थः। यथाजादीनां क्षीरगुणः तद्वत्तक्रादिगुणो वाच्य इत्यर्थः। इति तक्रवर्गः ॥३०॥

अथ घृतन्त्विति एते सामान्यघृतगुणाः अन्ये तु गव्यस्यैवेति गुणश्रेष्ठ-

स्नेहनमुदावर्त्तोन्मादापस्मारशूलज्वरानाहवातपित्तप्रशमनमग्निदीपनं स्मृतिमतिमेधाकान्तिस्वरलावण्यसौकुमार्य्यौजस्तेजोबलकरमायुष्यं वृष्यं मेध्यं वयःस्थापनं गुरु चक्षुष्यं श्लेष्माभिवर्द्धनं पाप्मालक्ष्मीप्रशमनं विषहरं रक्षोघ्नञ्च ॥२१॥

विपाके मधुरं शीतं वातपित्तविषापहम्।
चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरम्॥
आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनम्।
कासे श्वासे क्षये चापि पथ्यं पाके च तल्लघु॥
मधुरं रक्तपित्तघ्नं गुरुपाके कफावहं।
वातपित्तप्रशमनं सुशीतं माहिषं घृतं॥

त्वादित्याह: सौम्यत्वं उष्णेऽपि यथाविचारे अतिशीतवीर्यमित्युक्तं अनभिष्यन्दीति अत्रेषदर्थे नञ तेनाल्पाभिष्यन्दीत्यर्थ: एतेन दोषधातुमलस्रोतसां मन्दक्लेदप्राप्तिजननं स्नेहनं स्निग्धत्वापादकं उदावर्त्तादिप्रशमनं ज्वरस्य जीर्णस्य प्रशमनं स्मृत्यादिभिर्बलपर्य्यन्तैः तै: सह करशब्द: प्रत्येकमभिसम्बध्यते स्मृतिरतीतस्मरणं अनागतज्ञानमिति मेधाग्रन्थधारणशक्ति: कान्ति:शोभा, लावण्यं रूपातिशय: सौकुमार्य्यं मार्द्दवमङ्गानां ओजोहृदिस्थितं धामतेज: अन्ये प्रभामाहु: सा च महापञ्चिकायां निषिद्धा बलमुपचय:, मेध्यं पवित्रं, वय:स्थापनमिति यावद्देवायु: प्रमितं तावद्देवायु: स्थापयत्यनावाधनापद्यानि हन्ति, रक्षोघ्नं राक्षसभयहरं, त्रिदोषापकर्षणमिति केचित् पठन्ति स तु नातिप्रसिद्ध: पाठ: तत्रापि वातपित्तसम्बन्धादस्यैव कफहन्तृत्वं न तु केवलस्य ॥ २१ ॥

सामान्येन घृतगुणनभिधाय गव्यघृतस्य विशेषगुणमाह। विपाक इति चक्षुष्यमग्र्यमिति सर्व्वचक्षुष्यश्रेष्ठमित्यर्थ: गुणोत्तरं गुणोत्कृष्टं अजं घृतमाह। आजमिति महिषमाह। मधुरमिति मेढ्रमाह। पाकयिति आश्वमाह। पाक इति ऐकशफं घृतं अश्वाया घृतमित्यर्थ:।

औष्ट्रं कटु रसं पाके शोफक्रिमिविषापहं।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहं॥
पाके लघ्वाविकं सर्पिर्नच पित्तप्रकोपणं।
कफेऽनिले योनिदोषे शोषे कम्पे च तद्धितं॥
पाके लघूष्णवीर्य्यञ्च कषायं कफनाशनं।
दीपनं बद्धमूत्रञ्च विद्यादैकशफं घृतं॥
चक्षुष्यमग्र्यं स्त्रीणान्तु सर्पिः स्यादमृतोपमं।
वृद्धिं करोति देहाग्न्योर्लघुपाकं विषापहं॥
कषायं बद्धविण्मूत्रं तिक्तमग्निकरं लघु।
हन्ति कारेणवं सर्पिः कफकुष्ठविषक्रिमीन्॥

क्षीरघृतं पुनः संग्राहि रक्तपित्तभ्रममूर्च्छाप्रशमनं नेत्ररोगहितञ्च। सर्पिर्मण्डस्तु मधुरः सरो योनिश्रोत्राक्षिशिरसां शूलघ्नो वस्तिनस्याक्षिप्रपूरणेषूपदिश्यते। सर्पिः पुराणं सरं कटुविपाकं त्रिदोषापहं मूर्च्छामेद उन्मादोदरज्वरगरशोफापस्मारयोनिश्रोत्राक्षिशिरःशूलघ्नं दीपनं वस्तिनस्याक्षिपूरणेषूपदिश्यते।

भवन्ति चात्र।

मानुषीघृतमाह। अग्र्यमिति सर्व्वचक्षुष्यश्रेष्ठं हास्तिनमाह। कषायमिति कारेणवं हास्तिनं, क्षीरोत्थघृतगुणमाह। क्षीरघृतमिति क्षीरमथनात् समुद्भूतनवनीतोत्थितं घृतं संग्राहिप्रभावात्। भ्रमश्चक्रारूढस्येव, मूर्च्छा चेतनाच्युतिः, घृतमण्डस्य गुणमाह। सर्पिर्मण्डस्त्विति विलीनघृतस्य घनीभूत उपरितनोभागो मण्डः। पुराणघृतगुणमाह। सर्पिरिति पुराणं दशवर्षस्थितं विषरुधिरमद्यजा मदाश्रयः, गरः संयोगविषं प्रपूरणं अक्षिपूरणं पूरणे क्षिप्रपूरणे। एकादशशतमिति एकादशो-

पुराणं तिमिरश्वासपीनसज्वरकासनुत्।
मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनं॥
एकादशशतञ्चैव वत्सरानुषितं घृतं।
रक्षोघ्नं कुम्भसर्पिः स्यात्परतस्तु महाघृतं॥
पेयं महाघृतं भूतैः कफघ्नं पवनाधिकैः।
बल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहं॥
सर्व्वभूतहरञ्चैव घृतमेतत्प्रशस्यते॥ ३२॥

अथ तैलानि।

तैलं त्वाग्नेयमुष्णं तीक्ष्णं मधुरं मधुरविपाकं बृंहणं प्रीणनं व्यवायि सूक्ष्मं विशदं गुरु सरं विकासि वृष्यं त्वक्प्रसादनं मेधामार्द्दवमांसस्थैर्य्यवर्णबलकरं चक्षुष्यं बद्धमूत्रं लेखनं तिक्तकषायानुरसं पाचनमनिलबलासक्षय-

त्तरं शतमित्यर्थः भूतैः प्राणिभिः आचार्य्यस्तु कौम्भन्तु शतवत्सरमित्याह अयं पाठो निबन्धेषु न दृश्यते। अस्माभिस्तु बहुवैद्यपठितत्वात् पठितः। इति घृतवर्गः॥ ३२॥

जङ्गमस्नेहोत्तमं घृतं निर्द्दिश्यस्थावरस्नेहोत्तमं तैलं गुणकर्म्मभ्यां निर्द्दिशन्नाह। तैलमिति तिलेषु भवं तैलं, तिलतैलं आग्नेयमुष्णमिति प्रभा आग्नेयी न चोष्णचार उष्णः सौम्यश्च मत्स्या उष्णा नत्वाग्नेयाः अतएवाग्नेयमुष्णमित्युभयमुक्तं बृंहणं धातुपुष्टिकरत्वेन शरीरदार्ढ्यावह-त्वान्न च लेखनत्वमप्यस्य विरुद्धं मेदोहरत्वात् न खलुतैलं मेदोघ्नमपि मांसं न करोति प्रतिनियतशक्तित्वाद्द्रव्याणां प्रीणनं तृप्तिजनकं व्यवायि अपरिणतमेव व्याप्य देहं पाति सूक्ष्मं सूक्ष्मस्रोतोऽनुसारिविशदं निर्म्मलं विकासिसन्धिबन्धविमोचकं वृष्यं शुक्रलं अन्येतु धातुपोषणकरणाद्वृष्यं सद्यः पुनर्हर्षमेव यदुक्तं जातूकर्णेन शुक्रार्थं तैललवणमिति त्वक्प्रसादने-

करं क्रिमिघ्नमशीतपित्तजननं योनिशिरःकर्णशूलप्रशमनं गर्भाशयशोधनञ्च तथा छिन्नभिन्नविद्धोत्पिष्टच्युतमथितक्षतपिच्चितभग्नस्फुटितक्षाराग्निदग्धविश्लिष्टदारिताभिहतदुर्भग्नमृगव्यालविदष्टप्रभृतिषु च परिषेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ।

तद्बस्तिषु च पाने च नस्ये कर्णाक्षिपूरणे ।
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये ॥ ३२ ॥

एरण्डतैलं मधुरमुष्णं तीक्ष्णं दीपनं कटुकषायानुरसं सूक्ष्मं स्रोतोविशोधनं त्वच्यं वृष्यं मधुरविपाकं वयःस्थापनं योनिशुक्रविशोधनमारोग्यमेधाकान्तिस्मृतिबलकरं वातकफहरमधोभागदोषहरञ्च ।

निम्बातसीकुसुम्भमूलकजीमूतकवृक्षकक्रतवेधनार्ककम्पिल्लकहस्तिकर्णपृथ्वीकापीलुकरञ्जेङ्गुदीशिग्रुसर्षपसुवर्चलाविडङ्गज्योतिष्मतीफलतैलानि तीक्ष्णानि लघून्युष्णवीर्य्याणि कटूनि कटुविपाकानि सराण्यनिलकफक्रिमिकुष्ठप्रमेहशिरोरोगहराणि चेति ।

ऽभ्यङ्गे भोजने च, वर्णो गौरादिः बलकरमुत्साहकरं चक्षुष्यं परिणामेन तु पूरणेन लेखनं मेदोहरं अनिलबलासक्षयकरमिति मिलितवातबलासयोः क्षयकरं न केवलस्य वातस्य न केवलस्य श्लेष्मणः अथवा क्षयो मार्गः अनिलबलासस्रोतःशोधनमित्यर्थः अशितं पित्तजननं अल्पतनूकरणपित्तयोर्जनकं शीतं हि तनूकरणं नञीषदर्थे तेनाल्पतनूकरणमिति लभ्यते केचिद्शितमिति पृथक् पठन्ति तच्च महापञ्जिकायां दूषितं, छिन्नं द्विधाभूतं, भिन्नं विदारितं, विद्धं सूच्यादिभिः, उत्पिष्टं चूर्णितं, च्युतं स्थानादधोगतं, मथितं विलोडितं, क्षतमुरः क्षतादि, पिच्चितं चिप्पटीकृतं चिपिटितमिति

वातघ्नं मधुरं तेषु क्षौमं तैलं बलावहं।
कटुपाकमचक्षुष्यं स्निग्धोष्णं गुरु पित्तलं॥
क्रिमिघ्नं सार्षपं तैलं कण्डुकुष्ठापहं लघु।
कफमेदोऽनिलहरं लेखनं कटुदीपनं॥
क्रिमिघ्नमिङ्गुदीतैलमीषत्तिक्तं तथा लघु।
कुष्ठामयक्रिमिहरं दृष्टिशुक्रबलापहं॥
विपाके कटुकं तैलं कौसुम्भं सर्व्वदोषकृत्।
रक्तपित्तकरं तीक्ष्णमचक्षुष्य विदाहि च॥ ३४॥
किराततिक्तकाऽतिमुक्तकविभीतकनारिकेरकोलाक्षोड़-

लोके, भग्नं सन्धिमुक्तादिभेदं, स्फुटितं बहुधा खण्डीभूतं, विश्लिष्टं सन्धिविश्लेषमात्रयुक्तं, दारितं स्फुटितमीषद्विदारितमित्यर्थः अभिहतं लगुड़ादिभिः दुर्भग्नं चूर्णितातिपातितं मज्जानुगतादिकं कृच्छ्रसाध्यं दुष्टं भग्नं मृगव्यालविदृष्टं दुष्टमृगभक्षितं परिषेकः अङ्गोपरितैलधारादिनिपतितः अभ्यङ्गः प्रसिद्धः अवगाहोऽप्क्रीड़नं अन्नपानविधाविति विधौ संस्करणे॥ ३३॥

एरण्डतैलस्य गुणकर्म्माख्याह। एरण्डतैलमिति अधोभागदोषहरं विरेचनेन दोषहरमित्यर्थः निम्बादिफलस्नेहगुणमाह। निम्बेति जीमूतको देवदालीहृचकः कुटजः कृतवेधनः कोशातकी अर्कः प्रसिद्धः, कम्पिल्लको रेचनिकः, हस्तिकर्णो महापर्णो भूपलाश इत्युच्यते अन्ये रक्तैरण्डमाहुः। पृथ्वीकाकृष्णजीरकः, पीलुः प्रसिद्धः करञ्जो हृचकरञ्जः इङ्गुदीकण्टकीहृच अन्ये पुत्रजीवकमाहुः शिग्रुः शोभाञ्जनफलं सुवर्चला सूर्य्यावर्त्तः विड़ङ्ग क्रिमिघ्ना ज्योतिष्मतीकाकनर्द्दनिका निम्बतैलं तन्त्रान्तरे पलितहरमुक्तं इहापि सामान्येन शिरोरोगापहरत्वेन पलितहरत्वमुच्यते एषु केषांचित् सामान्यगुणान् विशेषं निर्द्दिशन्नाह। वातघ्नमिति चौमं अतसीभवं क्रिमिघ्नमिति कटून्यभिधाय मधुराणि निर्द्दिशन्नाह॥ ३४॥

जीवन्तीपियालकर्व्वुदारसूर्य्यवल्लीत्रपुसैर्वारुककर्कारुकुष्माण्ड-प्रभृतीनां तैलानि मधुराणि मधुरवीर्य्यविपाकानि वातपित्त-प्रशमनानि शीतवीर्य्याण्यभिष्यन्दीनि सृष्टविण्मूत्राण्यग्निसा-दनानि चेति।

मधुककाश्मर्य्यपलाशतैलानि मधुरकषायाणि कफपि-त्तप्रशमनानि।

तुवरकभल्लातकतैले उष्णे मधुरकषाये तिक्तानुरसे वातकफकुष्ठमेदोमेहक्रिमिहरे उभयतोभागदोषहरे च।

सरलदेवदारुगण्डीरशिंशपागुरुसारस्नेहास्तिक्तकटुक-षाया दुष्टव्रणशोधनाः क्रिमिकफकुष्ठानिलहराश्च।

किराततेति अतिमुक्तकः अवाल्कः कोलोवदरमज्जा अचोड़उत्तरा-पथे प्रसिद्धः जीवन्तीस्वर्णजीवन्तीफलं पियालः प्रसिद्धः मधुराम्लफलः, कर्व्वुदारः काञ्चनारः सूर्य्यवल्ली अर्कपुष्पीच्छर्य्यावर्त्तभेद इत्यन्ये सुवर्चलायाः पूर्वमेव पठितत्वात् त्रपुसं कर्कटीफलं लिषु षण्डी इति लोके एर्वारुशीषकर्कटिका कर्कारुवाड़वं त्रपुसं प्रभृतिग्रहणात् कालिङ्गादीनां ग्रहणं अग्निसादनानि अग्निमान्द्यकराणि किरात-तिक्तकादीनां तिक्तानामपि मधुराणि तैलानि प्रत्यक्षदृष्टत्वात् मधुकादीनां तैलान्याह। मधुकेति पलाशः किंशुकः तुवरादितै-लमाह। तुवरकेति तुवरकं पश्चिमार्णवतीरजातमाहुः। तदुक्तं पत्रैस्तु केशराकारैः कलाय सदृशैः फलै वृक्षस्तुवरको नाम पश्चिमार्णव-तीरजः उभयतो भागदोषहरेचेति वमने विरेचने चेत्यर्थः, सारस्नेहानाह। सरलेति सरलादयः गण्डीरः सारप्रधानस्तरुविशेषः तुम्ब्यादीनां स्नेह-माह। तुम्बीति तुम्बीतिक्तालावुः, कोशाम्रकोशम्ब इति प्रसिद्धः दन्ती-दन्तिनी द्रवन्ती सम्बरीश्यामात्रिवृद्दारुकः सप्तला सतलेति प्रसिद्धा नीलिनी श्रीफलिका कम्पिल्लकः प्रसिद्धः शङ्खिनी श्वेतश्रीफलिका अन्ये यवतिक्ता-

तुम्बीकोशाम्रदन्तीद्रवन्तीश्यामासप्तलानीलिका कम्पिल्लकशङ्खिनी स्नेहास्तिक्तकटुकषाया अधोभागदोषहरा: क्रिमिकफकुष्ठानिलहरा दुष्टव्रणविशोधनाश्च।

यवतिक्तातैलं सर्वदोषप्रशमनमीषत्तिक्तमग्निदीपनं लेखनं पथ्यं रसायनञ्च।

एकैषिकातैलं मधुरमतिशीतं पित्तहरमनिलप्रकोपनं श्लेष्माभिवर्द्धनं॥ ३५॥

सहकारतैलमीषत्तिक्तमतिसुगन्धि वातकफहरं रूक्षं मधुरकषायं रसवन्नातिपित्तकरञ्च।

भेदमाहु: अधोभागदोषहरा इति विरेचनेन दोषहरा इत्यर्थ: यवतिक्ता तैलमाह। यवतिक्तातैलमिति यवतिक्तायवतैलेषु जायते तिक्तसमाऽपत्रा यवतिक्तेति प्रसिद्धा, एकैषिका तैलमाह एकैषिका तैलमिति एकैषिका अविरुद्धकरणी पाठेति लोके लिप्तदिति जेज्जट: ॥ ३५॥

आम्रतैलमाह। सहकारतैलमिति सहकारतैलं आम्रतैलंतच्चाम्रस्य तरुणफलवृन्तभङ्गमात्र तएव जातमिति गयी तत्फलमज्जस्नेह इत्यन्ये फलानामानन्त्यात् फलगुणातिदेशं तैलस्याह। फलोद्भवानीति इहजगति फलानीचेति फलसदृशगुणा: कर्मणीत्यर्थ: अथवा इहतैलवर्गे यानि कानिचित् फलोद्भवानि तैलानुक्तानि तानि तावदुक्तगुणकर्मभ्यामिव ज्ञेयानि शेषाणि तु फलतैलानि फलस्य गुणान् कर्म्म च विज्ञायफलानीव विनिर्द्दिशेदित्यर्थ: केचित्तु यान्युक्तानीहकानि विदित्यस्य स्थाने यानीत्युक्तानि कानि चिदिति पठन्ति शेषञ्च समं। तच्च सुबोधं सर्वेषां स्थावरानां स्नेहानां तिलतैलगुणमाह यावन्त इति सर्वे तैलगुणा ज्ञेया इति एतेन तिलतैले केचिद्धर्म्मा:। कानि चित्कर्म्माणि च यानि तान्यपरेष्वपि तैलेषु वर्त्तते इत्युक्तं न तु सर्वे तिलतैलधर्मा: सर्वाणि तिलतैलकर्माणि अन्येतु गुणाश्चन्दे न सर्वसाधारणीं स्निग्ध

फलोद्भवानि तैलानि यान्यनुक्तानि कानिचित् ।
गुणान् कर्म च विज्ञाय फलवत्तानि निर्द्दिशेत् ॥
यावन्तः स्थावराः स्नेहाः समासात्परिकीर्त्तिताः ।
सर्व्वे तैलगुणा ज्ञेयाः सर्वे चानिलनाशनाः ॥
सर्वेभ्यस्त्विह तैलेभ्यस्तिलतैलं प्रशस्यते ।
निष्पत्तेस्तद्गुणत्वाच्च तैलत्वमितरेष्वपि ॥

ग्राम्यानूपौदकानाञ्च वसामेदोमज्जानो गुरूष्णमधुरा वातघ्ना जाङ्गलैकशफक्रव्यादादीनां लघुशीतकषाया रक्तपित्तघ्नाः प्रतुदविष्किराणां श्लेष्मघ्नाः। तत्र घृततैलवसामेदोमज्जानो यथोत्तरं गुरुविपाका वातहराश्च ॥ ३९ ॥

अथ मधुवर्गः ।

मधु तु मधुरं कषायानुरसं रूक्षं शीतमग्निदीपनं वर्ण्यं वल्यं लघु सुकुमारं लेखनं हृद्यं सन्धानं शोधनं

तामाह: तिलतैलप्राधान्यकथनद्वारेण इतरेषां तैलानामपि तैलत्वमाह । सर्वेभ्यस्त्विति निष्पत्तेरिति यथा तैलं हि तिलशब्दान्निष्पद्यते एरण्डतैलादिषु चोपचारेण तन्निष्पत्तेस्तिलतैलस्य प्रशस्तत्वमिति भावः तद्गुणत्वाच्चेति केचित्तिलतैलधर्मैश्च समानत्वात् स्नेहसमानत्वादसादिगुणमाह । ग्राम्येति ग्राम्यो गवाश्वस्तादयः, आनूपा महिषादयः, औदका मत्स्यादयः। जाङ्गलेति जाङ्गला एणादयः, एकशफा अश्वादयः, क्रव्यादा व्याघ्रादयः। प्रतुद इति प्रतुदाः कपोतपारावतादयः विष्किरलावादयः इति तैलवर्गः ॥ ३९ ॥

इदानीं मध्वाह तस्य सामान्यं स्वगुणं निर्द्दिशन्नाह । मधुत्विति रूक्षदीपनलघुत्वादिगुणयुक्तं पुराणं नवमेतद्विपरीतमिति सुकुमारं सौकुमार्यकरं लेखनं पतलीकरणं हृद्यं हृदयप्रियं हितञ्च वाजीकरणं शुक्रलं सन्धानं भग्नस्य चक्षुष्यं चक्षुषेहितं प्रसादनं चक्षुषोर्देहस्य चाह्लादिसुखका-

रोपणं वाजीकरणं संग्राहि चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्दितृष्णाक्रिमिविषप्रशमनं ह्लादि त्रिदोषप्रशमनञ्च तत्तु लघुत्वात् कफघ्नं पैच्छिल्यान्माधुर्य्यात्कषायभावाच्च वातपित्तघ्नं।

पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः॥
विशेषात् पौत्तिकं तेषु रूक्षोष्णं सविषान्वयात्।
वातासृक्पित्तकृच्छेदि विदाहि मदकृन्मधु॥
पैच्छिल्यात्स्वादुभूयस्त्वाद्भ्रामरं गुरुसंज्ञितं।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनं॥
तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतं।
श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः॥
स्वादुपाकं गुरु हिमं पिच्छिलं रक्तपित्तजित्।
श्वित्रमेहक्रिमिहरं विद्याच्छात्रं गुणोत्तरं॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परं।
कषायं कटु पाके च बल्यं तिक्तमवातकृत्॥

रि,त्रिदोषप्रशमनमिति यद्यपि शैत्यरौक्ष्यलघुत्वैर्वातकारित्वं मधुरत्वादिना च कफकारित्वं तथापि द्रव्यगुणोभयप्रभावात् त्रिदोषघ्नत्वं तद्विदामाहुः। पौत्तिकमिति पिङ्गलामत्स्यो मक्षिकाः पुत्तिकाः तद्भवं पौत्तिकं अन्ये मशकोपममक्षिकाः कृष्णवर्णाः पुत्तिका इति वदन्ति भ्रमराः प्रसिद्धाः तद्भवं भ्रामरं मक्षिकाः पिङ्गला एव स्वल्पाः क्षुद्राः तद्भवं क्षौद्रं क्षौद्रं पिङ्गलवर्णा महत्यो मक्षिकास्तद्भवं माक्षिकं अन्ये अल्पका मक्षिका इत्याहुः। पिङ्गकपिङ्गलाश्च इति लोके यत्कुर्वन्ति छत्रकाकारं हिमाचलवने तत्छात्रं। मधुकवृक्षनिर्यासजरत्कारात्मजोद्भवं स्रवन्त्यार्घ्यं मधुप्राहुः श्वेतकं मालवेजनाः। तीक्ष्णतुण्डालु याः पीतवर्णाः षट्पदसन्निभाः अर्घ्यो नाम तद्भवं। आर्घ्य-

औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहं ।
कषायमुष्णमम्लञ्च पित्तकृत्कटुपाकि च ॥
छर्द्दिमेहप्रशमनं मधु रुच्यं दलोद्भवं ।
वृंहणीयं मधु नवं नातिश्लेष्महरं सरं ॥
मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनं ॥ ३७ ॥
दोषत्रयहरं पक्वमाममम्लं त्रिदोषकृत् ॥
तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून् ।
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥ ३८ ॥
तत्तु नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां पुष्परसानां सविषमक्षिकासम्भवत्वाच्चानुष्णोपचारं ॥ ३९ ॥

मित्यपरे जगुः उष्णेन सहाप्यं न विरुध्यति यदुक्तं मधुतूष्णैर्विरुध्यतेऽम्यत्वा-र्थादिति उद्दालकाः कपिलकीटाः स्वल्पा प्रायशो वल्मीकेषु मधुचिकन्ति तद्भवमौद्दालकं दालमिति दलं पत्रं तदुपरिस्थितं दालं अन्ये तु कपिला एव स्वल्पतरा मक्षिकाः प्रायेण वृक्षकोटरोद्भवा दला इत्युच्यन्ते तद्भवं दाल-मिति तेषां प्रत्येकं गुणमाह । विशेषादिति सविषान्वयादिति सविष-रसाहारमक्षिकासम्भवात् छेदि मेदोग्रन्थ्यादीनां मदकृदिति विषान्वय-त्वादेव विषमदकृत् । पैच्छिल्यादिति नवपुराणयोर्गुणमाह । वृंहणीय-मिति तस्याल्पकालस्थापितत्वेन नवत्वं एतद्विपर्य्ययेण पुराणत्वं ॥ ३७ ॥

पक्वामयोर्गुणमाह । दोषत्रयहरमिति पक्वत्वमग्निसंयोगात् घनीभा-वादित्येके अग्निसंयोगनिषेधान्निन्दितमेतत् तस्मान्मधुनः कालविशेषैस्तस्य परिणामात् पक्वत्वमामत्वञ्च ज्ञेयमित्यन्ये अनेककर्म्मकारिणीं योगवाहितां दर्शयन्नाह । तद्युक्तमिति योगैरिति औषधसमूहैरित्यर्थः यादृक् द्रव्येण संयोज्यं तत्तादृक् कर्मकुर्व्वन्तीति योगवाहित्वं तेषां मध्ये परमुत्कृष्टं मध्वित्यर्थः ॥ ३८ ॥

इदानीमुक्तायामपि द्वितीये मोक्षमागतायामनुष्णोपसेवायां हेतुं

उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ॥
उष्णार्त्तमुष्णैरुष्णे वा तन्निहन्ति यथाविषं ॥
तत्सौकुमार्य्याच्च तथैव शैत्यान्नानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च तथान्तरीक्षेण जलेन चापि ॥
उष्णेन मधु संयुक्तं वमनेष्ववचारितं ।
अपाकादनवस्थानान्न विरुध्येतपूर्ववत् ॥
मध्वामात्परतस्त्वन्यदामं कष्टं न विद्यते ।
विरुद्धोपक्रमत्वात्तत् सद्यः हन्ति यथाविषं ॥ ४० ॥

दर्शयन्नाह । तत्त्विति तन्मधु अनुष्णोपचारं भवतीति सम्बन्धः कस्मा-दित्याह । पुष्परसानां मक्षिकासम्भवत्वात् किम्भूतानां नानाद्रव्यरसवीर्य्य-विपाकविरुद्धानां पुष्परसविषमक्षिकासम्भवत्वादित्यन्ये पठन्ति पुष्परसविष-सञ्चारिण्यो मक्षिकाः पुष्परसविषमक्षिकाः अनुष्णोपचारं योगवाहिचेति केचिदिदं पठन्ति तन्नपूर्वमुक्तत्वात् योगवाहितायाः मक्षिकाहिपुष्परस-सञ्चारिण्यस्तत्सम्भवं मध्वपि वीर्य्योष्णं भवति तस्मान्मधु उष्णद्रव्येण उपचर्य्यते न युज्यते उष्णेन सह विरुद्धत्वात् विषवदिति भावः ॥ ३८ ॥

उष्णेन सह विरोधे हेतुमाह । उष्णैरिति उष्णस्पर्शैं न तूष्णवीर्य्यैः विषान्वयतया विषाहारमक्षिका प्रसवतया उष्णार्त्तं घर्मपीड़ितं उष्णैद्रव्यैः सह उष्णदेशे काले वा उष्णमेव सुखबोधनार्थमाह । तदिति सुकुमारं ह्युष्णेन विरुध्यते यथा नवनीतस्यानष्टतजलकुसुमानि शीतमपि स्वभावतः शीतेनापि केन चिद्विरोधमाह तथान्तरीक्षेण जलेन वापि खजलेन स्वभा-वतः अपि शब्दादार्घ्यमुष्णेन सह न विरुद्धते वमनविषये उष्णेनाप्यविरोध-माह । उष्णेनेति यद्यपि वमने उष्णस्य मधुनाविरोधो नोक्तः तथापि वृद्धा न प्रयुञ्जते वमनस्याधोगतिभयात् अन्येभ्यो जीर्णेभ्यः सकाशान्मध्व-जीर्णं कष्टावहमित्याह । मध्विति मध्वामं मध्वजीर्णं परत ऊर्द्ध्वं आमस्य स्वे दोष्णोदकाद्य उपक्रमाः ते चोष्णत्वान्मधुनो विरुद्धाः सर्वप्राणिनां ॥ ४० ॥

अथेक्षुवर्गः।

इक्षवो मधुरा मधुरविपाका गुरवः शीताः स्निग्धा बल्या वृष्या मूत्रला रक्तपित्तप्रशमनाः क्रमिकफकराश्चेति ते चानेकविधाः। तद्यथा।

पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयः स्थौल्याद्गुणान् वक्ष्याम्यतःपरं॥
सुशीतो मधुरः स्निग्धो बृंहणः श्लेष्मलः सरः।
अविदाही गुरुर्वृष्यः पौण्ड्रको भीरुकस्तथा॥
आभ्यां तुल्यगुणः किञ्चित् सक्षारो वंशको मतः।
वंशवच्छतपोरस्तु किञ्चिदुष्णः स वातहा॥
कान्तारतापसाविक्षू वंशकानुगुणौ मतौ।
एवङ्गुणस्तु काष्ठेक्षुः स तु वातप्रकोपणः॥
सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः॥
कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः।
अतीव मधुरो मूले मध्ये मधुर एव तु॥

अथेक्षुवर्गः अथेक्षूणां सामान्यं गुणमाह॥ इक्षव इति इतिशब्दः प्रकारवाची, तेनपोरश्शतपलपौण्ड्रकवेलकोद्रवकरथिप्रभृतयोवह्वयो जातयो गृह्यन्ते स्थौल्यादिति स्थौल्यात् सामान्यादेव द्वादशजातयो भवन्तीत्यर्थः। गुणानिति तेषामवयवविशेषेण गुणविशेषमाह। अतीवेति अग्रेष्वक्षिषु विज्ञेय इति- इक्षूणामक्षिषु पर्वसन्धिषु प्ररोहजननाङ्कुराः अन्ये त्वक्षुचेति पठन्ति त्वक्षुवल्कलेषु। दन्तनिष्पीड़ितेक्षुरसस्य गुणमाह।

अग्रे ष्वथिषु विज्ञेय इक्षूणां लवणो रसः।
अविदाही कफकरो वातपित्तनिवारणः॥
वक्त्रप्रह्लादनो हृष्यो दन्तनिष्पीड़ितो रसः।
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः॥ ४१॥
पक्को गुरुः सरः स्निग्धः स तीक्ष्णः कफवातनुत्॥
फाणितं गुरुमधुरमभिष्यन्दि बृंहणमहृष्यं त्रिदोषकृच्च।
गुड़ः सक्षारमधुरो नातिशीतः स्निग्धो मूत्ररक्तशोधनो नातिपित्तजिद्वातघ्नो मेदःकफकरो बल्योहृष्यश्च।
पित्तघ्नो मधुरः शुद्धो वातघ्नोऽसृक्प्रसादनः।
स पुराणोऽधिकगुणो गुड़ः पथ्यतमः स्मृतः॥
मत्स्यण्डिकाखण्डशर्कराविमलजाता उत्तरोत्तरं शीताः

अविदाहीति वृहत्पञ्चिकायां जेज्जटस्तु कफकृच्चाविदाही च रक्तपित्तनिवर्हणः। शर्करासमवीर्य्यस्तु दन्तनिष्पीड़िता रसः, शर्करासमवीर्य्य इत्यत्र वीर्य्यशब्दः शक्त्यभिधायकः न तु शीतादिवीर्य्यवाचकः कस्मादविदाही उच्यते बहिरस्थायित्वेन वातातपाद्यनुपहतत्वात्॥ ४१॥
यन्त्रपीड़ितेक्षुरसस्य गुणमाह। गुर्व्विति यन्त्रपीड़ितस्य बहिश्चिरस्थित्या वातातपादिसंयोगे त्वगादिभिः सह पीड़नाच्च गुरुत्वादयो भवन्ति गुरुत्वं चिरपाकित्वं विदाहीति द्रव्यस्वभावादथ गौरवाद्वा चिरेण पाकं जठराग्नियोगात्। पित्तप्रकोपं विदहत्करोति तदन्नपानं कथितं विदाहि। विष्टम्भी गुड़गुड़ाशब्दः, अन्ये तु सवाततोदशूलामलस्याप्रवृत्तिर्विष्टम्भः। तस्याग्निपक्वस्य गुणमाह। पक्व इति फाणितस्य गुणमाह। फाणितमिति फाणितं क्षुद्रगुड़लक्षकाकार इति लोके अस्य त्रिदोषकरत्वं प्रभावात् तस्यैव पाकादधिकघनभावं गतस्य गुड़संज्ञामाह। गुड़ इति सक्षार ईषत् क्षारः। एतेऽनिर्म्मलगुड़स्य गुणमाह। पित्तघ्न इति शुद्धो निर्म्मलो तस्य धवल इत्यर्थः। पुराणस्य गुड़स्य गुणमाह। स इति सपुराण इव पुराणः

स्निग्धा गुरुतरा मधुरतरा इष्या रक्तपित्तप्रसादनास्तृष्णा-प्रशमनाश्च ॥ ४२ ॥

यथा यथैषां वैमल्यं मधुरत्वं तथा तथा।
स्नेहगौरवशैत्यानि सरत्वञ्च तथा तथा ॥
यो यो मत्स्यण्डिकाखण्डशर्कराणां स्वको गुणः ॥
तेन तेनैव निर्देश्यस्तेषां विस्रावणो गुणः।
सारस्थिता सुविमला निःक्षारा च यथा यथा ॥
तथा तथा गुणवती विज्ञेया शर्करा बुधैः ॥ ४३ ॥

मधुशर्करा पुनश्छर्द्यतीसारहरी रूक्षाच्छेदनी प्रह्लादनी कषायमधुरा मधुरविपाका च यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति।

गुडस्य संस्कारविशेषेण नामान्तरं गुणान्तरं चाह। मत्स्यण्डिकेति मत्स्यखण्डिका द्रवखण्डः खण्ड इति लोके, खण्डः प्रसिद्धः। शर्करासितोपला तवराज इति लोके,गुडान्मत्स्यण्डिका ततः खण्डः ततः शर्करेति वैमल्योत्कर्षे शैत्यादिप्रकर्ष इत्यर्थः ॥ ४२ ॥

पूर्वोक्तमेव स्मारयति यथेति एषामिक्षुविकाराणां गौरवं वातपित्तहारित्वं गौरवं मधुरविपाकित्वमन्ये अन्येतु स्नेहलाघवशैत्यानीति पठन्ति मत्स्यण्डिकादीनां करणे अपनीयमानस्य मलस्य गुणमाह। योय इति स्वकोगुणः तेन तेनैव स्वकीयेन स्वकीयेनैव गुणेन को निर्देश्य इत्याह। तेषां विस्रावणो गुणः निर्देश्यः कथनीयः गुणः समलक्षारोऽवयवविशेषः कथं समलक्षारो गुणः कथ्यते उच्यते यो यो यस्य सम्बन्धी भवति तेषां मत्स्यण्डिकादीनां विस्रावणो गुणं निर्मलीकरणः स तु तद्गुणएव तत्सम्भूतत्वात्। शर्करायाः उत्कर्षमाह। सारेत्यादि ॥ ४३ ॥

मधुशर्करागुणमाह। मधुशर्करेति पाकात् कालान्तरशोषणाद्वा घनीभूतावयवं मधुशर्करातुल्यत्वात् मधुशर्करा इत्युच्यते छेदनीकफादीनां

यावत्य शर्कराः प्रोक्ताः सर्वा दाहप्रणाशनाः।
रक्तपित्तप्रशमनाश्छर्द्दिमूर्च्छातृषापहाः॥
रूक्षं मधूकपुष्पोत्थं फाणितं वातपित्तकृत्।
कफघ्नं मधुरं पाके कषायं वस्तिदूषणं॥ ४४॥

अथ मद्यवर्गः।

सर्वं पित्तकरं मद्यमम्लं दीपनरोचनं।
भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनं॥
पाके लघु विदाह्युष्णं तीक्ष्णमिन्द्रियबोधनं।
विकासि सृष्टविण्मूत्रं मृद्वीकाख्यं तस्य विशेषणं॥
माद्वीकमविदाहित्वान्मधुरान्वयतस्तथा।
रक्तपित्तेऽपि सततं बुधैर्न प्रतिषिध्यते॥
मधुरं तद्धि रूक्षञ्च कषायानुरसं लघु।
लघुपाकि सरं शोषविषमज्वरनाशनं॥
माद्वीकाल्पान्तरं किञ्चित् खार्जूरं वातकोपनं।
तदेवं विशदं रुच्यं कफघ्नं कर्षनं लघु॥

पिण्डीभूतानां भेदकारिणी यवासशर्करागुणमाह। यवासशर्करेति यवासकाथघनीभावात् शर्कराकार्य्या यवासशर्करा यवासक्वाथाद्या केचनीभावात् शर्कराकारा अवशिष्टशर्करागुणमाह। यावत्य इति मधुकफाणि तस्य गुणमाह। रूक्षमिति वस्तिदूषणमिति मूत्राशये वातादिप्रकोपकारि। इति इक्षुवर्गः॥ ४४॥

अथमद्यवर्गः अथ मद्यानि गुणकर्म्मभ्यां निर्द्दिशन्नाह। सर्वमिति सर्व्वं पैष्टिकं माद्वीकं गौड़ञ्च त्रिविधं हि मद्यं अम्लमिति लवणवर्ज्जं पञ्चरसत्वेऽपि अम्लस्योत्कटत्वादम्लकार्य्यकारित्वाच्चाम्लमित्युक्तं इन्द्रियबोधनं इन्द्रियपाटवकरं विकासिसन्धिबन्धविमोचकं सृष्टविण्मूत्रं विण्मूत्रप्रवर्त्तकं

कषायमधुरं हृद्यं सुगन्धीन्द्रियबोधनं ।
कासार्शोग्रहणीदोषमूत्राघातानिलापहा ॥
स्तन्यरक्तक्षयहिता सुरा बृंहणदीपनी ।
कासार्शो ग्रहणी श्वासप्रतिश्यायविनाशिनी ॥
श्वेता मूत्रकफस्तन्यरक्तमांसकरी सुरा ।
छर्द्यरोचकहृत्कुक्षितोदशूलप्रमर्हिनी ॥
प्रसन्ना कफवातार्शोविबन्धानाहनाशिनी ॥ ४५ ॥
पित्तलाल्पकफा रूक्षा यवैर्वातप्रकोपनी ॥
विष्टम्भिनी सुरागुर्वी श्लेष्मला तु मधुलिका ।
रूक्षा नातिकफा दृष्या पाचनी चाक्षिकी स्मृता ॥

एते सर्व्वे मद्यगुणाः । अथ तस्य विशेषणं । मार्द्वीकमाह । मार्द्वीकमिति मार्द्दिकमविदाहित्वादिति । मार्द्वीकं द्राक्षोद्भवं मधुरान्वयतः मधुरद्रव्यप्रभवत्वात् । खार्जूरमाह । मार्द्वीकेति अत्यान्तरं स्तोकभेदं कार्शनं कार्श्यकरं सुरागुणमाह । कासार्श इति सुरालोहितवर्णा पिष्टकिण्वकल्केन किञ्चित् कलुषा एते सर्व्वसुरागुणाः, श्वेतसुरामाह । कासार्श इत्यादिश्वेतसुराश्वेतपुनर्नवादिमूलशालिपिष्टकिण्वप्रभावा कतोलीति प्रसिद्धा । प्रसन्ना गुणमाह । छर्द्दीति तोदः पीड़ाशूलं द्वादशप्रकारमुक्तलक्षणं प्रसन्नासुराया मण्ड उपर्य्यच्छोभागः विबन्धो वातादीनामप्रवृत्तिः । आनाह उदरापूरः पिष्टसुरां कथयित्वा कुधान्यसुरामाह ॥ ४५ ॥

पित्तलेति यवरिति बहुवचनात् यवयविकातियवा गृह्यन्ते सवाततोदशूला मलस्याप्रवृत्तिर्विष्टम्भः अन्ये गुड़गुड़ाशब्दमाहुः यवकिण्वेन सुरेयम् । मधुलकमाह श्लेष्मलन्तु मधुलकमिति मधुलकः स्वल्पगोधूमो मध्यदेशे पीशीतिकेति ख्यातः मर्कटहस्ततृणं वा तृण वा तत्फलकिण्वं मधुलकं असञ्जातमद्यं मधुपुष्पोत्थमिति जेज्जटः आक्षिकीं सुरामाह ।

त्रिदोषो भेद्युष्णश्च कोहलो वदनप्रियः।
ग्राह्युष्णो जगलः पक्वा रूक्षस्तृट्कफशोफहृत्।
हृद्यः प्रवाहिकाटोपदुर्नामानिलशोषहृत्॥ ४६॥
वक्कसो हृतसारत्वाद्विष्टम्भी वातकोपनः॥
दीपनः सृष्टविण्मूत्रो विशदोऽल्पमदो गुरुः।
कषायो मधुरः सीधुर्गौडः पाचनदीपनः॥
शार्करो मधुरो रुच्यो दीपनो वस्तिशोधनः।
वातघ्नो मधुरः पाके हृद्य इन्द्रियबोधनः॥
तद्वत् पक्वरसः सीधुर्व्वलवर्णकरः सरः।
शोफघ्नो दीपनो हृद्यो रुच्यः श्लेष्मार्शसां हितः॥
कर्षनःशीतरसिकः श्वयथूदरनाशनः।
वर्णकृज्जरणः स्वर्य्यो विबन्धघ्नोऽर्शसां हितः॥

रूक्षेति अक्षस्य विभीतकस्य वल्कलैः सह कृता आक्षिकीवाक्कलीति केचित्तत्रापि स एवार्थः। कोहलगुणमाह। त्रिदोष इति यवशक्तुकृतः कोहलः कौहलिकेति लोके, अन्ये पुनर्भक्तसुरामाहुः यामेव पौण्ड्राः काञ्चनालीत्याहुः जगलगुणमाह। ग्राहीति जगलोऽधःकिण्वं मद्यस्यामो वहिस्त्यज्यते अन्ये किण्वभक्तसुराजगलमित्यूचिरे शोथहालेपे शोषः-क्षयः॥ ४६॥

वक्कसगुणमाह। वक्कस इति वक्कसो जगल एवौषधमात्रम्। गुड़शीधुमाह। कषायेति शीधुः सम्यक् इक्षुरसेन क्वथितेन धातक्यादि-वद्दपाग्रः कालान्तरेण निष्पन्नः किञ्चिद्गुड़च्छतावाप सम्यग्वाच्यः। शर्करा-शीधुमाह। शार्कर इति गुड़शर्करया खण्डशर्करया इति शार्करशीधुः इन्द्रियबोधनः इन्द्रियपाटवजनकः। पक्वरसशीधुमाह। तद्वदिति तद्वत् शार्करवत् पक्वरसः पक्वेक्षुरसादिनाकृतः अपक्वरसशीधुगुणमाह।

आक्षिकः पाण्डुरोगघ्नो व्रण्यः संग्राहको लघुः।
कषायमधुरः सीधुः पित्तघ्नोऽसृक्प्रसादनः॥
जाम्बवो बद्धनिष्यन्दस्तुवरो वातकोपनः।
तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत्॥
मुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशनः।
लघुमध्वासवश्छेदी मेहकुष्ठविषापहः।
तिक्तः कषायशोफघ्नस्तीक्ष्णः स्वादुरवातकृत्।
तीक्ष्णः कषायो मदकृद्दुर्नामकफगुल्महृत्॥
कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः॥ ४७॥
बल्यः पित्तहरो वर्ण्यो मृद्वीकेक्षुरसासवः॥
शीधुर्मधूकपुष्पोत्थो विदाह्यग्निबलप्रदः।

कार्शन इति शीतरसिकः अपक्वरसकृतं जरणोऽन्नादिपरिणामकारी आक्षिकशीधुमाह। आक्षिक इति विभीतकक्वाथगुड़कृतो धातकीकुसुमादिकृतसंस्कारः शीधुराक्षिकः द्रव्यप्रभवात् परमद्यापेक्षया प्रायशः पाण्डुरोगे व्रणे वा अविरुद्धः ग्राहित्वमप्येवं वाच्यम्। जाम्बवशीधुमाह जाम्बव इति जम्बूफलरसतुम्बरीक्वाथगुड़धातक्यादिकृतसंस्कारो जाम्बवः शीधुरुक्तः बद्धनिष्यन्दो बद्धमूत्रः तुवरः कषायः आसवमाह। तीक्ष्ण इति सुरासवः सुरया सूयते अथ तोयकार्य्यं क्रियते यस्मिन् स सुरासवः, स स्थिरमदः चिरकालमत्तताकारीमध्वासवमाह। लघ्विति मध्वासवो मधुगुड़ाभ्यां सन्धानं मैरेयसंज्ञकम्। त्रियोनिमासवमाह। तीक्ष्णं इति तत्र मैरेयो नाम सुरासवयोः प्रत्येकनिष्पादितयोरेकीकृत्य पुनःसाधनः मैरेयः। सुरापैष्टी आसवश्च गुड़योनिः मधु च देयमिति त्रियोनित्वं। यदि वा पैष्टिमध्वासवो गुड़श्चेति सन्धानात्त्रियोनित्वेन मैरेयो द्विविधो भवति॥ ४७॥

इक्षुरसासवमाह। बल्य इति मृद्वीकेक्षुरसासव इति द्वयमन्ये पठन्ति

रूक्षः कषायकफहृद्वातपित्तप्रकोपणः ॥
निर्द्दिशेद्रसतस्तान्यान् कन्दमूलफलासवान्।
नवं मद्यमभिष्यन्दि गुरु वातादिकोपनं ॥
अनिष्टगन्धं विरसमहृद्यञ्च विदाहि च।
सुगन्धि दीपनं हृद्यं रोचिष्णु क्रमिनाशनं ॥
स्फुटस्रोतस्करं जीर्णं लघु वातकफापहं।
अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः ॥
बहुदोषहरश्चैव दोषाणां शमनश्च सः।
दीपनं कफवातघ्नः सरः पित्तविरोधनः॥
शूलाध्मानोदरप्लीहज्वराजीर्णार्शसां हितः॥ ४८ ॥
पिप्पल्यादिकृतो गुल्मकफरोगहरः स्मृतः ॥

मार्द्वीकं मद्यमुक्तं यत्तु आसवः पुष्पयोनिं शीधुमाह। शीध्विति अत्र मधुकपुष्पोत्थे केचिद्गुडं नेच्छन्ति शीधुत्वाद्गुडमिच्छन्त्यन्ये अनुक्तसंग्रहायाह। निर्द्दिशेदिति। कन्दा इत्युपलक्षणं तेन काण्डत्वगासवा अपि गृह्यन्ते। नवमद्यस्य दोषमाह। नवमिति नवत्वमजातरसप्रसादत्वेन अन्येत्वनतीतसंवत्सरं नवमित्याहुः। जीर्णस्य गुणमाह। सुगन्धीति रोचिष्णुसाधुरोचते त्वमस्यापि रुचिकरं पुराणत्वं जातरसप्रसादनत्वेन गन्धादिसम्पत्त्या अतीतसंवत्सरं जीर्णमित्यन्ये। आसवप्रसङ्गेन सत्सदृशारिष्टगुणमाह। अरिष्ट इति द्रव्यसंयोगः अभयाचित्रकादिसंयोगः संस्काराच्च मद्यादधिककर्मता बहुदोषहरश्चैवेति दोषशब्दो व्याधिवाची दोषाणां शमन इत्यस्य भाष्यम्। कफवातघ्न इति पित्ताविरोधिन इति नञोऽपदर्थं तेन ईषत्पित्तं हन्तीति मन्यते बहुव्याधिहर इत्येतस्य तु भाष्यम्। शूलाध्मानोदरादीनां हित इति शूलादिके हित इत्यर्थः अन्ये कफवातघ्नत्व विशेषत इत्याहुः पिप्पल्याद्यरिष्टमाह॥ ४८ ॥

पिप्पल्यादीति शेषारिष्टानां स्थानमाह। चिकित्सितेष्विति अनुक्त-

चिकित्सितेषु वक्ष्यन्तेऽरिष्टा रोगहराः पृथक्।
अरिष्टासवसीधूनां गुणान् कर्माणि चादिशेत्॥
बुद्ध्वा यथास्वं संस्कारमवेक्ष्य कुशलो भिषक्।
सान्द्रं विदाहि दुर्गन्धं विरसं क्रिमिलं गुरु॥
अहृद्यं तरुणं तीक्ष्णमुष्णं दुर्भाजनस्थितं।
अल्पौषधं पर्य्युषितमत्यच्छं पिच्छिलञ्च यत्॥
तद्वर्ज्यं सर्व्वदा मद्यं किञ्चिच्छेषन्तु यद्भवेत्।
तत्र यत् स्तोकसम्भारं तरुणं पिच्छिलं गुरु॥
कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः।
पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च॥
अहृद्यं फेनिलं पूति क्रिमिलं विरसं गुरु।
तथा पर्य्युषितञ्चापि विद्यादनिलकोपनम्॥

संग्रहमाह। अरिष्टासवेति शीधुशब्देनात्र मद्यमाहुः द्रव्यप्रधानमरिष्टं द्रव्यप्रधान आसवः उभयप्रधानं मद्यं बुद्ध्वा अवेक्ष्य ज्ञात्वा यथास्वमिति यद्यस्य रोगाद्यपेक्षया इति द्रव्यसंस्कारादि एतेनारिष्टा एवंविधीयन्ते एवम्विधा यतो अतस्तदनुरूपं गुणकर्म्मवाच्यमित्यर्थः मद्यदोषमाह। सान्द्रमिति सान्द्रं घनं विदाहोऽस्यास्तीति विदाही जठराग्निसंयोगात् यः पाकमगच्छन् मध्यमायामेव पाकावस्थायां विदह्यमानः पित्तं कुर्वं श्चिरकालमवतिष्ठते शीघ्रं जरां याति गुरुत्वाद्वस्तुस्वभावाद्वा सविदाहयुक्तो भावो भण्यते इत्यागमिकाः अन्ये विदाहि विविधसन्तापकारीत्याहुः दुर्गन्धिकुत्सितगन्धं विरसं विरुद्धरसम् अनिष्टरसमित्यर्थः। क्रिमिलं क्रिमियुक्तं गुरुचिरपाकि अहृद्यमप्रियं अरुणं नवं तीक्ष्णं सुखेदुःखोत्पादकं उष्णं स्पर्शेन, दुर्भाजनस्थितं कुत्सितपात्रस्थम् अल्पौषधं स्तोकधातक्यादिकं पर्य्युषितं सन्धानभाण्डादन्यस्मिन् भाण्डे रात्रुषितम् अत्यच्छं अतितनुपिच्छिलं

सर्व्वदोषैरुपेतन्तु सर्वदोषप्रकोपणम्।
चिरस्थितं जातरसं दीपनं कफवातजित्॥
रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहम्॥ ६८॥
तस्यानेकप्रकारस्य मद्यस्य रसवीर्य्यतः॥
सौक्ष्म्यादौष्ण्याच्च तैक्ष्ण्याच्च विकासित्वाच्च वह्निना।
समेत्य हृदयं प्राप्य धमनीरूर्द्ध्वमागतम्॥
विक्षोभ्येन्द्रियचेतांसि वीर्य्यं मदयतेऽचिरात्।

गुरु। तत्रेति अत्रापि पित्तप्रकोपीति सम्बन्धः। स्तोकसम्भारं अल्पौषधं अहृद्यमिति पेलवम् अच्छम् अन्ये तरुणमाहुः। सर्वदोषैरिति सर्व्वदोषैः सान्द्रादिभिः दोषानभिधाय इदानीं मद्यस्य गुणमाह। चिरस्थितमिति प्रसन्नं निर्मलं सुरभिसुगन्धिमदावहं हर्षकारि पूर्वदोषान्वितं वर्ज्यम् एतद्गुणान्वितं सेव्यम्॥ ४८॥

इदानीं यथा मद्यं मदयति तदाह। तस्येति तस्यएवम्विधस्य मद्यस्य वीर्य्यं शक्तिहृदयमाप्याचिरेण मदयति हर्षयतीति सम्बन्धः। अनेकप्रकारत्वं मृद्वीकादियोनिभेदेन यथा रसवीर्य्यतश्च रसालवणवर्ज्याः वीर्य्यं उष्णरूक्षादि कथं मदयतीत्याह विक्षोभ्येन्द्रिय चेतांसीति विक्षोभ्य क्षोभयित्वा इन्द्रियाणि चक्षुरादीनि चेतोमनः किं विशिष्टं वीर्य्यं धमनीरूर्द्ध्वमागतमिति कथं पुनरस्य धमनीभिरूर्द्ध्वगमनं भवतीत्याह वह्निना समेत्य मिलित्वा स्वभावेनैव वह्नेरूर्द्ध्वगामित्वात्। कथं पुनस्तन्मद्यवीर्य्यं सूक्ष्माणि इन्द्रिय चेतांसिमदयतीत्याह सौक्ष्म्यादिति ऊर्द्ध्वगामित्व द्वितीयं हेतुमाह औष्ण्यादिति आग्नेय द्रव्यस्य स्वभावेनैवोर्द्ध्वगामित्वात्। कुतः पुनरचिरेण मद्यवीर्य्यं मदयतीत्याह। तैक्ष्ण्यादिति तीक्ष्णं हि द्रव्यमचिरकारी भवति मद्यवीर्य्यस्याचिरकारित्वे अपरमपि हेतुमाह विकाशित्वादिति विकाशित्वाच्चेति सन्धिबन्धविमोचकारि चकारेणानुक्तमपि लाघवमूर्द्ध्वगमने

चिरेण श्लैष्मिके पुंसि पानतो जायते मदः ॥
अचिराद्वातिके दृष्टः पैत्तिके शीघ्रमेव तु ॥ ५० ॥
सात्त्विके शौचदाक्षिण्यहर्षमण्डनलालसः ।
गीताध्ययनसौभाग्यसुरतोत्साहकृन्मदः ॥
राजसे दुःखशीलत्वमात्मत्यागंससाहसम् ।
कलहं सानुबन्धन्तु करोति पुरुषे मदः ॥
अशौचनिद्रामात्सर्य्यागम्यागमनलोलताः ।
असत्यभाषणञ्चापि कुर्य्याद्धि तामसे मदः ॥
रक्तपित्तकरं शुक्तं छर्दि भुक्तविपाचनम् ।
वैस्वर्य्यं जरणं श्लेष्मपाण्डुक्रिमिहरं लघु ॥
तीक्ष्णोष्णं मूत्रलं हृद्यं कफघ्नं कटुपाकि च ॥ ५१ ॥

हेतुः समुच्चीयते शारीरदोषेण मदभेदमाह । चिरेणेति श्लैष्मिके श्लेष्मप्रकृतिके वातिके वातप्रकृतिके पैत्तिके पित्तप्रकृतिके शीघ्रमेव चेति चकारात्तीक्ष्णश्च ॥ ५० ॥

मानसदोषेण मदभेदमाह । सात्त्विक इति सात्त्विके सत्त्वप्रकृतिके दाक्षिण्यं परापेक्षिणी प्रकृतिः लालसः अभिलाषुकः सुरतोत्साहः मैथुनोद्यमः । राजस इति राजसे रजःप्रकृतिके दुःखशालित्वं दुःखसेवित्वं आत्मत्यागं ससाहसं देहनाशनकारि साहसं । अनुबद्धं निरन्तरं मद्यकार्य्योमदोमत्ततेत्यर्थः । अशौचेति तामसे तामसप्रकृतिके मात्सर्य्यं परासहिष्णुता लोलता अभिलाषः शुक्तादिकर्माणि दर्शयन्नाह । रक्तपित्तकरमिति यदुक्तं यन्मस्त्वादि शुचौभाण्डे सगुड़क्षौद्रकाञ्जिकं । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते तच्चेक्षुरसमधुकपुष्पपीलुप्रभृतिभिः कषायव्यतिरेकेनासूयते कन्दाद्यासुतमपि शुक्तमाहुरन्ये छेदनं कफग्रन्थ्यादीनां वैस्वर्य्यं विस्वरत्वोत्पादकं जरणं आमस्य श्लेष्मपाण्डुः श्लेष्मोत्कटः पाण्डुरोग इत्यर्थः ॥ ५१ ॥

तद्वत्तदासुतं सर्वं रोचनञ्च विशेषतः॥
गौड़ानि रसशुक्तानि मधुशुक्तानि यानि च।
यथापूर्वं गुरुतराण्यभिष्यन्दकराणि च॥
तुषाम्बु दीपनं हृद्यं हृत्पाण्डुक्रिमिरोगनुत्।
ग्रहण्यर्शोविकारघ्नं भेदि सौवीरकं तथा॥
धान्याम्लं धान्ययोनित्वाद्दीपनं दाहनाशनं।
स्पर्शात्पानात्तु पवनकफतृष्णाहरं लघु॥
तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात्।
मुखवैरस्यदौर्गन्ध्यमलशोषक्लमापहं॥

शुक्तसन्धितानां कन्दादीनामपि शुक्तगुणमाह। तद्वदिति तद्वत् शुक्तवत् तदासुतं शुक्तसन्धितं कन्दादिकं शुक्तस्य योनिभेदेन गुणमाह। गौड़ानीति गौड़ानि गुड़ोद्भवानि। गुड़ाम्बुना स तैलेन सन्धानकाञ्जिकन्तु यत्। कन्दशाकफलैर्युक्तं गुड़शुक्तं तदुच्यते। रसशुक्तानि इक्षुरसादिकृतानि गुड़शुक्तवदिक्षुरशुक्तं सन्धेयं मधुशुक्तं तु जम्बीरस फलरसं पिप्पलीमूलसंयुतं मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत्। त्र्यहेण तज्जातरसं मधुशुक्तमुदाहृतम्। मधुभाण्ड इति मधुपूर्णप्राये भाण्डे इत्यर्थः। अथवा मधूनि कृत्वा भाण्डे निक्षिप्येति योज्यं। मद्यशुक्तमुच्यते सर्वं मद्यं पच्चरसं कालान्तरवशाद् यदा। त्यक्तान्यवसमम्लत्वं याति शुक्तं तदुच्यते चकारेण धान्ययोनिशुक्तमप्यस्तीति समुच्चीयते। यो यः पूर्व्वो यथापूर्व्वं मद्यशुक्तापेक्षया रसशुक्तं गुरु तदपेक्षया गौड़मित्यर्थः। दोषधातुमलस्रोतसां क्लेदप्राप्तिजननमभिष्यन्दिः। तुषाम्बु दीपनमिति काञ्जिकभेदावेतौ तुषांबु सौवीरके विरेचनाध्यायोक्तेऽपि सन्धानसामान्यादधिकगुणकर्म्मदर्शनायेहोक्तिः धान्याम्लमाह। धान्याम्लमिति धान्याम्लं काञ्जिकं शालिजीर्णाह्नको द्रवादिकृतं मतं जीवनं प्राणधारणं शाल्यादिकृतत्वाद् दाहनाशनं स्पर्शेण पानाच्च

दीपनं जरणं भेदि हितमास्थापनेषु च ।
समुद्रमाश्रितानाञ्च जनानां सात्म्यमुच्यते ॥ ५२ ॥

अथ मूत्राणि ।

गोमहिषाजाविगजहयखरोष्ट्राणां तीक्ष्णानि कट्न्युष्णानि तिक्तानि लवणानुरसानि लघूनि शोधनानि कफवातक्रिमिमेदोविषगुल्मार्शउदरकुष्ठशोफारोचकपाण्डुरोगहराणि हृद्यानि दीपनानि च सामान्यतः ।

भवन्ति चात्र ।

तत्सर्वं कटुतीक्ष्णोष्णं लवणानुरसं लघु ।
शोधनं कफवातघ्नं क्रिमिमेदो विषापहम् ॥
अर्शो जठरगुल्मघ्नं शोफारोचकनाशनम् ।
पाण्डुरोगहरं भेदि हृद्यं दीपनपाचनम् ॥
गोमूत्रं कटुतीक्ष्णोष्णं स क्षारत्वान्न वातलम् ।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥
शूलगुल्मोदरानाह विरेकास्थापनादिषु ।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ॥

पवनकफतृष्णाहरमिति पानात् सवायुं कफम् । तयोस्तृष्णां हरतीत्यर्थः, वैरस्यं मुखस्य, जरणं पाचनं, आस्थापनेषु निरूहेषु इति मध्यवर्गः ॥ ५२ ॥

अथ मूत्राण्युच्यन्ते । अथ मूत्राणीति अष्टानामपि मूत्राणां सामान्यगुणमाह । तीक्ष्णानीति शोधनानि मलशुद्धिकराणि तत्सर्वमित्यादिपद्योक्तत्वान्न द्विरुक्तं गोमूत्रगुणमाह । गोमूत्रमिति गोमूत्रं गोरेव न तु वृषस्य महिषी साहचर्यात् न हि तत्र मह्विषेति पाठः अथवा वृद्धव्यवहारादित्येके आचार्यास्तु गोमहिष्याजावीनां स्त्रीणाम् । गजहयखरोष्ट्र-

दुर्नामोदरशूलेषु कुष्ठमेहाविशुद्धिषु।
आनाहशोफगुल्मेषु पाण्डुरोगे च माहिषम्॥
कासश्वासापहं शोषकामलापाण्डुरोगनुत्।
कटुतिक्तान्वितं छागमीषन्मारुतकोपनम्॥
कासप्लीहोदरश्वासशोषवर्च्चोग्रहे हितम्।
स क्षारन्तिक्तकटुकमुष्णं वातघ्नमाविकम्॥
दीपनं कटुतीक्ष्णोष्णं वातचेतोविकारनुत्।
आश्वं कफहरं मूत्रं क्रिमिदद्रुषु शस्यते॥
सतिक्तं लवणं भेदि वातघ्नं पित्तकोपनम्।
तीक्ष्णं क्षारे किलासे च नागं मूत्रं प्रयोजयेत॥
गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत्।
दीपनं गार्द्दभं मूत्रं क्रिमिवातकफापहम्॥
शोफकुष्ठोदरोन्मादमारुतक्रिमिनाशनम्।
अर्शोघ्नं कारभं मूत्रं मानषन्तु विषापहम्॥
द्रवद्रव्याणि सर्वाणि समासात् कीर्त्तितानि तु।
कालदेशविभागज्ञो नृपतेर्दातुमर्हति॥ ५३॥

मानुषाणां पुनःपुंसाम्। अनुक्तव्यक्तिके तु मूत्रपाठे उभयोरपि मूत्राणि ग्राह्याणि यत्र तु युक्त्या स्त्रीपुरुषनिर्द्देशः तत्र तस्यैवेति निश्चीतवन्तः। माहिषमाह। दुर्नामेति अविशुद्धिर्वमनादीनां छागमूत्रमाह। कासश्वासापहमिति मेषमाह। कासेत्यादि आश्वमाह दीपनमिति चेतो विकारः उन्मादादयः गजमूत्रमाह। स तिक्तलवणमिति किलासं पाण्डुरं कुष्ठं गर्द्दभमाह। गरचेत इति गरः कृत्रिमं विषं कारभमाह। शोफकुष्ठोदरेति। कारभमोष्ट्रम्। मानुषमाह मानुषमिति। कारभं मानुषञ्च

षट्चत्वारिंशत्तमोऽध्यायः।

अथातोऽन्नपानविधिमध्यायं व्याख्यास्यामः।

धन्वन्तरिमभिवाद्य सुश्रुत उवाच प्रागभिहितं प्राणिनां पुनर्मूलमाहारो बलवर्णौजसां च स षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयिणो द्रव्यरसगुणवीर्य्यविपाकनिमित्ते च क्षयवृद्धी दोषधातूनां साम्यञ्च। ब्रह्मादेरपि च लोकस्याहारः स्थित्युत्पत्तिविनाशहेतुराहारादेवाभिवृद्धिर्बलमारोग्यम्। वर्णेन्द्रियप्रसादश्च तथाहारवैषम्यादस्वास्थ्यम्।

मूत्रविषापहमित्यर्थः। मानुषमष्टानां मूत्राणां मध्ये अनुद्दिष्टमपि तत्सर्वमित्यनेनैव पूर्वोक्तेन सूचितत्वाद्विवृतम् उक्तानुक्तद्रवानामूहार्थमाह। द्रवद्रव्याणीति देशकालविभागश इति वैद्य इति शेषः॥ ५३॥

इति सूत्रस्थाने निबन्धसंग्रहे पञ्चचत्वारिंशत्तमोऽध्यायः।

अन्नं शाल्यादिपानम् अनुपानादिविधिर्विधानं कल्पनं प्रकारो वा अत्र शिष्यो गुरुं प्रति प्रश्नं कुर्वन्नाह। धन्वन्तरिमिति अभिवाद्य नमस्कृत्य उवाच उक्तवान् विमुक्तवानित्याह। प्रागभिहितमित्यादिमूलं कारणं स इति आहारः निमित्ते चेति चकारादिन्द्रियार्थाः कालो विहारश्चेति त्रयं समुच्चीयते। दोषाणामित्युपलक्षणम्। रसो दोष धात्वादीनामित्यर्थः। आहारस्य सर्व्वापेक्षणीयतामाह। ब्रह्मादेरित्यादि स्थितिरवस्थानं उत्पत्तिजन्म, विनाशः प्रलयः उत्पत्तिहेतुरपि सम्यगुपयोगात् प्रधानधातूत्पत्तेः विनाशहेतुश्च मिथ्योपयोगात् देवानां स्थितिहेतुरेव जरायुजानां स्थित्युत्पत्तिविनाशानां त्रयाणामपि हेतुः ध्यानाहारत्वेऽपि ब्रह्मादेर्योगादिद्वारेण तृप्तिसम्भवादमृतप्राशार्थमाहारः स्थितिहेतुतामेव विवृण्वन्नाह।

तस्याशितपीतलीढ़खादितस्य नानाद्रव्यात्मकस्यानेकविधविकल्पस्यानेकविधप्रभावस्य पृथक् पृथक् द्रव्यरसगुणवीर्य्यविपाकप्रभावकर्माणीच्छामि ज्ञातुं न ह्यनवबुद्धस्वभावा भिषजः स्वस्थानुवृत्तिं रोगनिग्रहणञ्च कर्त्तुं समर्थाः। आहारमूलाश्च सर्वप्राणिनो यस्मात्तस्मादन्नपानविधिमुपदिशतु मे भगवन्नित्युक्तः प्रोवाच भगवान् धन्वन्तरिरथखलु वत्स सुश्रुत यथाप्रश्नमुच्यमानमुपधारयस्व ॥ १ ॥

तत्र लोहितकशालिकलमकर्द्दमकपाण्डुकसुगन्धकशकुना-

आहारादेवेति अभिवृद्धिः शरीरस्य बलमुत्साहोपचयलक्षणम् आरोग्यं स्वास्थ्यलक्षणं वर्णो गौरादिः इन्द्रियाणां प्रसादं स्वस्व विषयग्रहणसामर्थ्यम्। वैषम्यमन्यथोपयोगः अस्वास्थ्यं दोषादिवैषम्यम्। अस्य चातुर्विध्यमाह। अशितं भोज्यमोदनादिपीतं पेयं क्षीरादिः लीढ़ं लेह्यं मध्वादिखादितं भक्ष्यं मोदकादिनानाद्रव्यात्मकस्येति बहुविधपृथिव्यादिद्रव्यारब्धस्य अनेकविधविकल्पस्य अनेकविधामण्डपेया विलेपी भक्तादयो विकल्पाः प्रकारा यस्य स तथा अनेकविधप्रभावस्य नानाप्रकारशक्तिकस्य न हीति हि यस्मादर्थोऽनवबुद्धस्वभावा आहारस्य अज्ञातस्वरूपाः भिषजो वैद्याः भगवानिति धन्वन्तरिं प्रतिपूजावचनम् उत्तरमाह। उक्त इति उक्तः पूर्व्वोक्तवचनैः प्रेरितः प्रोवाच उक्तवान् अथेति मङ्गले खलुवाक्यालङ्कारे ॥ १ ॥

लोहितशालिः रक्तशालिः कलमोन्तर्वेद्यां कलविरिति लोके कर्द्दमक इति सातिशये पङ्के निष्पद्यते इति कर्द्दमको लोकतोऽवगन्तव्यः पाण्डुक इति पाण्डुतुषः पाण्डुशूकश्च पाण्डुकः सुगन्धको देवशालिः पाञ्चाले शकुनाहृतः उत्तरकुरोः सकाशाद्ब सैवानीतः अवन्त्यां नगर्यां स एव वक्रनाम्ना प्रसिद्धः मगधदेशे तु पाशक इति वृद्धवैद्यास्तु द्वीपान्तरात् समानीतो गरुड़ेन महात्मना। शकुनाहृतः स शालि

हृतपुष्पाण्डकपुण्डरीकमहाशालिशीतभीरुकरोध्रपुष्पकदीर्घ-शूककाञ्चनकमहिष-मस्तक-हायनकदूषकमहादूषक-प्रभृतयः शालयः ॥ २ ॥

मधुरा वीर्य्यतः शीता लघुपाका बलावहाः ।
पित्तघ्नाल्पानिलकफाः स्निग्धा बद्धाल्पवर्च्चसः ॥

स्याद् गरुड़ापरनामकाः इत्याहुः । पुष्पानीव सुगन्धानि सुकुमारा-ण्यण्डानि तण्डुलानि यस्य स पुष्पाण्डको लोकतोऽवगन्तव्यः पुण्डरीकं श्वेतपद्मं तत्सदृशः सौकुमार्य्यवर्णसौरभैर्य स पुण्डरीकः देवग्रहादेव बहु-पोषकनामा महातण्डुलको महाशालिः शीतादिभेतीत्येवं शीतभीरुको लोकादवगन्तव्यः रोध्रपुष्पाकाराः शूका यस्य स रोध्रपुष्पकः दीर्घाः शूका यस्य स दीर्घशूकः काञ्चनकः स्वर्णशालिः महिषशूको मध्यदेशे तिलवासीति प्रसिद्धः हायनकः शकुवाक इति लोके जेज्जटस्तु घोटकपुच्छ इत्याह दूषक महादूषको लोकादवगन्तव्यौ प्रभृतिग्रहणात् यवक नैषधादयः । शालय इति अकण्डिकशुक्ला हैमन्ता अन्ये तु कण्डित शुक्लाश्च अकण्डित-शुक्लाश्च हैमन्ताशालयः ग्रैष्मा अषष्टिकाः प्रायेण गर्भपाकाः षष्टिका इत्यन्ये वार्षिकास्तु व्रीहयः कण्डितशुक्लास्तु व्रीहय इत्यन्ये अत्र लोहित-शाल्यादयस्तेषु तेषु देशेषु तैर्नामभिः प्रसिद्धाः एकमेव हि द्रव्यं नाना-देशेषु नानाशब्दैरभिधीयते यथा वहवोऽन्नं भक्तमाहुः दक्षिणात्यास्कूर-मिति तत्र दाक्षिणात्येषु भक्तसंज्ञा चैव प्रसिद्धाः तदितरेषु पुनः कूरसंज्ञेति तस्मात्तु सुकूराणि कुधान्यानि नानादेशकृषीवलेभ्यो ज्ञेयानि मृगास्तु नानादेशीय व्याधेभ्यः शाकुनिकेभ्यः पक्षिणः कन्दमूलफलाशिभ्यो वनेचर-तपस्विभ्यः कन्दमूलफलानि शाकानि तु ग्राम्यारन्यवासिभ्यः कृतान्नानि तु सूदेभ्यः भेषजद्रव्याणि पुनर्वणिग्भ्यः अक्रेयाणि पुनर्मूलादीनि तापसवने-चरेभ्य इति ॥ २ ॥

तत्र शालीनां सामान्यगुणनाह; मधुरा इत्यादि पूर्वं हि द्रव्यं

तेषां लोहितकः श्रेष्ठो दोषघ्नः शुक्रमूत्रलः।
चक्षुष्यो वर्णबलकृत् स्वर्य्यो हृद्यः श्रमापहः॥
व्रण्यो ज्वरहरश्चैव सर्वदोषविषापहः।
तस्मादल्पान्तरगुणाः क्रमशः शालयोऽवराः॥ ३॥

षष्टिककाङ्गुकमुकुन्दकपीतक-प्रमोद-काकलकासनपुष्पक-महाषष्टिकचूर्णककुरवककेदारकप्रभृतयः षष्टिकाः।
रसे पाके च मधुरा शमना वातपित्तयोः।
शालीनाञ्च गुणैस्तुल्या बृंहणाः कफशुक्रलाः॥
षष्टिकः प्रवरस्तेषां कषायानुरसो लघुः।
मृदुः स्निग्धस्त्रिदोषघ्नः स्थैर्य्यकृद्बलवर्द्धनः॥

रसगुणवीर्य्यविपाककर्म्माण्यभिज्ञातुमिच्छुनां तदेव दर्शयति तत्र लोहित इत्यादि यावद् दूषकमहादूषकप्रभृतयः शालय इति द्रव्यनिर्देशः मधुरा इति रसनिर्देशः शीता इति वीर्य्यनिर्देशः लघुपाका इति पाकनिर्देशः पित्तघ्ना इत्यादि स्वकर्म्मनिर्देशः अल्पानिलकफाः अल्पं वातं श्लेष्माणञ्च कुर्वन्तीत्यर्थः। लोहितशालिगुणमाह। तेषामिति दोषघ्नस्त्रिदोषघ्नः सर्वदोषेति दोषशब्दो व्याधिषु वर्त्तते शालीनां तारतम्यमाह। तस्मादिति तस्माल्लोहितशालेः अल्पान्तरगुणा इति अल्पमन्तरं भेदः क्रमेणावरत्वेन येषां ते तथोक्ताः गुणशब्दः कर्म्मवाची क्रमशोऽवरा इति क्रमात् क्रमात्हीना इत्यर्थः॥ ३॥

षष्टिकानाह। षष्टिकेति अन्ते षष्टिकाभिधानं सर्वेषां षष्टिकत्वसूचनार्थं षष्टिको गौरषष्टिकः मुकुन्दककालकासनपुष्पककुरवककेदाराः कृष्णषष्टिकाः शेषा गौरकृष्णा इति प्रभृतिग्रहणाच्चीनदुर्दरशारदादयः षष्टिको व्रीहिभेद एव षष्ठिको व्रीहिषु श्रेष्ठः इत्युक्तत्वात् किन्तु व्रीहिस्त्विरपाकी षष्टिकस्तु शीघ्रपाकी गौरषष्टिकगुणमाह। षष्टिक इति स्थैर्य्यकृद्दृढाङ्ग्यकृत्

विपाके मधुरो ग्राही तुल्यो लोहितशालिभिः।
शेषास्त्वल्पान्तरगुणाः षष्टिकाः क्रमशो गुणैः॥ ४॥
कृष्णव्रीहिशालामुखजतुमुखनन्दी-मुखलावाक्षकत्वरित-
ककुक्कुटाण्डकपारावतकपाटलप्रभृतयो व्रीहयः।
कषायमधुराः पाके मधुरा वीर्य्यतोऽहिमाः।
अल्पाभिष्यन्दिनस्तुल्याः षष्टिकैर्बद्धवर्च्चसः॥
कृष्णव्रीहिर्वरस्तेषां कषायानुरसो लघुः।
तस्मादल्पान्तरगुणाः क्रमशो व्रीहयोऽपरे॥
दग्धायामवनौ जाताः शालयो लघुपाकिनः।
कषाया बद्धविण्मूत्रा रूक्षाः श्लेष्मापकर्षणाः॥

तारुण्यस्यापक्रो वा। शेषास्त्विति अल्पान्तरास्तोकभेदाः गुणैः क्रत्वा तस्माद् गौरवष्ठिकात्॥ ४॥

व्रीहिविशेषानाह। कृष्णव्रीहीति कृष्णव्रीहि कृष्णमुखतण्डुलः शालामुखः कृष्णशुक्लाकारतण्डुलः जतुलाक्षा तदाकृतिमुखं यस्यासौजतु-मुखः नन्दीमुखः आटीचञ्चुसदृशमुखतण्डुलाः लावाक्षिसदृशतण्डुलो लावाक्षः। षष्ठिकवत् त्वरितं पच्यत इति त्वरितकः कुक्कुट्या अण्डानीव वर्णेन वर्त्तुलतया च तण्डुला यस्य स कुक्कुटाण्डकः पारावतवत्शुक्लतण्डुल-पारावतः पाटला पुष्पवर्णव्रीहिः पाटला प्रभृतिग्रहणात् खञ्जरीट-खञ्जनकक्षौमकादयो गृह्यन्ते कषाया मधुरा रसे अमधुरा पाके अम्ला इत्यर्थः। वीर्य्यतोऽहिमा उष्णा इत्यर्थः। अल्पाभिष्यन्दिन इति पूर्वकतुल्याः। षष्ठिकैरिति एतेन कुधान्येभ्यः एषामुत्कर्षः सूच्यते न तु षष्ठिकानां गुणकारिता चरकाद्यैस्त्रिदोषकारित्वेन पाटलस्योक्तत्वात् अनार्षोऽयं पाठ इति जेज्जटः। पाटलाशब्दो व्रीही सामान्ये विशेषे च वर्त्तत इति विशेषवाचिनास्त्रिदोषकर्त्तृत्वम्। सामान्येन हद्देस्तु उक्त

स्थलजाः कफपित्तघ्नाः कषायाः कटुकान्वयाः।
किञ्चित् सतिक्तमधुराः पवनानलवर्द्धनाः॥ ५॥
कैदारा मधुरा वृष्या बल्याः पित्तनिवर्हणाः।
ईषत्कषायाल्पमला गुरवः कफशुक्रलाः॥
रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः।
अदाहिना दोषहरा बल्या मूत्रविवर्द्धनाः॥
शालयश्छिन्नरूढ़ा ये रुक्षास्ते बद्धवर्चसः।
तिक्ताः कषायाः पित्तघ्नाः लघुपाकाः कफावहाः॥
विस्तरेणायमुद्दिष्टः शालिवर्गो हिताहितः।
तदनु कुधान्यमुद्गादिमाषादीनाञ्च वक्ष्यते॥ ६॥

एव गुण इति गयी य स्त्रिदोषकारी पाटलस्तत्र जात्यन्तरम् अयन्तु यथोक्तगुण इति वलदेवः। अथ कृष्ण व्रीहि व्रीहि गुणमाह। कृष्णव्रीहीति अथ भूमिद्वारेण गुणमाह। कृष्णायामिति दग्धायामवणीजाता इति दग्धभूमावुत्पन्नाः। स्थलजेति स्थलजा जाङ्गलभूमिसम्भवाः सतिक्तमधुराः। ईषत्तिक्तमधुराः पवनानलवर्द्धना इति अत्र किञ्चिच्छब्दः सम्बध्यते॥ ५॥

कैदारेति। कैदारा अनूपजा इत्यर्थः वृष्याः शुक्रवैरचनिकाः शुक्रलाः शुक्रवृद्धिकराः रोप्यातिरोप्यगुणमाह। रोप्येति ये शालयः एकवारमुत्पाट्याशु अन्यत्र रोप्यन्ते ते रोप्याः ये तु द्वि स्त्रिर्वा अन्यत्र रोप्यन्तेऽतिरोप्याः मूत्रविवर्द्धना इति अदाहित्वात् मूत्रला इत्येके अन्ये तु मूत्रविवर्द्धना मूत्राय कर्षणाः प्रमेहिना इत्यर्थः। छिन्नरूढ़शालिगुणमाह। शालय इति छिन्नरूढ़ा इति पूर्वं छिन्ना पश्चाद्रूढ़ा इत्यर्थः। उक्तसंहारमाह। विस्तरेणेति उद्दिष्टः संक्षेपेण कथितः अयं शालिवर्गः किं विशिष्टः शालिवर्गः विस्तरेण सह सविस्तर इत्यर्थः सविस्तरता च वक्ष्यमाणश्लोकेन दर्शिता तद्यथा धान्येष्विति अत हि अप्रमेयादिति आनन्त्यादित्यर्थः। इति शालिवर्गः॥ ६॥

अथ कुधान्यवर्गः ।

कोरदूषकश्यामाकनीवारशान्तनुवरकोद्दालकप्रियङ्गु-मधूलिकानान्दीमुखीकुरुविन्दगवेधुकवरुकतोदपर्णीमुकुन्दकवेणुयवप्रभृतयः कुधान्यविशेषाः ॥ ७ ॥

उष्णाः कषायमधुरा रूक्षाः कटुविपाकिनः ।
श्लेष्मघ्ना बद्धनिष्यन्दा वातपित्तप्रकोपणाः ॥

तद्वदिति । सविस्तारेणापि कुधान्यानां मुद्गादीनां माषादीनाञ्च उद्देशमात्रमेव भविष्यतीत्यर्थः माषादीनाञ्चेति चकारेण मांसफलशाकवर्गेषु चोद्देशमात्रमेव भविष्यतीत्यनुक्तं समुच्चीयते अनेन पाठेन मुद्गादीनां धान्यत्वं सूच्यते तेन मुद्गादयः शिम्बिधान्येष्वपि पठ्यन्ते कुत्सितानि धान्यानि कुधान्यानि, कुधान्यान्याह । कोरदूषक इति कोरदूषकः कोद्रवः श्यावः श्यामाक उष्ट्रश्यामाकः हस्तिश्यामाकश्चेति श्यामाकशब्देन तोयश्यामक उच्यते उष्ट्रश्यामाकः स्थूलश्यामाकः हस्तिश्यामकः श्यामिकेति लोके नीवारः उड़िलिकाधान्यं तत्द्विविधम् एकं धान्यसदृशविटपं धान्यक्षेत्रजं द्वितीयं महादलकाण्डन्तु सलिलजं सलिलवृद्धिमात्रस्तम्बे प्ररोहं रक्तशूकं च तदेव प्रशान्तिकेति तन्त्रान्तरेऽपि पठ्यते उद्दालको वनकोद्रवः वरको वर्वटिकाशाकश्चरी भूमौ प्रायशः प्रियङ्गुः कङ्गुलिकेति लोके मधुलिकामर्कटहस्ततृणं तद्भेदा नन्दीमुखी कुरुविन्दो व्रीहि गुरुः गवेधुकस्तृणविशेषः गलगोधूम इति लोके देशान्तरे तु गरल इति लोके अन्ये तु प्रभृतिग्रहणाद् गवेधुकशब्दं गृह्णन्ति सरः सरकर्णिका वरकः वरु इति लोके अन्ये तु वरकशब्दं प्रभृतिग्रहणाद्गृह्णन्ति तोदपर्णी मुकुन्दो मुलुन्दः वेणुयवो वंशफलं शेषाणि तु वनचारिभ्यो ज्ञेयानि । प्रभृतिग्रहणेन कण्टोजोत्रलिकादयः ॥ ७ ॥

बद्धनिष्यन्दा बद्धमूत्राः तेषामेव केषाञ्चिद्विशेषिकं गुणमाह । कषायमधुरा इति स कोरदूषः श्यामक इति केचित् पठन्ति तत्र बहुवचनं

कषायमधुरास्तेषां शीतपित्तापहाः स्मृताः।
कोद्रवश्च सनीवारः श्यामाकश्च सशान्तनुः॥
कृष्णा रक्ताश्च पीताश्च श्वेताश्चैव प्रियङ्गवः।
यथोत्तरं प्रधानाः स्यू रूक्षाः कफहराः स्मृताः॥
मधूली मधुरा शीता स्निग्धा नान्दीमुखी तथा।
विशेषो तत्र भूयिष्ठं वरकः समुकुन्दकः॥
रूक्षा वेणुयवा ज्ञेया वीर्य्योष्णाः कटुपाकिनः।
बद्धमूत्राः कफहराः कषाया वातकोपनाः॥ ८॥
मुद्गवनमुद्गकलायमकुष्ठमसूरमङ्गल्यचणक सतीनत्रिपुट-
कहरेणवाढकीप्रभृतयो वैदलाः॥ ९॥

श्यामाकानां त्रिविधत्वात् कङ्गुलीगुणमाह। कृष्णेति प्राधान्यं कफहरत्वादि गुणापेक्षम्। मधुलिकेति नन्दीमुखगुणमाह। मधुलीति तथा मधुरशीतस्निग्धेत्यर्थः। वरकमुकुन्दकयोर्गुणमाह। विशेषेति विशेषी· द्रवधातोः भूयिष्ठमतिशयेन। वेणुयवगुणमाह। रूक्षेति कुधान्यानां सार्गिकगुणप्रस्तावे बद्धनिष्यन्दा इत्युक्तेऽपि वेणुयवा बद्धमूत्रा इति पृथक्कृत्य यदुक्तं तदतिशयप्रतिपादनार्थं॥ ८॥

शमीधान्यानि गुणकर्मभ्यां निर्दिशन्नाह। मुद्गेति मुद्गा नानाविधा हरितपीतकृष्णरक्तभेदेन वनमुद्गस्तु वने जायते कृष्णमुद्ग इति प्रसिद्धः मुद्गिकेति लोके। कलायास्त्रिपुटाः मकुष्ठको मोथः मसूराः द्विविधाः कृष्णाः पाण्डुराश्च तत्र कृष्णवर्णा मसूराभिधानाः पाण्डुवर्णा मङ्गल्यकाभिधानाः चणकः प्रसिद्धः सतीनो वर्त्तुलकः खल्वास्त्रिपुटाः हरेणुः खल्ववर्त्तुलः आढ़की तुवरी वैदला इति संज्ञा पुनर्दयार्थेन वैदलसंज्ञा एवं हि विद्लानामिति वैदला इति माषकुलत्थादिष्वपि वैदलत्वं स्यात् तेन वल्लूरं मूलकं मत्स्यान् शुष्कशाकानि वैदलम्। वर्जयेच्चालुकं गुल्मी मधुराणि

कषायमधुराः शीताः कटुपाका मरुत्कराः।
बद्धमूत्रपुरीषाश्च पित्तश्लेष्महरास्तथा॥
नात्यर्थं वातलास्तेषु मुद्गा दृष्टिप्रसादनाः।
प्रधाना हरितास्तत्र वन्या मुद्गसमाः स्मृताः॥
विपाके मधुराः प्रोक्ता मसूरा बद्धवर्चसः।
मकुष्ठकाः क्रिमिकराः कलायाः प्रचुरानिलाः॥
आढ़की कफपित्तघ्नी नातिवातप्रकोपणी।
वातलाः शीतमधुराः सकषाया विरूक्षणाः॥
कफशोणितपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः।
हरेणवः सतीनाश्च विज्ञेया बद्धवर्चसः।
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः॥
माषो गुरुर्भिन्नपुरीषमूत्रः स्निग्धोष्णवृष्योमधुरोऽनिलघ्नः।
सन्तर्पणः स्तन्यकरो विशेषाद्बलप्रदः शुक्रकफावहश्च॥

फलानि चेत्यादिषु वैदलत्वेन मुद्गादिषु निषेधः तेन गुल्मेषु माषकुलत्थादयो न निषिध्यन्ते न हिते वैदलाः॥ ८॥

मुद्गगुणमाह। नात्यर्थमिति मसूरगुणमाह। विपाक इति मकुष्ठगुणमाह। मकुष्ठका इति कालायगुणमाह। कलाया इति आढ़कीगुणमाह आढ़कीति चणक गुणमाह। वातला इति हरेणु सतीनानाञ्चाह। हरेणव इति ऋतेमुद्गमसूरयोराध्मानकरत्वमाह। ऋत इति ऋते विनामुद्गमसूरयोः स्वजात्यपेक्षया आध्माननिषेधः न पुनः सर्वथाध्माननिषेधः। वैदलत्वेनाग्राह्यान् माषादीनाह। माष इति भिन्नपुरीषमूत्रं द्रवपुरीषमूत्रं सन्तर्पणस्तृप्तिकरः, बलमुपचयशक्तिलक्षणः, वृष्यत्वं शुक्रलत्वं स्रुति। स्रुतिवृद्धिकरत्वं न पित्तकफावहति क्वचित्। राजमाषानाह रे कषायेति अल्पसान्द्रो राजमाषः कषायरसप्रभावात् कफहारित्वमवृष्यत्वं

कषायभावान्न पुरीषभेदी न मूत्रलो नैव कफस्य कर्त्ता।
स्वादुर्विपाके मधुरोऽलसान्द्रः सन्तर्पणः स्तन्यरुचिप्रदश्च ॥
माषैः समानं फलमात्मगुप्तमुक्तञ्च काकाण्डफलं तथैव ॥१०॥
आरण्यमाषागुणतः प्रदिष्टा रूक्षाः कषाया अविदाहिनश्च।
उष्णः कुलत्थो रसतः कषायः कटुर्विपाके कफमारुतघ्नः।
शुक्राश्मरीगुल्मनिषूदनश्च संग्राहकः पीनसकासहारी॥
आनाहमेदोगुदकीलहिक्काश्वासापहः शोणितपित्तकृच्च।
कफस्य हन्ता नयनामयघ्नो विशेषतो वन्यकुलत्थ उक्तः॥
ईषत्कषायो मधुरः सतिक्तः संग्राहकःपित्तकरस्तथोष्णः।
तिलोविपाके मधुरो बलिष्ठः स्निग्धो व्रणालेपन एव पथ्यः॥
दन्त्योऽग्निमेधाजननोऽल्पमूत्रस्त्वच्योऽथ केश्योऽनिलहा गुरुश्च।
तिलेषु सर्वेष्वसितः प्रधानो मध्यः सितो हीनतरास्तथान्ये॥११॥

च ज्ञेयम्। स्वादुरिति रसे। आत्मगुप्तकाकाण्डयोर्गुणमाह। माषैरिति आत्मगुप्तः कपिकच्छुः तस्य फलमात्मगुप्तं काकाण्डः फलं अश्वकः कपिकच्छु, सदृशसिम्बः काकाण्डः शूकर सिम्बीति लोके॥ १०॥

आरण्य माष गुणमाह। आरण्य माषेति आरण्यमाषाणां रूक्षत्वा-विदाहित्वे च स्वजात्यपेक्षया। कुलत्थानाह। उष्ण इति उष्णवीर्य्येण कफमारुतघ्न इति कफमारुतौभिन्नौ मिलितौ हन्तीत्यर्थः। वन्यकुलत्थमाह। आनाहेति गुदकिलःअर्शांसि, तिलमाह। ईषदिति ईषत् कषायोऽनुरस-त्वेन मधुरो मुख्यरसेन ईषत्तिक्तोऽनुरसत्वेन च व्रणलेपन एव पथ्य इति एतेन तिलानामालेपन एव व्रणे पथ्यत्वम्। अभ्यवहारेषु पुनरपथ्यत्वमेव अन्ये पुनःस्निग्धोव्रणे सर्वत एव पथ्य इति पठन्ति सर्वत इति पञ्चदशधाप्रसर प्रदुष्टेष्वित्यर्थः अन्ये तु हिमशीतोक्तेभ्यो दोष हन्तृभ्यो लेपेभ्यः सर्वेभ्यः पथ्यतम इत्यर्थः। दन्तेभ्योहितो दन्त्यः त्वचेहितस्त्वच्यः केशेभ्योहितः केश्यः।

यव: कषायो मधुरो हिमश्च कटुर्विपाके कफपित्तहारी।
व्रणेषु पथ्यस्तिलवच्च नित्यं प्रबद्धमूत्रो बहुवातवर्चा:॥
स्थैर्य्याग्निमेधास्वरवर्णकृच्च स पिच्छिल: स्थूलविलेखनश्च।
मेदोमरुत्तृड्हरणोऽतिरूक्ष: प्रसादन: शोणितपित्तयोश्च॥
एभिर्गुणैर्हीनतरांस्तु किञ्चिद्विद्याद्यवेभ्योऽतियवान्
विशेषै:॥ १२॥
गोधूम उक्तो मधुरो गुरुश्च बल्य: स्थिर: शुक्ररुचिप्रदश्च॥
स्निग्धोऽतिशीतोऽनिलपित्तहन्ता सन्धानकृत् श्लेष्मकर: सरश्च।

तिलानामुत्तममध्यमाधमत्वमाह। तिलेष्विति, असित: कृष्ण:, सित:-श्वेत:, अन्ये इति पीत हरित: लोहिता:॥ ११॥

यवमाह। यव इति हिमश्चेति चकार: कषायानन्तरं बोद्धव्यम्। तेन मधुररसाच्चकार समुच्चितं कषायत्वं हीनमिति ज्ञेयम्। व्रणेषु पथ्यस्तिलवदिति तिलो यथा व्रणे लेप: वातपित्तकफेषु च शस्यते तथा यवोऽपि नित्यमिति बहुवचनेन अविदग्ध विदग्धाभिन्नाशुद्धत्वाद्य-वस्थास्वित्यर्थ:। अन्ये तु नित्यग्रहणेन व्रणे यव अभ्यवहारेणापि हितमि-च्छन्ति प्रबद्धमूत्रोऽल्पमूत्र: अतएव प्रमेहिणां हित: बहुवातवर्चा इति वातोऽत्र कुक्षिवातोऽभिप्रेत: अन्यथा मेदोमरुत्तृड्हरण इति विरुध्यते-स्थैर्य्यं वय:स्थापनकारित्वं मेदोमरुत्तृड्हरण इति मेदोवातं तृष्णाञ्च हन्तीत्यर्थ: यद्वा मेदसावृतो एव मरुन्मेदोमरुतं सावरणं हन्तिस्रोत:-शोधकत्वात् निरावरणे तु रूक्षशीतकषाय कटुपाकैर्नाति वर्द्धको नाति-प्रत्यनीक: यवोऽकषाय इति केचित् तन्नेषत् कषाय इत्यर्थ: अतियव गुण-माह। एभिरिति अतियवा: नि:शूका: कृष्णारुणयवा एव अशेषैर्गुणै-रतियवान् विद्यादित्यर्थ: अन्ये तु पठन्ति यवेभ्योऽपि यवान् शेषान् इति ततातियवयविकादयोऽशेषशब्दवाच्या: तत्र यविका नि:शूका: स्वल्पा:॥१२॥

गोधूमगुणमाह। गोधूमिति स्थिर: वय:स्थापनकारी स्निग्धोऽति शीत

रुक्षः कषायो विषशोफशुक्रबलासदृष्टिक्षयकृद्विदाही ॥
कटुर्विपाके मधुरस्तु शिम्बः प्रभिन्नविण्मारुतपित्तलश्च ।
सितासिताः पीतकरक्तवर्णा भवन्ति येऽनेकविधास्तु शिम्बाः ॥
यथोदितास्ते गुणतः प्रधाना ज्ञेयाः कटूष्णा रसपाकयोश्च ।
सहाह्वयं मूलकजाश्च शिम्बाः कुशिम्बिवल्लीप्रभवास्तु शिम्बाः ॥
ज्ञेया विपाके मधुरा रसे च बलप्रदाः पित्तनिवर्हणाश्च ।
विदाहवन्तश्च भृशञ्च रुक्षा विष्टभ्य जीर्य्यन्त्यनिलप्रदाश्च ॥
रुचिप्रदाश्चैव सुदुर्ज्जराश्च
सर्वे स्मृता वैदलिकास्तु शिम्बाः ।
कटुर्विपाके कटुकः कफघ्नो
विदाहिभावादहितः कुसुम्भः ॥ १३ ॥

इति अतिशब्दः काकाक्षिगोलकवदुभयत्रापि सम्बध्यते श्लेष्मकर इति नवगोधूमः पुराणगोधूमस्तु वसन्तेष्युपयोगार्हत्वान्नश्लेष्मकरः सामान्य सिम्बिगुणमाह । रुक्ष इति विषशोषमेहेति केचित् पठन्ति वर्णविशेषेण शिम्बादीनां गुणमाह । सितेति सिताः शुक्लाः असिताः कृष्णाः यथोदितास्ते गुणतः प्रधाना इति असितात् कृष्णात्, सितः प्रधानः, पीतादसितः प्रधान रक्तादपिपीतः गुणैः रसवीर्य्यविपाकलक्षणैः प्रधानाः श्रेष्ठाः । अन्ये तु यथोदितास्तेगुणतःस्तथार्द्रा इति पठन्ति अत्रायमर्थ ये शिम्बा येन प्रकारेण रसपाकयोरुदिताः ते तथैवार्द्रा ज्ञेयाः, न तु शुष्काः । सहाह्वयमिति सहाह्वयं मुद्गपर्णी माषपर्ण्यौमूलकजाश्च शिम्बा इति मूलकशिम्बी कुशिम्बीवल्लीढ़ासुशुकशिम्बः अन्ये तु मूलकपार्णिकाश्चेति पठन्ति तत्र मूलकपर्णी शोभाञ्जकः । इदानीं वैदलानां मुद्गादीनां सतीनान्तानामसार्द्रशिम्बी गुणमाह । विदाहवन्तश्चेति विष्टभ्यजीर्य्यन्ति गुड़गुड़ा शब्दं कृत्वा पाकं गच्छन्तीत्यर्थः वैदलिकास्तु शिम्बाः । मुद्गादीनामार्द्रफणिकाः शुष्क निर्गत्वचान्तु प्रागुक्त एव गुणः शमीधान्य सामान्यादेव कुसुम्भातसी-

उष्णातसीस्वादुरसाऽनिलघ्नी
पित्तोल्वणा स्यात् कटुका विपाके।
पाके रसे चापि कटुः प्रदिष्टः
सिद्धार्थकः शोणितपित्तकोपी॥
तीक्ष्णोष्णरूक्षः कफमारुतघ्न-
स्तथागुणश्चासितसर्षपोऽपि॥
अनार्त्तवं व्याधिहतमपर्य्यागतमेव च।
अभूमिजं नवञ्चापि न धान्यं गुणवत् स्मृतम्॥
नवं धान्यमभिष्यन्दि लघु संवत्सरोषितम्।
विदाहि गुरु विष्टम्भि विरूढं दृष्टिदूषणम्॥

सर्षपगुणमाह। कटुर्विपाक इति रसे च पाके च कटुक इत्यर्थः मधुराऽनिलघ्न इत्यन्ये पठन्ति॥ १२॥

उष्णातसीति सिद्धार्थकः श्वेतसर्षप रक्तसर्षपः गुणमाह। तथेति असितसर्षपः रक्तसर्षपः योज्यमाह। अनार्त्तवमिति अनार्त्तवमन्यर्त्तुजातम्। व्याधिहतं कुङ्कमादिना हतं अपर्य्यागतमपक्वम्। अभूमिजं ऊषरोपलकादि सविषभूमिजम्। यस्य धान्यस्य याचोचिताभूमिः ततोऽन्येत्यपरेनवं चापीति चकारेण नवस्यानतिदोषकारितासूच्यते धान्यशब्देन शूकशमीधान्यानि गृह्यन्ते नवादीनां गुणमाह। नवमिति वर्षं यावत् अभिष्यन्दिदोषधातुमलस्रोतसां क्लेदप्राप्तिजननं लघुसम्वत् सरोषितमिति लघुपुराणमिति वाच्येऽलसम्वत्सरोषितमिति यत् करोति-तज्ज्ञापयति प्रथमवर्षादूर्द्ध्वं द्वितीयं वर्षं यावत् पुराणं गुणवच्च भवति तदूर्द्ध्वन्तुनीरसत्वान्न गुणकरमिति उक्तञ्च वर्षोषितं सर्वधान्यं परित्यजति-गौरवम्। न तु त्यजति तद्वीर्य्यं क्रमशो विजहाति तत्। माषचणकादयस्तु नूतना एव स्वकार्य्यकरणसमर्था इत्येके। विरूढमाह विदाहीति

शाल्यादेः सर्षपान्तस्य विविधस्यास्य भागशः।
कालप्रमाणसंस्कारमात्राः सम्परिकीर्त्तिताः ॥१४॥

अत ऊर्द्धं मांसवर्गानुपदेक्ष्यामः।

तद्यथा। जलेशया आनुपा ग्राम्याः क्रव्यभुज एकशफा जाङ्गलाश्चेति षण्मांसवर्गास्तेषां वर्गाणामुत्तरोत्तरं प्रधानतमाः। ते पुनर्द्विविधा जाङ्गला आनुपाश्चेति। तत्र जाङ्गलवर्गोऽष्टविधः। तद्यथा। जङ्घालाविष्किराः प्रतुदा गुहाशयाः प्रसहाः पर्णमृगा विलेशया ग्राम्याश्चेति तेषां जङ्घालविष्किरौ प्रधानतमौ तावेणहरिणर्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करमृगमातृकाप्रभृतयो

विरुद्धमङ्कुरजननशक्तिरहितमित्यर्थः अन्ये विरूढमङ्कुरितमित्याहुः। ईषद्भृष्टं चनकमुद्गादि विरूढमाहुरपरे उपसंहारमाह। शाल्यादेरिति भागशः कालप्रमाणं सम्वत्सरोषितमित्यन्ये नोक्तं संस्कारो यथा गुरोरपिव्रीहेः संस्कारवशाल्लाजालघवः मात्रापुनरग्निबलापेक्षिणी हीना मध्यमोत्तमा चेति लघुपथ्यतमं प्रोक्तं गुरुपथ्यसमं स्मृतम्। यत्पाकं गच्छति क्षिप्रं तत्तल्लघुतरं स्मृतम्। इति कुधान्यवर्गः ॥ १४ ॥

अन्नं भक्तरूपं चोक्तं प्रधानव्यञ्जनं मांसमाह। यद्यथेति ग्राम्यशब्देन एकशफशब्देन च ग्राम्याः। शफः खुर क्रव्यभुक्शब्देन च गुहाशयाः प्रसहाश्चक्रव्यं मांसं जाङ्गल शब्देन जङ्घानविष्किर प्रतुदपर्णमृग विलेशया इति तयोरस्य भेदाः षट्स्वेवान्तर्भूता संख्येय निर्द्देशादेव षट्संख्यायां लब्धायां षड्ग्रहणं प्रतुदादिभेदाहि एतेष्वेवावरुध्यन्ते तेन षड्वर्गा इति नियमार्थम्। अन्यऽपि जङ्घालादि भेदाभविष्यन्तीति सूचनार्थमित्यपरे अयम् षड भेदः संक्षेपेनोत्तरोत्तरप्राधान्यज्ञापनाय वर्गाणामुत्तरोत्तर-

जङ्घालामृगाः कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च ॥ ॥१५॥

कषायो मधुरो हृद्यः पित्तासृक्कफरोगहा ।
संग्राही रोचको वल्यस्तेषामेणो ज्वरापहः ॥
मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः ।
शीतलो वद्धविण्मूत्रः सुगन्धिर्हरिणो लघुः ॥
एणः कृष्णस्तयोर्ज्ञेयो हरिणस्ताम्र उच्यते ।
न कृष्णो न च ताम्रश्च कुरङ्गः सोऽभिधीयते ॥
शीतासृक्पित्तशमनी विज्ञेया मृगमातृका ।
सन्निपातक्षयश्वासकासहिक्काऽरुचिप्रनुत् ॥ १६ ॥

प्राधान्यमाह । एतेषामिति पुनर्द्वैविध्यमाह । ते पुनरिति द्वैविध्यकथनं जाङ्गलत्वेनानूपत्वेन च वक्ष्यमाणभेदानां गुणानुगमायजाङ्गलस्याष्टविधत्वमाह । तत्रेति ते सर्वे अत्रैव वक्ष्यन्ते तेषां मध्ये कस्य प्राधान्यमित्याह । तेषामिति तारेणेत्यादिना यौ जङ्घालविष्किरौ कथ्येते इत्यर्थः । एणः कृष्णहरिणः, हरिणो गौरहरिणः, ऋक्षो निलाण्डः रोझ इति प्रसिद्धः कुरङ्गश्चतुरो गतिः चतुरङ्ग इति लोके करालोऽधोनिष्क्रान्तः दन्तः हिमवदादिपर्वतेषु कस्तुरी मृग इति लोके कृतमालाः वहवः सङ्घातचारिणो मृगाः देशान्तरे लोकादवगन्तव्याः शरभोऽष्टापदः उष्ट्रप्रमाणो महाशृङ्गः पृष्ठगतचतुष्पादः काश्मीरे प्रसिद्धः श्वदंष्ट्रा चतुर्दंष्ट्रोऽतिदुष्टः कर्कटक इति कार्त्तिकपुरे पृषतो विन्दु चित्रितः चित्तल इति लोके चारुष्कः चारुशरीरः स्वल्पतनुः मृगभेद एव मृगमातृका अल्पा पृथूदरा चतुरङ्गस्त्रीभेदुनीति लोके प्रभृतिग्रहणात् कोटकारकरमाद्यः जङ्घाला इति प्रशस्तजङ्घावन्तः ॥ १५ ॥

तेषां सामान्यगुणमाह । कषायेत्यादि तीक्ष्णा इति तीक्ष्णगुणकर्मत्वात् वस्तिशोधना इति अश्मरी शर्करामूत्रकृच्छ्रमूत्राघातादिषु पथ्या मूत्रविरेककारिण इत्यर्थः । तेषां मध्ये कृष्णहरिणगुणमाह । मधुर इति बद्धविण्मूत्र

लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनप्तृकावातीकचकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रककुतित्तिरिकुरवालुकयवलकप्रभृतयस्त्वाहृता विष्किरा लघवः शीतमधुराः कषाया दोषशमनाश्च।

संग्राही दीपनश्चैव कषायमधुरो लघुः।
लावः कटुविपाकश्च सन्निपाते च पूजितः॥
ईषद्गुरूष्णमधुरो वृष्यो मेधाग्निवर्द्धनः।
तित्तिरिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः॥
हिक्काश्वासानिलहरो विशेषाद्गौरतित्तिरिः।
रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः॥
कफोत्थेषु च रोगेषु मन्दवाते च शस्यते।
वातपित्तहरा वृष्या मेधाग्निबलवर्द्धनाः॥

इति एतेनातीसारिणां प्रमेहिणाञ्च हित इत्युक्तं एणस्तु प्रमेहिणामहितः। वस्तिविशोधनत्वात् सूत्रेण एणहरिणयोर्भेदमाह॥ एण इति। मृगमातृकामाह। शीताश्चगिति॥ १६॥

लावः प्रसिद्धः तित्तिरिकृष्णतित्तिरिः चित्रपचः कपिञ्जलो गौरतित्तिरिः वर्त्तिरः कपिञ्जलाणुकः कपिञ्जलादल्पो वर्त्तिकातः किञ्चिन्महान् वर्त्तिकसदृश एव घर्घरा इति लोके वर्त्तिका वर्त्तिकौ तद्भेदौ नप्तृका लोके घुडुरकाभिधाम्रहुङ्कारकारिणीम् अल्पा पाण्डुरोदरावर्त्तिको वर्त्तिचटकाः स्वल्पाः सङ्घातचारिणः बगेड़ा इति लोके चकोरो रक्ताक्षो विषसूचकः स्वनाम्ना ख्यातः कलविङ्कः कालचटकः भृङ्गराजाद्भिन्नः अपरे भृङ्गराजमाहुः अन्ये तु रक्तशिरसं कृष्णग्रीवं ग्रामचटकाकारं कलविङ्कमाहुः मयूरः प्रसिद्धः क्रकरोलावान्तकः कपिञ्जलात् स्थूलः कय इति लोके उपचक्रः क्रकरभेदः कृशचक्षुर्मदाविलः कुक्कुटः प्रसिद्धः सारङ्गश्चातकः अन्ये कृष्णकर्बुरचातकाकारो विष्किरः शतपत्रो दार्वा-

लघवः क्रकरा हृद्यास्तथा चैवोपचक्रकाः ।
कषायः स्वादुलवणस्त्वच्यः केश्योऽरुचिमर्दः ॥
मयूरः स्वरमेधाग्निदृक्श्रोत्रेन्द्रियदार्ढ्यकृत् ।
स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावहः ॥
वृंहणः कुक्कुटो वन्यस्तद्वद्ग्राम्यो गुरुस्तु सः ।
वातरोगक्षयवमीविषमज्वरनाशनः ॥ १७ ॥
कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्गगृहकुलि-

वाटः काष्ठकुट्टक इति लोके कुतित्तिरितित्तिरिभेदः पाण्डुः कपिलः कुरुवाहकः कुरकुरकः यवालको यवगुड़गुडुकः प्रभृतिग्रहणेनैवंजातीयाः, विकीर्य्यभक्षयन्तीति विष्किराः, वर्गौ स्वादुरसावेतौ कषायानुरसौ लघु । वातपित्तहरौ नातिशीतलौ वस्तिशोधनौ । त्रिभिश्चरणयुगलचञ्चुभिराहृत्य विलिखन्ति तथाह लाटाना इति जेज्जटः, एतेषां सामान्य- गुणमाह । लाघवः शीतमधुरा इत्यादि अन्ये लावादिवर्त्तिकादिवर्गयोर्गुणान् श्लोकेन पठन्ति ॥ वर्गाविति । अत्रापि स एवार्थः तेषां मध्ये लावकगुणमाह । संग्राहीति सान्निपाते तु पूजित इति पूजितः प्रशस्त इत्यर्थः पूज्यत्वं सामान्यगुणकथने दोषशमन इति वचनादत्र सन्निपातवचनात् वातादीन् समस्तानऽपिहन्तीत्यर्थः । अथवा सन्निपातज्वरे निवृत्ते पुनरागमननिवृत्तये प्रयोज्य इत्यर्थः । अत्र केचित् पठन्ति । गौरिक इति गौरिकपांशुलौ प्रसिद्धौ पौण्ड्रकदर्भकौ देशान्तरे लोकादवगन्तव्यौ । तित्तिरिर्व्याख्यातः अस्यापि केचित् गैरिकपांशुलपौण्ड्रकदर्भरभेदेन गुणान् पृथक्भिन्नान् पठन्ति एतच्च न बहुसम्मतम् । तस्मान्न पठन्ति । कृष्णतित्तिरिगुणमाह । ईषदिति ईषद्गुरुत्वं लाघवापेक्षया सर्वग्रहणं रक्तदुष्टिप्रशमनार्थे । गौरतित्तिरिगुणमाह । रक्तेति क्रकरगुणमाह ॥ वातपित्तेति उपचक्रगुणमाह । तथेति क्रकरसदृशगुणा इत्यर्थः । मयूरगुणमाह । कषाय इति दृक्श्रोत्रेन्द्रियदार्ढ्यकारीत्यर्थः वनकुक्कुटमाह । तद्वदिति वनकुक्कुटवदित्यर्थः गुरुस्तु इति वन्योऽपि गुरुः, ग्राम्यस्तु गुरुतर इत्यर्थः ॥ १७ ॥

भृङ्गगोच्चोड़कडिण्डिमानकशतपत्रकमातृनिन्दकभेदाशिशुकसा-
रिकावल्गुलीगिरिशालट्टालट्टूषकसुगृहीखञ्जरीटकहारीत-
दात्यूहप्रभृतयः प्रतुदाः ॥

कषायमधुरा रूक्षाः फलाहारा मरुत्कराः।
पित्तश्लेष्महराः शीता बद्धमूत्राल्पवर्चसः ॥
सर्वदोषकरस्तेषां भेदाशी मलदूषकः।
कषायस्वादुलवणो गुरुः काणकपोतकः ॥
रक्तपित्तप्रशमनः कषायविशदोऽपि च।
विपाके मधुरश्चापि गुरुः पारावतः स्मृतः ॥

प्रतुदानाह। कपोतेति कपोतो वनवासी पाण्डुक इति लोके स च नानाविधः पारावतो गृहदेवकुलालयः भृङ्गराजो भ्रमरको धूम्याटसदृशः पक्षिराज इति लोके, परभृतः कोकिलः कोयष्टिः कोपङ्गका दीर्घजङ्घा कोपङ्ग इति लोके कुलिङ्गो वनचटको ग्राम्य चटकाकारः गृहकुलिङ्ग पुण्ड्रचटकः ग्रामचटक इति लोके गोच्चोड़ो गोनर्दः डिण्डिमानवको डिण्डिमोत्कटध्वनिः शतपत्रो राजशुकः मातृनिन्दकः प्रियात्मकः पुत्र-रञ्जक इति लोके भेदाशी पुत्रशुकः भेकाशीति केचित् तत्रापि स एवार्थः शुकसारिके प्रसिद्धे वल्गुलो गदुलिकेति लोके गिरिशा गिरिवर्त्तिका पर्वतवासीत्येके नेदाकेञ्जीतकः रक्तपुच्छाधो भागः अन्ये भरद्वाजभेद-माहुः लाट इति लोके न दूषको द्वितीयफिञ्जातकः अन्ये सञ्चान चञ्च्वाकृतिः चञ्चुभागदीर्घपुच्छादिलक्षणेन प्रतुदं विहङ्गमाहुः सुगृहपीतमस्तकोय वा इति लोके खञ्जरीटः सितासितवर्णो द्रुतललितगतिः कवाड़िया इति लोके हरीतको हरितपीतवर्णः हारिताष इति लोके दात्यूहकः कालकण्ठकः वायुक इति लोके प्रभृतिग्रहणात् गोपापुत्रसारपदेन्द्रादयश्चरकोक्ताः प्रतुदाः प्रतुद्यभक्षयन्तीति हेतोः। एषां सामान्यगुणमाह। कषाये-त्यादिफलाहारत्वेन मरुत्करा इति फलाहारत्वं स्वभावकथनं वातकरत्वं

कुलिङ्गो मधुरः स्निग्धः कफशुक्रविवर्द्धनः।
रक्तपित्तहरो वेश्मकुलिङ्गस्त्वतिशुक्रलः॥ १८॥
सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्ज्जारशृगालमृगेर्वारुकप्रभृतयो गुहाशयाः।
मधुरा गुरवः स्निग्धा बल्या मारुतनाशनाः।
उष्णवीर्य्या हिता नित्यं नेत्रगुह्यविकारिणां॥
काककङ्ककुररचाषभासशशघात्युलूकचिल्लिश्येनगृध्रप्रभृतयः प्रसहा।

घनकलायादिवत् किन्तु मात्रापेक्षया न वातघ्नन्तीत्यर्थः तेषां मध्ये भेदाशिगुणमाह। सर्वदोषकरस्तेषामिति मलदूषक इति वातादिदोषजननो मूत्रादिमलदूषकश्चेति स्वभावेन दोषाणां मलानाञ्च दूषयितेत्यर्थः। केचित् सर्वदोषकरस्थाने सर्वदोषहर इति प्रमादपाठं दृष्ट्वा सर्वदोषहरहरस्य च मलदूषकत्वासम्भवभयेन मलदूषकस्थाने गलदूषक इति पठन्ति तच्च प्रमादजत्वात्त्याज्यम्। काणकपोतगुणमाह। कषाय इति चकारोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः तेन काणकपोतोऽपि त्रिदोषकोपनो मलदूषयितेति चकारेण पूर्वानुवृत्तं समुच्चीयते काणकपोतो वनवासी पाण्डुकपोतः अन्ये अरुणवर्णकमपि कपोतमाहुः। पारावतगुणमाह रक्तेत्यादि विशदः पिच्छिलः विपरितः। गृहकुलिङ्गगुणमाह। कुलिङ्ग इति। रक्तेति वेश्मगृहं॥ १८॥

गुहाशयानाह। सिंहेत्यादिसिंहः पराक्रमी निद्रालुः व्याघ्रो विकृतमुखो निद्रालुः हिंस्रः। वृकः कुक्कुरसदृशः पशुः चुद्रः, तरक्षुः मृगशत्रुः व्याघ्रविशेषः जरख इति लोके, मार्ज्जारो विडालः, अत्र चर्ममार्ज्जारो गुहाशयत्वात् अरण्यविडालो बोद्धव्यः शृगालः प्रसिद्धः। मृगेर्वारुः मृगभक्षः शृगालाकृतिः हरिणादुर इति लोके प्रभृतिग्रहणाद्धातादबभ्रुप्रभृतयः। गुहासु पर्वतविवरेषु शेरत इति गुहाशयाः तेषां सामा-

एते सिंहादिभिः सर्व्वे समाना वायसादयः।
रसवीर्य्यविपाकेषु विशेषाच्छोणिते हिताः॥

मद्गुमूषिकवृक्षशायिकावकुशपूतिघासवानरप्रभृतयः पर्णमृगाः।

मधुरा गुरवो वृष्याश्चक्षुष्याः शोषिणे हिताः।
सृष्टमूत्रपुरीषाश्च कासार्शःश्वासनाशनाः॥
समुद्रजेभ्यो नादेया वृंहणत्वाद्गुणोत्तराः॥ १८॥

न्यगुणमाह मधुरा इत्यादिप्रसहानाह। काकेत्यादिकाकः प्रसिद्धः, कङ्को दीर्घचञ्चुर्महाप्रमाणः चक्रच कङ्कः स्यात् कङ्कमल्लाख्यो वाणपत्राह्वे पत्रकः लोहपृष्ठो दीर्घपादः पक्षाधः पाण्डुवर्णभागिति। कुररश्चिरबिल्वाकारः नदीत्थापितमत्स्यः कुरमत्स्यः ग्राहीकुवल इति लोके प्रसिद्धः। चाष इन्द्रनीलमणिसदृशपक्षः प्रस्तदर्शनः कारटाशन इति लोके प्रसिद्धः भासो गोकुलवारी गृध्रविशेषः श्वेतशिखावान्, शशघाती चिरबल्वाकारो महाचरणनखः प्रहारेण शशकाहरणशीलः शशाग्निरिति लोके प्रसिद्धः अन्ये पाजीत्याहुः उलूकः कौशिकः। चिरल्लिचिल्लः। श्येनसिञ्चानो गरुडान्वयः गृध्रो मांसाशी यो जन दृष्टिः प्रभृतिग्रहणेन धूमात्तांशीकरपत्रिकादयो गृह्यन्ते। प्रसह्य भक्षयन्तीति प्रसहाः तेषां सामान्यं गुणमाह एते इत्यादि एते वायसादयः सिंहादिभिः समानास्तुल्या इति सम्बन्धः वायसः काकः केषु समाना इत्याह रसवीर्यविपाकेषु विशेषादतिशयेन शोषिणे राजयक्ष्मिणे। पर्णमृगानाह। मुद्गेति मुद्गमूषिको मालुयासर्पः अन्ये तु मुद्गमूषिको भिन्नावाचचेते अत्र मुद्गः पूर्वार्थ एव मूषिको वृक्षमूषिकः वृक्षशायिका वृक्षमर्कटिकागिलीति लोके अवकुशो गोलाङ्गुलो वानरविशेषः पूतिघासो वृक्षबिड़ालः सुगन्धिद्रव्यः कर्पूरक इति लोके वानरो मर्कटः प्रभृतिग्रहणादेवं जातीया अन्येऽपि प्रायेण वृक्षशायित्वात् पर्णमृगाः, एतेषां सामान्यगुणमाह। मधुरा इत्यादि॥ १८॥

श्वाविच्छल्यकगोधाशशष्टषदंशलोपाकलोमशकर्णकद-
लीमृगप्रियकाऽजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो विले-
शयाः।
वर्च्चोमूत्रं संहतं कुर्य्युरेते वीर्य्ये चोष्णाः पूर्ववत्स्वादुपाकाः।
वातं हन्युः श्लेष्मपित्ते च कुर्य्युः स्निग्धाः कासश्वासकार्श्यापहश्च

कषायमधुरस्तेषां शशः पित्तकफापहः।
नातिशीतलवीर्य्यत्वाद्वातसाधारणो मतः॥
गोधा विपाके मधुरा कषायकटुका स्मृता।
वातपित्तप्रशमनी बृंहणी बलवर्द्धनी॥
शल्यकः स्वादुपित्तघ्नो लघुः शीतो विषापहः।
प्रियको मारुते पथ्योऽजगरस्त्वर्शसां हितः॥
दुर्नामानिलदोषघ्नाः कृमिदूषीविषापहाः।
चक्षुष्या मधुराः पाके सर्पा मेधाग्निवर्द्धनाः॥

विलेशयानाह। श्वाविदिति श्वावित्सूचीसदृशरोमयुक्तासिंहेति लोके शल्यको वृहन्नकुलः वृहद्गोधानुकारी सालेति लोके गोधाशशौ प्रसिद्धौ वृषदंशोग्राममार्ज्जारः अन्ये वनमार्ज्जारमाहुः लोपाकः शृगालभेदः लाङ्गलक इति लोके लोमशकर्णो नलतृकारः कदली महाविड़ालसमो व्याघ्राकारः कदलीहण्ड इति पौण्ड्रे प्रसिद्धः अन्ये सर्पविशेषमाहुः अपरे कदलीमृगमिति समस्तं पठन्ति तत्रापि स एवार्थः मृगप्रियकोगोनसः अजगरो महासर्पः सर्पः पुनरल्पो राजीलमण्डलीदर्वीकरभेदात् त्रिविधः मूषिको भूमिमूषिकः नकुलो भुजङ्गशत्रुः तद्भेदो महावभ्रुः प्रभृतिग्रहणाद्गण्डकजाहकप्रभृतयोऽपि द्रष्टव्याः विलशायित्वात् विलेशयाः एतेषां सामान्यगुणमाह वर्च्च इत्यादि संहतं सान्द्रं अन्ये तु संग्राहका वद्धमूत्रा इति पठन्ति तेषामेव केषाञ्चिदेव गुणविशेषमाह। कषा-

दर्व्वीकरा दीपकाश्च तेषूक्ताः कटुपाकिनः।
मधुराश्चातिचक्षुष्याः सृष्टविण्मूत्रमारुताः॥ २०॥
अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः॥
ग्राम्या वातहराः सर्वे बृंहणाः कफपित्तलाः।
मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः॥
नातिशीतो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः।
छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः॥
बृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु।
मेदःपुच्छोद्भवं हृष्यमौरभसदृशं गुणैः॥

येति वातेन साधारणो मध्यस्थः साधारणदेशवत् न चायं वातं कोपयति न वातशमं करोति माधुर्य्यादात्मशमहेतुः कषायाच्च शैत्याच्च आहतु-रिति साधारणत्वम्। गोधेत्यादिदूषीविषाश्रया इति विषमेव दावाग्निः वातातपाद्यभिभवेन मन्दतां गतं, विषपीतस्य वा विषं दूषीविषम्। सर्पाः सामान्यसर्पाः। दर्व्वीति दर्व्वीफलकरा इत्यर्थः दीपका राजि-मन्तः॥ २०॥

ग्राम्यानाह। अश्वाश्वतरेति अश्वो घोटकः। अश्वायां गर्द्दभेन जनितो-ऽश्वतरः वेसर इति लोके गौः प्रसिद्धाः खरो गर्दभः उष्ट्रः करभः वस्तः छगलः उरभ्रो मेषः मेदःपुच्छको दुम्बकः अन्ये लड़कमाहुः प्रभृतिग्रह-णात् वेकप्रभृतयः, प्रायो ग्रामवासित्वाद्ग्राम्याः तेषां सामान्यं गुणमाह ग्राम्या वातहरा इति अथ छगलगुणमाह। नातिशीतेति अल्पस्नेह गौर-वाभ्यामल्पकफ उष्णानुबन्धादल्पशैत्यादल्पपित्तः कटुतिक्तव्यायामाल्पाम्बु-सेवनादनभिष्यन्दी दोषधातुमलस्रोतसामल्पक्लेदप्राप्तिजनन इत्यर्थः। तेषां गुणमाह बृंहणमिति औरभ्रं मांसं यद्यपि पित्तश्लेष्मकरमलोक्तं तथापि सातिशयं पित्तश्लेष्माणां च करोतीति विप्रचण्डाचार्य्यमतं। मेदःपुच्छ-गुणमाह। मेद इति, गव्यगुणमाह। श्वासकासेत्यादि सलवणमोषलवणं

श्वासकासप्रतिश्यायविषमज्वरनाशनं।
अमात्यग्निहितं गव्यं पवित्रमनिलापहं॥
औरभ्रवत्सलवणं मांसमेकशफोद्भवं।
अल्पाभिस्यन्द्ययं वर्गो जाङ्गलः समुदाहृतः॥
दूरे जनान्तनिलया दूरे पानीयगोचराः।
ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो मताः॥
अतीवासन्ननिलयाः समीपोदकगोचराः।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते॥ २१॥

आनूपवर्गस्तु पञ्चविधः। तद्यथा। कुलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति। तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोन्द्रन्यङ्कु-अरण्यगवयप्रभृतयः कुलचराः पशवः।

शफः खुरः। अल्पेत्यादि सर्वेषामेव जाङ्गलानामल्पाभिष्यन्दित्वं माभूदित्याह। दूर इति जनशब्दोऽत्र ग्रामवाची तेन दूरे ग्रामतो गृहा इत्यर्थः; अन्ये दूरे जनात् इति पठित्वा व्याख्यानयन्ति दूरे जनानामन्तो गृहीतो निलयो यैर्मृगैर्विहङ्गैश्च ते तथा, दूरेपानीयगोचरा इति दूरे पानीयविषयाः पानीयाद्दूरनिवासिन इत्यर्थः। ये मृगाश्चेति चकारात् सर्पादयः, अतीवासन्ननिलया इति अतिशयेन ग्रामावसथ गृहा इत्यर्थः, समीपोदकगोचरा इति पानीयसमीपभूमिवासिन इत्यर्थः, अत्रापि चकारात् धन्वानूपचारिणामजावितित्तिरीणां जाङ्गलपठितानामपि मिश्रगोचरत्वान्माल्याभिष्यन्दित्वम्॥ २१॥

आनूपवर्गप्रकारानाह। आनूपवर्गस्त्विति अनुगता आपोऽस्मिन्निति सजलस्थलात्मकोदेशः, तद्भवा आनूपाः, कुलं नद्यादितटं तत्र चरन्ति भक्ष्यन्ति भ्रमन्ति च येते कुलचराः, प्लवन्ते पानीये तरन्ति येते प्लवाः, कोशः शङ्खादीनां संपुटः, तत्र तिष्ठन्तीति कोशस्थाः, पादवन्तः पादिनः,

वातपित्तहरा वृष्या मधुरा रसपाकयोः ।
शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः ॥
विरूक्षणो लेखनश्च वीर्य्योष्णः पित्तदूषणः ।
स्वाद्वम्ललवणस्तेषां गजः श्लेष्मानिलापहः ॥
गवयस्य तु मांसं हि स्निग्धं मधुरकासजित् ।
विपाके मधुरं चापि व्यवायस्य तु वर्द्धनं ॥
स्निग्धोष्णमधुरो वृष्यो महिषस्तर्पणो गुरुः ।
निद्रापुंस्त्वबलस्तन्यवर्द्धनो मांसदार्ढ्यकृत् ॥
रुरुमांसं समधुरं कषायानुरसं स्मृतं ।
वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनं ॥
तथा चमरमांसन्तु स्निग्धं मधुरकासजित् ।
विपाके मधुरं चापि वातपित्तप्रणाशनं ॥
सृमरस्य तु मांसञ्च कषायानुरसं स्मृतं ।
वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम् ॥

मत्स्याः प्रसिद्धाः, तत्र कूलचरानाह । तत्रेति गजो हस्ती, गवयो गोसदृशः, महिषः प्रसिद्धः, रुरुः शरदि शृङ्गत्यागी, तल्लक्षणं उच्यते । "विकटबहुविषाणः शम्बराकारदेहः सलिलतटचारित्वाच्छम्बरेभ्यो विचित्रः । त्यजति शरदि शृङ्गं रौत्यतोऽसौ रुरुः स्यात्", पृथुल मृगविशेषः प्रायशश्चेदि देशे । चमरश्चैशमृत्युः गोसदृशः, सृमरो महाशूकरः । अन्ये तु महाश्वाकारः चमरात्मकः रोहितो लोहितवर्णो मृगजातिः अन्ये तु रोहिष इति पठन्ति व्याख्यानयन्ति च कच्छशूर इत्यर्थः । अपरे फलशूकरमाहुः वराहः शूकरः, खड्गो गण्डकः, गोकर्णो गोसदृशकर्णः गोन इति प्रसिद्धः, कालपुच्छको नलकृष्णपुच्छकः, श्वोद्रः पानीयबिडालः श्वोदन इति लोके, न्यङ्कुः न्यंगुण इति लोके, अरण्यगवोवन्यगौः । तेषां सामान्यगुणमाह । वातेत्यादिशीतला इति तत्र चकारो लुप्तनिर्दिष्टो द्रष्टव्यः । तेनोष्णमपि-

स्वेदनं दृंहणं वृष्यं शीतलं तर्पणं गुरु।
स्निग्धं श्रमानिलहरं वाराहं बलवर्द्धनं॥
कफघ्नं खड्गिपिशितं कषायमनिलापहं।
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणं॥
गोकर्णमांसं मधुरं स्निग्धं मृदु कफावहं।
विपाके मधुरञ्चापि रक्तपित्तविनाशनं॥ २२॥

हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीव-कवकबलाकापुण्डरीकप्लवशरारीमुखनन्दीमुखमद्गुरुत्क्रोश-काचमल्लिकाचशुक्लाक्षपुष्करशायिकाकोनालकाम्बुकुक्कुटि-कामेघरावश्वेतचरणप्रभृतयप्लवाः संघातचारिणः।

केषाञ्चित् दृष्टव्यम्। तेषां केषां चिदेव गुणविशेषमाह। विरूक्षण इति समुदितौ कफवातौ हन्ति केवलं तु कफं करोत्येव गजादिषु विरूक्षणः कफघ्नत्वादिस्वजात्यपेक्षपरिणतिविशेषात् स्निग्धोष्णमिति वृष्यः पुंस्त्ववर्द्धन इति च इयं श्रुतिवृद्धिमाश्रये। वराहमांसमिति स्वेदनं वृंहणमिति स्वेदजनकं वृंहणं देहवृद्धिकरं वृष्यं शुक्रलं तर्पणं तृप्तिजनकं। कफघ्नमिति पित्र्यमिति पितृभ्यो हितं गोकर्णमांसमिति॥ २२॥

प्लवानाह। हंसेत्यादि—हंसः कलस्वरो ललितगतिः प्रसिद्धः सारसो-लक्षणो रक्तशिराः प्रसिद्ध एव, क्रौञ्चः क्रौञ्चिर, चक्रवाको द्वन्द्वचरो, निशा-वियोगी कुररः तस्य प्रसहेष्वपि पाठः तत उभयेषामपि गुणा बोद्धव्याः। अन्ये तु कङ्कमल्लसदृशं जलचरं कुररमाहुः, कादम्बः कलहंसः अतिधूसर-पक्षः अन्ये तु रक्तचञ्चुशिरः कृष्णपादाभ्यां लक्षणेन ज्ञात्वा क्रमस्व इति पठन्ति। कारण्डवः शुक्लहंसः भेदोऽल्पः अन्ये करहरमाहुः उक्तञ्च कारण्डवः काकवक्त्रो दीर्घाङ्घ्रिः कृष्णवर्णभाक् इति जीवञ्जीवको विषदर्शनमृत्युकः पाण्डुरपक्षः प्रसिद्धः। बलाका बकभेदः बगुलीति लोके पुण्डरीको मल्लिनन-यनः प्लवो महाप्रमाणः प्लवेवकगतः सगर इति लोके शरारीमुखः खदिर-

रक्तपित्तहराः शीताः स्निग्धा हृष्या मरुज्जितः।
सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः॥
गुरूष्णमधुरः स्निग्धः स्वरवर्णबलप्रदः।
वृंहणः शुक्रलस्तेषां हंसो मारुतनाशनः॥ २३॥
शङ्खशङ्खनखशुक्तिशम्बुकभल्लूकप्रभृतयः कोशस्थाः। कूर्मकुम्भीरकर्कटककृष्णकर्कटकशिशुमारप्रभृतयः पादिनः॥
शङ्खकूर्मादयः स्वादुरसपाका मरुन्नुदः।
शीताः स्निग्धा हिताः पित्ते वर्च्चस्याः श्लेष्मवर्द्धनाः॥

वर्णो गिर्गवाटीति लोके, नन्दीमुखः पत्र.ठी आटीभेदः, मद्गुर्जलकाकः, उत्क्रोशः कुररभेदः, मत्स्याशी काचाचः, कपर्द्दिपाकः बहुडीति लोके, मल्लिकाचः शुक्लनयनः, शुक्लाचस्तद्भेदः अन्ये तु मलिनचञ्चुचरणो हंसभेदएव इत्याहुः, पुष्करशायिका पद्मपत्रशायिका कोलानकः श्यामपृष्ठः, श्वेतोदरः पानीयवर्त्तिकेति लोके, अम्बुकुक्कुटिकाजलकुक्कुटी कृष्णवर्णा बुड़ियाक इति लोके, मेघरावश्चातकः अन्ये तु चातकं विष्किरेष्वामनन्ति श्वेतचरणः शुक्लपचः, प्रसेवकगलः ज्येष्ठबलाकेति लोके, प्रभृतिग्रहणात् आवामखिड़तुण्डका खणालकण्ठादयः तेषां सामान्यगुणमाह। रक्तेत्यादिकेषाञ्चिद्विशेषगुणमाह। गुरूष्ण इति अन्ये पुनरत्र सारसक्रौञ्चकुवेरकारण्डवकादम्बकजीवञ्जीवकानामपि विशिष्टं गुणं पठन्ति तत्रातिप्रसिद्धमिति न लिखितम्। तत्रातिप्रसिद्धं इति न लिखितम्। इति पुस्तकान्तरे पाठोऽस्ति॥ २३॥

कोशस्थानाह। शङ्केति शङ्खः प्रसिद्धः, शङ्खनकः क्षुद्रशङ्खः शङ्खभेदएव, शुक्तिः समुद्रजासिप्पिः, शम्बूकः आवर्त्तकोशः शाङ्कुला इति लोके, भल्लूकः कवर्द्दकः अन्ये शम्बूकभेदमाहुः, प्रभृतिग्रहणात् वोड़िकजलशुक्तिशम्बूकभेदा बहुविधा गृह्यन्ते। पादिनमाह कूर्मेति कूर्मः कच्छपः, सतुनानाविधवर्त्तुलदीर्घमहदादिभेदेन, कुम्भीरोऽपि नानाभेदः घड़ियालगोधादिभेदेन कर्कटोऽपि द्विविधः कृष्णशुक्लभेदेन शिशुमारो हड़ाकारोई-

कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः।
शुक्लः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहा ॥ २४ ॥

मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च। तत्र नादेयाः। रोहितपाठीनपाटलाराजीववर्मिगोमत्स्यकृष्णमत्स्यवागुञ्जारमुरलसहस्रदंष्ट्रप्रभृतयो नादेयाः।

नादेया मधुरा मत्स्या गुरवो मारुतापहाः।
रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः ॥
कषायानुरसस्तेषां शष्पशैवालभोजनः।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः ॥
पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः।
दूषयेद्रक्तपित्तन्तु कुष्ठरोगं करोत्यसौ ॥
मुरलो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा।
सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः ॥
महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः ॥ २५ ॥

वक्रो वहिर्निश्वासं मुञ्चति सोऽपि द्विविधो वर्त्तुलदीर्घभेदेन, दीर्घफाणित इति लोकाः प्राहुः सएवात्र गृह्यते पादित्वात्, प्रभृतिग्रहणात् पक्षोदयः तेषां कोशस्थानां पादिनाञ्चैकगुणत्वादुभयोर्वर्गयोर्गुणमेकीकृत्याह। शङ्खकूर्मादय इति तेषां मध्ये कस्यचिद्गुणमाह। कृष्णेत्यादि ॥ २४ ॥

मत्स्यानाह। मत्स्यास्त्वेति तत्र नादेयानाह। तत्रेति रोहितो घनशल्कलः प्रसिद्धः, पाठीनः पुनरशल्कलएव, दीर्घो निर्मलः सोऽपि प्रसिद्धएव, वर्मिः सर्पाकारो, मत्स्य गोमत्स्यः स्वनामप्रसिद्धः। कृष्णमत्स्यस्तु शल्कली बहुकण्टकसंयुतः कषायवर्णो रक्ताक्षः कथितो मत्स्यवेदिभिः वागुञ्जारो वाहंस इति लोके सहस्रदंष्ट्रो महापाठीनः शेषास्तु कैवर्त्तेभ्यो ज्ञेयाः, प्रभृतिग्रहणाच्छफरादयः। तेषां सामान्यगुणमाह नादेया इत्यादि — नादेयानामेव केषा-

तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलक-
मकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः।

सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः।
उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्द्धनाः॥
बलावहा विशेषेण मांसाशित्वात्समुद्रजाः।
तेषामप्यनिलघ्नत्वाच्चौण्ट्यकौप्यौ गुणोत्तरौ॥
स्निग्धत्वात्स्वादुपाकत्वात्तयोर्वाप्या गुणोत्तराः।
नादेया गुरवो मध्ये यस्मात्पुच्छास्यचारिणः॥
सरस्तडागजानान्तु विशेषेण शिरो लघु।
अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः॥
किञ्चिन्मुक्ता शिरोदेशनात्यर्थं गुरवस्तु ते।
अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजा मताः॥

च्चिद्गुणविशेषमाह। कषायेति शष्पं बालतृणं शैवलं शैवालं, पाठीनमाह। पाठीन इति पिशिताशनो मांसभक्षकः। मुरल इति सरस्तडादिजान् मत्स्यानाह। सर इति ह्रदो हृदः॥ २५॥

सामुद्रानाह। तिमीति तिमिमहत्तमो मत्स्यः तिमिङ्गिलस्ततोऽपि महत्तमः, कुलिशः कुड़िरा इति लोके, नन्दिवारलकः समुद्रसिम्बाकः इति लोके मकरो हि दंष्ट्रकः गर्गरः स्वनाम्ना प्रसिद्धः, चन्द्रकः पार्श्वेषु कण्टकवलयितो वर्त्तुलो मत्स्यः। राजीवो बह्वायतः स्वनाम प्रसिद्धः, शेषास्तु समुद्रतीरवासिभ्यो ज्ञेयाः। प्रभृतिग्रहणादन्येऽपि तेभ्यो एव ज्ञेयाः, सामुद्रमत्स्यानां सामान्यगुणमाह सामुद्र इत्यादि, सामुद्रादीनां सारतरत्वमाह। समुद्रजेति गुणोत्तराः गुणोत्कृष्टाः। तेषामिति तेषां नादेयमत्स्यानां। नादेयमत्स्यावयवानां गुरुलाघवमाह। नादेया गुरवो मध्ये ति। स्निग्धत्वादिति पाठः सुगमम्। सरसिति, अदूरगोचराः अदूरचराः अल्पव्यायामाः इत्यर्थः, उत्सोदपानजा गिरिप्रस्रवणजाः।

उरोऽग्निचरणात्तेषां पूर्वमङ्गं लघु स्मृतं ।
इत्यानूपो महाभिष्यन्दिमांसवर्गो व्याख्यातः ॥ २६ ॥

तत्र शुष्कपूतिव्याधितविषसर्पहतदिग्धविद्धजीर्णकृशबालानामसात्म्यचारिणां मांसान्यभक्ष्याणि तस्माद्विगतव्यापन्नापहृतपरिणतात्वासंपूर्णवीर्यत्वाद्दोषकराणि भवन्ति ।

अरोचकं प्रतिश्यायं गुरु शुष्कं प्रकीर्त्तितं ।
विषव्याधिहतं मृत्युं बालं छर्द्दिञ्च कोपयेत् ॥
कासश्वासकरं वृद्धं त्रिदोषं व्याधिदूषितं ।
क्लिन्नमुत्क्लेशजननं कृशं वातप्रकोपनं ॥ २७ ॥

एभ्योऽन्येषामुपादेयं मांसमिति । स्त्रियश्चतुष्पादेषु पुमांसो विहङ्गेषु महाशरीरेष्वल्पशरीरा अल्पशरीरेषु महाशरीराः प्रधानतमाः ।

अधस्तादिति महाभिष्यन्दीति दोषधातुमलस्रोतसामतिशयक्लेदकारीत्यर्थः अन्ये त्वन्यथा कृत्वा पठन्ति तदुच्यते हृदयस्यान्ननिर्यासवहिःस्रोतोमुखानि यत् भुक्तं लिम्पति पैच्छिल्यादभिष्यन्दि तदुच्यते । वैशद्यात् कफहन्तृत्वास्रान्येव विवृणोति यत् । तदुक्तमनभिष्यन्दिद्रव्यं द्रव्यविशारदैरिति, ॥२६॥

मांसमनुपादेयमाह । तत्रेति पूतिः शटितः, हतशब्दो व्याधिविषसर्पैः प्रत्येकं सम्बध्यते, दिग्धः विषादिलिप्तः, विद्धः शस्त्रादिविद्धः, जीर्णो वृद्धः, कृशो दुर्बलः असात्म्यचारिणामनुचिताहारभक्षिणां कस्मादनुपादेयानीत्याह । यस्मादिति बालानामसम्पूर्णवीर्यत्वादित्यर्थः, असात्म्यचारिणामनुपादेयत्वे हेतुः सूत्रकारेण निबन्धकारैश्चानुक्तोऽपि स्वयमप्यूह्यः, उपादेयमाह । एभ्य इति दोषरहितं गुणवदुपादेयमित्यर्थः शुष्कादीनां दोषमाह । अरोचकमिति शुष्कं मांसं अरोचकं प्रतिश्यायं च करोतीत्यध्याहारः, मृत्युमिति मरणापि करोतीत्यध्याहारः, क्लिन्नं शटितं, उत्क्लेशं वमनकरं, असात्म्यचारिणो दोषः स्वयमप्यूह्यः ॥ २७ ॥

स्थानादिकृतं मांसस्य गुरुलाघवमुपदेक्ष्यामः। तद्यथा रक्तादिषु शुक्रान्तेषु धातुषूत्तरोत्तरास्तु गुरुतरास्तथा सक्थी-स्कन्धक्रोड़शिरःपादकरकटीपृष्ठचर्मकालेयकयकृदन्त्राणि।

शिरःस्कन्धं कटीपृष्ठं सक्थिनी चात्मपक्षयोः।
गुरुपूर्वं विजानीयाद्धातवस्तु यथोत्तरं॥
सर्वस्य प्राणिनो देहे मध्यो गुरुरुदाहृतः।
पूर्वभागो गुरुःपुंसामधोभागस्तु योषितां॥
उरोग्रीवं विहङ्गानां विशेषेण गुरु स्मृतं।
पक्षोत्क्षेपात्समो दिष्टो मध्यभागस्तु पक्षिणां॥
अतीवरूक्षं मांसन्तु विहङ्गानां फलाशिनां।
वृंहणं मांसमत्यर्थं खगानां पिशिताशिनां॥

गुणवन्मांसप्रसङ्गेन लिङ्गाद्यधिकृत्याह। स्त्रिय इति चतुष्पदां मध्ये स्त्रियः प्रधानतमाः, विहङ्गानां मध्ये पुमांसः पुरुषाः प्रधानतमाः, महाशरीरेष्वित्यादि महाशरीरेषु खड्गिमहिषादिषु, अल्पशरीरा आनूपाएव, रुरुप्रभृतयः प्रधानतमाः, अल्पशरीरेष्विति अल्पशरीराविष्किरालावादयः तेषु महाशरीराः कृशमांसस्य निषिद्धत्वात्। स्थानादिकृतमिति रक्तादि-धातूनां गुरुलाघवमुक्त्वा इतरावयवानाह। तथेति यथोत्तरं गुरवः शक्-थिनी ऊरुस्कन्धौ बाहुशिरः क्रोड़ो हृदयस्थानं पश्चाद्भागस्थितौ पादौ,अग्रिम-भागस्थितौ करौ, कालेयकं हृक्कं यकृत्कालखण्डं दक्षिणभागस्थितं द्वयं द्वयमधिकृत्याह। शिर इति स्कन्धात् शिरोगुरुपृष्ठात् कटिः शक्थिनीचा-त्मपक्षयोरिति शक्थिनो द्वे चात्मपक्षयोः स्वांशयोर्यथापूर्वं गुरुणी ज्ञेये तेन सक्थ्ना उत्तरभागापेक्षया पूर्वभागो गुरुरित्यर्थः अन्ये तु आमपक्वयोरिति पठन्ति, पक्वादाममांसं गुरुरिति व्याख्यानयन्ति तन्न पञ्जिकाराभ्यां दूषित-त्वात् जेज्जटस्तु शिर इत्यादिसंग्रहश्लोकत्वेन पठति तदपि पञ्जिकाकारो न मन्यते। सर्वस्यापि शरीरस्य मध्ये को भागो गुरुरित्याह। सर्वस्येति

मत्स्याशिनां पित्तकरं वातघ्नं धान्यचारिणां।
जलजानूपजा ग्राम्याः क्रव्यादैकशफास्तथा॥
प्रसहा बिलवासाश्च ये च जङ्गालसंस्थिताः।
प्रतुदा विष्किराश्चैव लघवः स्युर्यथोत्तरं॥
अल्पाभिष्यन्दिनश्चैव यथापूर्वमतोऽन्यथा॥ २८॥

प्रमाणाधिकास्तु स्वजातौ चाल्पसारा गुरवश्च। सर्वप्राणिनां सर्वशरीरेभ्यो ये प्रधानतमा भवन्ति यकृत्प्रदेशवर्त्तिनस्तानाददीत प्रधानलाभाभावे मध्यमवयस्कं सद्यस्कमक्लिष्टमुपादेयं मांसमिति।

स्त्रीपुरुषविभागेनाह। पूर्वभाग इति पूर्वभागः उपरिष्टाद्भागः, पक्षीणाह। उरोग्रीवमिति आत्मपक्षलक्षणमन्यत्रापि सम्बन्धनीयं, धातवस्तु यथोत्तरमित्यत्र वक्षस्य पूर्वभागापेक्षया उत्तरभागो गुरुरित्यादि। पूर्वभाग उपरिष्टात् भागः। पक्षोत्क्षेपात् समादृष्ट इति सम इति नातिगुरुर्नातिलघुरित्यर्थः आहारविशेषेणापि मांसेषु रौक्ष्यादिविशेषमाह। अतीवरूक्षमिति फलाशिनां मांसमितरमांसापेक्षया रूक्षम्। उक्तवर्गाणां गुरुलाघवमाह। जलजेति अतोऽस्मात् लघुत्वादल्पाभिष्यन्दित्वाच्च। अन्यथेति महाभिष्यन्दिनो गुरवश्चेत्यर्थः॥ २८॥

प्रमाणेति स्वजातौ आत्मीयजातौ अल्पसारास्तुच्छबला इत्यर्थः, सत्यां कृत्स्नशरीरप्राप्तौ गुणवच्छरीरावयवग्रहणं निर्दिशन्नाह। सर्वेति यकृत्प्रदेशवर्त्तिशब्देन यकृत् प्रदेशे दीर्घाकारा मांसवर्त्तयो भवन्ति ता इह गृह्यन्ते एतेन समस्तशरीरप्राप्तावपि विशिष्टशरीरावयवग्रहणमुक्तम्। अन्ये तु सर्वप्राणिनां सर्वशरीरेभ्यः प्रधानतमाया वर्त्तिर्भवति तामाददीतेति पठन्ति मांसलेष्ववकाशेषु या वर्त्तयो भवन्ति अग्राह्या इति व्याख्यानयन्ति। तदलाभे मध्यमवयःस्थं सामान्यदेशजमपि ग्राह्यमित्याह। प्रधानालाभ इति मध्यमवयःस्थं मांसमिति मध्यमवयःस्थस्य प्राणिन इत्यर्थः, अन्ये मध्यवयस्कमिति पठन्ति व्याख्यानयन्ति।

भवति चात्र।
वयः शरीरावयवाः स्वभावो धातवः क्रिया।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्षिता॥ २८॥

इति मांसवर्गः।

अत ऊर्द्ध्वं फलवर्गानुपदेक्ष्यामः। तद्यथा। दाड़िमामलकबदरकोलकर्कन्धुसौवीरसिम्बितिकाफलकपित्थमातु-

मध्यमं ग्राह्यमिति तरुणस्य तरुणस्येत्यर्थः। सद्यस्कं सद्योहतमांसं अक्लिष्टं मनोऽनुकूलं इदानीमुक्तं सर्वं गुरुलाघवहेतुं सुखस्मरणार्थमेकीकृत्य श्लोकेन निर्दिशन्नाह। वय इति परीक्ष्यत इति च वय आदिभिः सर्वैः प्रत्येकं सम्बध्यते वयःशब्दोऽत्र आहारविहारयोर्वर्त्तते तद्यथा कस्मिन् देशेऽयं विहरति धन्वनि अनूपे वा जले वा वियति वा, कः पुनरयमाहरति अति अतिगुरुलघु वा शीतमुष्णं वा स्निग्धं रुक्षं वा तत्तदाहारगुणभावितशरीरधातोर्मृगस्य पक्षिणो वा तत्तद्गुणमेव मांसमिति आहारो यथा शष्पशैवालभोजना इत्यादि विहारो यथा अतीवासन्ननिलया इत्यादिशरीरावयवाः परीक्ष्यन्ते। तद्यथा उरुग्रीवं विहङ्गानां विशेषेण गुरुः स्मृतं इत्यादिस्वभावो यथा स्वभावाल्लघवो मुद्गास्तथा लावकपिञ्जला इति स्वभावोऽचाचार्य्येणोक्तः सर्वत्रैव वयादिष्वष्टास्वपि स्वभावस्यानुषङ्गात् धातवस्तु यथोत्तरमित्यादिधातुपरीक्षा, क्रिया यथा उरोविवरणात्तेषां पूर्वमङ्गलघुम्मृत्यादि। लिङ्गं यथा स्त्रियश्चतुष्पादेषु पुमांसो विहङ्गेष्विति प्रमाणमिति महाशरीरेष्वल्पशरीरा इत्यादिसंस्कारो यथास्नेहगोरसधान्याम्लफलाम्लैरन्वितं च यत् यथोत्तरलघु इत्यादि मात्रा चास्मिन्निति गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते मात्रा चेति चकारात् अग्निरपि परीक्ष्यते तेनाग्निबलापेक्षिणी द्रव्यगुरुलाघवापेक्षणी च मात्रा तदेवं वयादीन् परीक्ष्य मांसेषु गुरुलाघवं वाच्यमित्यर्थः। इति मांसवर्गः॥ २८॥

अथ फलवर्गः। दाड़िमेत्यादि = दाड़िमामलके प्रसिद्धे बदरं महत्कोलमध्यप्रमाणं बदरं कर्कन्धु अल्पं सौवीरं आमपक्वावस्थासुमधुरं मरु-

लुङ्गाम्लाम्रातककरमर्द्दपियाललकुचभव्यपारावतवेत्रफलप्राचीनामलकतिन्तिडीकनीपकोशाम्राम्लीकानारङ्गजम्बीरप्रभृतीनि ॥ ३० ॥

अम्लानि रसतः पाके गुरूण्युष्णानि वीर्य्यतः।
पित्तलान्यनिलघ्नानि कफोत्क्लेशकराणि च ॥
कषायानुरसं तेषां दाड़िमं नातिपित्तलं।
दीपनीयं रुचिकरं हृद्यं वर्च्चोविबन्धनं ॥
द्विविधं तत्तु विज्ञेयं मधुरं चाम्लमेव च।
त्रिदोषघ्नन्तु मधुरमम्लं वातकफापहं ॥
अम्लं समधुरं तिक्तं कषायं कटुकं सरं ॥
चक्षुष्यं सर्व्वदोषघ्नं वृष्यमामलकीफलं।
हन्ति वातं तदम्लत्वात् पित्तं माधुर्य्यशैत्यतः ॥

देशजं सिम्बितिकाफलं तद्भेदएव अतिमधुरो मुष्टिप्रमाण उत्तरापथजः कपित्थं स्वनामप्रसिद्धं मातुलङ्गं बीजपूरकम् आम्रं प्रसिद्धं आम्रातकं आम्रफलसदृशम्। आम्राटकमिति लोके,करमर्द्द स्वनामप्रसिद्धः पियालश्चारः मधुराम्रफलः प्रायशो मगधेषु नागरङ्गं जम्बीरं लकुचाः प्रसिद्धाः भव्यमारुकं कार्त्तिकेयपुरे प्रसिद्धं अन्ये तु कर्मरङ्गफलं भव्यमाहुः भव्यं तालफलोपमं वल्कलसंहतिमात्रमित्यपरे पारावतः कामरूपे फलं पाककाले धवललोहितं मधुराम्लं च वेत्रफलं पद्मबीजसमं प्राचीनामलकं प्राग्देशोद्भवं पानीयामलकमिति लोके, तिन्तिड़ीकं वृक्षाम्लं नीपः कदम्बकं कोशाम्रः कौसिम्ब इति प्रसिद्धः, अम्लिका प्रसिद्धा विम्बावक्रफला प्रभृतिग्रहणादेवं जातीयान्यन्यान्यपि ॥ ३० ॥

तेषां सामान्यगुणमाह अम्लानीत्यादि अम्लानि अम्लरसोत्कटानि एषां केषाञ्चिद्गुणविशेषमाह। कषायानुरसमिति नातिपित्तलं अम्लदाड़िमफलविशेषणं ईषत् पित्तकरमित्यर्थः; चरकेऽपि सर्वं पित्तलमम्ल-

कफं रूक्षकषायत्वात् फलेभ्योऽभ्यधिकञ्च तत् ।
कर्कन्धुकोलबदरमामं पित्तकफावहं ॥
पक्वं पित्तानिलहरं स्निग्धं समधुरं सरं ।
पुरातनं तृट्शमनं श्रमघ्नं दीपनं लघु ॥
सौवीरं बदरं स्निग्धं मधुरं वातपित्तजित् ।
कषायं स्वादु संग्राहि शीतं सिम्बितिकाफलं ॥
आमं कपित्थमस्वर्य्यं कफघ्नं ग्राहि वातलं ।
कफानिलहरं पक्वं मधुराम्लरसं गुरु ॥
श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनं ।
लघ्वम्लं दीपनं हृद्यं मातुलुङ्गमुदाहृतं ॥
त्वक् तिक्ता दुर्जरा तस्य वातक्रिमिकफापहा ।
स्वादु शीतं गुरु स्निग्धं मांसं मारुतपित्तजित् ॥
मेध्यं शूलानिलच्छर्द्दिकफारोचकनाशनं ।
दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केसरं ॥
शूलाजीर्णविबन्धेषु मन्दाग्नौ कफमारुते ।
अरुचौ च विशेषेण रसस्तस्योपदिश्यते ॥
पित्तानिलकरं बालं पित्तलं बद्धकेसरं ।
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदं ॥

मन्यन्ते दाड़िमामलकात् इत्यत्र भट्टारक हरिश्चन्द्रेण दाड़िमपक्षं निरस्य अन्यत्रामलकादित्येष एव पाठः पुरस्कृत इति पञ्जिकाकारो जेज्जटस्तु अम्लं दाड़िमं पित्तं न करोति न शमयतीति व्याख्यानयति ईषत् पित्तलपाठं च युक्तं मन्यते सर्वमपि मधुराम्लं मधुररसोत्कटं मधुरमित्युच्यते अम्लरसोत्कटमम्लमित्युच्यत इति द्विविधं । अम्लमिति फलेभ्योऽभ्यधिकञ्च तत् अपरेभ्यः फलेभ्यः यदामलकीफलं गुणेन ज्ञात्वा

कषायानुरसं स्वादु वातघ्नं बृंहणं गुरु।
पित्ताविरोधि सम्पक्वमामं शुक्रविवर्द्धनं ॥ ३१ ॥
बृंहणं मधुरं वल्यं गुरु विष्टभ्य जीर्य्यति ॥
आम्रातकफलं हृष्यं सस्नेहं श्लेष्मवर्द्धनं।
त्रिदोषविष्टम्भकरं लकुचं शुक्रनाशनं ॥
अम्लं तृष्णापहं रुच्यं पित्तश्लेष्मकरमर्द्दकं।
वातपित्तहरं हृष्यं पियालं गुरु शीतलं ॥
हृद्यं स्वादु कषायाम्लं भव्यमास्यविशोधनं।
पित्तश्लेष्महरं ग्राहि गुरु विष्टम्भि शीतलं ॥
पारावतं समधुरं रुच्यमत्यग्निवातनुत्।
गरदोषहरं नीपं प्राचीनामलकं तथा ॥
वातापहं तिन्तिड़ीकमामं पित्तबलासकृत्।
ग्राह्युष्णं दीपनं रुच्यं सम्पक्वं कफवातनुत् ॥
तस्मादल्पान्तरगुणं कोशाम्रफलमुच्यते।
अम्लीकायाः फलं पक्वं तद्वद्भेदि तु केवलं ॥
अम्लं समधुरं हृद्यं विशदं भक्तरोचनं।
वातघ्नं दुर्जरं प्रोक्तं नारङ्गस्य फलं गुरु ॥

अधिकमित्यर्थः आम्रातकेन समानगुणैः कोषः कर्कन्धिति मांसं कटाहमित्यर्थः मेध्यं मेध्यहितं केशरं वीजान्तर्गतं तन्तुजालं च कुभीति लोके। पित्तेति बहुकेशरं बहुतन्तुजालं पित्ताविरोधीति ईषत् पित्तविरोधि ईषत् पित्तशमनमित्यर्थः अन्येऽपि पित्तलं भवतीत्याहुः ॥ ३१ ॥

बृंहणमिति सवाततोऽस्थूलमलस्याप्रवृत्तिर्विष्टम्भः अन्ये गुड़गुड़ाशब्दमाहुः अम्लमिति गरहरं त्रिदोषहरञ्च। वातापहमिति दुर्जरं दुःखमुत्पद्यपाकं गच्छति गुरुचिरपाकि। तृष्णेत्यादि इमं जम्बीरगुण-

तृष्णाशूलकफोत्क्लेशच्छर्दिश्वासनिवारणं।
वातश्लेष्मविबन्धघ्नं जम्बीरं गुरुपित्तकृत्॥
ऐरावतं दन्तशठमम्लं शोणितपित्तकृत्॥ ३२॥

क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाश्मन्तकाश्वकर्णफल्गुपरूषकगाङ्गेरुकीपुष्करवर्त्तिबिल्वबिम्बीप्रभृतीनि॥ ३३॥

फलान्येतानि शीतानि कफपित्तहराणि च।
संग्राहकाणि रूक्षाणि कषायमधुराणि च॥
क्षीरवृक्षफलं तेषां गुरु विष्टम्भि शीतलं।
कषायं मधुरं साम्लं नातिमारुतकोपनं॥
रूक्ष्यं वातलं ग्राहि जाम्बवं कफपित्तजित्।
स्निग्धं स्वादु कषायञ्च राजादनफलं गुरु॥

पाठं पञ्जिकाकारो न मन्यते यस्मात्। ऐरावतमिति दन्तशठशब्देन जम्बीरस्य वक्ष्यमाणत्वात् जम्बीरनानाविधत्वाद्युक्तोऽयं पाठ इत्यने कषायरसप्रायमाह॥ ३२॥

क्षीरवृक्षेति क्षीरवृक्षा न्यग्रोधो दुम्बराश्वत्थप्लक्षादयः, जाम्बवं जम्बूः राजादनं क्षीरिका तिन्दुकः कालसारोवृक्षः बकुलस्तनामप्रसिद्धः धन्वनं मनुष्यफलं धामगुण इति लोके तोदनं राजप्रियं शीतफलं रावणाम्लेति प्रसिद्धं काश्मीराञ्चिकेत्येके अश्मन्तको यमलपत्रकः आसन्तः लोके अश्वकर्णः पूर्वदेशे गन्धमुण्डोऽश्वत्थसदृशः फल्गुः काकोदुम्बरिका कठुम्बरि इति लोके परूषकोऽल्पास्थिमृदुफलः फरसनास इति लोके गाङ्गेरुकी नागबला पुष्करवर्त्तिः आमोदमिति उत्तरापथे बिल्वं प्रसिद्धम्। बिम्बीकुन्दरिकाप्रभृतिग्रहणात् टङ्कादयः॥ ३३॥

एषां सामान्यगुणमाह फलान्येतानीत्यादि तेषां केषाञ्चिद्गुणविशेषमाह। क्षीरवृक्षफलमित्यादि पूतिमारुतमिति पूतिः सुगन्धि-

कषायं मधुरं रुक्षं तोदनं कफवातजित् ।
अम्लोष्णं लघु संग्राहि स्निग्धं पित्ताग्निवर्द्धनं ॥
आमं कषायं संग्राहि तिन्दुकं वातकोपन ।
विपाके गुरु सम्पक्वं मधुरं कफपित्तजित् ॥
मधुरञ्च कषायञ्च स्निग्धं संग्राहि वाकुलं ।
स्थिरीकरञ्च दन्तानां विशदं फलमुच्यते ॥
कषायञ्च हिमं स्वादु धान्वनं कफवाजित् ।
तद्वद्गाङ्गेरुकं विद्यादश्मन्तकफलानि च ॥
विष्टम्भि मधुरं स्निग्धं फल्गुजं तर्पणं गुरु ।
रुच्यम्लमोषन्मधुरं कषायानुरसं लघु ॥
वातघ्नं पित्तजननमामं विद्यात् परूषकं ।
तदेव पक्वं मधुरं वातपित्तनिवर्हणं ॥
विपाके मधुरं शीतं रक्तपित्तप्रसादनं ।
पौष्करं स्वादु विष्टम्भि वल्यं कफकरं गुरु ॥
कफानिलहरं तीक्ष्णं स्निग्धं संग्राहि दीपनं ।
कटुतिक्तकषायोष्णं बालं विल्वमुदाहृतं ॥
तदेव विद्यात्सम्पक्वं मधुरानुरसं गुरु ।
विदाहि विष्टम्भकरं दोषकृत् पूतिमारुतं ॥
विम्बीफलं साश्वकर्णं स्तन्यकृत् कफपित्तजित् ।

मारुतो यस्येति तत्पूतिमारुतं पूतिशब्दोऽयं सुगन्धिवाची यथापूतिः खट्टाशः वनजी मधुककर्टी यथा पूतिपुष्पेति सुगन्धिपुष्पेत्यर्थः एतेन पूतिमारुतं सुगन्धिगन्धं पक्वं भवतीत्यर्थः। केचिद्दिगन्धिं कुक्षि मारुतकरत्वमाहुः तन्नेच्छति गयीबालपक्वयोर्मध्ये केचित् पठन्ति तद्वद्विद्यादसम्पक्वं मधुरानुरसं गुर्विति मध्यावस्थगुणं केचिद्बालं; विल्वमुदाहृतमित्यस्य

दृढ़दाहज्वरपित्तास्रक्षतश्वासक्षयापहं ॥ ३४ ॥
तालनारिकेलपनसमोचप्रभृतीनि ॥
स्वादुपाकरसान्याहुर्वातपित्तहराणि च।
बलप्रदानि स्निग्धानि वृंहणानि हिमानि च ॥
फलं स्वादुरसं तेषां तालजं गुरु पित्तजित्।
तद्बीजं स्वादुपाकञ्च मूत्रलं वातपित्तजित् ॥
नारिकेलं गुरु स्निग्धं पित्तघ्नं स्वादु शीतलं।
बलमांसप्रदं हृद्यं वृंहणं वस्तिशोधनं ॥
पनसं सकषायन्तु स्निग्धं स्वादुरसं गुरु।
मोचं स्वादुरसं प्रोक्तं कषायं नातिशीतलं ॥
रक्तपित्तहरं वृष्यं रुच्यं श्लेष्मकरं गुरु।
द्राक्षाकाश्मर्य्यमधुकपुष्पखर्ज्जूरप्रभृतीनि।
रक्तपित्तहराण्याहुर्गुरूणि मधुराणि च।
तेषां द्राक्षा रसा स्वर्य्या मधुरा स्निग्धशीतला ॥

स्थाने श्रामं विल्वमुदाहृतमिति पठन्ति तन्नेच्छति गयी। विम्बिफलमिति मधुरफलान्याह ॥ ३४ ॥

तालेत्यादि तालतालोनारिकेला: स्वनामप्रसिद्धा: पनसोवृक्षः कण्टकी महाफलः कटाहलकांटाल इति वा लोके मोचः कदलीफलम्। प्रभृतिग्रहणादेवं जातीयान्यन्यानि। तेषां सामान्यगुणमाह स्वादु इत्यादि तेषां कस्यचिद्गुणविशेषमाह। फलमिति अपराण्यपि मधुराण्याह। द्राक्षेति द्राक्षा प्रसिद्धा काश्मर्य्यं गाम्भारीफलं मधुकं प्रसिद्धं खर्जुरं द्विविधं वृक्षविटपभेदेन त्रिविधमित्यपरे। के चिच्च वृक्षखर्ज्जूरं द्विविधं मत्वा तत्र पारसीकेषु देशेषु प्रमाणं स्वादुभिन्नं खण्डखर्ज्जूरमित्यतो द्वेतो तेषां सामान्यगुणमाह। रक्तेत्यादि तेषां केषां चिद्गुणविशेषमाह। तेषामिति अपरानपि मधुरविशेषफलमेकजातियामाह। वातामेति वातामादीनि वक्ष्यमाणान्तानि उत्तरापथे

रक्तपित्तज्वरश्वासतृष्णादाहक्षयापहम् ।
हृद्यं मूत्रविबन्धघ्नं पित्तासृग्वातनाशनम् ॥
केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते ।
क्षतक्षयापहं हृद्यं शीतलं तर्पणं गुरु ॥
रसे पाके च मधुरं खार्ज्जूरं रक्तपित्तजित् ।
वृंहणीयमहृद्यञ्च मधूककुसुमं गुरु ॥
वातपित्तोपशमनं फलं तस्योपदिश्यते ।
वातामाक्षोड़ाभिषुकनिचुलपिचुनिकोचकोरुमाणप्रभृतीनि ।
पित्तश्लेष्महराण्याहुः स्निग्धोष्णानि गुरूणि च ।
वृंहणान्यनिलघ्नानि बल्यानि मधुराणि च ॥
कषायं कफपित्तघ्नं किञ्चित्तिक्तं रुचिप्रदम् ।
हृद्यं सुगन्धि विशदं लवलीफलमुच्यते ॥
वसिरं शीतपाक्यञ्च साकष्करनिबन्धनं ।
विष्टम्भि दुर्जरं रूक्षं शीतलं वातकोपनं ॥

ज्ञातानि तत्रैव प्रसिद्धानि केचिद्व्याख्यानयन्ति । तत्र वातामस्त्वाजमधुरस्निग्धो दीर्घाकारः, अभिषुको अभिषुरिति लोके, अक्षोड़ो मदनफलाकारफलः मध्ये किञ्चिदुन्नतरेखान्वितः पर्व्वतपिलुरिति, निकोचकमौत्तरापथिकं कौलकफलं उत्तरापथादवगन्तव्यम् । प्रभृतिग्रहणाल्लवलीफलानि तेषां सामान्यगुणमाह पित्तश्लेष्मकराण्याहुरित्यादि—तेषां मध्ये केषाञ्चिद्गुणविशेषमाह । कषायमिति लवलीफलं सुगन्धीफलं स्वनामप्रसिद्धः, तस्य लक्षणमुच्यते । घनहरितांशुः स्निग्धा मधुनाडसदृकच्छदा सुगन्धिमूला लवली पाण्डुकोमलवल्कला । वसिरादीनां गुणमाह । वसिरमिति वासिरं सूर्य्यावर्त्तफलं, देशान्तरे ज्ञेयमित्यर्थः । शीतपाक्यं बलाफलं, सारुष्करनिब-

विपाके मधुरञ्चापि रक्तपित्तप्रणाशनं।
ऐरावतं दन्तशठमम्लं शोणितपित्तकृत्॥
शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु।
स्निग्धोष्णं तिक्तमधुरं वातश्लेष्मघ्नमैङ्गुदं॥
शमीफलं गुरु स्वादु रूक्षोष्णं केशनाशनं।
गुरु श्लेष्मातकफलं कफकृन्मधुरं हिमं॥
करीराक्षिकपीलूनि तृणशून्यफलानि च॥
स्वादुतिक्तकटूष्णानि कफवातहराणि च॥
तिक्तं पित्तकरं तेषां सरं कटुविपाकि च।
तीक्ष्णोष्णं कटुकं पीलु सस्नेहं कफवातजित्॥
आरुष्करं तौवरकं कषायं कटुपाकि च।
उष्णं कृमिज्वरानाहमेहोदावर्त्तनाशनं॥
कुष्ठगुल्मोदरार्शोघ्नं कटुपाकि तथैव च॥ ३५॥
कराञ्जकिंशुकारिष्टफलं जन्तुप्रमेहनुत्।
रूक्षोष्णं कटुकं पाके लघु वातकफापहं॥
तिक्तमीषद्विषहितं विडङ्गं क्रिमिनाशनं॥

अन्नं भल्लातकद्वन्द्वम्। ऐरावतदन्तशठयोर्गुणमाह। ऐरावतमिति ऐरावतं ऐरावणिका कृष्णलोहिताल्पफला, दन्तशठं जम्बीरफलं, अन्ये जम्बीरभेदमाहुः। शीतमिति टङ्कं काश्मीरे स्वनामप्रसिद्धं बहुप्रकारं स्निग्धोष्णमिति, ऐङ्गुदं इङ्गुदीफलं अन्ये पुत्रञ्जीवकमाहुः। शमीफलमिति शमीफलं सङ्करमुच्यते, करीरगुणमाह। करीरेति करीरो मरुजद्रुमः स्वनामख्यातः, आक्षिकमाक्षिकाफलं, पीलुपीलुफलं, तृणशून्यं मल्लिका केतकीफलमित्यन्ये। तेषां सामान्यगुणमाह स्वादुतिक्तमित्यादि—तेषां मध्ये पीलुगुणमाह। तिक्तमिति आरुष्करतौवरफलगुणमाह। आरुष्करमिति तुवरकः पश्चिमोदधितीरे॥ ३५॥

व्रण्यमुष्णं सरं मेध्यं दोषघ्नं शोफकुष्ठनुत्।
कषायं दीपनं चाम्लं चक्षुष्यं चाभयाफलं॥
भेदनं लघु रूक्षोष्णं वैस्वर्य्यं क्रिमिनाशनं।
चक्षुष्यं स्वादुपाक्यम्लं कषायं कफपित्तजित्॥
कफपित्तहरं रूक्षं वक्त्रक्लेदमलापहं।
कषायमीषन्मधुरं किञ्चित् पूगफलं सरं॥
जातीकोशोऽथ कर्पूरं जातीकटुकयोः फलं।
कक्कोलकं लवङ्गञ्च तिक्तं कटु कफापहं॥
लघु तृष्णापहं वक्त्रक्लेददौर्गन्ध्यनाशनं।
सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः॥
तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः।
लताकस्तूरिका तद्वत् शीता वस्तिविशोधनी॥
पियालमज्जा मधुरो वृष्यः पित्तानिलापहः।
वैभितको मदकरः कफमारुतनाशनः।
कषायो मधुरो मज्जा कोलानां पित्तनाशनः।
तृष्णाच्छर्द्यनिलघ्नश्च तद्वच्चामलकस्य च॥

करञ्जादीनाह। करञ्जेति करञ्जो नक्तकरञ्जः, किंशुकः पलाशः, अरिष्टो निम्बः। अत्र जन्तुशब्दो विंशतिक्रमिवाची। विडङ्गमाह। तिक्तमीषदिति, हरीतकीमाह। व्रण्यमुष्णमिति व्रणेभ्यो हितं व्रण्यं, चक्षुषे हितं चक्षुष्यं। विभीतकफलगुणमाह। भेदनमिति स्वादुपाक्याम्लमिति आच्यं विभीतकफलं कीदृक् स्वादुपाकि, पूगफलमाह। कफपित्तहरमिति। जातीकोशादीन्याह। जातीकोश इति जातीकोशो जातीपत्रिका जातिवल्लीति लोके, कर्पूरं प्रसिद्धं, जातीकटुकयोः फलमिति जातीफलं प्रसिद्धं, कटुकाफलं लताकस्तूरिकेति पञ्जिकाकारो, श्रीब्रह्मदेवस्तु

बीजपूरकशम्याकमज्जा कोशाम्रसम्भवः ।
स्वादुपाकोऽग्निबलकृत् स्निग्धः पित्तानिलापहः ॥
यस्य यस्य फलस्येह वीर्य्यं भवति यादृशं ।
तस्य तस्यैव वीर्य्येण मज्जानमपि निर्द्दिशेत् ॥
फलेषु परिपक्कं यद्गुणवत्तदुदाहृतं ।
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणोत्तरं ॥
ग्राह्युष्णं दीपनं तद्धि कषायं कटु तिक्तकं ।
व्याधितं कृमिजुष्टञ्च पाकातीतमकालजं ॥
वर्जनीयं फलं सर्वमपर्य्यागतमेव च ॥ ३६ ॥

इति फलवर्गः ।

शाकान्यत ऊर्द्ध्वं वक्ष्यामः ।
तत्र पुष्पफलाऽलावुकालिन्दकप्रभृतीनि ।

लघुकक्कोलकमाह । कक्कोलं महत्कक्कोलं, लवङ्गं श्रीचन्दनपुष्पं, तेषां मध्ये कर्पूरगुणमाह । सतिक्त इति । लताकस्तूरिकामाह । लताकस्तूरिकेति लताकस्तूरिका दक्षिणापथे विटपः, शकुनापितुल्यः' वस्तिशोधनी वस्तिबन्धघ्नी, फलानां मज्जानमाह । पियालेति पियालमज्जा चिरउलीति लोके प्रसिद्धः, वैभीतक्च इति, सम्पाकः किरमालकः । अनुक्तफलमज्जानमाह । यस्येति यस्य यस्य फलस्य ये गुणाः कर्म्माणि चोक्तानि तस्य मज्जोऽपि तान्येव गुणकर्म्माणि वदेदित्यर्थः, येन कुर्वन्ति तद्वीर्य्यं, किञ्चिच्छेषमाह । फलेष्विति हि यस्मादर्थं गुणोत्तरं गुणोत्कृष्टं ग्राह्युष्णं दीपनं तद्धितद्बिल्वं हि स्फुटं फलेषु हेयादिदोषज्ञापनार्थमाह । व्याधितमिति जुष्टं सेवितं केचिज्जग्धमिति पठन्ति, तत्र जग्धं भक्षितमित्याह पाकातीतं पाकादतीतमनिमतं अतीतपाककालमित्यर्थः । अकालजमनुचितकालोत्पन्नं अपर्य्यागतं अपक्कं । इति फलवर्गः ॥ ३६ ॥

पित्तघ्नान्यनिलं कुर्य्युस्तथा मन्दकफानि च।
सृष्टमूत्रपुरीषाणि स्वादुपाकरसानि च॥
पित्तघ्नं तेषु कुष्माण्डं बालं मध्यं कफावहं।
पक्वं लघ्वष्णं सक्षारं दीपनं वस्तिशोधनं॥
सर्व्वदोषहरं हृद्यं पथ्यं चेतोविकारिणां।
दृष्टिशुक्रक्षयकरं कालिन्दं कफवातकृत्॥
अलाबुर्भिन्नविट्का तु रूक्षा गुर्व्वतिशीतला।
तिक्तालावुरहृद्या तु वामनी वातपित्तजित्॥
त्रपुसैर्व्वारुककर्कारुकशीर्णवृन्तप्रभृतीनि।
गुरुविष्टम्भिशीतानि स्वादूनि कफकृन्ति च॥
सृष्टमूत्रपुरीषाणि सक्षारमधुराणि च।
बालं सुनीलं त्रपुसं तेषां पित्तहरं स्मृतं॥

पित्तेत्यादि=पुष्पफलं कुष्माण्डकः, अलाबूस्तुम्बिनी सा च दीर्घवर्त्तु-लादिभेदादनेकधा, कालिन्दं कृष्णवीजं कुष्माण्डसदृशं कलिन्दिती लोके, प्रभृतिग्रहणादेवं विधान्यपराण्यपि। एषां सामान्यगुणमाह पित्तघ्नानी-त्यादि=सृष्टमूत्रपुरीषाणि मूत्रपुरीषप्रवृत्तिकराणि तेषां विशिष्टगुण-माह पित्तघ्नमिति कफमावहति करोतीति कफावहं, शुक्लं कार्पा-सवर्णं परिपक्वमित्यर्थः। सक्षारमीषत् क्षारं, वस्तिशोधनं वस्तिवि-शुद्धं, सर्व्वदोषहरमिति सर्व्वग्रहणं रक्तोपसंग्रहार्थं सर्व्वदोषसहमित्यन्ये पठन्ति, तत्रायमर्थः न करोति न शमयतीत्यर्थः हृद्यं हृदयाय हितं, चेतो-विकारा उन्मादापस्मारमूर्च्छामदादयः, दृष्टीति भिन्नविट्का द्रवमला, तिक्तेति अपराण्यपि फलशाकान्याह। त्रपुसैरिति त्रपुसः सुधावासः, ते रसा इति लोके, इर्व्वारुः लोमशा, कर्कटी, कर्कारुः, वाङ्कं त्रपुसं खरवाक इति लोके, शीर्णवृन्तं खरासकं त्रपुसभेदः, अन्ये तु शीर्णवृन्तं कर्व्वरमाहुः, एके तु शीर्णवृन्तं पाकावस्थायां यस्य वृन्तं शटितं भवतीत्यर्थः, अपरे तु

तत्पाकफलं जीर्णमम्लं वातकफापहं ।
एर्वारुकं सकर्कारु सम्पक्वं कफवातजित् ॥
सक्षारं मधुरं हृद्यं दीपनं नातिपित्तलं ।
सक्षारं मधुरञ्चैव शीर्णवृन्तं कफापहं ॥
भेदनं दीपनं हृद्यमानाहाष्ठीलनुल्लघु ॥ ३७ ॥

पिप्पलीमरिचशृङ्गवेरार्द्रकहिङ्गुजीरककुस्तुम्बुरुजम्बीर-
कसुमुखसुरसार्जकभूस्तृणसुगन्धककासमर्दककालमालकुठेर-
कक्षवकखरपुष्पशिग्रुमधुशिग्रुफणिज्झकसर्षपराजिकाकुला-

कर्बुरभेदं खरदपुत्रकमाहुः । प्रभृतिग्रहणाद्बालपाकाम्लावस्थायां गृह्यते । तेषां सामान्यगुणमाह । साहित्यादि तेषां केषांचिद्गुणविशेषमाह । बालमिति अयं परिपक्वस्य गुणः अपक्वस्य तु सामान्यगुणशीर्णवृन्तस्यावस्थात्रयेण गुणमाह । सक्षारमिति सक्षारमित्यादयो बालस्य गुणाः, भेदनादयो मध्यस्य, आनाहेत्यादि जीर्णस्य, आनाह—आमपक्वाशयजो द्विविधः अष्ठीला मूत्राष्ठीला न पुनरनिलाष्ठीला, शीर्णवृन्तस्य मूत्रविकारहारित्वादवस्थात्रयस्यापि आनाहश्चाष्ठीला चानाहाष्ठीलं तन्नुदतीति वृद्धाः ॥ ३७ ॥

पिप्पल्यादीनि वर्गीकृत्य पठन्ति तत्र किञ्चित् संस्कारकं किञ्चिच्छाकं किञ्चिद्भेषजं किञ्चिदाहारमिति, तान्येवाह पिप्पलीति पिप्पलीमरिचे द्वे प्रसिद्धे, शृङ्गवेरकं शुण्ठी, आर्द्रकहिङ्गुजीरकाः प्रसिद्धाः, कुस्तुम्बुरुकं धान्यं, जम्बीरो हरितशाकमुत्तरापथे जम्बीरगन्धि किञ्चिदम्लं, सुमुखो वनवर्वरिका, सुरसा सुरभिपर्णी तुलसीति लोके, अर्जकः श्वेतकुठेरकः, भूस्तृणं रोहिषः तुम्बाकमन्ये सुगन्धको गन्धतृणमल्पं भूस्तृणं सुगन्धितृणमिति केचित् तत्रापि नार्थभेदः, कासमर्दः प्रसिद्धः, कालमालं वर्वरिका, कुठेरकस्तद्भेद एव, क्षवकः छिक्काकारः छिंकणीति लोके, खरपुष्पो मरुवकः, अन्ये क्षवकभेदमाहुः, केचिद्बोड़यिकेत्याहुः, शिग्रुः शोभाञ्जनकः सुरसमित्यन्ये, मधुशिग्रुः लोहित कुसुमोऽल्पविटपः शोभाञ्जनकभेदः शण्ड इत्यत्र क्वचित् स च स्वनाम ख्यातः, फणिज्झकः फाणिज इति लोके,

कुलवेणुगण्डीरतिलपर्णिकावर्षाभूचिल्लकमूलकपोतिकालशु-नपलाण्डुकलायप्रभृतीनि ॥ ३८ ॥

कटून्युष्णानि रुच्यानि वातश्लेष्महराणि च।
कृतान्नेषूपयुज्यन्ते संस्कारार्थमनेकधा ॥
तेषां गुर्वी स्वादुशीता पिप्पल्यार्द्रा कफावहा।
शुष्का कफानिलघ्नी सा वृष्या पित्ताविरोधिनी ॥
स्वादुपाक्यार्द्रमरिचं गुरु श्लेष्मप्रसेकि च।
कटूष्णं लघु तच्छुष्कमवृष्यं कफवातजित् ॥
नात्युष्णं नातिशीतञ्च वीर्य्यतो मरिचं सितं।
गुणवन्मरिचेभ्यश्च चक्षुष्यञ्च विशेषतः ॥
नागरं कफवातघ्नं विपाके मधुरं कटु।
वृष्योष्णं रोचनं हृद्यं सस्नेहं लघु दीपनम् ॥

अन्ये मरुवकमाहुः, सर्षपराजिके प्रसिद्धे, कुलाहलो मुण्डितकः, वेणुयव वेगनामा काकादनीत्यर्थः गण्डीरोऽपि द्विविधः स्थलजो जलजश्चेति तत्र स्थलजो हरितशाकः, तिलपर्णी चोरक श्रीहस्तिनीत्यपरे, वर्षाभूः पुनर्नवा, चिल्लकमूलकलशुनाः प्रसिद्धाः, कलायोऽत्र त्रिपुटकभेदः, त्रिपुटकस्यापि वक्ष्यमाणत्वात् केचित् पुनरुक्तभयादिमं तं पाठं न मन्यन्ते तेषां मतेऽत्र कलायस्त्रिपुटकः पलाण्डुर्लशुनभेदः, प्रभृतिग्रहणादेवं जातीयान्यपराणि ॥ ३८ ॥

एषां सामान्यगुणमाह। कटून्युष्णानीत्यादि, कृतान्नेषु मुद्गयूषादिषु तेषां मध्ये केषाञ्चिद्गुणविशेषमाह। तेषामिति कफावहा स्ववर्गापेक्षया, पित्ताविरोधिनी ईषत्पित्तविरोधिनी ईषत्पित्तशमनीत्यर्थः, पित्तप्रकोपनीति केचित् पठन्ति व्याख्यानयन्ति च। सा पित्तशमनीति पूर्वं दर्शिता वीर्य्यवादिना शास्त्रकारेण निर्द्दिष्टा, सा सत्यं पित्तकोपनी। यथार्द्रा पित्तशमनी शुष्का पित्तप्रकोपनीति नात्युष्णं नातिशीतञ्चेति

कफानिलहरं स्वर्य्यं विबन्धानाहशूलनुत्।
कटूष्णं रोचनं हृद्यं वृष्यं चैवार्द्रकं स्मृतं॥
लघूष्णं पाचनं हिङ्गु दीपनं कफवातजित्।
कटु स्निग्धं सरं तीक्ष्णं शूलाजीर्णविबन्धनुत्॥
तीक्ष्णोष्णं कटुकं पाके रुच्यं पित्ताग्निवर्द्धनं।
कटु श्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयं॥
कारवी करवी तद्वद्विज्ञेया सोपकुञ्चिका।
भक्ष्यव्यञ्जनभोज्येषु विविधेष्ववचारिता॥
आर्द्रा कुस्तुम्बरी कुर्य्यात् स्वादुसौगन्ध्यहृद्यतां।
सा शुष्का मधुरा पाके स्निग्धा तृड्दाहनाशनी॥
दोषघ्नी कटुका किञ्चित्तिक्ता स्रोतोविशोधनी॥ ३८॥
जम्बीरः पाचनस्तीक्ष्णः क्रिमिवातकफापहः॥
सुरभिर्दीपनो रुच्यो मुखवैशद्यकारकः।

इसितं मरिचं शोभाञ्जनकबीजं शुक्लमपि मरिचमस्तीत्येके गुणवन्मरिचेभ्यश्च इति मरिचमस्तीत्येके गुणवन्मरिचेभ्य इति मरिचेभ्यः सकाशादतिशायि गुणकारीत्यर्थः। नागरमिति सस्नेहं ईषत्स्नेहं, लघु आर्द्रकादिति बोद्धव्यं विबन्धानाह शूलनुदिति—विबन्धो वाताद्यप्रवृत्तिः, आनाहश्चदरापूरः। लघूष्णमिति जीरकद्वयं शुक्लपीतभेदेन, कारवीति कारवी कृष्णजीरकः उत्तरापथे प्रसिद्धः, कारवी यवानीत्येके अजमोदेत्यपरे अन्ये राजिकामाहुः, उपकुञ्चिका स्थूलजीरकः ईषत् कृष्णो हस्वजीरक इति लोके, भक्ष्याणि वटकादीनि व्यञ्जनानि शाकादीनि संस्कृतानि भोज्यानि भक्तयवाग्वादीनि अवचारिता प्रचिता। आर्द्रा कुस्तुम्बरीति पुष्पफलोपेता हरितधान्यविटप आर्द्रा कुस्तुम्बरीत्युच्यते धनेति लोके॥ ३८॥

जम्बीर इति सुरवे द्वे तु कृष्णकुसुमे प्रथमा श्वेता द्वयन्तु कृष्णेति न पौनरुक्त्यप्रसङ्गः निर्दोषं सार्षपमिति कफघ्नं सार्षपं शाकमासुरं

कफानिलविषश्वासकासदौर्गन्ध्यनाशनः ।
पित्तकृत्पार्श्वशूलघ्नः सुरसः समुदाहृतः ॥
तद्वत्तु सुमुखो ज्ञेयो विशेषाद्गरनाशनः ।
कफघ्ना लघवो रूक्षा स्निग्धोष्णाः पित्तवर्द्धनाः ॥
कटुपाकरसाश्चैव सुरसार्जकभूस्तृणाः ।
मधुरः कफवातघ्नः पाचनः कण्ठशोधनः ॥
विशेषतः पित्तहरः सतिक्तः कासमर्द्दकः ।
कटुः सक्षारमधुरः शिग्रुस्तिक्तोऽथ पित्तलः ॥
मधुशिग्रुः सरस्तिक्तः शोफघ्नो दीपनः कटुः ।
विदाहि वह्विभिन्मूत्रं रूक्षं तीक्ष्णोष्णमेव च ॥
त्रिदोषं सार्षपं शाकं गाण्डीरं वेगनाम च ।
चित्रकस्तिलपर्णी च कफशोफहरो लघुः ॥
वर्षाभूः कफवातघ्नी हिता शोफोदरार्शसां ।
कटुतिक्तरसा हृद्या रोचनी वह्निदीपनी ॥
सर्व्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका ।
महत्तद्गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषकृत् ॥
तदेव स्निग्धसिद्धन्तु पित्तनुत् कफवातजित् ।
त्रिदोषशमनं शुष्कं विषदोषहरं लघु ॥
विष्टम्भि वातलं शाकं शुष्कमन्यत्र मूलकात् ॥ ३० ॥

शाकमासुरं शाकमेव चेति क्वचित्, तत्र आसुरि राजिका। चित्रक इति कण्ठाय हिता कण्ठ्या, मूलकपोतिका बालमूलकम्। आमं अनग्निपक्वं, स्निग्धसिद्धं घृतमांसादिपक्वं, मूलकस्य बालमहदाम-स्निग्धशुष्कभेदेनात्र गुणोक्तिः। विष्टम्भीति अमुं केचिदनार्षमवेच्यन्ते अन्ये तु मन्यन्ते ॥ ३० ॥

पुष्पञ्च पत्रञ्च फलं तथैव यथोत्तरं ते लघवः प्रदिष्टाः।
तेषान्तु पुष्पं कफपित्तहन्तृ फलं निहन्यात् कफमारुतौ च॥
स्निग्धोष्णतीक्ष्णः कटुपिच्छिलश्च गुरुः सरः स्वादुरसश्च वल्यः।
वृष्यश्च मेधास्वरवर्णचक्षुर्भग्नास्थिसन्धानकरो रसोनः॥
हृद्रोगजीर्णज्वरकुक्षिशूलविबन्धगुल्मारुचिकासशोफान्।
दुर्नामकुष्ठानलसादजन्तुसमीरणश्वासकफांश्च हन्ति॥
नात्युष्णवीर्योऽनिलहा कटुश्च तीक्ष्णो गुरुर्नातिकफावहश्च।
बलावहः पित्तकरोऽथ किञ्चित् पलाण्डुरग्निञ्च विवर्द्धयेच्च॥
स्निग्धो रुचिस्थः स्थिरधातुकर्त्ता बल्योऽथ मेधाकफपुष्टिदश्च।
स्वादुर्गुरुः शोणितपित्तशस्तः स पिच्छिलः क्षीरपलाण्डुरुक्तः॥

कलायशाकं पित्तघ्नं कफघ्नं वातलं गुरु।
कषायानुरसञ्चैव विपाके मधुरञ्च तत्॥

पुष्पमिति मूलकविषयोऽयं यादृक्मूलककन्देषु बालमध्यवृद्धस्निग्ध- सिद्धशुष्केषु फलनिर्देशस्तद्वत् पुष्पपत्रफलेष्वपि वाच्यः, रसोनभेदमाह। स्निग्धेत्यादि पञ्चरसः स्वल्पकन्दो, रसोनो लशुन इत्यर्थः, अनलसादोऽग्नि- मान्द्यं, जन्तवः क्रिमयः। नात्युष्णेति पलाण्डुः स्थूलनालाग्रपत्रो गृञ्जनको भेदः, स एव सक्षीरो मधुररसः क्षीरपलाण्डुरित्युच्यते। स्निग्धेत्यादि स्वादुर्गुरुः शोणितपित्तशस्तः सपिच्छिलः क्षीरपलाण्डुरुक्तः। कलाय शाकमिति कषायमधुरशाकमाह। जन्त्वित्यादि—चुक्रूनाडिकाकारपत्रः, चुचु इति लोके, यूथिकाशाकविशेषः, सा द्विधा ईषत् श्वेतपुष्पा अतिश्वेत- पुष्पा च, जीवन्ती जीवातणु जीवकसदृशो इत्यन्ये, डांड़िकेत्यपरे, तरुणीस्वनाम- प्रसिद्धा अन्ये वरुण इति पठन्ति वरुणपत्रीलशाको जलकूलजः। बिम्बी- तिका कुन्दुरिका तस्याः पत्राण्यत्र गृह्यन्ते, नन्दो भल्लातको लोजनकः अन्ये अनन्ता भल्लातक इति पठन्ति। तत्र अनन्ता लाङ्गलिका कलिकारीति लोके। भल्लातकवृक्षस्य फलान्यामानि पल्लवाश्च शाकत्वेनाभिप्रेताः,

चुच्चूयूथिकातर्णीजीवन्तीविम्बीतिकानन्दीभल्लातक-च्छगलान्त्रीवृक्षादनीफञ्जीशाल्मलीशेलुवनस्पतिप्रसवशणक-र्बुदारकोविदारप्रभृतीनि ॥ २१ ॥

कषायस्वादुतिक्तानि रक्तपित्तहराणि च।
कफघ्नान्यनिलं कुर्य्युः संग्राहीणि लघूनि च ॥
लघुः पाके च जन्तुघ्नः पिच्छिलो व्रणिनां हितः।
कषायमधुरो ग्राही चुच्चूस्तेषां त्रिदोषहा ॥
चक्षुष्या सर्व्वदोषघ्नी जीवन्ती समुदाहृता।
वृक्षादनी वातहरा फञ्जीत्वल्पबला मता ॥
क्षीरवृक्षोत्पलादीनां कषाया पल्लवाः स्मृताः।
शीताः संग्राहिणः शस्तारक्तपित्तातिसारिणां ॥
पुनर्नवावरुणतर्कार्य्युरुवूकवत्सादनीबिल्वशाकप्रभृतीनि।
उष्णानि स्वादुतिक्तानि वातप्रशमनानि च।
तेषु पौनर्नवं शाकं विशेषाच्छोफनाशनं ॥

छगलान्त्रीवृद्धदारकस्य पत्राणि बुक्के त्यपरे, वृक्षादनी वन्दाकः वृक्षकलिम्बुके-त्यन्ये, फञ्जीशाकी वाड़ इति प्रसिद्धः भार्गीमिके मन्यन्ते, शाल्मली प्रसिद्धा, शेलुः श्लेष्मातकः लिसाड़ इति लोके, वनस्पतिप्रसवाः वनस्पतिरुदुम्बरा-दयः, तस्य प्रसवाः पल्लवाः, शणः प्रसिद्धः, कर्व्वुदारः श्लेष्मान्तकभेदः, कोवि-दारः काञ्चनारः। प्रभृतिग्रहणादेवं जातीयान्यन्यान्यपि शाकानि ॥ २१ ॥

तेषां सामान्यगुणमाह कषायेत्यादि—तेषां केषाञ्चिद्गुणविशेषमाह। लघुरिति क्षीरवृक्षाः पिप्पल्यादयः, उत्पलानि नीलोत्पलप्रभृतीनि तेषां पल्लवाः। पुनर्नवेति पुनर्नवा श्वेता, वरुणो वृक्षविशेषः स्वनामप्रसिद्धः, तर्कारी अर्णिका गणिकारिका, उरुवुकः शुक्लैरण्डः, वत्सादनी वत्सपुत्रकः वत्सवतिया इति लोके, गुड़ूचीत्यपरे, विल्वशाकं विल्वजकं, प्रभृतिपदग्रहणादन्यान्यपि, तेषां सामान्यगुणमाह उष्णानीत्यादि, विशे-

तण्डुलीयकोपोदिकाऽश्ववलाचिल्लीपालङ्क्यावास्तूकप्रभृतीनि।

सृष्टमूत्रपुरीषाणि सक्षाराणि सराणि च।
मन्दवातकफान्याहु रक्तपित्तहराणि च॥
मधुरो रसपाकाभ्यां रक्तपित्तमदापहः।
तेषां शीततमो रूक्षस्तण्डुलीयो विषापहः॥
स्वादुपाकरसा वृष्या वातपित्तमदापहा।
उपोदिका सरा स्निग्धा बल्या श्लेष्मकरी हिमा॥
कटुर्विपाके क्रमिहा मेधाग्निबलवर्द्धनः।
सक्षारः सर्वदोषघ्नो वास्तूको रोचकः सरः॥
चिल्ली वास्तूकवत्ज्ञेया पालङ्क्या तण्डुलीयवत्।
वातकृत् बद्धविण्मूत्रा रूक्षा पित्तकफे हिता॥
शाकमाश्ववलं रुक्षं बद्धविण्मूत्रमारुतं॥ ३२॥

मण्डूकपर्णीसप्तलासुनिषण्णकसुवर्चलाब्राह्मीसुवर्चलापिप्पलीगुडूचीगोजिह्वाकाकमाचीप्रपुन्नाड़ावल्गुजसतीनहहतीक-

सगुणमाह—तेष्विति तण्डुलीयक चुलाइ इति लोके, उपोदिका पोइ, अश्ववला मेथिकेत्यन्ये, तत्र, अश्ववला तुरुष्कदेशे हहत्पत्रमेथिकाभेदएव स्फिथ इति लोके, तन्त्रान्तरे मेथिका चिस्फित्ययोः पृथग्गुणनिर्द्देशः कृतः, तत्राह "वातपित्तहरा तिक्तालघ्वीश्लेष्माविरोधिनी। मेथिका ततसमं किञ्चित् हिस्फित्यं पुष्टिदं गुरु" चेल्ली चेलवासुकः गौड़वास्तूकं इत्यन्ये, यवशाकमाहुरेके अन्ये तु यवशाकान्तरमाहुः, पालङ्क्या पालङ्ग इति लोके, वासुकः टङ्कवासुकः टङ्कचच् इति लोके, प्रभृतिग्रहणादपराण्यपि, तेषां सामान्यगुणमाह सृष्टमूत्रेत्यादि तेषां विशेषगुणमाह मधुर इति मदापह इति मदो विषमद्यशोणितोत्थोविकारः। स्वाद्विति तिक्तप्रायाण्याह॥३२॥

मण्डुकपर्णीति मण्डुकपर्णी ब्राह्मी थेड़ुगड़ः, जेज्जटस्तु सप्तलां

ण्टकारीकाफलपटोलवार्त्ताकुकारवेल्लककटुकीकेवुकोरुवूकपर्पटककिराततिक्तककर्कोटकारिष्टकोशातकीवेत्रकरीरआटरूषकार्कपुष्पीप्रभृतीनि ॥ ३३ ॥

रक्तपित्तहराण्याहुर्हृद्यानि सुलघूनि च।
कुष्ठमेहज्वरश्वासकासारुचिहराणि च ॥
कषाया तु हिता पित्ते स्वादुपाकरसा हिमा।
लघ्वी मण्डूकपर्णी तु तद्वद्गोजिह्विका मता ॥
अविदाही त्रिदोषघ्नः संग्राही सुनिषण्णकः।
अवल्गुजः कटुः पाके तिक्तः पित्तकफापहः ॥

यवतिक्ताभेदमाहुः। सुनिषण्णकसिरिवालिकेति लोके, श्रीकण्ठदेवस्तु चतुर्दलमाह तल्लक्षणः कथ्यते "चाङ्गेरीसदृशैः पत्रैः सुनिषण्णश्चतुर्दलः। अकजलान्विते देशे चतुःपत्रीति कथ्यते" सुवर्चला सूर्यावर्त्तः केचिन्मात्स्यसदृशदण्डं आर्त्तगलसदृशपत्रं लक्षणमाहुः, पिप्पलीगुडूच्यौ प्रसिद्धे, पूर्वं पिप्पलीफलमुक्तं अत्र तु पत्रं गोजिह्वा दार्विपत्रिकाः कर्कशा दीर्घपत्रा गोजिभीति लोके, काकमाचीप्रपुन्नाडौ प्रसिद्धौ, अवल्गुजो वाकुचीति लोके, सतीनो वर्त्तुलकलायः, वृहतीफलं सामान्याद्बृहतीद्वयस्य च फलं अन्ये तु कण्टकारिकामपि पठन्ति, पटोलफलं पत्रञ्च, वार्त्ताको हन्ताको वर्त्तुलफलः, वड् इति लोके, कारवेल्लकः स्वनामप्रसिद्धः, कटुकिका अरण्यकासमर्दिका अन्ये तिक्तारिकामाहुः, अपरे तु कटुतिक्तपुष्पाम्लकफलाकारफलां प्रसिद्धामाहुः, केवुको ग्राम्यो वन्यश्च स्वनामप्रसिद्धः, उरुवूकः रक्तैरण्डः अन्ये तु उरुवुकस्य पत्रमत्रगृह्यते। पर्पटकः प्रसिद्धः किराततिक्तको भूनिम्बः, कर्कोटकः प्रसिद्धः, अरिष्टो निम्बः, कोशातकी घोषकः तोरइ इति लोके, वेत्रकरीरं वेत्राग्रं, आटरूषको वासकः, अर्कपुष्पी अर्कपत्रसदृशी लता अन्ये अर्कपर्णमाहुः, प्रभृतिग्रहणादन्यानि तिक्तशाकानि ज्ञेयानि ॥ ३३ ॥

ईषत्तिक्तं त्रिदोषघ्नं शाकं कटु सतीनजं ।
नात्युष्णशीतं कुष्ठघ्नं काकमाच्यास्तु तद्विधं ॥
कण्डुकुष्ठक्रमिघ्नानि कफवातहराणि च ।
फलानि हस्तीनान्तु कटुतिक्तलघुनि च ॥
कफपित्तहरं वृष्यमुष्णं तिक्तमवातलं ।
पटोलं कटुकं पाके हृद्यं रोचनदीपनं ॥
कफवातहरं तिक्तं रोचनं कटुकं लघु ।
वार्त्ताकं दीपनं प्रोक्तं जीर्णं सक्षारपित्तलं ॥
तद्वत्ककौटकं प्रोक्तं कारवेल्लकमेव च ।
अटरूषकवेत्राग्रगुडूचीनिम्बपर्पटाः ॥
किराततिक्तसहितास्तिक्ताः पित्तकफापहाः ।
कफापहं शाकमुक्तं वरुणप्रपुन्नाड़योः ॥
रूक्षं लघु च शीतञ्च वातपित्तप्रकोपणं ।
दीपनं कालशाकन्तु गरदोषहरं कटु ॥
कौसुम्भं मधुरं रूक्षमुष्णं श्लेष्महरं लघु ।
वातलं नालिकाशाकं पित्तघ्नं मधुरञ्च तत् ॥
ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता ।
उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी ॥ ३४ ॥

तेषां सामान्यगुणमाह रक्तपित्तेत्यादि विशेषगुणमाह ॥ कषायेति तद्विधमिति त्रिदोषघ्नं। कण्ड्वित्यादि जीर्णं पक्वं, तद्वदिति गुड़ूची इह कफपित्तहरा चरके च वायुं बलादनी इत्यादिति स्निग्धोष्णवीर्यत्वात् तस्मात्त्रिदोषघ्नी । कफापहमिति पूर्वपठितोऽपि वरुणः प्रपुन्नाड़सामान्यगुणत्वादत्र पठितः । शीतञ्चेति चकारादनात्युष्णशीतं तत्र संयुक्तवातपित्तकर्त्तृत्वं यद्वा शीतमपि पित्तकृत् प्रभावत्वात् प्रभृतिग्रन्थहृणा-

लोणिकाजातुकपर्णिकापत्तूरजीवकसुवर्चलाकुरवककठि-
ल्लरकुन्तलिकाकुरण्टिकाप्रभृतीनि ॥ ३५ ॥

स्वादुपाकरसाः शीताः कफघ्ना नातिपित्तलाः ।
लवणानुरसा रूक्षाः सक्षारा वातलाः सराः ॥
स्वादुतिक्ता कुन्तलिका सकषाया कुरण्टिका ।
संग्राहि शीतलञ्चापि लघु दोषविरोधि च ॥
राजक्षवकशाकन्तु शटीशाकन्तु तद्विधं ।
स्वादुपाकरसं शाकं दुर्जरं हरिमन्थजं ॥
भेदनं मधुरं रूक्षं कलायमतिवातलं ।
स्रंसनं कटुकं पाके लघुवातकफापहं ॥

इत्यन्याह दीपनमिति-कालशाकं श्राद्धाङ्ग:-श्राद्धशाक इत्यर्थः । कौशुम्भ-मिति कौशुम्भं प्रसिद्धं, वातलमिति नाडिका नालीति लोके । ग्रहणीति चाङ्गेरी आम चाङ्गेरीति लोके ॥ ३४ ॥

लोणिकेति लोणिका लोणिया, जातुकं शुक्लशालपर्णी त्रिपर्णिका दुग्धिका वनकार्पासीत्यपरे, पत्तूरं शालिञ्च शिरबालिकाभेदो, महापत्रः जीवको जीवनाम स्वनामप्रसिद्धः, सुवर्चला सूर्य्यावर्त्तभेदः, डुडुरकः डोडोति हिन्दिभाषा, स्वनामप्रसिद्धः, कुरवको द्रोणपुष्पः, कुठिञ्जरः कुरहञ्जनकोलसुम्रा इति लोके कुलालिकेति क्वचित्, तत्र कुनाड़िका गोनाड़िकः, कुन्तलिका पुच्छसदृशा दीर्घफला, कुरण्टिका अम्लानसदृशपत्र-कुसुमा हरितपुष्पा अनेन कुनालिका कुरण्टिके उत्तरापथजे इत्याहुः केचि-त्त्रिपर्ण्यादीनां श्लोकेन निर्द्देशं कुर्वन्ति ॥ ३५ ॥

तेषां सामान्यं गुणमाह स्वादुपाकेत्यादि, विशेषगुणमाह । स्वादिति प्रभृतिगृहीतमाह । संग्राहीति दोषापहन्तथेत्यत्र दोषविरोधि केचित् पठन्ति तन्नेच्छन्ति जेज्जटाः राजक्षवकशाकं कृष्णराजिका अनेन तु राजक्ष-वको वृहत्पत्रः, क्षवथुकाकार इत्याहुः, शटी स्वनामप्रसिद्धः, तद्विधमिति

शोफघ्नमुष्णवीर्य्यन्तु पत्रं पूतिकरञ्जजं ।
ताम्बुलपत्रं तीक्ष्णोष्णं कटु पित्तप्रकोपणं ॥
सुगन्धि विशदं तिक्तं स्वर्य्यं वातकफापहं ।
स्रंसनं कटुकं पाके कषायं वह्निदीपनं ॥
वक्त्रकण्डूमलक्लेददौर्गन्ध्यादिविशोधनं ॥ ३६ ॥

अथ पुष्पवर्गः ।

कोविदारशणशाल्मलीपुष्पाणि मधुराणि मधुरविपाकानि रक्तपित्तहरानि च । वृषागस्त्ययोः पुष्पाणि तिक्तानि कटुविपाकानि क्षयकासापहानि । मधुशिग्रुकरीरकुसुमानि कटुविपाकानि वातहराणि सृष्टमूत्रपुरीषाणि च ।
आगस्त्यं नातिशीतोष्णं नक्तान्धानां प्रशस्यते ।
रक्तवृक्षस्य निम्बस्य मुष्ककासनस्य च ॥

राजक्षवकसदृशं । सादिति क्षविमन्यक्षपकः । भेदनमिति पूर्वं सतीनो वर्त्तुलकलाय इह तु त्रिपुटककलायः । स्रंशनमिति पूतिकरञ्जः कण्टकिकरञ्ज अन्ये तु पूतिकश्चिरविल्वः करञ्जो नक्तमालः । ताम्बूलेति ताम्बूलपत्रं नागवल्लीपत्रं पर्णमिति लोके । स्रंसनमिति पर्णमुक्ता कषायमिति पूगफलं तस्य फलवर्गएव पठितत्वात्र पठनीयमित्येके अन्ये फलवर्गे पक्कमित्युक्तं शाकेषु त्वपक्कमार्द्रञ्चेत्याहुः । इति शाकवर्गः ॥ ३६ ॥

अथ पुष्पशाकवर्गः ।

कोविदारेति कोविदारः काञ्चनारः तद्भेदो वा, शणः वन्धनार्हवल्कप्रसिद्धः । तेषां सामान्यगुणमाह । मधुराणीति वृषेति वृषो वासकः, अगस्त्यः अगथीं वा अगथीया इति लोके, अगस्त्यपुष्पस्य गुणविशेषमाह । आगस्त्यमिति अत्रापि रसवीर्य्यविपाकप्रभावविभावितं कार्य्यं योजनीयं । रक्तवृक्षस्येति मुष्ककस्य घारहृक्षस्य मोषउ इति लोके, आसनो वीजकः शेषं प्रसिद्धं, सतिक्तमिति पद्मं पद्मपुष्पं सूर्य्योदयविकासि । मधुरमिति कुमुदं

कफपित्तहरं पुष्पं कुष्ठघ्नं कुटजस्य च।
सतिक्तं मधुरं शीतं पद्मं पित्तकफापहं॥
मधुरं पिच्छिलं स्निग्धं कुमुदं ह्लादि शीतलं।
तस्मादल्पान्तरगुणे विद्यात् कुवलयोत्पले॥
सिन्धुवारं विजानीयाद्धितं पित्तविनाशनं॥ ३७॥
मालतीमल्लिके तिक्ते सौरभ्यात् पित्तनाशने॥
सुगन्धि विशदं हृद्यं वाकुलं पाटलानि च।
श्लेष्मपित्तविषघ्नन्तु नागं तद्वच्च कुङ्कुमं॥
चम्पकं रक्तपित्तघ्नं शीतोष्णं कफनाशनं।
किंशुकं कफपित्तघ्नं तद्वदेव कुरुण्टकं॥
यथावृक्षं विजानीयात् पुष्पं वृक्षोचितं तथा।
मधुशिग्रुकरीराणि कटुश्लेष्महराणि च॥ ३८॥

क्षवककुलेचरवंशकरीरप्रभृतीनि कफहराणि सृष्टमूत्रपुरीषाणि।

क्षवकं क्रमिलं तेषु स्वादुपाकं सपिच्छिलं।
विष्यन्दि वातलं नातिपित्तश्लेष्मकरञ्च तत्॥

चन्द्रोदयविकासि, तस्मादिति कुवलयं कुमुदभेदः, उत्पलं स्वनामप्रसिद्धम्, सिन्धुवारमिति सिन्धुवारं निर्गुण्डीपुष्पम्॥ ३७॥

मालतीति—मालती जाती, मल्लिका प्रसिद्धा, सौरभ्यात् सौगन्ध्यात्। सुगन्धीति—नागं नागकेशरं, तद्वन्नागवत्, कुङ्कुमं प्रसिद्धं, चम्पकमिति—किंशुकं पलाशपुष्पं, कुरुण्टकं सहचरपुष्पं। उपसंहारमाह—यथेति वृक्षोचितं वृक्षानुसारेनेत्यर्थः। मध्वित्यादि—मधुशिग्रुः रक्तशोभाञ्जनकः, तस्य करीराणि कोमला नालाः, अन्येतु मधुशिग्रुकरीराणीत्यत्र मधुशिग्रुकरीरयोः पुष्पाणीति व्याचक्ष्यते, ते तु करीरकुसुमानीति पूर्व्वपाठं न मन्यन्ते॥ ३८॥

वेणो: करीरा: कफला मधुरा रसपाकत: ।
विदाहिनो वातकरा: सकषाया विरूक्षणा: ॥
उद्भिदानि पलालेक्षुकरीषवेणुक्षितिजानि ॥
तत्रपलालजातं मधुरं मधुरविपाकं रूक्षं दोषप्रशमनञ्च ।
इक्षुजं मधुरं कषायानुरसं कटुकं शीतलञ्च ।
तद्वदेवोष्णं कारीषं कषायं वातकोपनञ्च ।
वेणुजातं कषायं वातकोपनञ्च ।
भूमिजं गुरुनातिवातलं भूमितश्चास्यानुरस: ॥
पिण्याकतिलकल्कस्थूणिकाशुष्कशाकानि सर्व्वदोषप्रकोपणानि ।
विष्टम्भिन: स्मृता: सर्व्वे वटका वातकोपना: ।
सिण्डाकी वातला सान्द्रा रुचिष्यानलदीपनी ॥

उद्भिद्शाकान्याह क्षवकेति क्षवकश्छत्रक:, कुलेचरं ववुखण्डक:, वंश-करीरो वंशाङ्कुर:, अन्येतु क्षवकं द्रोणपुष्पीसदृशं विटपमाहु:, तत्र, तस्या-नुद्भिदत्वात्, प्रभृतिग्रहणादन्यान्यप्युद्भिदानि। तेषां सामान्यगुणमाह। कफहराणीत्यादि। तेषां कस्यचिद्विशेषगुणमाह क्षवकमिति—विष्यन्दि श्लेष्मस्रावि, एतेन श्लेष्मपित्ताल्पजनकत्वं वातवर्द्धकत्वमुक्तम्। वेणो: करीरा इति केचिन्मधुररसपाकित्वविदाहित्वयोर्व्विरोधमाहु:, तत्र प्रभावात्। आधारविशेषेणापि उद्भिदानां गुणविशेषमाह उद्भिदानीति—उद्भिदानि छत्रकादीनि, तद्वदिति इक्षुजसदृशं, भूमितश्चास्यनुरस इति भूमिसदृश-गुणमित्यर्थ:। यद्यपि वेणुजस्य गुणा नोक्ता:, तथापि तदाधारसदृशगुण-मुह्यं, शुष्कशाकविशेषगुणमाह। पिण्याकेति—उमासर्षपादीनां यन्त्रादि-पीड़ितानां नि:स्नेहकल्क: पिण्याक:, तिलकल्कस्तिलपिण्याक:। सोऽपि यन्त्रादिपीड़ित:, स्थूणिकाशुष्कशाकानि नालिशाकै: कृता वटका:, नतु शुष्कशाकमिति, भिन्नं तस्योक्तगुणत्वात्, स्थूणिकारूपाणि शुष्कशाकानीति वाक्यार्थ:, तत्रापि स्थूणिका वटका:, अन्येतु पिण्याकीतिलपत्रस्थूणिकाशुष्क-

विड्भेदि गुरु रूक्षञ्च प्रायो विष्टम्भि दुर्जरं ।
सकषायञ्च सर्व्वं हि स्वादु शाकमुदाहृतं ॥
पुष्पं पत्रं फलं नालं कन्दाश्च गुरवः क्रमात् ।
कर्कशं परिजीर्णञ्च क्रिमिजुष्टमदेशजं ॥
वर्ज्जयेत् पत्रशाकन्तत् यदकालविरोहि च ॥ ३९ ॥

कन्दानत ऊर्द्ध्वं वक्ष्यामः ।

विदारिकन्दशतावरीविसमृणालशृङ्गाटककशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुकशङ्खालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि ।
रक्तपित्तहराण्याहुः शीतानि मधुराणि च ।
गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च ॥

शाकानीति पठन्ति व्याख्यानयन्ति च, पिण्याकोशाकं कच्छविषये प्रायशः, तिलपत्रं तिलविटपशाकं, स्थूणिका अरुणशुष्कशाकं मूलकशाकं विहायान्यत् सर्व्वं, तन्नेच्छति गयी, स्थूणिकाशुष्कशाकानां गुणकर्म्माह । विष्टम्भन इति वटकाः पिष्टकासमर्दककुष्माण्डकमूलकादिकृताः मुद्गादिकृताश्च, सवाततोदशूलामलाप्रवृत्तिर्व्विष्टम्भः । शुष्कशाकप्रकरणात् शुष्कशाकविशेषस्य गुणमाह ।—सिण्डाकीति मूलकादिशाकमेव किञ्चित् स्विन्नं क्षुस्तं सुगन्धिकटुकद्रव्यान्वितं वटकीकृतं शूलेषु सिण्डाकीत्युच्यते, सा द्विविधा आर्द्रा शुष्का च, वटकान्तर्गता आर्द्रायास्त्वयमेव गुणनिर्द्देशः । स्वादुशाकविषयं परिभाषामाह । विड्भेदीति स्वादु यच्छाकन्तत्सर्व्वमेवैवं गुणमित्यर्थः, पुष्पमिति इति क्वचित्पाठः । वर्ज्जनीयपत्रशाकविषयां परिभाषामाह । कर्कशमिति कर्कशं खरस्पर्शं, परिजीर्णं पुरातनं, क्रिमिजुष्टं क्रिमिभक्षितं, अदेशजं अनुचितदेशोत्पन्नं, अकालविरोहि अकालजम् । इति शाकवर्गः ॥ ३९ ॥

केचित् फलवदुपयुज्यमानात् फलवर्गादनन्तरं कन्दान् पठन्ति, शाक-

मधुरो बृंहणो वृष्यः शीतः स्वर्य्योऽतिमूत्रलः।
विदारीकन्दो वल्यस्तु पित्तवातहरस्तु सः॥
वातपित्तहरी वृष्या स्वादुतिक्ता शतावरी।
महती चैव हृद्या च मेधाग्निवलवर्द्धिनी॥
ग्रहण्यर्शोविकारघ्नी वृष्या शीता रसायनी।
कफपित्तहरास्तिक्तास्तस्या एवाङ्कुराः स्मृताः॥
अविदाहि विसम्प्रोक्तं रक्तपित्तप्रसादनं।
विष्टम्भि दुर्जरं रूक्षं विरसं मारुतावहं॥
गुरुविष्टम्भिशीतौ च शृङ्गाटककशेरुकौ।
पिण्डालुकं कफकरं गुरु वातप्रकोपणं॥
सुरेन्द्रकन्दः श्लेष्मघ्नो विपाके कटु पित्तकृत्।
वेणोः करीरा गुरवः कफमारुतकोपनाः॥ ४० ॥

मूलशूरणमाणकप्रभृतयः कन्दा ईषत्कषायाः कटुका रूक्षा विष्टम्भिनो गुरवः कफवातलाः पित्तहराश्च।

विषयत्वादन्ये शाकान्तरमिति कन्दानाह। कन्दानत इति—विदारी- विदारिकन्दः, शतावरी शतमूली स्वनामप्रसिद्धा। विसं पद्ममूलं, अन्ये स्थूलपद्मनालं विसमाहुः, मृणालं पद्ममूलात् स्थूलप्ररोहः, अन्ये सूक्ष्मं नालमाहुः, शृङ्गाटकं जलमध्ये त्रिकण्टकं सिंघाड़ेति लोके, कशेरुकपिण्डालू प्रसिद्धौ, मध्वालुकं रोमशमधुरस्वादमेव, हस्त्यालुकं महाकाष्ठालुकमित्येके। काष्ठालुक शङ्खालुक रक्तालुकोत्पलकन्दाः स्वनामप्रसिद्धाः, प्रभृतिग्रहणात् केलूटमुञ्जातकादयः। तेषां सामान्यगुणमाह रक्तपित्तेत्यादि, तेषां विशेष- गुणमाह। मधुर इति महदल्पभेदेन शतावरी द्विविधा, तस्या एवाङ्कुरा शतावर्य्यङ्कुरा इत्यर्थः। अविदाहीति सुरेन्द्रकन्दः रक्तकन्दः, वेणोरिति वेणोः करीराःवंशमूलाङ्कुराः॥ ४० ॥

माणकं स्वादु शीतञ्च गुरुचापि प्रकीर्त्तितं।
स्थूलकन्दस्तु नात्युष्णः शूरणो गुदकीलहा॥
कुमुदोत्पलपद्मानां कन्दा मारुतकोपनाः।
कषायाः पित्तशमना विपाके मधुरा हिमाः॥
वाराहकन्दः श्लेष्मघ्नः कटुको रसपाकतः।
मेहकुष्ठक्रिमिहरो वल्यो वृष्यो रसायनः॥
तालनालिकेरखर्ज्जूरप्रभृतीनां मस्तकमज्जानः।
स्वादुपाकरसानाहूरक्तपित्तहरांस्तथा।
शुक्रलाननिलघ्नांश्च कफवृद्धिकरानपि॥
वालं ह्यनार्त्तवं जीर्णं व्याधितं क्रिमिभक्षितं।
कन्दं विवर्जयेत् सर्व्वं यो वा सम्यक् न रोहति॥ ४१॥

अथ लवणवर्गः।

सैन्धवसामुद्रविड़सौवर्च्चलरोमकौद्भिदप्रभृतीनि लवणानि

अन्यानपि कन्दानेकगुणान् वर्गीकृत्याह। मूलेति मूलकन्दो ग्रामकन्दः, केचित् सकलकन्द इति पठन्ति, अत्रापि सएवार्थः, शूरणः स्वनामप्रसिद्धः, माणकं महापत्रः, यथापूर्व्वमधःपत्रपरित्यागि, प्रभृतिशब्दात् कोविदारादिकन्दः, तेषां सामान्यगुणमाह ईषत्कषायेत्यादि, विशेषगुणमाह।—माणकमिति, तदन्ये कन्दानाह। कुमुदेति कुमुदं श्वेतोत्पलं, उत्पलं नीलोत्पलं, तेषां सामान्यगुणमाह। कन्दा मारुतकोपना इत्यादि, वराहकन्द इति वराहकन्दः, चर्म्मकारालुक इति प्रसिद्धः, अन्येतु वराहीति पठन्ति, वराहीष्टष्टिकोच्यते, मूलप्रसङ्गेनाग्रगुणमपि केषाञ्चिदाह। तालेत्यादि तालादयः प्रसिद्धाः, मस्तकमज्जानः तालादिवृक्षाग्रमज्जानः, सामान्यगुणमाह—स्वादुपाका इत्यादि, हेयमाह—वालं ह्यनार्त्तवमिति। इति कन्दवर्गः॥ ४१॥

यथोत्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्व्वं स्निग्धानि स्वादूनि सृष्टमूत्रपुरीषाणि चेति।

चक्षुष्यं सैन्धवं हृद्यं रुच्यं लघ्वग्निदीपनं।
स्निग्धं समधुरं वृष्यं शीतं दोषघ्नमुत्तमं॥
सामुद्रं मधुरं पाकि नात्युष्णमविदाहि च।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलं॥
सक्षारं दीपनं रूक्षं शूलहृद्रोगनाशनं।
रोचनं तीक्ष्णमुष्णञ्च विड़ं वातानुलोमनं॥
लघु सौवर्च्चलं पाकि वीर्य्योष्णं विशदं कटु।
गुल्मशूलविवन्धघ्नं हृद्यं सुरभि रोचनं॥
रोमकं तीक्ष्णमत्युष्णं व्यवायि कटुपाकि च।
वातघ्नं लघु विस्यन्दि सूक्ष्मं विड़्भेदि मूत्रलं॥
लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनं।
सतिक्तं कटु सक्षारं विद्याल्लवणमौद्भिदं॥

अथ लवणानि। सैन्धवेति सैन्धवः प्रसिद्धः, दक्षिणसमुद्रसमीपभवं सामुद्रं, विड़ं कृत्रिमं स्वनाम्ना ख्यातं, तच्च प्रसारणीकल्कभक्तलवण-संयोगादग्निदाहेन निर्वृत्तं सौवर्च्चलं तदेव निर्गन्धं काललवणमित्युच्यते, रोमकं शाकम्भरीदेशोत्थं, रुमासरःसम्भवमित्यन्ये, भूमिमुद्भिद्योत्पन्नस्य क्षारोदकस्य सूर्य्यरश्मिभिर्व्वह्निना वा क्राथनाद्यल्लवणमुत्पद्यते तदौद्भिदं, प्रभृति-ग्रहणादूषरप्रसवादीनि, तेषां सामान्यं गुणमाह।—यथोत्तरमित्यादि, जेज्जटश्चरकमतानुसारेण सैन्धवानन्तरं सौवर्च्चलं पठन्ति, तदसम्यक् सामुद्रात् सौवर्च्चलस्योष्णत्वात्, उत्तरोत्तरमुष्णानीति वचनादिति गयी, तेषां विशेषमाह। चक्षुष्यमिति श्रेष्ठत्वं पुनरस्योत्तमस्य जात्युत्कर्षात् अन्येषा-मश्रेष्ठत्वमाह।—सामुद्रमिति सूक्ष्मं सूक्ष्मस्रोतोवगाहनशीलं, वातानुलोमनं

कफवातक्रिमिहरं लेखनं पित्तकोपनं।
दीपनं पाचनं भेदि लवणं गुटिकाह्वयं॥
ऊषसूतं वालुकैलं शैलमूलाकरोद्भवं।
लवणं कटुकं छेदि विहितं कटु चोच्यते॥ ४२॥
यवक्षारस्वर्जिकाक्षारपाकिमटङ्कणक्षाराः।
गुल्मार्शोग्रहणीदोषशर्कराश्मरिनाशनाः॥
क्षारास्तु पाचनाः सर्व्वे रक्तपित्तकराः स्मृताः।
ज्ञेयौ वह्निसमौ क्षारौ स्वर्जिकायावशूकजौ॥
शुक्रश्लेष्मविबन्धार्शोगुल्मप्लीहविनाशनौ।
उष्णोऽनिलघ्नः प्रक्लेदी ऊषक्षारो बलापहः॥
मेदोघ्नः पाकिमः क्षारो मूत्रवस्तिविशोधनः॥
विरूक्षणोऽनिलकरः श्लेष्मघ्नः पित्तदूषणः।
अग्निदीप्तिकरस्तीक्ष्णष्टङ्कणः क्षार उच्यते॥

मार्गावृतवातस्य स्रोतःशुद्धिकरत्वेन प्रवर्त्तनं, धातुक्षयकृतस्य तु सूक्ष्मत्व सामान्यान्नातिप्रशमनमित्यर्थः। लघ्विति व्यवायीति अपक्वमेव देहमखिलं व्याप्नोति पश्चाद्देहस्थमेव पाकमुपैति, लघ्वित्यादि उत्क्लेदि आर्द्रीभावकारि, अन्ये प्रकोपयति श्लेष्मपित्तादीनित्याहुः, प्रभृतिशब्दोऽयं गृहीत केचिद्गुड़िका-लवणं पठन्ति, दीपनमिति पाकाभिनिर्वृत्तत्वाद्गुड़िकाभूतमेव गुड़िका-लवणं भवति तच्च वृक्षलवणमिति ख्यातं, अपरमपि प्रभृतिग्रहणाद्गृहीत-माह। ऊषरप्रसूतमिति ऊषरप्रसूतं ऊषरप्रजातं, वालुकैलमिति वालुकाः सिकताः ताभिः युक्ता इला पृथ्वी वालुकैला तत्र सम्भवं वालुकैलम्। मूलाकरोद्भवमिति मूलभूत आकरो मूलाकरः, प्रशस्यतरतुरङ्गमोत्पत्ति-भूमिः, तत्रोद्भवं कटुक उच्यत इति, कटुलवणमिति प्रसिद्धमित्यर्थः॥ ४२॥

लवणसारूप्यादाह। यवक्षारेति यवक्षारो यवशूकोद्भवः, शीतलिका यवक्षार इति लोके, सर्ज्जिक्षारः साजीति लोके, पाकेन निर्वृत्तो यः स

सुवर्णं स्वादु हृद्यञ्च वृंहणीयं रसायनं।
दोषत्रयघ्नं शीतञ्च चक्षुष्यं विषसूदनं॥
रूप्यमम्लं सरं शीतं सस्नेहं पित्तवातनुत्।
ताम्रं कषायं मधुरं लेखनं शीतलं सरं॥
तिक्तं कांस्यं लेखनञ्च चक्षुष्यं कफवातजित्।
वातकृत् शीतलं लोहं तृष्णापित्तकफप्रनुत्॥
कटुक्रिमिघ्ने लवणे त्रपुसीसे विलेखने।
मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादयः।
चक्षुष्या मणयः शीता लेखना विषसूदनाः॥
पवित्रा धारणायाश्च पाप्मालक्ष्मीमलापहाः॥ ४३॥
धान्येषु मांसेषु फलेषु चैव शाकेषु चानुक्तमिहाप्रमेयात्।
आस्वादतो भूतगुणैश्च मत्वा तदादिशेद्द्रव्यमनल्पबुद्धिः॥
षष्टिका यवगोधुमा लोहिता ये च शालयः।
मुद्गाढ़कीमसूराश्च धान्येषु प्रवराः स्मृताः॥

पाकिमः क्षारपाकविधानेनोक्तः प्रतिसारणीयः पानीयश्च पाकिमन्तूषरपांशुकाभिनिर्वृत्तमित्यन्ये, पाकिमाद्भिन्नमूषरक्षारमाहुः—टङ्कणक्षारः सौभाग्यापरपर्य्यायः सुहागा इति लोके, प्रभृतिग्रहणादेवं जातीयानां क्षाराणामवबोधः, तेषां सामान्यगुणमाह। क्षेयाविति अत्र केचित् सुवर्णादीनामपि गुणमाहुः। सुवर्णमिति द्रव्यानन्त्यादनुक्तद्रव्यज्ञानोपायमाह॥ ४३॥

धान्येष्विति चकारात्कन्दलवणद्रव्यकृतान्नादीनां समुच्चयः। इहेति शास्त्रे, अप्रमेयादानन्त्यादित्यर्थः। अप्रमोहादिति अप्रमादादिति क्वचित् अत्राप्रमोहोऽज्ञानत्वमेव तेषु अनुक्तद्रव्येषु परमौपयौगिकत्वमुक्तं न सर्व्वं विस्तरभयादित्यर्थः। तथा अप्रमादः सावधानत्वमेवास्माकमनुक्तद्रव्येषु परमौपयौगिकमेवोक्तः, तत्सर्व्वं विस्तरभयादेव आस्वादतो रसात् भूतगुणैरिति

लावतित्तिरिसारङ्गकुरङ्गैणकपिञ्जलाः ।
मयूरवर्म्मिकूर्म्माश्च श्रेष्ठा मांसगणेष्विह ॥ ४४ ॥
दाड़िमामलकं द्राक्षा खर्जूरं सपरूषकं ।
राजादनं मातुलुङ्गं फलवर्गे प्रशस्यते ॥
सतीनो वास्तुकश्चुञ्चूचिल्लीमूलकपोतिकाः ।
मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते ॥ ४५ ॥
गव्यं क्षीरं घृतं श्रेष्ठं सैन्धवं लवणेषु च ।
धात्रीदाड़िममम्लेषु पिप्पली नागरं कटौ ॥

द्रव्यारम्भकभूतगुणैर्व्वीर्य्यपाकादिभिः, अन्येतु पठन्ति तेषां जड़त्वेन प्रमादपाठ एवायं, उक्तेषु प्रधानतममाह। षष्टिकेति रक्तशालि षष्टिकौ, शूकधान्येषु यवगोधूमौ, कुधान्येषु मुद्गाढ़कौ, मसूराः शमीधान्येषु। लावेति लावतित्तिरिकपिञ्जलमयूराविष्किरेषु पक्षिषु, सारङ्गकुरङ्गैणाजाङ्गलमृगेषु, सारङ्गोऽत्र गौरहरिणः, कुरङ्गश्चतुरङ्गः भेदनीपतिः। एणः कृष्णहरिणः। वर्म्मीमत्स्येषु, वर्म्मीरोहितक इत्येके, रोहितोमत्स्यानामिति चरकवचनात्, अन्ये सर्पाकारमत्स्यमाहुः, श्रीब्रह्मदेवस्तु वर्म्मी महाशकलोरोहितभेदोऽत्र न पुनः सर्पाकारमत्स्य इत्याह। कूर्म्मः कच्छपः स च यादिषु ॥ ४४ ॥

दाड़िमामलकमिति—दाड़िमामलकमातुलुङ्गानि फलेष्वम्लेषु, द्राक्षाखर्ज्जूरराजादनानि मधुरफलेषु, खर्ज्जूरं पिण्डखर्ज्जूरं, राजादनं क्षीरिका, परुषकं कषायेषु परुषफल इति लोके, परूषकम्मातुलुङ्गे मधुराम्लेष्विति केचित्, सतीन इति सतीनादयः शाकवर्गे प्रशस्ता, सतीनो वर्त्तुलकः, वास्तुकः टङ्कवास्तुकः चूचूक इति लोके, चिल्ली चेत्रवास्तुकः, मूलकपोतिका बालमूलकं, मण्डूकपर्णी ब्राह्मी, जीवन्ती डोड़ीति लोके, जीवन्ती जीवातण्डुलीयकसदृशीत्यन्ये, शाकमांसफलैर्युक्ता इत्यादौ विशेषानुक्तावपि एषामेव प्राधान्याद्ग्रहणम् ॥ ४५ ॥

गव्यमिति गोरसेषु गव्यं क्षीरघृतेषु श्रेष्ठं, सैन्धवमिति लवणेषु सैन्धवम्।

तिक्ते पटोलवार्त्ताकी मधुरे घृतमुच्यते।
क्षौद्रं पूगफलं श्रेष्ठं कषाये सपरूषकं।
शर्करेक्षुविकारेषु पाने मध्वासवौ तथा॥
परिसम्वत्सरं धान्यं मांसं वयसि मध्यमे।
अपर्य्युषितमन्नन्तु संस्कृतं मात्रया शुभं॥
फलं पर्य्यागतं शाकमशुष्कं तरुणं नवं॥ ४६॥
अतःपरं प्रवक्ष्यामि कृतान्नगुणविस्तरं॥
लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः।
वातानुलोमनो हृद्यः पिप्पलीनागरायुतः॥

धात्रीति ईषदम्लैरमम्लैर्व्वा इत्यादौ अम्लाकरणे अनुक्तयोरपि धात्रीदाड़िमयोरेव प्रयोगः, एवं कटुकादिष्वपि ज्ञेयं। धात्रीदाड़िमित्यादिरसद्वारेणेति न पुनरुक्तं। पिप्पलीत्यादि इति क्षौद्रं पूगफलं श्रेष्ठमिति घृतं क्षौद्रञ्च मधुरे कषाये पूगफलं परुषकञ्च। शर्करेक्षुविकारेष्विति अनुक्तविशेषेषु शर्करा। पानेमध्विति मधुशब्देन मार्द्वीकं, आसवशब्देन द्राक्षारसः। परिसम्वत्सरमिति परिसम्वत्सरोषितं वर्षोंषितं धान्यमित्यर्थः। मांसमिति मध्यमे वयसि एणादेर्म्मांसप्रधानमित्यर्थः। अपर्य्युषितमिति अपर्य्युषितमन्नं तद्दिनसिद्धं, मात्रयेति मात्रयाप्रयुक्तमित्यर्थः, शुभं पथ्यम्। फलमिति पर्य्यागतं पक्वमित्यर्थः। शाकमशुष्कमिति अशुष्कं पर्य्यागतं पक्वमित्यर्थः, शाकं अशुष्कं आर्द्रं तरुणं प्रत्यग्रं नवम्। तत्कालाशटितं सलिलदध्यादितैलमाक्षिममूत्राणां स्ववर्गे एव प्राधान्यमिति न पुनरिह कथनं कृतम्॥ ४६॥

अतऊर्द्धमिति कृतान्नं संस्कृतान्नमित्यर्थः। लाजेत्यादि किञ्चिदत्र विशुद्धानामिति ईषदर्थमकारमुत्पाद्य मन्दविरेचनादिशुद्धानामित्यर्थः, वदन्ति चरकाभिप्रायेणतु विशुद्धानामित्येव पाठः, नतु अविशुद्धानामिति, पथ्यो हित इत्यर्थः, पाचनः आमादीनां, दीपनो जठराग्नेः, हृदयाय हितो हृद्यः, आयुतः

स्वेदाग्निजननी लघ्वी दीपनी वस्तिशोधनी।
क्षुत्तृट्‌श्रमग्लानिहरी पेया वातानुलोमनी॥
विलेपी तर्पणी हृद्या ग्राहिणी बलवर्द्धनी।
पथ्या स्वादुरसा लघ्वी दीपनी क्षुत्तृषापहा॥
हृद्या सन्तर्पणी वृष्या वृंहणी बलवर्द्धनी।
शाकमांसफलैर्युक्ता यवाग्वस्ताश्च दुर्ज्जराः॥
सिक्थैर्व्विरहितो मण्डः पेया सिक्थसमन्विता॥

ईषद्युक्ताः, पेयामाह,—स्वेदाग्निजननीत्यादि, उष्णत्वात् स्वेदजननी, क्षुत्तृट्‌श्रमग्लानिहरीत्यत्र क्षुधां तृष्णां द्रवत्वात्, श्रमग्लानिहरीतृप्तिजनकत्वात्, हरतीत्येके व्याचक्षते, वृद्धवैद्यास्तु तृट्‌श्रमैभ्य उत्पन्नां ग्लानिं हरतीति व्याख्यानयन्ति। पेया यवागूः सा विरलद्रवा तदुपरितनो भागो-मण्डः एतद्‌द्वयमपि पेयं। यवागूगुणकर्म्माभिधायविलेपीगुणकर्म्माह। विलेपीति विलेपी घनसिक्था सा च लेह्या, तत्र मण्डपेयाविलेपीनां तण्डुलजलप्रमाणादिकं सूपकारा एव जानन्ति विस्तरभयात् परिभाषार्थानवस्थानाच्च न प्रमाणं लिखितम्। तस्या एव विलेप्या अन्यसंयोगे कर्म्मगुणमाह। हृद्येति हृद्या हृदयाय हिता, सन्तर्पणी तृप्तिजननी, वृष्या शुक्रला, वृंहणी शरीरवृद्धिकरी, अम्लादिभिः कृतसंस्कारा जेज्जटस्तु हृद्या सन्तर्पणीत्यादिश्लोकार्द्धं विशुद्धश शाकमांसफलैर्युक्ता यवाग्वोऽम्लाश्च दुर्ज्जरा इत्येवं पठन्ति। केषु पुनर्म्मण्डादीनां भेद इत्याह। सिक्थैरिति पेया सिक्थसमन्विता इति अत्र पेया यवागूरुच्यते साच सिक्थसमन्विता भवति, विलेपी बहुसिक्थस्यादिति बहुसिक्था बहुलसिक्था, घनसिक्था इति पुस्तकान्तरपाठः। पृथगद्रवरहिता अतएव लेह्या प्रागुक्तायाः पेया यवाग्वपरपर्य्याया तस्या विलेप्याः सकाशाद्भेदज्ञापनायाह यवागूर्व्विरलद्रवेति इत्यसाधुः इत्यर्थः। एतेनासिक्थोमण्डः। पेया यवाग्वपरपर्य्याया सिक्थसमन्विता विरलद्रवा विलेपी घनसिक्था लेह्या पृथगद्रवरहितेति भेदं जग्रं

विलेपी बहुसिक्था स्याद्यवागूर्व्विरलद्रवा।
विष्टम्भी पायसो बल्यो मेदःकफकरो गुरुः॥
कफपित्तकरो बल्या कृशराऽनिलनाशिनी॥ ४७॥
धौतस्तु विमलः शुद्धो मनोज्ञः सुरभिः समः॥
स्विन्नः सुप्रसुतस्तूष्णो विशदस्त्वोदनो लघुः।
अधौतोऽप्रसुतोऽस्विन्नः शीतश्चाप्योदनो गुरुः॥
लघुः सुगन्धिः कफहा विज्ञेयो भृष्टतण्डुलः।
स्नेहैर्म्मांसैः फलैः कन्दैर्व्वैदलाम्लैश्च संयुताः॥
गुरवो वृंहणा बल्या ये च क्षीरोपसाधिताः।
सुस्विन्नो निस्तुषो भृष्ट ईषत्सूपो लघुर्हितः॥

सिक्थैरहित इत्यादि श्लोकेनोक्तं "केचिच्चण्डं पञ्चगुणे तोये यवागूं षड़्गुणे पचेत् चतुर्द्दशगुणे पेयां विलेपीतु चतुर्गुणे" परिभाषादर्शनात्। पेया यवाग्वो-र्भेदमाहुः। विलेपी साधर्म्म्यात्पायसस्यापि गुणमाह। विष्टम्भीति पायसो दुग्धतण्डुलसिद्धः, विष्टम्भीप्रभावात् सवाततोदशूलामलाप्रवृत्तिर्व्विष्टम्भः। कृशरागुणमाह। कल्क इत्यादि, कृशरातिलतण्डुले माषकृता यवागूः॥४७॥

भक्तगुणमाह। धौतस्त्विति—शुद्धः स्वयमेव धवलः, विगतमलस्तु कण्ड-नात् धौतत्वेन चापगतावशिष्टमलः, मनोज्ञः मनोरमः, सुरभिः सुगन्धिः, समः स्विन्नः, सर्व्वोऽपि स्विन्न इत्यर्थः, सुप्रसुतः सुष्ठुगलितः, उष्णः प्रसिद्धः, विशदः सुसिद्धः, सच रक्तादिदोषरहित एवम्भूत ओदनो लघुः। सर्व्वौदनगुणमाह। अधौत इति[illegible]म्भूत ओदनो गुरुः। भृष्टतण्डुलगुणमाह। स्नेहैरिति स्नेहै-र्घृतादिभिः मांसफलकन्दाः प्रसिद्धाः। विदलं शमीधान्यं, चकाराच्छा-कादीनामनवबोधः। क्षीरोपसाधिता उदकादिसंयुक्ताः पायसादन्ये प्रहित-माह। सुस्विन्न इति ईषत् सूप इति ईषद्भृष्ट इति सम्बन्धः, तत्र अभर्ज्जिता-पेक्षया भर्ज्जितमुद्गादिसूपस्य लाघवं माषसूपस्य तु भर्ज्जितादिना लाघव-मित्येके, भर्ज्जितस्यापि न लाघवमित्यन्ये, अन्ये तु ईषत्सूप इति न

स्विन्नं निपीड़ितं शाकं हितं स्यात् स्नेहसंस्कृतं।
अस्विन्नं स्नेहरहितमपीड़ितमतोऽन्यथा ॥ ४८ ॥
मांसं स्वभावतो वृष्यं स्नेहनं वलवर्द्धनं।
स्नेहगोरसधान्याम्लफलाम्लकटुकैः सह ॥
सिद्धं मांसं हितं वल्यं रोचनं वृंहणं गुरु।
तदेव गोरसादानं सुरभिद्रव्यसंस्कृतं ॥
विद्यात् पित्तकफोद्रेकि वलमांसाग्निवर्द्धनं।
परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु ॥
रोचनं वलमेधाग्निमांसौजःशुक्रवर्द्धनं।
तदेवोल्लुप्तपिष्टत्वादुल्लुप्तमिति पाचकाः ॥

पठन्ति किन्तु पाठान्तरं पठन्ति तच्चादृष्टत्वान्न लिखितं प्रहितमभिधाया-पराण्यपि व्यञ्जनान्याह। स्विन्नमिति अतः पूर्व्वोक्तात्, अन्यथा इति अहित-मित्यर्थः ॥ ४८ ॥

मांसस्य व्यञ्जनोत्तमस्य संयोगसंस्कारजं गुणकर्म्मनिर्द्दिशन्नाह। मांस-मिति स्नेहो घृतादिः, गोरसो दध्यादिः, धान्याम्लं काञ्जिकं, फलाम्लं दाड़िमादि, कटुकं मरिचादि, प्रकृत्यनुरूपं संस्कारानुरूपञ्च। वस्थलादिविशेयं अयं ललितमांसानां गुण उक्तः। तस्यैव मांसस्य प्रदिग्धत्वेन सिद्धगुणमाह। तदेवेति मांसं आदानं घन इवावापः, सुरभिद्रव्यसंस्कृतं हिङ्गुमरिचजाजि-प्रभृतिसंस्कृतं अयं प्रलेहमांसानां गुण उक्तः। मांसस्य परिशुष्कत्वेन सिद्धस्य-गुणमाह परिशुष्कमिति, परिशुष्कप्रदिग्धयोरयं विशेषः, "सिक्ता बहुघृते भृष्टं मुहुरुष्णाम्बुना मृदु। जीवकाद्यैर्घनमांसं परिशुष्कं तदुच्यते।" तदेव गोरसा-दानं प्रदिग्धमिति विश्रुतं। स्थिरं कठिनं, हर्षणं हर्षोत्पादकं, वलं उत्साहः ओजो हृदिस्थितं धातुधाम अयं शून्यगुण उक्तः। परिशुष्कस्य शून्यस्य प्रसङ्गेन शून्यविशेषाणामपि गुणमाह। तदिति तदेव परिशुष्कमेव जर्द्धं निरन्तरं छेदनातिशयेमानुशम्छिन्नत्वात् पिष्टमिवोल्लुप्तपिष्टं उल्लुप्तमिति

परिशुष्कगुणैर्युक्तं वह्नौ पक्वमतो लघु।
तदेव शूलिकाप्रोतमङ्गारे परिपाचितं॥
ज्ञेयं गुरुतरं किञ्चित् प्रदिग्धं गुरुपाकतः।
उल्लुप्तं भर्ज्जितं पिष्टं प्रतप्तं कन्दुपाचितं॥
परिशुष्कं प्रदग्धञ्च शूल्यं यच्चान्यदीदृशं।
मांसं यत्तैलसिद्धन्तु वीर्य्योष्णं पित्तकृल्लघु॥
लघ्वग्निदीपनं हृद्यं रुच्यं दृष्टिप्रसादनं।
अनुष्णवीर्य्यं पित्तघ्नं मनोज्ञं घृतसाधितं॥
प्रीणनः प्राणजननः श्वासकासक्षयापहः।
वातपित्तश्रमहरो हृद्यो मांसरसः स्मृतः॥
स्मृत्योजः स्वरहीनानां ज्वरक्षीणक्षतोरसां।

पाचका इति वदन्तीति शेषः, पाचकाः सूपकाराः तस्यैवाङ्गारपक्वस्य परिशुष्कस्यगुणमाह परिशुष्केति—वह्नाविति अङ्गारतापित्वात् अतः पूर्व्वोक्तपरिशुष्काल्लघु भवति उल्लुप्तपिष्टप्रदिग्धगुणमाह तदेवेति, तदेव शूलिकाप्रोतमिति लोहादिशलाकारोपितं प्रदिग्धं परिशुष्काद् गुरुपाकात्किञ्चिद्गुरुतरं स्नेहादिप्रदिग्धत्वादेव उक्तानुक्त शूल्यान्याह। उल्लुप्तमिति उल्लुप्तं पूर्व्ववद्भर्ज्जितादीनि व्याख्यानयन्ति, भर्ज्जितं स्याद्घृतादौ तु पिष्टा यत्साधितम्। पुनः, अपूपादिकृतं पिष्टं दधिदाड़िमसौरभैः, सिद्धं साज्यैस्तथाजाजीसामुद्रमरिचैरपि। अङ्गारादिषु यत्पक्वं प्रतप्तं तदुदाहृतम्, पिष्टितं सौरभैर्लिप्तं कन्दुपक्वं मधुप्रभं। राजिकाकल्कलिप्तञ्च कन्दुपाचितमुच्यते। परिशुष्कप्रदिग्धे पूर्व्ववत्। हिङ्गूदके परिक्षिप्तं शूले निष्पीड़ितं ततः सिक्तासिक्ताम्बुधाराभिर्व्विधूमेऽग्नौ प्रतापयेत्। फलाम्लेनापि यत्पक्वं शूल्यं तत्सौरभान्वितम्। यच्चान्यदीदृशमिति। यदेवम्विधं मांसं तैलं साधितं भवति तदुष्णादिगुणकं ज्ञेयम्। घृतसाधितमाह। लघ्विति शूल्यं मांसमुक्तं प्रदिग्धपरिशुष्कभेदाभ्यां द्विभेदमेव तदभिधायद्रवमभिधातुमाह।

भग्नविश्लिष्टसन्धीनां कृशानामल्परेतसां ॥
आप्यायनः संहननः शुक्रौजोबलवर्द्धनः ॥ ४९ ॥
सदाड़िमयुतो वृष्यः संस्कृतो दोषनाशनः ॥
यन्मांसमुद्धृतरसं न तत्पुष्टिबलावहं ।
विष्टम्भि दुर्जरं रुक्षं विरसं मारुतावहं ॥
दीप्ताग्नीनां सदा पथ्यः खानिष्कस्तु परं गुरुः ।
मांसं निरस्थि सुस्विन्नं पुनर्दृषदि चूर्णितं ॥
पिप्पलीशुण्ठीमरिचगुड़सर्पिःसमन्वितं ।
एकध्यं पाचयेत् सम्यक् वेसवार इति स्मृतः ॥
वेसवारो गुरुः स्निग्धो बल्यो वातरुजापहः ।
प्रीणनः सर्व्वधातूनां विशेषान्मुखशोषिणां ॥
क्षुत्तृष्णापहरः श्रेष्ठः सौरावः स्वादुशीतलः ॥ ५० ॥

प्रीणन इति, आप्यायन इति स्मृति स्वरहीनज्वरक्षीणकृशाल्परेतसां स्वास्थ्यकरः, संहनन इति क्षतोरसां तथा भग्नविश्लिष्टसन्धीनां सन्धानकरः। शुक्राद इति अल्परेतसां, बलवर्द्धनः ओजहीनस्य ॥ ४९ ॥

एणादि प्रकृत्यनुविधानेन वासकस्योत्कर्षापकर्षावूह्यौ अन्यथा प्रतिगुणाभिधानं व्यर्थंस्यात्तस्यैवसंयोगजं गुणमाह सदाड़िमेति, इति मांसरसःसंस्कृतः कटुकादिना दोषशमनस्त्रिदोषहरः, सौवीरगुणमाह । प्रीणन इति सौवीरः रसकस्योपरितनोऽच्छोभागः । मांसरसप्रसङ्गेनोद्धृतरसमांसस्य गुणमाह । यदिति यः पिष्टक्वथितः गलितमांसाद्रसोऽगृहीतः स निःसारत्वादुक्तगुणः, केचिदत्र खानिष्कगुणं पठन्ति । दीप्ताग्नीनामिति तमन्ये परिशुष्कभेदं मन्यन्ते, अन्ये वेसवारभेदं खानिष्कमाहुः । वेशवारगुणमाह मांसमिति, अत्र गुड़ं विहाय हिङ्गुसर्पिःसमन्वितमिति केचित्पठन्ति तच्च सर्व्वैराचार्य्यैर्निषिद्धत्वात्, वेसवारमप्यन्ये परिशुष्कं मन्यन्ते ॥ ५० ॥

कफघ्नो दीपनो हृद्यः शुद्धानां प्राणिनामपि ॥
श्रेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः ।
स तु दाड़िममृद्वीकायुक्तः स्याद्रागषाड़वः ॥
रुचिष्यो लघुपाकश्च दोषाणामविरोधकृत् ।
मसूरमुद्गगोधूमकुलत्थलवणैः कृतः ॥
कफपित्ताविरोधी स्याद्वातव्याधौ च शस्यते ।
मृद्वीकादाड़िमैर्युक्तः स एवोक्तोऽनिलार्दिते ॥
रोचनो दीपनोहृद्यो लघुपाक्युपदिश्यते ।
पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ ॥
पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ ।
श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ॥
हन्ति मूलकयूषस्तु कफमेदो गलामयान् ।

रसकस्यप्रसङ्गेन मुद्गयूषस्यगुणमाह। कफघ्न इति छतयूषस्य व्यवहारार्थं स्वयमेव लक्षणं वक्ष्यति, कफघ्नस्थाने केचिद्वातघ्न इति पठन्ति। मुद्गयूषस्य संयोगान्तरेण नामान्तरं दर्शयन्नाह।. सत्विति स इति मुद्गयूषः, दोषाणाञ्चाविरोधकृदिति वातादीनां ईषद्विरोधकृद्वातादीमामीषच्छमन इत्यर्थः। मसूरादिपञ्चकयूषमाह मसूरेति, वातव्याधौ च शस्यत इति कथं मुद्गमसूरयोर्यूषो वाते शस्तः, कथं कुलत्थलवणयोर्योगे पित्तविरोधीति, उच्यते मसूरादित्रयाणां शैत्यात् कुलत्थलवणयोश्चापि पित्ताविरोधित्वम्। कुलत्थलवणयोगादेव च वाते शस्तः संयोगशक्तेर्व्वा अचिन्त्यत्वात्। तस्य पञ्चकयूषस्य संयोगान्तरेण गुणान्तरमाह मृद्वीकेति, मसूरादियूषो मृद्वीकादाड़िमाभ्यां संयुक्तोऽतीववातहरः। अन्ययूषानाह। पटोलेति पटोलादियूषस्य सूपयोनित्वात् मुद्गादिकं त्रिगुणमिच्छन्ति इमौ। द्वावपि यूषौ भिन्नौ ज्ञेयौ नतु द्वयोरप्येकः। कासेति मूलकयूषो वालशुष्कमूलकयूषः, जेज्जटस्तु यद्यपि वालमूलकं त्रिदोषघ्नं तथापि तस्य न यूषकरणे श्रुतिरस्ती-

कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः ॥
तूणीप्रतूणीकासार्शोगुल्मोदावर्त्तनाशनः ।
दाड़िमामलकैर्यूषो हृद्यः संशमनो लघुः ॥
प्राणाग्निजननो मूर्च्छामेदोघ्नः पित्तवातजित् ।
मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः ॥
यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः ।
सर्व्वधान्यकृतस्तद्वद्बृंहणः प्राणवर्द्धनः ॥ ५१ ॥
खलकाम्बलिकौ हृद्यौ तथा वातकफे हितौ ।
वल्यः कफानिलौ हन्ति दाड़िमाम्लोऽग्निदीपनः ॥
दध्यम्लः कफकृद्वल्यः स्निग्धो वातहरो गुरुः ।
तक्राम्लः पित्तकृत् प्रोक्तो विषरक्तप्रदूषणः ॥

त्याह अयमपि मुद्गादिसहितो ज्ञेयः । कुलत्थयूषेति अयमेक एव समुद्गश्च न विरेकं करोति नापि वमनं किन्तु तत्स्थमेव दोषं शमयतीति संशमनः । प्राणो भारहरणादिशक्तिः, मुद्गेति—ग्राही अतिसारादीनां संग्राही अयमप्येकः । यवकोलेति अयमप्येकः, सर्व्वधान्येति सर्व्वधान्यकृत इत्यभिधानेऽपि तत्समानयोनित्वाच्छूकधान्यान् विहाय मुद्गादिसमीधान्यानामपथ्यवर्ज्यं यूषः । अयं तन्त्रान्तरे नवमुष्टिनामाभिहितः ॥ ५१ ॥

खलेत्यादि—खलकाम्बलिकौ यूषविशेषौ, तत्र खलो द्विविधः । सतक्रसमीधान्यः सतक्रशाकश्च । तथा हि सतक्राणि समीधान्यानि स्निग्धानि संग्राहकानि खलानिति, सतक्रशाकस्तु "तक्रकपित्थचाङ्गेरीमरिचाजाजीचित्रकैः । सुपक्वः खड़यूषोऽयमथ काम्बलिकोऽपरः । दध्यम्ललवणस्नेहतिलमाषसमन्वितः" । तक्राम्ल इति काम्बलिकः अम्लानां वहुत्वाज्जेज्जटमते तु "दधिदाड़िममाषशाकस्नेहयुक्तं व्यञ्जनं खड़ इत्युच्यते" । नलमते तु, "तिलं सलुञ्चितं कृत्वा पिष्टं क्षीरे त्र्यहोषितं । पटे पूतं पचेद्धीमानार्द्रकोत्तापितेतु तत् । मरिचाजाजीसमुद्रैर्युक्तस्तिलखड़ो भवेत्" । काम्बलिकलक्षणमत्रैवोक्तं

खड़ाः खड़यवाग्वश्च षाड़वाः पानकानि च।
एवमादीनि चान्यानि क्रियन्ते वैद्यवाक्यतः॥ ५२॥
अस्नेहलवणं सर्व्वमकृतं कटुकैर्व्विना।
विज्ञेयं लवणस्नेहकटुकैः संयुतं कृतं॥
अथ गोरसधान्याम्लफलाम्लैरन्वितञ्च यत्।
यथोत्तरं लघु हितं संस्कृतासंस्कृतं रसे॥
दधिमस्त्वम्लसिद्धस्तु यूषःकाम्बलिकः स्मृतः।
तिलपिण्याकविकृतिः शुष्कशाकं विरूढ़कं॥

"दधिमस्त्वम्लसिद्धस्तु यूषः काम्बलिकः स्मृतः। पुनः सौवर्च्चलाजाजीवीजपूरकसौरभिः। संयोज्य मथितः स्वच्छ एष काम्बलिको भवेत्" येन येनाम्लेन सिद्धो यूषो यत् यद्गुणं करोति तत्तद्गुणं दर्शयन्नाह। वल्य इति दाड़िमैः क्रियते योऽम्लोयूषः सदाड़िमाम्लः। दध्यम्ल इति दध्ना क्रियते योऽम्लो यूषः स दध्यम्लः। तक्राम्लोऽप्येवम्। तक्राम्ल इति प्रदूषणः प्रकोपनः, दाड़िमधान्याम्लदधितक्रैरम्लत्वं काम्बलिकस्यैवेत्येके। खड़ इति खलाः पूर्व्वोक्ताः, खड़यवाग्व इति खड़ैरुक्तलक्षणैः सिद्धाः यवाग्वः खड़यवाग्वः। षाड़वलक्षणमुच्यते। स्पष्टाम्लमधुरो स्पष्टकषायलवणोषणः। अतिक्तःखाड़व कोलकपित्थादुग्रपद्व हितः, खाड़वा इति वहुवचनं खाड़वभूयस्त्वप्राप्तये, तच्च विस्तरभयान्न लिखितम्। पानकानि अम्लिका द्राक्षादिकृतानि, एवमादिग्रहणात्सट्टक् प्रभृतीनि॥ ५२॥

व्यवहारार्थं कृताकृतयूषयोः परिभाषां दर्शयन्नाह। अस्नेहलवणमिति, कटुकैः शुण्ठ्यादिभिः। तयोर्यूषयोरम्लान्तरसंयोगेन संस्कृतासंस्कृतयोरपि गुरुलाघवं दर्शयन्नाह। अथेति नपुंसकनिर्द्देशाद्रसमिति सामान्येनाभीष्टं, तेन यूषरसयोरुभयोरपि गुरुलाघवमुक्तं भवति, संस्कृतादसंस्कृतं लघ्विति सम्बध्यते, रसोऽत्र मांसरसः, यूषकाम्बलिकलक्षणमुच्यते। दधीति शुष्कशाकविशेषाणां कृताम्लानां गुणं निर्द्दिशन्नाह। तिलेति तिलविकृति-

सिण्डाकी च गुरूणि स्युः कफपित्तकराणि च।
तद्वच्च वटकान्याहुर्विदाहीनि गुरूणि च॥
लघवो वृंहणा वृष्या हृद्या रोचनदीपनाः।
तृष्णामूर्च्छाभ्रमच्छर्द्दिश्रमहा रागषाड़वाः॥ ५२॥
रसाला वृंहणी वल्या स्निग्धा वृष्या च रोचनी।
स्नेहनं गुड़संयुक्तं हृद्यं दध्यनिलापहं॥
सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः।
नातिद्रवा नातिसान्द्रा मन्थ इत्युपदिश्यते॥
मन्थः सद्यो वलकरः पिपासाश्रमनाशनः।
साम्लस्नेहगुड़ो मूत्रकृच्छ्रोदावर्त्तनाशनः॥

मोदकादिः, पिण्याकविकृतिः स्युट्टकादि। तिलपिण्याकस्य शुष्कशाकस्य विरूढ़कस्य व्यञ्जनानि देशपुरुषविशेषतो ज्ञेयानि, विरूढ़मङ्कुरितं विगतरोहम्बा, अन्ये शाकमेवात्यन्तरूढ़ं विरूढ़माहुः। सिण्डाकी अनासुताद्रीशुष्केषु मूलादिष्वसुतसिण्डाकीशुष्कगुणा नोक्तगुण इत्येके, अनासुतसिण्डाकीशाकवर्गे उक्तगुणेति आसुतसिण्डक्या एवायं गुण इत्येके, मूलकादिशाकमेव किञ्चित् स्विन्नं क्षुण्णं सुगन्धिकटुकद्रवान्वितं वटकीकृतं अम्लसुसिण्डाकीत्युच्यते, अन्येतु शाकसिक्थमण्डासुतिः मण्डाकीत्याहुः। तद्वदिति वटकानीति सिण्डाकवटकानि, रागषाड़वगुणमाह। लघव इति तत्र रागः—"सितारुचकसिन्धूत्थैः सवृक्षाम्लपरुषकैः। जम्बूफलरसैर्युक्तो-रागोराजिकयाकृतः"। षाड़वाः पुनर्म्मधुराम्ललवणसंयोगजा नानाविधाः॥५२

रसानां गुणमाह। रसेति रसाला शिखरिणी। सगुड़दधिगुणमाह स्नेहनमिति, मन्थमाह शक्तव इति, मन्थगुणमाह—मन्थः सद्योवलकर इति, सद्योवलोऽयं नोत्तरकालं वलकरीरूक्षत्वात्, अविशेषोक्तावपि यवादिशक्तवो ग्राह्याः। मन्थस्यैव द्रव्यान्तरसंयुक्तस्य गुणान्तरमाह साम्लस्नेहेत्यादि, उदावर्त्तनाशनत्वेनास्य वातहरत्वमुक्तं। पानकगुणमाह गौड़मिति, गुड़-

शर्करेक्षुरसद्राक्षायुक्ताः पित्तविकारनुत्।
द्राक्षामधुकसंयुक्ताः कफरोगनिवर्हणाः॥
वर्गत्रयेणोपहितो मलदोषानुलोमनः।
गौड़मम्लमनम्लं वा पानकं गुरुमूत्रलं॥
तदेव खण्डमृद्वीकाशर्करासहितं पुनः।
साम्लं सुतीक्ष्णं सुहिमं पानकं स्यान्निरत्ययं॥
मार्द्वीकं तु श्रमहरं मूर्च्छादाहतृषापहं।
परूषकाणां कोलानां हृद्यं विष्टम्भिपानकं॥
द्रव्यसंयोगसंस्कारं ज्ञात्वा मात्राञ्च सर्व्वतः।
पानकानां यथायोगं गुरुलाघवमादिशेत्॥ ५४॥

इति कृतान्नवर्गः।

वक्ष्याम्यतः परं भक्ष्यान् रसवीर्य्यविपाकतः।
भक्ष्याः क्षीरकृता बल्या वृष्या हृद्याः सुगन्धिनः।
अदाहिनः पुष्टिकरा दीपनाः पित्तनाशनाः॥

शब्दोपलक्षणत्वात् सर्व्वेक्षुविकारपानकगुण उक्तः, अनम्लं ईषदम्लम्। पानकस्य नानाद्रव्यपरिभाषामाह तदेवेति, तदेव गौड़मेव साम्लं सतिन्तिड़ीकादिद्रव्यं, सतीक्ष्णमिति मरिचादितीक्ष्णद्रव्यसहितं, सहिमं सकर्पूरं, पानकं स्यान्नैवेत्निरत्ययं श्रेष्ठं, एवं खण्ड मृद्वीका शर्करापानकेष्वम्लादिद्रव्यसंस्कारो ज्ञेयः, मृद्वीकाग्रहणं पानकयोनिफलोपलक्षणम्। द्राक्षापानकगुणमाह। मार्द्वीकमिति। परूषककोलपानकयोर्गुणमाह परूषकाणामिति, सर्व्वतः सर्व्वस्मिन् पानके, उक्तानुक्तपानकगुणोऽयमित्येके। इति कृतान्नवर्गः॥ ५४॥

भक्ष्यान्निर्देष्टुमाह। भक्ष्यानिति भक्ष्या लड्डुकादयः, रसवीर्य्यविपाकत इति रसादिभिः कृत्वेत्यर्थः, भक्ष्याणां योनिविशेषेण गुणविशेषं निर्दिशन्नाह भक्ष्या इति—गोधूमपिष्टविकृतिं क्षीरेणालोड्य ये क्रियन्ते ते क्षीरकृता

तेषां प्राणकरा हृद्या घृतपुराः कफावहाः।
वातपित्तहरा वृष्या गुरवो रक्तमांसलाः॥
वृंहणा गौड़िका भक्ष्या गुरवोऽनिलनाशनाः।
अदाहिनः पित्तहराः शुक्रलाः कफवर्द्धनाः॥
मधुमस्तकसंयावाः पूपा स्चैते विशेषतः।
गुरवो वृंहणाश्चैव मोदकास्तु सुदुर्जराः॥
रोचनो दीपनः स्वर्य्यः पित्तघ्नः पवनापहः।
गुरुर्मृष्टतमश्चैव सट्टकः प्राणवर्द्धनः॥
हृद्यः सुगन्धिर्म्मधुरः स्निग्धः कफकरो गुरुः।
वातापहस्तृप्तिकरो वल्यो विस्यन्दनः स्मृतः॥

भक्ष्याः। वल्या इति उत्साहकराः, अदाहिन इति ईषद्दाहिनः, दीपनाः पुनः स्ववर्गापेक्षया वातोपहताग्नेः संस्कारप्रभावाद्वा। क्षीरभक्ष्यविशेषमाह। तेषामिति यवरउ इति लोके, गुड़कृतान् भक्ष्यानाह वृंहणेति, अमिता वेष्टिता गुड़प्रधानोदरा गौड़िका इत्युच्यन्ते। मध्विति समिता वेष्टिताः पाकघनीभूता मधुरा घृतोदरा मधुमस्तकाः, तएव मधुशीर्षका उच्यन्ते, केचिन्मधुमस्तकशब्देन सज्जकमाहुः, संयावाः पुनः समिता मधुदुग्धेन मोद-यित्वा सुशोभना पचेत्, घृतोत्तरे खण्डे क्षिपेद्वाण्डे नवे ततः संयावोसौ युत-चूर्णैखण्डैलामरिचार्द्रकैरिति। पूपापूया इति लोके, मोदका लड्डुकाः। सट्टकगुणमाह दीपन इति, मिष्टतरोतिशयेन सुखाद्यः, सट्टकभेदा बहवः। तत्रैक एव लिख्यते "नवक्षव्योषखण्डेस्तु दधिनिर्म्मथ्यगालितं। दाड़िमवीज-संयुक्तं चन्द्रचूर्णावचूर्णितं। सट्टकं सुप्रमोदाख्यं नलादिभिरुदाहृतं" अपरे विस्तरभयान्न लिखिताः। विष्यन्दगुणमाह। हृद्य इति "आमगोधूमचूर्णञ्च सर्पिः क्षीरगुणान्वितं। नातिसान्द्रोनातिघनोविष्यन्दोनामनामतः"। अन्येतु घृतभृष्टतण्डुलान् विष्यन्दशब्दानाहुः, तन्नेच्छति गयी, समिताकृतं सामान्य-गुणं केचित् किञ्चिन्निराकुर्व्वन्नाह वृंहणा इति, समिता इति फेनकादि-

बृंहणा वातपित्तघ्ना भच्या वल्यास्तु सामिताः ।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥ ५५ ॥
मुद्गादिवेसवाराणां पूर्णा विष्टम्भिनो मताः ।
वेसवारैः सपिशितैः सम्पूर्णा गुरुबृंहणाः ॥
पाललाः श्लेष्मजनना शष्कुल्यः कफपित्तलाः ।
वीर्य्योष्णाः पैष्टिका भच्याः कफपित्तप्रकोपणाः ॥
विदाहिनो नातिबला गुरवश्च विशेषतः ।
वैदला लघवो भच्या कषायाः सृष्टमारुताः ॥
विष्टम्भिनः पित्तसमाः श्लेष्मघ्ना भिन्नवर्च्चसः ।
वल्या वृष्यास्तु गुरवो विज्ञेया माषसाधिताः ॥
कूर्च्चिका विकृता भच्या गुरवो नातिपित्तलाः ।
विरूढ़कक्रुता भच्या गुरवोऽनिलपित्तलाः ॥

विशेषणं समिता गोधूमचूर्णतया कृताः समिताः अन्ये बृंहणा इत्यादयः, समिताकृतभच्याणां सामान्यगुणाः। हृद्या इत्यादयस्तु समिताकृतभच्य-विशेषं फेनकादिगुणा इत्याहुः, तत्र फेनकाः "विमर्द्यविमलां शुक्लां समितां मातिशर्करां सम्वेष्टनाय गर्भार्थं खरपाकं घृते पचेत्। फेनकं फेनसङ्काशं सम्पूर्णशशिसन्निभम्" ॥ ५५ ॥

एत एव सामितादयो मुद्गादिन्यस्तगर्भा भवन्ति तदा तद्गुणं निर्द्दिश-न्नाह मुद्गादीति स्विन्नपिष्टमुद्गादिकल्का वेसवारः पूर्णा भविताः, पिशित-वेसवारे भवति गुणमाह वेसवारैः सपिशितैरिति, पिशितवेसवारै-रित्यर्थः, अपरे वेसवारं शुण्ठ्यादिमाहुः। सम्पूर्णा भविता। इमेऽपि सामिताः। पालला इति पाललं तिलपिष्टं गुड़ादुपेतं तेन कृताः पालला इमेऽपि सामिताः, शष्कुल्य इति शष्कुल्यः शाकुलीति लोके, सामि-तान् भच्यानभिधाय पिष्टभच्यान्निर्द्दिशन्नाह वीर्य्योष्णा इति, पैष्टिकाः तण्डुलपिष्टकृताः। वैदला इति वैदला मुद्गादिकृताः। वल्या वृष्यास्त्विति

विदाहोत्क्लेशजनना रूक्षा दृष्टिप्रदूषणाः।
हृद्याः सुगन्धिनो वृष्या लघवो घृतपाचिताः॥
वातपित्तहरा वल्या वर्णदृष्टिप्रसादनाः।
विदाहिनस्तैलकृता गुरवः कटुपाकिनः॥
उष्णा मारुतदृष्टिघ्नाः पित्तलास्त्वक्प्रदूषणाः।
फलमांसेक्षुविकृति-तिलमाषोपसंस्कृताः॥
भक्ष्या वल्यास्तु गुरवो वृंहणा हृदयप्रियाः।
कपालाङ्गारपक्कास्तु लघवो वातकोपनाः॥
सुपक्कास्तनवश्चापि भूयिष्ठं लघवो मताः।
सकिलाटादयो भक्ष्या गुरवः कफवर्द्धनाः॥ ५६॥
कुल्माषा वातला रूक्षा गुरवो भिन्नवर्चसः।
उदावर्त्तहरो वाट्यः कासपीनसमेहनुत्॥
धानोलुम्बास्तु लघवः कफमेदोविशोषणाः।

विग्रथितं क्षीरं घनत्वमापन्नं कूर्चिका तया विविधप्रकाराः कृताः कूर्चिकाविकृताः, विरूढ़ककृतेति विरूढ़ककृता अङ्कुरितमुद्गादिकृताः, घृततैलपक्कभक्ष्यस्य गुणविशेषमाह हृद्या इति, योनिविशेषेण भक्ष्याणां गुणागुणविशेषं दर्शयन्नाह फलेत्यादि, फलानि तालादीनि, कपालाङ्गारपक्कानां स्नेहसिद्धाल्लघुत्वं दर्शयन्नाह कपालाङ्गारपक्कास्त्विति, कपालं कर्परः, तत्र पक्का मण्डकादयः, अङ्गारपक्का अङ्गारकर्कटीप्रभृतयः। सकिलाटादय इति किलाटाः क्षीरकूर्चिपिण्डः आदिशब्दात्तक्रपिण्डकादयः॥ ५६॥

कुल्माषेति यवपिष्टमुष्णोदके सिक्तमीषत् स्विन्नमृदितं शृङ्गाटादिप्रकारं कुल्माषमाहुः, यवादयः स्विन्ना इत्येके। भिन्नवर्चसः द्रवमलाः, उदावर्त्तहरो वाट्येति। वाट्यो यवगोधूमादिभिर्दलितैः कृतः। अन्येतु भृष्टयवकृतो भक्ष्य इत्याहुः। धानाइति धाना भृष्टयवाः, उलुम्बा होलका, अत्र मुद्ग-

सक्तवो वृंहणा वृष्यास्तृष्णापित्तकफापहाः ॥
पीताः सद्यो वलकरा भेदिनः पवनापहाः।
गुर्व्वी पिण्डी खरात्यर्थं लघ्वी सैव विपर्य्ययात् ॥
सक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका ॥ ५७ ॥
लाजाश्छर्द्यतिसारघ्ना दीपनाः कफनाशनाः ॥
वल्याः कषायमधुरा लघवस्तृणमलापहाः।
तृट्छर्द्दिदाहघर्म्मार्त्तिनुदस्तत्सक्तवो मताः ॥
रक्तपित्तहराश्चैव दाहज्वरविनाशनाः।
पृथुका गुरवः स्निग्धा वृंहणाः कफवर्द्धनाः ॥
वल्याः सक्षीरभावात्तु वातघ्ना भिन्नवर्चसः।
सुदुर्जरः स्वादुरसो वृंहणस्तण्डुलो नवः ॥
सन्धानकृन्मेहहरः पुराणस्तण्डुलः स्मृतः।

कलायादिविसिम्बा अग्निपाका होलका इत्युच्यन्ते। याव्यधानाप्रसङ्गेन यवशक्तूनाह शक्तव इति, शक्तवो यवशक्तवः, वृंहणा नलेखना मांसकरा इत्यर्थः। तृष्णापित्तकफापहा इत्यत्र तृष्णापित्तमलापहा इति क्वचित्, तत्र मलापहत्वमल्पमलकर्त्तृत्वात्। सद्योवलकरत्वं रौच्यान्नोत्तरकालं। खर-मार्द्दवभेदेन गुरुलाघवमाह गुर्व्वित्यादि, खरा कठिनेत्यर्थः, विपर्य्ययादिति मृद्वित्यर्थः। पिण्डीमभिधायावलेहिकामाह शक्तूनामित्यादि, शक्तूना-मवलेहिक इति सम्बन्धः ॥ ५७ ॥

अधुना लाजगुणमाह लाजेति, मलापहत्वमल्पकर्त्तृत्वात्। लाजशक्तू-गुणमाह तृड़िति, तत् शक्तवो लाजशक्तवः, पृथुकागुणमाह पृथुकेति, आर्द्रशालिधान्यं मृदुभृष्टं मुषलाघातपिप्पटीभूतं मोरवं पृथुका इत्युच्यते, चिंड़ेति लोके। धान्यपिष्टगुणमाह सन्धानकृदिति, सन्धानं भग्नस्य आम-पक्कमित्यर्थः। तण्डुलगुणमाह तण्डुलमिति, नवतण्डुलगुणमाह सुदुर्ज्जर इति, किं वहुना आनन्त्यात्तु संयोगसंस्काराणां न शक्यन्ते सर्व्वोपसंग्रहः कर्त्तुं

द्रव्यसंयोगसंस्कारविकारान् समवेक्ष्य तु ॥
यदा कारणमासाद्य भोक्तृणां छन्दतोऽपि वा ।
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान्विनिर्दिशेत् ॥ ५८ ॥

अतः सर्व्वाण्यनुपानान्युपदेक्ष्यामः ।

अम्लेन केचिद्विहता मनुष्या माधुर्य्ययोगे प्रणयी भवन्ति ।
तथाम्लयोगे मधुरेण तृप्तास्तेषां यथेष्टं प्रवदन्ति पथ्यं ॥
शीतोष्णतोयासवमद्ययूष-फलाम्लधान्याम्लपयोरसानां ।
यस्यानुपानन्तु हितं भवेद्यत्तस्मै प्रदेयं त्विह मात्रया तत् ॥
व्याधिञ्च कालञ्च विभाव्य धीरैर्द्रव्याणि भोज्यानि च तानि तानि।
सर्व्वानुपानेषु वरं वदन्ति मेध्यं यदम्भः शुचिभाजनस्थं ॥

तस्मादुक्तानुक्तसंग्रहायाह द्रव्येति, विकारान् भक्ष्यविशेषान्, कारणमासाद्येति दोषादिप्रकोपं प्राप्येत्यर्थः, भोक्तॄणां छन्दतोऽपि वेति पुरुषाभिलषित इत्यर्थः । इति भक्ष्यवर्गः ॥ ५८ ॥

अनुपानं निर्द्देष्टुमाह । अनुपानानीति—अन्नादनुपश्चात्पीयत इत्यनुपानं । कुत्र हितावहमित्याह । अम्लेनेति—विहता उद्वेजिताः, माधुर्य्ययोगे इति माधुर्य्योपयोगे इत्यर्थः । प्रणयी भवन्ति सुखी भवन्ति, तथा अम्लयोगे इत्यत्रापि प्रणयी भवन्तीति सम्बन्धनीयं । तेषामुभयेषामपि अम्लतृप्तानां मधुरतृप्तानाञ्चेत्यर्थः, यथेष्टं यथाभिलषितं, अम्लतृप्तस्य मधुरं पथ्यं, मधुरतृप्तस्य चाम्लमित्यर्थः । तद्रसषट्त्वेऽपि परस्परविरुद्धमनुपानं ज्ञेयं रसद्वयस्योपलक्षणत्वात्, अथवा शेषरसानां तृप्त्या भोक्तुमशक्यत्वाच्छेषरसानामनुक्तिः । अनुपानद्रव्याणि सङ्कलय्याह ।—शीतोष्णेत्यादि द्रवप्रधानमासवः, द्रवप्रधानं द्रवद्रव्यप्रधानञ्च मद्यमुच्यते, यूषो मुद्गादीनां, फलाम्लानि वीजपूरादीनिति, धान्याम्लं काञ्जिकं, पयोदुग्धं, रसो मांसरसः, यस्य पुरुषस्य व्याधिं व्रणज्वरादिकं कालमावस्थिकं वा आर्त्तवञ्च विभाव्य विशेषेण

लोकस्य जन्मप्रभृतिप्रशस्तं तोयात्मकाः सर्व्वरसाश्च दृष्टाः।
संक्षेप एषोऽभिहितोऽनुपानेषु॥ ५६॥

अतःपरं विस्तरतो विधास्ये॥

उष्णोदकानुपानन्तु स्नेहानामथ शस्यते।
ऋते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथा॥
अनुपानं वदन्त्येके तैले यूषाम्लकाञ्जिके।
शीतोदकं माक्षिकस्य पिष्टान्नस्य च सर्व्वशः॥
दधिपायसमद्यार्त्तिविषजुष्टे तथैव च।
केचित् पिष्टमयस्याहुरनुपानं सुखोदकं॥
पयोमांसरसो वापि शालिमुद्गादिभोजिनां।
युद्धाध्वातपसन्तापविषमद्यरुजासु च॥

ज्ञात्वा द्रव्याणि तैलादीनि भोज्यानि रक्तशाल्यादीनि एतत्सर्व्वमूहापोह विदा ज्ञात्वा अनुपानं विधेयमिति, किं वहुना सर्व्वानुपानेष्विति सेव्य मान्तरिक्षं जलं॥ ५६॥

संक्षेपमभिधाय विस्तरमाह। अतःपरमिति—ऋते विना इत्यर्थः। भल्लातकस्यात्यन्तोष्णत्वाच्छीतजलं, तौवरकादिति पत्रैस्तु केशराकारैः कलायसदृशैः फलैः। वृक्षास्तु—वरनामानः पश्चिमार्णवतीरजाः, तद्भवस्तौवरकः। स्नेहप्रसङ्गेन एकीयमतं तैलानुपानं निर्दिशन्नाह अनुपानमिति, उष्णकाले यूषं, शीतकाले काञ्जिकम्। शीतोदकमिति माक्षिकस्येति—माक्षिकस्य मधुनः, पिष्टान्नस्य तण्डुलपिष्टस्य, दधि प्रसिद्धं, पायसं क्षीरसिद्धास्तण्डुलाः, पायसस्य गुरुत्वेन विदाहसम्भवाच्छीतोदकं पेयं, मद्यार्त्तिर्मद्यविदाहः, विषजुष्टे विषव्यामोहे, तस्यैव चेति शीतोदकमेव। केचिदिति सुखोदकं ईषदुष्णमुदकम्। पय इति युद्धं संग्रामः, आतपो घर्म्मः, सन्तापोऽग्न्यादीनां, विषमद्यरुजास्विति विषरोगेष्वित्यर्थः। शालिषु

माषादेरनुपानन्तु धान्याम्लं दधिमस्तु वा।
मद्यं मद्योचितानान्तु सर्व्वमांसेषु पूजितं॥
अमद्यपानामुदकं फलाम्लं वा प्रशस्यते।
क्षीरं घर्म्माध्व-भाष्य-स्त्रीक्लान्तानाममृतोपमं॥
सुरा कृशानां स्थूलानामनुपानं मधूदकम्।
निरामयानां चित्रन्तु भक्तमध्ये प्रकीर्त्तितम्॥
स्निग्धोष्णं मारुते पथ्यं कफे रूक्षोष्णमिष्यते।
अनुपानं हितं चापि पित्ते मधुरशीतलम्॥
हितं शोणितपित्तिभ्यः क्षीरमिक्षुरसस्तथा।
अर्कशेलुशिरीषाणामासवास्तु विषार्त्तिषु॥
अतःपरन्तु वर्गाणामनुपानं पृथक् पृथक्।
प्रवक्ष्याम्यनुपूर्व्वेण सर्व्वेषामेव मे शृणु॥ ६०॥

तत्र पूर्व्वशस्यजातीनां वदराम्लवैदलानां धान्याम्लं जङ्गा-पयोऽनुपानं सामान्यमप्यौचित्यत्वात् संयोगशक्तीनां, जेज्जटस्तु पयःस्थाने मस्तु इच्छति, पयोग्रहणस्य गोरसोपलक्षणत्वात्। तदपि लभ्यत एवेत्यन्ये। माषादेरिति, धान्याम्लं काञ्जिकम्। मद्यमिति मद्योचितानां मद्ययोगानां, पूजितं प्रशस्तम्। अमद्येति—फलाम्लं दाड़िमादि। क्षीरमिति भाष्यादि-क्लान्तानामध्ययनादिपीड़ितानां, सुराकृशानामिति कृशानां दुर्व्वलानां, सुरा अनुशस्तेति सम्बन्धः, मधूदकं मधुमिश्रजलं, निरामयानामिति निरामयानां स्वस्थानां, चित्रं नानाप्रकारं, स्निग्धोष्णमिति अनुपानमिति सम्बन्धः, कफ इति शोणितपित्तिभ्य इत्यर्थः। अत्रापि पानमित्यनुवर्त्तते। अर्कशेल्विति विषार्त्तिषु विषपीड़ासु, अर्कादीनामासवा अनुपानादि शेलुः श्लेष्मान्तकः। अत इति अनुपूर्व्वेण यथाक्रमेण, सर्व्वेषामेव शाल्यादि-वर्गाणामित्यर्थः। मे मत्तः श्रृणु॥ ६०॥

तत्रेति शस्यजातीनां प्रागुक्तान्नसमूहानां तानि च शूकधान्यकुधान्य-

लानां धन्वजानाञ्च पिप्पल्यासवः। विष्किराणां कोल बदरासवः। प्रतुदानान्तु क्षीरवृक्षासवः। गुहाशयानान्तु खर्जूरनारिकेलासवः। प्रसहानामश्वगन्धासवः। पर्णमृगानां कृष्णागन्धासवः। विलेशयानां फलसारासवः। एकशफानां त्रिफलासवः। अनेकशफानां खदिरासवः। कूलचराणान्तु शृङ्गाटककशेरुकासवः। कोशवासिनां पादिनाञ्च तदेव। नादेयानां मृणालासवः। सामुद्राणां मातुलुङ्गासवः। अम्लानां फलानां पद्मोत्पलकन्दासवः। कषायाणां दाड़िमवेत्रासवः। मधुराणां त्रिकटुकयुक्तः कन्दासवः। तालफलादीनां धान्याम्लम्। कटुकानां दूर्व्वानलवेत्रासवः। पिप्पल्यादीनां श्वदंष्ट्रावसुकासवः। कुष्माण्डादीनां दार्व्वीकरीरासवः। चुञ्चूप्रभृतीनां लोध्रासवः। जीवन्त्यादीनां त्रिफलासवः। कुसुम्भशाकस्य स एव। मण्डूक-

शमीधान्यानि, वैदलानामिति जङ्गालानामेणादीनां, धन्वजानां वर्त्तकादीनां पक्षिणां, विष्किराणामिति विष्किराणान्तेषामेव वर्त्तकादीनां एतेन विष्किराणां पिप्पलीकोलवदरासवौ द्वावप्यनुपानं कोलं वदरं मध्यमप्रमाणं वदरं, प्रतुदानामिति कृष्णगन्धः शोभाञ्जनकः। विलेशयानामिति एकशफानामश्वादीनाम्। अनेकशफानामिति अनेकशफाश्छागादयः। एवमयं मांसवर्गो जङ्गालादिभेदेनाष्टविधोऽनुपानेनोक्तः। अनूपवर्गस्य पञ्चविधस्यानुपानं निर्द्दिशन्नाह कूलचराणामिति, तदेवेति शृङ्गाटककशेरुकासवौऽनुपानमित्यर्थः। प्लवानामिति अनूपवर्गमपि पञ्चविधमभिधाय फलानामनुपादानं निर्द्दिशन्नाह अम्लानामिति, अम्लफलानां दाड़िमादीनाम्। कषायाणामिति कषायाणां क्षीरवृक्षादिफलानां, मधुराणामिति मधुराणां द्राक्षादीनां, वातामाभिषुकादीनाञ्च। तालेत्यादि कटुकानां फलानामित्यर्थः। पिप्पल्यादीनामिति श्वदंष्ट्रा गोक्षुरकः, वसुको वृक्षः केदारगिरौ वगडुल इति प्रसिद्धः। शाकानामनुपानं निर्द्दिशन्नाह

पर्ण्यादीनां महापञ्चमूलासवः । तालमस्तकादीनामम्लफलासवः। सैन्धवादीनां सुरासव आरनालञ्च। तोयं वा सर्व्वेति ॥६१

भवन्ति चात्र।

सर्व्वेषामनुपानानां माहेन्द्रतोयमुत्तमम् ।
सात्म्यं यस्य तु यत्तोयं तत्तस्मै हितमुच्यते ॥
उष्णं वाते कफे तोयं पित्ते रक्ते च शीतलम् ।
दोषवद्गुरु वा भुक्तमतिमात्रमथापि वा ॥
यथोक्तेनानुपानेन सुखमन्नं प्रजीर्य्यति ।
रोचनं बृंहणं वृष्यं दोषसङ्घातभेदनम् ॥
तर्पणं मार्दवकरं श्रमक्लमहरं सुखम् ।
दीपनं दोषशमनं पिपासाच्छेदनं परम् ॥

कुष्माण्डकानामिति, चुचूश्चुः । जीवन्त्यादीनामिति जीवन्ती डोड़ी । कुसुम्भेति स एव त्रिफलासवः । मण्डूकेति मण्डूकपर्णी ब्राह्मी, तालमस्तकादीनामनुपानमाह तालमस्तकादीनामिति, तालमस्तकादीनां तालमस्तकमज्जादीनाम् । सैन्धवादीनामिति ॥ ६१ ॥

सर्व्वेष्वेवानुपानेषु तोयस्य प्राधान्यं दर्शयन्नाह सर्व्वेषामिति, माहेन्द्रं—तोयमान्तरिक्षमुदकं, शेषमपि भौममुदकं नियमयन्नाह सात्म्यमित्यादि—यत्तोयमिति नदीसरस्तड़ागकूपोदकमित्यर्थः । उष्णशीतभेदेनानुपानमाह उष्णमिति, सर्व्वेषामेवानुपानानामुक्तानां गुणं निर्दिशन्नाह दोषवदिति, वातादिदोषकरं, सुखमिति अदोषमित्यर्थः, दोषसङ्घातभेदनं दोषसमूह—पृथक्करणं, तर्पणं तृप्तिजनकं मार्दवकरं शरीरकोमलतोत्पादकं, सुखं स्वास्थ्योपपादकं, दोषशमनं वातादिशमनं, पिपासाच्छेदनं पिपासाविनाशकं, परमतिशयेन, सदोच्यत इति एवम्बिधमनुपानं सर्व्वदा कथ्यते, अन्ये दोषवदित्याद्यनुपानस्य फलं रोचनमित्यादयस्तु सामान्यानुपानगुणा इत्याहुः,

बल्यं वर्णकरं सम्यगनुपानं सदोच्यते।
तदादौ कर्शयेत्पीतं स्थापयेन्मध्यसेवितम्॥
पश्चात्पीतं वृंहयति तस्माद्वीक्ष्य प्रयोजयेत्।
स्थिरतां गतमक्लिन्नमन्नमद्रवपायिनाम्॥
भवत्याबाधजननमनुपानमतः पिवेत्॥ ६२॥
न पिवेच्छ्वासकासार्त्तो रोगेचाप्यूर्द्धजत्रुगे॥
क्षतोरस्कः प्रसेकी च यस्य चोपहतः स्वरः।
पीत्वाऽध्वभाष्याध्यायनगेयस्वप्नान्न शीलयेत्॥
प्रदूष्यामाशयं तद्धि तस्य कण्ठोरसि स्थितम्।
स्यन्दाग्निसादच्छर्द्यादीनामयान् जनयेद्बहून्॥

तदनुपानं भोजनस्यादिमध्यान्तविभागेन गुणविशेषं करोतीति दर्शयन्नाह तदादाविति, तदनुपानमादौ भोजनस्य कर्शयेत् अतिशयेन शरीरस्य कृशत्वमापादयेत्, स्थापयेत् न कर्शयति नापि स्थूलयति अपितु मध्यं करोतीत्यर्थः, पश्चात् पीतं वृंहयति पुष्टिमापादयति, तस्माद्वीक्ष्य प्रयोजयेदिति कार्श्यमिच्छन्नादौ मध्यवपुरिच्छन् मध्य एव पुष्टिमिच्छन्नन्त इति। अनुपानमिति अनुशब्दं लक्ष्यार्थमाहुः, आहारं लक्षीकृत्य पानमिति आहारमाश्रित्य यत्पीयते इत्यर्थः, तेन मध्याद्योरप्यनुपानशब्दःप्रयुक्तो भवति। अनुपानव्यतिरेकदोषं दर्शयन्नाह स्थिरतामिति—स्थिरतामचलतां, अक्लिन्नं शुष्कमित्यर्थः, अद्रवपायिनामनुपानमपिवतां, आवाधजननं पीड़ाकरं॥ ६२॥

कस्यचित् पुरुषविशेषस्यानुपाननिषेधमाह। न पिवेदिति—आर्त्तः पीड़ितः, ऊर्द्धजत्रुगे इति जत्रुर्ग्रीवामूलं तस्योर्द्धभागे, क्षतोरस्क इति उरःक्षतरोगवान् इत्यर्थः, प्रसेकी लालास्रावी, उपहत इति वातादिभिरित्यर्थः। अनुपाने पीते सति यद्वर्ज्जनीयं तदाह। पीत्वेति—अध्वा मार्गः, भाष्यं वहुभाषणं, अध्ययनं पठनं, गेयं गीतं न शीलयेदिति न सेवेतेत्यर्थः, कस्मादेतान्न शीलयेदित्याह प्रदूष्यामाशयमिति, प्रदूष्य वातादीनां प्रकोपं

गुरुलाघवचिन्तेयं स्वभावं नातिवर्त्तते।
तथा संस्कारमात्रां न कालांश्चाप्युत्तरोत्तरम्॥
मन्दकर्म्मानलारोग्याः सुकुमाराः सुखोचिताः।
जन्तवो ये तु तेषां हि चिन्तेयं परिकीर्त्तिता॥
वलिनः खरभक्ष्या ये ये च दीप्ताग्नयो नराः।
कर्म्मनित्याश्च ये तेषां नावश्यं परिकीर्त्त्यते॥ ६३॥

इति सर्व्वानुपानवर्गः।

त्वा, तद्वीति तदनुपानं हि यस्मादर्थे तस्य पुरुषस्य, स्यन्दं श्लेषस्रवणं, गुरुलाघवस्य द्रव्यरसवीर्य्यविपाकाश्रयस्य च शरीरादिभेदेनोक्तस्य यथा स्वातिशयेन व्यवस्थां कुर्व्वन्नाह गुर्व्विति, नातिवर्त्तते न त्यजति, जङ्गला जाङ्गलचारिणः, कुतो लघव इत्युक्ते अवश्यमेव स्वभावोवाच्यः, एवं शारीरे धात्वपचयादिष्वपि वाच्यं, तथा संस्कारं नातिवर्त्तते यथा स्वभावाद्गुरो-रपि व्रीहेर्लाजा लघवः लघोरपि शालेः संस्कारात् पिष्टमेव गुरुः, तथा मात्रां नातिवर्त्तते यथा "गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते" इति। अन्नञ्च नातिवर्त्तते ,तद्यथा मण्डपेयाविलेपीभक्तपूपादि यथोत्तरं गुरु, यथापूर्व्वं लघु इति, कालञ्च नातिवर्त्तते यथा "नवं धान्यमभिष्यन्दि लघुसम्व-त्सरोषितम्"। उत्तरोत्तरमिति स्वभावात् संस्कारं संस्कारान्मात्रां मात्रातो-ऽन्नं अन्नात्कालं गुरुलाघवचिन्ता नातिवर्त्तत इत्यर्थः, चकारादिहापि चकाराद् यश्चानुक्ता अपि समुच्चीयन्ते, इयं गुरुलाघवचिन्ताविशिष्टपुरुषा-श्रयेति ज्ञापनायाह मन्दकर्म्मेति, मन्दकर्म्माणोऽलसाः, मन्दानला मन्दा-ग्नयः, मन्दारोग्या रोगिणः, सुकुमारा मृदुदेहाः, सुखोचिताः सुखिताः, जन्तवः प्राणिनः, चिन्तेयमिति गुरुलाघवलक्षणा। परिकीर्त्त्यते कथ्यत इत्यर्थः, यान् प्रतिनेयं चिन्ता तानपि दर्शयन्नाह वलिन इति, वलिनः शक्त्युपचययुक्ताः, एतेनैवारोग्यत्वमुक्तं, खरभक्ष्याः अमृदुभोजनः। कर्म्म-नित्याः सदा कर्म्मकारिणः। परिकीर्त्त्यते इति गुरुलाघवचिन्तेयमिति शेषः। इति सर्व्वानुपानवर्गः॥ ६३॥

अथाहारविधिं वत्स विस्तरेणाखिलं शृणु ।
आप्तान्वितमसंकीर्णं शुचि कार्य्यं महानसम् ॥
तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् ।
शुचौ देशे सुसंगुप्तं समुपस्थापयेद्भिषक् ॥
विषघ्नैरगदैः स्पृष्टं प्रोक्षितं व्यजनोदकैः ।
सिद्धैर्मन्त्रैर्हतविषं सिद्धमन्नं निवेदयेत् ॥
वक्ष्याम्यतः परं कृत्स्नमाहारस्योपकल्पनाम् ।
घृतं कार्ष्णायसे देयं पेया देया तु राजते ॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्वैदलेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत् ।
कट्वराणि खड्‌वांश्चैव सर्व्वान् शैलेषु दापयेत् ॥

अथाहारविधिमाह । अथाहारविधिमिति, अखिलं समस्तं, शृणु आकर्णय । पाकस्थानं कीदृक्कार्य्यमित्याह आप्तान्वितमिति, आप्ताः अव्यभिचारिणः, तैरन्वितं आश्रितं, असङ्कीर्णमसङ्कटं, महानसमिति पाकस्थानं रसवतीति लोके । सुसंस्कृतस्यान्नस्य स्थानमाह गुणसम्पन्नमिति तत्रेति आप्तैः सुसंस्कृतमिति सम्बन्धः, इष्टरसगन्धस्पर्शवर्णोपेतं भक्ष्यमन्नं अभ्यवहरणीयं, सुसङ्गुप्तमतिशयेनादृश्यं, समुपस्थापयेन्निवेशयेत्, शुचौ प्रदेश इति सम्बन्धः, भिषक् वैद्यः, तस्याहारस्यैवं गुणस्य दूषणकरविषनाशनं निर्दिशन्नाह । विषघ्नैरिति विषघ्नैर्व्विषहारिभिः, अगदैरौषधैः, स्पृष्टं युक्तं, प्रोक्षितं व्यजनोदकैरिति अथर्व्वमन्त्रैरभिमन्त्रितं, अन्येतु व्यजनोदकैरिति अपदस्यैव विशेषणं कथयन्ति, तेषाम्मते अगदोदकक्षालितव्यजनैर्व्वीजितमविषीभवत्यन्नं मन्त्रमभिधाय मन्त्रमपि निर्दिशन्नाह—सिद्धैरव्यभिचारिभिः, कुरुकुल्लाफेरण्डाप्रभृतिभिर्हतव्विषमन्नमिति सम्बन्धः, निवेदयेत् नृपतये इति शेषः । वक्ष्यामीति कृत्स्नां समस्तां, उपकल्पनां समीपढौकानां

दद्यात्ताम्रमये पात्रे सुशीतं सुशृतं पयः।
पानीयं पानकं मद्यं मृण्मयेषु प्रदापयेत्॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च।
दद्याद्वैदूर्य्यपात्रेषु रागषाड़वसट्टकान्॥
पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान्॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च।
तानि दक्षिणपार्श्वेतु भुञ्जानस्योपकल्पयेत्॥ ६४॥
प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः।
खड़ान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत्॥

आधारप्रेक्षणीयमेव प्रथमं कल्पनं निर्दिशन्नाह—घृतमिति—कार्ष्णायसे कृष्णलोहपात्रे कान्तलोहपात्रे इत्यन्ये। पेयेति राजते रौप्यमये। फलानीति भक्ष्या लड्डुकादयः, वैशब्दः पादपूरणे, दलेषु पत्रेषु, अन्येतु वैदलेषु चेत्यत्र वेत्रवंशादित्वक्ग्रथितेषु पर्णमयेष्विति मन्यन्ते। परिशुष्केति "सिक्ता वहुघृते भृष्टं मुहुरुष्णाम्बुना मृदु। जीवकाद्यैर्घनं मांसं परिशुष्कं तदुच्यते" तदेव गोरसादानं प्रदिग्धमिति परिस्रुतम्॥ ६४॥

प्रद्रवाणीति-प्रद्रवाणि प्रकृष्टद्रवाणि मण्डादीनि, रसो मांसरसः, उपहारयेद् दद्यात्। कट्टराणि कट्टरं तक्रं, अन्येतु सौवीराम्लमथात्यम्लं काञ्जिकं कट्टरं विदुः। अन्येतु तदधोभागं तक्रं वाताम्लतां गतं सस्नेहं दधिजं तक्रमाहुः, अन्येतु कट्टकं खरोयूषविशेषः, सतक्रशमीधान्यः सतक्रशाकश्च, शैलेषु पाषाणमयेषु। दद्यादिति पयः क्षीरं, पानीयमिति मृण्मयेषु मृत्तिकादिमयेषु शरावादिषु। काचेति शुभेषु भव्येषु, वैदूर्य्यं रत्नविशेषः, चित्रेषु विचित्रेषु, तत्र रागः "सितारुचकसिन्धूत्थैः सवृक्षाम्लपरूषकैः। जम्बूफलरसैर्युक्तो रागोराजिकया कृतः"। षाड़वाः पुनर्म्मधुराम्ललवणसंयोगजा नानाविधाः। विशेषतः सूदेभ्यो ज्ञेयाः, सट्टकास्तु "लवङ्ग-

सर्व्वान् गुड़विकारांश्च रागषाड़वसट्टकान् ।
पुरस्तात् स्थापयेत् प्राज्ञो द्वयोरपि च मध्यत: ॥ ६५ ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।
भोक्तारं विजने रम्ये नि:सम्बाधे शुभे शुचौ ॥
सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत् ।
विशिष्टमिष्टसंस्कारै: पथ्यैरिष्टैरसादिभि: ॥
मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितं ॥ ६६ ॥

व्योषखण्डैस्तु दधिनिर्म्मथ्यगालितं । दाड़िमवीजसंयुक्तं चन्द्रवर्णं विचूर्णितम् । सट्टकन्तु प्रमोदाख्यं नलादिभिरुदाहृतम्" । दद्याद्वैदूर्य्यचितेष्वित्यस्य स्थाने वज्रवैदूर्य्यचितेष्विति केचित् पठन्ति, तत्र वज्रं शतकोटिकं रत्नं हीरक इत्यर्थ: । एष्वाधारेषु दीयमानानामेषां हितकारित्वम् । आधारविशेष-मभिधाय देशविशेषाणाहारविशेषं दर्शयन्नाह—पुरस्तादिति, पुरस्तादग्रत:, पुरोदनं हि ग्रहणसौकर्य्यात् पात्रे स्थानादिके सुविस्तीर्णे वहुले मनोरमे रुचिजनके, सूद: सूपकार: सूप:प्रहितं ओदनो भक्तं, प्रदेहांश्च प्रलेह्यांश्च । फलानीति परिशुष्काणि पूर्व्ववत्, दक्षिणपार्श्वे दक्षिणभागे, भुञ्जानस्य भोजनं कुर्व्वत:, उपकल्पयेत् समीपं ढौकयेत् । प्रद्रवाणीति प्रद्रवादय: पूर्व्ववत्सव्ये पार्श्वे वामभागे, सर्व्वाणिति रागषाड़वसट्टका: पूर्व्ववत्, पुरस्ता-दग्रत इत्यर्थ: । न केवलं पुरस्तात् द्वयोरपि च मध्यत: द्वयो: पक्षयोर्म्मध्ये एकस्मिन् पक्षे दद्यात् । एतेन सर्व्वत्र दातव्यमित्युक्तं भवति ॥ ६५ ॥

एवमिति एवमुक्तप्रकारेण भोजनस्योपकल्पनां विज्ञाय भोक्तारं विज्ञा-येति सम्बन्ध:, विजने एकान्ते, विजने हि भुञ्जानस्य दुष्टदृष्टिनिपातादि-दोषो न भवति, नि:सम्पाते उल्लोठसहिते, तत्र भुञ्जानस्य पांशुप्रक्षेपादि-दोषो न भवति । शुभे वास्तुदोषरहिते, शुचौ पवित्रे तत्र न भूताद्यावेश: । समे निम्नोन्नतत्वरहिते । कीदृगशनं हितमित्याह विशिष्टमिति, कै: कृत्वा इष्टसंस्कारै: पथ्यैरिष्टैरसादिभिरिति पथ्यैर्हितै: इष्टै: प्रियै:, आदिशब्दा-द्गन्धवर्णस्पर्शा गृह्यन्ते । प्रत्यग्रमभिनवं, अशनं भोजनम् ॥ ६६ ॥

पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ ॥
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत्।
आदौ फलानि भुञ्जीत दाड़िमादीनि बुद्धिमान् ॥
ततः पेयांस्ततो भोज्यान् भच्यांश्चित्रांस्ततः परं।
घनम्पूर्व्वं समश्नीयात् केचिदाहुर्व्विपर्य्ययं ॥
आदावन्ते च मध्ये च भोजनस्य तु शस्यते।
निरत्ययं दोषहरं फलेष्वामलकं नृणां ॥
मृणालविसशालूककन्देक्षुप्रभृतीनि च।
पूर्व्वं योज्यानि भिषजा नतु भुक्ते कथञ्चन ॥ ६७ ॥
सुखमुच्चैः समासीनः समदेहोऽन्नतत्परः।
काले सात्म्यं लघु स्निग्धं क्षिप्रमुष्णं द्रवोत्तरं ॥

कालभेदेनाप्याहारं विधिं निर्द्दिशन्नाह। पूर्व्वमिति बुभुक्षिते पुरुषे वातपित्तप्रशमनाय प्रथमं मधुरो रसः पक्वाशयगतं वायुं जयति। अम्ल-लवणौ मध्यभोजनस्थौ पित्ताशये अग्निदीप्तिं कुरुतः अन्ते कफजयाय कट्वादयः। आदाविति आदौ फलानि भुञ्जीत वातजयार्थं दाड़िमाद्यम्लोप-योगः। आदाविति मतान्तर इत्यन्ये, ततः पेयान् पातव्यान् दाड़िमादि-कठिनाहारमृदुकरणार्थं वयःस्थापनार्थञ्च, ततो भोज्यं रक्तशाल्यादि, चित्रान् नानाप्रकारान्। घनमिति घनं भोज्यं भच्यादि कठिनं विपर्य्ययं उक्त विपर्य्ययं पूर्व्वं द्रवं पश्चात् कठिनमिति, घृतं पूर्व्वं समश्नीयादिति केचित् पठन्ति, अम्लफलस्यादावेव नियतस्य कस्यचिदेव फलस्य आदिमध्यान्तेषु प्रयोगं दर्शयन्नाह। आदाविति निरत्ययं अबाधं चक्षुष्यमित्यर्थः। मृणा-लेति मृणालं पद्मनालं, विसं तिसण्डकः, शालूकं प्रसिद्धम् ॥ ६७ ॥

भुञ्जानः कथं भुञ्जीतेत्याह। सुखमुच्चैरिति समासीन इति सम्यगा-सीन उपविष्टः। अन्नतत्पर इति न कामादिव्यग्रमनाः भुञ्जानः। किम्भूतः कदा कीदृशं भुञ्जीतेत्याह। काले सात्म्यमित्यादि—कालो द्विविधः

बुभुक्षितोऽन्नमश्नीयान्मात्रावद्विदितागमः।
काले भुक्तं प्रीणयति सात्म्यमन्नं न बाधते॥
लघु शीघ्रं व्रजेत्पाकं स्निग्धोष्णं बलवह्निदं।
क्षिप्रं भुक्तं समं पाकं यात्यदोषं द्रवोत्तरं॥
सुखं जीर्य्यति मात्रावद्धातुसाम्यं करोति च॥ ६८॥
अतीवायतयामास्तु क्षपा येष्वृतुषु स्मृताः।
तेषु तत्प्रत्यनीकाढ्यं भुञ्जीत प्रातरेव तु॥

नित्यश्च आवस्थिकश्च, तत्र नित्यश्च आर्त्तवः स पुनरतीवायतयामा इत्यादिना नियमितः। आवस्थिकः पुनर्जीर्णलक्षणापेक्षः, आत्मत्वात् अकालः सात्म्यदेशामयादिभेदेनानेकविधं, असात्म्यं पुनर्दोषकारि, क्षिप्रं नातिद्रुतं नातिविलम्बितं अतिद्रुतातिविलम्बितयोर्दोषकारित्वात्, द्रवोत्तरं द्रवप्रधानम्। बुभुक्षितग्रहणं अकालबुभुक्षानिषेधः, वक्ष्यति च भवत्यकालेऽपि तदा बुभुक्षाया मन्दबुद्धिं विषवन्निहन्ति। मात्रालक्षणमाह "अपीड़नं भवेत् कुक्षेः पार्श्वयोरविपाटनम्। अन्नेन हृदया वोध्या जठरस्य तु गौरवं। प्रणीनश्चक्षुरादीनां शमनं क्षुत्पिपासयोः। उच्छ्वासश्वासहास्यादि कथासु सुखवर्त्तनं। सुखेन परिणामः स्यादन्ने भुक्ते दिवानिशि"। विदितागम इति हेयोपादेयविवेकार्थं विदितं हिताहितं येन स विदितागमः, एषां कालादिभोजनानां फलानुशंसां दर्शयन्नाह। काले भुक्तमिति प्रीणयति तृप्तिं जनयति, आत्मामन्नं भुक्तं न बाधते न पीड़ां जनयति, लघु इत्यादि लघ्वन्नं भक्तमिति सम्बन्धः, स्निग्धोष्णं बलवह्निदमिति स्निग्धं बलप्रदं, उष्णं वह्निप्रदमित्यर्थः, क्षिप्रमित्यादि समं एककालं, अदोषं द्रवोत्तरमिति द्रवात्तरमन्नं भुक्तं दोषरहितं पाकं याति। सुखमित्यादि मात्रावदन्नं भुक्तं सुखेन पाकं गच्छति धातुसाम्यञ्च करोति, धातुशब्दोऽयं दोषधातुमलेषु वर्त्तते॥ ६८॥

आवर्त्तलक्षणं कालमाह अतीवायतयामा इति अतीवायतयामा अतीव दीर्घप्रहराः, क्षपा रजन्यः, येष्वृतुष्विति हेमन्ते शिशिरेषु, तत्प्रत्यनीकाढ्य-

येषु चापि भवेयुश्च दिवसा भृशमायताः।
तेषु तत्कालविहितमपराह्णे प्रशस्यते॥
रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः।
कृत्वा सममहोरात्रं तेषु भुञ्जीत भोजनं॥
नाप्राप्तातीतकालं वा हीनाधिकमथापि वा।
अप्राप्तकाले भुञ्जानः शरीरे ह्यलघौ नरः॥
तांस्तान् व्याधीनवाप्नोति मरणं वा नियच्छति॥
अतीतकाले भुञ्जानो वायुनोपहतेऽनले।
कृच्छ्राद्विपच्यते भुक्तं द्वितीयञ्च न काङ्क्षति॥
हीनमात्रमसन्तोषं करोति च बलक्षयं।
आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकं।
तस्मात् सुसंस्कृतं युक्त्या दोषैरेतैर्व्विवर्ज्जितं।

मिति—कालबलप्रवृत्तदोषगुणानां बाधकभूतं विरोधिद्रव्यगुणबहुलमित्यर्थः। प्रातरिति सपादे यामे। येष्विति येषु ऋतुषु ग्रीष्मप्रावृषोर्भृशमायता दीर्घतराः, तत्कालविहितं द्रवस्निग्धमधुरप्रायं, अपराह्ण इति अर्द्धतृतीययामोपरि। रजन्य इति येषु ऋतुषु शरदि वसन्ते च सममहोरात्रमध्याह्ने इत्यर्थः, अयमेकाशनस्य पुरुषस्य विधिः। द्विरश्नतः पुनः प्रातर्भोजनमात्राया अर्द्धमात्रं त्रिभागं वा लघुमृष्टञ्च, तच्च प्रातर्भोजनं सपादे प्रहरे। द्वितीयं भोजनं त्वर्द्धचतुर्थप्रहरोपरि इति पञ्जिकाकारः जेज्जटस्तु स त्रिभागे प्रहरे दिवसस्य रात्रेश्च स त्रिभागे प्रहरे भुञ्जानस्य रजनीदिवसयोः समत्वं भवतीत्याह। अयमार्त्तवकाल उक्तः। आवश्यिकं पुनः स्वास्थ्यवृत्तिकेऽध्याये देशौषधकालानभिधाय वक्ष्यति, कालमात्रावतो विपर्य्ययमकालमात्रावत्त्वञ्च निर्द्दिशन्नाह। न प्राप्तेति अप्राप्तकालमतीतकालम्वा न भुञ्जीतेत्यर्थः, हीनाधिकमिति हीनमात्रमधिकमात्रम्वा न भुञ्जीत तयोरप्राप्तातीतकालयोरधिकन्यूनयोश्चदोषं दर्शयन्नाह। अप्राप्तकालमिति अप्राप्तकालं भुञ्जानो नरः शरीरे

यथोक्तगुणसम्पन्नमुपसेवेत भोजनं ॥
विभज्य कालदोषादीन् कालयोरुभयोरपि ॥ ६८ ॥
अचोक्षं दुष्टमुच्छिष्टं पाषाणतृणलोष्टवत् ।
द्विष्टं व्युषितमस्वादु पूति चान्नं विवर्जयेत् ॥
चिरसिद्धं स्थिरं शीतमन्नमुष्णीकृतं पुनः ।
अशान्तमुपदग्धञ्च तथा स्वादु न लक्ष्यते ॥
यद्यत् स्वादुतरं तत्र विदध्यादुत्तरोत्तरं ॥
प्रक्षालयेदद्भिरास्यं भुञ्जानस्य मुहुर्म्मुहुः ।
विशुद्धरसने तस्मै रोचतेऽन्नमपूर्व्ववत् ॥

अमघौ सति तांस्तान् शिरोरुजादीन् व्याधीन् नियच्छतीति प्राप्नोति। अतीतकालमिति असन्तोषमतृप्तिं, आटोप उदरस्याध्मानं, सादोऽङ्गग्लानिः, अधिकमिति अधिकमन्नं भुक्तमित्यर्थः। कीदृक् पुनरन्नं सेवितव्यमित्याह। तस्मादिति युक्तया मात्रया, कालयोरुभयोरपि प्रातःसायञ्च ॥ ६८ ॥

सम्यगुपादेयं प्रदर्श्य हेयं दर्शयन्नाह। अचोक्षमिति अचोक्षं अपवित्रं मलिनमित्यन्ये, दुष्टं विषादिभिर्दोषकरत्वात्। उत्सृष्टं भुक्तोत्सृष्टं, पाषाणतृणलोष्टवदिति पाषाणादियुक्तमित्यर्थः, द्विष्टं मनःप्रतिघाति, व्यूषितं विशेषेण उषितं, पूतिशटितं पूतिचान्नमिति चकारात् अत्र शलुगणगणिकादीनामप्यन्नं वाह्यदूषणान्वितवर्ज्जनीयमिति समुच्चीयते। अस्वादु अन्नं पूर्व्वं वर्ज्जनीयमुक्तं इति तद्धेदानाह चिरसिद्धमित्यादि स्थिरं कठिनं, अशितं किञ्चिदवशिष्टविस्रावणम्। उपदिग्धमिति अतिपाकिलेन ज्वलितं चकारेण दुःसिद्धमपि समुच्चीयते। तथा स्वादुर्न लक्ष्यत इति यस्मादन्नस्य स्वादुर्न लक्ष्यते तदपि वर्ज्जयेदिति सम्बन्धः। अन्नेषु स्वादुषु सत्सु विधानं दर्शयन्नाह। यद्यदिति स्वादुशब्दःसंस्कृते रसे वर्त्तते नतु मधुर एव विदध्यात्, दद्यात्कथं उत्तरोत्तरं एकस्मिन् स्वादुनि दत्ते सति तस्मादधिकतरस्वादु दद्यात्, तस्मिन्नपि दत्ते तस्मादधिकतरस्वादु दद्यादित्यर्थः।

स्वादुमा तस्य रसनं प्रथमेनापि तर्पितं।
न तथा स्वादयेदन्यत्तस्मात् प्रक्षाल्यमन्तरा॥
सौमनस्यं वलं पुष्टिमुत्साहं हर्षणं सुखं।
स्वादु सञ्जनयत्यन्नमस्वादु च विपर्य्ययं॥ ७०॥
भुक्त्वा च यत्प्रार्थयते भूयस्तत्स्वादु भोजनं।
अशितश्चोदकं युक्त्या भुञ्जानश्चान्तरा पिवेत्॥
दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः।
कुर्य्यादनाहृतं तद्धि मुखस्यानिष्टगन्धतां॥
जीर्णेऽन्ने वर्द्धते वायुर्व्विदग्धे पित्तमेव तु।
भुक्तमात्रे कफश्चापि ततोऽभुक्ते हरेत् कफं॥
धूमेनापोह्य हृद्यैर्व्वा कषायकटुतिक्तकैः।
पूगकक्कोलकर्पूरलवङ्गसुमनःफलैः॥

प्रक्षालयेदद्भिरास्यं गण्डुषं कारयेदित्यर्थः, गण्डूषकरणस्य फलमाह। विशुद्धेरिति स्वादुनामृष्टेन तस्य भुञ्जानस्य अन्यदपरस्वादोर्व्वातस्यगुणमाह। सौमनस्यमिति सौमनस्यं सुमनस्कतां, वलं सर्व्वधातुस्नेहः, पुष्टिः शरीरोपचयः, उत्साहः प्रसिद्धः, हर्षणं पुष्टिः, सुखं नीरोगता। स्वादुसञ्जयत्यन्नं स्वादन्नं, सौमनस्यादीन् सम्यग्जनयतीति सम्बन्धः। अस्वाद्वित्यादि अस्वादन्नं, सौमनस्यादीनपि विपर्य्ययं विपरीततां जनयतीत्यर्थः॥ ७०॥

स्वादोरेवान्नस्य लक्षणं निर्द्दिशन्नाह। भुक्तेति भुक्तवान् हि अवश्यं मृष्टं अन्येतु तत्साधुभोजनमिति पठन्ति। मात्रावद्भुञ्जीतेति तस्यैव लक्षणमिति च वदन्ति, तन्नेच्छति गयी। अशित इति अशितः कृतभोजनः, उदकं युक्त्या पिवेदिति सम्बन्धः, युक्त्या मात्रया, भुञ्जानश्चान्तरा पिवेत् भोजनं कृत्वेत्यर्थः। अन्यदपि भुक्ते कार्य्यान्तरं दर्शयन्नाह। दन्तेत्यादि शोधनेन तृणादिना। कार्य्यादिति भोजनोत्तरकालक्रियाप्रसङ्गेन जरणजीर्णकालयोरपि दोषप्रकोपं दर्शयन्नाह। जीर्णे इति—जीर्णे परिणामङ्गते

कटुतिक्तकषायैर्व्वा मुखवैशद्यकारकैः ।
ताम्बुलपत्रसहितैः सुगन्धैर्व्वा विचक्षणः ॥
भुक्त्वा राजवदासीत यावदन्नक्लमो गतः ।
ततः पदशतं गत्वा वामपार्श्वे तु संविशेत् ॥ ७१ ॥
शब्दरूपरसान् गन्धान् स्पर्शांश्च मनसः प्रियान् ।
भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति ॥
शब्दरूपरसस्पर्शगन्धाश्चापि जुगुप्सिताः ।
अशुच्यन्नं तथाभुक्तमतिहास्यञ्च वामयेत् ॥
शयनं चासनं वापि नेच्छेद्वापि द्रवोत्तरं ।
नाग्न्यातपौ न प्लवनं न यानं नापि वाहनं ॥
नचैकरससेवायां प्रसज्येत कदाचन ।
शाकावरान्नभुयिष्ठमम्लञ्च न समाचरेत् ॥ ७२ ॥

विदग्धे किञ्चित्पक्के भुक्ते सति कुपितश्लेष्माणः प्रतीकारमाह । तस्मादिति भुक्तेरितं भोजनेन प्रेरितं, आपोह्य स्फोटयित्वा, कषायकटुतिक्तैरिति अत्र फलैर्द्रव्यैरिति विज्ञेयम् । फलैः कटुकषायैर्व्वेति वक्ष्यमाणत्वात्, सुमनःफलैर्जातीफलैः । तदनन्तरं किं कुर्य्यादित्याह तत इति सम्विशेत् शय्यायां शयीत ॥ ७१ ॥

अन्नस्य संस्थापनहेतून् शब्दादिविषयानाह । शब्देति साधु तिष्ठति भव्येन स्थितिं करोति, शब्दादीन् विषयांश्चेत्यन्ये पठन्ति, कुतः पुनरेते प्रिया अप्रिया इत्याह । शब्देति जुगुप्सिताः निन्दिताः, अशुचि अपवित्रं, अन्यदपि सर्व्वं वर्ज्जनीयमाह। शयनमिति शयनमासनं वा नेच्छेद चिरकालमित्यर्थः । द्रवोत्तरं द्रवाढ्यं भोजनं, नाग्न्यातपावित्यादि अग्न्यातपादीन्नेच्छेदिति सम्बन्धः । प्लवनं स्नानं जलप्रतरणं वा, यानं गमनम्, वाहनं रथाश्वादि न प्रसज्येत नाभ्यसेत् -न पुनः पुनः शीलयेदित्यर्थः, शाकं प्रसिद्धं, अवरान्नं वैदलान्नं, एतद्भूयिष्ठं तद्बहुलं नाचरेन्न भक्षयेत्, तथा अम्लञ्च ॥ ७२ ॥

एकैकशः समस्तान् वा नाप्यश्नीयाद्रसान् सदा।
प्राग्भुक्ते त्वविविक्तेऽग्नौ द्विरन्नं न समाचरेत्॥
पूर्व्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकं।
मात्रागुरु परिहरेदाहारं द्रव्यतश्च यः॥
पिष्टान्नं नैव भुञ्जीत मात्रया वा बुभुक्षितः।
द्विगुणञ्च पिबेत्तोयं सुखं सम्यक् प्रजीर्य्यति॥ ७३॥
पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरं॥
गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते।

रसानामतिमात्राशनदोषं दर्शयन्नाह। एकैकश इति, एकैकशः एकैकरसं, समस्तान् रसान्नाप्यश्नीयान्नाधिकं भक्षयेदित्यर्थः। दोषरोगापेक्षया एकैकरसस्य विधिः, स्वस्थापेक्षया तु समस्तरसविधिः। नात्यश्नीयादित्यन्ये अपरे तु एकशोऽथ समस्तान् वा न भुञ्जीत रसान् सदेति पठन्ति व्याख्यानयन्ति च, एकीकृत्य न सर्व्वमश्नीयात् यथाक्रममेव षड्रसं स्वस्थेन भोक्तव्यं, वा शब्दः समुच्चये। अग्नौ मन्दे द्विरन्नं समाचरनिषेधं दर्शयन्नाह। प्रागिति प्राग्भुक्ते प्रातर्भोजने कृते, अविविक्ते अग्नौ द्विरन्नं न समाचरेदिति द्वितीयम्वारं न भुञ्जीतेत्यर्थः। कुत इत्याह पूर्व्वभुक्ते इत्यादि विदग्धे जठरानलेन किञ्चित्पक्वे किञ्चिदामे भुञ्जानो द्विर्भुञ्जान इत्यर्थः। पावकं जठरानलं, मन्दाग्नेरेवाहारविशेषं परिहारार्थं निर्द्दिशन्नाह। मात्रेति मुद्गादीनां लघूनामपि मात्रया गुरुमाहारं परिहरेत्, द्रव्यतो गुरूणाम्माषमहिषवराहपिशितादीनां संस्कारगुरोर्द्रव्यविशेषस्य निषेधं दर्शयान्नाह। पिष्टान्नमिति अथ कथञ्चित् पिष्टान्नं यदि सेवेत तदा क्षुधितस्य मात्रयैव नान्यथेति तत्र मात्राशब्दोऽल्पता च पिष्टान्नभोजने द्विगुणम्बा पिबेत्तोयम्॥७३

गुरुत्वप्रसङ्गेन चतुर्णां पेयलेह्यादीनां गुरुत्वं निर्द्दिशन्नाह। पेयेत्यादि—पेयं पानीयादि, लेह्यं मध्वादि, श्रद्यं भक्तादि, भक्ष्यं मोदकादि। तत्रोक्तानां पेयादीनां लघूनां गुरुणाञ्च का मात्रा गुरुरित्युपदिश्यत इत्याह। गुरूणा-

द्रवोत्तरो द्रवश्चापि न मात्रागुरुरिष्यते ॥
द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते।
विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति ॥
पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति।
स्रोतस्यन्नवहे पित्तं पक्तौ वा यस्य तिष्ठति ॥
विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यते।
शुष्कं विरुद्धं विष्टम्भि वह्निव्यापदमावहेत् ॥
आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥ ७४ ॥

मिति गुरूणां संस्कारस्वभावकृतानां मोदकमाषादीनां संस्कारस्वभावाभ्यामेव गुरुतराणां पिष्टमयवराहपिशितादीनां त्रिभागसौहित्यमेव अयं चार्थोऽर्द्धशब्दाद्वयववचनाल्लभ्यते। लघूनां तृप्तिरिष्यत इति लघुतराणामेव तृप्तिः लघूनां पुनरीषत्तृप्तिः, नच द्रवद्रवोत्तरयोः पेयत्वाल्लघुलघुतरयोः कदाचिन्मात्रागौरवेण तौ भजतीत्याह। द्रवोत्तर इति-द्रवोत्तरस्तक्राद्यधिकः पेयादिः, शुष्कस्यापि स्रोतोऽवरोधकारणस्य संयोगान्तरेणादोषं प्रतिपादयन्नाह। द्रवाढ्यमिति शुष्कमपि द्रवाढ्यं सम्यगेवोपपद्यते अदोषकरं सम्यग्भवतीत्यर्थः। केवलविशुष्कस्य पुनराहरणे दोषं निर्दिशन्नाह। विशुष्कमिति अभ्यस्तं सेवितं, साधु भव्येन, कथन्तर्हि पाकं गच्छतीत्याह पिण्डीकृतमित्यादि असंक्लिन्नं असम्यगार्द्रीभावमापन्नं, विदाहमुपगच्छति विदग्धतामुपयाति, शुष्कान्नस्य विप्रकृष्टविदाहप्रसङ्गेन सन्निकृष्टं हेतुजमपि विदाहं दर्शयन्नाह। स्रोतस्येति स्रोतस्यन्नवहे आमाशये पक्तौ अग्निस्थाने विदाहि भुक्तमिति अन्नं, अन्यद्वेति अविदाह्यन्नं, विदह्यते विदग्धतामुपयाति, शुष्कान्नप्रसङ्गेन शुष्कस्येतरस्य च वह्निमान्द्यकरत्वमाह। शुष्कमिति शुष्कं पिष्टान्नादिविरुद्धं क्षीरमत्स्यादिकं, विष्टम्भि चणकमसूरादि, वह्निव्यापदं अग्निमान्द्यं, आवहेत् कुर्य्यात्तामेव वह्निव्यापदं विप्रकृष्टकार-

अत्यम्बुपानाद्विषमाशनाद्वा सन्धारणात् स्वप्नविपर्य्ययाच्च।
कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य॥
ईर्ष्याभयक्रोधपरिक्षतेन लुब्धेन रुग्दैन्यनिपीड़ितेन।
प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणाममेति॥
माधुर्य्यमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमम्लभावं।
किञ्चिद्विपक्वं भृशतोदशूलं विष्टब्धमावद्धविरुद्धवातं॥
उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य।
रसावशेषेण तु सप्रसेकं चतुर्थमेतत्प्रवदन्त्यजीर्णं॥ ७५॥

णोपजनितामभिधाय सन्निकृष्टवातादिकन्त्वजीर्णलक्षणं निर्दिशन्नाह। आममिति आहारस्यैव पक्वस्य उद्गिरतो रसो रसशेषः। तस्मादल्पदोषदूषितत्वान्न तस्य दोषव्यापदेशो भवति॥ ७४॥

कस्मादजीर्णं भवतीत्याह। अत्यम्बुपानादिति रात्रौ जागरणं दिवसे च स्वप्नः स्वप्नविपर्य्ययः। कायिककारणमभिधाय मानसरजस्तमोदोषकृतमजीर्णमाह, ईर्ष्येत्यादि—ईर्षा परसम्पत्तावसहिष्णुता, भयं परस्मात्त्रासः, क्रोधः पराभिद्रोहलक्षणः, परिक्षतेन ईर्ष्यादिभिः परिभूतेन, लुब्धेन लोभसहितेन, रुग्दैन्यनिपीड़ितेन शोकदैन्यव्याप्तेन, दैन्यं निर्गतित्वं, प्रद्वेषो मात्सर्य्यम्। तेषामेवाजीर्णानां लक्षणं दर्शयन्नाह। माधुर्य्यमिति श्लेषदूषणप्रभावोपजनितं माधुर्य्यं गतमामं तदेव कफदूषितं वातस्वभावकत्वमात्रं कफकार्य्याणि तु तत्र गौरवस्नेहकण्डूप्रभृतीनि च द्रष्टव्यानि। विदग्धसंज्ञमिति अम्लभावं गतमन्नं विदग्धसंज्ञं कथ्यते, तत्कथम्भूतं किञ्चिद्विपक्वं अत्रापि शुक्तिक्ताम्लोद्गारादीनि पित्तकार्य्याणि द्रष्टव्यानि, आनद्धविरुद्धवातं विष्टब्धं कथ्यते तत्कथम्भूतं भृशतोदशूलमिति आनद्धः अप्रवृत्तः, विरुद्धो विशेषेण रुद्धो वातो यस्मिन् तत्तथा, अत्रापि वातकार्य्याणि जृम्भाङ्गमर्द्दशिरोरुजादीनि द्रष्टव्यानि, भृशतोदशूलं अत्यर्थतोदशूलं, उद्गारशुद्धाविति यस्य जीर्णिनो भक्तकाङ्क्षा न जायते नोत्पद्यते, हृद्गुरुता हृदयगौरवञ्च

मूर्च्छाप्रलापो वमथुः प्रसेकः सदनं भ्रमः।
उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः॥
तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितं।
विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च॥
वामयेदाशु तत् तस्मादुष्णेन लवणाम्बुना।
कार्य्यं चानशनं तावद्यावन्न प्रकृतिं भजेत्॥
लघुकायमतश्चैनं लङ्घनैः समुपाचरेत्।
यावन्नप्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा॥

भवति यस्याजीर्णस्य रसावशेषेण कृत्वा सप्रसेकं लालास्रावसहितं एतानि सङ्क्षेपेणार्थलक्षणान्युक्तानि॥ ७५॥

अजीर्णदोषलिङ्गं प्रदर्श्य व्याधिसामान्यलक्षणभूतप्रभावोपजनितकार्य्याणि निर्दिशन्नाह। मूर्च्छेति—मूर्च्छा चेतनाच्युतिः, प्रलापोऽसम्बन्धभाषणं, वमथुः छर्दिः, सदनमङ्गग्लानिः, अन्येतु स्फुटनमिवाङ्गानामिति वदन्ति। भ्रमश्चक्रारूढ़स्येव, अजीर्णानां चिकित्सामाह। तत्रेति आमे लङ्घनं कार्य्यमिति उक्ते तत्रापि वमनमावश्यिकं विदग्धे वमनं हितमिति रसस्याम्लस्य व्यापन्नत्वादनुद्धरणे कुष्ठाबाधभयात् तत्र केचित् आमे वमनं कार्य्यं, विदग्धे लङ्घनं हितमिति पठन्ति, तन्नेच्छति गयी, विष्टब्धे स्वेदनमिति स्वेदनस्यामवातविजयकारि पाचनात् रसशेषे शयीत चेति चकारेण स्वेदोऽपि रसशेषे तथा पाचनमपि तच्च पाचनमम्लकालेऽन्नसहितं देयमिति समुच्चीयते तत्र विदग्धे वमनं कर्त्तव्यं तत् केनेत्याह। वामयेदिति आमे लङ्घनमिति तत्कियन्तं कालं इत्यावधिं दर्शयन्नाह। कार्य्यमिति वा शब्दः समुच्चये प्रकृतिरत्राजीर्णविकृतिः। लघ्वित्यादि—अतः पूर्व्वोक्तविधानादनन्तरं एनमजीर्णिनं प्राणैर्व्वलं तत्राजीर्णप्रसङ्गेन तस्याजीर्णस्य भुज्यमानस्यान्नस्यान्मात्रातिसंज्ञकस्यात्तत्तुल्यानां समशनादीनामपि लक्षणं निर्दिशन्नाह। हिताहितेति—हिताहितोपसंयुक्तमिति हित-

हिताहितोपसंयुक्तमन्नं समशनं स्मृतं।
वहुस्तोकमकाले वा विज्ञेयं विषमाशनं॥
साजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते।
त्रयमेतन्निहन्त्याशु वहून् व्याधीन् करोति वा॥ ७६॥
अन्नं विदग्धं हि नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति।
तद्ध्यस्य शैत्येन निहन्तिपित्तमाक्लेदिभावाच्च नयत्यधस्तात्॥
विदह्यते यस्य तु भुक्तमात्रे दह्येत हृत्कण्ठगलञ्च यस्य।
द्राक्षाभयां माक्षिकसम्प्रयुक्तां लीढ्वाभयां वा स सुखं लभेत॥
भवेदजीर्णं प्रति यस्य शङ्का स्निग्धस्य जन्तोर्व्वलिनोऽन्नकाले।

महितं चायमेकैध्यमुपयुक्तं यथा "धान्यं नवं पुराणं यच्छाकं जीर्णञ्च कोमलम्। एकध्यन्तद्विरुद्धं स्याच्छीतोष्णञ्च स्वजातितः" अन्येतु हितमेवाहितं येन सम्पद्यते तत् हिताहितोपसंयुक्तं यथा गोक्षीरं मत्स्येन सहितमहितं सम्पद्यते। विषमाशनं निर्दिशन्नाह। वहुस्तोकमिति वहु प्रचुरं, स्तोकमल्पं, अकाले इति अकालोऽप्राप्तोऽतीतो वा कालस्तत्र भुक्तम्। अध्यशनं निर्दिशन्नाह। अजीर्ण इति त्रयाणामपि शमनादीनां फलमाह। त्रयमिति॥ ७६॥

पुनरपि विदग्धाजीर्णस्य चिकित्सामाह। अन्नमिति तत् शीताम्बु, हि शब्दो यस्मादर्थे अस्य नरस्य आक्लेदिभावात् पित्तं हन्ति। केचिदन्नविदग्धं हीत्यारभ्य विषवन्निहन्तीति यावत् सकलमपि पाठमनार्षं वर्णयन्ति, तन्न, गयदासेनाङ्गीकृतत्वात्। आमाशयगतान्नविदाहस्य चिकित्सामाह। विदह्यत इति यस्य पुरुषस्य भुक्तमात्रे सति आमाशयो विदह्यते विशेषेण दाहवान् भवति, हृत् हृदयं, कमलमुकुलाकारमधोमुखं, कोष्ठमुदरं, द्राक्षायुक्तामभयां लीढ्वेति सम्बन्धः, अयमेको योगः, माक्षिकसंयुक्तां लोढ्वाभयाञ्चेति द्वितीयो योगः, अन्येतु भुक्तमात्रामिति पठन्ति भुक्तमात्रामेव प्राप्यामाशयो विदह्यत इत्यर्थः। रसावशेषाजीर्णविषयं संशमनमाह। भवे-

प्रातः स शुण्ठीमभयामशङ्को भुञ्जीत सम्प्राश्य हितं हितार्थी ॥
स्वल्पं यदा दोषविबद्धमामं लीनं न तेजः पथमावृणोति ।
भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवन्निहन्ति ॥७७॥

अत ऊर्द्धं प्रवक्ष्यामि गुणानां कर्म्मविस्तरं ।
कर्म्मभिस्त्वनुमीयन्ते नानाद्रव्याश्रयागुणाः ॥
ह्लादनः स्तम्भनः शीतो मूर्च्छातृट्स्वेददाहजित् ।
उष्णस्तद्विपरीतः स्यात् पाचनश्च विशेषतः ॥
स्नेहमार्द्दवकृत्स्निग्धो बलवर्णकरस्तथा ।
रूक्षस्तद्विपरीतः स्याद्विशेषात् स्तम्भनः खरः ॥
पिच्छिलो जीवनो बल्यः सन्धानः श्लेष्मलोगुरुः ।
विशदो विपरीतोऽस्मात् क्लेदाचूषणरोपणः ॥

दिति प्रातर्यस्याजीर्णशङ्का भवति स पुरुषः शुण्ठीमभयासमेतामन्नकाले प्राश्य भक्षयित्वा निःशङ्कः सन् भुञ्जीत । अजीर्णेऽपि बुभुक्षां दर्शयन्नाह । स्वल्पमिति स्वल्पमित्यामविशेषणं, अन्येतु स्वल्पमपि तेजःपथं नावृणोतीति तेजःपथस्येदं विशेषणमाहुः । लीनं तद्गतेन वायुना एकपार्श्वे लीनमित्याम-विशेषणं, तेजःपथं जठरामलमार्गं, या बुभुक्षा मन्दबुद्धिं प्राणिनं विष-वन्निहन्तीति सम्बन्धः, अत्र केचित्पठन्ति । "अन्नेन कुक्षेर्द्वावंशौ पानेनैकन्तु पूरयेत् । आश्रयं पवनादीनाञ्चतुर्थमवशेषयेत्" । सर्व्वनिबन्धकारैरपठित-त्वान्न पठनीयम् ॥ ७७ ॥

पूर्व्वं हि सम्पादितं तद्यस्य शैत्येन निहन्ति पित्तमिति तत्र न ज्ञायन्ते केन पुनस्ते शीतादय इति निर्देशलक्षणमाह । अत इति कर्म्मभिस्तनु-मीयन्ते नानाद्रव्याश्रयगुणाः इति अत शीतगुणः कथं ज्ञायत इत्याह । ह्लादन इति ह्लादनः सुखकारीत्यर्थः, पाचनो व्रणादीनां, स्नेहेत्यादि स्निग्धोगुणः स्नेहादिकारण इत्यर्थः । रूक्ष इति रूक्षोगुणस्तद्विपरीतो रौक्ष्यकाठिन्यकर इत्यर्थः, विशेषतः स्तम्भनोऽतीसारादीनां, खरः कर्कशः ।

दाहपाककरस्तीक्ष्णः स्रावणो मृदुरन्यथा ।
सादोपलेपवलकृद्गुरुस्तर्पणबृंहणः ॥
लघुस्तद्विपरीतः स्याल्लेखनो रोपणस्तथा ।
दशाद्याः कर्म्मतः प्रोक्तास्तेषां कर्म्मविशेषणैः ॥
दशैवान्यान् प्रवक्ष्यामि द्रवादींस्तान्निबोध मे ।
द्रवः प्रक्लेदनः सान्द्रः स्थूलः स्याद्बन्धकारकः ॥
श्लक्ष्णः पिच्छिलवज्ज्ञेयः कर्कशो विशदो यथा ।
सुखानुबन्धो सूक्ष्मश्च सुगन्धो रोचनो मृदुः ॥
दुर्गन्धो विपरीतोऽस्माद्धृल्लासारुचिकारकः ।

पिच्छिल इति पिच्छिलोगुणः, जीवनः प्राणधारणः, सन्धानो भग्नस्य, विशद इति विशदोगुणः, विपरीतोऽस्मादिति असन्धानोऽजीवनः, अश्लेषी च क्लेदाचूषण आर्द्रीभावविनाशकर इत्यर्थः, दाहेति अदाहपाककरः अस्रावण इत्यर्थः । सादेति सादोऽङ्गग्लानिः, उपलेपी मलवृद्धिः, वलं श्लेषा गुरुर्गुणः, तर्पणः तृप्तिजनकः, बृंहणो देहवृद्धिकरः । लघुरिति लघुस्तद्विपरीत इति आसादानुपलेपकृत् कफहरश्चेत्यर्थः । लेखनः पत्तलीकरणः । दशाद्या इति दशाद्या दशसंख्योपेताः । आद्याः शीतादयोगुणाः । कर्म्मतः प्रोक्ताः कर्म्मभिः सह प्रोक्ता इत्यर्थः । तेषामिति तेषां मध्ये कर्म्मविशेषणैः कृत्वा द्रव इति द्रवोगुणः प्रक्लेदनः आर्द्रभावकरः, सान्द्रोगुणः बन्धकारकः उपचयकारक इत्यर्थः, द्रवः प्रक्लेदनोव्यापी शुष्कः स्याद्बन्धकारक इति केचित् पठन्ति, शुष्कोगुणः बन्धकारकः, शुष्कस्य शोषणत्वेनावयवपृथक्त्वमित्यर्थः । श्लक्ष्ण इति श्लक्ष्णोगुणः पिच्छिलवज्ज्ञेयः, जीवनः श्लेषसन्धानकृदित्यर्थः । कर्कश इति कर्कशोगुणः विशदो यथेति अजीवनोऽश्लेषी च तथा असन्धानकार्य्यकृच्च । सुखानुबन्धीति सुखानुबन्धो सुखोत्पादक इत्यर्थः । सूक्ष्मोऽवगाहकः, सुगन्धोगुणः । दुर्गन्ध इति हृल्लासारुचिकारक इति पुनररुचिग्रहणं द्विविधारुचिप्रापणार्थं, तेनाहारं न काङ्क्षति क्रियमाणाच्च विरसी भवति,

सरोऽनुलोमनः प्रोक्तो मदो यात्राकरः स्मृतः ।
व्यवायी चाखिलं देहं व्याप्य पाकाय कल्पते ॥ ७८ ॥
विकासी विकसन्नेवं धातुबन्धान् विमोचयेत् ।
आशुकारी तथाशुत्वाद्धावत्यम्भसि तैलवत् ॥
सूक्ष्मस्तु सौक्ष्म्यात् सूक्ष्मेषु स्रोतःस्वनुसरः स्मृतः ।
गुणा विंशतिरित्येवं यथावत्परिकीर्त्तिताः ॥
संप्रवक्ष्याम्यतश्चोर्द्धमाहारगतिनिश्चयं ।
पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः ।
विपक्वः पञ्चधा सम्यग्गुणान् स्वानभिवर्द्धयेत् ॥
अविदग्धः कफं पित्तं विदग्धः पवनं पुनः ।
सम्यग्विपक्वो निःसार आहारः परिबृंहयेत् ॥

हृल्लासस्तत्करणं छर्दिरित्यन्ये । सर इति सरोगुणः, अनुलोमनः वातमलप्रवर्त्तनः । मद इति मदोगुणः, यात्राकर इति शरीरस्थायित्वाद्देहस्ययात्रां वर्त्तनं करोति, व्यवायीति व्यवायीगुणः, अखिलमित्यादि अपक्व एवाखिलं देहव्याप्नोति पश्चान्मद्यविषवत्पाकं याति अन्ये कल्पत इति पठन्ति तत्रापि स्थितये कल्पतेनोर्द्धमधो वा प्रवर्त्तते इति स एवार्थः, अपरेतु पुनर्भावशब्दमभिप्रायार्थमिच्छन्ति तत्र नियतद्रवप्रभावेणात्मशक्त्यानुरूपं तत्तद्द्रव्यं मद्यविषवद्विशिष्टाभिप्रायाय कल्पत इत्यर्थः ॥ ७८ ॥

व्यवायिनः सकाशाद्विकाशिद्रव्यस्य किञ्चिद्भेदं दर्शयन्नाह विकासीति विकासीगुणः विकसन् प्रसर्पन् एवमिति अपक्व एव सकलं देहं व्याप्य धातुबन्धान् विमोचयेत् धातुशैथिल्यं करोतीत्यर्थः । अन्येतु सरविशेषो व्यवायी तोद्यविशेषो विकासीति ब्रुवते, तन्नेच्छति गयी । आशुकारीति आशुकारीगुणः आशुत्वात् । सूक्ष्म इति सूक्ष्मोगुणः, अत्र स्थूलगुणमपि केचित्पठन्ति स च पाठोऽभावान्न लिखितः । गुणा इति नन्वत्र स्थूलगुणेन सह त्रयोविंशतिर्गुणा भवन्ति । कथं विंशतिः कथ्यन्ते ? उच्यते केचिदत्र

विण्मूत्रमाहारमलः सारः प्रागीरितो रसः।
स तु व्यानेन विक्षिप्तः सर्व्वान्धातून् प्रतर्पयेत् ॥

संख्याभङ्गभयाद्व्यवायिविकास्याशुकारिणामपाठमेव मन्यन्ते, अन्ये पुनराहुः, अधिकायामपि विंशतावुक्तायां गुणविंशतिरुक्ता न चात्र नियमो विंशतिरेवेति व्यवायिविकास्याशुकारिणान्तु स्वतन्त्रे च दर्शनात् पाठो न्याय्य एव, अपरे पुनः प्रागेव दशैवान्यानित्यस्य स्थाने दशचान्यानिति चकारं पठन्ति, तेन व्यवायिविकास्याशुकारिणोऽपि समुच्चीयन्ते। सम्प्रवक्ष्यामीति आहारस्य गतिनिश्चयः, यद्‌यदात्मकमन्नमभ्यवहृतं पक्वं यद्‌द्रव्यगुणं याति गतमपि यद्‌यमुत्थाति तस्य निर्णय इत्यर्थः, तमेवाहारगुणं निर्द्दिशन्नाह। पञ्चेत्यादि—पञ्चभूतात्मके इति पृथिव्यादिपञ्चभूतहेतुके आहारः पाञ्चभौतिक इति आहारोपि पञ्चमहाभूतस्वरूपः विपक्वः पञ्चधा सम्यगिति पञ्चभिर्म्महाभूताग्निभिः, गुणानिति गुणशब्देनात्र गुणिनः पृथिव्यादयः उच्यन्ते तेन पार्थिवाः पार्थिवानभिवर्द्धयन्ति एवं शेषेष्वपि, अन्येतु गुणानिति गुणशब्देनात्र पृथिव्यादय उच्यन्ते। गन्धादीन् स्वानिति पञ्चगुणिनो द्रव्याणि पार्थिवादीनि एतेन गन्धादीनात्मनस्व पार्थिवादीनि द्रव्याण्यभिवर्द्धयेदित्यर्थः। दोषाणामाहारावस्थापाकात् प्रकोपवर्द्धनलक्षणं प्रतिपादयन्नाह। अविदग्ध इति अविदग्धो मधुराहारः, कफं परिबृंहयेदतिशयेन वर्द्धयेदित्यर्थः, पित्तं विदग्धोऽम्लीभूत आहारः परिबृंहयेत् पवनं पुनः सम्यग्विपक्व आहारो निःसारो निर्गतः सारः रौक्ष्यत्वेन परिबृंहयेदित्यर्थः। एवं दोषाणामवस्थापाकाद्वर्द्धनं प्रतिपाद्य पर्य्यन्तपाकाद्विण्मूत्रयोर्म्मलयो रसस्य धातुस्वभावस्य चोत्पत्तिं दर्शयन्नाह। विण्मूत्रेति प्रागीरितः पूर्व्वं कथितः शोणितवर्णनीये। तस्मादेव रसादन्येषामपि धातूनामुत्पत्तिं दर्शयन्नाह। सत्विति सरसः व्यानेन वातविशेषेण विक्षिप्तः प्रेरितः प्रतर्पयेदतिशयेन वर्द्धयेत् व्यानस्य सर्व्वाङ्गव्यापित्वेन दोषधातुमलव्याप्तत्वात्, स च कुल्या केदारन्यायेन सर्व्वान् धातून् प्रतर्पयति, तेषामेव दोषमलानां यतो यतो यस्योत्पत्तिः तां दर्शयन्नाह। कफ इति तत्राहारस्य मलौ विण्मूत्रे प्रागुक्तेः कफो रसस्य मलः। पित्तं रक्तस्य मलम्। खेष्विति खेषु कर्णश्रोत्रमुखादिषु स्रोतःसु मांसस्य स्वेदः प्रस्वेदः समेदसो मलः। नखरोम पुनरस्थ्नो मलःनेत्रविट्त्वक्षु च स्नेह इति नेत्रविट् अक्षिपुरीषं, त्वक्षु च

कफपित्तं मलः खेषु स्वेदः स्यान्नखरोम च।
नेत्रविट्त्वक्षु च स्नेहो धातूनां क्रमशो मलाः ॥ ३९ ॥
दिवा विबुद्धे हृदये जाग्रतः पुण्डरीकवत् ॥
अन्नमक्लिन्नधातुत्वादजीर्णेऽपि हितं निशि ॥
हृदि सम्मीलिते रात्रौ प्रसुप्तस्य विशेषतः।
क्लिन्नविस्रस्तधातुत्वादजीर्णे न हितं दिवा ॥

इमं विधिं योऽनुमतं महामुनेर्नृपर्षिमुख्यस्य पठेद्धि यत्नतः।
स भूमिपालाय विधातुमौषधं महात्मनांश्चार्हति सूरिसत्तमः ॥४०

इति श्रीसुश्रुताचार्य्यविरचिते आयुर्व्वेदशास्त्रे सुश्रुते सूत्रस्थानं समाप्तं।

स्नेहः त्वचाश्च यः स्नेहः समज्जो मलधातूनामित्यादिना मज्जान्तानां यथाक्रमं मला इत्यर्थः। शुक्रं पुनरमलं सहस्रधा ध्मातात्त्र सुवर्णवदिति आक्रष्टाण्ड-कोषस्य पुंसः श्मश्रुपातात् श्मश्रु एव शुक्रमल इत्येके तन्नेच्छति गयी ॥ ३९ ॥

ननु यदन्नमजीर्णे भुज्यते तदध्यशनमुच्यते प्रातर्भुक्ते यद्दिनान्ते भुज्यते तत्कथं तदध्यशनं न भवतीत्याह। दिवेति दिवा दिवसे, पुण्डरीकवत् विबुद्धे विकसिते हृदये जाग्रतः पुरुषस्याक्लिन्नधातुत्वादनार्द्रधातुत्वादजीर्णे-ऽप्यन्नं हितमिति सम्बन्धः, यथा अजाते पयसि अन्यदाहृतं पयः। दिवा विबुद्धे हृदये इत्युक्तेऽपि यज्जाग्रत इति कृतं तदेतदधिकं बोधयति। अजा-ग्रतोऽपि स्वभावादेव विबुद्धं हृदयं भवति। सायम्भुक्ते जीर्णे प्रातर्भोजनं न हितमित्यर्थमाह। हृदीति रात्रौ हृदये सम्मीलिते सङ्कुचिते प्रसुप्तस्य विशेषतः सम्मिलित इति सम्बन्धः, क्लिन्नविस्रस्तधातुत्वादार्द्रशिथिलधातु-त्वात् अजीर्णे सायम्भुक्ते इति शेषः, न हितं दिवेति दिवा अन्नं हितं न भवतीत्यर्थः। उक्त सूत्रपाठानुशंसां दर्शयन्नाह। इममिति इमं विधिं सूत्र-स्थानोदितमाहारविधिं प्रयत्नतो यः पठेत्। महामुनेर्धन्वन्तरे, किम्भूतस्य महामुनेः नृपर्षिमुख्यस्य राजर्षिप्रधानस्य यः स सूरिसत्तमः पण्डितप्रधानः, विधातुं कर्त्तुं महात्मनां राजसदृशानां अर्हति योग्यो भवति ॥ ४० ॥

इति सूत्रस्थाने निबन्धसंग्रहे षट्चत्वारिंशोऽध्यायः ॥

इति श्रीडल्हनविरचिते निबन्धसंग्रहे समस्तनिबन्धार्थज्ञापके सौश्रुतं सूत्रस्थानं समाप्तम्।

सुश्रुतः

निदानस्थानम् ।

प्रथमोऽध्यायः ।

अथातो वातव्याधिनिदानं व्याख्यास्यामः ॥ १ ॥

धन्वन्तरिं धर्म्मभृतां वरिष्ठममृतोद्भवम् ।
चरणावुपसंगृह्य सुश्रुतः परिपृच्छति ॥
वायोः प्रकृतिभूतस्य व्यापन्नस्य च कोपनैः ।
स्थानं कर्म्म च रोगांश्च वद मे वदताम्वर !

हेतुलिङ्गौषधज्ञानवीजभूतेन सूत्रस्थानेन संक्षेपोद्दिष्टस्य हेतुलिङ्गौषधस्य विवरणे सर्व्वाण्येव स्थानानि प्रस्तुतानि । तेषु च प्रस्तुतेषु स्वाधिकाराणां शल्यतन्त्रव्याधीनां हेतुलक्षणप्रतिपादकतया निदानस्थानस्यारम्भः । तत्रापि दोषाणां वातस्य प्रधानत्वात् । तद्व्याधिहेतुलक्षणाभ्यां प्राक् प्रतिपादनं युज्यत इत्याह,—अथातो वातव्याधिनिदानं व्याख्यास्यामः । वातव्याधे-राक्षेपकादेर्निदानं हेतुलक्षणनिर्द्देशः । अथातो वातव्याधिनिदानमिति । यद्यपि प्रथममेव सूत्रमस्ति तथापि प्राब्रवीद् भिषजाम्वर इत्यनन्तरं द्रष्टव्यम् । अनुपासितोऽप्रार्थितस्य गुरोः शिष्याणां व्याख्यानेनाधिकारात् । कः पुनरेव प्रतिज्ञातवानिति ॥ १ ॥

तमेव प्रकारेण दर्शयन्नाह । धन्वन्तरिं धर्म्मभृतां वरिष्ठममृतोद्भवं । चरणावुपसंगृह्य सुश्रुतः परिपृच्छति ॥ धर्म्मभृतां धार्म्मिकाणां, वरिष्ठं श्रेष्ठं । अमृतेन सार्द्धं उद्भवोपरमः चरणावुपसंगृह्य इति भक्त्यातिशयार्थम् । किं पृच्छतीत्याह,—वायोः प्रकृतिभूतस्य व्यापन्नस्य च कोपनैः । स्थानं कर्म्म च रोगांश्च वदस्व वदताम्वर । प्रकृतिभूतस्य स्वभावस्थितस्य, व्यापन्नस्य

तस्य तद्वचनं श्रुत्वा प्राब्रवीद्भिषजां वरः।
स्वयम्भूरेष भगवान्वायुरित्यभिशब्दितः॥ २॥
स्वातन्त्र्यान्नित्यभावाच्च सर्व्वगत्वात्तथैव च।
सर्व्वेषामेव सर्व्वात्मा सर्व्वलोकनमस्कृतः॥

विकृतस्य, कोपनैः द्रव्यगुणकर्म्मभिः वायुसमानैः, स्थानं श्रोणिगुदादि। तच्च प्रकृतस्य वायोः विकृतस्य तस्य सर्व्वशरीरम्। कर्म्म सामान्यं विशिष्टञ्च। सामान्यमिन्द्रियार्थोपसम्प्राप्तिमित्यादि। विशिष्टं सप्राणो नाम देहधृतिः। रोगांश्चेति हिक्काश्वासादिकान्। यदाह—प्रायशः कुरुते दुष्टो हिक्का श्वासादिकान् गदान्। विकारान् नाम च व्याख्यास्यामि। अहं वद-ताञ्च नृणां मध्ये श्रेष्ठबोधनम्। वदस्व वदेति च एक एवार्थः। मे मम, कर्म्मग्रहणं केचिन्नाधीयते। तन्मते स्थानं रोगविघातं चेति पाठः। तस्य तद्वचनं श्रुत्वा प्राब्रवीद् भिषजाम्बरः। तस्य सुश्रुतस्य तत्पूर्व्वोक्तं भिषजा म्बरो धन्वन्तरिः। जगाद भगवान्, गुरुकोपनैरित्यत्र भूय इति केचित् पठन्ति, तद्सावित्यत्र वदस्व इति केचित् पठन्ति। तत्र भूपते इति केचित् पठन्ति। स्वयम्भूरेष भगवान् वायुरित्यभिशब्दितः। स्वान्त्र्यान्नित्यभावाच्च सर्व्वगत्वात् तथैवच। सर्व्वेषामेव सर्व्वात्मा सर्व्वलोकनमस्कृतः॥ स्थित्यु-त्पत्तिविनाशेषु भूतानामेष कारणम्। अव्यक्तो व्यक्तकर्म्मा च रुक्षः शीतो लघुः खरः॥ तिर्य्यग्गो द्विगुणश्चैव रजोबहुल एव च। अचिन्त्यवीर्य्यो दोषाणां नेता रोगसमूहराट्। आशुकारी मुहुश्चारी पक्वाधान गुदालयः॥ एष वायुरिति भगवानिति सम्बन्धः। भगवान् समस्तैश्वर्य्यगुणयुक्तः अनि-मादिगुणयुक्त इत्यर्थः। अभिशब्दितः कीर्त्तितः॥ २॥

स्वयम्भूत्वे त्रितयमाह। स्वातन्त्र्या हि कृतकर्म्मविषये नित्यभावात् नित्यस्य हि कारणरहितत्वेन स्वातन्त्र्यसत्त्वश्च स्वयम्भूत्वमित्यर्थः। सर्व्वगत्वा-च्चेति यो हि सर्व्वगतः। स्वयम्भूराकाशवत्। चकारात् सूक्ष्मत्वमपि पर-माणोरिव स्वयम्भूहेतुः। कथं पुनरस्य सर्व्वगत्वं यावता पार्थिवद्रव्यमूर्त्तिषु वायुर्नास्तीत्याह सर्व्वेषामित्यादि। सर्व्वेषां स्थावरजङ्गमानां, सर्व्वात्मा

स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणं।
अव्यक्तो व्यक्तकर्म्मा च रूक्षः शीतो लघुः खरः॥
तिर्य्यग्गो द्विगुणश्चैव रजोबहुल एव च।
अचिन्त्यवीर्य्यो दोषाणां नेता रोगसमूहराट्॥
आशुकारी मुहुश्चारी पक्वाधानगुदालयः।
देहे विचरतस्तस्य लक्षणानि निबोध मे॥
दोषधात्वग्निसमतां सम्प्राप्तिं विषयेषु च।
क्रियाणामानुलोम्यञ्च करोत्यकुपितोऽनिलः॥ ३॥

कारणकार्य्यात्मकत्वेन, सर्व्वरूपः सर्व्वप्रयोजनहेतुरिति केचित्। सर्व्वलोकनमस्कृत इति कुत इत्याह। स्थित्युत्पत्तिविनाशेष्वित्यादि। स्थितिः जीवनं, अव्यक्तोऽदृश्यमूर्त्तिः। व्यक्तकर्म्मा प्रकटक्रियः, शीत इति असंयुक्तस्य वायोर्गुणोऽयं संयुक्तस्तूष्णोऽपि, खरः खरस्पर्शः कर्कोटिकफलवत्। तिर्य्यगः तिर्य्यग्गामी, द्विगुणः शीतस्पर्शगुणः। रजोबहुल इति त्रिगुणत्वेऽप्युत्कर्षविशेषात्। रजःप्रबलत्वमस्य। अचिन्त्यशक्तिः। सा वाप्यशक्तिः। शरीरे सदोषमूत्रपुरीषादिविभागोऽवयवादिसंस्थानकारणम्। दोषधातुमलसम्वाहनादिभिश्च शरीराद् वहिस्तु सञ्चरती धरणीधारणादिभिः। दोषाणां तेन दोषधातुमलानां प्रेरक इत्यर्थः। अन्येतु वायोरपि वायुरेव तेनेति वहुवचनं समर्थयन्ति। रोगसमूहराड़िति रोगसमूहे रोगहेतुवृन्दे पित्तकफरक्तादौ, राजते शोभत इति रोगसमूहराट्। ननु राट्शब्दो राजपर्य्यायः स रोगानीकराट् स्मृत इत्यग्रेण तेन समूहविरोधापत्तेः। आशुकारी शीघ्रमत्ययं कारित्वात्। मुहुर्मुहुः प्रकृतिभूतोऽपि चरतीति मुहुश्चारी। पक्वाधानगुदौ स्थानमस्येत्यर्थः। देहे विचरतस्तस्य लक्षणानि निबोध मे। क्रियाणामानुलोम्यञ्च करोत्यकुपितोऽनिलः॥ धातुशब्दानन्तरमादिशब्दो द्रष्टव्यः। तेन मलोपधातूनामपि ग्रहणम्। अथवा धातुशब्देन मलोपधातव उच्यन्ते। शरीरधारणकारणात्। विषयेषु शब्दस्पर्शरूपरसगन्धेषु। क्रियाणां कायवाङ्मन-

यथाग्निः पञ्चधा भिन्नो नामस्थानात्मकर्म्मभिः।
भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियामयैः॥
प्राणोदानौ समानश्च व्यानश्चापान एव च।
स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणं॥
वायुर्य्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान्॥ ४॥

सीनां आनुलोम्यं प्रवर्त्तकत्वम्। गयदासाचार्य्यस्तु इमं श्लोकमिन्द्रियार्थोपसम्प्राप्तिमित्यादीनि कृत्वा पठति। स च विस्तरभयान्न लिखितः॥ ३॥

तदेवं सर्व्वानिलस्य सामान्येन स्वास्थ्यहेतुत्वं प्रदर्श्य स्थानोपाधिभेदेन-भिन्नस्य नामान्तरविशिष्टस्य प्रतिस्थानं विशिष्टस्वस्थरोगांश्च दर्शयन्नाह— यथाग्निः पञ्चधा भिन्नो नामस्थानात्मकर्म्मभिः। भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियामयैः॥ यथाग्निः पञ्चधा भिन्न इति। यथाग्निः पित्तमेकाश्रयमथ्यादिना पञ्चविधमेव। पाचकरञ्जकालोचकभ्राजकसाधकेति नाम्ना स्थानेनामपक्को न पुनरत्र वाह्याग्नेर्गार्हपत्याहवनीयदक्षिणाग्निः आवसथ्यमभ्यलक्षणा भेदा उत्तममध्यमादिना क्रियया न्नपाचनादिकया। आमयेनान्नपाकादिना पञ्चविधः। एवमनिलोऽप्येक एव नामादिभिः पञ्चविधः। अन्ये न पुनरत्र वाह्याग्ने गार्हपत्याहवनीयदक्षिणाग्नि आवसथ्यमभ्यलक्षणान् पञ्चभेदानाहुः, तन्नेच्छति गयदासाचार्य्यः। तत्र वायोर्नामान्याह। प्राणोदानौ समानश्च व्यानश्चापान एव च। स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणाम्॥ स्थानस्था स्थानशब्देन स्वास्थ्य उच्यते, यापयन्ति धारयन्ति। यो वायुर्व्वक्त्रसञ्चारी स प्राणो नाम देहधृक्। सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते। प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान्॥ वक्त्रसञ्चारस्योपलक्षणस्तेन मूर्द्धोरःकण्ठनासिका अपि प्राणस्य स्थानं अन्तरभ्यन्तरमन्नं प्रवेशयति। देहधारणात् प्राणांश्चाप्यवलम्बत इति प्राणानन्नादीन् अवलम्बते स्वक्रियासु योजयति। गयदासा-

उदानो नाम यस्तूर्द्ध मुपैति पवनोत्तमः ॥
तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते ।
ऊर्द्ध जत्रुगतान् रोगान् करोति च विशेषतः ॥
आमपक्वाशयचरः समानो वह्निसङ्गतः ।
सोऽन्नं पचति तज्जांश्च विशेषान्विविनक्ति हि ॥
गुल्माग्निसङ्गातीसारप्रभृतीन् कुरुते गदान् ॥ ५ ॥

चार्य्यास्तु एवं मन्यन्ते । प्राणानामग्निसोमादीनामधिष्ठानमवलम्बनवचनेन आधारभूतहृदयाधमेवोच्यते । एतेन प्राणाधारहृदयधारणेन प्राणधारणमेवोक्तम् । अतएव प्राणानामवलम्बनेन मरणमूलत्वमुच्यते । यदुक्तं श्रुतौ यथा—सैन्धवोऽश्वः शङ्कुमुत्पाद्य धावति तद्वत् प्राणो रुद्रः सर्व्वान् वायूनुत्पाद्य प्रयाणकाले धावति । श्वासादिकानित्यादिशब्दो प्रतिश्यायस्वरभेदकासादयः ॥ ४ ॥

उदानस्य प्रकृतिभूतस्य स्थानादिव्यापन्नस्य रोगान् निर्दिशन्नाह—उदानो नाम यस्तूर्द्धमुपैति पवनोऽनुगः। तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते। ऊर्द्धजत्रुगदान् रोगान् करोति च विशेषतः। उपैति गच्छति स्थानं पुनरनुक्तमप्यस्य नाभ्युरः कण्ठानि ॥ भाषितगीतादिरिति ॥ आदिशब्दात् श्वासादिविशेषः, अभिवर्त्तत इत्यत्र केचित्तु विषयेऽभिवर्त्तत इति पठन्ति, केचिद् विषयोऽभिवर्त्तत इति पठन्ति। ऊर्द्धजत्रुगतानिति नयनवदनघ्राणश्रवणशिरःसंश्रयान् । चकारादन्यानपि कामलादीन् करोति । आमपक्वाशयचरः समानो वह्निसङ्गतः। सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि। गुल्माग्निसादातीसारप्रभृतीन् कुरुते गदान् ॥ पाकः पक्वं न युङ्क्ते भावेक्तः। आमस्य पक्वमामपक्वं तस्याशयं पच्यमानाहाराशय इत्यर्थः। तत्र चरतीत्यामपक्वाशयचरः। वह्निसङ्गत इत्यत्राग्निसहायवानिति केचित् पठन्ति। तत्रापि स एवार्थः। सोऽन्नं पचतीत्यग्निसन्धुक्षणाद् भक्ताकार इव तज्जानन्नपाकजान्। स रसदोषमूत्रपुरीषाणि विविनक्ति पृथक् करोति ॥ ५ ॥

कृत्स्नदेहचरो व्यानो रससंवहनोद्यतः ॥
स्वेदासृक्स्रावणो वापि पञ्चधा चेष्टयत्यपि।
क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् ॥
पक्वाधानालयोऽपानः काले कर्षति याप्यधः।
समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ॥
क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ॥ ६ ॥
शुक्रदोषप्रमेहास्तु व्यानापानप्रकोपजाः ॥
युगपत्कुपिताश्चापि देहं भिन्द्युरसंशयम् ॥ ७ ॥
अतऊर्द्धं प्रवक्ष्यामि नानास्थानान्तराश्रितः ॥

कृत्स्नदेहचरो व्यानो रससम्बहनोद्यतः। स्वेदासृक्स्रावणस्थापि पञ्चधा चेष्टयत्यपि ॥ क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान्। रससम्बहनोद्यत इत्यत्रादिशब्दो द्रष्टव्यः। तेन रसादिसम्बहनोद्यत इत्यर्थः। सम्बहनं प्रेरणं, पञ्चधा चेष्टयत्यपीति प्रसारणाकुञ्चनविनमनोन्नमनतिर्य्यग्गमनानि पञ्च चेष्टाः। अन्ये तु गतिप्रसारणोत्क्षेपणनिमेषोन्मेषैः पञ्चभिः प्रकारैः पञ्चधेति व्याख्यानयन्ति। सर्व्वदेहगान् ज्वरातीसाररक्तपित्तप्रभृतीन् ॥ पक्वाधानालयोऽपानः काले कर्षति याप्यधः। समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ॥ क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ॥ पक्वाधानालयः पक्वाशयस्थान इत्यर्थः। वस्त्याश्रयान् अश्मर्य्यादीन्, गुदाश्रयान् भगन्दरादीन् ॥ ६ ॥

इदानीमुपलक्षणार्थं विकृतवातद्वयादि कर्म्म दर्शयन्नाह—शुक्रदोषप्रमेहास्तु व्यानापानप्रकोपजान् ॥ शुक्रस्य सर्व्वाङ्गगतत्वात् प्रमेहस्य सर्व्वदेहगतरसादिदूष्यप्रभावत्वाद् व्यानकृतत्वन्। मेढ्रद्वारसंश्रितत्वादपानत्वञ्च। तेषां पञ्चानां प्रकोपे नियमेन देहनाशं दर्शयन्नाह—युगपत् कुपिताश्चापि देहभिन्द्युरसंशयः ॥ युगपदेककालमित्यर्थः। भेदो देहविनाशोऽभिप्रेतः ॥ ७ ॥

अत ऊर्द्धं प्रवक्ष्यामि नानास्थानान्तराश्रितः। बहुशः कुपितो वायु-

वहुशः कुपितो वायुर्व्विकारान् कुरुते हि यान्।
वायुरामाशये क्रुद्धश्छर्द्यादीन् कुरुते गदान्॥
मोहं मूर्च्छां पिपासाञ्च हृद्ग्रहं पार्श्ववेदनाम्।
पक्वाशयस्थोऽन्त्रकूजं शूलं नाभौ करोति च॥
कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम्।
श्रोत्रादिष्विन्द्रियवधं कुर्य्यात् क्रुद्धः समीरणः॥
वैवर्ण्यं स्फुरणं रौक्ष्यं सुप्तिं चुमुचुमायनं।
त्वक्स्थोनिस्तोदनं कुर्य्यात्त्वग्भेदं परिपोटनं॥
व्रणांश्च रक्तगो ग्रन्थीन् सशूलान्मांससंश्रितः।

व्विकारान् कुरुते हि यान्॥ नानास्थानान्तराश्रितः कुपितः सन् वायुर्व्वहुशो विकारान् कुरुते तान् प्रवक्ष्यामीति सम्बन्धः॥ वायुरामाशये क्रुद्धश्छर्य्यादीन् कुरुते गदान्। मोहं मूर्च्छां पिपासाञ्च हृद्रोगपार्श्ववेदनाम्॥ छर्य्यादीनादिशब्दाद् रुजः पार्श्वोदरहृत्स्तम्भतोदादिका ग्राह्याः। अथवा ऊर्द्धगरक्तपित्तादिकाः मोहेनैवात्यन्तचित्तनाशः। मूर्च्छा चेतनाच्युतिः। पक्वाशयस्थोऽन्त्रकूजं शूलं नाभौ करोति च। कृच्छ्रमूत्रपुरीषत्वमानाहन्त्रिकवेदनाम्॥ अन्त्रकूजं अन्त्राद् व्यक्तशब्दम्। चकारात् वातविण्मूत्रसङ्गजङ्घोरुत्रिकपार्श्वपृष्ठादीन् प्रति शूलं करोति, शूलं नाभावित्यत्र शूलानाहाविति केचित् पठन्ति। व्याख्यानयन्ति च—पक्वाशय आनह्यात् समन्ताद्विध्यत इति वेदनाप्रकार एव एक आनाहः द्वितीयस्तु विसूचिका प्रतिषेधे प्रोक्तलक्षण इव॥ श्रोत्रादिष्विन्द्रियवधं कुर्य्यात् क्रुद्धः समीरणः॥ श्रोत्रादिषु क्रुद्धः सन् दर्शनरसनस्पर्शावेदित्वानि। स्पर्शाद्यवेदित्वानि। वैवर्ण्यं समीरणं रौक्ष्यं सुप्तिं चुमुचुमायनम्। त्वक्स्थो निस्तोदनं कुर्य्यात् त्वग्भेदं परिपोटनम्। त्वक्स्थो रसस्थः समीरणो वैवर्ण्यादि कुर्य्यादिति सम्बन्धः। सुप्तिं स्पर्शाज्ञानम्। चुमुचुमायनं सर्षपकल्कावलिप्तायामिवाङ्गानां वेदनाम्। त्वग्भेदं त्वचो भेदमेव। परिपोटनं सर्व्वतः परिपुटनं त्वच

तथा मेदःश्रितः कुर्य्याद्ग्रन्थीन्मन्दरुजोऽव्रणान् ॥
कुर्य्यात् सिरागतः शूलं सिराकुञ्चनपूरणम् ।
स्नायुप्राप्तः स्तम्भकम्पौ शूलमाक्षेपणं तथा ॥
हन्ति सन्धिगतः सन्धीन् शूलशोफौ करोति च ।
अस्थिशोषञ्च भेदञ्च कुर्य्याच्छूलञ्च तच्छ्रितः ॥
तथा मज्जगते रुक्च न कदाचित् प्रशाम्यति ।
अप्रवृत्तिः प्रवृत्तिर्व्वा विकृतिः शुक्रगेऽनिले ॥ ८ ॥
हस्तपादशिरोधातूंस्तथा सञ्चरति क्रमात् ।
व्याप्नुयाद्वाखिलं देहं वायुः सर्व्वगतो नृणाम् ॥

एव । व्रणांश्च रक्तगः कुर्य्यादिति शेषः । अमुं पाठं केचिन्न पठन्ति । तत्र गयदासाचार्य्यस्यासम्मतत्वात् । ग्रन्थीन् सशूलान् मांसमाश्रितः । समीरण इति सम्बन्धः । तथा मेदःश्रितः कुर्य्याद् ग्रन्थीन् मन्दरुजोऽव्रणान् । अव्रणान् व्रणरहितान् ॥ कुर्य्यात् सिरागतः शूलं सिराकुञ्चनपूरणम् । शिरा कुटिला शिरेति लोके वदति । स्नायुप्राप्तः स्तम्भकम्पौ शूलमाक्षेपणं तथा । स्तम्भो निश्चलीकरणम् । आक्षेपणं चालनं, हन्ति सन्धिगतसन्धीन् शूलशोफौ करोति च । एतेनाकुञ्चनप्रसारणयोरभाव उक्तः । अस्थिशोषं प्रभेदञ्च कुर्य्याच्छूलञ्च तच्छ्रितः । तच्छ्रित इति अस्थ्याश्रित इत्यर्थः । तथा मज्जगते रुक् च न कदाचित् प्रशाम्यति । तथा मज्जगते यथाऽस्थ्याश्रितोऽस्थिशोषं मज्जाश्रितो मज्जशोषं कुर्य्यादित्यर्थः । अप्रवृत्तिः प्रवृत्तिर्व्वा विकृतिः शुक्रगेऽनिले । किञ्चिच्छिष्टा प्रवृत्तिरित्याह । विकृतिः अतिशीघ्रा मन्दग्रथितविवर्णा युक्तेत्यर्थः ॥ ८ ॥

एकाङ्गगत एकधातुगतो वाप्युपेक्षितः । सर्व्वाङ्गगता सर्व्वधातुगतो वा भवतीति दर्शयन्नाह—हस्तपादशिरोधातूंस्तथा सञ्चरति क्रमात् । व्याप्नुयाद्वाऽखिलं देहं वायुः सर्व्वगतो नृणाम् ॥ वायुस्तथा हस्तपादादिशिरः क्रमात् सञ्चरति । यथाऽखिलं देहं व्याप्नुयात् । तथाधीकृत् क्रमात्

स्तम्भनाक्षेपणस्वापशोफशूलानि सर्व्वगः।
स्थानेषूक्तेषु मिश्रश्च संमिश्राः कुरुते रुजः॥ ८॥
कुर्य्यादवयवप्राप्तो मारुतस्त्वनिलान् गदान्।
दाहसन्तापमूर्च्छाः स्युर्व्वायौ पित्तसमन्विते॥
शैत्यशोफगुरुत्वानि तस्मिन्नेव कफावृते।
सूचीभिरिव निस्तोदः स्पर्शद्वेषः प्रसुप्तता।
शेषाः पित्तविकाराः स्युर्म्मारुते शोणितान्विते॥
प्राणे पित्तावृते छर्द्दिर्दाहश्चैवोपजायते।
दौर्व्वल्यं सदनं तन्द्रा वैवर्ण्यञ्च कफावृते॥

सञ्चरति यथा च सर्व्वगतो वा भवति सर्व्वधातुगश्च भवतीत्यर्थः। व्याप्नु-यादेति वा शब्दो भिन्नक्रमे सर्व्वगते चेति द्रष्टव्यः। तस्येदानीं सर्व्वाङ्ग-गतस्य लिङ्गं दर्शयन्नाह—स्तम्भनाक्षेपेण स्वापशोफशूलानि सर्व्वगः। सर्व्वगो वायुः। सर्व्वस्मिन् शरीरे स्तम्भनादिकं करोति। तस्य वायोः प्रसारणे पित्तादिसंयुक्तस्य पित्ताद्यावरणे प्रतिपत्तिहेतुं दर्शयन्नाह,—स्थानेषूक्तेषु मिश्रश्च सम्मिश्रा कुरुते रुजः। मिश्रा पित्तदाहादिकार्य्यलिङ्गदर्शनाच्च पित्ताद्यावरणं ज्ञेयम्। केवलस्य वायोः शीतस्वभावत्वाद्दाहः पित्तं विना नोपपद्यत इति॥ ८॥

तस्येदानीमवयवगतस्यानेकरोगकारणत्वं दर्शयन्नाह,—कुर्य्यादवयव-प्राप्तो मारुतस्त्वनिलान् गदान्। इदानीं सम्मिश्राः कुरुते रुज इति सूचित-मावरणं विवृण्वन्नाह,—दाहसन्तापमूर्च्छाः स्युर्व्वायौ पित्तसमन्विते। दाहाग्निदग्धस्येव, सन्तापोऽूष्मादिसंस्थितस्येव। शैत्यशोफगुरुत्वानि तस्मि-न्नेव कफावृते। तस्मिन्नेव वायौ। सूचीभिरिव निस्तोदः स्पर्शद्वेषः प्रसुप्तता। शेषाः पित्तविकाराःस्युर्म्मारुते शोणितान्विते। प्राणे पित्तावृते छर्द्दिर्दाहश्चैवोपजायते। दौर्व्वल्यं सदनं तन्द्रा वैवर्ण्यञ्च कफावृते॥ सदन-मङ्गग्लानिः। उदाने पित्तसंयुक्ते मूर्च्छादाहभ्रमक्लमाः। क्लमोऽङ्ग-

उदाने पित्तसंयुक्ते मूर्च्छादाहभ्रमक्लमाः।
अस्वेदहर्षौ मन्दाग्निः शीतस्तम्भौ कफावृते॥
समाने पित्तसंयुक्ते स्वेददाहौष्ण्यमूर्च्छनम्।
कफाधिकञ्च विण्मूत्रं रोमहर्षः कफावृते॥
अपाने पित्तसंयुक्ते दाहौष्ण्ये स्यादसृग्दरम्।
अधःकाये गुरुत्वञ्च तस्मिन्नेव कफावृते॥
व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः।
गुरूणि सर्व्वगात्राणि स्तम्भनं चास्थिपर्व्वणाम्॥
लिङ्गं कफावृते व्याने चेष्टास्तम्भस्तथैव च।
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम्॥
शोकाच्च प्रमदामद्यव्यायामैश्चातिपीड़नात्।
ऋतुसात्म्यविपर्य्यासात् स्नेहादीनाञ्च विभ्रमात्॥
अव्यवाये तथा स्थूले वातरक्तं प्रकुप्यति॥ १०॥

क्लानिः। अस्वेदहर्षौ मन्दाग्निः शीतस्तम्भौ कफावृते। हर्षो रोमहर्षः। समाने पित्तसंयुक्ते स्वेददाहौष्ण्यमूर्च्छनम्। कफाधिकञ्च विण्मूत्रं रोमहर्षः कफावृते॥ कफाधिकं श्लेष्मबहुलं विष्ठामूत्रम्। अपाने पित्तसंयुक्ते दाहौष्ण्ये स्यादसृग्दरम्। असृग्दरं स्त्रीणामेव। अधःकाये गुरुत्वञ्च तस्मिन्नेव कफावृते॥ व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः। गुरूणि सर्व्वगात्राणि स्तम्भनं चास्थिपर्व्वणाम्। लिङ्गं कफावृते व्याने चेष्टास्तम्भस्तथैव च॥ अस्थिपर्व्वणामस्थिसन्धीनां, चेष्टा गमनादिकाः। सूचीभिरिव निस्तोद इत्यादिवाक्येनाप्रकुपितशोणितावृतवातजन्यस्य वातरक्तस्य प्रकोपकारणं दर्शयन्नाह,—प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम्। शोकाच्च प्रमदामद्यव्यायामैश्चातिपीड़नात्॥ ऋतुसात्म्यविपर्यासात् स्नेहादीनाञ्च विभ्रमात्। अव्यवाये तथा स्थूले वातरक्तं प्रकुप्यति। सुकुमाराणां वातरक्तं प्रकुप्यतीति सम्बन्धः। मिथ्याहारविहारमिति। मिथ्यानुचितः,

हस्त्यश्वोष्ट्रैर्गच्छतोऽन्यैश्च वायुः कोपं यातः कारणैः सेवितैः स्वैः।
तीक्ष्णोष्णाम्लक्षारशाकादिभोज्यैः सन्तापाद्यैर्भूयसा सेवितैश्च॥
क्षिप्रं रक्तं दुष्टिमायाति तच्च वायोर्म्मार्गं संरुणद्ध्याशु यातः।
क्रुद्धोऽत्यर्थं मार्गरोधात् स वायुरत्युद्रिक्तं दूषयेद्रक्तमाशु॥
तत्सम्पृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तं।
तद्वत् पित्तं दूषितेनास्रजात्तं श्लेष्मा दुष्टो दूषितेनास्रजात्तः॥११॥
स्पर्शोद्विग्नौ तोदभेदप्रशोष-स्वापोपेतौ वातरक्तेन पादौ।

विहारः कायवाङ्मनोव्यापारः, अध्वा मार्गं, व्यायामः शरीरायासजननं कर्म्म, विभ्रमोऽन्यथाकरणम्। अव्यवाये मैथुनवर्ज्जिते, केचित् प्रायशः सुकुमाराणां इत्यादिग्रन्थं वातरक्तं प्रकुप्यतीति यावन्न पठन्ति। चिकित्सिते पठिष्यमाणत्वात्॥ १०॥

तस्य सम्प्राप्तिं दर्शयन्नाह—हस्त्यश्वोष्ट्रैर्गच्छतोऽन्यैश्च वायुः कोपं यातः कारणैः सेवितैः स्वैः। तीक्ष्णोष्णाम्लक्षारशाकादिभोज्यैः सन्तापाद्यैर्भूयसा सेवितैश्च॥ शीघ्रं रक्तं दुष्टमायाति तच्च वायोर्म्मार्गं संरुणद्ध्याशु यातः। क्रुद्धोऽत्यर्थं मार्गरोधात् स वायुरत्युद्रिक्तं दूषयेद्रक्तमाशु॥ तत् सम्पृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तम्। तद्वत् पित्तं दूषितेनास्रजात्तं श्लेष्मादुष्टो दूषितानास्रजात्तः॥ अन्यैश्चेति भारहरणादिभिः कारणैरित्यर्थः। कोपं यातः कोपं गच्छत इत्यर्थः। कारणैः सेवितैः स्वैः विदाह्यादिभिः। तच्च रक्तं वायोर्म्मार्गं संरुणद्धि। कथम्भूतस्य वायोरित्याह। आशु यातः शीघ्रं गच्छत इत्यर्थः। अत्युद्रिक्तमतिशयेन वृद्धिं गतं रक्तम्। तत् सम्पृक्तमिति। तत् रक्तं सम्पृक्तं संसृष्टम्। वायुना दूषितेनेति दूषितेन वायुना सह। तत् प्राबल्यात् शोणितस्य प्राबल्यात्, तयोर्व्वातरक्तयोः प्राबल्यादिति कश्चित्। तद्वत् पित्तमिति दुष्टं पित्तमित्यर्थः, दूषितेनास्रजात्तमिति दूषितेन रक्तेन मिश्रम्॥ ११॥

तस्येदानीं वातादिविशेषेण विशिष्टलिङ्गं दर्शयन्नाह,—स्पर्शोद्विग्नौ तोदभेदप्रशोषस्वापोपेतौ वातरक्तेन पादौ। स्पर्शोद्विग्नौ स्पर्शस्यादाविति

पित्तासृग्भ्यामुग्रदाहौ भवेतामत्यर्थोष्णौ रक्तशोफौ मृदू च ॥
कण्डूमन्तौ श्वेतशीतौ सशोफौ पीनस्तब्धौ श्लेष्मदुष्टे च रक्ते।
सर्व्वैर्दुष्टे शोणिते चापि दोषाः स्वं स्वं रूपं पादयोर्दर्शयन्ति ॥१२॥

प्राग्रूपे शिथिलौ स्विन्नौ शीतलौ सविपर्य्ययौ।
वैवर्ण्यतोदसुप्तत्वगुरुत्वौषासमन्वितौ ॥
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि।
आखोर्व्विषमिव क्रुद्धं तद्देहमनुसर्पति ॥
आजानुस्फुटितं यच्च प्रभिन्नं प्रसुतञ्च यत्।
उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः ॥

सम्बन्धः। प्रशोषः शुष्कता, स्वापः स्पर्शाज्ञानम्। एतेन वातप्रबलवातरक्तलक्षणमुक्तं। पित्तासृग्भ्यामुग्रदाहौ भवेतामत्यर्थोष्णौ रक्तशोफौ मृदु च। पित्तासृग्भ्यामिति वातशोणित एव, यदा पित्तमसृक् चावलवत्तरं भवति तदेत्यर्थः। रक्तशोफौ रक्तवर्णशोफौ। कण्डूमन्तौ श्वेतशीतौ सशोफौ पीनस्तब्धौ श्लेष्मदुष्टे च रक्ते। कण्डूमन्तौ पादाविति सम्बन्धः। पीनौ स्थूलौ। सर्व्वैर्दुष्टे शोणिते चापि दोषाः स्वं स्वं रूपं पादयोर्दर्शयन्ति ॥ १२ ॥

तस्य पूर्व्वरूपमाह,—प्राग्रूपे शिथिलौ स्विन्नौ शीतलौ सविपर्य्ययौ। वैवर्ण्यतोदसुप्तत्वगुरुत्त्वोष समन्वितौ। सविपर्य्ययाविति। कठिना स्विन्नोष्णौ पादावित्यध्याहारः, ऊषा दाहः। केचिदत्र पूर्व्वं न पठन्ति चिकित्सायां पठिष्यमाणत्वात्। तस्येदानीं पादमात्रेऽपि जातस्य कालेनावयवान्तरानुसरणं निर्दिशन्नाह,—पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि। आखोर्व्विषमिव क्रुद्धं तद्देहमनुसर्पति। मूलमास्थाय कन्दं प्राप्य। आखोरित्यादि उडुम्बरस्य विषं मूलमास्थाय पश्चात् कुपितं तद्देहं सकलमेवानुयाति। तस्येदानीमसाध्यादिलक्षणं दर्शयन्नाह,—आजानुस्फुटितं यच्च प्रभिन्नं प्रसुतञ्च यत्। उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः॥ शोणितं तदसाध्यं स्याद् याप्यं सम्वत्सरोत्थितम्॥ आजानुस्फुटितं जानुपर्य्यन्त-

शोणितं तदसाध्यं स्याद्याप्यं सम्बत्सरोत्थितम् ॥ १३ ॥
यदातु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः ।
तदाक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः ॥
मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः ॥
सोऽपतानकसंज्ञो यः पातयत्यन्तरान्तरा ।
कफान्वितो भृशं वायुस्तास्वेव यदि तिष्ठति ॥
स दण्डवत् स्तम्भयति कृच्छ्रो दण्डापतानकः ।
हनुग्रहस्तदात्यर्थं सोऽन्नं कृच्छ्रान्निषेवते ॥

मुचटितम्। प्रभिन्नं विदीर्णं, प्रस्रुतं स्रावयुक्तम्। उपद्रवैर्म्मांसप्राणक्षया-दिभिर्यथोक्तैः, आदिग्रहणात् अङ्गुलिवक्रतार्वुदादयोऽपि ग्राह्याः। जुष्टं सहितं, यज्जानुपर्य्यन्तं स्फुटितं वातप्राबल्यात्। यच्च जानुपर्य्यन्तं प्रभिन्नं प्रस्रुतञ्च पित्तरक्तं प्राबल्यात् तदप्यसाध्यमेव ॥ १३ ॥

इदानीं वातरक्तमभिधायाक्षेपकमाह,—यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः। तदाक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः। मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः। धमन्यो नाड्यः, अभ्येति व्याप्नोति। आक्षिपति चालयति। मुहुश्चर इति वारम्वारं चरणशीलो वायुः मुहुश्चरत्वेनैव मुहुर्मुहुराक्षेपकयुक्तं अन्ये तु वहिश्चर इति पठन्ति। तन्नेच्छति गयदासाचार्य्यः। तदाक्षेपात् देहाक्षेपात्। इदमाक्षेपकस्य सामान्यलक्षण-मुक्तम्। आक्षेपविशेषमाह,—सोपतानकसंज्ञो यः पातयत्यन्तराऽन्तरा ॥ य आक्षेपकोऽन्तराऽन्तरा पातयति सोऽपतानक इत्यर्थः। इदं सामान्यापतानकलक्षणमुक्तं, गयदासाचार्य्येणापतानकलक्षणं येनापतत इत्यादि वाक्येनाभिधाय व्याख्यातम्। यथा येन वायुना कर्त्तृभूतेन हेतुभूतेन वायुमान् अपतागम्यते। तमो दृश्यते मोह्यत इति। तास्वेव सर्व्वासु धमनीषु भृशं तिष्ठतीति सम्बन्धः। कृच्छ्रः कष्टसाध्यः स एवापतानकः। स एवापतानकस्त्रिधा। दण्डापतानकः, अन्तरायामः, वहिरायामश्च। तत्र दण्डापतानकलक्षणमाह,—कफान्वितो भृशं वायुस्तास्वेव यदि

धनुस्तुल्यं नमेद्यस्तु स धनुःस्तम्भसंज्ञकः ॥
अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः।
स्नायुप्रतानमनिलो यदा क्षिपति वेगवान् ॥
विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन्।
अभ्यन्तरं धनुरिव यदा नमति मानवम्।
तदा सोऽभ्यन्तरायामं कुरुते मारुतो बली ॥ १४ ॥
बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च।
तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम् ॥
कफपित्तान्वितो वायुर्वायुरेव च केवलः।

तिष्ठति। स दण्डवत् स्तम्भयति कृच्छ्रोदण्डापतानकः। हनुग्रहस्तदा-त्यर्थं सोऽन्नं कृच्छ्रान्निषेवते। हनुग्रहस्तु दण्डापतानके अन्यत्रापि वायोः स्यात्। स दण्डापतानकवान् पुरुषः। धनुस्तम्भसंज्ञकमन्तरायामं दर्शय-न्नाह,—धनुस्तुल्यं नमेद् यस्तु स धनुस्तम्भसंज्ञितः। अङ्गुलीगुल्फजठर-हृद्वक्षो गलसंश्रितः। स्नायुप्रतानमनिलो यदा क्षिपति वेगवान्। विष्ट-ब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन्। अभ्यन्तरं धनुरिव यदा नमति मानवम्। तदास्याभ्यान्तरायामं कुरुते मारुतो बली॥ तस्यैव भाष्यं वक्तुमाह। अङ्गुल्योऽत्र पादाङ्गुल्यः। गुल्फ पादयोरुपरिग्रन्थिः। जठर-मुदरं, हृत् हृदयं, वक्षः स्तनयोरन्तरालम्, गलः कण्ठः। एतेषु स्थानेषु संश्रितो वायुः, स्नायुप्रतानं स्नायुविस्तारम् ॥ १४ ॥

बहिरायामं निर्दिशन्नाह। बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च। तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम्॥ बाह्यस्नायुप्रतानस्थो बाह्यस्नायु-विस्तारस्थः, बाह्यस्नायवः पादमूलपिण्डिकाकटीपृष्ठग्रीवापश्चिमभागा-श्रयाः। वक्षःकट्यूरुभञ्जनमिति वक्षःकट्यूरुभञ्जनत्वस्येत्येतासाध्यत्वम्। अभग्नवक्षःकट्यादिकस्तु नर उपक्रम्य एव। तस्याक्षेपकस्य इतरा दोषस्य संसर्गेण निदानविशेषान् वायोः संख्याभेदं दर्शयन्नाह,—कफपित्तान्वितो

कुर्य्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम् ॥
गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः।
अभिघातनिमित्तश्च न सिद्ध्यत्यपतानकः ॥ १५ ॥
अधोगमाः सतिर्य्यग्गा धमनीरूर्द्ध्वदेहगाः।
यदा प्रकुपितोऽत्यर्थं मातरिश्वा प्रपद्यते ॥
तदान्यतरपक्षस्य सन्धिबन्धान् विमोक्षयन्।
हन्तिपक्षं तमाहुर्हि पक्षाघातं भिषग्वराः ॥

वायुर्व्वायुरेव च केवलः। कुर्य्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम्। एकः कफान्वितः, द्वितीयः पित्तान्वितः, तृतीयः केवलवातकृत्, चतुर्थोऽभिघातजः। चतुर्थमभिघातजमिति निदानविशेषात् दण्डापतानकादय एव, चतुर्थः पुनरभिघातज इति श्रीजेज्जड़ाचार्य्यस्तु तन्नेवेति गयदासाचार्य्यः, गर्भपातनादिभेदेन संख्यातिरेकात् श्रीब्रह्मदेवस्तु। आक्षेपकश्चतुर्धा—अपतानकः, संसृष्टाक्षेपकः, केवलाक्षेपकः, अभिघातजश्च। तत्रापतानकः सोपतानकेत्यादिना वक्षःकटुरुभञ्जनमिति पर्य्यन्तेनोक्तः। कफान्वितोवायुरिति संसृष्टाक्षेपकः। वायुरेव च केवल इति केवलाक्षेपकः। चतुर्थः पुनरभिघातज इत्याह तस्यैवाक्षेपकस्यापतानकसंज्ञां प्राप्तस्यासाध्यत्वं दर्शयन्नाह,—गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः। अभिघातनिमित्तश्च न सिद्ध्यत्यपतानकः। गर्भपातादिनिमित्तास्त्रयोऽप्यागन्तवोऽसाध्याः। यदि कथञ्चिदेव योगात् सिद्ध्यन्ति तदा वैकल्यं जनयन्ति ॥ १५ ॥

पक्षाघातमाह,—अधोगमाः सतिर्य्यग्गाधमनीरूर्द्ध्वदेहगाः। यदा प्रकुपितोऽत्यर्थं मातरिश्वा प्रपद्यते ॥ तदान्यतरपक्षस्य सन्धिबन्धान् विमोक्षयन्। हन्ति पक्षं तमाहुर्व्वै पक्षाघातं भिषग्वराः। यस्य कृत्स्नं शरीरार्द्धमकर्म्मण्यमचेतनम्। ततः पतत्यसून् वापि त्यजत्यनिलपीड़ितः ॥ अधोगमा इत्यादि। एकतरशरीराद् धमनीरूर्द्ध्वाधस्तिर्य्यग्गताः। यदा स मातरिश्वा वायुः प्रपद्यते आश्रयतीत्यर्थः। यदान्यतरपक्षस्यैकतरशरीरार्द्धस्य विमोक्षयन् विमोक्षयन् पक्षं शरीरार्द्धं हन्ति। यस्य कृत्स्नमित्यादि।

यस्य कृत्स्नं शरीरार्द्धमकर्म्मण्यमचेतनं।
ततः पतत्यसून् वापि जहात्यनिलपीड़ितः॥
शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः।
साध्यमन्येन संसृष्टमसाध्यं क्षयहेतुकं॥
वायुरूर्द्धं व्रजेत् स्थानात् कुपितो हृदयं शिरः।
शङ्खौ च पीड़यत्यङ्गान्याक्षिपेन्नमयेच्च सः॥
निमीलिताक्षो निश्चेष्टः स्तब्धाक्षो वापि कूजति।
निरुच्छ्वासोऽथवा कृच्छ्रादुच्छ्ः स्यान्नष्टचेतनः॥
स्वस्थः स्याद्धृदये मुक्ते आवृते च प्रमुह्यति।
कफान्वितेन वातेन ज्ञेय एषोऽपतन्त्रकः॥ १६॥
दिवास्वप्नासनं स्थानविकृतोर्द्धनिरीक्षणैः।

अकर्म्मण्यम् ईषत्कर्म्मक्षमम्। अचेतनमल्पचेतनत्वं यदा अकर्म्मण्यं भवति तदा पतति, यदाऽचेतनं भवति तदासून् प्राणान् परित्यजति। पक्षा-घातस्य साध्यासाध्यत्वं दर्शयन्नाह,—शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः। साध्यमन्येन संसृष्टमसाध्यं क्षयहेतुकम्। शुद्धः कफाद्यसंसृष्टः, अन्येन संसृष्टमितरदोषसम्बन्धम्॥ वायुरूर्द्धं व्रजेत् स्थानात् कुपितो हृदयं शिरः। शङ्खौ च पीड़यत्यङ्गान्याक्षिपेन्नमयेच्च सः॥ निमीलिताक्षो निश्चेष्टः स्तब्धाक्षो वापि कूजति। निरुच्छ्वासोऽथवा कृच्छ्रादुच्छ्ः स्यान्नष्टचेतनः। स्वस्थः स्यात् हृदयेमुक्ते प्रावृते च प्रमुह्यति॥ कफान्वितेन वातेन ज्ञेय एषोऽपतन्त्रकः। हृदयं शिरःशङ्खौ च पीड़यति। हृदयं कमलमुकुलाकारमधोमुखम्। भ्रुवोरन्ते कर्णललाटयोर्म्मध्ये शङ्खौ; अङ्गानि हस्तपादादीनि। आक्षिपेद् घातयेत्। कूजति कफवात इव शब्दं करोति अथवा कृच्छ्रादुच्छ्ः स्यादिति कष्टेनोच्छ्वासं कुर्य्यात्, केचिदपतन्त्रकममुं न पठन्ति। अपतन्त्रकापतान-कयोरैक्यात्॥ १६॥

मन्यास्तम्भमाह,—दिवास्वप्नासनं स्थानविकृतोर्द्धनिरीक्षणैः। मन्या-

मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणावृतः ॥
गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये ।
उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि वा ॥
हसतो जृम्भतो भाराद्विषमाच्छयनादपि ।
शिरोनासौष्ठचिबुकललाटेक्षणसन्धिगः ॥
अर्दयित्वाऽनिलो वक्त्रमर्दितं जनयत्यतः ।
वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते ॥
शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम् ।
ग्रीवाचिबुकदन्तानां तस्मिन् पार्श्वे तु वेदना ॥

स्तम्भं प्रकुरुते स एव श्लेष्मणावृतः ॥ आसनमुपवेशनं स्थानमूर्द्धीभवनम् । विकृतोर्द्धनिरीक्षणैः सङ्गावलोकनैः । स एव वायुः, मन्यास्तम्भं केचिदपतानकपूर्व्वरूपं मन्यन्ते । अर्द्दितमाह,—गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये । उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि वा । हसतो जृम्भतो भाराद्विषमाच्छयनादपि । अर्द्दयित्वाऽनिलो वक्त्रमर्द्दितं जनयत्यतः । वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते । शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम् । ग्रीवाचिबुकदन्तानां तस्मिन् पार्श्वे तु वेदना । सूतिका प्रसूता स्त्री । व्याहरतः शब्दं कुर्व्वतः, भाराद्विषमातत्वसत्वादपीति विषमाद्भारात् विषमात् श्वसनादित्यर्थः । अन्ये तु विषमाच्छयनादिति पठन्ति । अर्द्दयित्वा व्यथयित्वा । अपवर्त्तते वक्री भवति । वाक्सङ्गो वाचोऽनिर्गमः । नेत्रादीनामित्यादिशब्दात् भ्रूभङ्गाद्युपग्रहः । तस्मिन् पार्श्वे इति । यस्मिन् पार्श्वे ग्रीवादयो भवन्ति, चिबुकमुखकुहरस्याधोभागः । तस्य रूपमाह,—यस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलम् । वायुरूर्द्धं त्वचि स्वापो-स्तोदो मन्या हनुग्रहः ॥ तमर्द्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः । अग्रजः पूर्व्वभावी । आविलं समलं वायुरूर्द्धं प्रसर्पतीति शेषः । त्वचि स्वप्न त्वचः स्पर्शाज्ञानम् । तस्यासाध्यत्वमाह,—क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्त-

यस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलं।
वायुरूर्द्ध्वं त्वचि स्वापस्तोदो मन्याहनुग्रहः॥
तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः।
क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः॥
न सिध्यत्यर्दितं वाढ़ं त्रिवर्षं वेपनस्य च॥ १७॥
पार्ष्णीप्रत्यङ्गुलीनान्तु कण्डरा यानिलार्द्दिता॥
सक्थ्नोः क्षेपं निगृह्णीयाद्गृध्रसीति हि सा स्मृता।

भाषिणः। न सिध्यत्यर्द्दितं वाढ़ं त्रिवर्षं वेपनस्य च॥ अनिमिषाक्षस्य-स्तब्धाक्षस्य प्रसक्तं सततभाषिणः। पीड़िताव्यक्तपदभाषिणः। अन्ये तु प्रसक्तं व्यक्तभाषिणः इति पठन्ति, ससक्तं प्रकर्षेण लग्नमित्यर्थः। वाढ़मति-शयेन, सिध्यतीति सम्बन्धः। त्रिवर्षमिति सम्वत्सरत्रयान्वितम्। अन्ये तु नासाक्षिमुखस्राविणं त्रिवर्षमाहुः। वेपणस्य कम्पनशीलस्य, गर्भिणी-सूतिकावालवृद्धक्षीणेष्वसृक्क्षये इति अमुं पाठं श्रीजेज्जटादय आचार्य्या न पठन्ति। उच्चैर्व्याहरतोऽत्यर्थमित्यादौ कृत्वा, पठन्ति वहुवैद्यपठितत्वात् अस्माभिः पठितः॥ १७॥

गृध्रसीमाह,—पार्ष्णिप्रत्यङ्गुलीनां तु कुण्डरा यानिलार्दिता। सक्थ्नोः क्षेपं निगृह्णीयाद् गृध्रसीति हि सा स्मृता। या कण्डरा सक्थ्नोः क्षेपं निगृह्णीयात् गृध्रसीति हि सा स्मृतेति सम्बन्धः। पार्ष्णी गुल्फस्य पार्श्व-स्याधो भागः। प्रत्यङ्गुलेरङ्गुल्य एव। एतेनोपर्य्यधोभागगतः कण्डराद्वयं गृह्यते। कण्डरा महास्नायुगुल्फादितयान्तर्मस्थिक्षेपः। प्रसारणं निगृह्णी-यात् रुन्ध्यादित्यर्थः। गृध्रसी रन्ध्रिणीति लोके। सा च वातात् वात-कफाच्च। खञ्जनवातेन सातिशयव्यथा गृध्रस्याम्। केचित् पार्ष्णिप्रत्य-ङ्गुलीनामिति द्वितीयान्तं पठन्ति। तत्रापि पार्ष्णीं लक्षीकृत्य या कण्डरा अङ्गुलीनाञ्च या कण्डरा इति कण्डराद्वयं गृध्रसीसदृशमेकवाहुगतां विश्वची-माह। तत्रं प्रत्यङ्गुलीनान्तु कण्डरा वाहुपृष्ठतः। वाह्वोः कर्म्मक्षयकरी विश्वचीति हि सा स्मृता। तत्रशब्दोऽयमुपरि वर्त्तते तेन करस्याभ्यन्तरं

तलं प्रत्यङ्गुलीनान्तु कण्डरा बाहुपृष्ठतः॥
बाह्वोःकर्म्मक्षयकरी विश्वचीति हि सा स्मृता॥ १८॥
वातशोणितजः शोफो जानुमध्ये महारुजः।
शिरः क्रोष्टुकपूर्व्वन्तु स्थूलं क्रोष्टुकमूर्द्धवत्॥ १९॥
वायुः कट्यां स्थितः सक्थ्नः कण्डरामाक्षिपेद्यदा।
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्व्वधात्॥
प्रक्रामन् वेपते यस्तु खञ्जन्निव च गच्छति।
कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम्॥

कण्डरा गृहीता, बाहुपृष्ठत इत्यनेन बाह्यकण्डरा गृहीता, बाह्वो द्विवचनं सामान्याक्षेपया कदाचित् कस्मिंश्च बाह्वौ भवति। अनिलार्द्दितेति अत्रापि सम्बध्यते। चकारोऽत्र गृध्रसीविश्वच्यां नामान्तरमनुक्तमन्वभिधानं समुच्चिणोति, अन्ये त्वत्रापि तलं प्रत्यङ्गुलीनामिति पूर्व्ववद् द्वितीयान्तं पठन्ति, तलं लक्षीकृत्य वा कण्डरा बाहुपृष्ठतश्च या कण्डरा इति कण्डराद्वयं गृह्यते॥ १८॥

क्रोष्टुकशिर आह,—वातशोणितजः शोफो जानुमध्ये महारुजः। शिरः क्रोष्टुकपूर्व्वन्तु स्थूलं क्रोष्टुकमूर्द्धवत्। यो जानुमध्ये वातशोणितजमहारुजं शोफेण भवति तत् क्रोष्टुकमूर्द्धवत् स्थूलशिरो ज्ञेयम्। वातशोणितज इति वातशोणिताभ्यां जातो वातशोणितजान् वातरक्तेन व्याधिना जनिता। अन्ये तु वातेन शोणितेन जात इति नेच्छन्ति, किन्तर्हि वातरक्तज इति रोगकारणमेव रोगमिच्छन्ति, शिरः क्रोष्टुपूर्व्वमिति क्रोष्टुकशब्दः पूर्व्वशिरः। तस्य रोगस्य क्रोष्टुशिर इति नामेत्यर्थः। क्रोष्टुकमूर्द्धवत् शृगालमस्तकवत्॥ १९॥

खञ्जपङ्गुवातावाह,—वायुः कट्यां स्थितः सक्थ्नः कण्डरामाक्षिपेद् यदा। खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्व्वधात्॥ आक्षिपेदिति ईषत् क्षिपेत्। खञ्जो विकलगतेर्दर्शनात्, सक्थ्नोर्द्वयोर्व्वधादिति सर्व्वथागतिविघात् पङ्गुरित्यर्थः। द्वयोरपि शौनकतन्त्रप्रसङ्गात् युगपत् सन्धिद्वयवधा-

न्यस्ते तु विषमे पादे रुजः कुर्य्यात् समीरणः।
वातकण्टक इत्येष विज्ञेयः खुड़काश्रितः॥
पादयोः कुरुते दाहं पित्तासृक्‌सहितोऽनिलः।
विशेषतश्चंक्रमतः पाददाहं तमादिशेत्॥
हृष्यतश्चरणौ यस्य भवतश्च प्रसुप्तवत्।
पादहर्षः स विज्ञेयः कफवातप्रकोपजः॥ २०॥
अंसदेशस्थितो वायुः शोषयित्वांसवन्धनम्।
शिरास्वाकुञ्च्य तत्रस्थो जनयत्यववाहुकम्॥
यदा शब्दवहं स्रोतो वायुरावृत्य तिष्ठति।
शुद्धः श्लेष्मान्वितो वापि वाधिर्य्यं तेन जायते॥

दित्यर्थः। कलायखञ्जमाह,—प्रक्रामन् वेपते यस्तु खञ्जन्निव च गच्छति। कलायखञ्जं तं विद्यात् मुक्तसन्धिप्रवन्धनम्॥ प्रक्रामन् पादविभ्रमं कुर्व्वन् गमनारम्भ एव वेपते कलायखञ्ज इत्ययं खञ्जाद् विशेषः। मुक्तसन्धिप्रवन्धनमिति शिथिलसम्बन्धमित्यर्थः। वातकण्टकमाह,—न्यस्ते तु विषमे पादे इति विषमस्थाने निक्षिप्तपादे इत्यर्थः। खुड़काश्रित इति पादजङ्घासन्धिसंश्रय इत्यर्थः। पार्ष्णिस्थित इत्यन्ये। पाददाहमाह,—पादयोः कुरुते दाहं पित्तासृक्‌सहितोऽनिलः। विशेषतश्चंक्रमतः पाददाहं तमादिशेत्॥ विशेषतश्चंक्रमतः विशेषेण गच्छतः। तिष्ठतस्तु सामान्येन। पादहर्षमाह,—हृष्यतश्चरणौ यस्य भवतश्च प्रसुप्तवत्। पादहर्षः स विज्ञेयः कफवातप्रकोपजः॥ हृष्यत इति हर्षो रोमाञ्चप्रायो वेदनाविशेषोऽन्तःशीतकरः, भवतश्च प्रसुप्तवदिति स्पर्शाज्ञानात् सुप्ताविव भवन्त इत्यर्थः॥ २०॥

अंसशोषाववबाहुकावाह,—अंसदेशस्थितो वायुः शोषयित्वांसवन्धनम्। शिराश्चाकुञ्च्य तत्रस्थोजनयत्यववाहुकम्॥ अंससमीपोपलक्षितोदेशोऽंसदेशः, अंसो वाहुशिरः अंशवन्धनम् श्लेष्माणमित्यर्थः। अंसवन्धनं शोषयित्वा अंसशोषं रोगं करोतीति वाक्यशेषो ज्ञेयः। तत्रस्थोऽंसदेशस्थित

हनुशङ्खशिरोग्रीवं यस्य भिन्दन्निवानिलः।
कर्णयोः कुरुते शूलं कर्णशूलं तदुच्यते॥
आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान्मूकमिन्मिणगद्गदान्॥
अधो या वेदना याति वर्च्चोमूत्राशयोत्थिता।
भिन्दन्तीव गुदोपस्थं सा तूणीत्युपदिश्यते॥
गुदोपस्थोत्थिता सैव प्रतिलोमविसर्प्पिणी।
वेगैः पक्वाशयं याति प्रतितूणी तु सा स्मृता॥ २१॥
साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्।
आध्मानमिति जानीयाद्घोरं वातनिरोधजम्॥

इत्यर्थः। बाधीर्य्यमाह,—यदा शब्दवहं स्रोतो वायुरावृत्य तिष्ठति। शुद्धः श्लेष्मान्वितो वापिबाधीर्य्यं तेन जायते॥ शुद्धः केवलः, अपिशब्दाद् रक्तपित्तावरणयोरुपग्रहः। यद्यप्ययं व्याधिः शालक्येऽपि पठ्यते तथाप्यत्रापि पठनीयः। वृद्धसम्मतत्वात्। जिह्वागतवातरोगं दर्शयन्नाह,—आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः। नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्॥ आवृत्यावरुध्येत्यर्थः। मूको वचनरहितः, मिन्मिनः सानुनासिकवाक्, गद्गदोऽव्यक्तवाक्। कर्णशूलमाह,—हनुशङ्खशिरोग्रीवं यस्य भिन्दन्निवानिलः। कर्णयोः कुरुते शूलं कर्णशूलं तदुच्यते॥ तूनीवातमाह,—अधो या वेदना याति वर्चोमूत्राशयोत्थिता। भिन्दतीव गुदोपस्थमिति भेदं कुर्व्वतीव गुदोपस्थस्येत्यर्थः॥ गुदोपस्थस्थिता सैव प्रतिलोमविसर्प्पीणी। वेगैः पक्वाशयं यान्ति प्रतितूणीति हि सा स्मृता॥ प्रतिलोमविसर्प्पिणी अध उत्थितोर्द्ध्वगामिनी। वेगैरिति वेदनावेगैर्मुहुर्मुहुः स्वभावोपशमोपलक्षितैः प्रतिलोमप्रधावति इति केचित्॥ २१॥

आध्मानमाह,—साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्। आध्मानमिति जानीयाद घोरं वातनिरोधजम्॥ आटोपं सञ्चलनं तेन सह वर्त्तते

विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम्।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्॥
अष्ठीलावद्घनं ग्रन्थिमूर्द्ध्वमायतमुन्नतम्।
वाताष्ठीलां विजानीयाद्वहिर्म्मार्गावरोधिनीं॥
एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीं।
प्रत्यष्ठीलामिति वदेज्जठरे तिर्य्यगुत्थिताम्॥ २२॥

इति सौश्रुतनिदानस्थाने प्रथमोऽध्यायः॥

इति साटोपं, उदरमत्र पक्वाशयः, घोरं कष्टकारि। प्रत्याध्मानमाह,—विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम्। प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्॥ तदेवतमेव। आमाशयोत्थितं नाभिस्तनान्तरोत्थितं, अत एव हृदयपार्श्वयोरप्यधिष्ठानमस्य प्राप्तं निरस्यन्नाह,—विमुक्तपार्श्वहृदयमिति व्याकुलित आवृतः। वाताष्ठीलामाह,—अष्ठीलावत् घनं ग्रन्थिमूर्द्ध्वमायतमुन्नतम्। वाताष्ठीलां विजानीयात् वहिर्म्मार्गावरोधिनीम्॥ अष्ठीला उत्तरा यथा दीर्घवर्त्तुलपाषाणविशेष इत्येके। चर्म्मकाराणां वर्त्तुलदीर्घलोहो। भाण्डिरित्यपरे। घनः संहतावयवः। आयतो दीर्घः, वहिर्म्मार्गाणि वातविण्मूत्राणि। अन्ये अत्र नाभेरधस्तात् सञ्जातं चलं वा यदि वाऽचलमिति पठन्त्येव॥ ऊर्द्ध्वप्रत्यष्ठीलामाह,—एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीम्। प्रत्यष्ठीलामिति वदेज्जठरे तिर्य्यगुत्थिताम्॥ एतामेवाष्ठीलां तिर्य्यगुत्थितत्वेनाष्ठीलायाः सकाशात् प्रत्यष्ठीलाया भेदः। अस्याऽग्रे केचिदुरुस्तम्भं पठन्ति तन्न चिकित्सायां पठिष्यमाणत्वात्॥ २२॥

इति निबन्धसंग्रहे निदानस्थाने प्रथमोऽध्यायः।

———

द्वितीयोऽध्यायः ।

अथातोऽर्शसां निदानं व्याख्यास्यामः ।

षडर्शांसि भवन्ति वातपित्तकफशोणितसन्निपातैः सहजानि चेति । तत्रानात्मवतां यथोक्तैः प्रकोपणैर्व्विरुद्धाध्यशनस्त्रीप्रसङ्गोत्कुटकासनपृष्ठयानवेगविधारणादिभिर्व्विशेषैः प्रकुपिता दोषा एकशो द्विशः समस्ताः शोणित-सहिता वा यथोक्तं प्रसृताः प्रधानधमनीरनुप्रपद्याधोगत्वा गुदमागम्य प्रदूष्य वली-

अथातोऽर्शसां निदानं व्याख्यास्यामः। निदानं हेतुलक्षणनिर्देशः। षडर्शांसि भवन्ति वातपित्तकफशोणितसन्निपातैः सहजानि चेति॥ ननु वातादीनित्यनेनैव षट्संख्याया लब्धत्वात् कथं षड़िति संख्यानिर्देशः? उच्यते—द्विदोषजनितः शोणितपरिहारार्थः। यद्यपि शोणिताधिष्ठाना वातादय रक्तार्शसामारम्भकास्तथाप्युपचारात् शोणितजानीत्युच्यन्ते। यथा घृताधिष्ठानेनाग्निना दग्धाच तदर्श इत्युच्यते। अर्शसां हेतुन् सम्प्राप्तिञ्च दर्शयन्नाह। तत्रानात्मवतां यथोक्तप्रकोपैर्व्विरुद्धाध्यसनस्त्रीप्रसङ्गोत्कुटुकासनपृष्ठयानवेगावधारणादिभिर्व्विशेषैः प्रकुपितादोषाः। एकशो वा द्विशः समस्ता शोणितसहिता वा यथोक्तं प्रसृताः, प्रधानधमनी तु प्रपद्याधो गत्वा गुदमागम्य प्रदूष्य गुदवलीमांसप्ररोहान् जनयन्ति। विशेषतो मन्दाग्नेः प्रकुपिता दोषा मांसान् जनयन्तीति सम्बन्धः। अनात्मवतां अजितेन्द्रियाणां, यथोक्तैः प्रकोपणैः बलविद्विग्रहादिक्रोधशोकदिवास्वप्नादिविरुद्धं बहुधा हिताहितीयोक्तम्। स्त्रीप्रसङ्ग इत्यत्र प्रसङ्गत्वेन अत्यन्तशक्तिः, प्रतिपाद्यते गुदपार्ष्णिसमयोगः प्राडुक्तत्कुटुकासनम्। उगड़ इति लोके। अर्शादीनां पृष्ठतया निर्व्वेगविधारणादिशब्देन वातविण्मूत्रादीनां धारणं, विरुद्धासनशब्देन गुरुशीताभिष्यन्दिविदाह्यसात्म्यप्रमिताशनादीनि गृह्यन्ते, विशेषै-

मांस-प्ररोहान् जनयन्ति। विशेषतो मन्दाग्नेस्तथा तृणकाष्ठोपललोष्ट्रवस्त्रादिभिः शीतोदकसंस्पर्शनाद्वा कन्दाः परिवृद्धिमासादयन्ति तान्यर्शांसीत्याचक्षते। तत्र स्थूलान्त्रप्रतिवद्धमर्द्धपञ्चाङ्गुलं गुदमाहुस्तस्मिन् वलयस्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी विसर्ज्जनी सम्बरणी चेति चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः।

शङ्खावर्त्तनिभाश्चापि उपर्य्युपरिसंस्थिताः।
गजतालुनिभाश्चापि वर्णतः संप्रकीर्त्तिताः।

भेदैः। तेषां निदानमभिधाय सम्प्राप्तिमाह,—यथोक्तमित्यादि। प्रसृता इति क्लिन्नोदकपृष्ठसमवाय इवोद्रिक्तानां प्रसवो भवतीत्यादि च क्रमेण प्रसृताः। प्रधानधमनीः पुरीषवाहिनीरनुश्चाप्रपद्य प्राह गुदवलिरिति। वलित्वक्सङ्कोचः, मन्दाग्नेः विशेषतोऽतिशयेन मांसप्ररोहान् जनयतीति सम्बन्धः। तथा तृणकाष्ठोपललोष्ट्रवस्त्रादिभिः शीतोदकसंस्पर्शनाद् वा परिवृद्धिमासादयन्ति। तान्यर्शांसीत्याचक्षते। परिवृद्धिमासादयन्ति प्राप्नुवन्तीत्यर्थः। आचक्षत इति पूर्व्वाचार्य्या इत्यध्याहारः। इदानीं गुदं गुदवलिञ्च विवृण्वन्नाह,—तत्र स्थूलान्त्र प्रतिवद्धमर्द्धपञ्चाङ्गुलं गुदमाहुः। तस्मिन् वलयस्तिस्रोऽध्यर्द्धाङ्गुलसम्मिताः। प्रवाहणी विसर्ज्जनी सम्बरणी चेति। चतुरङ्गुलायतः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः। शङ्खावर्त्तनिभाश्चापि उपर्य्युपरिसंस्थिताः। गजतालूनिभाश्चापि वर्णतः सम्प्रकीर्त्तिताः॥ स्थूलान्त्रं इहान्त्रं गुदान्त्रमिति प्रसिद्धम्। अर्द्धपञ्चाङ्गुलमिति। अर्द्धपञ्चममङ्गुलं यस्मिन् तत् तथा। एतेन सार्द्धचतुरङ्गुलप्रमाणं गुदमित्यर्थः। अध्यर्द्धाङ्गुलसम्भूता इति सार्द्धैकाङ्गुलान्तरसञ्जाता। तत्रोपरितनं वलिद्वयं शङ्खावर्त्तनिभं प्रत्येकमन्तरेण सह सार्द्धैकाङ्गुलप्रथमानुवलिरन्तरेण विना एकाङ्गुलो ब्रूयात्। अर्द्धाङ्गुलस्तु गुदोष्ठः सद्दशं वोद्धव्यम्। अतएव प्रथमानुगुदोष्ठद्व्यङ्गुलमात्र इत्यग्रे वक्ष्यति। तासां नामान्याह प्रवाहणीत्यादि। प्रवहतीति प्रवा-

रोमान्तेभ्यो यवाध्यर्द्धो गुदौष्ठः परिकीर्त्तितः ॥ २ ॥

प्रथमा तु गुदौष्ठादङ्गुलमात्रे । तेषान्तु भविष्यतां पूर्व्वरूपाण्यन्ने न श्रद्धा कृच्छ्रात्पक्तिरम्लीका सक्थिसदनमाटोपः कार्श्यमुद्गारबाहुल्यमक्ष्णोश्च श्वयथुः अन्त्रकूजनं गुदपरिकर्त्तनमाशङ्का पाण्डुरोगग्रहणीदोषशोषाणां कासश्वासौ बलहानि भ्रमस्तन्द्रानिद्रेन्द्रियदौर्व्बल्यञ्च जातेष्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति ॥ ३ ॥

तत्र मारुतात् परिशुष्कारुणविवर्णानि विषममध्यानि कदम्बपुष्प तुण्डिकेरी नाड़ीमुख सूचीमुखाकृतीनि च भवन्ति। तैरु-

हणी, विसृजतीति विसर्ज्जनी । संवृणोतीति सम्वरणी । गुदौष्टप्रमाणमाहारो । रोमान्तेभ्यो यवाध्यर्द्धो गुदौष्टपरिकीर्त्तितः । रोमान्तरेभ्यो रोमप्रान्तेभ्यः । रोममालिकायाः यवाध्यर्द्धः सार्द्धयव । अर्द्धाङ्गुलप्रमाण इत्यर्थः । अङ्गुलस्य त्रियवप्रमाणत्वात् ॥ २ ॥

प्रथमा वलिर्गुदौष्टात् कियत् दूरे भवतीत्याह । प्रथमातुगुदौष्टादाङ्गुलमात्रे प्रथमा वलिरिति शेषः । तेषान्तु भविष्यतां पूर्व्वरूपाणि अन्ने न श्रद्धा कृच्छ्रात् पक्तिरम्लीका परिदाहः । सक्थिसदनमाटोपः कार्श्यमुद्गारबाहुल्यमक्ष्णोश्च श्वयथुरन्त्रकूजनम् । गुदपरिकर्त्तनमाशङ्का पाण्डुरोगग्रहणीदोषशोषाणां कासश्वासौ बलहानि भ्रमस्तन्द्रा निन्द्रा इन्द्रियदौर्व्बल्यञ्च, भविष्यताम् भवितुकामानां, अम्लीका अम्लोद्गारः, सक्थिसदनं ऊरुग्लानिः । स्फुटनमिवेत्येके, आटोप आध्मानपाण्डुरोगादीनां आशङ्का विकल्पः । कासश्वासौ भ्रमस्तन्द्रा निद्रा इन्द्रियदौर्व्बल्यञ्च जायते इति शेषः । तेषां सामान्यरूपमाह जातेष्वेतान्येव लक्षणानि प्रव्यक्ततराणि भवन्ति एतानि पूर्व्वोक्तानि ॥ ३ ॥

विशिष्टरूपमाह तत्र मारुतात् परिशुष्कारुणविवर्णानि विषममध्यानि कदम्बपुष्प तुण्डिकेरी नाड़ीमुखाकृतीनि च भवन्ति । तैरुपद्रुतः सशूलं

पहतः सशूलं संहतमुपवेश्यते कटीपृष्ठपार्श्वमेढ्रगुदनाभिप्रदेशेषु चास्यवेदना गुल्माष्ठीलाप्लीहोदराणि चास्य तन्निमित्तान्येव भवन्ति कृष्णत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति ॥ ४ ॥

पित्तान्नीलाग्राणि तनूनि विसर्प्पीणि पीतावभासानि यकृत्प्रकाशानि शुकजिह्वासंस्थानानि यवमध्यानि जलौकोवक्त्रसदृशानि प्रक्लिन्नानि च भवन्ति। तैरुपहतः सदाहं सरुधिरमतिसार्य्यते ज्वरदाहपिपासामूर्च्छाश्वासोपद्रवा भवन्ति पीतत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति ॥ ५ ॥

संहतमुपवेश्यते। कटीपृष्ठपार्श्वमेढ्रगुदनाभिप्रदेशेषु चास्य वेदना भवति गुल्माष्ठीलाप्लीहोदराणि चास्य तन्निमित्तान्येव भवन्ति। कृष्णत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति। परिशुष्काणि अनास्रावाणि, अरुणानि ईषद्रक्तानि, विवर्णानि विविधवर्णानि, विषममध्यानि निम्नोन्नतमध्यानि, केचिदत्र विषमश्यामानीति पठन्ति व्याख्यानयन्ति च, विषमानि निम्नोन्नतत्वेन, श्यामानि दग्धेष्टकादिवसुवर्णानि। तुण्डिकेरी वनकार्पासिका तत्पुष्पाकृतीनि। अन्येत्वत्र पुण्डिकेरीनाड़ीमुकुलशुचीमुखसदृशानीति भवतीति पठन्ति व्याख्यानयन्ति च। तुण्डिकेरी विवितस्या नाड़ीनालिका। मुकुलं पुष्पमुकुलं, सूची सेवनद्रव्यम्। एषां मुखसदृत्तानि भवन्ति। उपद्रुतोऽभिभूतः, संहतं घनम्। उपवेश्यते विट्संसर्गकार्य्यते। गुल्मादीनि चास्य तन्निमित्तानीत्युपद्रवकथनं॥ ४॥

पित्तान्नीलाग्राणि तनूनि विसर्पीणि पीतावभासानि यकृत्प्रकाशानि शुष्कजिह्वासंस्थानानि यवमध्यानि जलौकोवक्त्रसदृशानि प्रक्लिन्नानि च भवन्ति। तैरुपद्रुतः सदाहं सरुधिरमतिसार्य्यते। ज्वरदाहपिपासामूर्च्छाश्वासोपद्रवा भवन्ति। पीतत्वङ्नखनयनवदनदशनमूत्रपुरीषश्च पुरुषो

श्लेष्मजानि श्वेतानि महामूलानि स्थिराणि वृत्तानि स्निग्धानि पाण्डूनि करीरपनसास्थिगोस्तनाकाराणि न भिद्यन्ते न स्रवन्ति कण्डूवहुलानि च भवन्ति तैरुपहत: सश्लेष्माणमनल्पं मांसधावनप्रकाशमतिसार्य्यते शोफशीतज्वरारोचकाविपाकशिरोगौरवाणि चास्य तन्निमित्तान्येव भवन्ति। शुक्लत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति ॥ ६ ॥

रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तलक्षणानि च यदावगाढ़पुरीषप्रपीड़ितानि भवन्ति तदात्यर्थं दुष्टमनल्पमसृक्सहसा विसृजन्ति तस्यैवातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति। सन्निपातजानि सर्व्वदोषलक्षणायुक्तानि ॥ ७ ॥

भवति। विसर्पीणि प्रसरणशीलानि, संस्थानमाकार:, मध्यानीति पीतमध्यानि, मूलाग्रेण तनूनि, प्रक्लिन्नानि क्लेदस्रावीणि ॥ ५ ॥

श्लेष्मजानि श्वेतानि महामूलानि स्थिराणि वृत्तानि स्निग्धानि पाण्डूनि करीरपनसास्थिगोस्तनाकाराणि न भिद्यन्ते न स्रवन्ति। कण्डुवहुलानि च भवन्ति तैरुपद्रुत: सश्लेष्माणमनल्पं मांसधावनप्रकाशमतिसार्य्यते शोफशीतज्वरारोचकाविपाक शिरोगौरवाणि चास्य तन्निमित्तान्येव भवन्ति। शुक्लत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति। स्थिराणि कठिनानि, पाण्डूनि धूसराणि। करीरो ममरुदेशातिप्रसिद्धो वृक्षविकलतिकाफलसदृशानि ॥ ६ ॥

रक्तजानीति यदावगाढ़पुरीषप्रपीड़ितानि भवन्ति तदात्यर्थं दुष्टमुष्णमनल्पमसृक् सहसा विसृजन्ति। तस्य चातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति। तदात्यर्थं दुष्टमुष्णमनल्पमसृक् सहसा विसृजन्ति तस्य चातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति। न्यग्रोधप्ररोहो वटप्ररोह:, विद्रुम: प्रवाल:। काकणन्तिका गुञ्जा चिरिहिटीकेति लोके। काकादनीत्यपरे। चकारोऽनु-

सहजानि दुष्टशोणितशुक्रनिमित्तानि तेषां दोषत एव प्रसाधनं कर्त्तव्यं । विशेषतश्चात्र दुर्द्दर्शनानि परुषाणि पाण्डूनि दारुणान्यन्तर्मुखानि तैरुपद्रुत: कृशोऽल्पभुक् सिरासन्तत-गात्रोऽल्पप्रज:चीणरेता: चामस्वर: क्रोधनोऽल्पाग्निर्घ्राणशिरो-ऽक्षिश्रवणरोगवान् सततमन्त्रकूजाटोपहृदयोपलेपारोचकप्रभृ-तिभि: पीड्यते ॥ ८ ॥

भवति चात्र ।

वाह्यमध्यवलिस्थानं प्रतिकुर्य्याद्भिषग्वर: ।
अन्तर्व्वलिसमुत्थानां प्रत्याख्यायाचरेत् क्रियाम् ॥

वन्धभूतवातकफरूपमुक्तामपि समुच्चिनोति । शोणितातियोगोपद्रवा: आक्षेप-कादय:, सन्निपातजानि सर्व्वदोषलचणयुक्तानि । सर्व्वेषामेषां योनि-लचणानि स्वभावकार्य्यभूतानि तथेति ॥ ७ ॥

शरीरेण सह जातामेनां अर्शसां दोषेभ्यो भिन्नहेतुं दर्शयन्नाह,—सह-जानि दुष्टशोणितनिमित्तानि । तेषां दोषत एव प्रसाधनं कार्य्यं विशेषतश्चात्र दुर्द्दर्शनानि परुषाणि पाण्डूनि दारुणान्यन्तर्मुखानि च तैरुपद्रुत:। कृशोऽल्प-भुक् सिरासन्ततगात्रोऽल्पप्रज: चीणरेता: । चामस्वर: क्रोधनोऽल्पाग्नि घ्राण शिरोऽक्षि श्रवणरोगी सततमन्त्रकुजाटोपहृदयप्रलेपारोचकप्रभृतिभि: पीड्यते । दुष्टशुक्रशोणितनिमित्तानि गर्भारम्भकमात्रवीजं दुष्टं न सर्व्वदुष्टत्वे हि प्रजोत्पत्तिरेव न स्यात् । तेषां दोषत एव प्रसाधनं कर्त्तव्यमिति । येन दोषेण यत् शुक्रशोणितदूषितसम्भवेत् । तस्य दोषलचणोदीर्णवेदना-कृति:प्रसाधनं विज्ञानमित्येके । अन्येतु दोषत इति दोषलिङ्गं समीक्ष्य प्रसाधनं चिकित्सेत्याहु: । दुर्द्दर्शनानीति दु:खेन दृश्यन्ते । अन्तर्व्विद्रधि-वदित्यर्थ: । पाण्डूनि धूसराणि, दारुणानि अतिदु:खकराणि ॥ ८ ॥

साध्यत्वं दर्शयन्नाह,—भवति चात्र । वाह्यमध्यवलिस्थानं प्रति-कुर्य्याद्भिषग्वर: । अन्तर्व्वलिसमुत्थानां प्रत्याख्यायाचारेत् क्रियाम् । अन्त-

प्रकुपितास्तु दोषा मेढ्रमभिप्रपन्नो मांसशोणिते प्रदूष्य कण्डूं जनयन्ति, तत् कण्डूयनात् क्षतं समुपजायते तस्मिंश्च क्षते दुष्टमांसजाः प्ररोहाः पिच्छिलरुधिरस्राविणो जायन्ते, कूर्च्चकिनोऽभ्यन्तरमुपरिष्टाद्वा ते तु शेफो विनाशयन्त्युपघ्नन्ति च पुंस्त्वम्, योनिमभिप्रपन्नाः सुकुमारान् दुर्गन्धान् पिच्छिलरुधिरस्राविणश्छत्राकारान् करीरान् जनयन्ति, त एवोर्द्ध्वमागताः श्रोत्राक्षिघ्राणवदनेष्वर्शांस्युपनिर्व्वर्त्तयन्ति। तत्र कर्णजेषु वाधिर्य्यं शूलं पूतिकर्णता च। नेत्रजेषु वर्त्मावरोधो वेदनास्रावो दर्शननाशश्च। घ्राणजेषु प्रतिश्यायोऽतिमात्रं क्षवथुः कृच्छ्रोच्छ्वासता पूतिनस्यं सानुनासिकवाक्यत्वं शिरोदुःखञ्च।

र्व्वलिरभ्यन्तरवलिः प्रत्याख्याय असाध्यान्येतान्यर्शांसीति निराकृत्य। मेढ्रादिष्वर्शांस्याह। प्रकुपितास्तु दोषा मेढ्रमभिप्रपन्नो। मांसशोणिते प्रदूष्य कण्डूं जनयन्ति, तत् कण्डूयनात् क्षतमुपजायते। तस्मिंस्तु क्षते दुष्टमांसजाः प्ररोहा पिच्छिलरुधिरस्राविणो जायन्ते कुर्चकिनोऽभ्यन्तरमुपरिष्टाद्वा ते तु शोफो विनाशयन्ति। उपघ्नन्ति च पुंस्त्वम्। अभिप्रपन्ना आश्रिता, कूर्चकिनं सूक्ष्मदीर्घांकुरसन्तानि च। अभ्यन्तरमिति मणौ। उपरिष्टादिति वाह्यचर्म्मणि, पुंस्त्वं शुक्रं। योनिमभिप्रपन्ना सुकुमारान् दुर्गन्धान् पिच्छिलरुधिरस्राविणः छत्राकारान् करीरान् जणयन्ति ते तु योनिमुपघ्नन्त्यातुरञ्च। अभिप्रपन्ना दोषा इति सम्बन्धः। करीरान् योनिमभिप्रपन्ना सुकुमारान् दुर्गन्धान् पिच्छिलान् गण्डपदमुखसदृशान् जनयन्ति दोषा इत्यर्थः। उपनिवर्त्तयन्ति जनयन्तीत्यर्थः। तत्र कर्णजेषु वाधिर्य्यं शूलं पूतिकर्णता च। नेत्रजेषु वर्त्मावरोधोवेदनास्रावो दर्शननाशश्च। वर्त्मनिरोध इति वर्त्म अक्षिकूटः। घ्राणजेषु प्रतिश्यायोऽतिमात्र क्षवथुः, कृच्छ्रोच्छ्वासतासानुनासिकवाक्यत्वं शिरोदुःखञ्च। क्षवथुः छिक्का, वक्त्रजेषु कण्ठौष्ठतालूनामन्यतमस्मिंस्तेर्गद्‌गद्‌वाक्यता रसाज्ञानं मुखरोगाश्च भवन्ति। अन्यतमस्मिन्

वङ्क्षणजेषु कण्ठौष्ठतालूनामन्यतमस्मिंस्तैर्गद्गदवाक्यता रसाज्ञानं मुखरोगाश्च भवन्ति। व्यानस्तु प्रकुपितः श्लेष्माणं परिगृह्य वहिःस्थिराणि कीलवदर्शांसि निर्व्वर्त्तयन्ति तानि चर्म्मकीलान्यर्शांसीत्याचक्षते ॥ ८ ॥

भवन्ति चात्र।

तेषु कीलेषु निस्तोदो मारुतेनोपजायते।
श्लेष्मणा तु सवर्णत्वं ग्रन्थित्वञ्च विनिर्द्दिशेत् ॥
पित्तशोणितजं रौक्ष्यं कृष्णत्वं शुक्लता तथा।
समुदीर्णखरत्वञ्च चर्म्मकीलस्य लक्षणं ॥

एकतमस्मिन् उत्पत्तेष्वर्शःसु इति शेषः। त्वगाधिष्ठानमेव चर्म्मकीलाख्यमर्शो दर्शयन्नाह,—व्यानस्तु प्रकुपितः श्लेष्माणं परिगृह्य वहिःस्थिराणि चर्म्मकीलवदर्शांसि निर्व्वर्त्तयन्ति। तानि चर्म्मकीलान्यर्शांसीत्याचक्ष्यते। वहिरिति गुदौष्ठाद् वहिः, वहिःशब्देनान्यत्रापीति कथयन्ति। कीलवत् शङ्कुतुल्यानीत्यर्थः ॥ ८ ॥

तेषां चर्म्मकीलानां दोषलिङ्गमाह,—भवन्ति चात्र। तेषु कीलेषु निस्तोदो मारुतेनोपजायते। श्लेष्मणा तु सवर्णत्वं ग्रन्थित्वञ्च विनिर्द्दिशेत्। पित्तशोणितजं रौक्ष्यं शुक्लत्वं कृष्णता तथा। समुदीर्णखरत्वञ्च चर्म्मकीलस्य लक्षणम्। सवर्णत्वमिति श्लेष्मणः समानवर्णमित्यर्थः। ग्रन्थित्वं ग्रन्थिभावः। पित्तेत्यादि तेषु चर्म्मकीलेषु रौक्ष्यमित्यादि शोणितजं विनिर्द्दिशेत्, समुदीर्णं खरत्वं अतीवकठिनत्वं, चर्म्मकीलस्य लक्षणमिति एतद्वातादिदोषतश्चर्म्मकीलस्य लक्षणमुक्तम्। केचिच्चर्म्मकीलानां दोषलिङ्गं न पठन्ति। इदानीं सर्व्वेषामेव मेढ्रादिजानां वातादिलक्षणमतिदेशेन निर्द्दिशन्नाह,—अर्शसां लक्षणं व्यासादुक्तं सामान्यतस्तु यत्तत् सर्व्वं प्राग्विनिर्द्दिष्टात् साधयेद्भिषजाम्बर। अर्शसां मेढ्रादिजानां वातादिलक्षणं विना यत् सङ्क्षेपलक्षणमुक्तं तत् सर्व्वं साधयेज्जानीयात् कस्मादित्याह,—प्राग्वि-

अर्शसां लक्षणं व्यासादुक्तं सामान्यतस्तु यत्।
तत्सर्व्वं प्राग्विनिर्द्दिष्टात्साधयेद्भिषजाम्वरः॥
अर्शःसु दृश्यते रूपं यदा दोषद्वयस्य तु।
संसर्गं तं विजानीयात् संसर्गः स च षड्विधः॥ १० ॥
त्रिदोषाण्यल्पलिङ्गानि याप्यानि तु विनिर्द्दिशेत्।
द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च॥
कृच्छ्रसाध्यानि तान्याहुः परिसम्वत्सराणि च।
सन्निपातसमुत्थानि सहजानि तु वर्ज्जयेत्॥
सर्व्वाः स्युर्व्वलयो येषां दुर्न्नामभिरुपद्रुताः।

दिष्टा इति प्राक् पूर्व्वं व्यासेन प्रत्येकं वातादिजार्शोलक्षणमुक्तं वीचेत्यर्थः, इति गयदासाचार्य्यः अन्येतु संक्षेपतः षोढ़ा व्यासतो विस्तरेण प्राग्विनिर्दिष्टात् पञ्चदशधा प्रसरात् साधयेदितिमन्यते। इदानीं यद्विधोप्यर्शःसु अत ऊर्द्ध्वं संसर्गमौषधकल्पनार्थं दर्शयन्नाह,—अर्शःसु दृश्यते रूपं यदा दोषद्वयस्य च। संसर्गं तं विजानीयात् संसर्गः स च षड्विधः। संसर्गः षड्विध इति वातपित्ते वातश्लेष्मणी वातशोणिते पित्तशोणिते श्लेष्मशोणिते। एवं संसर्गः स च षड्विधः। स च सूत्रस्थानोक्तवर्णलक्षणादवगन्तव्यः॥ १० ॥

इदानीं कृच्छ्रसाध्यासाध्यान्यर्शांसि दर्शयन्नाह,—त्रिदोषान्यल्पलिङ्गानि याप्यानि तु विनिर्द्दिशेत्। द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च। कृच्छ्रसाध्यानि तान्याहुः परिसम्वत्सराणि च। सन्निपातसमुत्थानि सहजानि च वर्ज्जयेत्। द्वन्द्वजानि द्विदोषोत्थानि तान्यपि याप्यानीत्यर्थः। परिसम्वत्सराणीति परितः सम्वत्सरमपिव्याप्यस्थितानि कृच्छ्रसाध्यानीत्यर्थः। केचित् सान्निपातसमुत्थानीत्यादौ कृत्वा पठन्ति। स च पाठो समग्रदर्शनान्न लिखितः। सर्व्ववलिव्यापिनामर्शसां पञ्चात्मकस्याप्यग्रे महानर्थकरत्वं दर्शयन्नाह,—सर्व्वास्युर्व्वलयो येषां दुर्नामभिरुपद्रुताः। तैश्च

तैस्तु प्रतिहतो वायूरपानः सन्निवर्त्तते।
ततो व्यानेन सङ्गम्य ज्योतिर्मृद्नाति देहिनां॥ ११॥

प्रतिहतोवायूरपानसन्निवर्त्तते। ततो व्यानेन सङ्गम्य ज्योतिर्मृद्नातिदेहिनाम्। इति येषां देहिनां दुर्नामभिस्तैस्तु अर्शोभिरित्यर्थः। अपानोवायुरिति सम्बन्धः। सन्निवर्त्तते स्थितिवध्नाति न निःसरतीत्यर्थः। सङ्गम्य मिलित्वा ज्योतिपश्चात्मकमग्निं मृद्नातिमन्दीकरोति। अयं सोपद्रवः। प्रायेण सहजेष्वर्शःसु ज्ञेयः॥ ११॥

इति निवन्धसंग्रहे द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

अथातोऽश्मरीणां निदानं व्याख्यास्यामः।

चतस्रोऽश्मर्य्यो भवन्ति श्लेष्माधिष्ठानास्तद्यथा—श्लेष्मणा वातेन पित्तेन शुक्रेण चेति। तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिमश्मरीं जन-

अथातोऽश्मरीणां निदानं व्याख्यास्यामः। निदानं हेतुलक्षणं निर्देशः। चतस्रोऽश्मर्य्यो भवन्ति श्लेष्माधिष्ठानाः चतस्रोऽश्मर्य्यो भवन्तीति छेदः, स एव श्लेष्माधिष्ठाना शुक्राश्मरी शुक्राधिष्ठानाः। अन्येतु शुक्राश्मर्य्यपि श्लेष्माधिष्ठानैव। शुक्रं सौम्यमिति वचनात्। श्लेष्माधिष्ठाना श्लेष्मोपादानकारणाः श्लेष्माणमुपादाय भवन्तीत्यर्थः। चतस्रोऽश्मर्य्यो भवन्तीत्यस्य विवरणं कुर्व्वन्नाह,—तद्यथा श्लेष्मणा वातेन पित्तेन शुक्रशोणितानां सम्प्राप्तिं दर्शयन्नाह,—तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः। श्लेष्मामूत्रसंपृक्तोऽनुप्रविश्यवस्तिमश्मरीं जनयति। मूत्रसंपृक्तः मूत्रेणसहितः। तासां पूर्व्वरूपमाह,—तासां पूर्व्वरूपाणि वस्तिपीड़ारोचकौमूत्रकृच्छ्रं वस्तिशिरो-

यति । तासां पूर्व्वरूपाणि वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति ।

यथास्वं वेदना वर्णौ दुष्टं सान्द्रमथाविलम् ।
पूर्व्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः ॥ १ ॥

अथ जातासु नाभिवस्तिसेवनीमेहनेष्वन्यतमस्मिन्मेहतो वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाशमनाविलं ससिकतं विसृजति । धावनलङ्घनप्लवनपृष्ठयानोष्णाध्वगमनैश्चास्य वेदना भवति ॥ २ ॥

तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधःपरिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि । तस्य मूत्र-

मुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति । यथास्वं वेदना वर्णं दुष्टं सान्द्रमथाविलम् । पूर्व्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः । वस्तिशिर मूत्राशयोपरितनभागः । शेफः पुंश्चिह्नम् । कृच्छ्रा बलादाकृष्ययुक्ताङ्गस्तानि । वस्तगन्धित्वं वृहत्तमच्छगलगन्धित्वम् । यथास्वं दोषाननतिक्रमेण, वेदनावर्णञ्च यस्मिन् मूत्रे तत्तथा, दुष्टं वातादिभिः, आविलं कलुषम्, अश्मनः अश्मर्य्याः ॥ १ ॥

अथ सर्व्वासामपि सामान्य लक्षणमाह,—अथ जातासु नाभिवस्तिसेवनीमेहनेष्वन्यतमस्मिन् मेहतो वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाशमनाविलं ससिकतं विसृजति । धावनलङ्घनप्लवनपृष्ठयानोष्णाध्वगमनैश्चास्य वेदना भवति । मूत्रविकिरणमिति । विकिरणं विक्षेपः, ससिकतम् वालुकासहितं, विसृजति विमुञ्चति, प्लवनं प्रतरणं, उष्णगमनं घर्म्मगमनं, अध्वगमनं दीर्घमार्गगमनं ॥ २ ॥

इदानीं श्लेष्माद्यश्मरीणां प्रत्येकं विशिष्टलक्षणमाह,—तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय

प्रतिघाताद्दाल्यते भिद्यते निस्तुद्यत इव च वस्तिर्गुरुः शीतश्च भवति। अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति। तां श्लैष्मिकीमिति विद्यात् ॥ ३ ॥

पित्तयुक्तास्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातादुष्यते चूष्यते दह्यते पच्यत इव वस्तिरुष्णवातश्च भवति। अश्मरी-चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥ ४ ॥

वातयुक्तास्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य

स्रोतो निरुणद्धि। तस्य मूत्रप्रतिघातात् दाल्यते भिद्यते निस्तुद्यत इव च वस्तिर्गुरुः शीतश्च भवति। अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्ड-प्रतिकाशा मधूकपुष्पवर्णा वा भवति। तां श्लैष्मिकीमिति विद्यात्। श्लेष्म-लमन्नमभ्यवहरतः पुंसः श्लेष्मा शरीरे स्रोतो निरुणद्धि इति सम्बन्धः। उप-लिप्य नवघटपङ्कन्यायेन अधिष्ठाय दाल्यते विशीर्य्यत इव स्फुटतीवेत्यर्थः। भिद्यते विदार्य्यत इव, निस्तुद्यते सूचीभिः ॥ ३ ॥

पित्तयुक्तास्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधि-ष्ठाय स्रोतो निरुणद्धि। तस्य मूत्रप्रतीघातादुष्यते चुष्यते दह्यते पच्यतइव-वस्तिरुष्णवातश्च भवति। अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्ला-तकास्थिप्रतिमा मधुवर्णा भवति। तां पैत्तिकीमिति विद्यात्। पित्तयुक्तास्तु श्लेष्मा स्रोतो निरुणद्धीति सम्बन्धः। सङ्घातमुपगम्य काठिन्यं प्राप्येत्यर्थः। तस्य पुरुषस्य मूत्रप्रतिघातात् मूत्रनिरोधात्। उष्यते समीपाग्निनेवोप-तप्यते। चुष्यते आकृष्यन्त इव, दह्यत इव कचाग्निनेव, पच्यत इव चारे-नेव, उत्काथ्यतइवेत्येके। उष्णवातः उत्तरतन्त्रे पठितो मूत्ररोगः, सरक्ता ईषद्रक्ता ॥ ४ ॥

वातयुक्तास्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधि-

वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति पायुं स्पृशति विशर्द्धते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण चास्य मेहतो निःसरन्ति। अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत्कण्टकाचिता भवति तां वातिकीमिति विद्यात्॥ ५॥

प्रायेणैतास्तिस्रोऽश्मर्य्यो दिवास्वप्नसमशनाध्यशनशीतस्निग्धगुरुमधुराहारप्रियत्वाद्विशेषेण वालानां भवन्ति तेषामेवाल्पवस्तिकायत्वादनुपचितमांसत्वाच्च वस्तेःसुखग्रहणाहरणा भवन्ति। महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति। मैथुनाभिघाता-

ष्ठाय स्रोतो निरुणद्धि। तस्य मूत्रप्रतिघातात् तीव्रा वेदना भवति। तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति पायुं स्पृशति विशर्द्धते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण चास्य मेहतो निःसरन्ति। अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत् कण्टकाचिता च भवति। तां वातिकीमिति विद्यात्। अत्रापि पूर्व्ववत् सम्बन्धः। दन्तान् खादति परस्परं दन्तपीड़नं करोति, विशर्द्धते गुदेन कुत्सितं शब्दं करोति, केचित् विशर्द्धते इत्यत्र विवर्द्धते इति पठन्ति व्याख्यानयन्ति चात्र मेढ्रं विमर्दनात् विवर्द्धत इत्यर्थः। विदहति विदाहयुक्तं मेढ्रं भवति, मेहतः मुञ्चत इत्यर्थः, खरा कठिना॥ ५॥

प्रायेणैतास्तिस्रोऽश्मर्य्यो वालानां भवतीति सम्बन्धः। कस्मादित्याह। विशेषेण दिवास्वप्नादिप्रियत्वात्। तेषामिति प्रियग्रहणात् यूनामपि वोधयति। तेषामेवाल्पकायत्वात् अनुपचितवस्तिमांसत्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति। तेषामेव च वालानां अल्पकायत्वादिति अल्पवस्तित्वात् अल्पकायत्वात् वेत्यर्थः। अल्पवस्तित्वादिति। अल्पायत्वं अनुपचितमांसत्वाच्च वस्तेरिति। अनेन परिणाहेन अल्पत्वमुक्तम्।

द्दतिमैथुनाद्वा शुक्रश्चलितमनिर्गच्छद्विमार्गगमनादनिलोऽभित: संगृह्य मेढ्रवृषणयोरन्तरे संहरति संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात् ॥ ६ ॥

भवन्ति चात्र।

शर्करा सिकता मेहो भस्माख्योऽश्मरिवैकृतम्।
अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना ॥

सुखग्रहणा इति सुखे गृह्यन्ते सुखेनाक्रियन्ते चाश्मर्य्यः। महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति। हेतुसम्प्राप्तिलक्षणानि शुक्राश्मर्य्यां दर्शयन्नाह,—मैथुनविघातादतिमैथुनाद्वा शुक्रश्चलितमनिर्गच्छन् विमार्गगमनादनिलोऽभित: संगृह्यमेढ्रवृषणयोरन्तरे संहरति। संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति। मूत्रकृच्छ्रं वस्तिवेदनां वृषणयो: श्वयथुमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीं विद्यात्। साश्मरी मैथुनविघातादतिमैथुनादिति हेतु:। शुक्रश्चलितमनिर्गच्छदिति सम्प्राप्ति:। मूत्रकृच्छ्रं वस्तिवेदनामित्यादि लक्षणं। मैथुनविघातात् मैथुनकार्य्यस्य विघातत्वात्। अतिमैथुनादिति केचित् पठन्ति। तत्र शुक्रबाहुल्यं शुक्रचलने हेतु:, अनिर्गच्छत् अनि:सरत्। अनिर्गच्छन्निति केचित् पठन्ति। तत्र वायोर्व्विशेषणं, विमार्गगमनादुन्मार्गगमनात्, अनिलो वायु:। अभित: उभयत: ऊर्द्ध्वाधश्चेत्यर्थ:। संगृह्य विधार्य्य, मेढ्रवृषणयोरन्तरे वस्तिद्वारस्याध इत्यर्थ:। संहरति वर्त्तुलाकरोति। वृषणयोश्चेति चकारात् वङ्क्षणदेशे वङ्क्षणजस्तु अश्मरोषु वृषणशोफो नास्त्येव, प्रविलयमापद्यते अश्मरीविलोयते अल्पत्वात्। अन्येतु पुनरश्मरीवृषणशोफान्न विलयमापद्यते इत्याचक्ष्यते ॥ ६ ॥

भवन्ति चात्र। शर्करा सिकता मेहो भस्माख्योऽश्मरीवैकृतं। अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना। भस्माख्य इति मूत्रशुक्रनामा उत्तरतन्त्रे

पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः।
सा भिन्नमूर्त्तिर्व्वातेन शर्करेत्यभिधीयते॥
हृत्पीड़ा सक्थिसदनं कुक्षिशूलः सवेपथुः।
तृष्णोर्द्ध्वगोऽनिलः कार्ष्ण्यं दौर्व्वल्यं पाण्डुगात्रता॥
अरोचकाविपाकौ तु शर्करार्त्तेर्भवन्ति च।
मूत्रमार्गप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्॥
दौर्व्वल्यं सदनं काश्यं कुक्षिशूलमरोचकम्।
पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीड़नं वमिं॥ ७॥
नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसां।
एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः॥
अलाव्वा इव रूपेण सिरास्नायुपरिग्रहः।

मूत्ररोगः। अश्मरीवैकृतं अश्मरीविकारा उपद्रवा इत्यर्थः। अश्मर्य्यां इत्यादि। अश्मर्य्यास्तुल्यव्यञ्जनवेदना शर्करा ज्ञेयेत्यर्थः। पवनेऽनुगुणे सा तु निरेत्यल्पाविशेषतः। साश्मरी यदाल्पा स्यात् तदा वातेऽनुगुणे अनुकूलसति निर्गच्छति। शर्करालक्षणमाह,—सा भिन्नमूर्त्तिर्व्वातेन शर्करेत्यभिधीयते। हृत्पीड़ा सक्थिसदनं कुक्षिशूलः सवेपथुः। तृष्णोर्द्ध्वगोऽनिलः कार्ष्ण्यं दौर्व्वल्यं पाण्डुगात्रता। अरोचकाविपाकौ च शर्करार्त्तेर्भवन्ति हि। सक्थिसदनमुरुग्लानिः। अश्मर्य्या एव मूत्रमार्गगताया लक्षणनिर्द्देशमाह,—मूत्रमार्गप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्। दौर्व्वल्यं सदनं काश्यं कुक्षिशूलमरोचकम्। पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीड़नं वमिम्। साश्मरी सक्ता अनिर्गता, दौर्व्वल्यं बलहानिः, सदनं अङ्गग्लानिः, स्फुटितिकेत्यपरे, काश्यं मांसक्षये॥ ७॥

इदानीं अश्मर्य्या एव आधारस्य वस्तेः स्थानं संस्थानद्वाराणि निर्द्देष्टुमाह,—नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसाम्। एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः। नाभ्यादीनां मध्ये वस्तिरिति स्थानम्। वस्तिप्रसङ्गास्ते द्वौ

वस्तिर्व्वस्तिशिरश्चैव पौरुषं वृषणौ गुदं ॥
एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः।
मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥
पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः।
तर्प्पयन्ति सदा मूत्रं सरितः सागरं यथा ॥
सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः।
नाड़ीभिरुपनीतस्य मूत्रस्यामाशयान्तरात् ॥
जाग्रतः स्वपतश्चैव स निःस्यन्देन पूर्य्यते।
आमुखात् सलिले न्यस्तः पार्श्वेभ्यः पूर्य्यते नवः ॥
घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्य्यते ॥ ८ ॥
एवमेव प्रवेशेन वातः पित्तं कफोऽपि वा।
मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम् ॥

वस्तिसन्निहितानाञ्चापरेषां स्थानमाह,—वस्तिर्व्वस्तिशिरश्चैव पौरुषं वृषणौ गुदम्। एकसम्बन्धिनो ह्येते गुदास्थिविवराश्रिताः। पौरुषं मेढ्रं। पुनर्व्वस्त्यावयवमाह,—अलाब्वा इव रूपेण सिरास्नायुपरिग्रहः। मूत्राशयो मलाधारः प्राणायतनमुत्तमम्। परिग्रहः आश्रयः। मूत्राशयपर्य्यायो मलाधार इति। प्राणानां अग्नीषोमानां, आयतनं संस्थानं यथाच सर्व्वदा सावच्छीणमूत्रो भवति। तथा—पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः। तर्पयन्ति सदा मूत्रं सरितः सागरं यथा। ता नाड्यो मूत्रं तर्पयन्ति वर्द्धयन्तीत्यर्थः। मूत्रवाहिन्यौ मूलधमन्यौ द्वे तच्छाखाभूता दशधा शतधा सहस्रधा भिद्यन्त इति दर्शयन्नाह,—नाड़ीभिरुपनीतस्य मूत्रस्यामाशयान्तरात्। जाग्रतः स्वपतो वापि स निःष्यन्देन पूर्य्यते। आमाशयान्तरात् स निःष्यन्देन उपस्नेहेन पूर्य्यते। अधोमुखत्वेन वस्तिना वस्तेरनूर्द्ध्वमुखस्यापि पूरणम् ॥ ८ ॥

उपमानेनाह,—आमुखात् सलिले न्यस्तः पार्श्वेभ्यः पूर्य्यतेनवः। घटो

अप्सु स्वच्छास्वपि यथा निषिक्तासु नवे घटे।
कालान्तरेण पङ्कः स्यादश्मरीसम्भवस्तथा॥
संहन्त्यापो यथा दिव्या मारुतोऽग्निश्च वैद्युतः।
तद्वद्वलासं वस्तिस्थमुष्मा संहन्ति सानिलः॥
मारुते प्रगुणे वस्तौ मूत्रं सम्यक्प्रवर्त्तते।
विकारा विविधाश्चापि प्रतिलोमे भवन्ति हि॥
मूत्राघाताः प्रमेहाश्च शुक्रदोषास्तथैव च।
मूत्रदोषाश्च ये केचिद्वस्तावेव भवन्ति हि॥ ९॥

यथा तथा विद्धि वस्तिमूत्रेण पूर्य्यते। न्यस्तः धृतः, विद्धि जानीहि। मूत्रप्रवेशे तुल्यमेव वातादीनां प्रवेशं दर्शयन्नाह,—एवमेव प्रवेशेन वातः पित्तं कफोऽपि वा। मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम्। एवमेव प्रवेशेनेति पूर्व्वोक्तप्रवेशेनेत्यर्थः। उपस्नेहात् समीपक्लेदनात्, नतु द्रवरूपत्वात्। सर्व्वेषां वायोश्चामूर्त्तत्वात् कथं घनता तदाह,—अप्सुस्वच्छास्वपि यथा निषिक्तासु नवे घटे। कालान्तरेण पङ्कः स्यादश्मरीसम्भवस्तथा। निषिक्तासु प्रक्षिप्तासु। पङ्कसमत्वेऽपि कथमश्मरीसाम्यमाह,—संहन्त्यापो यथा दिव्या मारुतोऽग्निश्च वैद्युतः। तद्वद्वलासं वस्तिस्थ मुष्मासंहन्ति सानिलः। यथा संहन्ति काठिन्यं करोति च वर्षोपलान् करोति इत्यर्थः। कः काठिन्यं करोति? वायुः विद्युदग्निश्चापि कठिनाः करोति, आपः जलानि दिव्यमेघजाः। तथा वलासं श्लेष्माणं वस्तिस्थं संहन्ति कठिनं करोति। उष्मा पित्तमित्यर्थः। कथम्भूतः सानिलः सेवते इत्यर्थः। वस्तिगतानामन्येषामपि विकाराणां वायुरेव हेतुरिति दर्शयन्नाह,—मारुते प्रगुणे वस्तौ मूत्रं सम्यक् प्रवर्त्तते। विकारा विविधाश्चापि प्रतिलोमे भवन्तिहि। प्रगुणेऽनुकुले, अनुगुणे इति केचित् पठन्ति। तत्रापि सएवार्थः, प्रतिलोमे विगुणे वाते विगुणे सति वस्तौ ये विकारास्तानेवाह,—मूत्राघातः प्रमेहाश्च शुक्रदोषास्तथैव च। मूत्रदोषाश्च ये केचित् वस्तावेव भवन्तिहि॥ ९॥

इति निबन्धसंग्रहे निदानस्थाने तृतीयोऽध्यायः।

चतुर्थोऽध्यायः ।

अथातो भगन्दराणां निदानं व्याख्यास्यामः ।

वातपित्तश्लेष्मसन्निपातागन्तुनिमित्ताः शतपोनकोष्ट्रग्रीव-परिस्राविशम्बूकावर्त्तोन्मार्गिणो यथासंख्यं पञ्च भगन्दरा भवन्ति। ते तु भगगुदवस्तिप्रदेशदारणाच्च भगन्दरा इत्युच्यन्ते । अपक्वाः पिड़काः, पक्वास्तु भगन्दराः। तेषान्तु पूर्व्वरूपाणि कटीकपाल-वेदना गुदकण्डुर्दाहः शोफश्च गुदस्य भवति ॥ १ ॥

तत्रापथ्यसेविनां वायुः प्रकुपितः सन्निवृत्तः स्थिरीभूतो गुदमभितोऽङ्गुले द्व्यङ्गुले वा मांसशोणिते प्रदूष्यारुणवर्णां पिड़कां जनयति सास्य तोदादीन् वेदनाविशेषान् जनयत्य-प्रतिक्रियमाणा च पाकमुपैति मूत्राशयाभ्यासगतत्वाच्च व्रणः

अथातो भगन्दराणां निदानं व्याख्यास्यामः । वातपित्तकफसन्निपाता-गन्तुनिमित्ताः शतपोनकोष्ट्रग्रीवपरिस्राविशम्बूकावर्त्तोन्मार्गिणो यथासंख्यं पञ्चभगन्दरा भवन्ति । संख्येयनिरुक्तिमाह,—ते तु भगगुदवस्तिप्रदेश-दारणात् भगन्दरा इत्युच्यन्ते । अपक्वाः पिड़काः पक्वास्तु भगन्दराः । पूर्व्वरूपमाह,—तेषान्तु पूर्व्वरूपाणि कटीकपालवेदना गुदकण्डुर्दाहः शोफश्च गुदस्य भवति । तेषान्तु पूर्व्वरूपाणि भवन्तीत्यर्थः । कटीकपालः कटीफलकः ॥ १ ॥

पूर्व्वरूपान्तरं पिण्डिकोत्पत्तिं दर्शयन्नाह,—तत्रापथ्यसेविनां वायुः प्रकुपितः सन्निवृत्तः स्थिरीभूतोगुदमभितोऽङ्गुलेद्व्यङ्गुले वा मांसशोणिते प्रदूष्यारुणवर्णां पीड़काञ्जनयति सास्य तोदादीन् वेदनाविशेषान् जन-यति । अप्रतिक्रियमाणे च पाकमुपैति । मूत्राशयाभ्यासगतत्वात् व्रणः

प्रक्लिन्नः शतपोनकवद्णुमुखैश्छिद्रैरापूर्य्यते तानि च छिद्राण्य-जस्रं फेणानुविद्धमधिकमास्रावं स्रवन्ति व्रणैश्च ताड्यते भिद्यते छिद्यते सूचीभिरिव निस्तुद्यते गुदञ्चावदीर्य्यते वातमूत्रपुरीष-रेतसामप्यागमश्च तैरेव छिद्रैर्भवति तं भगन्दरं शतपोनक-मित्याचक्षते ॥ २ ॥

पित्तन्तु प्रकुपितमनिलेनाधः प्रेरितं पूर्व्ववदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति। सास्य चोषा-दीन् वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति, व्रणश्चाग्निक्षाराभ्यामिव दह्यते दुर्गन्धमुष्णमास्रावं स्रवत्युपेक्षितश्च वातमूत्रपुरीषरेतांसि विसृजति तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते।

श्लेष्मा तु प्रकुपितः समीरणेनाधःप्रेरितः पूर्व्ववदवस्थितः शुक्लावभासां स्थिरां कण्डूमतीं पिड़कां जनयति सास्य कण्ड्वा-दीन् वेदनाविशेषाञ्जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्च

प्रक्लिन्नः शतपोनकवदनुमुखैश्छिद्रैरापूर्य्यते तानि च छिद्राण्यजस्रं फेनानु-विद्धमधिकमास्रावं स्रवन्ति। व्रणैश्च ताद्यते भिद्यते छिद्यते सूचीभिरिव निस्तुद्यते गुदञ्चावदीर्य्यते वातमूत्रपुरीषरेतसामप्यागमश्च तैरेव छिद्रैर्भवति तं भगन्दरं शतपोनकमित्याचक्ष्यते। सन्निवृत्तः व्याघुठितः। गुदमभितः गुदस्य सर्व्वतः। अन्ये गुदसन्निधामित्याहुः। अभ्यास, समीपं, शतपोनक ; शूकदोषपरिपठितो व्याधिः। चालनिकेति जेज्जटाचार्य्यः। तन्नेच्छति गयदासाचार्य्यः, लोकस्याश्रयश्चालनिकायां शतपोनकशब्दस्य अप्रसिद्धत्वात्। अश्वपुच्छवालरचितं शतपोनकमित्यन्ये, तुद्यते व्यथ्यते। ताद्यते दण्डेनेवाभि-हन्यत इत्यर्थः। भिद्यते त्वक् विदार्य्यत इव। छिद्यते द्विधा क्रियत इव ॥२॥

पित्तन्तु प्रकुपितमनिलेनाधः प्रेरितं पूर्व्ववदवस्थितं रक्तान्तन्वीमुच्छ्रिता-मुष्ट्रग्रीवाकारां पिड़कां जनयति। सास्यचोषादीन् वेदनाविशेषान् जन-

कठिनः संरम्भी कण्डूप्रायः पिच्छिलमजस्रमास्रावं स्रवत्युपेक्षितश्च वातमूत्रपुरीषरेतांसि विसृजति तं भगन्दरं परिस्राविणमित्याचक्षते।

वायुः प्रकुपितः प्रकुपितौ पित्तश्लेष्माणौ परिगृह्याधो गत्वा पूर्व्ववदवस्थितः पादाङ्गुष्ठप्रमाणां सर्व्वलिङ्गां पिड़कां जनयति सास्य तोददाहकण्ड्वादीन् वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्च नानाविधवर्णमास्रावं स्रवति पूर्णनदीशम्बुकावर्त्तवच्चात्र समुत्तिष्ठन्ति वेदनाविशेषास्तं भगन्दरं शम्बूकावर्त्तमित्याचक्षते॥ ३॥

यति। अप्रतिक्रियमाणा च पाकमुपैति व्रणश्चाग्निक्षाराभ्यामिव दह्यते, दुर्गन्धमुष्णमास्रावं स्रवति। उपेक्षितश्च वातमूत्रपुरीषरेतांसिविसृजति तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते। पूर्व्ववदवस्थितमितिगुदमभितोगुदेद्व्यङ्गुले-वेत्यर्थः। विसृजति व्रणइति सम्बन्धः। श्लेष्मा तु प्रकुपितः समीरणेनाधः प्रेरितः पूर्व्ववदवस्थितः शुक्लावभासां स्थिरां कण्डुमतीं पीड़कां जनयति। सास्यकण्ड्वादीन् वेदनाविशेषान् जनयति। अप्रतिक्रियमाणा च पाकमुपैति। व्रणश्चकठिनः संरम्भी कण्डूप्रायः पिच्छिलमजस्रमास्रावं स्रवति। उपेक्षितश्च वातमूत्रपुरीषरेतांसिविसृजति। तं भगन्दरं परिस्राविणमित्याचक्षते। वायुःप्रकुपितः प्रकुपितौ पित्तश्लेष्माणौ परिगृह्याधो गत्वा पूर्व्ववदस्थितः पादाङ्गुष्ठप्रमाणां सर्व्वलिङ्गां पीड़कां जनयति। सास्यतोददाहकण्ड्वदीन् वेदनाविशेषान् जनयति। अप्रतिक्रियाणा च पाकमुपैति व्रणश्च नानाविधवर्णमास्रावं स्रवति। पूर्णनदीशम्बुकावर्त्तवच्चात्र समुत्तिष्ठन्ति वेदनाविशेषास्तं भगन्दरं शम्बुकावर्त्तमित्याचक्षते। नैरन्तर्य्येण वेदनाविशेष इति। नैरन्तर्य्येण वेदना उत्तिष्ठन्ति इत्येके। अन्ये तु तथाविधगत्यारम्भस्य शोफस्य पूर्णनद्यावर्त्तशम्बूकावर्त्तकारिणो वावगाढ़त्वात् अवगाढ़वेदनाभवन्तीत्यर्थः। शम्बूकाख्याः शङ्खाः॥ ३॥

मूढ़ेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदाव-गाढ़पुरीषोन्मिश्रमपानेनाधःप्रेरितमसम्यगागतं गुदं चिणोति, तत्र चतनिमित्तः कोथ उपजायते तस्मिंश्च चते पूयरुधिराव-कीर्ण-मांसकोथे भूमाविव जलप्रक्लिन्नायां क्रिमयः सञ्जायन्ते ते भचयन्तो गुदमनेकधा पार्श्वतो दारयन्ति तस्य तैर्म्मार्गैः क्रमि-कृतैर्व्वातमूत्रपुरीषरेतांस्यभिनिःसरन्ति तं भगन्दरमुन्मार्गिण-मित्याचचते ।

भवन्तिचात्र ।

उत्पद्यतेऽल्परुक्शोफा चिप्रं चापुापशाम्यति ।
पायून्तदेशे पिड़का सा ज्ञेयान्या भगन्दरात् ॥
भागन्दरी तु विज्ञेया पिड़काऽतो विपर्य्ययात् ।
पायोः स्याद्द्व्यङ्गुले देशे गूढ़मूला सरुग्ज्वरा ॥

उन्मार्गेन सम्प्राप्तिं दर्शयन्नाह । मूढ़ेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदावगाढ़पुरीषोन्मिश्रमपानेनाधः प्रेरितमसम्यगागतं गुदं चिणोति । तत्रचतनिमित्तकोथ उपजायते तस्मिंश्चचते पूयरुधिरावकीर्ण-मांसकोथे भूमाविव जलप्रक्लिन्नायां क्रमयः संजायन्ते । ते भचयन्तो गुद-मनेकधा पार्श्वतो दारयन्ति । कोथःपूतिभावः, पार्श्वतो दारयन्ति पचतो दारयन्ति, अस्याग्रे अर्शोभगन्दरं केचित् पठन्ति, तन्न सर्व्वै-र्निबन्धकारैर्निराकृतत्वात् । अभगन्दरी भागन्दरीमपि पीड़कामाह । भवन्ति-चात्र उत्पद्यतेऽल्परुक्शोफा चिप्रं चाप्युपशाम्यति । पायून्तदेशे पिड़का सा ज्ञेयान्या भगन्दरात् । शोफादुत्पद्यते इतिसम्बन्धः । अल्परुक् अल्पवेदना, पायून्तदेशे गुदस्यान्ते, अन्या भगन्दरादपरा भगन्दरेत्यर्थः । एतेन भगन्दरी पिड़काख्या भगन्दरेणोत्पद्यते । पायोः स्याद्व्यङ्गुले देशे गूढ़मूला सरुग्ज्वरा । भागन्दरीति विज्ञेयापिड़कातो विपर्य्ययात् । अतो

यानयानान्मलोत्सर्गात् कण्डूरुग्दाहशोफवान्।
पायुर्भवेद्रुजः कथ्यां पूर्व्वरूपं भगन्दरे॥
घोराः साधयितुं दुःखाः सर्व्व एव भगन्दराः।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च भगन्दरः॥ ४॥

भागन्दर्य्याः पिड़का विपर्य्ययात् विपरीतत्वात् भगन्दरी करी भवतीत्यर्थः। यानयानान्मलोत्सर्गात् कण्डूरुग्दाहशोफवान्। पायुर्भवेद्रुजः कथ्यां पूर्व्वरूपं भगन्दरे। यानयानाद्रथ्यादिगमनात्, मलोत्सर्गात् पुरीषत्यागात्। कण्डुरुग्दाहशोफवान् पायुर्भवेत्। कण्डुरुग्दाहशोफादिकं पूर्व्वरूपं भवेत्। अयं वापनीयः। पूर्व्वं वा पूर्व्वरूपग्रन्थद्वयं पठनीयं, पूर्व्वत्वात् प्रसिद्धः। तत्र केषाञ्चिदसाध्यत्वं दर्शयन्नाह। घोराः साधयितुं दुःखा सर्व्वएव भगन्दराः। तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च भगन्दरः॥ घोरा दुःखप्रदाः। दुःखाः कष्टसाध्याः भवन्तीत्यध्याहारः॥ ४॥

इति निबन्धसंग्रहे निदानस्थाने चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः।

अथातः कुष्ठनिदानं व्याख्यास्यामः।

मिथ्याहाराचारस्य विशेषाद्गुरुविरुद्धासात्म्याजीर्णाहिताशिनः स्नेहपीतस्य वान्तस्य वा व्यायामग्राम्यधर्म्मसेविनो ग्राम्यानूपौदकमांसानि वा पयसाभीक्ष्णमश्नतो यो वा मज्जत्यप्सूष्माभितप्तः सहसा छर्द्दिं वा प्रतिहन्ति॥ १॥

अथातः कुष्ठनिदानं व्याख्यास्यामः। मिथ्याहाराचारस्य विशेषाद्गुरुविरुद्धासात्म्याजीर्णाहिताशिनः स्नेहपीतस्य वान्तस्य वा व्यायाम ग्राम्यधर्म्मसेविनो ग्राम्यानूपौदकमांसानि वा पयसाभीक्ष्णमश्नतो यो वा मज्जत्यप्सूष्मा-

तस्य पित्तश्लेष्माणौ प्रकुपितौ परिगृह्यानिलः प्रवृद्धस्तिर्य्यग्गाः सिराः सम्प्रतिपद्य समुद्धूय बाह्यं मार्गं प्रतिसमन्ताद्विक्षिपति। यत्र यत्र च दोषो विक्षिप्तो निःसरति तत्र तत्र च मण्डलानि प्रादुर्भवन्त्येवमुत्पन्नस्त्वचि दोषस्तत्र च परिवृद्धिं प्राप्याप्रतिक्रियमाणोऽभ्यन्तरं प्रतिपद्यते धातून् दूषयन्। तस्य पूर्व्वरूपाणि त्वक्पारुष्यमकस्माद्रोमहर्षः कण्डूः स्वेदबाहुल्यमस्वेदनं वाङ्गप्रदेशानां स्वापः क्षतविसर्पणमसृजः कृष्णता चेति ॥ २ ॥

तत्र सप्त महाकुष्ठान्येकादश क्षुद्रकुष्ठान्येवमष्टादश कुष्ठानि भवन्ति। तत्र महाकुष्ठान्यरुणौडुम्बरर्ष्यजिह्वकपालकाकणकपुण्डरीकदद्रुकुष्ठानीति ॥ ३ ॥

भितत्तःसहसा छर्द्दिं वा प्रतिहन्ति। मिथ्याहाराचारस्य शास्त्रोक्तविधिभ्रष्टाहाराचारस्येत्यर्थः ॥ १ ॥

सम्प्राप्तिमाह,—तस्य पित्तश्लेष्माणौ प्रकुपितौ परिगृह्यानिलः प्रवृद्धस्तिर्य्यग्गाः सिराः सम्प्रतिपद्यते। समुद्धूयबाह्यं मार्गं प्रतिसमन्तात् विक्षिपति। यत्र यत्र च दोषो विक्षिप्तो निःसरति तत्र तत्र मण्डलानि प्रादुर्भवन्ति, एवमुत्पन्नस्त्वचि दोषस्तत्र च परिवृद्धिं प्राप्याप्रतिकारिणोऽभ्यन्तरमभिप्रतिपाद्य धातुमभिदूषयति। तस्य मिथ्याहाराचारस्येत्यादि। समुद्धूय आक्षिप्य, समन्तात् सर्व्वत्र, एतेन सर्व्वदेहगतत्वं रोगस्य सूचयन्ति। तस्य पूर्व्वरूपाणि त्वक्पारुष्यमकस्मात् रोमहर्षः कण्डुःस्वेदबाहुल्यमस्वेदनं वाङ्गप्रदेशानां स्वापः क्षत विसर्पणमसृजः कृष्णताचेति। अकस्मात् कारणं विना, स्वापः स्पर्शाज्ञानं ॥ २ ॥

इदानींसङ्ख्यामाह। तत्र सप्त महाकुष्ठानि, एकादश क्षुद्रकुष्ठान्येवमष्टादशकुष्ठानि भवन्ति। महत्त्वमुत्तरोत्तर धात्वनुप्रवेशात्। एकादशकुष्ठानां क्षुद्रत्वमुत्तरधात्वनुप्रवेशात्। अष्टादश कुष्ठानि भवन्ति, इति दिङ्मात्रदर्शितं, कुष्ठानामनियतसङ्ख्यत्वात्। तथा च सप्तविधाष्टाविंशद्दशविधौ संख्येयविधौ

क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठञ्चर्म्मदलं विसर्पःपरिसर्पः सिध्म विचर्च्चिका किटिमं पामा रकसा चेति। सर्व्वाणि कुष्ठानि सवातानि सपित्तानि सश्लेष्माणि सक्रिमीणि च भवन्त्युत्सन्नतस्तु दोषग्रहणमभिभवात् ॥ ४ ॥

तत्र वातेनारुणं पित्तेनौडुम्बरर्ष्यजिह्वकपालकाकणकानि। श्लेष्मणा पौण्डरीकं दद्रुकुष्ठञ्चेति। तेषान्तु महत्त्वं क्रियागुरुत्वमुत्तरोत्तरं धात्वनुप्रवेशादसाध्यत्वञ्चेति।

तत्र वातेनारुणाभानि तनूनि विसर्प्पीणि तोदभेदस्वापयुक्तान्यरुणानि। पित्तेन पक्कोडुम्बरफलाकृतिवर्णान्यौडुम्बराणि। ऋष्यजिह्वाप्रकाशखरत्वानि ऋष्यजिह्वानि। कृष्णकपालिकाप्रकाशानि कपालकुष्ठानि। काकणन्तिकाफलसदृशान्यतीव रक्तकृष्णानि काकणकानि। तेषाञ्चतुर्णामप्योषचोषपरिदाहधूमायनानि क्षिप्रोत्थानप्रपाकभेदित्वानि क्रिमिजन्म च सामान्यानि लिङ्गानि।

वा। महाकुष्ठानि नामत प्राह। तत्र महाकुष्ठान्यरुणौडुम्बरर्ष्यजिह्वकपालकाकणकपुण्डरीकदद्रुकुष्ठानीति ॥ ३ ॥

क्षुद्रकुष्ठानि नामत प्राह—क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठं चर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्च्चिका किटिमं पामा रकसाचेति। सर्व्वेष्वेव कुष्ठेषु सर्व्वेषामेव दोषाणां क्रिमीणाञ्च सम्भवं दर्शयन्नाह। सर्व्वाणि कुष्ठानि सवातानि सपित्तानि सश्लेष्माणि, सक्रिमीणि च भवन्ति। सर्व्वाणि क्षुद्राणि महान्ति च। कथं तर्हि वातेनारुणमित्याह। उत्सन्नतस्तु दोषग्रहणमभिभवात्। उत्सन्नतः रक्तदोषात् दोषग्रहणमभिभवात्, इतरे दोषयोरिति शेषः ॥ ४ ॥

पुण्डरीकपत्रप्रकाशानि पौण्डरीकाणि। अतसीपुष्पवर्णानि ताम्राणि वा विसर्प्पीणि पिड़कावन्ति च दद्रुकुष्ठानि तयोर्द्वयोरप्युत्सन्नता परिमण्डलता कण्डूश्चिरोत्थानत्वं चेति सामान्यरूपाणि ॥ ५ ॥

क्षुद्रकुष्ठान्यत ऊर्द्धं वक्ष्यामः।

स्थूलानि सन्धिष्वतिदारुणाणि स्थूलारुषि स्युः कठिनान्यरूंषि।
त्वक्कोचभेदस्वपनाङ्गसादाः कुष्ठे महत्पूर्व्वयुते भवन्ति।
कृष्णारुणं येन भवेच्छरीरं तदेककुष्ठं प्रवदन्त्यसाध्यम्।
स्थूर्य्येन कण्डूव्यथनौषचोषास्तलेषु तच्चर्म्मदलं वदन्ति ॥
विसर्प्पवत् सर्पति सर्व्वतो य स्त्वग्रक्तमांसान्यभिभूय शीघ्रं।

यस्य दोषस्य यस्मिन् कुष्ठे प्राधान्यं तद्दर्शयन्नाह। तत्र वातेनारुणं, पित्तेनोडुम्बरर्ष्यजिह्वकपालकाकणकानि। श्लेष्मणापौण्डरीकं दद्रुकुष्ठञ्चेति। तत्रारुणादीनां सप्तनां महत्त्वादिषु जिह्वेषु दर्शयन्नाह—तेषां महत्त्वं क्रियागुरुत्वमुत्तरोत्तरं धात्वनुप्रवेशादसाध्यत्वन्तेति। चकारो धात्वनुप्रवेशाच्चेत्यनन्तरं द्रष्टव्यं। तेन अनुक्त मारात्मकदोषमहत्वं समुच्चिनोति ॥ ५ ॥

तत्र महाकुष्ठानां लक्षणं दर्शयन्नाह,—तत्र वातेनारुणाभानि तनूनि विसर्पीणि तोद भेद स्वापयुक्तान्यरुणानि। पित्तेन पक्वोडुम्बरफलाकृति वर्णान्यौडुम्बराणि। ऋष्यजिह्वा प्रकाशानि खरत्वानि, ऋष्यजिह्वानि ऋष्यजिह्विकानि। ऋष्यजिह्वया इव प्रकाशः सादृश्य येषां खरत्व युक्तानि, ऋष्यजिह्वानीनान्तः, रोरुइति प्रसिद्धः। अन्ये कृष्य इति पठन्ति कृष्योरीच्च इति लोके। कृष्णकपालिका प्रकाशानि कपालकुष्ठानि। कृष्णकपालिका कृष्णशर्करा। काकणन्तिका फल सदृशानि कृष्णरक्तानि काकणकानि। काकणन्तिका गुञ्जा। चिरिह्विण्टिकेतिप्रसिद्धा, तत् फल वद्रक्तानि मध्ये कृष्णानि। उडम्बरादीनां पित्तकृतत्वं दर्शयन्नाह,—तेषां चतुर्णा-

मूर्च्छाविदाहारतितोदपाकान् कृत्वा विसर्पः स भवेद्विकारः ॥
शनैः शरीरे पिडकाः सवल्यः सर्पन्ति यास्तं परिसर्पमाहुः।
कण्ड्वन्वितं श्वेतमपायि सिध्म विद्यात्तनु प्रायश ऊर्द्धकाये ॥६॥
राज्योऽति कण्डूर्त्ति रुजः सुरूचा भवन्ति गात्रेषु विचर्च्चिकायां।
कण्डूमती दाहरुजोपपन्ना विपादिका पादगतेयमेव ॥
यत्स्रावि वृत्तं घनमुग्रकण्डु तत् स्निग्धकृष्णं किटिमं वदन्ति।

मप्योष चोषपरिदाहधूमायणानि चिप्रोत्थान प्रपाकभेदित्वानि कृमिजन्म च सामान्यानि लिङ्गानि। ओष तूषानल समीपइव तापः। प्लुष्टस्येव वेदना विशेष इत्यन्ये। चोष अचुष्यत इव वेदनाविशेषः। पिपासेत्यन्ये। धूमायनं धूमोपहतस्येव। चुमुचुमायनं धूमोद्गरणमिवाङ्गनामित्येके। पुण्डरीक दद्रुकुष्ठयोर्लक्षणं दर्शयन्नाह,—श्लेषणा पुण्डरीकपत्रप्रकाशानि पौण्डरीकानि। दद्रुकुष्ठं द्विविधं सितं असितञ्च, महोपक्रमसाध्यत्वादनुवन्धिप्रकाशात्तु महाकुष्ठेषु मध्येपाठइति शेषः। दद्रुसिध्मयोः सुश्रुत चरकादि तयोरभिधान भेदइति जेज्जठाचार्य्यः समादधाति, तन्नेच्छति गयदासाचार्य्यः। तयोः पुण्डरीक दद्रुकुष्ठयोः पित्तकफकर्त्तृत्वं दर्शयन्नाह,—तयोर्द्वयोरप्युत्सन्नता परिमण्डलता कण्डूचिरोत्थानत्वञ्चेति सामान्यरूपाणि। परिमण्डलता परिपूर्ण मण्डलता ॥ ६ ॥

क्षुद्रकुष्ठेषु प्राक् स्थूलारुष्कमाह,—स्थूलानि सन्धिष्वतिदारुणानि स्थूलारुषिस्युः कठिनान्यरुंषि। स्थूलानि स्थूलमूलानि, दारुणानि कृच्छ्रसाध्यानि, अरुंषि व्रणाः। महाकुष्ठ लक्षणमाह, -त्वक्कोच भेदः स्वपनाङ्गसादाः कुष्ठे महत्पूर्व्वयुते भवन्ति। त्वक्शब्दः कोचभेदस्वापशब्दैः सह प्रत्येकं सम्बध्यते, तेन त्वक्कोचः त्वक्सङ्कोचः, त्वग्भेदः त्वग्विदारणं, त्वक्स्वप्नः त्वचोऽचेतनत्वं। अङ्गसादोऽङ्गग्लानिः॥ कुष्ठे महत् पूर्व्वयुत इति महाकुष्ठ इत्यर्थः। एककुष्ठमाह। कृष्णारुणं येन भवेत् शरीरं तदेक कुष्ठं प्रवदन्त्यसाध्यं। चर्म्मदलमाह,—स्युर्य्येन कण्डुव्यथशोषचोषास्तलेषु तच्चर्म्मदलं वदन्ति। चोष

सास्रावकण्डुपरिदाहवद्भिः पामाणुकाभिः पिड़काभिरुक्ता।
स्फोटैः सदाहैरति सैव कच्छूः स्फिक्पाणिपादप्रभवैर्निरूप्या॥७॥
कण्डून्विता या पिडका शरीरे संस्रावहीना रकसोच्यते सा।
अरुः ससिध्मं रकसा महच्च यच्चैककुष्ठं कफजान्यमूनि।
वायोः प्रकोपात् परिसर्पमेकं शेषाणि पित्तप्रभवाणि विद्यात्॥८॥

आचुषणमिव, तलेषु हस्तपादतलेषु। विसर्पं कुष्ठमाह,—विसर्पवदिति, अत्रोक्त विसर्पाख्यकुष्ठस्य वक्ष्यमाणविसर्परोगस्य, विचरविसर्पणं शीघ्रविसर्पणं, ततो भेदः। परिसर्पमाह,—शनैःशरीर इति। सिध्मकुष्ठमाह,—कण्डून्वितमिति। अपायि अकष्टकारि। प्रायशरूर्द्धकाये इति प्रायशब्दोपादानात् अधःकायेपि कदाचिद्भवति। सिध्मकुष्ठं द्विविधं। पुष्पिका सिध्मञ्च, पुष्पिकासिध्मस्य सुखसाध्यत्वात् सुश्रुते क्षुद्रकुष्ठेषु पाठः। पुष्पिकासिध्मस्य दुःखसाध्यत्वात् चरके महाकुष्ठे पाठ इत्यदोषः॥ ६॥

विचर्च्चिकामाह,—राज्योऽतिकण्डूर्त्तिरुज इति। राज्यो रेखाः, ताश्च सरुचा भवन्ति। कण्डूर्त्तिः खर्ज्जरीपीड़ा, रुजा वेदना, अतिशब्दः कण्डूर्त्तिरुग्भ्यां सम्बध्यते। गात्रेषु पाणिपादेषु, कण्डूमतीत्यादि। इत्येवमेव विचर्च्चिका पादगता यदा स्यात्, तदा विचर्च्चिका सञ्ज्ञां विहाय विपादस्य संज्ञां प्राप्नोतीत्यर्थः। किठिममाह। यत् स्रावि वृत्तमिति। रक्तकृष्णमिति केचित् पठन्ति। अथ पामा माह,—सास्राव इति। महास्राव कण्डूपरिदाहकैर्वर्त्तते या पिड़का सा तथाविधास्ताभिरुक्ता पामेति सम्बन्धः, ये तु सास्राव कण्डूपरिदाहवद्भिरिति पठन्ति ते तु व्याख्यानयन्ति। सास्रावौ यौ कण्डूपरिदाहौ तद्युक्तैः पुरुषैः कृत्वा अनुकाभिः पिड़काभिः कृत्वा, पामा उक्तेति शेषः। सैव कच्छुरिति सैव पाण्योः स्फिजोश्च तीव्रदाहैः। स्फोटैरुपगता कच्छुरुच्यते॥ ७॥

रकसामाह,—कण्डून्वितेति, शरीरे सकले काये। इदानीं कस्मिन् क्षुद्रकुष्ठे कस्याधिक्यमाह,—अरुः ससिध्ममिति। शेषाणि विपपिण्डिकाविचर्च्चिका पामा चर्म्मदलानि। अरुः सिध्मं रकसेति जेज्जटाचार्य्येण स्वकपोल-

किलासमपि कुष्ठविकल्प एव। तत्तु विधं वातेन पित्तेन श्लेष्मणा चेति। कुष्ठकिलासयोरन्तरन्त्वग्गतमेव किलासमपरिस्रावि च। तद्वातेन मण्डलमरुणं परुषं परिध्वंसि च। पित्तेन पद्मपत्रप्रतीकाशं सपरिदाहञ्च। श्लेष्मणापि श्वेतं स्निग्धं बहलं कण्डुमच्च। तेषु सम्बद्धमण्डलमन्तेजातं रक्तरोमचाऽसाध्यमग्निदग्धञ्च। कुष्ठेषु रुक्-त्वक्-सङ्कोच-स्वापस्वेदशोफभेदकौण्यस्वरोपघाता वातेन। पाकावदरणाङ्गुलिपतनकर्णनासाभङ्गाचिरागसत्वोत्पत्तयः पित्तेन। कण्डूवर्णभेदशोफा-

कल्पितः श्लोकः, इति गयदासाचार्य्यो न मन्यते। यस्मादेककुष्ठं महाकुष्ठञ्च वातादिभिर्भवति न कफात्, परिसर्पं पित्तात्। पाठान्तरञ्चातारुष्कमित्यादि पठति, तत्राभावान्न लिखितं॥ ८॥

किलासं दर्शयन्नाह,—किलासमपीत्यादि। अपि शब्दः सम्भावनायां, तेन किलासं कुष्ठविकृतिरेव सम्भाव्यते। अन्येतु, किमपि किलासं कुष्ठविकल्पो न भवति? उच्यते त्वग्गतमपरिस्रावि च, अन्तरं भेदः। त्वग्गतमिति कुष्ठं त्वग्रक्तमधिष्ठाय विदर्शयत्यात्मानं, किलासन्तु त्वचमेव, केवलां त्वचमधितिष्ठति इत्यर्थः। अन्येतु त्वग्गतमेव किलाससंज्ञं न दोषधात्वनुप्रवेशात् चित्रसंज्ञमित्याहुः। तथा पित्तं त्वग्गतन्तु यदा स्रावि, किलासं तत् प्रकीर्त्तितं। यदा तमतिक्राम्य तत् धातुमवगाहति हित्वा किलाससंज्ञां तत् चित्रसंज्ञां लभेत तत्। वातादिजानां किलासानां लक्षणमाह,—तद्वातेनेति। परिध्वंसीति स्पृष्टं सत्वरजोमुञ्चतीत्यर्थः, बहलं स्थूलं, लिप्तं वातपित्तश्लेष्मजेषु किलासेषु। संभिन्ने मण्डलमिति परस्परभिन्नमण्डलमित्यर्थः। अथ जातकुष्ठपाणिपादगुह्यजं अन्येत्वत्रान्तर्ज्जातं रक्तरोमचेति पठन्ति। अन्तर्म्मध्ये, जातानि रक्तानि लोमानि यत्र तत्तथा। ते चाचार्य्य अग्निदग्धञ्चेति चकारेणेमानि पादगुह्ये पूजमनुक्तमपि असाध्यं समुच्चिन्वन्ति। कुष्ठानां संक्षेपेनोक्तत्वात् अनुक्तमपि लिङ्गं दर्शयन्नाह,—कुष्ठे

स्रावगौरवाणि श्लेष्मणा। तत्रादिबलप्रवृत्तं पौण्डरीकं काकणं चासाध्यं ॥ ८ ॥

भवन्ति चात्र।

यथा वनस्पतिर्जातः प्राप्य कालप्रकर्षणं।
अन्तर्भूमिं विगाहेत मूलैर्वृष्टि-विवर्द्धितैः ॥
एवं कुष्ठं समुत्पन्नं त्वचि कालप्रकर्षतः।
क्रमेण धातून् व्याप्नोति नरस्याप्रतिकारिणः ॥
स्पर्शहानिः स्वेदनत्वमीषत्कण्डूश्च जायते।
वैवर्ण्यं रूक्षभावश्च कुष्ठे त्वचि समाश्रिते ॥
त्वक्स्वापो रोमहर्षश्च स्वेदस्याभिप्रवर्त्तनम्।
कण्डुर्विपूयकश्चैव कुष्ठे शोणितसंश्रिते ॥

च त्वगिति। वातकार्य्येषु स्वेदश्चिन्ताखापभेदावित्यपि पठन्ति। तत्र न अस्वेदनिषेधार्थः व्याधिस्वभावात्, स्वेदोपस्यादित्यपरे, कोऽन्यं नष्टकारिता, सत्तोत्पत्तयः क्रिमीणां जन्मानि। तेषामसाध्यत्वं दर्शयन्नाह,—तत्रादिबल-प्रवृत्तमिति। उत्पत्तावेव त्रिदोषबलप्रवृत्तत्वात्। धात्वनुक्रमेणाह,—अष्टानामस्थिमज्जशुक्रगतानामसाध्यमुपरिष्टादेव वक्ष्यति ॥ ८ ॥

इदानीमप्रतिकारिण उत्तरोत्तरधात्वनुक्रमेण दृष्टान्तं दर्शयन्नाह। भवन्ति चात्र यथेत्यादि। यथा वनस्पतिर्वृक्षः, कालप्रकर्षणं कालाधिक्यं, प्राप्यमूलैः प्राप्य अन्तर्भूमिं विगाहेत इति सम्बन्धः। त्वचीति अत्र त्वक्शब्देन रस उक्तः, तेन रसस्य इत्यर्थः। धातुगतकुष्ठानां लक्षणमाह,—स्पर्शहानिरित्यादि। प्रागेव रसधातुं क्रोड़ीकृत्य, दोषा कुष्ठारम्भकाः। अनेन रसधातुलक्षणेनोक्तमित्येके। अपरे त्वक्शब्देन रसमाहुः। जायत इत्यत्रापि सम्बध्यते, विपूयको दुर्गन्धता। तोदः जायत इत्यत्रापि सम्बध्यते। बाहुल्यं स्थूलमण्डलता। स्फोटः त्वचः स्फुटनं। स्थिरत्वकठिनमण्डलता, केचिदत्रान्यथा पठन्ति। स च पाठोऽभावान्न

वाहुल्यं वक्त्रशोषश्च कार्कश्यं पिड़कोद्गमः।
तोदः स्फोटः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते॥
दौर्गन्ध्यमुपदेहश्च पूयोऽथ क्रिमयस्तथा।
गात्राणां भेदनञ्चापि कुष्ठे मेदःसमाश्रिते॥
नासाभङ्गोऽक्षिरागश्च क्षते च क्रिमिसम्भवः।
भवेत् स्वरोपघातश्च अस्थिमज्जसमाश्रिते॥
कौण्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणं।
शुक्रस्थानगते लिङ्गं प्रागुक्तानि तथैव च॥ १०॥
स्त्रीपुंसयोः कुष्ठदोषाद्दुष्टशोणितशुक्रयोः।
यदपत्यन्तयोर्जातं ज्ञेयं तदपि कुष्ठितं।
कुष्ठमात्मवतः साध्यं त्वग्रक्तपिशिताश्रितम्॥
मेदोगतं भवेद्याप्यमसाध्यमत उत्तरं।
ब्रह्मस्त्रीसज्जनवधपरस्वहरणादिभिः॥

लिखितः। शुक्रगस्य कुष्ठस्य लिङ्गं दर्शयन्नाह,—कौण्यमिति। कुष्ठिनं वेति-पाठः। तदपीत्यपिशब्दात् पूर्व्वोक्तात् पूर्व्वोक्तान्यपि रसादिमज्जगतानि लिङ्गानि भवन्ति। कुष्ठितं सञ्जातकुष्ठं। अन्येतु कुष्ठवदिति पठन्ति, कुष्ठ-सहितमित्यर्थः। अन्ये कुष्ठिनमिति पठन्ति। तत्रापि सएवार्थः॥ १०॥

यदा स्त्रीपुंसयोः कुष्ठिनो वीजमुपहतं स्यात् तदा तयोः प्रजा नोत्पद्यते। उपतप्तगात्रवीजयोः पुनः प्रजापतिाप उत्पद्यते। इदानीं धात्वनुक्रमेऽपि साध्यादिभेदं दर्शयन्नाह,—ब्रह्मस्त्रीति। सज्जनः सत्पुरुषः, परस्वं परद्रव्यं। कुष्ठं दीर्घरोगाणां प्रधानमिति। जन्मान्तरे तदनुबन्धं दर्शयन्नाह,—म्रियते इति। अनुमतं भवतीत्यर्थः। कुष्ठजनकस्य कर्म्मणोऽजीर्णत्वात्। क्षीणपाप-यातसंसर्गसम्भवः। प्रधानं कुष्ठमाश्रित्य कुष्ठप्रभृतीनां संसर्गं परिहारं दर्शयन्नाह,—प्रसङ्गात् गात्रसंस्पर्शादिति। प्रसङ्गादिति प्रसङ्गेन, कृताभ्यासेन

कर्म्मभिः पापरोगस्य प्राहुः कुष्ठस्य सम्भवं।
म्रियते यदि कुष्ठेन पुनर्ज्जातेऽपि गच्छति॥
नातः कष्टतरो रोगो यथाकुष्ठं प्रकीर्त्तितं।
आहाराचारयोः प्रोक्तामास्थाय महतीं क्रियां॥
औषधीनां विशिष्टानां तपसश्च निषेवणात्।
यस्तेन मुच्यते जन्तुः स पुण्याङ्गतिमाप्नुयात्॥
प्रसङ्गाद्गात्रसंस्पर्शान्निश्वासात् सहभोजनात्।
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्।
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगश्च संक्रामन्ति नरान्नरं॥ ११॥

क्षतात्। पुनः पुनः क्षतादित्यर्थः। इदं विशेषणं गात्रसंसर्शनादिभिः सर्व्वैः सह प्रत्येकं सम्बध्यते। सह शय्यासनादिभिः एकशय्याश्रित माल्यं पुष्पं। औपसर्गिकरोगाः शीतलिकादयः। संक्रामन्ति आविशन्ति॥११॥

इति निबन्धसंग्रहे निदानस्थाने पञ्चमोऽध्यायः।

षष्ठोऽध्यायः।

अथातः प्रमेहनिदानं व्याख्यास्यामः।

दिवास्वप्नाव्यायामालस्यप्रसक्तं शीतस्निग्धमधुरमेद्यद्रवान्नपानसेविनं पुरुषं जानीयात् प्रमेही भविष्यतीति। तस्य चैवं

अथातः प्रमेहनिदानं व्याख्यास्यामः। प्रमेहहेतुमाह,—दिवास्वप्नेति। प्रसक्तं प्रकर्षेण सक्तं। अतिशयेन अनुषङ्गिनं मध्ये मेदुरं मेदोजनकमित्यर्थः। पुरुषं जानीयात् प्रमेही भविष्यति तत्राहुरेके। स्त्रीणां प्रमेहा न भवन्ति, तथाच तन्त्रान्तरे। "रजःप्रसेकान्नारीणां मासि मासि विशुध्यति। सर्व्वं

प्रवृत्तस्यापरिपक्वा एव वातपित्तश्लेष्माणो यदा मेदसा सहैक-त्वमुपेत्य मूत्रवाहिस्रोतांस्यनुसृत्याधो गत्वा वस्तेर्म्मुखमाश्रित्य निर्भिद्यन्ते तदा प्रमेहान् जनयन्ति ॥ १ ॥

तेषान्तु पूर्व्वरूपाणि हस्तपादतलदाहः स्निग्धपिच्छिल-गुरुता गात्राणां मधुरशुक्लमूत्रता तन्द्रा सादः पिपासा दुर्गन्धश्च श्वासस्तालुगलजिह्वादन्तेषु मलोत्पत्तिर्जटिली-भावः केशानां वृद्धिश्च नखानां। तत्राविलप्रभूतमूत्रलक्षणाः सर्व्वएव प्रमेहाः सर्व्वएव सर्व्वदोषसमुत्थाः सहपिड़काभिः।

तत्र कफादुदकेक्षुसुरासिकताशनैर्ल्लवणपिष्टसान्द्रशुक्रफेन-मेहाः दश साध्या दोषदूष्याणां समक्रियत्वात्। पित्तान्नी-लहरिद्राम्लक्षारमञ्जिष्ठाशोणितमेहाः षट् याप्या दोषदूष्याणां

शरीरं दोषाश्च न प्रमेहन्त्यतस्त्रियः। एतत्तु न युक्तं, सर्व्वतन्त्राप्रसिद्धेः प्रत्यक्ष-विरोधाच्च। सम्प्राप्तिं दर्शयन्नाह,—तस्य चैवमिति। अपरिपक्व आमाः मेदसेति अत्रादिशब्द लुप्तो द्रष्टव्यः। तेन वसादयो ग्राह्याः। अन्येतु मेद-स्यापरिपक्वमिति पठन्ति। चकारेण अनुक्तानपि वसादीन् समुच्चिनोति, उपेत्य, गत्वा। निर्भिद्यन्ते निःसरन्तीत्यर्थः। अन्येतु विनिर्भिद्यन्त इति पठित्वा तत्रैव स्थितिं कुर्व्वतीति व्याख्यानयन्ति। अपरे तु अतिद्रव्यत्वं यान्तीत्याहुः ॥ १ ॥

पूर्व्वरूपमाह,—तेषामिति। केशानां जटिलीभावः, अन्योन्यमिलनं स्वेदमलबाहुल्यात् रोगप्रभावाच्च। प्रमेहानां सामान्यलक्षणमाह,—तत्रा-विलमिति। आविलं समलं। तेषां प्रमेहाणां पिड़कानाञ्च दोषं दर्शयन्नाह,—सर्व्वदोषसमुत्था इति। एतेन प्रमेहानां पिड़कानाञ्च कुष्ठ-वत् सर्व्वदोषजत्वमुक्तं। सर्व्वेषां सर्व्वदोषजत्वेपि उत्कर्षतो दोषग्रहणं दर्शय-न्नाह,—तत्र कफादिति। उदकमेहः, इक्षुवालुकामेहः, सुरामेहः, सिकता-मेहः, शनैर्मेहः, लवणमेहः, पिष्टमेहः, सान्द्रमेहः, शुक्रमेहः, फेणमेहाश्चेति

विषमक्रियत्वात् । वातात् सर्पिर्व्वसाक्षौद्रहस्तिमेहाख्यला-
रोऽसाध्यतमा महात्ययिकत्वात् ॥ २ ॥

तत्र वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्म-प्रमेहान् जनयति । वातकफशोणितमेदोभिरन्वितं पित्तं पित्तप्रमेहान्, कफपित्तवसामज्जमेदोभिरन्वितो वायुर्व्वातप्रमेहान् ।

तत्र श्वेतमवेदनमुदकसदृशमुदकमेही मेहति, इक्षुरसतुल्यमिक्षुमेही, सुरामेही सुरातुल्यं, सरुजं सिकतानुविद्धं सिकतामेही, शनैः सकफं मृत्स्नं शनैर्म्मेही, विशदं लवणतुल्यं लवणमेही, हृष्टरोमा पिष्टरसतुल्यं पिष्टमेही, आविलं सान्द्रं सान्द्रमेही, शुक्रतुल्यं शुक्रमेही, स्तोकं स्तोकं सफेनं फेनमेही मेहति ।

अत ऊर्द्धं पित्तनिमित्तान् वक्ष्यामः । सफेनमच्छं नीलं नीलमेही मेहति, सदाहं हरिद्राभं हरिद्रामेही, अम्लरसगन्धमम्लमेही, स्रुतक्षारप्रतिमं क्षारमेही, मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही, शोणितप्रकाशं शोणितमेही मेहति ।

दश प्रमेहाः साध्या यद्यतिशयेन मेदोदूषितं न भवन्ति । दोषदूष्याणां समापक्रियत्वादिति । तत्र दोषः श्लेष्मा दूष्याणि रसमांसमेदोमज्जशुक्रलसिकौजांसि । एषां कटुतिक्तकषायादिभिः सममेव क्रिया । पित्तादिति । अत्र दोषः पित्तं, दूष्याणि रसमांसादीनि, तेषान्तु विषमक्रियत्वात् पित्तं हन्त्री रसमांसहन्यादिति । वातादिति । इति शीघ्रं विनाशकारित्वादिति महात्ययिकत्वं, पुनरेषामुत्तरोत्तर इतरधातुस्रावकत्वात् विषमत्वाच्चेत्तत्रापि सम्भवति ॥ २ ॥

इदानीं सर्व्वेषामेव सर्व्वजत्वं प्रकटयन्नाह,—तत्र वातपित्तमेदोभिरन्वित इति । सिकतानुविद्धं वालुकामिश्रं, मृत्स्नं पिच्छिलं । लवणन्तु लवणाम्बु-

अत ऊर्द्धं वातनिमित्तान् वक्ष्यामः। सर्पिःप्रकाशं सर्पिर्मेही मेहति, वसाप्रकाशं वसामेही, क्षौद्ररसवर्णं क्षौद्रमेही, मत्तमातङ्गवदनुप्रबद्धं हस्तिमेही मेहति।

मक्षिकोपसर्पणमालस्यं मांसोपचयः प्रतिश्यायः शैथिल्यारोचकाविपाकाः कफप्रसेकच्छर्द्दिनिद्राकासश्वासाश्चेति श्लेष्मजानामुपद्रवाः ॥ ३ ॥

वृषणयोरवदरणं वस्तिभेदो मेढ्रतोदो हृदिशूलमम्लीकाज्वरातीसारारोचका वमथुः परिधूमायनं दाहो मूर्च्छा पिपासा निद्रानाशः पाण्डुरोगः पीतविण्मूत्रत्वञ्चेति पैत्तिकानाम्। हृद्ग्रहो लौल्यमनिद्रा स्तम्भः कम्पः शूलं बद्धपुरीषत्वञ्चेति वातजानाम्। एवमेते विंशति प्रमेहाः सोपद्रवा व्याख्याताः। तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैश्चानुगतधातोः प्रमेहिणो दश पिड़का जायन्ते। तद्यथा।

शराविका सर्षपिका कच्छपिका जालिनी विनता

तुल्यं, हृष्टरोमा प्राप्तरोमाञ्च, पिष्टरसतुल्यं पिष्टमिश्रोदकतुल्यं। आविलमत्यर्थं कलुषं मेहति मूत्रयति इत्यर्थः। अतऊर्द्धमिति। मेहति तु क्षारप्रतिमं गलितक्षाराम्भतुल्यं, मञ्जिष्ठोदकप्रकाशं शोणितप्रकाशञ्च मूत्रं रक्तपित्तेऽपि भवति। ततः कोयं प्रमेहः? अत्रोच्यते— रक्तपित्ते प्रमेहपूर्व्वरूपं न भवति। मञ्जिष्ठाशोणितयोस्तु प्रमेहपूर्व्वरूपं सम्भव इति विशेषः। अत ऊर्द्धं वातनिमित्तान् वक्ष्याम इति। इदानीं प्रतिदोष उपद्रवान् दर्शयन्नाह,—मक्षिकोपसर्पणमिति ॥ ३ ॥

अवदरणं विदरणं, अम्लीका अम्लोद्गारः। वमथुश्छर्द्दिः, परिधूमायनं समन्ताद्धूमाः। दाहोऽग्निदग्धस्येव। वातज उपद्रवमाह,—हृद्ग्रह इति। लौल्यं, सर्व्वरसाभिकाङ्क्षिता वातजग्रहणीवत्। पिड़कानामुपद्रवविशेषाणां

पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति ॥ ४ ॥

शरावमात्रा तद्रूपा निम्नमध्या शराविका।
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी ॥
सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः।
जालिनी तीव्रदाहा तु मांसजालसमावृता ॥
महती पिड़का नीला पिड़का विनता स्मृता।
महत्यल्पाचिता ज्ञेया पिड़का सा तु पुत्रिणी ॥
मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका।
रक्ता सिता स्फोटवती दारुणा त्वलजी भवेत् ॥
विदारीकन्दवद्वृत्ता कठिना च विदारिका।
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका बुधैः ॥
ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तत्कृताः।
गुदे हृदि शिरस्यंसे पृष्ठे मर्म्मणि चोत्थिताः ॥
सोपद्रवा दुर्व्वलस्य पिड़काः परिवर्ज्जयेत् ॥ ५ ॥

सम्प्राप्तिं दर्शयन्नाह,—तत्र वसामेदोभ्यामिति। वसा मांसस्नेहः, सकलशरीरस्नेह इत्यन्ये। अभिपन्नशरीरस्य व्यापन्नशरीरस्य। अनुगतधातोः व्याप्तधातोः, पिड़कास्तुप्रायेण अधःकायएव। तासां पिड़कानां नामान्याह,—तद्यथेति ॥ ४ ॥

तासां लक्षणमाह,—शरावमात्रेति। गौरसर्षपसंस्थाना गौरसर्षपाकाराः। जालिनीत्यादि। यद्यपि "ये यन्मया स्मृता मेहास्तेषामेतास्तु तत्कृता" इति अग्रएव वक्ष्यति। तथापि जालिनीपित्तोत्तरा ज्ञेया तद्वचनस्य वाहुल्येनोक्तत्वात्। महती स्थूला। अल्पाचितेति सूक्ष्मपिड़कावेष्टिता। पिड़काजनितान् दोषानाह,—ये यन्मया इति। ये यन्मया यद्दोषारब्धाः, तेषां प्रमेहानां, एता इति पिड़काः। तासामसाध्यतां दर्शयन्नाह,—गुदेहृदीति अंशो

कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः॥
अधः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः।
प्रमेहपूर्व्वरूपाणामाकृतिर्यत्र दृश्यते॥
किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत्।
कृत्स्नान्यङ्गानि वा यस्मिन् पूर्व्वरूपाणि मानवे॥
प्रवृत्तमूत्रमत्यर्थं तं प्रमेहिणमादिशेत्।
पिड़कापीड़ितं गाढ़मुपसृष्टमुपद्रवैः॥
मधुमेहिनमाचष्टे स चासाध्यः प्रकीर्त्तितः।
स चापि गमनात् स्थानं स्थानादासनमिच्छति॥
आसनाद्वृणुते शय्यां शयनात् स्वप्नमिच्छति॥ ६॥

वाहुशिरः, सोपद्रव इति "विट्कासमांससंकोथ मोहहिक्कामदाह्वयाः। विसर्पमर्म्मसंरोधा पिड़कानामुपद्रवाः"। सोपद्रवाल्पकायाग्नेः पिड़का परिवर्ज्जयेत्। इति केचित् पठन्ति। सोपद्रव इति पुरुषविशेषणं॥ ५॥

वातजानामसाध्यत्वे हेतुं दर्शयन्नाह, कृत्स्नं शरीरमिति। निष्पीड्य स्रोतयित्वा मूत्रमार्गेण समस्तान् धातून् प्रवाहयित्वा इत्यर्थः। वसेत्युपलक्षणं, तेन भुञ्जोऽलसीकयोर्ग्रहणं, अधःप्रक्रमते अधःस्तौति भवति। गयदासाचार्य्यस्तु आपातनिकापूर्व्वं प्रमेहपूर्व्वरूपाणामित्यादि श्लोकत्रयमन्यथा पठन्ति। प्रवलीभवतीत्यर्थः। असाध्यस्तु इति पूर्व्वहेतुभ्य इति शब्दार्थः। इदानीं प्रमेह हेतुयुक्तस्य पुरुषस्य सामान्याकारेण लक्षणमाह,—प्रमेहपूर्व्वरूपाणामिति। प्रमेहस्य पूर्व्वोक्तसामान्यलक्षणस्य शेषं लक्षणं इदानीं प्रमेहपिड़काचिकित्सितनिर्द्दिष्टमर्थं पञ्चगुणाश्रयं। पूर्व्वरूपशोफपिड़कावस्थाख्यं प्रतिपादयन्नाह,—प्रमेहपूर्व्वरूपाणामिति। मेहस्य तत्पूर्व्वरूपं तत्पूर्व्वरूपे। अपतर्पणं वनस्पतिकषायपानादिकञ्च कर्त्तव्यं, प्रवृत्तमूत्रमत्यर्थमिति रूपज्ञानं, तत्र रूपज्ञानंचिकित्साविशेषार्थं। तदुक्तं तत्र एवमाकुर्व्वतस्य प्रमेहानां अवस्थान्तरप्राप्तानां संज्ञान्तरसाध्यत्वं दर्शयन्नाह,—पिड़कापीड़ितमिति,

यथा हि वर्णानां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेण शवलबभ्रुकपिलकपोतमेचकादीनां वर्णानामनेकेषामुत्पत्तिर्भवति। एवमेव दोषधातुमलाहारविशेषेणोत्कर्षापकर्षकृतेन संयोगविशेषेण प्रमेहाणां नानाकारणं भवति। भवति चात्र।

सर्व्वं एव प्रमेहास्तु कालेनाप्रतिकारिणः।
मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि ॥ ७ ॥

सचासाध्यइति चकार उत्पन्नानां वातजानामसाध्यत्वं समुच्चिनोति। उत्पत्तौ च सहजो यथा तत्साध्यः, पित्तजः पुनरसाध्यः, वातजः पुनरुत्पत्तिक्रमेण साध्यतमः। इदानीं मधुमेहिनो विकाराख्यं पञ्चविध क्रियाश्रयं लिङ्गं दर्शयन्नाह,—सचापीति। स्थानमूर्द्धभवनमिति सम्बन्धः। प्रणुते प्रार्थयते, प्रयनात् प्रय्यते ॥ ६ ॥

इदानीं दोषाणां त्रयाणामपि यथाविशन्ति प्रमेहसम्भवस्तथोपायेनाह,—यथा हिवर्णानामिति पञ्चानां वर्णानां सितहरितकृष्णपीतरक्तानां, उत्कर्षापकर्षकृतेन वृद्धिह्रासकृतेन, बभ्रूः कपिलः, पिङ्गलः कपोताभः, मेचकः श्यामलः, मलग्रहणमुपधातुभूतवसालसीकयोरुदकस्य चोपलक्षणं। इदानीं सर्व्वेष्वेव प्रमेहेषु पूर्व्वरूपादीनामुपेक्ष्य लक्षणमनर्थं दर्शयन्नाह,—भवति चात्रेति। कालः प्रथमक्रियादिकालः। अप्रतिकुर्व्वतः अप्रतिक्रियमाणस्य ॥७

इति निबन्धसंग्रहे निदानस्थाने षष्ठोऽध्यायः।

सप्तमोऽध्यायः।

अथातः उदराणां निदानं व्याख्यास्यामः।

धन्वन्तरिर्धर्म्मभृतां वरिष्ठो राजर्षिरिन्द्रप्रतिमो वभूव।

अथात इति। यो धन्वन्तरि भवत् स सुश्रुतमन्वशासमादितिसम्बन्धः,

ब्रह्मर्षिपुत्रं विनयोपपन्नं शिष्यं शुभं सुश्रुतमन्वशात्सः॥
पृथक्समस्तैरपि चेह दोषैः प्लीहोदरं बद्धगुदं तथैव।
आगन्तुकं सप्तममष्टमञ्च दकोदरं चेति वदन्ति तानि॥
सुदुर्ब्बलाग्नेरहिताशनस्य संशुष्कपूत्यन्ननिषेवणाद्वा।
स्नेहादिमिथ्याचरणाच्च जन्तोर्वृद्धिं गताः कोष्ठमभिप्रपन्नाः॥
गुल्माकृतिव्यञ्जितलक्षणानि कुर्व्वन्ति घोराण्युदराणि दोषाः॥१॥
कोष्ठादुपस्नेहवदन्नसारो निःसृत्य दुष्टोऽनिलवेगनुन्नः॥
त्वचः समुन्नम्य शनैः समन्ताद्विवर्द्धमानो जठरं करोति।
तत् पूर्व्वरूपं बलवर्णकाङ्क्षावलीविनाशो जठरे हि राज्यः॥

शिक्षितवानित्यर्थः। धर्म्मभृतां धार्म्मिकानां मध्ये इन्द्रप्रतिमो ज्ञानैश्वर्य्यादिभिः। ब्रह्मर्षिर्विश्वामित्रः। राजर्षिरपि तपसा ब्रह्मर्षित्वं प्राप्तवान्। विनयोपपन्नं जितेन्द्रियं, शुभमिति पूर्व्वोक्तैरन्वयशीलादिगुणैरुपेतं। उदराणां संख्यामाह,—पृथगिति। पृथग्दोषैः त्रीणि, समस्तैर्दोषैरेकं। एतेन चत्वारि दोषप्रधानानि अस्मिन् शास्त्रे। तानीति उदराणीत्यर्थः। प्लीहोदरादीनि चत्वारि दूष्यप्रधानानि, अष्टममिति संख्योक्तं प्लीहोदर यकृदाल्युदरयोरैक्यमेव ज्ञातव्यं। उदराणां हेतुं दर्शयन्नाह,—सुदुर्व्वलाग्नेरिति। दुर्व्वलाग्नेरत्यन्तनष्टाग्नेः, अहिताशनस्येति विरुद्धसमशनाध्यसनविषमाशनस्य। स्नेहादीत्यादिशब्दात् वमनविरेचनास्थापनानुवासनपरिग्रहः। मिथ्याचरणं यथोक्तानुष्ठानपरित्यागः। जन्तोः प्राणिनः। अभिप्रपन्नाः प्राप्ता इत्यर्थः। किं विशिष्टान्युदराणि कुर्व्वन्ति? गुल्माकृतिव्यञ्जितलक्षणानि। गुल्माकृत्या गुल्मरूपेण। व्यञ्जितानि प्रकटितानि लक्षणानि येषां तानि तथा। पुनरपि किं विशिष्टानि? घोराणि कृच्छ्राणि॥१॥

सम्प्राप्तिं दर्शयन्नाह,—कोष्ठादिति। उपस्नेहवदिति नवघटाद्युपस्नेहो यथा नूतनस्रोतोभिर्व्वहिस्रावो दृश्यते तद्वत् कोष्ठात् अन्नसारो दुष्टः। पुनः किम्भूतः? अनिलवेगनुन्नः वातवेगप्रेरितः। किं कृत्वा? त्वचः समुन्नम्य

जीर्णापरिज्ञानविदाहवत्यो वस्तौ रुजः पादगतश्च शोफः।
सङ्कृच्छ पार्श्वोदरपृष्ठनाभीर्यद्वर्द्धते कृष्णसिरावनद्धं॥
सशूलमानाहवदुग्रशब्दं सतोदभेदं पवनात्मकं तत्।
यच्चोषतृष्णाज्वरदाहयुक्तं पीतं सिरा यत्र भवन्ति पीताः॥
पीताक्षिविण्मूत्रनखाननस्य पित्तोदरं तत्त्वचिराभिवृद्धि।
यच्छीतलं शुक्लसिरावनद्धं गुरु स्थिरं शुक्लनखाननस्य॥
स्निग्धं महच्छोफयुतं ससादं कफोदरं तच्च चिराभिवृद्धि॥
स्त्रियोऽन्नपानं नखरोममूत्रविड़ार्त्तवैर्युक्तमसाधुवृत्ताः।
यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा॥
तेनाशु रक्तं कुपिताश्च दोषाः कुर्व्वन्ति घोरं जठरं त्रिलिङ्गं।
तच्छीतवाताभ्रसमुद्भवेषु विशेषतः कुप्यति दह्यते च॥
स चातुरो मूर्च्छति सम्प्रसक्तं पाण्डुः कृशः शुष्यति तृष्णया च।

आनम्रो कृत्वा। पुनः किम्भूतो रसः? समन्तात् विवर्द्धमानः। समन्तात् सर्व्वतो वृद्धिं गच्छन्। जीर्णेति जीर्णापरिज्ञानविदाहौ विद्यते यासु वस्ति-रुजासु ता स्तथा। जीर्णापरिज्ञानं अन्नपरिणामानिश्चयः। जीर्णपरिज्ञानन्तु यथासम्भवात् पुरुषस्यैव ज्ञेयं। वातोदरमाह,—संगृह्येति। पित्तोदरमाह। यच्चोषेति। अचिराभिवृद्धि शीघ्रं वर्द्धनशीलं। श्लेष्मोदरमाह,—यच्छीतल-मिति। स्थिरं कठिनं, ससादं अङ्गग्लानियुक्तं। सन्निपातोदरमाह,—स्त्रियोऽन्नपानमिति। स्त्रियोऽन्नपानं नखरोममूत्रविड़ार्त्तवयुक्तं यस्मै पुरुषाय प्रयच्छति ददाति, किम्भूताः स्त्रियः? असाधुवृत्ताः दुराचाराः। स्त्रीग्रहणमत्रोप-लक्षणं तेनान्येऽपि सन्निहिता अविवेकिनो ग्राह्याः। अपरं, अरयः शत्रवः। गरान् कृत्रिमविषानि यस्मै प्रयच्छति। दुष्टाम्बु सविषमत्स्यादिसम्बन्धात् विषमेव। दावाग्निवातातपाद्यभिभवेन मन्दतां गतं। विषपीतो विषसेवी। विषं दूषीविषं तेन नखरोमादिना विषकल्पेन गरेण दूषीविषेण चाशु शीघ्रं

प्रकीर्त्तितं दूष्युदरन्तु घोरं प्लीहोदरं कीर्त्तयतो निबोध ॥
विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च।
प्लीहाभिवृद्धिं सततं करोति प्लीहोदरं तत् प्रवदन्ति तज्ज्ञाः॥
वामे च पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः ॥२॥
सव्येतरस्मिन् यकृति प्रदुष्टे ज्ञेयं यकृद्दाल्युदरं तदेव।
यस्यान्त्रमन्नैरुपलेपिभिर्व्वा बालाश्मभिर्व्वा सहितैः पृथग्वा ॥
सञ्चीयते तत्र मलः सदोषः क्रमेण नाड्यामिवसङ्करोहि।
निरुध्यते चास्य गुदे पुरीषं निरेतिकृच्छ्रादपि चाल्पमल्पं ॥
हृन्नाभिमध्ये परिवृद्धिमेति यच्चोदरं विट्समगन्धिकञ्च।
प्रच्छर्दयन् बद्धगुदी विभाव्य ततः परिस्राव्युदरं निबोध ॥
शल्यं यदन्नोपहितं तदन्त्रं भिनत्ति यस्यागतमन्यथा वा।

रक्तं कुपितमिति बोद्धव्यं। त्रिलिङ्गं वातपित्तश्लेष्मलिङ्गं। प्रसक्तं निरन्तरं। दूष्युदरं इतिवदेव सान्निपातिकोदरं तदेव दूष्युदरं। एतेन संख्यातिरेकः। घोरं भयानकं, पुनर्घोरं कष्टकारि, निबोधजानीह्यभिष्यन्दिदोषः। धातुमलस्रोतसां हृद्रप्राप्तिजनकं। असृक्कफश्चेति, असृग् ग्रहणेन पित्तस्यापि ग्रहणं, प्लीहोदरस्य वामपार्श्वस्थितस्य प्रतिगच्छेति। सीदति अङ्गग्लानियुक्तो भवति ॥ २ ॥

अत्र प्लीहोदरारभ्य दालुदरस्यैवावबोधं दर्शयन्नाह,—सव्येतरस्मिन्नित्यादि। सव्येतरस्मिन् दक्षिणपार्श्वे, तदेव प्लीहोदरं यद्दालुदरं ज्ञेयं, क्व ज्ञेयमित्याह। यकृति कालखण्डे, किम्भूते प्रदुष्टे, एतेन संख्यैकः। बद्धगुदं दर्शयन्नाह,—यस्येति। यस्य पुरुषस्य पुरीषं निरुध्यंत इति सम्बन्धः। कैर्निरुध्यत इत्याह,—अन्नैरित्यादि। उपलेपिभिः पिच्छिलादिभिः, वात्र समुच्चये। सहितैरिति। एकत्रमिलितैः समुदितै-

तस्मात् स्रुतान्त्रात् सलिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु भूयः॥
नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यतेऽतीव विदह्यते च।
एतत् परिस्राव्युदरं प्रदिष्टं दकोदरं कीर्त्तयतो निवोध॥
यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढ़ः।
पिवेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि॥
स्नेहोपलिप्तेष्वथवापि तेषु दकोदरं पूर्व्ववदभ्युपैति।
स्निग्धं महत्सम्परिवृत्तनाभि भृशोन्नतं पूर्णमिवाम्बुना च॥
यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत्।
आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता।
शोफः सदनमङ्गानां सङ्गो वातपुरीषयोः॥
दाहस्तृष्णा च सर्व्वेषु जठरेषु भवन्ति हि॥

रित्यर्थः। पृथगिति एकैकैरित्यर्थः। मलः पुरीषः, सदोषः दोषत्रय-सहितः। नाड्यां प्रनालिकायां, सङ्करोऽवकरः, प्रचुरतृणादिसहितइत्यर्थः। निरेति निःसरति, वद्धगुदीविभाव्य स पुरुषो वद्धगुदी ज्ञेयः। परिस्राव्युदरमाह,—ततः इति। यत् शल्यं अन्नोपहितं अन्नसम्बन्धयुक्तं। तत्र अन्नं भिनत्ति विदारयति। यस्य पुरुषस्य शल्यं शर्करा कोष्ठास्थिकण्टकादिकं। आगतमन्यथावेति वा शब्दोऽवधारणे, तेनान्यथैव विलोमेन तिर्य्यगेवागतं तत्रनुलोमेन श्रुतो गलितः। दकोदरमाह,—दकोदरमिति। दकोदरमुदकोदरमित्यर्थः। तद्वहानि तोयवहानि। स्नेहोपलिप्तेष्वथवापि तेषु इति। स्नेहादिपानादिनापि तेषु, श्रोतस्सु स्नेहादिलिप्तेषु यदा शीतलजलं पिवेत्तदपीत्यर्थः। पूर्व्ववदिति क्षतान्त्रोदरे यथा सलिलस्याधोगामित्वादधोनाभेरुदरोत्पत्तिः। यथाच गुदादास्राव तद्वदिति जेज्जटाचार्य्येण; पुनः पूर्व्ववत् इत्यत्रान्यान्युदराणि यथा भवन्ति। तथा इदमपीति व्याख्यातं। तन्नेच्छति गयदासाचार्य्यः। परिवृत्तनाभिः उच्छ्रिन्ननाभिरिति स्वप्ना क्षुभ्यति। कम्पतेचेति कम्पनमतिशयेन, तेषामष्टाना-

अन्ते सलिलभावन्तु भजन्ते जठराणि तु।
सर्व्वाण्येव परीपाकात्तदा तानि विवर्ज्जयेत्॥ ३॥

मपि सामान्यं लिङ्गं व्याख्यातं। तन्नेच्छति गयदासाचार्य्य इति दर्शयन्नाह,—आध्मानमिति। जेज्जटाचार्य्येण पुनरेते उपद्रवा व्याख्याताः। तन्नेच्छति गयदासाचार्य्यः। साध्यासाध्यविभागमाह,—अन्त इति। परिपाकात् परिणामेन॥ ३॥

इति निबन्धसंग्रहे निदानस्थाने सप्तमोऽध्यायः।

अष्टमोऽध्यायः।

अथातो मूढ़गर्भनिदानं व्याख्यास्यामः।

ग्राम्यधर्म्मयानवाहनाध्वगमनप्रस्खलनप्रपतनपीडनधावनाभिघातविषमशयनासनोपवासवेगाभिघातातिरूक्षकटुतिक्तभोजनशाकातिक्षारसेवना-तिसारवमनविरेचनप्रेङ्खोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्ब्बन्धनान्मुच्यते गर्भः फलमिव वृन्तवन्धनादभिघातविशेषैः। स विमुक्तवन्धनो गर्भाशयमतिक्रम्य यकृत्प्लीहान्त्रविवरैरजस्रं समानः कोष्ठसङ्क्षोभमापादयति तस्या जठरसङ्क्षोभाद्वायुरपानोमूढ़ःपार्श्ववस्ति-शीर्षो दरयोनिशूलानाहमूत्र-

अथात इति। मूढ़ो निरुद्धगतिः, तदुक्तं "सर्व्वावयवसम्पूर्णोमनोबुद्ध्यादिसंयुतः। विगुणापानसंमूढ़ो मूढ़गर्भोऽभिधीयते"। तस्य हेतुं दर्शयन्नाह,—ग्राम्यधर्म्म इति। ग्राम्यधर्म्म मैथुनं, यानं रथादि, अध्वगमनं मार्गगमनं, प्रस्खलनं आखुड़नादि, प्रपतनं प्रासादादेः सकाशादतिशयेन पतनं। प्रपीड़नमतिशयेन पीड़नं, प्रधावनमतिशयेन धावनं, अभिघातः

सङ्गानामन्यतममापाद्य गर्भं व्यापादयति तरुणं शोणितस्रावेण तमेव कदाचिद्विवृद्धमसम्यगागतमपत्यपथमनुप्राप्तमनिरस्यमानमपानवैगुण्यसंमोहितं गर्भं मूढ़गर्भमित्याचक्षते। ततः स कीलः प्रतिखुरो बीजकः परिघ इति। तत्र ऊर्द्ध्वबाहुशिरःपादो यो योनिमुखं निरुणद्धि कील इव स कीलः। निःसृतहस्तपादशिरःकायसङ्गी प्रतिखुरः। यस्तु निर्गच्छत्येकशिरोभुजः स बीजकः। परिघ इव योनिमुखमावृत्य तिष्ठेत् स परिघ इति चतुर्व्विधो भवतीत्येके भाषन्ते तत्तु न सम्यक् कस्मात् स यदा विगुणानिलप्रपीड़ितोऽपत्यपथमनेकधा प्रतिपद्यते तदा संख्या हीयते। तत्र कश्चित् द्वाभ्यां सक्थिभ्यां योनिमुखं प्रतिपद्यते, कश्चिदाभुग्नैकसक्थिरेकेन। कश्चिदाभुग्नसक्थिशरीरः स्फिग्देशेन तिर्य्यगागतः। कश्चिदुरःपार्श्वपृष्ठानामन्यतमेन योनिद्वारं पिधायावतिष्ठते। अन्तःपार्श्वाप-

शस्त्रलोष्टकसादिभिः प्रहारं, वेगाभिघातो वाताद्यवरोधः, प्रेङ्खोलनं हिन्दोलनं, गर्भशातजं भेषजेन गर्भपातनं। केचिदेतत् गद्यं अन्यथा पठन्ति। तत्तु प्रभावान्न लिखितं। बन्धनमात्रं गर्भाशयप्रतिबद्धाः शिराः पेश्यश्च। मोचने उपमानमाह,—फलमिति। एतेनैतदुक्तं भवति। यथा वृन्तः परिपक्वं फलं। अभिधारयतीति सम्बन्धः। तरुणं घनं, मूढ़गर्भस्य निरुक्तिमाह,—तमेवेति। असम्यगागतं विलोमभावेनागतं। अपत्यपथमनुविलोमभावेनागतं। अवाग्गमनात् अपत्यपथं योनिं अनुप्राप्तं आश्रितं, अनिरस्यमानं अनिःसरन्तं। सम्मोहितं मूर्च्छितं। तस्य चातुर्व्विध्यमाह,—तत इति। असम्यगागमनात् प्रकारान् प्रकटयन्नाह,—तत्रोर्द्धबाहुशिर इति। कायसङ्गी निरुद्धकायः। एकशिरोभुज इति एकोभुजः शिरसा सह निर्गच्छतीत्यर्थः। परिघ इवेति परिघोगलदण्डः। तानेवानेकप्रकारान् दर्शयन्नाह,—

वृत्तशिराः कश्चिदेकेन वाहुना कश्चिदाभुग्नशिरा वाहुद्वयेन। कश्चिदाभुग्नमध्यो हस्तपादशिरोभिः। कश्चिदेकेन शक्थ्ना योनिमुखमभिप्रतिपद्यतेऽपरेण पायुमित्यष्टविधा मूढ़गर्भगतिरुद्दिष्टा समासेन। तत्र द्वावन्त्यावसाध्यौ मूढ़गर्भौ शेषानपि विपरीतेन्द्रियार्थाक्षेपकयोनि-भ्रंशसम्बरणमक्कल्लश्वासकासभ्रम-निपीड़ितान् परिहरेत्॥ १॥

भवन्ति चात्र।

कालस्य परिणामेन मुक्तं वृन्ताद्यथाफलम्।
प्रपद्येत स्वभावेन नान्यथा पतितुं फलम्॥
फलं कालप्रकर्षेण मुक्तो नाड़ीविबन्धनात्।

तत्रेति। आभुग्नं सङ्कुचितं, एकेन सक्थ्नो योनिमुखं प्रतिपद्यत इति सम्बन्धनीयं। कश्चिदिति। आभुग्नं सन्धिशरीरं यस्येत्यर्थः। योनिमुखं प्रतिपद्यत इत्यत्रापि सम्बन्धनीयं। कश्चिदुर इति। पिधाय आच्छाद्य अन्त इति। पार्श्वमध्यनिक्षिप्तशिराः। एकेन वाहुना योनिमुखं प्रतिपद्यत इति सम्बन्धनीयं। भुग्न इति अत्रापि योनिमुखं प्रतिपद्यत इति सम्बन्धनीयं। कश्चिदाभुग्नमध्य इत्यत्रापि सम्बन्धनीयं। कश्चिदिति। अष्टविधा विस्तरेण तु तिर्य्यग्ग्रीवाजङ्घाप्रकारेणानन्ताः। तेष्वसाध्यं निर्द्दिशन्नाह—तत्रेति। द्वावन्त्यौ सप्तमाष्टमौ असाध्यौ स्वभावानिव। अन्येष्वप्यवस्थया असाध्यत्वं दर्शयन्नाह। शेषानपीत्यादि। विपरीतेन्द्रियार्थादिभिः पीड़िता जननीयैर्मूढ़गर्भैस्ते तथाविधा तान्। विपरीतेन्द्रियार्था रूपादिग्रहण-भ्रान्ताः। योनिभ्रंशः योनिवर्त्मभ्रंशः। योनिसम्बरणं योनिसङ्कोचं, प्रसूताया वायुरसृग्वस्तिशिरःप्रभृतिषु शूलं करोति। भ्रमश्चक्राधिरूढ़स्येव भ्रमणं॥ १॥

स्वभावप्रजननकाले यथा मूढ़ोगर्भो न भवति तथा श्लोकद्वयेन दर्शयन्नाह,—कालस्येति। यथा कालस्य परिणामेन कालकृतपरिपाकेन वृन्तात्

गर्भाशयस्थो यो गर्भो जननाय प्रपद्यते ॥
कृमिवाताभिघातैस्तु तदेवोपद्रुतं फलम् ।
पतत्यकालेऽपि यथा तथा स्याद्गर्भविच्युतिः ॥ २ ॥
आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविच्युतिः ।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः ॥
प्रविध्यति शिरो या तु शीताङ्गी निरपत्रपा ।
नीलोद्गतसिरा हन्ति सा गर्भं सच तां तथा ॥
गर्भास्पन्दनमावीनां प्रणाशः श्यावपाण्डुता ।
भवत्युच्छ्वासपूतित्वं शूलं चान्तर्मृते शिशौ ॥

मुक्तं फलं स्वभावेन पतितं पतनं प्रपद्यते प्राप्नोति एवं कालप्रकर्षेण-नाड़ीविबन्धानामुक्तो यो गर्भाशयस्थो गर्भः सजननाय प्रपद्यते जन्म-प्राप्नोतीत्यर्थः। मूढ़गर्भो यथा भवति तथा दर्शयन्नाह,—कृमिवाताभि-घातै रिति। गर्भविच्युतिर्द्विविधा तत् नव्यस्य स्रावरूपेण। घनावयवस्य पातेन। तत्र नव्यस्य स्रावणे। मूढ़गर्भनामास्ति। विगुणानिलसम्मोह-निर्गमलक्षणाभावात् ॥ २ ॥

पतत्यस्तीति दर्शयन्नाह,—आचतुर्थादिति। गर्भं विमुक्तिप्रस्रवेत् स्रावरूपा भवेत्। एतेन मासचतुष्टयं। यावत् मूढ़गर्भतानास्तीत्युक्तः। तत इत्यादि ततश्चतुर्थमासादूर्द्ध्वं स्थितशरीरस्य विच्युतिः। पातः पातरूपा भवेत्। एतेन विचुरतिरियं शीताङ्गी निरपत्रपाः नीलोद्गतशिरा हन्ति स गर्भः सच तां तथा। प्रविद्धति ताड़यति अतिशयने धुनोतीत्यर्थः। अन्ये अपविद्धशिरा इति पठन्ति। तत्रावनतशीर्षेत्यर्थः। या स्त्रीनिरपात्रपा लज्जा-रहिता, नीलोद्गतसिरा सा गर्भं सच तां तथा। सा स्त्री गर्भं हन्ति। स च गर्भवतीं स्त्रीं हीनातीत्यर्थः। तथानेन प्रकारेण गर्भिणीरक्षार्थं अन्तर्मृतस्य गर्भस्याप्रकर्षणे यल्लक्षणं तद्दर्शयन्नाह,—गर्भास्पन्दन इति आवी प्रसववेदना अथवा आवीशब्देन योनेर्मूत्रकफप्रसेकादीन्यावलिङ्गान्युच्यन्ते। मानसागन्तु-

मानसागन्तुभिर्म्मातुरुपतापैः प्रपीड़ितः।
गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीड़ितः॥
वस्तमारविपन्नायाः कुक्षिः प्रस्पन्दते यदि।
तत्क्षणाज्जन्मकाले तं पाटयित्वोद्धरेद्भिषक्॥ ३॥

भिरिति मातुर्मृताया अपि जीवतो गर्भस्य अपकर्षणं दर्शयन्नाह,—वस्तमार इति। वस्तमारमृगलवत् मरणं। एतेन ग्रीवामोटनेन आशुतमं अक्लिष्टं मरणमुक्तं तेन विपन्नाया मृतायाः स्त्रियइत्यर्थः, लक्षणात् घटिकाद्वयमध्ये परतस्तु गर्भोऽपि मृतइति भावः। तत्क्षणादित्यत्र मुहूर्त्तादिति पठन्ति। तत्रापि सएवार्थः। जन्मकालेनैव न मासादिकाल इत्यर्थः। तं गर्भं पाटयित्वा स्त्रीकुक्षिविदार्य्य अत्र केचित्। यदा सोऽमृतो गर्भे मृतो वस्तिरिव तत् ते त्वया नार्य्यास्त चिरानह्यते भृशं। उत्क्षिप्यन्त इवाङ्गानि मूत्रवस्तिश्च भिद्यते। क्लोमप्लीहायकृच्चैव पुष्पसंच्छदये तथा। गर्भेण पीड़ितं पित्तादूर्द्धं प्रक्रामति क्रिया। सा सूयते मुह्यति च कृच्छ्रश्वासा च जायते। पूतिगन्धस्तथा स्वेदो जिह्वातालु च शुष्यति। वेपते भ्राम्यति तथा जीवितं चोपरुध्यते। एतैर्लिङ्गैर्व्विजानीयात् मूढ़ं गर्भचिकित्सकाः। इति पठन्ति, तत् न पठनीयं पुनरुक्तत्वात्। जेज्जटाचार्य्यादिभिः परिहृतत्वाच्च। श्रीब्रह्मदेवेन तु किञ्चित् व्याख्यातं॥ ३॥

इति निबन्धसंग्रहे निदानस्थाने अष्टमोऽध्यायः।

नवमोऽध्यायः।

अथातो विद्रधीनां निदानं व्याख्यास्यामः।
सर्व्वामरगुरुः श्रीमान्निमित्तान्तरभूमिपः।
शिष्यायोवाच निखिलमिदं विद्रधिलक्षणं॥ १॥

अथात इति शिष्यार्थमुवाचेति सम्बन्धः। अमृतदानेन सर्व्वान् देवान् अमराः कृताः। तेनासौ धन्वन्तरिः। सर्व्वेषां देवानां गुरुरित्यर्थः। श्रीमान्

त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रिताः।
दोषाः शोफं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम्॥
महामूलं रुजावन्तं वृत्तं चाप्यथवायतं।
तमाहुर्विद्रधिं धीरा विज्ञेयः षड्विधः स च॥
पृथग्दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा।
षण्णामपि हि तेषान्तु लक्षणं संप्रवक्ष्यते॥
कृष्णोऽरुणो वा परुषो भृशमत्यर्थवेदनः।
चिरोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः॥
पक्वोडुम्बरसङ्काशः श्यावो वा ज्वरदाहवान्।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः॥
शरावसदृशः पाण्डुः शीतः स्तब्धोऽल्पवेदनः।
चिरोत्थानप्रपाकश्च सकण्डूश्च कफोत्थितः॥ २॥

ज्ञानातिशयेन, ऐश्वर्य्येण च युक्त इत्यर्थः। निमित्तान्तरभूमिप इति। निमित्तान्तरेण कारणान्तरेण, तेष्वपि भैषज्यप्रदानलक्षणेन भूपालतां गत इत्यर्थः। अपुत्रस्य काशिराजस्य परमाराधनं। यानि वर्णितं नूनमधिष्ठाय पुत्रत्वमापन्न इति कारणान्तरं व्याख्यानयन्ति। शिष्यायोवाच शिष्यार्थं कथितवानित्यर्थः। निखिलं समस्तं, इदं वक्ष्यमाणं। अनेन धन्वन्तरिस्वरूपवर्णनत्वेन विद्रधेर्गरीयस्त्वं ख्यापितं भवति॥ १॥

संप्राप्तिं सामान्यलक्षणं दर्शयिष्यन्नाह,—त्वग्रक्तेति। येनोच्छ्रितमिति सम्बन्धनीयं। धीरा धीमन्त एतेन सम्प्राप्तिरुक्ता, महामूलमित्यादि सामान्यलक्षणमुक्तं। विशिष्टं कृष्णोऽरुण इत्यादि। कारणन्तु सामान्यशोफकारणाभिधानेनैवोक्तं। संख्यामाह,—विज्ञेयः स च षड्विध इति। तदेव षड्विधत्वमाह,—पृथगिति। समस्तैश्चेत्येकः क्षतेनाप्येकः। असृजाप्येक इति षट्। वातविद्रधिलक्षणमाह,—कृष्ण इति चिरोत्थानप्रपाक

तनुपीतसिताश्चैषामास्रावाः क्रमशः स्मृताः।
नानारूपरुजास्रावो घाटालो विषमो महान्॥
विषमं पच्यते वापि विद्रधिः सान्निपातिकः।
तैस्तैर्भावैरभिहते क्षते चापथ्यसेविनः॥
क्षतोष्मा वायुविसृतः सरक्तं पित्तमीरयेत्।
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः।
एष विद्रधिरागन्तुः पित्तविद्रधिलक्षणः॥ ३॥
कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते॥
उक्ता विद्रधयो ह्येते तेष्वसाध्यस्तु सर्व्वजः।
आभ्यन्तरानतस्तूर्द्धं विद्रधीन् परिचक्षते॥

इति नानाप्रपाकपाकश्चेत्यर्थः। पित्तविद्रधिमाह,—पक्वोडुम्बरसङ्काश इति। कफजमाह,—शरावसदृश इति सदृशेन महत्वमुक्तं॥ २॥

तेषां विद्रधीनां यथाक्रममास्रावानाह,—तनुपीतसिता इति। एतेषां वातपित्तकफोत्थानां विद्रधीनां सान्निपातिकमाह,—नानावर्णरुजा इति। नानावर्णाः कृष्णपीतशुक्लाः। नानारुजास्तोददाहकण्ड्वाद्याः। नानास्रावास्तनुपीतशुक्लाः स्रवन्ति यस्य स तथोक्तं। घाटालः इति ऊर्द्धभागो महान् यस्येति स घाटालः। विषमोऽसाध्यत्वात् विषमं पच्यते वापीति। चिराचिरगम्भीरोत्तानानुन्नतोन्नतभेदेन। आगन्तोः सम्प्राप्तिं दर्शयन्नाह,—तैस्तैर्भावैरिति अभिहते तैस्तैरिति पतनगूढ़प्रहारादिभिरित्यर्थः। तेन सुतशोणितपिशितादीनां ग्रहणं। वातेन विस्तारितपित्तविद्रधिलक्षणो भवतीत्यध्याहारः॥ ३॥

रक्तविद्रधिलक्षणमाह,—कृष्णस्फोटावृतस्येति वाह्येष्वसाध्यमाह,—उक्ता विद्रधय इति, सर्व्वजः सान्निपातिकः। अन्तर्व्विद्रधेः हेतुसंप्राप्तिं लक्षणान्याह,—गुर्व्वसात्म्येति। गुर्व्वसात्म्येत्यादि विदाहिभिरिति यावत्

गुर्व्वसात्मविरुद्धान्नशुष्कसंक्लिन्नभोजनात् ॥
अतिव्यवायव्यायामवेगाघातविदाहिभिः।
पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिणम् ॥
वल्मीकवत् समुन्नद्धमन्तः कुर्व्वन्ति विद्रधिम्।
गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा ॥
वृक्कयोः प्लीह्नि यकृति हृदये क्लोम्नि वा तथा।
तेषां लिङ्गानि जानीयाद्वाह्यविद्रधिलक्षणैः ॥
आमपक्वैषणीयेन पक्वापक्वं विनिर्द्दिशेत्।
अधिष्ठानविशेषेण लिङ्गं शृणु विशेषतः ॥
गुदे वातनिरोधस्तु वस्तौ कृच्छ्राल्पमूत्रता।
नाभ्यां हिक्का तथाटोपः कुक्षौ मारुतकोपनम्।
कटीपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे तु विद्रधौ ॥
वृक्कयोः पार्श्वसङ्कोचः प्लीह्नाच्छ्वासावरोधनम्।
सर्व्वाङ्गप्रग्रहस्तीव्रो हृदि शूलश्च दारुणः ॥
श्वासो यकृति तृष्णा च पिपासा क्लोमजेऽधिका ॥ ४ ॥

हेतुः। पृथक् सम्भूयचेति संप्राप्तिः। गुल्मरूपिणं वल्मीकवत्समुन्नद्धमिति च सामान्यलक्षणं। तथा वल्मीकवत्समुन्नद्धत्वं पच्यमानावस्थायां तेषां वातादि-भेदभिन्नायां विशेषवर्णसंख्यादिकं वाह्यविद्रधेः ज्ञेयं। जेज्जटाचार्य्यस्तु आभ्यन्तरस्तु आगतोरभावमेव मन्यते। तेषां वाह्यानामाभ्यन्तराणाञ्च स्थान-माह,—गुदेवस्तीति। गुदादिस्थानेषु दोषा विद्रधयाकृतीति सम्बन्धः। वस्तिमुखेन तु वस्तौ अत्र मांसमेदसोरभावात्। वङ्क्षणं ऊरुमूलाश्रयः। गण्डक इति लोके। वृक्कौ मांसपिण्डद्वयं, एको वामपार्श्वस्थितः, द्वितीयो दक्षिणपार्श्वस्थितः। हृदयं कमलमुकुलाकारमधोमुखं। क्लोमकाल-खण्डादधस्तात् स्थितं, दक्षिणपार्श्वस्थं तिलकं प्रसिद्धं। तेषां लिङ्गात्

आमो वा यदि वा पक्को महान्वा यदि चेतरः।
सर्व्वो मर्म्मोत्थितश्चापि विद्रधिः कष्ट उच्यते॥
नाभेरुपरिजाः पक्का यान्त्युर्द्ध्वमितरे त्वधः।
जीवत्यधो निस्रुतेषु स्रुतेषूर्द्ध्वं न जीवति॥
हृन्नाभिवस्तिवर्ज्या ये तेषु भिन्नेषु वाह्यतः।
जीवेत् कदाचित् पुरुषो नेतरेषु कदाचन॥ ५॥
स्त्रीणामपप्रजातानां प्रजातानां तथाऽहितैः।
दाहज्वरकरो घोरो जायते रक्तविद्रधिः॥
अपि सम्यक्प्रजातानामसृक्कायादनिःसृतं।
रक्तजं विद्रधिं विद्यात् कुक्षौ मक्कल्लसंज्ञितं॥

विजानीयात् वाह्यविद्रधिलक्षणैः। तेषां आभ्यन्तराणामित्यर्थः। वाह्या-नामाभ्यन्तराणाञ्च अधिष्ठानविशेषेण लक्षणं दर्शयन्नाह,—अधिष्ठान इति आटोपः संक्षोभः, पार्श्वसङ्कोचः पार्श्वोत्पाटनमिव, हृदीति हृदयोत्थविद्रधौ सर्व्वाङ्गग्रहादयः उपद्रवा भवन्तीत्यर्थः। क्लोमपिपासेत्यादि पाठान्तरं केचित् पठन्ति। तच्च अभावान्न लिखितं॥ ४॥

तत्र मर्म्मोत्थितानां सर्व्वावस्थासु कष्टत्वं दर्शयन्नाह,—आमोवेति। यदि चेतर इति इतरोऽल्पः। अवस्थाविशेषादसाध्यत्वमाह,—नाभेरिति। नाभे-रुपरिजाः प्लीहयकृत्क्लोमकुक्षिहृदयजाः। पक्का ऊर्द्धं यान्ति स्रवन्ति। इतरे गुदवस्तिवृक्कवङ्क्षणजा अधो यान्ति। एषु चाधोनिःस्रुतेषु जीवति नोर्द्धनिःसृतेषु। हृन्नाभिवस्तिवर्ज्या वर्ज्जयित्वा येऽन्ये गुदकुक्षिवङ्क्षणवृक्कप्लीह-यकृत्क्लोमजाः। तेषु अन्तर्व्विद्रधिषु वाह्यतो भिन्नेषु कदाचित् दैव वशात् जीवेत् न पुनरितरेष्वभ्यन्तराऽधो भिन्नेष्वित्यर्थः। हृन्नाभिवस्तिजानां साध्य-त्वमग्रे वाच्यं॥ ५॥

अभ्यन्तररक्तजानां विद्रधीणामेव दर्शयन्नाह,—स्त्रीणामिति। स्त्रीणां रक्तविद्रधिर्ज्जायत इति सम्बन्धः। किम्भूतानां स्त्रीणां अपप्रजातानां

सम्बाहान्नोपशान्तश्चेत्ततोऽसौ संप्रपच्यते।
विशेषमथ वक्ष्यामि स्पष्टं विद्रधिगुल्मयोः॥
तुल्यदोषसमुत्थानाद्विद्रधेर्गुल्मकस्य च।
कस्मान्न पच्यते गुल्मो विद्रधिः पाकमेति च?
गुल्माकाराः स्वयं दोषा विद्रधिर्मांसशोणिते।
विवरानुचरो ग्रन्थिरप्सु वुद्वुदको यथा॥
एवंप्रकारो गुल्मस्तु तस्मात् पाकं न गच्छति।
मांसशोणितवाहुल्यात् पाकं गच्छति विद्रधिः॥
मांसशोणितहीनत्वाद्गुल्मः पाकं न गच्छति॥ ६॥

पतितगर्भाणां, पुनरपि किम्भूतानां? प्रजातानां सम्यक्कालप्रसूतानां। अहितैः शीतरुक्षाविदाहैः। तस्यैव रक्तविद्रधेर्व्विशेषमाह,—अपि सम्यगिति। मक्कलसंज्ञितं मक्कलजनितं, कारणे कार्य्योपचारात्। घृतमायुरिति यथा। समरातमप्रशान्तः पित्तोष्मा नान्तः प्रपच्यते। पक्काः साध्याः। "पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिण"मित्यत्रैकरूपत्वात्। अन्तर्व्विद्रधयोः गुल्मयोः। विशेषं भेदसमुत्थाकारणं दोष एव समुत्थानतश्च द्वयोस्तुल्यं सिद्धान्तमाह,—न निवन्धोऽस्तीति विश्रित्य वध्नातीति निवन्धमूलं तत् गुल्मानां मूलं नास्तीति। स रक्तादिद्रव्याणामभावत्वात्। कुतः पुनरेषां शोफरूपाणामपि मूलं नास्तीत्याह,—गुल्माकाराः गुल्मरूपाः स्वयमात्मानमेव च। दोषा वातादयः। न पुनर्दूष्यसंश्रयः। विद्रधेर्मूलसम्भवहेतुमाह,—विद्रधिर्मांसशोणिते इति भवतीति विशेषः। तत्र कथं रक्ते पित्ते कफे वा द्रवे वातजनितस्य गुल्मस्य स्थितस्येत्याह,—विवरानुचर इति। यथा स वुद्वुदकः, एवं प्रकारो विवरानुचरः स्रोतोऽनुसारी वातग्रन्थिरूपो गुल्मः कफपित्तयोरिति शेषः। तस्मात् पूर्व्वोक्तात् हेतोः पाकं न याति, अमुमेवार्थं नियमयन्नाह,—मांसशोणितवाहुल्यादिति आदिविद्रधिगुल्मयोर्मूलसम्भवाभावाभ्यां पक्कापक्कौ प्रतिपाद्य स्थानविशेषादपि हेतोः॥६॥

गुल्मस्तिष्ठति दोषे स्वे विद्रधिर्म्मांसशोणिते।
विद्रधिः पच्यते तस्माद्गुल्मश्चापि न पच्यते॥
हृन्नाभिवस्तिजः पक्वो वर्ज्यो यश्च त्रिदोषजः।
अथ मज्जपरिपाको घोरः समुपजायते॥
सोऽस्थिमांसनिरोधेन द्वारं न लभते यदा।
ततः स व्याधिना तेन ज्वलनेनेव दह्यते॥
अस्थिमज्जोष्मणा तेन शीर्य्यते दह्यमानवत्।
विकारः शल्यभूतोऽयं क्लेशयेदातुरं चिरं॥
अथास्य कर्म्मणा व्याधिर्द्वारन्तु लभते यदा।
ततो मेदःप्रभं स्निग्धं शुक्लं शीतमथो गुरु॥
भिन्नेऽस्थ्नि निस्रवेत् पूयमेतदस्थिगतं विदुः।
विद्रधिं शास्त्रकुशलाः सर्व्वदोषरुजावहं॥ ७॥

पाकापाकं प्रतिपादयन्नाह,—गुल्मस्तिष्ठतीत्यादि गुल्मश्चापि न पच्यत इति अपिशब्देन पच्यते गुल्म इति, कायचिकित्सायां गुल्मपाकित्वं समुन्नीयते। "हृन्नाभिवस्तिजः पक्वो वर्ज्यो यश्च त्रिदोषजः", एतेन सान्निपातिकः पक्वो यत्र कुत्रचित् स्थितो विद्रधिर्व्वर्ज्जनीयः। केचित् गुल्मविद्रधौ मनिकथनाय श्लोकं न पठन्ति। "मुष्टिप्रमाणो गुल्मस्तु विद्रधिश्च ततः परं"। ततः परमिति मुष्टेरधिक इत्यर्थः। प्राक्तनवशात् तदपेक्षणाद्वा। यो विद्रधिश्चान्तर्गतः पाको भवति तस्य लक्षणमाह,—अथ मज्जेति सर्व्वविद्रधयो वातादिना यदास्थ्याश्रित्य जायन्ते उपादानादनन्तरं तद्रूपमज्जा च परिपच्यते तदा एतद्रूपमुक्तं, सोऽस्थिमांसनिरोधेनेति स मज्जपरिपाकः। ततः स व्याधिना तेनेति, तदा स पुरुषः तेन व्याधिना मज्जपारिपाकेनाऽस्थिमज्जोष्मणेति। तेन मज्जोष्मणा, अथ उपेक्षणादनन्तरं शीर्य्यते विनश्यति, किं विदह्यमानवत्। अथास्य कर्म्मणेति कर्म्मणा शस्त्रकर्म्मणाः, व्याधि पूयादिः॥ ७॥

दशमोऽध्यायः ।

अथातो विसर्पनाडीस्तनरोगनिदानं व्याख्यास्यामः ।

त्वङ्मांसशोणितगताः कुपितास्तु दोषाः
सर्व्वाङ्गसारिणमिहास्थितमात्मलिङ्गं ।
कुर्व्वन्ति यं विसृतमुन्नतमाशु शोफं
तं सर्व्वतो विसरणाच्च विसर्पमाहुः ॥ १ ॥
वातात्मकोऽसितमृदुः परुषोऽङ्गमर्द्द-
सम्भेदतोदपवनज्वरलिङ्गयुक्तः ।
गण्डैर्यदा तु विषमैरतिदूषितत्वा-
द्युक्तः स एव कथितः खलु वर्ज्जनीयः ॥

अथात इति इदानीं सम्प्राप्तिहेतुस्वरूपनिरुक्तिराह,—त्वङ्मांसेति। तन्मांसशोणितगताः कुपिता दोषाः शोफं कुर्व्वन्तीति सम्बन्धः। किम्भूतं शोफं ? सर्व्वाङ्गसारिणं। इह अस्मिन् शास्त्रे, तं विसर्पमाहुरिति सम्बन्धः। पुनरपि किम्भूतं ? अस्थितं अनवस्थितं, देशात् देशान्तरगमनात्, अन्येतु आस्थितं सम्प्राप्तं आत्मलिङ्गं एतेन वातादिदोषलिङ्गान्तं प्राप्तमित्यर्थः। अन्येतु इहास्थितं क्वचिदेवावयवे स्थितमिति पठन्ति व्याख्यानयन्ति च। विसृतं विस्तीर्णं, उन्नतं तनुत्वात् शोफस्य, विसरणाच्चेति चकारात् नानाप्रकारं। विसर्पयतीत्यर्थः समुच्चीयन्ते। त्वङ्मांसशोणितगता इति सम्प्राप्तिः। कुपिता दोषा इति हेतुः, सर्व्वाङ्गसारिणमित्यादि स्वरूपं। सर्व्वतो विसरणाच्चेति निरुक्तिः ॥ १ ॥

तेषां दोषभेदेन विशिष्टं लक्षणं दर्शयन्नाह,—वातात्मक इति असितः कृष्णः, अङ्गमर्द्दो वेदनाविशेषः। इदं शुद्धवातविसर्पमुक्तं।

पित्तात्मको द्रुतगतिर्ज्वरदाहपाक-
स्फोटप्रभेदबहुलः चतजप्रकाशः।
दोषप्रवृद्धिहतमांससिरो यदा स्यात्
स्रोतोजकर्द्दमनिभो न तदा स सिध्येत्॥
श्लेष्मात्मकः सरति मन्दमशीघ्रपाकः
स्निग्धः शितः श्वयथुरल्परुगुग्रकण्डुः॥ २॥
सर्व्वात्मकस्त्रिविधवर्णरुजोऽवगाढः
पक्वो न सिध्यति च मांससिराप्रणाशात्॥
सद्यःचतव्रणमुपेत्य नरस्य पित्तं
रक्तञ्च दोषबहुलस्य करोति शोफं।
श्यावं सलोहितमतिज्वरदाहपाकं
स्फोटैः कुलत्थसदृशैरसितैश्च कीर्णं॥ ३॥

गण्डैरित्यादि गण्डैरम्लिसदृशैः स्फोटैः इति सम्बन्धः। अति दूषितत्वात् द्वाभ्यां वातपित्ताभ्यां। इदं पिण्डानुगतविसर्पलक्षणमुक्तं। अन्येतु सकलेनापि श्लोकेन शुद्धवातविसर्पलक्षणमुक्तं। अपरेतु सकलेनापि श्लोकेन शुद्धवातविसर्पलक्षणमाहुः, तन्मते तु दूषितत्वं वातेनैवेति बोद्धव्यं। पित्तात्मक-इति ज्वरादिभिः प्रभेदान्तैर्व्वहुलशब्दः प्रत्येकं सम्बध्यते। चतजप्रकाश इति रक्तमिव यः प्रकाशइत्यर्थः, पूर्व्वार्द्धेन केवलपित्तारब्धो विसर्प उक्तः, दोषप्रवृद्धीत्यादि। दोषप्रवृद्धा पित्तकफवृद्धा हतं मांसं शिराश्च यस्मिन् सतथा स्रोतोजकर्द्दमनिभ इति। अञ्जनसदृशकर्द्दमद्रवतुल्यः। अनेन उत्तरार्द्धेन कफपित्तात्मको विसर्प उक्तः। श्लेष्मात्मक इति, सरति विसर्पति कफवातयोर्ग्रन्थिविसर्पः। स तु साध्यएव। सपुरस्तादेवग्रन्थिनिर्द्देश इति नात्र निर्द्दिष्टः। तत्रैव वातकफलिङ्गविसर्पलिङ्गेन निर्द्दिष्टेनावसाध्यत इत्यन्ये॥२॥

सान्निपातिकं दर्शयन्नाह,—सर्व्वात्मक इति। पूर्व्वं कीर्णत्रिविधवर्ण-रुज इति प्रत्येकं वातादि-दोषनिर्द्दिष्टकृष्णपीतसितादिवर्णं वातादिजनित-

सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्व्वात्मकः चतकृतश्च न सिद्धिमेति ।
पैत्तानिलावपि च दर्शितपूर्व्वलिङ्गौ
सर्व्वे च मर्म्मसु भवन्ति हि कृच्छ्रसाध्याः ॥
शोफं न पक्कमिति पक्कमुपेचते यो
यो वा व्रणं प्रचुरपूयमसाधुवृत्तः ।
अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य
स्थानानि पूर्व्वविहितानि ततः स पूयः ॥
तस्यातिमात्रगमनाद्गतिरित्यतश्च
नाड़ीव यद्वहति तेन मता तु नाड़ी ॥ ४ ॥

विसर्पनिर्द्दिष्टः, तोददाह कण्ड्वादिवेदनः । अवगाढ़ोऽभ्यन्तरमूलप्रशान्तः, शटनं मांससिराप्रणाशात् पूर्व्वं कृच्छ्रतः सिध्यति । सद्यक्षतव्रणमिति पित्तरक्तश्च शोफं करोतीति सम्बन्धः । किं कृत्वा सद्यः क्षतव्रणमुपेत्य प्राप्य । किम्भूतं शोफं ? श्यावमित्यादि विशेषेण विशिष्टदोषवहुलस्येत्यर्थः । कुष्ठवातरक्तादिपूर्व्वरूपदोषदूषितधातोः, तदुक्तं । तयोः पूर्व्वरूपलक्षणविसर्पणमिति, अन्ये त्रिदोषवहुलस्येत्यर्थमाहुः, कीर्णं व्याप्तं ॥ ३ ॥

तेषां साध्यासाध्यत्वमाह,—सिद्ध्यन्तीति । न सिद्धिमेतीति न साध्यतां याति, दर्शितपूर्व्वलिङ्गाविति गण्डयुक्तवातविसर्पः । स्रोतोजकर्द्दमनिभ इति पित्तविसर्पः । अन्येतु पित्तात्मकाञ्जनवपुश्च तथा न सिद्ध्येदिति पठन्ति, चकारेण गण्डैर्यदतिविषमैरित्येव विशिष्टो वातिकोऽप्यसाध्यमिति समुच्चीय पित्तजस्य असाध्यत्वमुक्तं । यत् पुनरुच्यते तत् क्षतजमप्यसाध्यता प्रसङ्गोक्तं न पौनरुक्त्यमर्हति । नाड़ीनिर्द्दिशन्नाह,—शोफमिति । व्रणमित्यत्रोपेचित इति सम्बन्धः । असाधुवृत्तः अहिताचारः, स्थानानि त्वगादीनि. व्रणतस्तु शब्दाभिहितानि तस्य पूयस्य; अतश्चेति चकारो नाड़ीनिरुक्तिपचान्तर-समुच्चये । तेनैव नाड़ीनिरुक्ति-

दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संमूर्च्छितैरपि च शल्यनिमित्ततोऽन्या ॥
तत्रानिलात् परुषसूक्ष्ममुखी सशूला
फेनानुविद्धमधिकं स्रवति क्षपायां।
तृट्तापतोदमदनज्वरभेदहेतुः
पीतं स्रवत्यधिकमुष्णमहःसु पित्तात् ॥
ज्ञेया कफाद्बहुघनार्ज्जुनपिच्छिलास्रा
रात्रिस्रुतिः स्तिमितरुक्कठिना सकण्डूः।
दोषत्रयाभिहितलक्षणदर्शनेन
तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात् ॥ ५ ॥

माह,—नाड़ीव यद्वहति तेन मतातुनाड़ी येन हेतुना नाड़ीवत् प्रणाली यद्वहति याति तेन हेतुना नाड़ीमता इत्यर्थः। शोफं न पक्वमित्यादि हेतुः। अभ्यन्तरमित्यादि संप्राप्तिः। नाड़ीवेत्यादि निरुक्तिः ॥ ४ ॥

सङ्ख्यां नियमन्नाह,—दोषैरिति। दोषैः पृथगिति, तिस्र एकशश्च, सन्निपातैरन्या, अपरश्च तिस्र संमूर्च्छितैरपि च द्विदोषोत्थः संयोगस्थः। अन्यथा अपि चकारो निरर्थके स्यातां। संमूर्च्छितैर्म्मिश्रीकृतैरित्यर्थः। शल्यनिमित्ततोन्या अभिघातजा अपरेत्यर्थः। गयदासाचार्य्यस्तु त्रिभिर्दोषैः पृथक् तिस्र, एकशश्च संमूर्च्छितैः, अन्या सान्निपातिकीशल्यनिमित्ता च। पञ्चैव नाड्य इति व्याख्यानयन्ति। तेषान्तु वातादीनां प्रत्येकं विशिष्टलक्षणमाह,—तत्रानिलादिति। फेनानुविद्धं फेनमिश्रं, तृट्तापेति तृड़ादीनां हेतुः, तृड़ादीन् करोतीत्यर्थः। ज्ञेया कफादिति, बहुघनपिच्छिलास्रेति विपुलसान्द्रधवलपिच्छिलस्रावतीत्यर्थः। आस्रशब्दः स्रावबाची चिन्त्य एव। अन्येतु कफाद्घनार्ज्जुनपिच्छिलास्रस्रुत इति पठन्ति तत्र स्रुतस्राव इत्यर्थः। द्वन्द्वजान् आह दोषत्रयाभिहितेति। व्यतिकरप्रभवा-

दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि।
तामादिशेत् पवनपित्तकफप्रकोपात्
घोरामसुक्षयकरीमिव कालरात्रिम्॥
नष्टं कथञ्चिदनुमावमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति।
सा फेनिलं मथितमच्छमसृग्विमिश्र-
मुष्णं करोति सहसा सरुजा च नित्यं॥ ६॥
यावत्यो गतयो येश्च कारणैः सम्भवन्ति हि।
तावन्तः स्तनरोगाः स्युः स्त्रीणां तैरेव हेतुभिः॥
धमन्यः संवृतद्वाराः कन्यानां स्तनसंश्रिताः।
दोषाविसरणात्तासां न भवन्ति स्तनामयाः॥
तासामेव प्रजातानां गर्भिणीनान्तु ताः पुनः।

द्वन्द्वजाः। वातपित्तजाः पित्तकफजाचेति तिस्रः। गयदासाचार्य्यस्तु दोषद्वयाभिहितेत्यादि द्वन्द्वजानां लक्षणं न पठन्ति॥ ५॥

सान्निपातिकीमाह,—दाहज्वरेति। असुक्षयकरीं प्राणहारिणीं, कामिव कालरात्रिमिव। शल्यनिमित्तं दर्शयन्नाह,—नष्टमिति। उदीरितेषु स्थानेषु त्वगादिषु मथितं उन्मथितमिव। उष्णं उष्णस्पर्शं। उष्णं करोतीति पाठे स्त्रावमित्यध्याहारः॥ ६॥

इदानीं स्तनरोगाणां संख्यां हेतुञ्च दर्शयन्नाह,—यावत्य इति, यावत्यो यावत् प्रमाणागताः, यो येश्च कारणैः वातपित्तकफसन्निपाताभिघातैः। यावतस्तावत् प्रमाणाः। इदानीं समानायामपि जातानां सम्भूतगर्भाणान्ते दोषा न भवन्तीति दर्शयन्नाह,—धमन्य इति कन्यानामसम्भूतगर्भाणां स्त्रीणामित्यर्थः। अविसरणमप्रसरणं। तासामेव गर्भाणां प्रजा-

स्वभावादेव विवृता जायन्ते सम्भवन्त्यतः ॥
रसप्रसादो मधुरः पक्काहारनिमित्तजः ॥ ७ ॥
कृत्स्नदेहात् स्तनौ प्राप्तं स्तन्यमित्यभिधीयते ।
विशस्तेष्वपि देहेषु यथा शुक्रं न दृश्यते ॥
सर्व्वदेहाश्रितत्वाच्च शुक्रलक्षणमुच्यते ।
तदेव चेष्टयुवतेर्दर्शनात् स्मरणादपि ॥
शब्दसंश्रवणात् स्पर्शात् संहर्षाच्च प्रवर्त्तते ।
सुप्रसन्नं मनस्तत्र हर्षणे हेतुरुच्यते ॥
आहाररसयोनित्वादेवं स्तन्यमपि स्त्रियाः ॥ ८ ॥

तानां एता एव धमन्यो विवृतद्वारा भवन्तीति दर्शयन्नाह,—तासामेवेति। प्रजातानां प्रसूतानां, ता इति धमन्यः, विवृता प्रसृतद्वारा, भवन्ति जायन्त इत्यर्थः, सम्भवन्तीति स्तनरोग इति शेषः। स क्षीरी वाप्यदुग्धी वा। प्राप्यदोष इति। स्त्रीक्षीरस्य स्तनरोगाणां हेतुत्वेनोक्तत्वात्। स्त्रीक्षीरस्यैव सम्भवमाह,—रसप्रसाद इति। रसप्रसाद इति रसस्य प्रसादः उत्तमसारः तेज इत्यर्थः ॥ ७ ॥

स्तन्यनिरुक्तिमाह,—कृत्स्न देहादिति। रसधातोर्धमविच्छिन्नस्य सर्व्वदेहगतत्वात्। तत्र शरीराभ्यन्तराचाद्दृश्यस्य प्रसिद्धोपमा येन प्रवर्त्तमाना हेतुं दर्शयन्नाह,—विशस्तेष्वपीति। शुक्रलक्षणं स्तन्यमुच्यत इति शेषः। कुत इत्याह,—सर्व्वदेहाश्रितत्वादिति शुक्रवत् समस्तशरीरसंश्रितत्वात्, शुक्रदृष्टान्तेन स्तन्यस्य अभ्यन्तरादर्शनं प्रतिपद्यते। नैव दृष्टान्तेन सामग्री न वर्त्तनात्। प्रत्येकं तां प्रतिपादयन्नाह,—तदेवेत्यादि। तदेव शुक्रं प्रवर्त्तते वहिर्निःसरन्ति संहर्षात्। स्पर्शसङ्कल्पोऽपि हेतुचतुष्टयं निर्द्दिशन्नाह,—इष्टयुवतेरित्यादि। इष्टयुवतिदर्शनादिहेतुचतुष्टयेन मनःसंहर्षसमुत्पन्नएव मनसि भवतीति। मनसो सुप्रसन्नकारणत्वं दर्शयन्नाह,—सुप्रसन्नमित्यादि सुप्रसन्नमित्याद्यनभिमतं। एवं तस्या अपि स्त्रियः

तदेवापत्यसंस्पर्शाद्दर्शनात् स्मरणादपि ।
ग्रहणाच्च शरीरस्य शुक्रवत् सम्प्रवर्त्तते ॥
स्नेहो निरन्तरस्तत्र प्रस्रवे हेतुरुच्यते ।
तत् कषायं भवेद्वातात् क्षिप्तञ्च प्लवतेऽम्भसि ॥
पित्तादम्लञ्च कटुकं राज्योऽम्भसि च पीतिकाः ।
कफाद्घनं पिच्छिलञ्च जले चाप्यवसीदति ॥
सर्व्वैर्दुष्टैः सर्व्वलिङ्गमभिघाताच्च दूष्यति ॥ ९ ॥
यत्क्षीरमुदके क्षिप्तमेकीभवति पाण्डुरं ।
मधुरञ्चाविवर्णञ्च प्रसन्नं तद्विनिर्द्दिशेत् ॥
सक्षीरौ वाप्यदुग्धौ वा प्राप्य दोषः स्तनौ स्त्रियाः ।
रक्तं मांसञ्च सन्दूष्य स्तनरोगाय कल्पते ॥

प्रवर्त्तते, शुक्रमाहाररसयोनित्वात् शुक्रमाहाररसयोनिं प्रवर्त्तते। तस्यामपि तथा तस्मात् प्रवर्त्तते। ननु शुक्रमाहारयोन्यामपि संहर्षात् कारणात् प्रवर्त्तते ॥ ८ ॥

अत्र किं कारणमित्याह,—तदेवेत्यादि तदेव स्तन्यं शुक्रवत् संप्रवर्त्तते। अपत्यसंस्पर्शादिकारणचतुष्टयेऽपि स्नेहो मूलकारणमिति तदेव दर्शयन्नाह,—स्नेह इत्यादि। प्रस्रवे स्तन्यस्रवणे अत्रापि चत्वार हेतवः, परमिष्टयुवतिस्थानेऽत्रापत्यग्रहणं मूलहेतुहर्षस्थाने स्नेहः। स्तन्यस्य प्रवर्त्तनं प्रभवं चाभिधाय प्रकृतिमभिधातुकामः परित्यज्य तया प्रथमं विकृतिं दर्शयन्नाह,—तत्कषायमिति। क्षिप्तं चेति चकारेण अनुक्तमपि तनुत्वादिकं समुच्चीयते। पित्तादम्लमिति। सकटुमीषत्तिक्तं, तिक्तोऽपि कटुशब्दस्य प्रवृत्तेः। अम्भसि चेति चकारान्नीललोहिताश्च राज्यो द्रष्टव्याः। कफादिति। पिच्छिलञ्चेति चकारेण दोषसंप्लवः सूच्यते। अवसीदति मज्जति, सर्व्वैर्दुष्टैरिति अभिघातात् पतनपीड़नादिकात् ॥ ९ ॥

निर्द्दोषस्य स्तन्यस्य लक्षणमाह,—यत् क्षीरमिति। एकत्वं याति

पञ्चानामपि तेषान्तु हित्वा शोणितविद्रधिं ।
लक्षणानि समानानि बाह्यविद्रधिलक्षणैः ॥ १० ॥

मिलतीत्यर्थः । अविवर्णमीषत्पीतादिवर्णं, प्रसन्नं प्रकृतिस्थं । स्तन्यं प्रकृति विकृतिभिरभिनिर्द्दिश्य स्तनरोगसम्प्राप्तिं दर्शयन्नाह—सक्षीराविति । सक्षीरौ गर्भिण्याः, तस्या देहेस्यासम्भवात् । अदुग्धौ प्रसूतायां, तस्य देहस्य सम्भवात् । तत्र यदा दोषा च दुग्धौ भवतः, तदा क्षीरभवपीड़िता दोषाऽकुपिता स्तनरोगाय जायन्ते । स्तनरोगार्थं समर्थौ भवति । तेषा मपि संक्षेपार्थं लक्षणमतिदेशेन निर्द्दिशन्नाह,—पञ्चानामपीति । लक्षणानि तेषां स्तनरोगाणां समानानि तुल्यानि भवन्तीत्यध्याहारः ॥ १० ॥

इति निबन्धसंग्रहे निदानस्थाने दशमोऽध्यायः ।

एकादशोऽध्यायः ।

अथातो ग्रन्थ्यपच्यर्व्वुदगलगण्डानां निदानं व्याख्यास्यामः ।
वातादयो मांसमसृक् प्रदुष्टाः सन्दूष्य मेदश्च कफानुविद्धम् ।
वृत्तोन्नतं विग्रथितन्तु शोफं कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥१॥

अथात इति । तेषां हेतुसम्प्राप्तिलक्षणनिरुक्तिराह,—वातादय इति । वातादयो दोषा दुष्टं मांसमसृक् संदूष्य शोफं कुर्व्वन्तीति सम्बन्धः । एतेन त्रयो ग्रन्थि-उक्ताः । मेदश्च कफानुविद्धं कफसंसृष्टं वायुदूषितत्वात् शोफं कुर्व्वन्तीति सम्बन्धः । भोजेऽपि वातकर्त्तृत्वं । मेदो ग्रन्थावभिहितं । तथा वायुर्मेदो यदा मांसंक्षिपेदप्यलात्वचि । त्वचमेदोभवग्रन्थिः श्यावो भवति कण्डुलः इत्यादि । अथ चतुर्थो ग्रन्थिः । चकारात् शिरो ग्रन्थिः पञ्चमोऽपि ग्राह्याः । दुष्टा वृद्धिं गता इत्यर्थः । वृत्तो वर्त्तुलः, उन्नत- उच्छ्रितः । विग्रथितोऽत्यर्थः कठिनः, वातादयो दुष्टा इत्यनेन हेतूपदेशः,

आयम्यते व्यथ्यत एति तोदं प्रत्यस्यते कृत्यत एति भेदं।
कृष्णोऽमृदुर्व्वस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छं॥
दन्दह्यते धूप्यति चातिमात्रं पापच्यते प्रज्वलतीव चापि।
रक्तः सपीतोप्यथवापि पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रं॥
शीतो विवर्णोऽल्परुजोऽतिकण्डुः पाषाणवत्संहननोपपन्नः।
चिराभिवृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनञ्च पूयं॥
शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महानल्परुजोऽतिकण्डुः।
मेदःकृतो गच्छति चातिभिन्ने पिण्याकसर्प्पिःप्रतिमन्तु मेदः॥२॥
व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुर्हि सिराप्रतानं।
संपीड्य सङ्कोच्य विशोष्य वापि ग्रन्थिं करोत्युन्नतमाशु वृत्तम्॥

मांसमसृक् च दूष्येति सम्प्राप्तिः। वृत्तोन्नतविग्रथितश्च शोफमिति लक्षणोपदेशः, अतो ग्रन्थिरिति प्रदिष्ट इति निरुक्तः॥ १॥

तेषां वातादिजानां प्रत्येकं विशिष्टं लक्षणमाह,—आयम्यत इति। आयम्यते वायोराकर्षणेन दीर्घ इव क्रियते। ग्रन्थिरिति शेषः, व्यथ्यते विधूयते। एति गच्छति, तोदव्यथां प्रत्यस्यते कुप्यते। कृत्यते छिद्यते। एति भेदमिति भेदञ्च गच्छति। अमृदुः कर्कशः, वस्तिरिवाततश्चेति मूत्राशयवद्दीर्घः, अस्रं रुधिरं। दंदह्यते भृशं दह्यत इव। धूप्यति चातिमात्रमिव। अतिशयेन सन्तापं करोति। पापच्यते भृशं पच्यत इव। प्रज्वलतीव च भस्मी भवतीव। अविवर्णः ईषद्विवर्णः। पाषाणवत् पाषाण इव, कठिन इत्यध्याहारः। संहननोपपन्नः सङ्घातान्वितो महानित्यर्थः, शरीरवृद्धिक्षयवृद्धिहानिरिति देहेप्यायतं तमप्यायनह्रासौ यस्य स तथा गच्छति। स्रवति मेद इति सम्बन्धः। अत्र मेदो ग्रन्थिभिन्ने सति पिण्याकसर्पिप्रतिमं तिलकल्कस्त्यानघृतसदृशं॥ २॥

शिराजस्य ग्रन्थिसम्प्राप्तिं दर्शयन्नाह,—व्यायामजातैरिति। व्यायामजातैः व्यायामसमूहैः। अबलस्य पुरुषस्य शिराविस्तारं। शिरजश्च कृच्छ्र-

ग्रन्थिः सिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात् सरुजश्चलश्च।
अरुक् सएवाप्यचलो महांश्च मर्म्मोत्थितश्चापि विवर्ज्जनीयः ॥३॥
हन्वस्थिकक्षाक्षकबाहुसन्धिमन्यागलेषूपचितन्तु मेदः।
ग्रन्थिं स्थिरं वृत्तमथायतं वा स्निग्धं कफश्चाल्परुजं करोति॥
तं ग्रन्थिभिश्चामलकास्थिमात्रैर्म्मत्स्याण्डजालप्रतिमैस्तथान्यैः।
अनन्यवर्णैरुपचीयमानं चयप्रकर्षादपचीं वदन्ति॥

साध्यमाह,—स तु कृच्छ्रसाध्य इत्यादि। तस्यासाध्यत्वमाह,—सरुगित्यादि। महांश्चेति चकारेण वातादिजा अपि एवं रूपा विवर्ज्जनीयाः। मर्म्मोत्थितश्चेति चकारेण तलजोऽपि विवर्ज्जनयाः। अन्ये मुनयोऽत्र मांसास्रजं चार्व्वुदलक्षणेन तुल्यं हि दृष्टं अथ लक्षणज्ञैः। इति षष्ठं ग्रन्थिं पठन्ति। तत्र जेज्जटाचार्य्यादिभिः परिहृतत्वात्॥ ३॥

इदानीं अपच्याः सम्प्राप्त्यादीनाह,—हन्वस्थीति। हन्वोरस्थिसन्धिशब्दो हन्वस्थ्यादिभिर्व्वाहुन्तैः प्रत्येकं सम्बध्यते। बाहुसन्धिशब्देन उपरिसन्धिरुच्यते। अक्षकं कोष्ठकं तस्य सन्धिः। एतेन ग्रीवायकः सन्धिरुच्यते। मन्या ग्रीवा-पश्चिमभागस्था धमनी। हन्वस्थीत्यादि सम्प्राप्तिः, ग्रन्थिस्थिरं वृत्तमित्यादि स्वलक्षणं। तं ग्रन्थिभिरित्यादि। तं पूर्व्वोक्तग्रन्थिं, अनन्यवर्णैः समानवर्णैः। उपचीयमानं वर्द्धमानं, वयः प्रकर्षादिति उपचयातिशयादित्यर्थः। वयः प्रकर्षादपचीमिति निरुक्तिः। खलु शब्दोऽन्वर्थः। तेन मेदकफौ वातादिदोषान्तरानुविद्धौ ज्ञेयौ। तथा हि भोजः। "वातपित्तकफो वृद्धा मेदश्चापि समाचितं। जङ्घयोः कण्डुराप्राप्यमत्स्याण्डसदृशान् बहून्। कुर्व्वन्ति ग्रन्थिलस्तेभ्यः पुनः प्रकुपितोऽनिलः। त्रिदोषादङ्गो रक्तः कक्षा मन्या मलाश्रितः। नानाप्रकारान् कुरुते ग्रन्थीन् सात्वपची स्मृताः। व्यामिश्रदोषजातस्य कृच्छ्रसाध्या प्रकीर्त्तिता। तासां वातोत्तरा रूक्षा वातवेदनयान्विता। क्षिप्रपाकसमुत्थानाद्दाहयुक्तानुपैत्तिकी। गूढ़पाका कठिना वा कफात्त्विभाल्परुक्करा। मेदोऽधिका श्लैष्मिकी च विशेषादतिमार्द्दवा। तास्तु

कण्डूयुतोऽल्परुजः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये।
मेदःकफाभ्यां खलु रोगएष सुदुस्तरो वर्षगणानुवन्धी ॥४॥
गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमभिप्रदूष्य।
वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकं॥
कुर्व्वन्ति मांसोपचयञ्च शोफं तदर्व्वुदं शास्त्रविदो वदन्ति।
वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा च॥
तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि सदा भवन्ति।
दोषः प्रदुष्टो रुधिरं सिरास्तु संपीड्य संकोच्य गतस्तु पाकं॥
सास्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशु वृद्धिं।
स्रवत्यजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकं स्यात्॥
रक्तक्षयोपद्रवपीड़ितत्वात् पाण्डुर्भवेदर्व्वुदपीड़ितस्तु ॥५॥

मालाकृतिं विन्द्यात् कण्ठहृदनुसन्धिषु। गण्डमालां विजानीयादपचीतुल्यलक्षणादिति। चरकशास्त्रे गण्डमालागण्डएवेति यत्रापठिता। मेदकफात् शोणितसां वयोत्थे गण्डस्य पार्श्वे गलगण्डएकः। स्याद्गण्डमाला वहुभिः सुगन्धैर्द्दीप्तानिलेष्वतिवलान्विते च। साध्या स्मृता पीनसपार्श्वशूलकासज्वरच्छर्द्दियुतात्वसाध्येति। अन्ये तु मेदकफाभ्यां पुनरेष रोग इति पठन्ति। पुनः शब्दादधिकापर्य्याधिक्यात् दोषान्तरसम्बन्ध इत्यर्थः। एतेन दीर्घरोगित्वं सूचितं। मेदकफाभ्यामिति हेतूद्देशः॥ ४॥

इदानीं अर्व्वुदादीनां सम्प्राप्त्यादीनाह,—गात्रप्रदेश इति। क्वचिदेवगात्रप्रदेशे दोषाः शोफं कुर्व्वन्तीति सम्बन्धः। संमूर्च्छिता वृद्धिं गताः। क्वचिदेव अनियतप्रदेशेन पुनरपचीवत् हन्वस्थ्यादिसंपृष्टे अविपाकमविद्यमानपाकं मांसोपचयमांससन्ध्या तं गात्रप्रदेशे क्वचिदेवेति संप्राप्तिः। संमूर्च्छिता दोषा इति हेतुः। वृत्तं स्थिरमित्यादि स्वलक्षणं। गयदासाचार्य्यास्तु। कुर्व्वन्ति मांसोत्थ यमेत्यगाढ़मिति पठन्ति। वातेनेति। तज्जायते तदर्व्वुदं भवतीत्यर्थः। तस्य च लक्षणानि तस्य वातपित्तकफभेदे।

मुष्टिप्रहारादिभिरर्द्दितेऽङ्गे मांसं प्रदुष्टं प्रकरोति शोफं ॥
अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपममप्रचाल्यं ।
प्रदुष्टमांसस्य नरस्य बाढ़मेतद्भवेन्मांसपरायणस्य ॥
मांसार्व्वुदं त्वेतदसाध्यमुक्तं साध्येष्वपीमान्युपवर्ज्जयेत्तु ।
संप्रस्रुतं मर्म्मणि यच्च जातं स्रोतःसु वा यच्च भवेदचाल्यं ॥
यज्जायतेऽन्यत् खलु पूर्व्वजाते ज्ञेयं तदध्यर्व्वुदमर्व्वुदज्ञैः ।
यद्द्वन्द्वजातं युगपत्क्रमाद्वा द्विरर्व्वुदं तच्च भवेदसाध्यं ॥
न पाकमायान्ति कफाधिकत्वान्मेदोऽधिकत्वाच्च विशेषतस्तु ।
दोषस्थिरत्वाद्ग्रथनाच्च तेषां सर्व्वार्व्वुदान्येव निसर्गतस्तु ॥६॥

तस्यार्व्वुदस्य लक्षणमाह.—दोषं प्रदुष्ट इति। प्रदुष्टदोष उन्नह्यति उत्थितो-भवति। मांसपिण्डं वाशुवृद्धिं मांसप्रवर्द्धनं व्याख्यानयन्ति। अपाक-मीषत्पाकं ॥ ५ ॥

मांसजस्य सम्प्राप्तिं दर्शयन्नाह,—मुष्टिप्रहरादिभिरिति। मांसपरा-यणस्य मांसभक्षणशीलस्य। मुष्टिप्रहारादिभिरित्यत्र केचित् काष्ठप्रहा-रादिभिरिति पठन्ति। साध्येष्वपीति। साध्यमपीमानि विवर्ज्जयेदिति साध्येषु मध्ये इमानि वक्ष्यमाणानि विवर्ज्जयेदित्यर्थः। असाध्यार्व्वुदमपि द्विरर्व्वुदमेव अन्येत्वर्व्वुदमिति पठन्ति। यत्र द्वन्द्वजानामित्यादि द्वन्द्वेन युग्मेन जातं युग्मजातं न केवलमध्यर्व्वुदं। द्विरर्व्वुदं यत्र द्वन्द्वजातं तदपि द्विरर्व्वुदमित्यर्थः। भेदश्च तयोरुपरिजातत्वेन, एतेन द्विरर्व्वुद द्विरायाममप्यसाध्यमुक्तं। तेषां पाकाभावहेतुं दर्शयन्नाह,—न पाकमिति। ग्रन्थ्यादिष्वपि कफादयश्चत्वारो हेतवः सन्ति परमर्व्वुदेषु विशेषतः कफमेदस-श्चाधिक्यं तस्मात्तथा, विशेषतो दोषस्थिरत्वात् दोषकार्य्यस्य मांसोच्छ्रयस्य तेनैव स्वरूपेण चिरकालावस्थानशीलत्वात्। तथा ग्रथनात् ग्रन्थिरूपत्वात्। तेषां मेदः प्रभृतीनां निसर्गतस्तुशब्देत्यर्थः। तेन स्वभावादपि अर्व्वुदा-विपाकं न गच्छन्तीत्यर्थः ॥ ६ ॥

वातः कफश्चैव गले प्रवृद्धौ मन्ये तु संसृत्य तथैव मेदः ।
कुर्व्वन्ति गण्डं क्रमशः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः ॥
तोदान्वितः कृष्णसिरावनद्धः कृष्णोऽरुणो वा पवनात्मकस्तु ।
मेदोऽन्वितश्चोपचितश्च कालाद्भवेत्प्रदिग्धं च गलेऽरुजश्च ॥
पारुष्ययुक्तश्चिरवृद्ध्यपाको यदृच्छया पाकमियात् कदाचित् ।
वैरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः ॥
स्थिरः सवर्णोऽल्परुगुग्रकण्डुः शीतो महांश्चापि कफात्मकस्तु ।
चिराभिवृद्धिं कुरुते चिराद्वा प्रपच्यते मन्दरुजं कदाचित् ॥
माधुर्य्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रलेपः ।
स्निग्धो मृदुः पाण्डुरनिष्टगन्धो मेदःकृतो नीरुगथातिकण्डुः ॥
प्रलम्बतेऽलावुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः ।
स्निग्धास्यता तस्य भवेच्च जन्तोर्गलेन शब्दं कुरुते च नित्यं ॥
कृच्छ्रात् श्वसन्तं मृदु सर्व्वगात्रं सम्वत्सरातीतमरोचकार्त्तं ।
क्षीणन्तु वैद्यो गलगण्डिनं तं भिन्नस्वरं चैव विवर्ज्जयेत्तु ॥

निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले ।
महान्वा यदि वा ह्रस्वस्तं गण्डमिति निर्द्दिशेत् ॥ ७ ॥

इदानीं गलगण्डसम्प्राप्तिं दर्शयन्नाह,—वातःकफ इति । वातादयो गण्डं क्रमशः कुर्व्वन्तीति सम्बन्धः । किं विशिष्टं गण्डस्वलिङ्गैः समन्वितं । वातेन कफेन गलगण्डो भवति । न च पित्तेन, स्वभावेन पित्तजस्य गलगण्डाभावात् । तस्यैव वातादिविशेषलिङ्गानि निर्द्दिशन्नाह,—तोदान्वित इति । अरुज इति सोऽपि वातगलगण्डः । यदा कालात् कालेन मेदोऽन्वितो भवति, तदा अरुजा भवतीत्यर्थः । अज्ञानहेतुनियमेन पाकं इयात् गच्छेत् । कदाचित् सर्व्वकालं प्रलिप्तवातजां कफजाञ्चोक्तमेदोजामाह,—स्निग्ध इति । गलेन शब्दं गलेन नादं प्रतिशब्दमित्यर्थः । इदानीं

द्वादशोऽध्यायः।

अथातो वृद्ध्युपदंशश्लीपदानां निदानं व्याख्यास्यामः।

वातपित्तश्लेष्मशोणितमेदोमूत्रान्त्रनिमित्ताः सप्त वृद्धयः। तासां मूत्रान्त्रनिमित्ते वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यतमः॥ १॥

अधःप्रकुपितोऽन्यतो हि दोषः फलकोशवाहिनीरभिप्रपद्य धमनीः फलकोशयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते।

गलगण्डस्य साध्यतामाह,—कृच्छ्रादिति। न सर्व्वएव गलाश्रयो गण्डो गलगण्डः। किन्तर्हि कश्चिदेष वक्ष्यमाण स्वरूपत इति दर्शयन्नाह,—निवद्ध इति। नियमेन वद्धो निवद्धः। मुष्कवत् अन्त्रवत्॥ ७॥

इति निवन्धसंग्रहे निदानस्थाने एकादशोऽध्यायः।

अथात इति। वृद्धीनां संख्यामाह,—वातेति। संख्येयनिर्द्देशादेव सप्तसंख्या सिद्धा। सप्तग्रहणं द्वन्द्वजादिवृद्धिनिषेधार्थं। तासां पुनरभावो व्याधिस्वभावात्। धातुमलकृतायामपि वृद्धौ दोषस्यैव चिकित्सार्थं सम्भवत्वं दर्शयन्नाह,—तासामिति। वातसमुत्थे: वातात् सम्यक् उत्तिष्ठते वृद्धिं गच्छत इत्यर्थः। जननहेतुः पुनरन्यतम इति तं प्रतिपादयन्नाह,—केवलसमुत्पत्तिरन्यतम इति। केवलं परं। उत्पत्तेरुत्पादकस्य कारणमन्यतमं मूत्रान्त्रस्था। अन्ये तु अनयोर्व्याध्योर्य्य उत्पत्तेर्हेतुर्व्वायुः सोऽन्यतमभिन्नज्ञेयः। एतेन मूत्रसन्धारणकुपितो वायुर्मूत्रवृद्धेः कारणं भारहरणादिभिः कुपितस्तु अन्त्रवृद्धेः कारणमित्यर्थः॥ १॥

तत्तासां सम्प्राप्तिमाह,—अधःप्रकुपित इति। फलकोशयोरित्यनेन हि वचनेन मुषकवृद्धएव वृद्धिपरिज्ञातव्यं। तासां पूर्व्वरूपानाह,—तासां

तासां भविष्यतीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ़्रेषु वेदना मारुतनिग्रहः फलकोश-शोफश्चेति।

तत्रानिलपरिपूर्णां वस्तिमिवाततां परुषामनिमित्तानिल-रुजं वातवृद्धिमाचचते। पक्वोडुम्बरसङ्काशां ज्वरदाहोष्मवतीं चाशुसमुत्थानपाकां पित्तवृद्धिं कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्मवृद्धिं कृष्णस्फोटावृतां पित्तवृद्धिलिङ्गां रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिं। मूत्रसन्धारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा दृति-रिव चुभ्यति मूत्रकृच्छ्रं वेदनां वृषणयोः श्वयथुं कोशयोश्चापा-दयति तां मूत्रवृद्धिं विद्यात्। भारहरणबलवद्विग्रहवृचप्र-पतनादिभिरायासविशेषैर्व्वायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्र-स्येतरस्य चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थि-रूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोशं प्रविश्य मुष्कशोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः शोफो भवति सशब्दमवपीड़ितश्चोर्द्ध्वमुपैति। विमुक्तश्च पुनराधमति तामन्त्रवृद्धिमसाध्यामित्याचचते॥ २॥

तत्रातिमैथुनादतिब्रह्मचर्य्याद्वा तथा ब्रह्मचारिणीं चिरोत्-सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढ़-

वचनेन मुष्कवृद्धएव वृद्धिरिति ज्ञेयं। किन्तर्हि एकस्मिन् पचे वृद्धिपरि-ज्ञातव्यं। तासां पूर्व्वरूपमाह,—तासां भविष्यतीनामिति। तासां वातादि-जानां लचणमाह,—तत्रानिलेति। आततां धातं। शीलं स्वभावः। चुभ्यति सम्बलति। आध्मातो वस्तिरिवापूर्णो मूत्राशय इव। आततो-विस्तीर्णः। उपैति उद्गच्छति विमुक्तसशब्दमेवाधायते॥ २॥

वृद्धेरनन्तरमुपदंशानां हेत्वाद्यभिधानमाह,—तत्रातीति। अतिब्रह्म-

रोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्ष्यसलिल-प्रक्षालितयोनिमप्रक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करजदशनविषशूकनिपातनाद्दन्तनाङ्गस्ताभिघाताच्चतुष्पदीगमनादचौक्ष्यसलिल-प्रक्षालना-दवपीड़नाच्छुक्रमूत्रवेग-विधारणान्मैथुनान्ते वाऽप्रक्षालनादिभिर्मेढ्रमागम्य प्रकुपिता दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति तमुपदंशमित्याचक्षते ॥ ३ ॥

स पञ्चविधस्त्रिभिर्दोषैःपृथक्समस्तैरसृजा चैकः।

तत्र वातिके पारुष्यं त्वक्परिपुटनं स्तब्धमेढ्रता परुषशोफता विविधाश्च वातवेदनाः।

पैत्तिके ज्वरः श्वयथुः पक्वोडुम्बरसङ्काशस्तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च।

चारिण्या मैथुनातिनिवृत्तया:, सङ्कुचितकर्कशयोनिमुखत्वात्। चिरोत्सृष्टया कदाचिदेवेत्यनयोर्भेदः। रजस्वलादुष्टार्त्तवसङ्गात् वीर्य्यकर्कशरोमाभिसर्पणे पीड़नाभिघातप्रसङ्गात्। सङ्कीर्णरोमां घनरोमां निगूढ़रोमां अभ्यन्तररोमां। अल्पद्वारायामपि सएव हेतुः। महाद्वारायां शोफहेतुः, स्वान्यएव तस्मात् केचिन्न पठन्ति। अप्रियायां लिङ्गानुत्थाने इतश्चेताभिघातप्रसङ्गात्, अकामायाः सक्थिसङ्कोचनेन द्वाराल्पत्वात्, अचोक्षसलिलप्रक्षालितयोनिः सलिलदोषात्, अचोक्षं अपवित्रं। प्रक्षालितयोनिः स्वेदमनिलमलदोषान् योनिरोगोपसृष्टाया रोगदोषानुसारेण दोषोदयात्। स्वभावतो वा दुष्टा वातादयः एवकारणं। वियोनिं हस्तजङ्घान्तरं तस्य कर्कशत्वात्, करजा नखा, दशना दन्ता। सविषशूकेनिलशुकदोषाः सजन्तुर्जलमलः लिङ्गकरत्यागो वा चतुष्पद्योजादयो वा सभ्यादयो वा तासामल्पानामन्योन्ययोनित्वात् अचोक्ष सलिलप्रक्षालनादिभिः अचोक्षसलिलप्रक्षालनमत्र लिङ्गस्य न तु योनेः ॥ ३ ॥

श्लैष्मिके श्वयथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनाश्च।

रक्तजे कृष्णस्फोटप्रादुर्भावोऽत्यर्थमसृक्प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं ज्वरदाहो शोषश्च याप्यश्चैव कदाचित्।

सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेफसः कृमिप्रादुर्भावो मरणं चेति।

कुपितास्तु दोषा वातपित्तश्लेष्माणोऽधःप्रपन्ना वङ्क्षणोरुजानुजङ्घास्ववतिष्ठमानाः कालान्तरेण पादमाश्रित्य शनैः शोफं जनयन्ति तत् श्लीपदमित्याचक्षते। तत्त्रिविधं वातपित्तकफनिमित्तमिति। तत्र वातजं खरं कृष्णं परुषमनिमित्तानिलरुजं परिस्फुटति च वहुशः। पित्तजन्तु पीतावभासमीषन्मृदुज्वरदाहप्रायञ्च। श्लेष्मजन्तु श्वेतं स्निग्धावभासं मन्दवेदनं भारिकमिति महाग्रन्थिकं कण्टकैरुपचितञ्च। तत्र सम्वत्सरातीतमतिमहद्वल्मीकजातं प्रस्रुतमिति वर्ज्जनीयानि।

भवन्ति चात्र।

त्रीण्यप्येतानि जानीयात् श्लीपदानि कफोच्छ्रयात्।
गुरुत्वञ्च महत्त्वञ्च यस्मान्नास्ति विना कफात्॥
पुराणोदकभूयिष्ठाः सर्व्वर्त्तुषु च शीतलाः।
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः॥
पादयोर्हस्तयोश्चापि श्लीपदं जायते नृणां।
कर्णाक्षिनासिकौष्ठेषु केचिदिच्छन्ति तद्विदः॥ ४॥

तेषां संख्यामाह,—सपञ्चविध इति। त्रिभिर्द्दोषैः पृथगिति त्रयः, समस्तैरेकः, असृजाश्चैकः एताः पञ्च। तेषां वातादीनां प्रत्येकं लक्षणमाह,—तत्र वातिक इति मेढ्रसम्भौ व्रणाः केचित् केचिसर्व्वाश्रया स्मृताः। कुलस्थाकृतयः केचित् केचित् सर्व्वाश्रयाः स्मृताः। कुलत्थाकृतयः केचित्

त्रयोदशोऽध्यायः ।

अथातः क्षुद्ररोगाणां निदानं व्याख्यास्यामः ।

समासेन चतुश्चत्वारिंशत् क्षुद्ररोगा भवन्ति ॥

तद्यथा । अजगल्लिका यवप्रख्याऽन्धालजी विवृता कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाणगर्द्दभोजालगर्द्दभः कक्षा विस्फोटकोऽग्निरोहिणी चिप्पं कुनखोऽनुशयी विदारिका शर्कराऽर्व्वुदं पामा विचर्च्चिका रकसा पाददारिका कदरमलसेन्द्रलुप्तौ दारुणकोऽरुंषिका पलितं मसूरिका यौवनपिड़का पद्मिनीकण्टको जतुमणिर्म्मशकश्चर्म्मकीलस्तिलकालको न्यच्छं व्यङ्गः परिकर्त्तिकाऽवपाटिका निरुद्धप्रकाशः निरुद्धगुदोऽहिपूतनं वृषणकच्छुर्गुदभ्रंशश्चेति ॥ १ ॥

केचित् मुद्गदलोपमाः । रुजादाहपरीताश्च तृष्णामोहसमन्विताः । शीघ्रं केचिद्विसर्पन्ति शनैः केचित्तथापरे । स्त्रीणाञ्च पुंसां जायन्ते उपदंशाः सुदारुणाः ॥ ४ ॥

इति निवन्धसंग्रहे निदानस्थाने द्वादशोऽध्यायः ।

अथात इति क्षुद्ररोगेषु महाव्याधयः. तथापि क्षुद्ररोगाणां बहुत्वात् तयोर्व्यपदेशः यथा बहुषु छत्रिषु गच्छत्सु अच्छत्रपि छत्रिणो यान्तीति व्यपदेशः । तथा अत्रापीति, न दोषः । अन्ये तु क्षुद्रालववस्तिलकालकाद्यपेक्षया अग्निरोहिणीवल्मीकाद्यपेक्षया तु क्षुद्राः तीक्ष्णा अथवा पूर्व्वाचार्य्यप्रसिद्धा नित्येयं संज्ञा । तेषां संख्यामाह,—समासेनेति । समासेन संक्षेपेण, विस्तरेण प्रमाणन्तु नास्त्येव । श्रीब्रह्मदेवस्तु गर्द्दभिका इरिवेल्लिका गन्धपिड़िका । तिलकालकानां संग्रहणेषु चत्वारिंशदिति पठन्ति । श्रीजेज्जटा-

स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका ॥
यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।
पिड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥
घनामवक्त्रां पिड़कामुन्नतां परिमण्डलां ।
अन्धालजीमल्पपूयां तां विद्यात् कफवातजाम् ॥
विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम् ।
विवृतामिति तां विद्यात् पित्तोत्थां परिमण्डलां ॥
ग्रन्थयः पञ्च वा षड्वा दारुणाः कच्छपोन्नताः ।
कफानिलाभ्यामुद्भूतां विद्यात्तां कच्छपीमिति ॥
पाणिपादतले सन्धौ ग्रीवायामूर्द्ध जत्रुणि ।
ग्रन्थिर्व्वल्मीकवद्यस्तु शनैः समुपचीयते ॥
तोदक्लेदपरीदाहकण्डूमद्भिर्व्रणैर्वृतः ।
व्याधिर्व्वल्मीक इत्येष कफपित्तानिलोद्भवः ॥
पद्मपुष्करवन्मध्ये पिड़काभिः समाचिताम् ।
इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥

चार्य्येण गर्द्दभिकादयश्चत्वारो न पठिताः। समानतन्त्रापाठात् गर्द्दभिकादीनां चतुर्णां पाठं गर्हितं मन्यते गयदासाचार्य्यस्तु समानतन्त्रादर्शनेऽपि सर्व्वं त्वचं पाठेषु पाठात् गर्द्दभिकादीन् व्रतयः पठति। पामादींश्च क्षुद्रेऽपि कुष्ठएव पठति ॥ १ ॥

तेषां प्रत्येकं लक्षणमाह,—स्निग्धा सवर्णा ग्रथिता निरुजा ग्रन्थिसन्निभा । कफवातोत्थिता ज्ञेया बालानामजगल्लिका । प्रायोपदहनमत्र लुप्तनिर्द्दिष्टव्यं । तेन क्वचिद्‌वालेष्वपि इत्येके भाषन्ते पाठान्तरं मन्यन्ते। यवाकारा स्थूलयवाकारा निम्नमध्यो एकत्वेन घनामवक्त्रां पिड़िकामुन्नतां परिमण्डलां अवक्त्रामित्यल्पमुखीं परिमण्डलां वर्त्तुलामित्यर्थः। अन्धालजीं स्नायुस्तान्त-

कर्णौ परिसमन्ताद्वा पृष्ठे वा पिड़कोग्ररुक्।
शालूकवत्पनसिकां तां विद्यात् श्लेष्मवातजाम्॥
हनुसन्धौ समुद्भूतं शोफमल्परुजं स्थिरम्।
पाषाणगर्द्दभं विद्याद्बलासपवनात्मकम्॥
विसर्पवत् सर्पति यो दाहज्वरकरस्तनुः।
अपाकः श्वयथुः पित्तात् स ज्ञेयो जालगर्द्दभः॥
बाहुपार्श्वांसकक्षासु कृष्णस्फोटां सवेदनाम्।
पित्तप्रकोपात् सम्भूतां कक्षामिति विनिर्द्दिशेत्॥
अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्ततः।
क्वचित् सर्व्वत्र वा देहे स्मृता विस्फोटका इति॥
कक्षाभागेषु ये स्फोटा जायन्ते मांसदारुणाः।
अन्तर्द्दाहज्वरकरा दीप्तपावकसन्निभाः॥
सप्ताहाद्‌ द्वादशाहाद्वा पक्षाद्वा घ्नन्ति मानवम्।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपाततः॥

मुखी। विवृतास्यामिति व्यावृत्तमुखीं। दारुणा कठिनाः। पद्मपुष्करं पद्म कर्णिका, गयदासाचार्य्यस्तु गर्द्दभिकां पठति। यथा मण्डलावृत्तमुत्सन्नां रक्ताभिपिड़िकाचितां। रुजाकरीं गर्द्दभिकां तां विद्यात् वातपित्तजां। चिकित्साभिधानं। मांसदारुणमित्ययं पाठः तथा हि तन्त्रान्तरं। पित्तोत्कटात् नृणां दोषाः प्रदीप्ताङ्गारसन्निभान् कक्षाभागेषु कुर्व्वन्ति तीव्रदाहरुजा ज्वरान्। मांसञ्च दारुणान् स्फोटान् ये हन्युरनुपक्रमात्। पक्षाद्दशाहाद्द्वाक् वा सा ज्ञेया वह्निरोहिणी। इति तत्र वाताधिकैः सप्ताहात् पित्ताधिकैर्द्दशाहात् कफाधिकैः पक्षात्। तन्त्रान्तरे। अङ्गुलीवेष्टकमिति प्रसिद्धं। बङ्क्षणसन्धिगुण्डकः। रक्तां लोहितां, सर्व्वजां सन्निपातजां। परं तथापि साध्या नहि सर्व्वएव सन्निपातजा व्याधयोऽसाध्या। सर्व्वलक्षणां दोष-

नखमांसमधिष्ठाय पित्तं वातश्च वेदनाम्।
करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्॥
तदेव चतरोगाख्यं तथोपनखमित्यपि।
अभिघातात् प्रदुष्टो यो नखो रुचोऽसितः खरः॥
भवेत्तु कुनखं विद्यात् कुनखमिति संज्ञितं।
गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम्॥
कफादन्तःप्रपाकान्तां विद्यादनुशयीं भिषक्।
विदारीकन्दवद्वृत्तां कचावङ्क्षणसन्धिषु॥
रक्तां विदारिकां विद्यात् सर्व्वजां सर्व्वलचणाम्॥ २॥
प्राप्यमांससिरास्नायु श्लेष्मा मेदस्तथाऽनिलः।
ग्रन्थिं कुर्व्वन्ति भिन्नोऽसौ मधुसर्पिर्व्वसानिभम्॥
स्रवत्यास्रावमत्यर्थं तत्र वृद्धिं गतोऽनिलः।
मांसं विशोष्य ग्रथितां शर्करां जनयेत् पुनः॥
दुर्गन्धं क्लिन्नमत्यर्थं नानावर्णं ततः सिराः॥

समुच्चयलचणां, नतु प्रत्येकलचणं। दोषेभ्यो दोषसमुदायस्यान्यत्वात्। चूर्णहरिद्रासंयोगस्येव। अन्येतु सर्व्वेभ्यो वातपित्तकफेभ्यः। पृथक् द्विशस्त्रिशो वा जायत इति सर्व्वजा। इत्यस्याः साप्तविध्यं दोषलिङ्गे सूक्ष्ममिति। नानुक्तमप्युक्तमिति व्रह्ममित्याचच्यते तन्नेच्छन्ति गयदासाचार्य्याः। येन चुद्ररोगसामान्यन्यायेनास्याः सा प्रविश्यन्ते प्रतिपद्यन्ते। न हि चुद्ररोगेषु कोऽपि व्याधिपठितो यः प्रत्येकदोषजः अपि च पद्या वा यस्य साप्तविध्यमभिप्रेतं स्यात् तदा दोषैः सर्व्वविधाश्चेति पाठं कुर्य्यात् तन्त्रान्तरे चेयं वातकफान्विता पठति। तस्माद्वातकफाधिको हीनपित्ततया अस्या उत्पत्तिर्ज्ञेयेति॥ २॥

प्राप्येति इयञ्च शर्करा-सम्प्राप्तिरुक्ता सा च शर्कराहेतु शर्करार्व्वुदस्य काठिन्यमेव। शर्करासादृश्येन शर्करा अन्यरोगोच्छ्रयोभ्याम-

स्रवन्ति सहसा रक्तं तद्विद्याच्छर्कराव्वुर्दं।
पामाविचर्च्चौ कुष्ठेषु रकसा च प्रकीर्त्तिता॥
परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः।
पादयोः कुरुते दारीं सरुजां तलसंश्रितां॥
शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः।
मेदोरक्तानुगैश्चैव दोषैर्व्वा जायते नृणाम्॥
सकीलः कठिनो ग्रन्थिर्निम्नमध्योन्नतोऽपि वा।
कोलमात्रः सरुक्स्रावी जायते कदरस्तु सः॥
क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुगन्वितौ।
दुष्टकर्द्दमसंस्पर्शादलसं तं विनिर्द्दिशेत्॥
रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम्।
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः॥
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः।
तदिन्द्रलुप्तं खालित्यं रुजेति च विभाव्यते॥
दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते।
कफवातप्रकोपेण विद्याद्दारुणकन्तु तं॥

र्व्वुदानां वर्णं मधुघृतरससन्निभं। तत्र इत्यादि। ततः शर्करायाः शिरा-रक्तं स्रवन्तीत्यर्थः। केचित् शर्कराव्वुर्दञ्च व्याधिद्वयमाचक्षते। तन्नेच्छति गयदासाचार्य्यः; संख्यातिरेकात्, शर्करायाः पृथक्त्वेनोक्तं इदं दर्शनार्थं। पामेति, कुष्ठेष्विति कुष्ठनिदानेषु इत्यर्थः। परिक्रमणशीलस्य सर्व्वतो भ्रमणभावस्य। दारीरिति विपादिका। शर्करा घट् कर्पूरखण्डादयः। नाभिरुन्मथिते पीड़ितो कीलेन सदृशः। सकीलमिति बोद्धव्यः सकीलं चासौ कठिनश्च सकीलकठिनः हस्तयोरपीति भोजः। अयं कफेन सशो-णितेन रोमकूपाभ्यां पित्तवातेन सह मूर्च्छितं। खालित्यं पुंसामेव न तु

अरूंषि बहुवक्त्राणि बहुक्लेदानि मूर्द्धनि।
कफासृक्कृमिकोपेन नृणां विद्यादरूंषिकाम्॥
क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः।
पित्तञ्च केशान् पचति पलितं तेन जायते॥
दाहज्वररुजावन्तस्ताम्रा स्फोटाः सपीतकाः।
गात्रेषु वदने चान्तर्विज्ञेयास्ता मसूरिकाः॥ ३॥
शाल्मलीकण्टकप्रख्याः कफमारुतशोणितैः।
जायन्ते पिड़का यूनां वक्त्रे या मुखदूषिकाः॥
कण्टकैराचितं वृत्तं कण्डूमत् पाण्डुमण्डलम्।
पद्मिनीकण्टकप्रख्यैस्तदाख्यं कफवातजम्॥
नीरुजं सममुत्पन्नं मण्डलं कफरक्तजम्।
सहजं रक्तमीषच्च श्लक्ष्णं जतुमणिं विदुः॥

योषितां तथाच विदाहः। "अत्यन्तसुकुमारां यो रजो दुष्टस्रवन्ति च। आयायामरता यस्मात् तस्मान्न खलतिः स्त्रियां"। दारुणा कठिना। कण्डुराः कण्डूयुक्ताः, प्रजायते प्रकर्षेण जायते। पित्तरुधिरयोरप्यनुबन्धोऽत्र ज्ञेयः विदेहवचनात्। दारुणकमिति उपहास इति लोके। अरूंषि व्रणान्। क्रोधादिकृतेन शरीरोष्मणा शिरोगतेन वैकृतपित्तेन पुनः प्राकृतं पलितं। अन्यथा पित्तोष्मणोरभेदात् पुनरुक्तिदोषः स्यात्। पञ्जिकाकारस्तु शरीरोष्मा पावकः पित्तं तदाश्रयः एतौ पित्तपावकावेकीभूय केशान् पचेत्, एतेन केवलोष्मकृतस्य विकृतस्याहोषप्रसङ्गो निराकृत इति मन्यते। तावत्तेन शोणितानुबन्धो येषां तथा। तन्त्रान्तरे च, पित्तशोणितसंसृष्टं दूषयतित्वच्च तदा करोति पिड़िकाः स र्व्वगात्रेषु देहिनः। मसूरमुद्गमाषाणां तुल्याः कोलोपमा इति। मसूरिकास्तु विज्ञेयाः पिड़का रक्तपित्तजाः। एतासां शीतलिका इति लोकाश्रया संज्ञाः॥ ३॥

शाल्मलीति—शाल्मलीकण्टकप्रख्याः शाल्मलीकण्टकसदृशाः, यूनां तरु-

अवेदनं स्थिरश्चैव यस्य गात्रेषु दृश्यते।
माषवत् कृष्णमुत्सन्नमनिलान्मशकं दिशेत्॥
कृष्णानि तिलमात्राणि नीरुजानि समानि च।
वातपित्तकफोद्रेकात्तान्विद्यात्तिलकालकान्॥
मण्डलं महदल्पं वा श्यामं वा यदि वा सितम्।
सहजं नीरुजं गात्रे न्यच्छमित्यभिधीयते॥
समुत्थाननिदानाभ्यां चर्म्मकीलप्रकीर्त्तितं।
क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः॥
सहसा मुखमागम्य मण्डलं विसृजेत्ततः।
नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत्॥
मर्द्दनात् पीड़नाच्चापि तथैवाप्यभिघाततः।
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरः॥
तदा वातोपसृष्टन्तु चर्म्म प्रतिनिवर्त्तते।
मणेरधस्तात् कोशश्च ग्रन्थिरूपेण लम्बते॥
सवेदनः सदाहश्च पाकञ्च व्रजति क्वचित्।

चाणां, कण्टकैराहतं वृत्तं कण्डूमत्पाण्डुमण्डलं। पद्मिनीकण्टकप्रख्यैः पद्मिनीकण्टकसदृशैः, जम्बवलप्रवृत्तं। श्लक्ष्णं अकर्कशं। जतुमणि जतु इति लोकाश्रयात्तज्ज्ञाः। स्थिरं कठिनं। वातपित्तकफाच्छोषादिति। वातपित्ताभ्यां कफस्य शोषादित्यर्थः। अन्येतु वातपित्तासृग्च्छोषादिति पठन्ति। व्याख्यानयन्ति च। वातपित्ताभ्यां रक्तस्य शोषादित्यर्थः। अतएव तिलकालके कफोद्रेकादिति पाठः। तस्मिन् पाठे कफोद्रेकलक्षणं तिलकालके। सहजं जम्बवलप्रवृत्तं। न्यच्छं लोकलाञ्छनमिति वदन्ति, पित्तरक्तान्वितो वायुरस्य लक्षणं। समुत्थानं सम्प्राप्तिः। निदानहेतुलक्षणनिर्द्देशः। गयदासाचार्य्यस्तु समुत्थाननिदानाभ्यामिति चर्म्मकील-

मारुतागन्तुसम्भूतां विद्यात्तां परिवर्त्तिकाम् ॥
सकण्डूः कठिनाचैव सैव श्लेष्मसमुत्थिता ॥ ४ ॥
अल्पीयसां यदा हर्षाद्वालां गच्छेत् स्त्रियं नरः ॥
हस्ताभिघातादथवा चर्म्मण्युद्वर्त्तिते वलात् ।
मर्द्दनात् पीड़नाद्वापि शुक्रवेगविघाततः ॥
यस्यावपाट्यते चर्म्म तां विद्यादवपाटिकाम् ।
वातोपसृष्टमेवन्तु चर्म्म संश्रयते मणिम् ॥
मणिश्चर्म्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च ।
निरुद्धप्रकशं तस्मिन्मन्दधारमवेदनम् ॥
मूत्रं प्रवर्त्तते जन्तोर्म्मणिर्न्नच विदीर्य्यते ।
निरुद्धप्रकशं विद्यात् सरुजं वात-सम्भवं ॥
वेगसन्धारणाद्वायुर्व्विहतो गुदमाश्रितः ।
निरुणद्धि महत्स्रोतः सूक्ष्मद्वारं करोति च ॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेनं विद्यात् सुदुस्तरम् ॥

प्रतिपादकं वाक्यमेव पठति, व्यङ्गएव स्थानान्तरेण वर्णान्तरेण च । नौसिके-त्यन्ये । सकण्डुः अतीति मर्द्दनपीड़नाभ्यां प्रत्येकं सम्बध्यते । सम्यक् कृतयो र्हि मर्द्दनपीड़नयोर्व्वायुः प्रशान्तकरएव भवति । भजते आश्रयति सर्व्वतश्चरो वायुर्व्यानः चर्म्मप्रतिनिवर्त्तत इति मार्ग विहाय सर्व्वतेज्या-घटतीत्यर्थः । कोशश्चर्म्मकोशः । सेव परिवर्त्तकेत्यर्थः ॥ ४ ॥

अल्पीति । अल्पीयसां अल्पतरयोनिद्वारां, चर्म्मण्युत्पद्यते उत्तानीभूय-व्यावुटिते । तस्य चर्म्ममर्द्दनादिभिर्व्विपद्यते विदार्य्यते । तस्य तामवपाटिकां विद्यादित्यर्थः । चर्म्मकर्त्तुर्हन्युद्वर्त्तिते । शूलमर्द्दं प्रवर्त्तत इत्यन्ये । वातोपसृष्ट-मिति । एवमतिमर्द्दनपीड़नाभिघातादिनेत्यर्थः । संश्रयते समग्रं श्रयते ।

शक्रन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्।
स्विन्नस्यास्नाप्यमानस्य कण्डू रक्तकफोद्भवा॥
कण्डूयनात्ततः चिप्रं स्फोटः स्रावश्च जायते।
एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम्॥
स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः।
प्रक्लिद्यते यदा स्वेदात् स कण्डूं जनयेत्तदा॥
तत्र कण्डूयनात् चिप्रं स्फोटः स्रावश्च जायते।
प्राहुर्वृषणकच्छूस्तां श्लेष्मरक्तप्रकोपजाम्॥
प्रवाहणातिसाराभ्यां निर्गच्छति गुदं वहिः।
रूक्षदुर्व्वलदेहस्य तं गुदभ्रंशमादिशेत्॥ ५॥

दुरूढ़ां चावपाटिकामिति, अवपाटिकापि दुरूढ़ा निरुद्धप्रकशाख्यां लभते। वेगसन्धारणादिति। विहतो निरुद्धगतिः। शकृदिति शकृन्मुत्रसमायुक्ते अपाने गुदधौते क्रियमाणे शौचे। शिशो रक्तकफोद्भवा कण्डूर्भवेदिति सम्बन्धः। कथम्भूतस्य? स्विन्नस्य अस्नाप्यमानस्य च। एकीभूतं अपानं व्रणैः सहेत्यध्याहार्य्यं। अहिपूतनं कफरक्तजं ज्ञेयं। स्नानोत्सादनमिति उत्सादन-मुद्वर्त्तनं। प्रवाहनेति, प्रवाहनं प्रकर्षेण निर्व्वाहणं। अयं वातकोपजः॥५॥

इति निबन्धसंग्रहे निदानस्थाने त्रयोदशोऽध्यायः।

चतुर्द्दशोऽध्यायः।

अथातः शूकदोषनिदानं व्याख्यास्यामः।

लिङ्गवृद्धिमिच्छतामक्रमप्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते॥ १॥

अथात इति। शूकदोषनिदानमिति। अत्रादिशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः। तेन शूकादिदोषमित्यर्थः। आदिशब्दात् दुष्टयोनिगूढ़ान्तर्लोम। योनि-

तद्यथा—सर्षपिका । अष्ठीलिका । ग्रथितं । कुम्भीका । अलजी । मृदितं । सम्मूढ़पिड़का । अवमन्थः । पुष्करिका । स्पर्शहानिः । उत्तमा । शतपोनकः । त्वक्पाकः । शोणितार्व्बुदम् । मांसार्व्बुदम् । मांसपाकः । विद्रधिः । तिलकालकश्चेति ॥

गौरसर्षपतुल्या तु शूकदुर्भग्नहेतुका ।
पिड़का कफरक्ताभ्यां ज्ञेया सर्षपिका बुधैः ॥
कठिना विषमैरन्तैर्म्मारुतस्य प्रकोपतः ।
शूकैस्तु विषसंयुक्तैः पिड़काष्ठीलिका भवेत् ॥
शूकैर्यत् पूरितं शश्वद् ग्रथितं तत् कफोत्थितम् ।
कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभा शुभा ॥

भंगागमनाभिघातश्चाभिप्रेतः । नन्वेवं पठति गयदासाचार्य्यः । दुष्टयोन्यादीनां उपदंशहेतुत्वात् । शूकः सगन्तुजः मलः । लिङ्गवृद्धिकरो योगो योन्या दोषोऽत्र दृष्टिः । असम्यक्करणाद्देकृतिं । अथवा दोषो-वातादिः । वातादिकृतो विकारः तेषां लक्षणसैव निर्द्देशात् निदानं, न तु हेतोर्हेतुः । पुनरेष शूक एव । स च प्रतिमूत्रेणाभिहितः । तेषां शूकदोषजानां व्याधीनां सामान्यानां सम्प्राप्तिमाह, लिङ्गवृद्धीति । लिङ्गवृद्धिः स्थूलीकरणं । आयामपरिणाहाभ्यामित्यन्यैर्व्वाख्यायनत्वात् युक्ति लिङ्गवृद्धिनिरुक्तः । अक्रमोऽनाचारः, उक्त वस्तिकर्म्मोऽनाचार इत्यन्ये । तन्नेच्छति गयदासाचार्य्यः ॥ १ ॥

संख्येय—निर्द्देशादेव संख्यायां लब्धायां अष्टादशवचनं संशयवचनं भ्रान्तिनिरासार्थं । तद्यथेति । शूकदुर्भग्नहेतुकेति दुःखवारितशूकहेतुकेत्यर्थः । अन्ये शूकदुर्भगहेतुकेति पठन्ति । व्याख्यानयन्ति । शूकोदुष्टभग्नस्य हेतुर्यस्याः सा तथा । तन्नेच्छति गयदासाचार्य्यः, शूकैरष्ठीलिका भवेदिति सम्बन्धः । विषमैरप्रशस्तैः अन्तैरिति कोऽर्थः पतितैः । अन्यै-

अलजीलक्षणैर्युक्तामलजीञ्च वितर्कयेत्।
मर्दितं पीड़ितं यत्तु संरब्धं वायुकोपतः॥
पाणिभ्यां भृशसंमूढ़े संमूढ़पिड़का भवेत्।
दीर्घा बह्वाश्च पिड़का दीर्य्यन्ते मध्यतस्तु याः॥
सोऽवमन्थः कफासृग्भ्यां वेदना रोमहर्षकृत्॥ २॥
पित्तशोणितसम्भूता पिड़का पिड़काचिता॥
पद्मपुष्करसंस्थाना ज्ञेया पुष्करिकेति सा।
जनयेत् स्पर्शहानिन्तु शोणितं शूकदूषितम्॥
मुद्गमाषोपमा रक्ता पिड़का रक्तपित्तजा।
उत्तमैषा तु विज्ञेया शूकाजीर्णनिमित्तजा॥
छिद्रैरणुमुखैर्यत्तु चितं मेढ्रं समन्ततः।
वातशोणितजो व्याधिर्विज्ञेयः शतपोनकः॥
पित्तरक्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहवान्॥ ३॥

र्विषमैस्तैरुपलचितेति व्याचष्यते। एतेन विषमान्तसहिता इत्युक्तं। विषमभुग्नैः विषमेण कृत्वा वक्रैरित्यर्थः। शूकैर्य्येदिति। एतेन एकादिनान्तर-पूरणं प्रशस्तमिच्छन्ति। कामतन्त्राचार्य्यैः नित्यपूरणोत्ग्रथितनाम्नो रोगस्योत्पत्तिः। कुम्भीकेति। कुम्भीका कुम्भफलमिव, अशुभेति शुभः शुक्लः तद्विरोधेन अशुभा कृष्णेत्यर्थः। अयमपि दुष्टशुकावचारणात् चया। यत् पुनर्लिङ्गपातितशूकं सत्। हस्ताभ्यामिति। भृशसंमूढ़ेत्यर्थः, पिच्चितावनतपाणितललिङ्गे शूके इत्यर्थः। संमूढ़पिड़कानुदितञ्च वातरक्तात्। वह्वः प्रभुताः। अवमन्थोपि स्थूलीकर्म्मशूककर्म्मापचारेण ज्ञेयः॥ २॥

पित्तशोणितेति। पद्मपुष्कर पद्मकर्णिका। एषापि स्वकर्म्मापचारजा ज्ञेया। जनयेदिति। स्पर्शहानिं स्पर्शहानिनामानं व्याधिविशेषं, शूकदूषितं शूकेन दुष्टिं नीतां पित्तरक्तकृते ज्ञेयः। त्वक्पाको ज्वरदाहवान् पित्तरक्तकृत इति दुःखधारितशूकजनितशोणितजैरित्यर्थः। अस्याधिष्ठान-

कृष्णस्फोटैः सरक्तैश्च पिड़काभिश्च पीड़ितम्।
यस्य वस्तिरुजश्चोग्रा ज्ञेयं तच्छोणितार्व्वुदम्॥
मांसदोषेण जानीयादर्व्वुदं मांससम्भवं।
शीर्य्यन्ते यस्य मांसानि यस्य सर्व्वाश्च वेदनाः॥
विद्यात्तं मांसपाकन्तु सर्व्वदोषकृतं भिषक्।
विद्रधिं सन्निपातेन यथोक्तमभिनिर्द्दिशेत्॥
कृष्णानि चित्राण्यथवा शूकानि सविषाणि च।
पातितानि पचन्त्याशु मेढ्रं निरवशेषतः॥
कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः।
सन्निपातसमुत्थानं तं विद्यात्तिलकालकम्॥
तत्र मांसार्व्वुदं यच्च मांसपाकश्च यः स्मृतः।
विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः॥ ४॥

मित्यर्थः, मुद्गमाषेति उक्तव्याधिविशेषा, शूकाजीर्णनिमित्तयोर्ज्जातः शूकाजीर्णदुःखचारितसुखविक्षतलक्षणपातितेन शूकेनाजीर्णं प्रतिलक्षण-पातितलक्षणपातनिमित्ताभ्यां जायत इत्याहुः। छिद्रैरनुमुखैरिति। छिद्रै-र्दुःखचारितैः शूकदूषितरक्तपित्तजैरित्यर्थः। गयदासाचार्य्यस्तु दुःख-चारितशूकं दूषितवातपित्तज इत्यर्थः॥ ३॥

कृष्णैरिति। यस्य वस्त्यधिष्ठानं स्फोटैः पिड़काभिश्च पीड़ितो भवति तत् शोणितार्व्वुदं ज्ञेयमिति सम्बन्धः। अयमपि दुःखचारितशूकेभ्यो मांस-दोषेण जानीयात्। अर्व्वुदं मांससम्भवं मांसदोषेण मांसवृद्ध्या। अयमपि दुःखचारित शूकलिङ्गैः। विद्रधिरिति। कृष्णानीति, चित्राणि विचित्राणि शुक्लपीतनीलादिवर्णानीत्यर्थः। कालानि परिणततिलकालवर्णानि। शीर्य्यन्ते गलन्ति। शूकदोषजानां असाध्यान् निर्द्दिशन्नाह,—तत्र मांसार्व्वुदमिति॥४॥

इति निबन्धसंग्रहे निदानस्थाने चतुर्द्दशोऽध्यायः।

पञ्चदशोऽध्यायः ।

अथातो भग्नानां निदानं व्याख्यास्यामः ।

पतनपीड़नप्रहाराक्षेपणव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुसार्य्यमाणं द्विविधमेवोत्पद्यते सन्धिमुक्तं काण्डभग्नञ्च ।

तत्र सन्धिमुक्तमुत्पिष्टं विश्लिष्टं विवर्त्तितमवक्षिप्तमतिक्षिप्तं तिर्य्यक्क्षिप्तमिति षड्विधम् ॥ १ ॥

तत्र प्रसारणाकुञ्चनविवर्त्तनाक्षेपणाऽशक्तिरुग्रुजत्वं स्पर्शासहत्वं चेति सामान्यं सन्धिमुक्तलक्षणमुक्तम् ।

विशेषेणोत्पिष्टे सन्धावुभयतः शोफो वेदनाप्रादुर्भावो विशेषतश्च नानाप्रकारा वेदना रात्रौ प्रादुर्भवन्ति । विश्लिष्टेऽल्पशोफो वेदनासातत्यं सन्धिविक्रिया च । विवर्त्तिते तु

अथात इति भग्नानां हेतुं निर्दिशन्नाह,—पतनपीड़नेति । प्रभृतिग्रहणात् वलवद्विग्रहादीनामवरोधः । अनेकविधं वहुप्रकारं । तेषां द्वैविध्यमाह,—तत्त्विति । भङ्गजातमिति । जातं समूहं । अत उत्सार्य्यमाणमनुसर्त्तुं पूर्य्यमाणं । अशुश्रूयमाणमित्येके पठन्ति । सन्धिमुक्तकाण्डभग्नयोर्लक्षणमाह,—तत्र पर्व्वणोत्यादि । अयं पाठोऽभावान्नखितो न च व्याख्यातः । सन्धिमुक्तस्य षाड्विध्यमाह,—तत्र सन्धिमुक्तमिति । षड्विधं सन्धिमुक्तं षड्विधमिति सम्बन्धः ॥ १ ॥

तत्र सन्धिमुक्तस्य सामान्यलक्षणमाह,—तत्र प्रसारणेति । सामान्यं सन्धिभग्नलक्षणमुक्तं । विवर्त्तनं विपरीतावर्त्तनं, आक्षेपनमतिशयेन चालनं । उत्पिष्टादिलक्षणमाह,—विशेषेणोत्पिष्ट इति । उत्पिष्टे चुर्णिते ।

सन्धिपार्श्वापगमनात् विषमाङ्गता वेदना च। अवक्षिप्ते सन्धि-विश्लेषस्तीव्ररुजत्वञ्च। अतिक्षिप्ते द्वयोः सन्ध्यस्थ्नोरतिक्रान्तता वेदना च। तिर्य्यक्क्षिप्ते त्वेकास्थिपार्श्वापगमनात्यर्थं वेदना-चेति ॥ २ ॥

काण्डभग्नमतऊर्द्ध्वं वक्ष्यामः। कर्कटकमश्वकर्णं चूर्णितं पिच्चितमस्थिच्छलितं काण्डभग्नं मज्जानुगतमतिपातितं वक्रं छिन्नं पाटितं स्फुटितमिति द्वादशविधं। श्वयथुबाहुल्यं स्पन्दनविवर्त्तनस्पर्शासहिष्णुत्वमवपीड्यमाने शब्दः स्रस्ताङ्गता विविधवेदनाप्रादुर्भावः सर्व्वास्ववस्थासु न शर्म्मलाभ इति समासेन काण्डभग्नलक्षणमुक्तम्।

विशेषतस्तु संमूढ़मुभयतोऽस्थिमध्यभग्नं ग्रन्थिरिवोन्नतं कर्कटकम्। अश्वकर्णवदुन्नतमश्वकर्णकम्। चूर्णितमस्थि तत्तु शब्दस्पर्शाभ्यां बोद्धव्यं। पिच्चितं पृथुताङ्गतमनल्पशोफं।

विश्लिष्टे यदिति सन्धिरिति शेषः। सन्धिसंश्रययोरधस्थौ व्यावर्त्तनेन विवर्त्तितेत्येकसन्धिः पार्श्वौ गमनात्। विषमाङ्गतवेदनां चेति चकारात् वेदनापि विषमेत्यर्थः। अवक्षिप्त इति। अतिक्षिप्ते दूरङ्गते सन्धौ। अतिक्रान्तता दूरगमनं। अतिवेदनाचेति चकारार्थः। तिर्य्यगिति। तिर्य्यक्क्षिप्ते सन्धाविति शेषः। तत्रैकस्यैव पार्श्वापगमनं विवर्त्तते द्वयोरपीति शेषः ॥ २ ॥

काण्डभग्नमिति। सामान्यलक्षणमाह,—श्वयथुबाहुल्यमिति। तेषां प्रत्येकं विशिष्टलक्षणमाह,—विशेषतस्त्विति उभयोः पार्श्वयोर्निपीड़नेनानतबाधनं सम्यक्ग्रन्थिरिवोन्नतं इति व्याख्यानयन्ति। कर्कटकं कर्कटसदृशं, अश्वकर्णवदुन्नतमश्वकर्णकं अश्वकर्णसदृशमित्यर्थः। स्पृश्यमाणशब्दवत्। चूर्णितमवगच्छेत् चूर्णितं चूर्णीकृतं, अवगच्छेत् जानीयात्। पिच्चितं पृथुतां

पार्श्वयोरस्थिहीनोद्गतमस्थिच्छल्लितं। खल्लेत प्रकम्पमानं काण्डभग्नत्वं। अस्थ्यावयवोऽस्थिमध्यमनुप्रविश्य मज्जानमुन्नह्यतीति मज्जानुगतं। अस्थि निःशेषतश्छिन्नमतिपातितं। आभुग्नमविमुक्तास्थिवक्रं। अन्यतरपार्श्वावशिष्टं छिन्नं। पाटितमणुबहुविदारितं वेदनावच्च। शूकपूर्णमिवाध्मातं विपुलं विस्फुटीकृतं स्फुटितमिति। तेषु चूर्णितच्छिन्नातिपातितमज्जानुगतानि कृच्छ्रसाध्यानि कृशवृद्धबालानां क्षतक्षीणकुष्ठश्वासिनां सन्ध्युपगतञ्चेति ॥ ३ ॥

भवति चात्र।

भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा च्युतं।
जघनं प्रतिपिष्टञ्च वर्ज्जयेत्तच्चिकित्सकः॥

गतमनल्पशोफं, पिच्चितं पीड़ितसदृशं। पृथुतां गतं विस्तीर्णतां गतं। अस्थिउच्छलितमिव विद्यते यस्मिन् तत् अस्थिच्छलितं। अस्थिसन्नितमित्यन्ये। खल्लेतप्रकम्पमानमिति खल्लेत चलति, यद्यपि काण्डव्यपदेशे द्वादशानामपि तथापि कस्यचित् व्यपदेशः। यथा विशिष्टजङ्घा-योगेन एलादीनामिव जङ्घात्वं। अस्थ्यावयव इति। आभुग्नमीषदृजिह्मं। छिन्नं अन्यतरपार्श्वं एकपार्श्वेत्यर्थः। पाटितमिति। अन्यूनि बहूनि विदारितानि यस्य तत्तथा। गयदासाचार्य्यास्तु स्फुटितलक्षणमेतत् पठन्ति। अग्रेतनं पाटितलक्षणमिति। शूकपूर्णमिति। शूकं यवादीनामग्रभागं तत्पूर्णमिव वेदनाविशेषः। आध्मात शूलं, विस्फुटीकृतं विपुलस्फुटितं, गयदासाचार्य्यास्तु विपुलैकदारीति पठन्ति। कृच्छ्रसाध्यान् निर्द्दिशन्नाह,—तेष्विति। चकारात् कण्डोपघातमिति ॥ ३ ॥

असाध्यान् निर्द्दिशन्नाह,—भिन्नमिति। साध्यं षड्विधं तत् तथोच्यते। विशिष्टं लम्बितमसाध्यं, सन्धिमुक्तशब्देन च्युतस्यापि सन्धिमुक्तभेदस्यासाध्यत्वे लब्ध तदुपादानं विशेषार्थं जघनं प्रतीति। जघनस्यापि

असंश्लिष्टं कपालन्तु ललाटे चूर्णितञ्च यत्।
भग्नं स्तनान्तरे शङ्खे पृष्ठे मूर्द्ध्नि च वर्ज्जयेत्॥
आदितो यच्च दुर्ज्जातमस्थिसन्धिरथापि वा।
सम्यक् संहितमप्यस्थि दुर्न्यासाद्दुर्निवन्धनात्॥
संक्षोभाद्वापि यद्गच्छेद्विक्रियां तत्तु वर्ज्जयेत्।
मध्यस्य वयसोऽवस्थास्तिस्रो याः परिकीर्त्तिताः।
तत्र स्थिरो भवेज्जन्तुरुपक्रान्तो विजानता।
तरुणास्थीनि नम्यन्ते भज्यन्ते नलकानि तु॥
कपालानि विभिद्यन्ते स्फुटन्ति रुचकानि च॥ ४॥

पिष्टं सन्धिमुक्ताभदोषं अश्लिष्टविघट्टितसन्धिः। ललाटे चूर्णितं यदिति, चूर्णितं काण्डभग्नमेतत् भग्नं सन्धिमुक्तं। काण्डभग्नं द्वयमपि बोद्धव्यं। इदानीं विविधस्यापि सर्व्वस्थानगतावयवावस्थाया असाध्यत्वं दर्शयन्नाह,—आदित इति। आदित उत्पत्तावेव दुःसन्धानेव पादितं। यदस्थिभग्नमिति शेषः। तदसाध्यमतिसन्धिरथापिचेति। सन्धिस्थोरन्तरालं। सोऽपि दुर्ज्जातोऽसाध्यः। सम्यक् संहितमिति यथास्थि सम्यगिति तिस्रो अवस्था इति षोड़शवर्षादूर्द्धं चत्वारिंशत् यावत् पूर्य्यते। अस्थिविशेषेणापि भग्नविशेषं दर्शयन्नाह,—तरुणास्थीनीति। घ्राणकर्णकटकाक्षिकुटेषु तरुणास्थीनि नम्यन्ते वक्री भवन्ति। एतेन वक्रलक्षणं भुग्नमुक्तं। नलकानि शाखास्थीनि भज्यन्ते त्रुटन्ति। स्फुटन्ति रुचकानि चेति। कपालानि मस्तकादिखर्पराणि विभिद्यन्ते। इत्यनेन कपालेषु विदारणलक्षणो भग्नउक्तः। स्फुटितपाटितादिरुचकास्थीनीति। रुचका दन्ताः। तेषु स्फुटितं भग्नमुक्तं। चकारेण वलयेष्वपि स्फुटितं समुच्चीयते। एतेन पञ्चविधान्यस्थीनि तरुणकपालवलयरुचकाभुग्नानि॥ ४॥

इति निवन्धसंग्रहे निदानस्थाने पञ्चदशोऽध्यायः।

षोड़शोऽध्यायः ।

अथातो मुखरोगाणां निदानं व्याख्यास्यामः ।

मुखरोगाः पञ्चषष्टिः सप्तस्वायतनेषु तत्रायतनान्यष्टौ दन्तमूलानि दन्ता जिह्वा तालु कण्ठः सर्व्वाणि चेति । तत्राष्टावोष्ठयोः । पञ्चदश दन्तमूलेषु । अष्टौ दन्तेषु । पञ्च जिह्वायाम् । नव तालूनि । सप्तदश कण्ठे । त्रयः सर्व्वेष्वायतनेषु ।

तत्रौष्ठप्रकोपा वातपित्तश्लेष्मसन्निपातरक्तमांसमेदोऽभिघातनिमित्ताः ।

कर्कशौ परुषौ स्तब्धौ कृष्णौ तीव्ररुगन्वितौ ।
दाल्येते परिपुट्येते ओष्ठौ मारुतकोपतः ॥
आचितौ पिड़काभिस्तु सर्षपाकृतिभिर्भृशम् ।
सदाहपाकसंस्रावौ नीलौ पीतौ च पित्ततः ॥
सवर्णाभिस्तु चीयेते पिड़काभिरवेदनौ ।
कण्डुमन्तौ कफाच्छन्नौ पिच्छिलौ शीतलौ गुरू ॥
सकृत्कृष्णौ सकृत्पीतौ सकृच्छ्वेतौ तथैव च ।
सन्निपातेन विज्ञेयावनेकपिड़काचितौ ॥

अथात इति, तेषां संख्यामाह,—मुखरोगा पञ्चषष्टिरिति । अन्ये सप्तषष्टिरित्याहुः, तन्नेच्छन्ति निबन्धकाराः । अथ कियत्सु स्थानेषूत्पद्यन्ते इत्याह । सप्तस्वायतनेष्विति । तान्येव स्थानान्याह,—तत्रायतनान्यष्टाविति । ओष्ठप्रकोपाः ओष्ठरोगाः । तेषामोष्ठरोगाणां प्रत्येकं विशिष्टलक्षणमाह,—

खर्ज्जूरफलवर्णाभिः पिड़काभिः समाचितौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥
मांसदुष्टौ गुरुस्थूलौ मांसपिण्डवदुद्गतौ।
जन्तवश्चात्र मूर्च्छन्ति सृक्कस्योभयतो मुखात्॥
मेदसा घृतमण्डाभौ कण्डूमन्तौ स्थिरौ मृदू।
अच्छस्फटिकसङ्काशमास्रावं स्रवतो गुरू॥
क्षतजाभौ विदीर्य्येते पाट्येते चाभिघाततः।
ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ॥ १॥

दन्तमूलगतास्तु शीतादो दन्तपुप्पुटको दन्तवेष्टकः शौषिरो महाशौषिरः परिदर उपकुशो दन्तवैदर्भो वर्द्धनोऽधिमांसो नाड्यः पञ्चेति।

शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च॥
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम्।

कर्कशौ शाकपत्रसदृशौ, परुषौ रुक्षौ। स्तब्धौ निश्चलौ, दाल्येते द्विविधौ भिद्यत इव परिपाट्यते। चीयेते व्याप्यते, शूनौ शोफयुक्तौ। सक्तस् किञ्चिदित्यर्थः। अनेकपिड़कया चिता अनेकपिड़काव्याप्ता इत्यर्थः। अयमसाध्यो ज्ञेयः। रक्तोपसृष्टौ रक्तजव्याधियुक्तौ, शोणितप्रभौ रक्तच्छायौ। मांसदुष्टाविति। उभयतः सृक्कभागयोरित्यर्थः। सृक्कयोः ओष्ठमेदसा घृतमण्डाभः घृतस्योपर्य्यच्छभागः। स्थिरावचलौ। क्षतजाभाविति। क्षतजाभौ रक्तच्छायौ, दीर्य्येते विदारणयुक्तौ भवतः। पाट्येते द्विधाभिद्यतइव। ग्रथितौ ग्रन्थियुक्तौ, ओष्ठप्रकोपे वातजेषु शुद्धवातकारणं, अभिघातजेषु कफरक्तसहित इति परस्परं भेदः॥ १॥

दन्तमूलगतास्त्विति। तेषां प्रत्येकं लक्षणमाह,—शोणितमिति। शीर्य्यन्ते

शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥
दन्तयोस्त्रिषु वा यस्य श्वयथुः सरुजो महान् ।
दन्तपुप्पुटको ज्ञेयः कफरक्तनिमित्तजः ॥
स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥
श्वयथुर्द्दन्तमूलेषु रुजावान् कफरक्तजः ।
लालास्रावी स विज्ञेयः कण्डूमान् शौषिरो गदः ॥
दन्ताश्चलन्ति वेष्टेभ्यस्तालुश्चाप्यवदीर्य्यते ।
दन्तमांसानि पच्यन्ते मुखञ्च परिपीड्यते ॥
यस्मिन् स सर्व्वजो व्याधिर्महाशौषिरसंज्ञकः ।
दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक् ॥
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ।
वेष्टेषु दाहः पाकश्च तेभ्यो दन्ताश्चलन्ति च ॥
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः ।
आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते ॥
यस्मिन्नुपकुशः स स्यात् पित्तरक्तकृतो गदः ।
घृष्टेषु दन्तमूलेषु संरम्भो जायते महान् ॥
भवन्ति च चला दन्ताः स वैदर्भोऽभिघातजः ।
मारुतेनाधिको दन्तो जायते तीव्रवेदनः ॥
वर्द्धनः स मतो व्याधिर्ज्जाते रुक् च प्रशाम्यति ।
हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ॥

भवन्ति। दन्तयोरिति द्विवचनात् तालुश्चाप्यवदीर्य्यत इति चकारेण दन्तातालु च दीर्य्यते। ओष्ठचापि च सर्व्वजः। सर्व्वजः सर्व्वदोषेभ्य अयं

लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ।
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ॥ २ ॥

दन्तगतास्तु दालनः क्रिमिदन्तको दन्तहर्षो भञ्जनकः शर्करा कपालिका श्यावदन्तको हनुमोक्षश्चेति ॥

दाल्यन्ते वहुधा दन्ता यस्मिंस्तीव्ररुगन्विताः ।
दालनः स इति ज्ञेयः सदागतिनिमित्तजः ॥
कृष्णश्छिद्री चलः स्रावी ससंरम्भो महारुजः ।
अनिमित्तरुजो वाताद्विज्ञेयः कृमिदन्तकः ॥
दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च ।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात् ॥
वक्त्रं वक्रं भवेद्यस्मिन् दन्तभङ्गश्च तीव्ररुक् ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥
शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै ।
सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा ॥
दलन्ति दन्तवल्कानि यदा शर्करया सह ।
ज्ञेया कपालिका सैव दशनानां विनाशिनी ॥
योऽसृग्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः ।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः ॥

सस्वरावात् मारयति । दन्तमांसानीति । रोगी वहुलं फुत्करोति । प्रघट्टिता प्रचालिता । संरम्भोऽत्र श्वयथुः । जाते प्रशाम्यतीति व्याधिप्रभवात्, यथेरिता इति यथा कथिताः ॥ २ ॥

तेषां प्रत्येकं लक्षणमाह,—दाल्यन्त इति, दाल्यन्ते विदार्य्यन्ते, सदागतिनिमित्तजः सदागतिरिति तन्निमित्तजः । असाध्योऽयं व्याधिः । सच्छिद्र-

वातेन तैस्तैर्भावैस्तु हनुसन्धिर्विसंहतः।
हनुमोक्ष इति ज्ञेयो व्याधिरर्द्दितलक्षणः॥ ३॥

जिह्वागतास्तु कण्टकास्त्रिविधास्त्रिभिर्दोषैरलास उपजिह्विका चेति।

जिह्वानिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा।
पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कण्टकैश्च।
कफेन गुर्व्वी बहुला चिता च मांसोद्गमैः शाल्मलिकण्टकाभैः॥
जिह्वातले यः श्वयथुः प्रगाढ़ः सोऽलाससंज्ञः कफरक्तमूर्त्तिः।
जिह्वां स तु स्तम्भयति प्रवृद्धो मूले तु जिह्वा भृशमेति पाकम्॥
जिह्वाग्ररूपः श्वयथुर्हि जिह्वामुन्नम्य जातः कफरक्तयोनिः।
प्रसेककण्डूपरिदाहयुक्ता प्रकथ्यतेऽसावुपजिह्विकेति॥

तालुगतास्तु गलशुण्डिका तुण्डिकेर्य्यध्रुषो मांसकच्छपोऽर्व्वुदं मांससङ्घातस्तालुपुप्पुटस्तालुशोषस्तालुपाक इति॥

दन्तकः क्रिमिकृतच्छिद्रवान्। संरम्भः श्वयथुः। असाध्योऽयं व्याधिः। शर्करा कर्परसूक्ष्मखण्डः। गुणघ्नी शुक्लादिगुणातीतस्फोटनी। दलन्ति स्फुटन्ति, दन्तवकः छिद्रवन्तः, असाध्योऽयं व्याधिः। तैस्तैरुच्चैर्व्याहरतः कठिनभक्षणजृम्भणादिभिः। विसंहितो विघट्टितः। हनुर्मोक्षव्याधिरपि दन्तस्थाने सामीप्यात्। दन्तपीड़ाकरत्वात् दन्तरोग इति व्यपदिश्यते॥ ३॥

जिह्वागतास्तु कण्टकास्त्रिविधास्त्रिभिर्दोषैः वलास उपजिह्विका चेतीति। तेषां प्रत्येकं लक्षणमाह,—जिह्वानिलेनेति। शाको वृक्षविशेषो महाखरपत्रलक्षणः। छदनं पत्रं। पित्तेनेति। चिता व्याप्ता। बहुला स्थूला। मांसोद्गमैर्मांसाङ्कुरैः। चिता व्याप्ताः। जिह्वास्तम्भेन तु वायुरप्यस्ति। भृशं पाकेन तु पित्तमप्यस्ति। अतएव त्रिदोषत्वेनासाध्यत्वमपि दुरपक्रमत्वात्। जिह्वाग्ररूपेणेति। जिह्वामुन्नम्य ऊर्द्धीकृत्य जात उत्पन्नः। एतेन जिह्वाया अधोभवतीत्युक्तं। कफरक्तयोनिः श्लेष्मरक्तकारणं। तेषां प्रत्येकं लक्षणमाह,—

श्लेष्मासृग्भ्यां तालुमूलात्प्रवृद्धो दीर्घः शोफो ध्मातवस्तिप्रकाशः।
तृष्णाकासश्वासकृत्सम्प्रदिष्टो व्याधिर्वैद्यैःकण्ठशुण्डीति नाम्ना॥
शोफःस्थूलस्तोददाहप्रपाकी प्रागुक्ताभ्यां तुण्डिकेरी मता तु।
शोफः स्तब्धो लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्यः॥
कूर्म्मोत्सन्नोऽवेदनोऽशीघ्रजन्माऽरक्तो ज्ञेयः कच्छपः श्लेष्मणा स्यात्।
पद्माकारं तालुमध्ये तु शोफं विद्याद्रक्तादर्व्वुदं प्रोक्तलिङ्गं॥
दुष्टं मांसं श्लेष्मणा नीरुजञ्च तालून्तस्थं मांससङ्घातमाहुः।
नीरुक् स्थायी कोलमात्रः कफात् स्यान्मेदोयुक्तात् पुप्पुटस्तालुदेशे॥
शोषोऽत्यर्थं दीर्य्यते चापि तालुः श्वासो वातात्तालुशोषः सपित्तात्।
पित्तं कुर्य्यात् पाकमत्यर्थघोरं तालुन्येवं तालुपाकं वदन्ति॥४॥

कण्ठगतास्तु रोहिण्यः पञ्च कण्ठशालुकमधिजिह्वो वलयो वलास एकवृन्दो वृन्दः शतघ्नी गिलायुर्गलविद्रधिर्गलौघः स्वरघ्नो मांसतानो विदारी चेति।

गलेऽनिलः पित्तकफौ च मूर्च्छितौ पृथक् समस्ताश्च तथैव शोणितम्।
प्रदूष्य मांसं गलरोधिनोऽङ्कुरान् सृजन्ति यान् साशुहरा तु रोहिणी॥

तोददाहप्रपाकयुक्त इति शेषः। प्रागुक्ताभ्यां श्लेष्मासृग्भ्यां तुण्डीकेरीवन-कूर्पासिका तत्फलानुकारी व्याधिरिमं। शोफइति कूर्म्मोच्छ्न्नकूर्म्मवदु-न्नतः। अरक्तः पाण्डुरः, अशीघ्रजन्मा मन्दानुसारी। पद्माकारं पद्मकर्णिका-कारं। प्रोक्तलिङ्गं यथोक्तरक्तार्व्वुदलिङ्गं। असाध्योऽयं। दुष्टमिति। स्थायी स्थिरः। पुप्पुटइत्यत्र तालुशब्दो लुप्तो द्रष्टव्यः। तेन तालुपुप्पुटइत्यर्थः। शोषोऽत्यर्थमिति। एनमिति एनं पाकं॥ ४॥

कण्ठगतास्त्विति। एकवृन्द एकवृन्दोविशेषानुगमेनावस्थान्तरं प्राप्तो वृन्दत्वं प्रतिपद्यते। अतो मूलोक्ता सप्तदशसङ्ख्यानिरुद्धत इति जेज्जटा-चार्य्यः। गयदासार्य्यस्तु सुवन्द इति पाठं कल्पित एव मन्यते। अन्ये तु

जिह्वां समन्ताद् भृशवेदना ये मांसाङ्कुराः कण्ठनिरोधिनः स्युः।
तां रोहिणीं वातकृतां वदन्ति वातात्मकोपद्रवगाढ़युक्तां॥
क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्ततः स्यात्।
स्रोतो निरोधिन्यपि मन्दपाका गुर्व्वी स्थिरा सा कफसम्भवा वै॥
गम्भीरपाकाऽप्रतिवारवीर्य्या त्रिदोषलिङ्गा त्रयसम्भवा स्यात्।
स्फोटाचिता पित्तसमानलिङ्गाऽसाध्या प्रदिष्टा रुधिरात्मिकेयम्॥
कोलास्थिमात्रः कफसम्भवो यो ग्रन्थिर्गले कण्टकशूकभूतः।
खरः स्थिरः शस्त्रनिपातसाध्यस्तं कण्ठशालूकमिति ब्रुवन्ति॥
जिह्वाग्ररूपः श्वयथुः कफात्तु जिह्वाप्रबन्धोपरि रक्तमिश्रः।
ज्ञेयो ऽधिजिह्वः खलु रोग एष विवर्ज्जयेदागतपाकमेनं॥
बलास एवायतमुन्नतञ्च शोफं करोत्यन्नगतिं निवार्य्य।
तं सर्व्वथैवाप्रतिवारवीर्य्यं विवर्ज्जनीयं वलयं वदन्ति॥
गले च शोफं कुरुतः प्रवृद्धौ श्लेष्मानिलौ श्वासरुजोपपन्नं।
मर्म्मच्छिदं दुस्तरमेतदाहुर्व्वलाससंज्ञं निपुणा विकारम्॥

श्लेष्मासृग्भ्यामिति। कण्ठशुण्डी गलशुण्डीत्यर्थः। तोददाहप्रपाकौ इति द्वन्दमुदाहरन्ति तत्र छन्दानुरोधात् द्वन्दएकद्वन्दशब्देनोक्तः, तेषां प्रत्येकं लक्षणमाह,—गलेऽनिल इति पृथगिति तिस्रः। समस्त इति एकशोणित-मित्येके। एवं पञ्चमूर्च्छितौ द्वद्वौ असुहरा प्राणहरा। रोहिणीत्यत्र पाठे संख्या वातपित्तकफसम्बन्धिक्रियापदं न विद्यत इति पाठ एवेति निबन्ध-काराः। त्रिदोषजा असाध्याः। उक्तञ्च "वातात् पित्तात् कफात्त्रिभ्यो रक्ताद्रोहिण्य ईरिता। अन्यो सद्यो मारयत आद्यास्तिस्रः क्रिया बला इति।" जिह्वां समन्तादिति। जिह्वां समन्तादिति जिह्वां व्याप्य-सम्भवतीत्यर्थः। क्षिप्रोद्गमेति। अप्रतिवारवीर्य्या दुर्निवारशक्तिरित्यर्थः।

वृत्तोन्नतो यः श्वयथुः सदाहः कण्डून्वितोऽपाक्यमृदुर्गुरुश्च।
नाम्नैकवृन्दः परिकल्पितोऽसौ व्याधिर्बलासक्षतजप्रसूतः॥
समुन्नतं वृत्तममन्ददाहं तीव्रज्वरं वृन्दमुदाहरन्ति।
तच्चापि पित्तक्षतजप्रकोपाद्विद्यात् सतोदं पवनास्रजं तम्॥ ५॥
वर्त्तिर्घना कण्ठनिरोधिनी या चिताऽतिमात्रं पिशितप्ररोहैः॥
नानारुजोच्छ्रायकरी त्रिदोषाज्ज्ञेया शतघ्नीव शतघ्न्यसाध्या।
ग्रन्थिर्गलेत्वामलकास्थिमात्रः स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः।
संलक्ष्यते सक्तमिवाशनञ्च स शस्त्रसाध्यस्तु गिलायुसंज्ञः॥
सर्व्वं गलं व्याप्य समुत्थितो यः शोफो रुजो यत्र वसन्ति सर्व्वाः।
स सर्व्वदोषो गलविद्रधिस्तु तस्यैव तुल्यः खलु सर्व्वजस्य॥
शोफो महानन्नजलावरोधी तीव्रज्वरो वातगतेर्निहन्ता।
कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्तितोऽसौ॥
योऽतिप्रताम्यन् श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः।
कफोपदिग्धेष्वनिलायनेषु ज्ञेयः सरोगः श्वसनात् स्वरघ्नः॥

स्फोटाचितेति। कण्टक इव शूकः, भूतः प्राप्तः। अतएव शिलाङ्कुराचितत्वात्। जिह्वाप्रवन्धस्योपरि जिह्वामूलस्योपरिष्टादित्यर्थः। आगतपाकत्वेन पित्तमप्यस्ति। एवेति। वलासं श्लेष्मा। उपपन्नं सहितं। निपुणा धीमन्तः। वृत्तोन्नत इति, सदाह मन्ददाहः। अपाकी ईषत्पाकी, वलासक्षतजप्रसूतः श्लेष्मरक्तजातः, भेदमं भेदनत्वं प्रतिपाद्यते। एतेन एकवृन्दो वृन्दश्च द्वावप्येकात्मकौ मतौ, एवञ्चेति कण्ठरोगाः सप्तदशेति पञ्जिकायां पुनः आमाविव वृन्दपाठः॥ ५॥

वर्त्तिर्घना इति। अतिप्रताम्यात् अत्यर्थं प्रकर्षेण ताम्यत् तमः पश्यन्। श्वसिति निश्वसितीत्यर्थः। प्रसक्तं निरन्तरं, श्वसनात् वात्यात्। प्रतामवामिति। प्रतामवान् विस्तरवान्। प्रलम्बी लम्बमशीलः। प्राणपेरकः। सदा-

प्रतानवान् यः श्वयथुः सुकष्टो गलोपरोधं कुरुते क्रमेण।
स मांसतानः कथितोऽवलम्बी प्राणप्रणुत् सर्व्वकृतो विकारः॥
सदाहतोदं श्वयथुं सरक्तमन्तर्गले पूतिविशीर्णमांसं।
पित्तेन विद्याद्वदने विदारीं पार्श्वे विशेषात् स तु येन शेते॥
सर्व्वसरास्तु वातपित्तकफशोणितनिमित्ताः।
स्फोटैः सतोदैर्व्वदनं समन्ताद्यस्याचितं सर्व्वसरः स वातात्।
रक्तैः सदाहैस्तनुभिः सपीतैर्य्यस्याचितं वापि स पित्तकोपात्॥
कण्डूयुतैरल्परुजैः सवर्णैर्य्यस्याचितं चापि स वै कफेन।
रक्तेन पित्तोदित एक एव कैश्चित् प्रदिष्टो मुखपाकसंज्ञः॥ ६॥

निदानस्थानं समाप्तं।

इति। पूति विशीर्णमांसं दुर्गन्धि शटितमांसं, पार्श्वे विशेषात् स तु येन शेत इति, येनैव पार्श्वेन विशेषात् शेते तेनैव पार्श्वेन विदारी विशेषेण भवति, अन्यत्रापि अस्याः सम्भवः सामान्यतो निवार्य्यते सर्व्वसरास्त्विति। वातनिमित्तपित्तनिमित्तरक्तनिमित्तश्चैक एवेति। वातादिनिमित्तास्त्रयएव सर्व्वसराः। सर्व्वस्मिन् मुखे ये भवन्ति ते सर्व्वसराः। स्फोटैरिति। रक्तैः स्फोटैरिति शेषः। कण्डुयुतैरल्परुजायुक्तैः सवर्णैर्यस्या चितश्चापि स वै कफेन। स्फोटैरिति शेषः। रक्तेनेति रक्तेन कृत्वा योऽसौ सर्व्वसराः कश्चिदाचार्य्यमुखपाकसंज्ञः। पित्तादिभिरेकएव न चत्वारः सर्व्वसराः किन्तु त्रयएकएते पञ्चषष्टिर्मुखरोगाः सप्तस्वायतनेष्विति॥ ६॥

इति निबन्धसंग्रहे निदानस्थाने षोड़शोऽध्यायः।

शारीरस्थानम्।

प्रथमोऽध्यायः।

अथातः सर्व्वभूतचिन्ताशारीरं व्याख्यास्यामः ॥ १ ॥

सर्व्वभूतानां कारणमकारणं सत्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम। तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्रइवौदकानां भावानां ॥ २ ॥

नमो धन्वन्तरये। हेतुलक्षणप्रतिपादकान्निदानस्थानादधिगतव्याधिहेतुलक्षणस्य वैद्यस्य चिकित्साया अवसरः। चिकित्सा चाधिष्ठानविशेषज्ञानमन्तरेण न सम्भवतीत्यधिष्ठानज्ञापनाय शारीरस्थानमारभ्यते। शारीरस्थानेऽपि प्रतिपाद्ये आदौ सर्व्वशरीरकारणानां चिन्तां कर्त्तुं युज्यत इत्याह अथात इत्यादि। सर्व्वाणि भूतानि स्थावरजङ्गमानि महाभूतानि पृथिव्यादीनि वा तेषां चिन्ता, हेतुस्वलक्षणकार्य्यचिन्तनं कुत उत्पन्नानि कानि चैषां स्वलक्षणानि कानि कार्य्याणीति चिन्तनं सैव यस्मिन्नध्यायेऽस्तीति मत्वार्थे पूर्व्ववच्च प्रत्ययमुत्पाद्य तल्लोपे प्रकृतिभावञ्च प्रतिपाद्य सर्व्वभूतचिन्तेति निष्पाद्यते। सर्व्वभूतचिन्ता च तच्छारीरञ्चेति कर्म्मधारयः। गयी तु सर्व्वभूतचिन्तानाम शारीरमिति पठति ॥ १ ॥

तत्रादौ हेतु-चिन्तामाह,—सर्व्वभूतानामित्यादि। एवम्भूतमव्यक्तं मूलप्रकृतिपरपर्य्यायं सर्व्वभूतानां कारणमिति पिण्डार्थः। किं विशिष्टं ? अकारणं, न विद्यते कारणं यस्य तदकारणं अविकृतिरूपं न कस्यचित् कार्य्यमित्यर्थः। स्वरूपविशेषणमाह,—सत्वरजस्तमः स्वरूपं, पुनरपि किम्भूतमित्याह,—अष्टरूपमिति। प्रकृतिभावेनैवाव्यक्तं महानहङ्कारः पञ्चत-

तस्मादव्यक्तान्महानुत्पद्यते तल्लिङ्ग एव। तल्लिङ्गाच्च महतस्तल्लिङ्ग एवाहङ्कार उत्पद्यते। स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति ॥ ३ ॥

ष्टारूपाणीति अष्टौ रूपाणि यस्य तत्तथा। प्रकृतिलक्षणाष्टानामव्यक्तादीनां सांख्येऽपि प्रतिपादितमस्ति। शिलापुत्रकन्यायेन रूपत्वं रूपिलक्षणाव्यक्तस्याव्यक्तं महानहङ्कारः पञ्चभूतानीत्यष्टौ रूपाणीत्येके। अन्ये तु धर्म्मज्ञानवैराग्यैश्वर्य्यधर्म्माज्ञाना वैराग्यानैश्वर्य्यान्यष्टौ रूपाण्याहुः। अपरे तु मनोबुध्यहङ्कार महाभूतान्याहुः। पुनरपि किम्भूतं? अखिलस्य जगतः सम्भवहेतुः अभिव्यक्तिकारणं। तत्र सर्व्वभूतानां कारणमित्यनेन कार्य्यकारणयोस्तादात्म्यं दर्शितं। अखिलस्य जगत इत्यादिनाभिव्यक्तिहेतुत्वमिति न पौनरुक्तं। गयीत्वन्यथा व्याख्याति। यथा सर्व्वभूतानां कारणमित्यस्यैव भाष्यं निर्द्दिशन्नाह,—अखिलस्य जगतः सम्भवहेतुरित्यनेनोपादानकारणत्वं अव्यक्तस्य जगदुत्पत्तौ प्रतिपादितं। न व्यज्यतेस्मित्यव्यक्तं प्रकृतिः प्रधानं मूलप्रकृतिरिति यावत्। अव्यक्तपर्य्यायाः ततः अव्यक्तं एवं शिलापदवदविवेच्यावयवं न पुनस्त्रिदण्डवत् विवेच्यावयवं। क्षेत्रज्ञानां कर्म्मपुरुषाणां अधिष्ठानं शरीरभावाय विषयः। अत्रोपमानमाह,—समुद्र इवेत्यादि। उदकभवा औदका नदीनदसरस्तड़ागादयः। अन्येत्वौदकभावाश्चराचरा मत्स्यपद्मादय इत्याहुः ॥ २ ॥

ननु कथमेकमव्यक्तमनेकधर्म्मिणां भूतानां कारणमित्याशङ्काव्यक्ताद् सर्व्वभूतानामुत्पत्तिक्रममाह,—तस्मादित्यादि। तस्मादिति। क्षेत्रज्ञाधिष्ठितात्, अव्यक्तात् महानिति बुद्धितत्त्वं तत्तु सत्वं समुद्रकात् निर्म्मलस्फटिकोपलप्रख्यं चिच्छाया संक्रान्तिप्राप्तचैतन्यं पुरुषवत्नानात्मकमध्यवसेयविषयं निश्चितार्थकारणमित्यर्थः। उत्पद्यते व्यक्तिभवति। तल्लिङ्ग इति सत्वरजस्तमःस्वभावएव। तल्लिङ्गादिति सत्वरजस्तमःस्वभावात्, महत इति बुद्धितत्त्वात्, तल्लक्षण एवेति सत्वरजस्तमः स्वभावएवेत्यर्थः। अहङ्कारोऽभिमानव्यापारलक्षणः। तल्लिङ्गादिति विशेषणेन शुद्धसत्वस्वरूपान्महत्वस्यापाह-

तत्र वैकारिकादहङ्कारात्तैजससहायात्तल्लक्षणान्येवैकादशे-न्द्रियाण्युत्पद्यन्ते तद्यथा।—

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्घस्तोपस्थपायुपादमनांसीति। तत्र पूर्व्वाणि पञ्च बुद्धीन्द्रियाणि। इतराणि पञ्च कर्म्मेन्द्रियाणि। उभयात्मकं मनः॥ ४॥

भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चतन्मात्राण्युत्पद्यन्ते तद्यथा। शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति। तेषां विशेषाः शब्दस्पर्शरूपरसगन्धास्तेभ्यो भूतानि व्योमानिलानलजलोर्व्व्यः। एवमेषा तत्त्वचतुर्व्विंशतिर्व्याख्याता।

ङ्कारस्योत्पत्तिरिति सूच्यते तथा चरकेऽभिहितं "शुद्धसत्वस्य या शुद्धसत्वा-बुद्धिः प्रवर्त्तते। यया भिनत्त्यतिबलं महामोहमयं तमः। सर्व्वभावस्वभावज्ञो यया भवति निस्पृहः। यया नोपैत्यहङ्कारं नोपास्ते कारणं यया"। इत्यादि। वैकारिकादिसंज्ञास्तु पूर्व्वाचार्य्यैः संव्यवहाराय कृताः। तत्र वैकारिकः सात्विकः। तैजसो राजसः। भूतादिस्तामसः॥ ३॥

अस्य त्रिविधस्यापि कार्य्यमाह,—तत्रेत्यादि। तत्र सात्विकादहङ्काराद्राजससहायात् तमोमात्रयानुविद्धादेकादशेन्द्रियाणि तल्लक्षणानि प्रकाशलक्षणानि सत्वस्य प्रकाशकत्वात्। तान्यहङ्कारादुत्पन्नान्यहङ्कारकार्य्याणि इति सांख्ये विद्यन्ते, भौतिकानि पूर्व्वाणि पञ्चश्रोत्रादीनि बुद्धीन्द्रियाणि बुद्धेराश्रयत्वात्। इतराणि वाक्प्रभृतीनि कर्म्मेन्द्रियाणि कर्म्मण आश्रयत्वात्। तेषां उभयात्मकं बुद्ध्यात्मकं कर्म्मात्मकञ्च मनो बुद्धीन्द्रियाणां कर्म्मेन्द्रियाणाञ्च मनोऽधिष्ठातानामेव प्रवृत्तेः॥ ४॥

भूतादेरिति, तामसाहङ्कारात् राजससहायात् सत्वमात्रयानुविद्धात्, तल्लक्षणान्येव मोहादिलक्षणान्येव, तत्रानुद्भूतस्वभावानि वाह्येन्द्रियग्राह्याणि शब्दादीन्येव तन्मात्राणि तानि च योगिभिरेव ग्राह्याणि। सा मात्रा

तत्र बुद्दीन्द्रियाणां शब्दादयो विषयाः। कर्म्मेन्द्रियाणां यथासंख्यं वचनादानानन्दविसर्गविहरणानि। अव्यक्तं महानहङ्कारः पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः शेषाः षोड़श विकाराः। स्वःस्वश्चैषां त्रिषयोऽधिभूतं। स्वयमध्यात्माधिदैवतञ्च। अथ बुद्धेर्ब्रह्मा। अहङ्कारस्येश्वरः। मनसश्चन्द्रमाः। दिशः श्रोत्रस्य। त्वचो वायुः। सूर्य्यश्चक्षुषोः। रसनस्यापः। पृथिवी घ्राणस्य। वचसोऽग्निः। हस्तयोरिन्द्रः। पादयोर्व्विष्णुः। पायोर्म्मित्रं। प्रजापतिरुपस्थस्येति। तत्र सर्व्वएवाचेतन एष वर्गः पुरुषः पञ्चविंशतितमः सच कार्य्यकारणसंयुक्तश्चेतयिता भवति। सत्यप्यचैतन्ये प्रधानस्य पुरुष-कैवल्यार्थं प्रवृत्तिमुपदिशन्ति क्षीरादींश्च हेतूनुदाहरन्ति।

यस्मिन् तत्तन्मात्रमाहुः। तेषामित्यादि। तेषां तन्मात्राणां विशेषा इति, अनुभवयोगैः सुखदुःखमोहरूपैर्धर्मैर्व्विशिष्यन्त इति विशेषाः शब्दादयः, तन्मात्राणि त्वविशेषाणि यतस्तान् पुनरनुभवाय योगैः सुखदुःखादिभिर्व्विशेष्टुं न शक्यन्ते सूक्ष्मत्वात्। तेभ्यः पञ्चभ्यः शब्दतन्मात्रादिभ्यः एकोत्तरपरिवृद्धा व्योमादय उत्पद्यन्ते, तद्यथा —शब्दतन्मात्राच्छब्दगुणं व्योम, शब्दतन्मात्रसहितात् स्पर्शतन्मात्रात् शब्दस्पर्शगुणो वायुः, शब्दस्पर्शतन्मात्रसहितात् रूपतन्मात्राच्छब्दस्पर्शरूपगुणं तेजः, शब्दरूपतन्मात्रसहिताद्रसतन्मात्रात् शब्दस्पर्शरूपरसगुणा आपः, शब्दस्पर्शरूपरसतन्मात्रसहितात् गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा पृथिवी। पातञ्जलिमतानुसारिणश्च शब्दादिभ्य एव व्योमादीनामुत्पत्तिमिच्छन्ति। शब्दादीनां व्योमादिगुणानां धर्म्मिणोऽभिन्नत्वेन पृथक् निरस्यन् वक्तुं, उक्तस्योपसंहारमाह,—एवमिति। वचनादानानन्दविसर्गविहरनानीत्यत्र विषया इति सम्बध्यते। तेनोच्यते यत्

अत ऊर्द्धं प्रकृतिपुरुषयोः साधर्म्यवैधर्म्ये व्याख्यास्यामः ।

तद्यथा । उभावप्यनादी उभावप्यनन्तौ उभावप्यलिङ्गौ उभावपि नित्यौ उभावप्यपरौ उभौच सर्व्वगताविति । एका तु प्रकृतिरचेतना त्रिगुणा वीजधर्म्मिणी प्रसवधर्म्मिण्यमध्यस्थ-

तद्वचनं वक्तव्यमुच्यते । एवं कर्म्मप्रत्यया तत्तदादानमादातव्यं, आनन्द-मानन्दनीयं विसर्गो विसर्जितत्वं विहरणं विहर्त्तव्यस्थानं । उक्तायास्तत्त्वचतु-र्व्विंशतिरुक्तमेव धर्म्मान्तरं केचित् किञ्चिन्निदर्शयन्नाह,—अव्यक्तमित्यादि । प्रकृतय इति अपरेषां कारणभूता अव्यक्तमिति विविधपाठात् केवलहेतु-भावेनाव्यक्तप्रकृतिरेवेति वोधनार्थं । तन्मात्राणि चेति चकारः प्रकृतयश्चेत्यत्र सम्बन्धनीयः । तेन महदादयः सप्तकार्य्यत्वेन विकृतयोऽपि शेषा हि एका-दशेन्द्रियाणि पञ्चमहाभूतानि षोड़शविकाराः कार्य्यमित्यर्थः । अस्मिन् चतुर्व्विंशतिके तत्त्वराशौ प्रकाशकत्वेन वुद्ध्यादयः प्रधानभूताः अतस्ते यत्रस्थं प्रकाश्यं यत्र स्थिता यदनुग्रहेणैव प्रकाशयन्ति तत् प्रकारत्रयमधिभूतादि-भेदेनाह,—स्वस्व इत्यादि । एषां वुद्ध्यहङ्कारयोस्तादि वुद्धीन्द्रियाणां रागादि-कर्म्मेन्द्रियाणां मनसश्च स्वस्व आत्मीयः आत्मीयो विषयाध्यवसेयाभिमन्तव्यं सङ्कल्पनीयादि लक्षणे अधिभूतं भूतेष्वपि भूतानि महाभूतानि प्राणि वा । एतेन वुद्ध्यादेरध्यवसायादि व्यापारसाध्यवसेयादि विषयीभूतेष्विति प्रति-पादिते केचित् स्वस्व एषां विषयोऽधिभूतसङ्ग इति व्याख्यानयति । स्वय-मिति एतानि वुद्ध्यादीनि त्रयोदश स्वयं अध्यात्म आत्मन्यपि । आत्मशब्दोऽत्र स्वशरीरवचनं तेन स्वशरीरवुद्ध्यादिकं । आत्मनः परमात्मपर्य्यायस्य वा योग्यो-विषयोऽध्यात्मं । अन्ये तु वुद्ध्यादिकं स्वयमध्यात्मसंज्ञमिति व्याख्यानयति । अधिदैवतमिति । देवतानामधिकृतत्वं तदेव वुद्ध्यादिषु प्रकटीकरोति । अथेत्यादि । या या देवता विश्वरूपस्य विष्णोरवयवादुत्पन्ना सा सा तस्यावयव-स्याधिदैवत्वमापन्ना वोद्धव्याः । अयञ्चाधिभूतादिभावो वेदान्तेऽपि वर्णितः । यथा वुद्धिरध्यात्मं वोद्धव्यं अधिभूतं ब्रह्माधिदैवतं अहङ्कारो अध्यात्मं अह-

धर्म्मिणी चेति वह्वस्तु पुरुषाश्चेतनावन्तोऽगुणा अवीज-धर्म्मिणोऽप्रसवधर्म्मिणो मध्यस्थधर्म्मिणश्चेति ॥ ५ ॥

ड्रष्टव्यमधिभूतं रुद्रोऽधिदैवतं मनोऽध्यात्मं श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशोऽधिदैवतं त्वगध्यात्मं स्पर्शनीयमधिभूतं वायुरधिदैवतं चक्षुरध्यात्मं द्रष्टव्यमधिभूतं सूर्य्योऽधिदैवतं रसनाध्यात्मं रसनीयमधिभूतं वरुणोऽधिदैवतं घ्राणमध्यात्मं घ्रातव्यमधिभूतं भूमिरधिदैवतं वागध्यात्मं वक्तव्यमधिभूतं ऽग्निरधिदैवतं हस्तावध्यात्मं आदातव्यमधिभूतं इन्द्रोऽधिदैवतं पादावध्यात्मं गन्तव्यमधिभूतं विष्णुरधिदैवतं पायुरध्यात्मं विसर्ज्जनीयमधिभूतं मित्रोऽधिदैवतं उपस्थोऽध्यात्मं आनन्दनीयमधिभूतं प्रजापतिरधिदैवतं सर्व्वं इत्यादि। स - एवषड्वर्गोऽव्यक्तादिकोऽचेतनः कारणस्याव्यक्तस्याचेतनत्वे न तत् कार्य्यस्य महदादेरचेतनत्वात् कार्य्यकारणसंयुक्तेति कार्य्येण महदादिविकारगणेन कारणेन मूलप्रकृत्या संयुक्तः संयोगी। तस्य कैवल्यार्थां मोक्षार्थां प्रधानस्य मूलप्रकृतेः प्रवृत्तिमुपदिशन्त्याचार्य्याः। कथमचेतनः प्रवर्त्तत इत्याह,— क्षीरादीनीत्यादि यथा क्षीरमन्नं वत्सविवृद्ध्यर्थं प्रवर्त्तते। आदिशब्दाच्च यथैकान्ते कमनीयकामिनीमुत्तमर्त्तोत्सवे तत् सुखातिशयोत्पादनार्थं रेतः प्रवर्त्तते, तद्वदित्यर्थः। अत इत्यादि। प्रकृतिरव्यक्तं पुरुष आत्मा, साधर्म्म्यं समानो धर्म्मः, वैधर्म्म्यं विसदृशो धर्म्मः, तौ कथयिष्यामः। अलिङ्गाविति न विद्यते लिङ्गं ययोस्तावलिङ्गौ उभावपि लयं क्वचिदपि न गच्छत इत्यर्थः। न विद्यतेऽपरो याभ्यां तावनपरौ यतस्तावेव प्रकृतिपुरुषौ महदादिभ्यः परौ। सर्व्वगतौ सर्व्वं व्याप्य स्थितौ। साधर्म्म्यमुक्त्वा वैधर्म्म्यमाह,—तयोर्म्मध्ये एका प्रकृतिरव्यक्ता परपर्य्याया सा च त्रिगुणा सत्वरजस्तमोगुणा तेषां गुणानां साम्यावस्थायां स्थिता सर्व्वेषां महदादिविकाराणां वीजभावेनावस्थिता वीजधर्म्मिणीत्युच्यते। यद्वा तु संहारे भूतेन्द्रिय तन्मात्राहङ्कार-महदादीनामाधारभूतेति वीजधर्म्मिणी। सैव सिसृक्षुणा विभुना पुरुषेण सार्द्धं क्षोभमाणस्य साम्यावस्थाने प्रच्युता महदहङ्कारादिक्रमेण चराचरस्य जगतः प्रसवित्रीत्वात् प्रसवधर्म्मिणीत्युच्यते। अमध्यस्थ धर्म्मिणीति सत्वादि-

तत्र कारणानुरूपं कार्य्यमिति कृत्वा सर्व्वएवैते विशेषाः सत्वरजस्तमोमया भवन्ति तदञ्जनत्वात्तन्मयत्वाच्च तद्गुणा एव पुरुषा भवन्तीत्येके भाषन्ते।

गुणराशितया सुखादिरूपत्वात्। सुखी हि सुखमभिलिषन् दुःखी दुःखं विद्विषन् अमध्यस्थो भवति। प्रकृतिश्च सत्तादिरूपा ततो मध्यस्था बहव इति युगपन्मरणासम्भवादनेकपुरुषाः पुरुषशब्देन महदादिकृतं सूक्ष्मं लिङ्गशरीरमुच्यते तच्च योगीनामिव दृश्यं। तत्र पुरी शेते पुरुषाः। अगुणेति अविद्यमान सत्वादिगुणाः। अवीजधर्म्मिन इति महदादीनां महाप्रलये प्रकृता विरतेष्वनवस्थानात्। मध्यस्थधर्म्मिण इति। प्रत्यप्रति विषादा योगिनेच्छा द्वेषशून्यत्वात्। तदुक्तं साङ्ख्ये—तस्मात् तु विपर्य्यासां सिद्धं साक्षित्वमस्य पुरुषस्य कैवल्यमाध्यस्थं द्रष्टत्वमकर्त्तृभावाच्चेति॥ ५॥

इदानीमुक्तमेव तदुपसंहरन्नाह,—तत्रेत्यादि। कारणस्य प्रकृतेरनुरूपं सदृशं कार्य्यं महदादिकं विशेषाः प्रकारा महदादिकाः संयुक्तस्य पञ्चविंशतितमस्य। पुरुषस्यापि सत्वादिगुणत्वं दर्शयन्नाह,—तदञ्जनत्वादित्यादि। तेषां सत्वरजस्तमसां अञ्जनं लक्षणं व्यक्तिर्व्वा येषु ते तदञ्जनाः पुरुषाः सत्वादिलक्षणा इत्यर्थः। तेषां भावस्तत्वं तस्मादेव कुत इत्याह,—तन्मयत्वादिति सत्वादिति सत्वादिमयत्वात्। सत्वादिमयत्वं पुनः पुरुषाणां सत्वादिरूपे महदादौ प्रतिविम्बनात् यथा तड़ागोदके प्रतिविम्बितो विधुस्तड़ागोदक-प्रकम्पनेन प्रकम्पनात्मकं कथ्यते। एवं सत्वादिरूपे महदादौ प्रतिविम्बिताः। पुरुषाः सत्वादिमया भवन्ति न तु वास्तवं सत्वादिमयत्वात् तादृशाच्च तन्मयत्वात् तल्लक्षणानि तद्गुणाः सुखिनो दुःखिनो मूढ़ाश्च पुरुषा भवन्ति। गयी तु तैः सत्वादिभिरञ्जनं व्यक्तिर्यस्य महदादेस्तत्त्वदञ्जनं तदस्यास्तीतिमत्वर्थीयोऽकारप्रत्यय इति तत्सम्बन्धाः पुरुषस्य सत्वादिभिरेवाञ्जनं महदादीनां कुत इत्याह,—तन्मयत्वात् सत्वादिप्रकृतिकारणत्वात् तेषां तदञ्जनत्वञ्च निर्व्विकारस्यापि विकारिवत् संयोगात्। यथा सन्ध्यारागि रविकरनिकरसंयोगादरुणि गगनतलोपलम्भः।

वैद्यकेतु ।

स्वभावमीश्वरं कालं यदृच्छां नियतिं तथा ।
परिणामञ्च मन्यन्ते प्रकृतिं पृथुदर्शिनः ॥

पूर्व्वोक्तस्य सर्व्वस्याप्येकीयमतत्वं दर्शयन्नाह,—इत्येके इति। स्वमतं दर्शयन्नाह,—वैद्यक इति। अत्रैके स्वभाववादिनः स्वभावः सर्व्वस्य प्रकृतिः कारणमुचुः। तथा हि—कः कण्टकानां प्रकरोति तैक्ष्ण्यं, चित्रं विचित्रं मृगपक्षिणाञ्च। माधुर्य्यमिक्षौ कटुको मरीचे, स्वभावतः सर्व्वमिदं प्रवृत्तमिति। ईश्वर एव ऊर्व्वीपर्व्वततर्व्वादिजन्तूनां स्वर्गनरकादेश्च कारणं इत्यन्ये। उक्तञ्च। आत्माजन्तुरनीशोयमात्मानः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं नरकमेव च। काल एव जगतः सृष्टिस्थितिप्रलयनिमित्तमिति कालकारणिकाः। उक्तञ्च ज्योतिःशास्त्रविदः श्रीपतिना—प्रभवविरति मध्यज्ञानवन्ध्या नितान्तं विदित परमतत्वा यत्र ते योगिनोऽपि। तमहमिह निमित्तं विश्वजन्मा त्रयाणां अनुमितमभिवन्दे प्रग्रहैः कालमीशमिति। यो यतो भवति तत्तु निमित्तमिति यादृच्छिकाः यथा तृणारणिनिमित्तो वह्निरिति पूर्व्वजन्मार्ज्जितो धर्म्माधर्म्मौ नियतिः सैव सर्व्वस्य कारणमिति नियतिवादिनः। प्रधानमेवाऽक्षरादिरूपतया परिणतं सर्व्वस्य निमित्तपरिणामवादिनः। एतत् सर्व्वमत्रानुमतं सर्व्ववेदपारिषदत्वादायुर्व्वेदस्य सुश्रुताचार्य्येनापि स्वभावादिभेदभिन्नायाः षड्विधाया अपि प्रकृतेरुदाहरणान्यभिहितानि। तत्र स्वभावस्य तावत् कारणत्वमाह,—अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते पुनश्च सन्निवेशः शारीराणां दन्तानां पतनोद्भवौ तलेष्वसम्भवो यश्च रोम्णामेतत् स्वभावत इति। पुनश्चोक्तं "धातुषु क्षीयमानेषु वर्द्धते द्वाविमौ सदा। स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिः" ॥ पुनरप्याह,—"निद्राहेतुस्तमःसत्त्वं वोधने हेतुरुच्यते। स्वभाव एव वा हेतुर्गरीयानिव कीर्त्त्यते।" अन्यत्राप्युक्तं स्वभावाल्लघवो मुद्गास्तथा लावकपिञ्जलाः। "स्वभावाद्गुरवो माषाः वराहमहिषादयः"। ईश्वरोऽपि वह्निरूपी जीवितादेः कारणत्वेनोदाहृतः। तथा हि। जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः। सौक्ष्माद्र-

तन्मयान्येव भूतानि तद्गुणान्येव चादिशेत्।
तैश्च तल्लक्षणः कृत्स्नो भूतग्रामो व्यजन्यत॥
तस्योपयोगोऽभिहितश्चिकित्सां प्रति सर्व्वदा।
भूतेभ्यो हि परं यस्मान्नास्ति चिन्ता चिकित्सिते॥

सानाददानो विवेक्तुं नैव शक्यते। अग्निमूलं वलं पुंसां वलमूलं हि जीवितमिति। कालस्तु शीतोष्णलक्षणः। उक्तञ्च—महाभूतविशेषांस्तु शीतोष्णद्वयभेदतः। काल इत्यध्यवस्यन्ति न्यायमार्गानुसारिणः। अयञ्च ऋतुचर्य्याध्याये दोषाणां सञ्चयप्रकोपोपशमद्वारेण हेतुरुक्तः। यदृच्छा पुनरलक्षित आकस्मिकपदार्थाविर्भावः। उक्तञ्च—यदृच्छया चोपगतानि पाकं पाकक्रमेणोपचरेद्विधिज्ञ इति। नियतिरत्रापि धर्म्माधर्म्मौ तद्धेतुत्वमाह,—ब्रह्मस्त्रीसज्जनवधपरस्वहरणादिभिः कर्म्मभिः पापरोगस्य प्राहुः कुष्ठस्य सम्भवः। "कर्म्मणा व्याधयः केचिदिति चोक्तं। परिणामस्य हेतुमाह,—जाठराग्नेस्तु संयोगाद्यदुदेति रसान्तरं। रसानां परिणामान्ते स विपाक इति स्मृतः। तएवौषध्यः कालपरिणामात् परिणतवीर्य्या वलवत्यो हेमन्ते भवन्त्यापश्च सम्यक् परिणतस्याहारस्य सारो रसः। एवं वालानामपि वयःपरिणामात् शुक्रप्रादुर्भावो भवति। ननु स्वभावादयः षट् पदार्थाः प्रकृतेरष्टरूपायाः पर्य्यायाः स्युरथवान्यार्थाभिधायित्वेन भिन्नार्थाः। अत्र भिन्नार्थत्वेऽपि विकल्पद्वयं। किमेतैः स्वभावादिभिर्भिन्नार्थैः किञ्चित् स्वभावेन किञ्चिदीश्वरेण इत्येवं प्रकारेण निमित्ताज्जगदारभ्यते। उत ते स्वभावादयः पृथक् पृथगेव विश्वजननसमर्था इत्यनेकधा विकल्पमुत्पाद्य जेज्जटाचार्य्यैरीश्वरं विहाय स्वभावादयः प्रकृतेरष्टरूपायाः पर्य्यायत्वेनाभिहिताः। यत्तु वैद्यके स्वभावमीश्वरं कालमित्यादिवाक्येन विपुलदर्शिभिः स्वभावादीनां भिन्नमेव प्रकृतित्वं प्रतिपादितं तत्तथा स्वरूपेण तेषामवभाषणात्। परमार्थतस्तु गुणत्रयात्मिका प्रकृतिरेव कारणं। यतः स्वभावादयश्चत्वारः प्रकृतिपरिणामस्य धर्म्मविशेषतया प्रकृतावेवान्तर्भवन्ति। तथा हि स्वभावस्तावत् सत्त्वरजस्तमसां तद्विकाराणां पृथिव्यादिमहाभूतानाञ्च परिणामस्य तादृच्छा

यतोऽभिहितं तत्सम्भवद्रव्यसमूहो भूतादिरुक्तः, भौतिकानि चेन्द्रियाण्यायुर्व्वेदे वर्ण्यन्ते तथेन्द्रियार्थाः॥ ६॥

हि विशेष इति प्रकृतिपरिणामादन्यो न भवति। नियतिरपि पूर्व्वकृतसदसत्कर्म्मरूपाया रजोगुणपरिणामलक्षणत्वेन न प्रकृतेरन्यत्वं। कालोऽपि चन्द्रार्कादिगतिक्रियालक्षणः। अत्र तु महाभूतानां परिणामविशेषात् शीतोष्णादयो भवन्ति। तदुक्तं "महाभूतविशेषांस्तु शीतोष्णद्वयभेदतः। कालइत्यध्यवस्यन्ति न्यायमार्गानुसारिण" इति। क्रियात्वेन रजोगुणपरिणामत्वात् महाभूतपरिणामविशेषत्वाच्च न कालस्य प्रकृतेरन्यत्वं। ईश्वरश्च पञ्चविंशतितमः पुरुषः प्रकृतेः क्षोभकतया कारणत्वेनोदाहृतएव यदृच्छा च कादाचित्कत्वाद्भूतपरिणामाविशेषान्नान्या। किञ्चास्मिन् शास्त्रे प्रकृतिपरिणामात्मकं विश्वं पश्यते। तथा हि। सात्विकं कायलक्षणं राजसं कायलक्षणं तथा सत्ववहुलमाकाशमित्यादि। गयीत्वन्यथा व्याख्याति यथा—वैद्यके तु विपुलदर्शिनः स्वभावादीनां षण्णां प्रकृतित्वं प्रतिपादयन्ति। ते च स्वभावादयः समुच्चयेन जगदुत्पत्तौ कारणभूताः। तत्रापि प्रकृतिपरिणामस्योपादानकारणत्वं स्वभावादीनाञ्च पञ्चानां निमित्तकारणत्वमिति। एकीयमतेन कारणानुरूपं कार्य्यमित्यादिवाक्यं। कारणमयत्वं कार्य्यस्य प्रतिपाद्ये स्वमतेऽपि कारणमयत्वं प्रतिपादयन्नाह,—तन्मयानीति। अवकाशे चलोष्णद्रवखरस्वभावादिधर्म्मविशेषाक्रान्तप्रकृतिपरिणाममयानि। भूतान्येकाशादीनि तद्गुणान्येवेति सत्वरजस्तमोगुणान्येवेत्यर्थः। सत्ववहुलमाकाश इत्युक्तत्वात्। गयी तु ततो जातानि भूतानीति पठित्वा व्याख्याति। ततः स्वभावादिनिमित्तकारणत्वात् प्रकृतिपरिणामाच्चोपादानकारणानि भूतान्याकाशादीनि तद्गुणानि कारणगुणानि। तैश्चेत्यादि। तैश्चाकाशादिभिर्भूतैस्तल्लक्षणः भूतलक्षणः कृत्स्नः समस्ता भूतग्रामाः स्थावरजङ्गमात्मको व्यजन्यत जन्यते। विविधो जनितः। भूतानां पृथिव्यादीनां पुनर्लक्षणं स्थिरगुरुकाठिनत्वमित्यादि तल्लक्षणश्च स्थावरजङ्गमात्मको भूतग्रामः। तस्य पञ्चमहाभूतारब्धस्य भूतग्रामस्य परस्परोपकार्य्योपकारण-

भवति चात्र।

इन्द्रियेणेन्द्रियार्थन्तु स्वं स्वं गृह्णाति मानवः।
नियतं तुल्ययोनित्वान्नान्येनान्यमिति स्थितिः॥

त्वेन व्यवस्थितस्य उपयोगः प्रयोजनः, अभिहितः कथितः, चिकित्सां प्रति-रोगापनयनं लक्षीकृत्य सर्व्वदा नित्यगे चावस्थिके काले। कुतः यस्मात्तेभ्यः पञ्चमहाभूतारब्धभूतग्रामेभ्यः परं चिकित्सा-चिन्ता नास्ति तदुक्तमाद्ये अध्याये. तत्रास्मिन् पञ्चमहाभूतशरीरीसमवायः पुरुषइत्युच्यते। तस्मिन् क्रिया सोऽधिष्ठानं,कस्मात्? लोकद्वैविध्यात् लोको हि द्विविधः स्थावरो जङ्गमश्च तस्मिन् पुरुषः प्रधानं तस्योपकरणमन्यत्। तेन पञ्चमहाभूतारब्धस्यैव भूत-ग्रामस्य चिकित्स्योपकरणत्वं। अतो भूतेभ्योऽपि परं यद्ब्रह्मादि तत्र चिन्ता-नास्ति। अयमेवार्थोऽन्यत्रापि निर्द्दिष्ट इति दर्शयन्नाह,—यत इत्यादि। एतत्तत्त्वं, वीजाध्याये व्याख्यास्यते अत्रापि किञ्चित् शिष्यवोधार्थं व्याख्यायते। यतस्तस्य पुरुषस्य सम्भवद्रव्यानि शुक्रशोणितादीनि तेषां समूहः संयोग-विशेषः। कथम्भूतः भूतादिभूतं पृथिव्यादिकमादिमूलकारणं यस्य स तथा। न परं पुरुषसम्भवद्रव्यस्य भूतादित्वाभिधानात् भूतेभ्यः परं चिन्तानास्ति किन्तु तस्मादपीत्याशङ्क्याह,—भौतिकानिचेत्यादि। इन्द्रियाणि श्रवण-स्पर्शनरसनघ्राणानि भौतिकानि। तथा चोक्तं। पञ्चभूतात्मकत्वेऽपि खं श्रोत्रे स्पर्शने वायु दर्शने तेजउत्कटं। सलिलं रसने भूमिर्घ्राणे तज्ज्ञै-र्निरूपितं। इन्द्रियाणामर्थाः शब्दस्पर्शरूपरसगन्धास्ते चायुर्व्वेदशास्त्रे तथा भौतिका इत्यर्थः। उक्तञ्च—शब्दो विहायसः स्पर्शो वायवीयः प्रकीर्त्तितः रूप-माग्नेयस्याप्यत्र रसो गन्धस्तु पार्थिव इति॥ ६॥

इन्द्रियाणां इन्द्रियार्थानाञ्च पाञ्चभौतिकत्वेऽपि यस्य भूतस्य यत्र यत्रे-न्द्रिये आधिक्यं तेन तेनेन्द्रियेण तस्य तस्यैव गुणाः शब्दादयो गृह्यन्ते इति दर्शयितुमाह, इन्द्रियेणेत्यादि।—इन्द्रियेण चक्षुरादिना रूपादिकमात्मीय-मात्मीयं मानवः उपादत्ते। तद्यथा—तैजसं चक्षुस्तैजसमेव रूपमादत्ते। पार्थिवं घ्राणेन्द्रियपार्थिवमेव गन्धमादत्ते। एवं शेषेष्वपि वोद्धव्यं। नियत-

नचायुर्व्वेदशास्त्रेषूपदिश्यन्ते सर्व्वगताः चेत्रज्ञा नित्याश्च। असर्व्वगतेषु च चेत्रज्ञेषु नित्यपुरुषख्यापकान् हेतूनुदाहरन्ति। आयुर्व्वेदशास्त्रेष्वसर्व्वगताः चेत्रज्ञा नित्याश्च तिर्य्यग्योनिमानुषदेवेषु सञ्चरन्ति धर्म्माधर्म्मनिमित्तं तएतेऽनुमानग्राह्याः परमसूक्ष्माश्चेतनावन्तः शाश्वता लोहितरेतसः सन्निपातेष्वऽभिव्यज्यन्ते यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति। स एव कर्म्मपुरुषश्चिकित्साधिकृतः।

मात्मोयमेव कुतइत्याह,—तुल्ययोनित्वादिति। एकभूतहेतुत्वात् भूतं हि स्वयोनिमेवाभिधावति। जलमिव जलं तमेव स्पष्टीकुर्व्वन्नाह,—नान्येनान्यमिति। अपरमपि साङ्ख्यादिभ्यो भेदमायुर्व्वेदस्यात्मनि दर्शयन्नाह,—नचेति। किन्तर्हि आयुर्व्वेदशास्त्रे सर्व्वगता पुरुषा उपदिश्यन्ते सत्वोपाधिवशात्। साङ्ख्यादिषु पुनः सर्व्वगता एव चेत्रज्ञा उपदिशन्ति। एवमायुर्व्वेदपुरुषस्य प्रदेशवर्त्तिनोऽपि नित्यत्वं स्यादित्याह नित्याश्च उपदिश्यन्त इति शेषः। नित्यत्वञ्च कथमित्याह,—असर्व्वगतेति। हेतूनिति सदकारणवन्नित्यमित्यादि तथा हि सन्नात्मा सुखादिलिङ्गोपलम्भात्। अविषयोऽकारणश्च। अतो नित्यः। तथा हि ओजः। शुभाशुभाभ्यां कर्म्मभ्यां प्रेरणान्मसो गतेः देहाद्देहान्तरं याति क्रिमिवत् शाश्वतोऽव्ययः। नित्यइत्युच्यते सद्भिः सत्त्वकारणवान्यत इति। तदेवोपसंहरन्नाह,—आयुर्व्वेद इति। असर्व्वगतत्वेऽपि सर्व्वयोनिगमनं निर्द्दिशन्नाह—तिर्य्यगिति तत्र वहुशः संसरणे तिर्य्यग्योनीनां प्रकृष्टत्वं अतस्तेषां प्रागुपदेशं। ततो मनुष्यनिर्द्देशः। देवास्तु कदाचित् क्वचित् संभवतीति पश्चान्निर्द्दिष्टाः। तत्र प्रायेण धर्म्मनिमित्तं तिर्य्यग्योनयः। धर्म्माधर्म्मनिमित्तं मनुष्याः धर्म्मनिमित्तं देवाः। ननु कथमप्रत्यक्षा अप्यात्मानो अभ्युपगम्यन्त इत्याह—तएते इति। सुख-

तस्य सुखदुःखेच्छाद्वेषौ प्रयत्नः प्राणापानावुन्मेषनिमेषौ बुद्धिर्म्मनःसङ्कल्पो विचारणा स्मृतिर्व्विज्ञानमध्यवसायो विषयोपलब्धिश्च गुणाः ॥ ७ ॥

सात्त्विकास्तु आनृशंस्यं संविभागरुचिता तितिक्षा सत्यं

दुःखाद्युपलब्धिरूपेण लिङ्गेनाव्यभिचारिणैः एते आत्मान उपलभ्यारोऽनुमन्तव्याः। प्रत्यक्षप्रमाणेनापि चेतन्याः कथं न गृह्यन्ते ? इत्याह परमसूक्ष्मा इति। परमसूक्ष्मा हि परमाणव इव सन्तोऽपि ते प्रत्यक्षेणैवोपलभ्यन्ते। चेतनावन्त इति नित्यं चेतनायुक्ताः। शाश्वत नित्यः, कथं तर्हि जायन्त इत्युच्यन्ते इत्याह लोहितरेतस इत्यादि। आत्मनः परमसूक्ष्माः पञ्चभूतात्मकाः सन्निपातेषु संयोगेषु अभिव्यज्यन्ते। एष एव च सूक्ष्मपुरुषाणां पञ्चमहाभूतानाञ्च संयोगो वैद्यके षड्धातुकः पुरुषः परिभाषितः। कुतः परिभाषित इत्याशङ्क्याध्यायोक्तं वाक्यं दर्शयति यत इति। तस्य चिकित्सोपयोगितां निदर्शयन्नाह,—स एवेति। कर्म्मपुरुषः कर्म्मफलभागीत्यर्थः। तेन चिकित्सितकर्म्मफलमप्यवाप्नोतीत्युक्तं भवति। इदानीं तस्यैव पुरुषस्य शरीरात्मनोः संयोगकारकेण मनसा संयोगे ये गुणा उत्पद्यन्ते तानाह तस्येत्यादि। तत्र सुखं स्वभावतोऽनुकूलवेदनीयं। स्वभावतः दुःखं प्रतिकूलवेदनीयं, इच्छा अभिलाषः, द्वेषोऽप्रीतिलक्षणः, प्रयत्नः कार्य्यारम्भेषूत्साहः। प्राणवायुर्व्वक्त्रसञ्चारी, अपानः पक्वाशयस्थितिरधोगमनशीलः। उन्मेषनिमेषौ चक्षुषोरुन्मीलननिमीलने। बुद्धिर्निश्चयात्मिका, मनःसंशयात्मकं। तस्य सङ्कल्पः मनसः कर्म्मविचारणा पुनरूहापोहाभ्यां वस्तुविमर्शः। स्मृतिः पूर्व्वानुभूतस्यार्थस्य स्मरणं। विज्ञानं शिल्पशास्त्रादिबोधः। अध्यवसायो बुद्धेर्व्यापारः। विषयाणां शब्दादीनामुपलब्धिरगतिर्व्विषयोपलब्धिः। गयीतु, सुखं प्रीतिः, दुःखमप्रीतिः। इच्छा सुखहेतुरभिलाषः, द्वेषो दुःखहेतुर्म्मनःप्रत्यायणः, प्रयत्नो मनःप्रवृत्तिकरोत्साहः। मनःसंकल्पात्मको लक्षणं तस्य संकल्पो विषयेषु दोषगुणकल्पनं, शेषं समं। एते कर्म्मपुरुषस्य षोड़शगुणाः। अतएव कला इत्युच्यन्ते ॥ ७ ॥

धर्म्म आस्तिक्यं ज्ञानं बुद्धिर्मेधा स्मृतिर्धृतिरनभिषङ्गश्च। राजसास्तु दुःखबहुलताऽटनशीलताऽधृतिरहङ्कार आनृतिकत्वमकारुण्यं दम्भो मानो हर्षः कामः क्रोधश्च। तामसास्तु विषादित्वं नास्तिक्यमधर्म्मशीलता बुद्धेर्निरोधोऽज्ञानं दुर्म्मेधस्त्वमकर्म्मशीलता निद्रालुत्वञ्चेति ॥ ८ ॥

आन्तरीचास्तु शब्दः शब्देन्द्रियं सर्व्वच्छिद्रसमूहो विविक्तता च। वायव्यास्तु स्पर्शः स्पर्शेन्द्रियं सर्व्वचेष्टासमूहः सर्व्वशरीरस्पन्दनं लघुता च। तैजसास्तु रूपं रूपेन्द्रियं वर्णः सन्तापो भ्राजिष्णुता पक्तिरमर्षस्तैक्ष्ण्यं शौर्य्यञ्च। आप्यास्तु रसो रसने-

पुरुषगुणानभिधाय शेषान् सत्वादियुक्तस्य मनसो गुणान् निदर्शयन्नाह,—सात्विका इति। आनृशंस्यं अक्रूरकर्म्मकारित्वं। संविभागरुचिता संविभज्य भोक्तुमभिलाषुकता। तितिक्षा क्षमा, सत्यं भूतहितं, तथ्यं वचो वा। धर्म्मः कायवाङ्मनोभिः सुचरितं। अस्ति धर्म्ममोक्षपरलोकादिकमिति बुद्धा चरति आस्तिकस्तद्भाव आस्तिक्यं। ज्ञानमात्मज्ञानं। बुद्धिस्तत्कालविषया, मेधा ग्रन्थावधारणशक्तिः। धृतिर्म्मनसो नियमात्मिका बुद्धिः। फलनिरपेक्षया बुद्ध्या श्रेयः कर्म्मकरणमभिषङ्गः। राजसास्तु दुःखबहुलतेति अधृतिर्म्मनसोऽधीरता, आनृतकत्वं मिथ्यावचनशीलता, गयी तु अवृतिकत्वमिति पठित्वा मनसः शीतलतेत्याह,—अकारुण्यं निर्द्दयत्वं, दम्भः कुहकनिवृत्तिता, मानमात्मन्युत्कर्षबुद्धिः। अहङ्कारादयः पूर्व्वं व्याख्याताः। गयी तु अटनशीलतेत्यत्र ताड़नशीलतेति पठति, मानइत्यत्र मद इति पठति। तामसस्तु विषादित्वमिति। विषादोऽस्यास्तीति विषादी, तद्भावो विषादित्वं, मूढ़ताऽधर्म्मशीलं स्वभावो यस्य तद्भावो अधर्म्मशीलत्वं-दुर्मेधस्त्वं दुष्टबुद्धित्वं, अकर्म्मशीलताऽकर्म्मण्युत्साहः ॥ ८ ॥

महाभूतगुणान्निदर्शयन्नाह,—आन्तरीचा इति। आन्तरिचा आकाशभूतगुणाः, शब्देन्द्रियं श्रवणेन्द्रियं, विविक्तता शारीराणां भावानां सिरास्नायु,

न्द्रियं सर्व्वद्रवसमूहो गुरुता शैत्यं स्नेहो रेतश्च। पार्थिवास्तु गन्धो गन्धेन्द्रियं सर्व्वमूर्त्तिसमूहो गुरुता चेति। तत्र सत्व-बहुलमाकाशं। रजोबहुलो वायुः। सत्वरजोबहुलोऽग्निः। सत्वतमोबहुला आपः। तमोबहुला पृथिवीति॥ ६॥

श्लोकौ चात्र भवतः।

अन्योऽन्यानुप्रविष्टानि सर्व्वाण्येतानि निर्द्दिशेत्।
स्वे स्वे द्रव्ये तु सर्व्वेषां व्यक्तं लक्षणमिष्यते॥

स्थिप्रभृतीनां जातिव्यक्तिभ्यां मिथः पृथक्त्वं। गयी तु। विविक्तता इत्यस्य स्थाने विरिक्तता इति पठति व्याख्यायति च। विरिक्तता शारीराणां भावानां रिक्तता पृथक्त्वमिति यावत्। वायव्या इति स्पर्शेन्द्रियं त्वक्। सर्व्व-चेष्टासमूहो नमनोन्नमनादि सर्व्वक्रियासमूहः, कायवाङ्मनः क्रियासमूह-इत्यन्ये। स्पन्दनं चलनं, तैजसास्त्विति रूपं लावण्यं, रूपेन्द्रियं चक्षुः। वर्णो गौरादिः, सन्तापउष्णं, भ्राजिष्णुता दीप्तता, पक्तिरग्निकृताहारपरिणतिः। अमर्षः क्रोधः, तैक्ष्ण्यमाशुक्रिया, शौर्य्यं विक्रान्तता। आप्यास्त्विति सर्व्वद्रव-समूहो दोषधातुमलेषु द्रुतिमद्द्रव्यनिवहः। पार्थिवास्त्विति सर्व्वमूर्त्तसमूहो दोषधातुमलेषु यः कश्चित् काठिन्यनिवहः। अथाकाशादिभूतानां सत्वादि-गुणमयत्वं दर्शयन्नाह,—तत्रेत्यादि। सत्वबहुलमाकाशं प्रकाशकत्वात् रजो बहुलो वायुश्चलत्वात् सत्वरजोबहुलोऽग्निः प्रकाशकत्वात् चलत्वाच्च, सत्व-तमोबहुला आपः स्वच्छत्वात् प्रकाशकत्वात् गुरुत्वादावरणत्वाच्च। तमो-बहुला पृथिवी अत्यन्तावरकत्वात्॥ ६॥

अन्योऽन्येत्यादि तत्र शब्दगुणमाकाशं मारुते प्रविष्टं शब्दस्पर्शगुणत्वा-न्मारुतस्य, आकाशमारुतौ तेजसि प्रविष्टौ शब्दस्पर्शरूपगुणत्वात्तेजसः। आकाशमरुत्तेजसि तोयद्रव्ये प्रविष्टानि शब्दस्पर्शे रूपरसगुणत्वात्तोयस्य आकाशमरुत्तेजस्तोयानि पृथिव्यामनुविष्टानि शब्दस्पर्शरूपगुणत्वात् पृथिव्याः। एवं व्योमानिलानलजलोर्व्वीणां परस्परमनुप्रवेशकात्सुप्रवेशत्वेनावस्थिता-

अष्टौ प्रकृतयः प्रोक्ता विकाराः षोड़शैव तु।
क्षेत्रज्ञश्च समासेन स्वतन्त्रपरतन्त्रयोः॥ १०॥

नामन्योन्यानुप्रविष्टत्वमुक्तं। अन्ये पुनरन्योऽन्यानुप्रविष्टत्वमन्यथा व्याचक्षते। तत्राकाशोऽपि भूमिरनुरूपेणावस्थितसूक्ष्मरूपतोयतेजोऽनुगतमारुतस्य सञ्चारणादाकाशे पवनदहनतोयान्यपि बोद्धव्यानि तथा वायावप्याकाशं व्यवस्थितं व्यापकत्वात्। अनुष्णशीतस्पर्शोऽयं द्रव्यज्ञैर्वायुरिष्यते। दाहकत्तेजसा युक्तः, शीतकृत् सोमसंश्रयात्, इत्युक्तत्वात् वायौ तेजोऽम्बुनी अपि तिष्ठतः, भूरप्यनुताविशेषेण मारुतेन तिष्ठति। तथा तेजो द्रव्येऽप्याकाशं व्यवस्थितं व्यापकत्वात्। पवनोऽपि प्रेरणात्मकत्वात् तेजोद्रव्ये पानीयमप्यनुमीयते कार्य्यकारणयोरैक्यत्वात् कारणं तोयं कार्य्यञ्च तेजः। अद्भ्यो अग्निरित्युक्तत्वात्। भूमिरपि धूमादिरूपेण तेजसि व्यवस्थिता आद्यतोयद्रव्येऽप्याकाशं व्यवस्थितं व्यापकत्वात् वायुरपि तोये व्यवस्थितः तरङ्गबुद्बुदादिकारणत्वात्, वह्निरपि तोये व्यवस्थितः तत एवोत्पन्नत्वात्। उक्तञ्च "अद्भ्योऽग्नि ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं एषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति। भूमिरपि तोये अनुरूपेणावस्थिता तथा पृथिव्यामपि आकाशपवनदहनतोयान्निस्थितान्येव भूमिप्रविभागीये पञ्चविधाया भूमेः प्रोक्तत्वात्। इत्थमाकाशादि भूतानामन्योऽन्यानुप्रविष्टत्वमाहुः। तेन तल्लक्षणेन पार्थिवादि व्यपदेशं दर्शयन्नाह—खे खे इत्यादि, खे खे स्वकीये मङ्गलद्रव्ये सर्व्वेषां आकाशादीनां व्यक्तं लक्षणमिति आकाशद्रव्ये तल्लक्षणं व्यक्तमित्यादिर्बोद्धव्यं। अष्टावित्यादि। अष्टौ प्रकृतयः अव्यक्तं महानहङ्कारः पञ्चतन्मयानीत्यष्टौ विकाराः षोड़शैवत्विति श्रोत्र त्वक् चक्षुर्ज्जिह्वा घ्राण वाग्घस्तोपस्थपायुपादमनांसीत्येवमेकादशेन्द्रियाणि आकाशपवनदहनतोयभूमय इति पञ्चभूतानीत्येवं षोड़शविकाराः। क्षेत्रं स्थूलसूक्ष्मदेहं जानातीति क्षेत्रज्ञः पुरुषः समासेन संक्षेपेन एवं पञ्चविंशतिस्तत्वान्युक्तानि। स्वतन्त्रे शल्यतन्त्रे। परतन्त्रे शालक्यतन्त्रे साङ्ख्ये च॥ १०॥

इति शारीरेनिबन्धसंग्रहे प्रथमोऽध्यायः।

द्वितीयऽध्यायः ।

अथातः शुक्रशोणितशुद्धिं नाम शारीरं व्याख्यास्यामः ।

वातपित्तश्लेष्मकुणपग्रन्थिपूतिपूयक्षीणमूत्रपुरीषरेतसः प्रजोत्पादने न समर्था भवन्ति । तेषु वातवर्णवेदनं वातेन । पित्तवर्णवेदनं पित्तेन । श्लेष्मवर्णवेदनं श्लेष्मणा । शोणितवर्णवेदनं कुणपगन्ध्यनल्पं रक्तेन । ग्रन्थिभूतं श्लेष्मवाताभ्यां ।

सर्व्वभूतचिन्ताशारीरे शुक्रशोणितयोः सन्निपातेष्वभिव्यज्यन्त इति, यदुक्तं अथातः शुक्रशोणितमित्यादि । तत्र शुक्रशोणितयोः शुद्धयोरेव सन्निपातेषु चेतना अभिव्यज्यन्ते अतस्तयोः शुद्धिप्रतिपादयितुकामः प्राह । शोणितशब्दोऽत्र आर्त्तवशोणिते वर्त्तते शुद्धिर्दुष्टदोषाऽसंपक्तता । सा च शुद्धिर्व्वातादिदुष्टशुक्रस्येति ; वातादिभिः पृथक् समुदितैर्दुष्टशुक्रतामाह,—वात इत्यादि । एवंभूतरेतसः पुरुषा गर्भोत्पत्तौ न क्षमा भवन्तीति पिण्डार्थः । तेष्वित्यादि तेषु वातादिदुष्टेषु मध्ये वातेन यच्छुक्रं दूषितं तद्वातवर्णवेदनं भवति । तत्र वातवर्णा अरुणकृष्णादयः । यद्यप्यव्यक्तस्य वायोर्व्वर्णोसम्भवस्तथापि वातदुष्टेऽरुणकृष्णौ यातेन वर्णौ भवत इत्यदोषः । वातवेदनास्तोदनभेदनादयः । ननु कथमेकस्माद्वायोरनेकवेदनाविशेषास्तोदादयः ? सत्यं बहुकारणप्रकोपात्तस्येति । गन्धस्तु वायोर्नास्त्येव । पित्तेन यच्छुक्रं दूषितं तत् पित्तवर्णवेदनं भवति । पित्तवर्णाः पीतनीलादयः पित्तवेदना ओषचोषादयः । पित्तदुष्टे शुक्रेऽनुक्तोऽपि गन्धः कुणपे पूतिपूयाभे च वक्ष्यमाणो द्रष्टव्यः । श्लेष्मणा यच्छुक्रं दूषितं तच्छ्लेष्मवर्णवेदनं भवति । श्लेष्मवर्णः शुक्लः, श्लेष्मवेदनाः कण्ड्वादयः । गन्धस्तु अनुक्तोऽपि विस्रो द्रष्टव्यः । रक्तेन यच्छुक्रं दूषितं तत्कुणपगन्ध्यनल्पञ्च भवति । चकाराच्छोणितवर्णं पित्तवेदनञ्च । कुणपं शवस्तस्येव गन्धोऽस्येति कुणपगन्धिः ।

पूतिपूयनिभं पित्तश्लेष्मभ्यां। क्षीणं प्रागुक्तं पित्तमारुताभ्यां। मूत्रपुरीषगन्धि सन्निपातेनेति॥ १॥

तेषु कुणपग्रन्थिपूतिपूयक्षीणरेतसः कृच्छ्रसाध्याः। मूत्रपुरीषरेतसस्त्वसाध्याः साध्यमन्यच्चेति।

आर्त्तवमपि त्रिभिर्दोषैः शोणितचतुर्थैः पृथग्द्वन्द्वैः समस्तैश्चोपसृष्टमवीजं भवति तदपि दोषवर्णवेदनादिभिर्विज्ञेयं। तेषु कुणपग्रन्थिपूतिपूयक्षीणमूत्रपुरीषप्रकाशमसाध्यं साध्यमन्यद्भवति॥ २॥

अनल्पं बहुलं। अत्र रक्तेनेति व्यपदेशो घृततैलदग्धवत्। अग्निदग्धघृततैलाभ्यां दग्धं द्रव्यं यथा घृततैलदग्धमित्युच्यते नत्वग्निना दग्धमिति तथात्रापि वातादिदूषितरक्तेन दुष्टं रक्तदूषितमिति व्यपदेशः। यतो रक्तस्यापि दोषा एव दूषयितारः। श्लेष्मवाताभ्यां यच्छुक्रं दूषितं तद् ग्रन्थिभूतं ग्रन्थिसदृशं ग्रन्थिलं भवतीत्यर्थः। पित्तश्लेष्मभ्यां यद् दूषितं तत्पूतिपूयसदृशं भवति। क्षीणं पित्तमारुताभ्यां भवति। तस्य लक्षणं प्राग्दोषधातुमलक्षयवृद्धिविज्ञानीय उक्तं। ग्रन्थ्यादयस्तु ये द्विदोषजास्तद्विदोषवर्णवेदना बोद्धव्याः। सन्निपातेन यच्छुक्रं दूषितं तन्मूत्रपुरीषगन्धि भवति॥ १॥

तेषां कृच्छ्रसाध्याभेदं दर्शयन्नाह,—तेष्वित्यादि। तेषु मध्ये कुणपादयश्चत्वारः कृच्छ्रसाध्याः। मूत्रपुरीषगन्धिरन्तिमोऽसाध्यः। शेषा अर्थतएव साध्याः। इदानीं शुक्रविषयं प्रतिपाद्य आर्त्तवशोणितविषयमपि प्रतिपादयितुमाह,—आर्त्तवमित्यादि आर्त्तवमपि यदा पृथग्दोषैः शोणितचतुर्थैर्द्वन्द्वैः समस्तैश्चोपसंसृष्टं तदा अवीजं भवतीत्यर्थपिण्डः। तस्य विज्ञानोपायं दर्शयन्नाह,—तदपीत्यादि। तदपीति आर्त्तवमपि दोषवर्णवेदनाभिरेकैकदोषजनितं त्रयः। शुक्रार्त्तवदोषा याप्या न भवन्ति। व्याधिस्वभावात्॥ २॥

भवन्ति चात्र ।

तेष्वाद्यान् शुक्रदोषांस्त्रीन् स्नेहस्वेदादिभिर्ज्जयेत् ।
क्रियाविशेषैर्म्मतिमांस्तथाचोत्तरवस्तिभिः ॥
पाययेत नरं सर्पिर्भिषक् कुणपरेतसि ।
धातकीपुष्पखदिरदाडिमार्ज्जुनसाधितं ॥
पाययेदथवा सर्पिः शालसारादिसाधितं ।
ग्रन्थिभूते शठीसिद्धं पालाशे वापि भस्मनि ॥
परूषकवटादिभ्यां पूयप्रख्ये च साधितं ।
प्रागुक्तं वक्ष्यते यच्च तत् कार्य्यं क्षीणरेतसि ॥ ३ ॥
विट्प्रभे पाययेत् सिद्धं चित्रकोशीरहिङ्गुभिः ।
स्निग्धं वान्तं विरिक्तञ्च निरूढमनुवासितं ॥

इदानीं शुक्रदोषाणां चिकित्सितमाह,—भवन्तीत्यादि । तेषु शुक्रदोषेषु मध्ये आद्यान् त्रीन् शुक्रदोषान् स्नेहस्वेदादिभिः क्रियाविशेषै-र्ज्जयेदिति सम्बन्धः । आदिग्रहणाद्वमनविरेचननिरूहानुवासनोत्तरवस्तयो यथादोषं शमनानि चावगन्तव्यानि । तथेति पुनरुत्तरवस्तिकथनं क्रियासु प्राधान्यसूचनार्थं । पाययेदित्यादि धातक्यादेः कल्ककषायाभ्यां साधितं, सालसारादिसाधितमित्यत्रापि कल्ककषायाभ्यामेव । ग्रन्थीत्यादि । शठी सिद्धमिति । शठ्याः कल्ककषायाभ्यां सिद्धं । पालाशे चेत्यादि पलाशभस्मा-ढकं षड्भिः सलिलाढकैः क्वथितं पादशेषं सप्तकृत्वः परिस्रुतमाढकशेषं प्रस्थं घृतं पाकाय प्रयोज्यं । परूषकवटादिभ्यामित्यादि परूषकवटादिभ्या-मिति पुरुषकादिन्यग्रोधादिगणाभ्यामित्यर्थः । प्रागुक्तमित्यादि प्रागुक्तं स्वयोनिवर्द्धनं द्रव्यं वक्ष्यते यच्चेति यच्च क्षीणबलीयेऽध्याये वक्ष्यते ॥ ३ ॥

विड़ित्यादि । विट्प्रभे मूत्रपुरीषप्रकाशे रेतसि विट्ग्रहणेनात्र पुरीषं मूत्रञ्च गृह्यते । मलमूत्रमात्रवाचकत्वाद्विट्शब्दस्य सर्पिरित्यत्राप्यनुवर्त्त-

योजयेच्छुक्रदोषार्त्तं सम्यगुत्तरवस्तिना।
विधिमुत्तरवस्त्यन्तं कुर्य्यादार्त्तवशुद्धये॥
स्त्रीणां स्नेहादियुक्तानां चतसृष्वार्त्तवार्त्तिषु।
कुर्य्यात् कल्कान् पिचूंश्चापि पथ्यान्याचमनानि च॥
ग्रन्थिभूते पिबेत् पाठां त्रूषणं वृक्षकानि च।
दुर्गन्धे पूयसङ्काशे मज्जतुल्ये तथार्त्तवे।
पिबेद्भद्रश्रियः क्वाथञ्चन्दनक्वाथमेव च॥ ४॥

नीयं। विण्मूत्राभे साध्येऽपि दुःखकारिविट्गन्धापनयनार्थं। चित्रकादिभिः कल्कीकृतं घृतं पेयं न तु सर्व्वथा सिद्ध्यर्थं। असाध्यत्वेऽपि साध्यत्वमिति वचनात्। सर्व्वेषां कुणपादीनां सामान्यचिकित्सितमाह,—स्निग्धमित्यादि उत्तरवस्त्यन्तं उत्तरवस्त्यवसानं तत्र वमनादि दोषवमनादि उत्तरवस्तिः पुनः सर्व्वेष्वेव वातादिहरक्वाथस्नेहाभ्यां नैरूहिकस्नैहिकश्च। आर्त्तवग्रहणादेव स्त्रीग्रहणे लब्धे पुनः स्त्रीग्रहणं समत्वागतयौवनप्रापनार्थं। चतसृष्विति वातपित्तश्लेष्मशोणितकृतासु। गयी तु चतसृष्वित्यत्र चतुर्थीं शोणितप्रकृतिभूतविस्रगन्धिशोणितार्त्तवार्त्तिं मन्यते तस्या एव साध्यत्वात् न तु कुणपगन्ध्यार्त्तवार्त्तिंस्तस्या वक्ष्यमाणत्वात्। कल्कादयस्तु योनिव्यापत्सु कथिता वातादिदोषहरद्रव्यकृताः। आचमनं योनिप्रक्षालनोदकं तदपि वातादिदोषहरद्रव्यकृतं। ग्रन्थीत्यादि। दुर्गन्धिपूयसङ्काशे पूतिगन्धपूयोपमे। कफपित्तदुष्टे इत्यर्थः। मज्जतुल्ये त्रिदोषमलिने। तथा शवदुर्गन्धे इत्यपि योजनीयः तेन मूत्रपुरीषगन्धिनीति गम्यते। गयीत्वत्र दुर्गन्धिकुणपगन्धिनि पूयसङ्काशे पूतिपूयोपमे मज्जतुल्ये त्रिदोषमलिन इति व्याख्याति चौषध प्रागुक्तमित्यग्रे सूचयिष्यति। अत्र कुणपादीनां पञ्चानामसाध्यानामपि दुर्गन्धापनयनार्थं चिकित्सितप्रतिपादनं। न तु सर्व्वथा सिद्ध्यर्थं तेषामसाध्यत्वात्। भद्रश्रियं श्रीचन्दनं। गयी तु भद्रश्रियं श्वेतचन्दनं। चन्दनं गोशीर्षाख्यं चन्दनं। तस्य हि गन्धापहरणशक्तेरभावात्॥ ४॥

शुक्रदोषहराणाञ्च यथास्वमवचारणं।
दोषाणां शुद्धिकरणं शेषास्वप्यार्त्तवार्त्तिषु॥
अन्नं शालियवं मद्यं हितं मांसञ्च पित्तलं।
स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च॥
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभन्तथा।
शशासृक्प्रतिमं यत्तु यद्वा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत्॥ ५॥
तदेवातिप्रसङ्गेन प्रवृत्तमनृतामपि।
असृग्दरं विजानीयादतोऽन्यदुक्तलक्षणात्॥
असृग्दरो भवेत् सर्व्वः साङ्गमर्दः सवेदनः।

वातादिदुष्टार्त्तवार्त्तिमत्यामपि चिकित्सामतिदेशेन निर्द्दिशन्नाह,—शुक्रदोषहराणामित्यादि शुक्रदोषहराणां स्नेहस्वेदादिपूर्व्वाणां, यथास्वं यथादोषं। योगानां रसायनवाजीकरणमूत्रदोषप्रतिषेधोक्तानां, शेषवाताद्येकैकदोषजनितास्वार्त्तवार्त्तिषु शुद्धिकरणमवचारणं कार्य्यमिति सम्बन्धः। अन्येषामार्त्तवदुष्टिनां पथ्यमाह,—अन्नमित्यादि। अन्नं भोजनार्थं। अदुष्टार्त्तवलक्षणमाह,—शशासृगित्यादि। यदार्त्तवं वासःस्थितं शुष्कमुदकप्रक्षालितं वासो न विरञ्जयेत्। रागोपेतं वस्त्रं न कुर्य्यात् तत् प्रशंसन्ति गर्भजननायेति शेषः॥ ५॥

तस्यैवातिप्रवृत्तस्यासृग्दरत्वं तत्र च दोषदुष्टिलक्षणमाह,—तदेवातिप्रसङ्गेनेत्यादि। तदेवार्त्तवमेव न तु रक्तपित्तं। ऋतावतिप्रसङ्गेनेति अतिप्राचुर्य्येण दीर्घकालानुवन्धेन वा, प्रवृत्तं प्रसुतं। अपरमनृतावित्याह,—अनृतावन्यस्मिन्नपि दीर्घकालमपि प्रवृत्तमसृग्दरं विजानीयात्। किं स्वरूपं तदित्याह,—अत इत्यादि। अत एतस्मात्, शशासृक्प्रतिममित्यादि वाक्यप्रतिपादितादुक्तलक्षणादन्यदन्यादृक् लक्षणं फेणितं शीघ्रमच्छमित्यादि

तस्यातिवृत्तौ दौर्व्वल्यं भ्रमो मूर्च्छा तमस्तृषा ॥
दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः ॥ ६ ॥
तरुण्या हितसेविन्यास्तदल्पोपद्रवं भिषक् ॥
रक्तपित्तविधानेन यथावत् समुपाचरेत् ।
दोषैरावृतमार्गत्वादार्त्तवं नश्यति स्त्रियाः ॥
तत्र मत्स्यकुलत्थाम्लतिलमाषसुरा हिताः ।
पाने मूत्रमुदश्विच्च दधि शुक्तञ्च भोजने ॥
क्षीणं प्रागीरितं रक्तं सलक्षणचिकित्सितं ।
तथाप्यत्र विधातव्यं विधानं नष्टरक्तवत् ॥ ७ ॥
एवमदुष्टशुक्रः शुद्धार्त्तवा, ऋतौ प्रथमदिवसात् प्रभृति

वाक्येन शोणितवर्णनीये यादृशमभिहितं तादृशमपीत्यर्थः । दोषानुवन्धकृतं लक्षणमतिदेशेन निर्द्दिश्य स्वभावव्याधिकृतं सामान्यं लक्षणमाह,—असृगित्यादि । अङ्गमर्द्दो वेदनाविशेषः, सवेदनः सशूलः । तस्यातिस्रुतस्य लक्षणमाह,—अस्येत्यादि, अतिवृत्तौ अतिप्रवृत्तावित्यर्थः । तमोऽन्धकारदर्शनं श्वासो वा । प्रलापोऽसम्बद्धभाषणं । तन्द्रा निद्राभेदः वातजा रोगा आक्षेपकादयः ॥ ६ ॥

यस्या यद्रूपं यादृशेन प्रकारेणोपचरणीयं तदाह,—तरुण्या इत्यादि । तरुण्याः षोड़शवर्षप्राप्तायाः, हितसेविन्याः पथ्याशिन्याः । अतिप्रवृत्तिलक्षणामार्त्तवस्य विकृतिं निर्द्दिश्याप्रवृत्तिलक्षणां चिकित्सितां निर्द्दिशन्नाह,—दोषैरित्यादि । अत्र दोषाः कफो वायुर्व्वातकफौ च । न तु पित्तं पित्तवृद्धौ तस्यातिप्रवृत्तिहेतुत्वोक्तत्वात् । कुलत्थादि वातकफहरद्रव्यावचारणत्वाच्च नश्यतीति प्रवृत्तमानं न दृश्यते न तु सर्व्वथा क्षयं याति । अम्लं काञ्जिकं, मूत्रं गोमूत्रं । उदश्विदर्द्धोदकं तक्रं, शुक्तं चुक्रं । पुनरुक्तिशङ्कां निरस्यन्नाह,—क्षीणमित्यादि क्षीणं स चिकित्सितमभिहितं । तथाप्यत्रोपादानान्नष्टरक्तवन्नष्टार्त्तववद्विधानं कर्त्तव्यं, रक्तमार्त्तवरक्तं ॥ ७ ॥

ब्रह्मचारिणी दिवास्वप्नाञ्जनाश्रुपातस्नानानुलेपनाभ्यङ्गनखच्छेदन-प्रधावनहसनकथनाति-शब्दश्रवणावलेखनानिलायासान् परिहरेत्। किङ्कारणं? दिवास्वपन्त्याः स्वापशीलोऽञ्जनादन्धो रोदनाद्विकृतदृष्टिः स्नानानुलेपनाद् दुःखशीलस्तैलाभ्यङ्गात् कुष्ठी नखापकर्त्तनात् कुनखी प्रधावनाच्चञ्चलो हसनाच्छ्यावदन्तौष्ठतालुजिह्वः प्रलापी चातिकथनादतिशब्दश्रवणाद्बधिरोऽवलेखनात् खलतिर्म्मारुतायाससेवनादुन्मत्तो गर्भो भवतीत्येवमेतान् परिहरेत्॥ ८॥

दर्भसंस्तरशायिनीं करतलशरावपर्णान्यतमभोजिनीं हविष्यं त्र्यहञ्च भर्त्तुः संरक्षेत्। ततः शुद्धस्नातां चतुर्थेऽहन्यहतवाससमलङ्कृतां कृतमङ्गलस्वस्तिवाचनां भर्त्तारं दर्शयेत्। तत् कस्य हेतोः॥ ९॥

प्रकरणप्रयोजनमुपसंहरन्नाह,—एवमित्यादि। एवं पूर्व्वोक्तेन प्रकारेण अदुष्टशुक्रः पुरुषः, शुद्धार्त्तवा च स्त्री भवतीत्यत्राध्याहारः। ऋतौ पुत्रीयमाचारं निर्द्दिशन्नाह,—ऋतावित्यादि ऋतुकाले प्रथमदिवसं मर्य्यादीकृत्य नारी ब्रह्मचारिणी स्यात्। ऋतुदर्शनात् पूर्व्वं मासं ब्रह्मचर्य्यस्य वक्ष्यमाणस्य विशिष्टप्रजोत्पादनं प्रयोजनं। अस्मिंश्च ऋतुदर्शने दिनत्रयं ब्रह्मचर्य्यस्य स्वयमेवाचार्य्योऽग्रे प्रयोजनं कथयिष्यति। दिवास्वप्नादींश्च परिहरेत्। कथनं बहुभाषणं, अवलेखनं कङ्कतिकादिना केशसम्मार्ज्जनं। आयासः कष्टं। किं कारणमित्यादि। उन्मत्तो वातुलः। परिहार्य्यं मुक्त्वा॥ ८॥

भर्त्तारं प्रति नार्य्याः करणीयं निर्द्दिशन्नाह,—दर्भेत्यादि। हविष्यं सघृतशाल्योदनादि क्षीरसंस्कृतं, यवान्नमित्येके। भर्त्तुः संरक्षेत् वैद्य इति शेषः। तस्मै दर्शनमपि निवारयेदित्यर्थः। तत इत्यादि, शुद्धाजीर्णशोणितापगमेन। अनन्तरं स्नाता, तदुक्तं, "न वेतनी च सञ्जाते विगते जीर्णशोणिते। नारी भवति संशुद्धा पुंसा संसृज्य तदा दर्शये"दित्यत्र वैद्य

पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना।
तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेदतः॥
ततो विधानं पुत्रीयमुपाध्यायः समाचरेत्।
कर्म्मान्ते च क्रमं ह्येनमारभेत विचक्षणः॥ १०॥

ततोऽपराह्णे पुमान् मासं ब्रह्मचारी सर्पिः स्निग्धः सर्पिः-क्षीराभ्यां शाल्योदनं भुक्त्वा मासं ब्रह्मचारिणीं तैलस्निग्धां

इति शेषः। तत् कस्य हेतोरित्यत्र तच्छब्दः संबोधने तेनाहो कस्य हेतोः। अन्येत्वत्रापीति प्रश्नार्थं पठन्ति। तत्रापि प्रश्ने॥ ९॥

पूर्व्वमित्यादि। पुत्रेभ्यो हितं पुत्रीयमिति। गयी तु तत्राचार्य्यो ब्राह्मणप्रयुक्तोऽनुपहतश्वेतवस्त्रेण संवीतश्चार्षभे चर्म्मण्युपविष्टो राजन्यप्रयुक्तो वैयाघ्रे आनडुहे वा वैश्यप्रयुक्तो रौरवे शूद्रप्रयुक्तो वास्ते वा चतुर्हस्तं स्थण्डिलमुपलिप्योल्लिख्य दर्भैरास्तीर्य्य वेणुयूपं दक्षिणेन ब्राह्मणे व्यवस्थाप्य शुक्लकुसुमगन्धवलिभिरभ्यर्च्चाग्निं प्रणीय संस्तुत्य पालासाभिः समिद्भि-रग्निमुपसमाधाय मन्त्रोदक-पूर्णपात्रमग्नेरग्रे स्थापयित्वा पुत्रजन्माशयाज्यं जुहुयान्महाव्याहृतिभिः। योषिच्च पुत्रार्थिनी सह भर्त्रा पश्चिमतोऽग्ने-रृत्विजो दक्षिणतः समुपविशेत्। ततोऽस्या ब्राह्मणः प्रजापतिमुद्दिश्य यथाभिलिखितं सम्पादनाय मनसा योनौ काम्यामिष्टिं निर्व्वपेत्। अनयो-र्व्विष्णुर्य्योनिं कल्पयतु त्वष्टारूपाणि निर्व्विंशत्विति ततः श्वेतस्थालीपाक-मभिधार्य्य त्रिर्जुहुयात्। यथाम्नायं चोपमन्त्रितमुदपात्रमस्यै दद्यात्। सर्व्वानुदकार्थान् कुरुष्वेति। ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणं पादमभि-हरन्तौ प्रदक्षिणमग्निमुपक्रमेत्। ततः परिक्रम्य ब्राह्मणान् स्वस्तिवाच-यित्वा सहभर्त्रा आज्यशेषं प्राश्नीयात्। पूर्व्वं पुमान् जघन्यं स्त्री। नचो-च्छिष्टमवशेषयेदिति पुत्रीयविधानं। कर्म्मान्ते पुत्रीयविधानान्ते एतं क्रमं वक्ष्यमाणं॥ १०॥

तमेव क्रमं वक्तुमाह,—ततोऽपराह्ण इत्यादि। पुंसो मासं ब्रह्मचारी-

तैलमाषोत्तराहारां नारीमुपेयाद्रात्रौ मासादिभिरभिविश्वास्य विकल्पैवञ्चतुर्थ्यां षष्ठ्यामष्टम्यां दशम्यां द्वादश्यां चोपेयादिति पुत्रकामः।

एषूत्तरोत्तरं विद्यादायुरारोग्यमेव च।
प्रजासौभाग्यमैश्वर्य्यं बलञ्च दिवसेषु वै॥

अतःपरं पञ्चम्यां सप्तम्यां नवम्यामेकादश्याञ्च स्त्रीकामः त्रयोदशीप्रभृतयो निन्द्याः॥ ११॥

तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति। यश्च तत्राधीयते गर्भः स प्रसवमानो विमुच्यते। द्वितीयेऽप्येवं सूतिकागृहे वा तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्व्वा भवति। चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति। न च प्रवर्त्तमाने रक्ते वीजं प्रविष्टं गुणकरं भवति। यथा नद्यां प्रतिस्रोतः प्लाविद्रव्यं प्रक्षिप्तं प्रतिनिवर्त्तते नोर्द्ध्वं गच्छति तद्वदेव

त्वेन स्त्रीनामपि ब्रह्मचारित्वे लब्धे मासं ब्रह्मचारिणीमिति। यदुक्तं तन्मनःसङ्कल्पमात्रस्यापि निरासार्थं। तैलमाषोत्तराहारां तैलमाषप्रधानाहारां उपेयात् गच्छेत्। सामान्यापत्यजननकालमृतुसंज्ञं निर्द्दिश्यापत्यविशेषजननसमर्थकालमुद्दिशन्नाह,—विकल्पैवमित्यादि। एषु दिवसेषूत्तरोत्तरमायुरित्यादिकं विद्यादित्येवं विकल्प्य विचार्य्य चतुर्थ्यादिषु रात्रिषु नारीमुपेयात्। अतःपरं पञ्चम्यां सप्तम्यां नवम्यामेकादश्याञ्च स्त्रीकामः उपेयादित्यत्रापि सम्बध्यते॥ ११॥

तत्रेति प्रथमे दिवसे, विमुच्यते प्राणैरिति शेषः। द्वितीय इत्यादि। एवमिति पूर्व्वोक्तं भवतीत्यर्थः। सूतिकागृहे वा, दशदिवसाभ्यन्तरं च गर्भः प्राणैर्व्विमुच्यत इत्यर्थः। न च प्रवर्त्तमान इत्यादि। प्रतिस्रोतः धारासमुत्थमित्यर्थः। प्लाविद्रव्यं प्रतरणशीलं वस्तु। प्रतिनिवर्त्तते व्यावर्त्तते।

द्रष्टव्यं। तस्मान्नियमवर्त्ती त्रिरात्रं परिहरेत्। अतःपरं मासादुपेयात्॥ १२॥

लब्धगर्भायाश्चैतेष्वहःसु लक्ष्मणावटशुङ्गासहदेवाविश्व-देवानामन्यतमं क्षीरेणाभिषुत्य त्रींश्चतुरो वा विन्दून् दद्याद्-दक्षिणे नासापुटे पुत्रकामायै न च तान्निष्ठीवेत्॥ १३॥

ध्रुवञ्चतुर्णां सान्निध्याद् गर्भः स्याद्विधिपूर्व्वकः।

गयी तु तत्र प्रथमदिवस इत्यादि तस्मान्नियमवर्त्ती त्रिरात्रं परिहरेदिति। यावद् ग्रन्थमत्रतनेऽध्याये ऋतुस्तु द्वादशरात्रं भवति। दृष्टान्तैव इत्यस्याग्रे पठति। अतःपरमित्यादि मासादिति ऊर्द्धमिति शेषः। अर्व्वाग्गमनन्तु गर्भद्वार-विघटनेन स्थितमपि गर्भं च्यावयति। केचित्त्वतःपरं मासादुपेयादि-त्यत्र परतस्तु पुष्पदर्शनेनागर्भलाभनिश्चय एव। लब्धगर्भान्तु तेनैवेति पठन्ति। उपेयादित्यध्याहृत्य व्याख्यानयन्ति॥ १२॥

लब्धगर्भाया इत्यादि। लक्ष्मणालक्षणन्तु पुत्रकारकरक्ताल्पविन्दुभि-र्लाञ्छिता यदा लक्ष्मणा पुत्रजननी वस्तगन्धाकृतिर्भवेत्। ताञ्च शरत्काले पुष्पफलोपेतां दृष्ट्वा शनिदिने सन्ध्यायां तस्याश्चतुर्भागेषु खदिरकीलकान्नि-खायापरेद्युर्हि मूलपुष्पैर्योगं गते दिवाकरे मन्त्रवद् गृहीत्वा समानवर्ण-वत्साया गोः क्षीरेण यथाविधि नस्यं दद्यात्। वटशुङ्गा वटप्ररोहः। सहदेवा वलाभेदः, पीतपुष्पा काङ्कहि इति लोके। विश्वदेवा गाङ्गेरुकी गुड़शर्करेति लोके, अन्ये सितकुसुमां वलामाहुः। अभिषुत्य पेषयित्वा न निष्ठीवेन्न थुत् कुर्य्यात्। चकारादलब्धगर्भायाः सर्व्वमेव लक्ष्मणादीनां नस्यदानं सहस्राभि-कृत्वः गर्भग्रहणाय पश्चाद् ग्राम्यधर्म्मसेवनमिति। तदुक्तं तन्त्रान्तरे। "पूर्व्व-मौषधं सहस्राभिहुतं कृत्वा माङ्गल्यदेशे गोः क्षीरेण पेषयित्वा त्रीन् विन्दून् दक्षिणे नासापुटे दद्यात्। न निष्ठीवेत्तान् कण्ठप्राप्तान् सा पञ्चदिनानि पयसोदनमश्नीयात् तदूर्द्धं ग्राम्यधर्म्मसेवनमिति। लब्धगर्भायाश्च लक्ष्म-णादि-नस्यदानं गर्भस्थापनार्थं स्थितगर्भायाश्च मासत्रयाल्पान्तरे पुत्रापत्य-जननार्थं नस्यदानमिति॥ १३॥

ऋतुक्षेत्राम्बुबीजानां सामग्र्यादङ्कुरो यथा॥
एवं जाता रूपवन्तो महासत्त्वाश्चिरायुषः।
भवन्त्यृणस्य मोक्तारः सत्पुत्राः पुत्रिणो हिताः॥ १४॥

तत्र तेजोधातुः सर्व्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावब्धातुप्रायो भवति तदा गर्भं गौरं करोति पृथिवीधातुप्रायः कृष्णं पृथिव्याकाशधातुप्रायः कृष्णश्यामं तोयाकाशधातुप्रायो गौरश्यामं। यादृग्वर्णमाहारमुपसेवते गर्भिणी तादृग्वर्णप्रभवा भवतीत्येके भाषन्ते। तत्र दृष्टिभागमप्रतिपन्नं तेजो जात्यन्धं करोति। तदेव रक्तानुगतं रक्ताक्षं पित्तानुगतं पिङ्गाक्षं श्लेष्मानुगतं शुक्लाक्षं वातानुगतं विकृताक्षमिति॥ १५॥

नास्त्येकमेव शुक्रशोणितं गर्भजननं किन्तर्हि सामग्र्येणैवेति दर्शयन्नाह,—ध्रुवमित्यादि। यथा ऋतुक्षेत्राम्बुबीजानां सामग्र्यादनुपजातादङ्कुरो जायते। एवं ध्रुवं निश्चितं चतुर्णां ऋत्वादीनां नैकद्वित्रिसंख्यानां विधिपूर्व्वकं सान्निध्यात् यथोक्तसंयोगात् गर्भो जायते। ऋतुरङ्गनाया रजःसमयः, क्षेत्रं गर्भाशयः, अम्बु पुनराहारपाकजो व्यापी रसधातुः। बीजं स्त्रीपुंसयोरार्त्तवशुक्रे। विधिपूर्व्वकस्य गर्भस्य फलं दर्शयन्नाह,—एवमित्यादि। रूपमत्रावयवसन्निवेशो लोचन-सुखप्रदः। सत्त्ववन्तो रजस्तमोभ्यामनभिभूताः। ऋणस्य मोक्तार इति पितॄणामृणत्रयमोचनशीलाः। सत्पुत्रा इति साधवः पुत्राः॥ १४॥

एवम्विधपूर्व्वजन्मना रूपवत्त्वमुक्त्वा रूपञ्च तैजसवर्णादिप्रभा स्वरत्वमतो वर्णसम्भवहेतुं दर्शयन्नाह,—तत्रेत्यादि। तेजोधातुस्तेजोभूतं। वर्णानां प्रभवः कारणं सतेजोधातुर्गर्भोत्पत्तौ गर्भाधानकाले। यदा अब्धातुप्रायो भवति आप्यधातुबहुलो भवतीत्यर्थः। एकीयमतमाह,—यादृगित्यादि। तेजोधातु रूपवर्णप्रसङ्गेन तन्मयाद्यधिष्ठानविकृत्या जात्यन्धरक्तपिङ्गशुक्लविकृताक्षाणां सम्भवं दर्शयन्नाह,—तत्र दृष्टीत्यादि। चतुर्थे मासि कस्यचित् पूर्व्व-

भवन्ति चात्र।

घृतपिण्डो यथैवाग्निमाश्रितः प्रविलीयते।
विसर्पत्यार्त्तवं नार्य्यास्तथा पुंसां समागमे॥
वीजेऽन्तर्व्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ।
यमावित्यभिधीयेते धर्म्मेतरपुरःसरौ॥ १६॥
पित्रोरत्यल्पवीजत्वादासेक्यः पुरुषो भवेत्।
स शुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयं॥

कर्म्मवशात्तद् दृष्टिभागं चक्षुरिन्द्रियाधिष्ठानमप्रतिपन्नमप्राप्तं तेजो जात्यन्धं जन्मान्धं करोति॥ १५॥

ननु पुराणमार्त्तवमुपचयाद् दिनत्रयं स्रुत्वा स्वयमेव विनिवृत्तं नूतनं तुल्यं स्थानीभूतमिव प्रवर्त्तितुमक्षमं तत् कथमार्त्तवसञ्चारो येन तत्-संसृष्टं शुक्रं गर्भजननसमर्थं भवतीत्याशङ्क्याह,—गर्भाशयमनुप्रतिपाद्यत इत्यग्रे वक्तव्यमुपनश्यत इत्याशङ्क्याह,—घृतेत्यादि। पुंसा समागम इति पुंसां समागमे इन्द्रियद्वयसंघर्षजेनोष्मणा विलीनमार्त्तवं विसर्पति। तच्च विसर्पितं शुक्रोपगतं गर्भाशयमनुप्राप्तं जीवोपगतं गर्भसम्भवहेतुर्भवति। आर्त्तवं ऋतुकालजं शोणितं, शुक्रमप्यासां पुंसां समागमे चरति न तु तद्-गर्भोपयोगीति तत्चरणप्रतिपादनं न युक्तं। तथा च वृद्धवाग्भटः। "योषितोऽपि स्रवत्येव शुक्रं पुंसां समागमे। तन्न गर्भस्य किञ्चित्तु करोतीति न चिन्त्यते"। गर्भद्वयोत्पत्तिहेतुमाह,—वीज इत्यादि। धर्म्मेतरपुरःसरौ धर्म्माधर्म्मपुरोगामिनौ। गयी तु। धर्म्मेतरोऽधर्म्मः तत्पुरःसरौ अधर्म्म-गामिनौ न तु धर्म्मपुरःसरौ। यतः श्रुतिस्मृतिष्वधर्म्मादेव यमोत्पत्तिरिष्टा। अतएव तदुत्पत्तौ प्रायश्चित्तमप्युपदिष्टमिति व्याख्याति॥ १६॥

पित्रोरित्यादि। पित्रोरत्यल्पवीजत्वात् आसेक्यो नाम पुरुषो जायते स शुक्रं प्राश्येति स पुरुषो निजमुखेन व्यवायं कारयित्वा ततः सिक्तं शुक्रं प्राश्य आस्वाद्य ध्वजोच्छ्रायं आसेक्यनामायं षण्डो मुखयोन्यपरपर्य्यायः।

य: पूतियोनौ जायेत स सौगन्धिकसंज्ञित: ।
स योनिशेफसोर्गन्धमाघ्राय लभते बलं ॥
स्वे गुदेऽब्रह्मचर्य्याद्य: स्त्रीषु पुंवत् प्रवर्त्तते ।
कुम्भीक: स च विज्ञेय ईर्ष्यकं शृणु चापरं ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये य: प्रवर्त्तते ।
ईर्ष्यक: स च विज्ञेय: षण्डकं शृणु पञ्चमं ॥ १७ ॥
यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते ।
तत: स्त्रीचेष्टिताकारो जायते षण्डसंज्ञित: ॥
ऋतौ पुरुषवच्चापि प्रवर्त्तेताङ्गना यदि ।
तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता ॥

य: पूतियोनावित्यादि । योनिसेफसोर्गन्धमाघ्राय सिद्धिला अयं सौगन्धिक-नामा षण्डो नासायोन्यपरपर्य्याय: । स्वे गुद इत्यादि । पुरुषवद्व्यवायं करोति स कुम्भीकनामा षण्डो ज्ञेय: । अन्ये तु प्रथमं स्त्रीषु विषये तासामेव स्वकीयगुदविवरे पशुवत् पृष्ठभागे शिथिलेनैव मेहनेन प्रवर्त्तते । किं निमित्तमेतदित्याह,—ब्रह्मचर्य्यात् क्लैब्यात् सञ्जातशुक्रस्याप्रवृत्तित्वात् । यतस्तस्यानया विप्रकृत्या ध्वजोच्छ्राय: सञ्जायते । स एव स्त्रीषु पुरुषवत् प्रवर्त्तते स कुम्भीकनामा नपुंसकभेद: गुदयोनिरयं । अस्योत्पत्तिहेतुस्तन्त्रा-न्तरे वर्णितो यथा—"मातुर्व्यवायं प्रतियोनिवर्त्ती स्याद्बीजदौर्ब्बल्यतया पितुश्च" । गयी तु कुम्भीकोत्पत्तिहेतौ काश्यपोक्तं श्लोकमाह,—यथा "अरजस्कां यदा नारीं स्रेमरेता व्रजेदृतौ । अन्यसक्ता भवेत् प्रीतिर्ज्जायते कुम्भिलस्तदेति" । ईर्ष्यकं शृणु चापरमिति । दृग्योनिरयं ईर्ष्यकापर-पर्य्याय: । अत्रापि तन्त्रान्तरपठितो हेतुर्यथा । ईर्ष्याभिभूतावपि मन्दहर्षौ वीजाह्वयस्यापि वदन्ति हेतुमिति ॥ १७ ॥

षण्डकं शृणु पञ्चममित्यादि । य: पुमान् मोहवशादृतौ भार्य्याविषये अङ्गनावदुत्तानो भूत्वा व्यावायेति । तत; स्त्रीचेष्टिताकार: षण्डो जायते । स

आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा।
सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः॥
अनया विप्रकृत्या तु तेषां शुक्रवहाः सिराः।
हर्षात् स्फुटत्वमायान्ति ध्वजोच्छ्रायस्ततो भवेत्॥
आहाराचारचेष्टाभिर्य्यादृशीभिः समन्वितौ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः॥
यदा नार्य्यावुपेयातां वृषस्यन्त्यौ कथञ्चन।
मुञ्चन्त्यौ शुक्रमन्योऽन्यमनस्थिस्तत्र जायते॥
ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत्।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणं।
कललं जायते तस्या वर्ज्जितं पैतृकैर्गुणैः॥ १८॥

पुमान् स्त्र्याकृतिः स्त्रीचेष्टितश्च स्त्रीवदधोभूतः स्वमेढ्रस्योर्द्ध्वप्रदेशे अपरपुरुषात् शुक्रच्युतिं कारयति। नरषण्डं प्रदिश्य नारीषण्डं निर्दिशन्नाह,—ऋतावित्यादि। यत्र पुनरबला पुरुषमधः कृत्वा व्यापारं कुरुते तत्र कन्या भवति सा नरचेष्टिता सा स्त्रीरूपापि पुंवत् स्त्रियमारुह्य तद्योनौ स्वयोनिघर्षणं करोति। उक्तमेव सुखस्मरणाय संग्रहे श्लोकेन आसेक्य इत्यादि। यदि तेषां शुक्रमस्ति तत् किं षण्डत्वमुच्यते, इत्याशङ्क्याह,—अनयेत्यादि। विप्रकृत्येति विरुद्धया विशिष्टया वा प्रकृत्या एते पुरुषदोषाः योषितामप्येते एतद्दृष्ट्वा चरकेण नरनारी षण्डावित्युक्तेः, अनुक्तं कायवाङ्मनसां भेदस्य हेतुं दर्शयन्नाह,—यदेत्यादि। उपेयातां संयोगं कुर्य्यातां। वृषस्यन्त्यौ रतार्थिन्यौ, अनस्थिरिति ईषदर्थे नञ् तेन कोमलास्थि। ऋतुस्नातेत्यादि, आर्त्तवं ऋतुकालजं शुद्धशोणितं। कललं सिंघानप्रख्यं, पैतृकैर्गुणैरिति केशश्मश्रुलोमनखदन्तशिरास्नायुधमनीरेतः प्रभृतिभिः। इमौ द्वावपि श्लोकौ जेज्जटाचार्य्येण न पठितौ॥ १८॥

सर्पवृश्चिककुष्माण्डविकृताकृतयश्च ये।
गर्भास्त्वेते स्त्रियाश्चैव ज्ञेयाः पापकृता भृशं॥
गर्भो वातप्रकोपेण दौहृदे चावमानिते।
भवेत् कुब्जः कुणिः पङ्गुर्मूको मिण्मिण एव च॥
मातापित्रोस्तु नास्तिक्यादशुभैश्च पुराकृतैः।
वातादीनाञ्च कोपेन गर्भो विकृतिमाप्नुयात्॥
मलाल्पत्वादयोगाच्च वायोः पक्वाशयस्य च।
वातमूत्रपुरीषाणि न गर्भस्थः करोति हि॥
जरायुणा मुखे छन्ने कण्ठे च कफवेष्टिते।
वायोर्म्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति॥
निश्वासोच्छ्वाससङ्क्षोभस्वप्नान् गर्भोऽधिगच्छति।
मातुर्निश्वसितोच्छ्वाससङ्क्षोभस्वप्नसम्भवान्॥

सर्पेत्यादि। सर्पादिरूपा ये गर्भा स्त्रियास्ते पापकृताः पापकृत्यादि ता ज्ञेयाः। ननु मानुषशरीरात् कथं सर्पादीनामुत्पत्तिरित्याह,—पापकृता-भृशमिति कर्म्मजमेवमेतद्वैचित्र्यमित्यर्थः। इदानीं गर्भस्थकुमारादीन् दृष्टेव वातादिदोषदुष्टिहेतुञ्च निर्द्दिशन्नाह,—गर्भ इत्यादि। दौहृदे चावमानित-इति गर्भिण्याः श्रद्धायां खण्डितायां कुणिर्व्विकलपाणिः। किमात्मीयेनैवा-शुभेन कर्म्मणा गर्भ एवंविधो भवति उतान्यापराधादपीत्याशङ्क्याह,—मातापित्रोरित्यादि। नास्तिक्यादिति नास्तिपरलोक इत्यादि मतिर्य्येषां ते नास्तिकाः, तेषां भावो नास्तिक्यं, तस्मात्। अथ कस्माद्गर्भाशयस्थो वाता-दिकं न करोतीत्याह,—मलाल्पत्वादित्यादि। वायोः अयोगादिति नञ् ईषदर्थे तेनेषद्योगात्। जरायुना मुख इत्यादि। वायोर्म्मार्गनिरोधादिति। दोषजनकस्य वायोर्म्मार्गनिरोधादित्यर्थः। निश्वासादिरूपस्य तु वायो-र्निःसरणमार्गं वक्ष्यति यतस्तदभावे जीविताभाव एव भवति गर्भस्य। निश्वास इत्यादि। संक्षोभः संचलनं। मातुर्य्याश्चेष्टा निश्वासादिकाः

सन्निवेशः शरीराणां दन्तानां पतनोद्भवौ।
तलेष्वसम्भवो यश्च रोम्णामेतत् स्वभावतः॥
भाविताः पूर्व्वदेहेषु सततं शास्त्रबुद्धयः।
भवन्ति सत्वभुयिष्ठाः पूर्व्वजातिस्मरा नराः॥
कर्म्मणा चोदितो येन तदाप्नोति पुनर्भवे।
अभ्यस्ताः पूर्व्वदेहे ये तानेव भजते गुणान्॥ १८॥

कुरुते ता गर्भोपि करोतीत्यर्थः। सन्निवेशः शरीराणामित्यादि शरीरावयवादीनां चरणादीनां संनिवेशो रचनाविशेषः। तलेष्विति हस्तपादतलेषु इत्थं कार्य्यविशेषं निर्द्दिश्यात्मनो गुणभूताया हेवपि भावनावलविशेषेण विशेषं निर्द्दिशन्नाह,—भाविता इत्यादि। पूर्व्वदेहेष्वतिक्रान्तशरीरेषु सत्वः सततमनवरतं ये भाविताः शास्त्रभावनया भावितान्तःकरणास्ते शास्त्रबुद्धयो भवन्ति। तथा भाविता एव ये सत्वबहुलाः ते रजस्तमसो वा ववकयोरभावात् पूर्व्वं नातिक्रान्तामपि जातिस्मरन्ति काये योऽसौ शरीरसन्निवेशा तथा दोषकोपेन कुञ्ज खञ्जादिः तथाधिकृतमूकमिन्मिनत्वादि मनसि शास्त्रज्ञानपूर्व्वजातिस्मरणं सर्व्वमेव स्वभावादि सिद्धमपि कर्म्मण्येवेत्याह,—कर्म्मणेत्यादि। कुतस्तदाप्नोतीत्याह,—अभ्यस्ता इत्यादि॥ १८॥

इति शारीरस्थाने निवन्धसंग्रहे द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

अथातो गर्भावक्रान्ति शारीरं व्याख्यास्यामः।

सौम्यं शुक्रमार्त्तवमाग्नेयमितरेषामप्यत्र भूतानां सान्निध्य-

शुद्धशुक्रार्त्तवसम्भवाद्गर्भस्य शुक्रशोणितशुद्धेरनन्तरं गर्भावक्रमणं युज्यत इत्याह,—अथेत्यादि। अत्र हि शुक्रशोणितं गर्भाशयस्थमात्मप्रकृति विकार-

मन्यगुना विशेषेण परस्परोपकारात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च ॥ १ ॥

तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्वायुरुदीरयति। ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्त्तवेन ॥ २ ॥

ततोऽग्निसोमसंयोगात् संसृज्यमानो गर्भो गर्भाशयमनु-

मूर्च्छितं गर्भ इत्युच्यते तस्यावक्रान्तिः उपगमनमवतरणमिति यावत् गर्भावक्रान्तिः साम्मिन्नस्तीति पूर्व्ववच्छप्रत्ययलुकौ। गर्भस्य शुक्रार्त्तवमूलत्वाच्छुक्रार्त्तवयोः स्वरूपमाह,—सौम्यमिति। सौम्यं सोमगुणभूयिष्ठं, आग्नेयमग्निगुणभूयिष्ठं। ननु सर्व्वं पाञ्चभौतिकं तत्कथम्भूतद्वयेनारम्भ इत्याह,—इतरेषामित्यादि। इतरेषां पृथिवीवाय्वाकाशानां अणुना विशेषेण सूक्ष्मप्रकारेण सान्निध्यमाश्रितत्वमस्ति कुतइत्याह,—परस्परोपकारादित्यादि। भूजलाऽनलानिलाकाशानां धारणसंहननपरिणामव्यूहावकाशदानैः परस्परमुपकारस्तस्मात् यथा पार्थिवद्रव्ये पृथिव्याख्यं भूतं बलवदेकं शेषाणि सलिलादीनि चत्वारि दुर्व्वलानि आश्रयदानेनानुगृह्णाति द्रव्यान्तरे तु सलिलादिभिरपि चतुर्भिर्व्वलवद्भिः दुर्व्वलं पृथिवीभूतमनुगृह्यते। एवम्विधात् परस्परानुग्रहाच्च परस्परानुप्रवेशाच्च अन्योन्यानुप्रविष्टानि सर्व्वाण्येतानि निर्द्दिशेदित्यनेन प्रागेव प्रतिपादितस्तस्मात् ॥ १ ॥

इदानीं शुक्रार्त्तवयोः स्वरूपमभिधाय गर्भावतरणप्रक्रियामाह,—तत्रेत्यादि। तत्रेति वाक्योपक्रमे संयोगे विशिष्टस्पर्शेच्छा समारब्धप्रयोगः। तेजः स्त्रीपुरुषेन्द्रियद्वयसंघर्षजउष्मान वायुरुदीरयति, उत्कटं करोति ततस्तदनन्तरं तेजोऽनिलसन्निपातात् शुक्रं च्युतमिति सुखलक्षणव्यायामजोष्मविलीनं विद्रुतमनिलाच्च्युतमित्यर्थः। योनिमभिप्रतिपद्यत इति योनिमभितः सर्व्वतः प्रतिपद्यते तेन योनेस्तृतीयावर्त्तावस्थितगर्भशय्यां प्रतिपद्यत इत्यर्थः। तत्र प्रागुक्तप्रकारविसर्पितेनार्त्तवेन च संसृज्यते ॥ २ ॥

तस्य शुक्रार्त्तवस्य पञ्चात्मकस्य षष्ठचेतनाधातुसंयोगेनैव गर्भत्वमिति

प्रतिपद्यते। क्षेत्रज्ञो वेदयिता स्प्रष्टा घ्राता द्रष्टा श्रोता रसयिता पुरुषः स्रष्टा गन्ता साक्षी धाता वक्ता योऽसावित्येवमादिभिः पर्य्यायवाचकैर्नामभिरभिधीयते दैवसंयोगादक्षयो-

ततसंयोगं दर्शयन्नाह,—तत इत्यादि। तस्मादग्निसोमसंयोगादन्वक्षं तत्क्षणमेव लक्षणान्तरे। क्षेत्रज्ञः पञ्चमहाभूतशरीरक्षेत्रवित् कर्म्मपुरुषो गर्भाशयं गर्भाकाशं अनुप्रतिपद्यते प्राप्नोति। केन सह भूतात्मना भौतिकशरीरेण सूक्ष्मेण लिङ्गशरीरेणेत्यर्थः। कीदृशः संयुज्यमानः, कैः सत्वरजस्तमोभिः प्राकृतैर्गुणैः। पुनः किं विशिष्टं? देवासुरैरपरैश्च भावैर्व्वायुनाभिप्रेर्य्यमाणः भावः सत्वं मन इत्यर्थः, तेन देवादीनां सप्तानां सप्तभिः सात्विकैर्भावैः, असुरादीनां षणां षड्भिः राजसैर्भावैः, अपरैश्च पश्वादिभिस्त्रिभिस्तामसैर्भावैः। सत्वस्य च मनःपर्य्यायस्य प्रेरकत्वं तन्त्रान्तरे प्रतिपादितं। तदुक्तं चरके। अस्ति खलु सत्वमौपादिकं। यज्जीवस्पृक् शरीरेणाभिसंबध्नाति। ननु कः क्षेत्रज्ञो य एवम्विधः सन् गर्भाशयमनुप्रतिपद्यत? इत्याह,—योऽसावित्येवमादिभिः पर्य्यायवाचकैर्नामभिरभिधीयते महर्षिभिरिति शेषः। यः क इति सर्व्वनामपदद्वयं तस्य दुर्व्बोधत्वज्ञापनार्थं। असाविति सर्व्वनामपदं, तस्य सर्व्वगतत्वं सद्गुरूपदिष्टत्वञ्च ज्ञापयति। इत्येवमादिभिः कैर्नामभिरित्याह,—वेदयितेत्यादि। वेदयिता मनसो ज्ञापयिता, इन्द्रियाणाञ्च पञ्चानामयमेव ज्ञापक इति। दर्शयन्नाह,—स्प्रष्टेत्यादि। स्पर्शनेन्द्रियस्य स्पर्शबोधहेतुत्वात्। एवं घ्रातेत्यादिष्वपि योज्यं। अस्य कर्म्मपुरुषस्यानाधारां स्थितिं निराकुर्व्वन्नाह,—पुरुष इति। पुरी भौतिकशरीरे वसतीति पुरुषः। तस्य सुकृतिफलभोक्तृत्वं दर्शयन्नाह,—स्रष्टाचेतनया न तस्यैवाकरत्वात्। तदुक्तं चरके। चेतनावान् यतश्चात्मा न कर्त्तव्या निरुच्यते। गन्ता संसरणशीलः। तथा साक्षीत्वात् तथा धाता शरीरादिसंयोगधारणहेतुत्वात्। वक्ता वदत्ये[illegible] मेव, एतेन कर्म्मेन्द्रियाणामपि वचनादानविहरणोत्सर्गादेश्चाप्ययमेव हेतुः यदि वेदयितेत्यादि स्वरूपोपेतः परमर्षिभिरभिधीयते तत् कथं क्लेश[illegible]

ऽव्ययोऽचिन्त्यो भूतात्मना सहान्वक्तं सत्वरजस्तमोभिर्द्दैवासुरैरपरैश्च भावैर्व्वायुनाभिप्रेर्य्यमाणो गर्भाशयमनुप्रविश्यावतिष्ठते ॥२॥

तत्र शुक्रबाहुल्यात् पुमानार्त्तवबाहुल्यात् स्त्री साम्यादुभयोर्नपुंसकमिति । ऋतुस्तु द्वादशरात्रं भवति दृष्टार्त्तवः ।

अदृष्टार्त्तवाप्यस्तीत्येके भाषन्ते ।

भवन्ति चात्र ।

पीनप्रसन्नवदनां प्रक्लिन्नात्ममुखद्विजां ।
नरकामां प्रियकथां स्रस्तकुक्ष्यक्षिमूर्द्धजां ॥

कारिणि गर्भाशये तिष्ठतीत्यशङ्काह,—दैवसंयोगादिति दैवस्य प्राक्तनजन्मकर्म्मणो धर्म्माधर्म्माभिधानस्य सम्बन्धात् । अक्षयोऽव्ययोऽचिन्त्योऽपि गर्भाशयमनुप्रविश्यावतिष्ठते । गर्भाशये कर्म्मवशात् गर्भभावेनावस्थितिं करोति ॥ २ ॥

कथमविशिष्टकारणाद्विशिष्टकार्य्योत्पाद इत्याह,—तत्रेति । ननु शुक्रबाहुल्यात् पुमानिति कस्मादुक्तं यत आर्त्तवस्यैव बाहुल्यं, उक्तं ह्यार्त्तवं हि चतुरञ्जलिप्रमाणं, शुक्रन्तु प्रसृतिमात्रमिति, नैवं यावन्मात्रमार्त्तवं गर्भाशयावस्थितं मलरहितं गर्भजननं तावदेव ग्राह्यं । अथवा स्वमाणापेक्षया शुक्रशोणितयोर्व्बाहुल्यमत्र चाभिप्रेतं । शुक्रन्तु कदाचिदत्यन्तं हर्षवशाद्बहुस्रवति कदाचिद्वैमनस्यादल्पमिति । अन्येत्वाचार्य्या एवं ब्रुवन्ति शुक्रार्त्तवयोर्न्यूनाधिकसमत्वं वीर्य्येण भवति । यद्येवं तर्हि प्रागुक्तं पुत्रीयकरणं निरर्थकं नैतदस्ति किन्तु श्रेयसा कर्म्मणा विना नैव रूपादिसङ्गिनो भवन्ति पुत्राः । उक्तं हि "एवं जाता रूपवन्तः सत्ववन्तश्चिरायुषः भवन्त्यृणस्य मोक्तारं सत्पुत्राः पुत्रिणे हिताः" । तस्मात् पुत्रीयकरणं सार्थकमेव । स्त्रीपुंसयोः संयोगो यस्मिन् कालेऽपत्यफलप्रदो भवति तत्कालविशेषमाह । ऋतुरित्यादि । दृष्टमार्त्तवं यस्मिन् काले स दृष्टार्त्तवः कालः ऋतुः, स च द्वादशरात्रं भवति । द्वादशमिति षोड़शदिनेषु मध्ये आद्यन्दिनत्रयमस्ति-

स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचं।
हर्षौत्सुक्यपराञ्चापि विद्यादृतुमतीमिति ॥ ४ ॥
नियतं दिवसेऽतीते सङ्कुचत्यम्बुजो यथा।
ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा ॥
मासेनोपचितं काले धमनीभ्यान्तदार्त्तवं।
ईषत्कृष्णं विगन्धञ्च वायुर्योनिमुखं नयेत् ॥
तद्वर्षात् द्वादशात् काले वर्त्तमानमसृक् पुनः।
जरापक्वशरीराणां याति पञ्चाशतः क्षयं।

मत्र षोड़शं योनिसङ्कोचदिनं गणनीयं। एकीयमतमाह,—अदृष्टेत्यादि। अदृष्टार्त्तवाया ऋतुमत्या लक्षणमाह,—पीनेत्यादि, प्रक्लिन्ना प्रकर्षेण क्लेदमापन्ना आस्यादयो यस्याः। आस्या देहः देहस्यात्यन्तक्लेदज्ञापनाय मुखस्य पुनरुक्तिः। द्विजशब्देन द्विजसमीपवर्त्तिनो दन्तवेष्टका अभिप्रेताः। द्विजानां प्रक्लेदासम्भवात्। हर्षौत्सुक्यं रतौ सातिशयोऽभिलाषः ॥ ४ ॥

योनिसङ्कोचेन वीजस्य गर्भाशयाप्राप्तिं दर्शयन्नाह,—नियतमिति। योनि गर्भाशयः, संव्रियते सङ्कोचं याति। अतएव वीजं न प्रविशति। मासेनेत्यादि काले द्वादशवर्षादौ षष्ट्याव्वीक्। अन्ये पञ्चाशद्वर्षाणि यावत्। तमेव कालं निर्द्दिशन्नाह,—तद्वर्षाद् द्वादशादिति तदार्त्तवं द्वादशवर्षादूर्द्ध्वं वर्त्तमानमुपचीयमानशरीरधातूनां योषितां काले मासि मासि प्रवर्त्तमानं तासामेव पञ्चाशत ऊर्द्ध्वं जरापचीयमानशरीरधातूनां क्षयं यातीति शेषः। तस्मिन्नृतुकालेऽपि समविषमदिवसयोः पुंस्त्रियोर्ज्जन्म दर्शयन्नाह,—युग्मेष्वित्यादि। युग्मेष्विति समेषु, अन्यथेति विषमेषु दिवसेषु, शुचिः कायशुचिः। ननु प्रागुक्तं शुक्रवाहुल्यात् पुमानार्त्तववाहुल्यात् स्त्रीति-किमयं विकल्प उक्तं उत समुच्चय इति समुच्चयोऽयं। तदुक्तं विदेहे "युग्मेषु तु दिनेष्वासां भवत्यल्पतरं रजः। संयोगं तत्र या गच्छेत् सा पुमांसं प्रसूयते। अयुग्मेषु दिनेष्वासां भवेद्बहुतरं रजः। संयोगं तत्र यो

युग्मेषु तु पुमान् प्रोक्तो दिवसेष्वऽन्यथाऽवला।
पुष्पकाले शुचिस्तस्मादपत्यार्थी स्त्रियं व्रजेत्॥ ५॥

तत्र सद्यो गृहीतगर्भाया लिङ्गानि,—श्रमो, ग्लानिः, पिपासा, सक्थिसदनं, शुक्रशोणितयोरववन्धः, स्फुरणञ्च योनेः।

स्तनयोः कृष्णमुखता रोमराज्युद्गमस्तथा।
अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः॥
अकामतश्छर्द्दयति गन्धादुद्विजते शुभात्।
प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते॥

तदा प्रभृत्येव व्यायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयमुत्कुटुकासनं चैकान्ततः स्नेहादिक्रियां शोणितमोक्षणं चाकाले वेगविधारणञ्च न सेवेत।

दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते॥

तत्र प्रथमे मासि कललं जायते। द्वितीये शीतोष्णानिले-

गच्छेत् सा तु कन्यां प्रसूयते"। तथा भोजेऽपि "अयुग्मे स्त्री पुमान् युग्मे संध्यायान्तु नपुंसकं। शुक्राधिकत्वात् पुरुषः प्रमदा रजसोऽधिकात्। शुक्रशोणितयोः साम्यात्तृतीया प्रकृतिर्भवेदिति" परिहार्य्ये परिहारार्थं॥ ५॥

सद्यो गृहीतगर्भलक्षणं निर्द्दिशन्नाह,—तत्र सद्यो गृहीतेत्यादि। श्रमः, खेदः, सक्थिसदनमुरुग्लानिः, अववन्धः अप्रवृत्तिः, स्फुरणं कम्पनं। उत्तरकालीनं गृहीतगर्भाया लक्षणमाह,—स्तनयोरित्यादि। प्रसेकः थूत्करणं। तदेत्यादि—अकालशब्द एतत् ज्ञापयति काले अष्टमे मासि गर्भिण्याऽपि स्नेहादिक्रियान्तर्गते आस्थापणानुवासनीये। तत्र प्रथमे कललं सिङ्घानप्रख्यं। द्वितीय इति। शीतः श्लेष्मा, उष्णं पित्तं, कफानिलयोरप्युष्म-

रभिप्रपच्यमानानां महाभूतानां सङ्घातो घनः सञ्जायते यदि पिण्डः पुमान्, स्त्री चेत् पेशी, नपुंसकञ्चेदर्व्वुदमिति। तृतीये हस्तपादशिरसां पञ्च पिण्डका निर्व्वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति। चतुर्थे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति गर्भहृदय प्रव्यक्तभावाच्चेतनाधातुरभिव्यक्तो भवति कस्मात्तत्स्थानत्वात्तस्माद्गर्भश्चतुर्थे मास्यभिप्रायमिन्द्रियार्थेषु करोति द्विहृदयाञ्च नारीं दौहृदिनीमाचक्षते। दौहृदविमाननात् कुब्जं कुणिं खञ्जं जड़ं वामनं विकृताक्षमनक्षं वा नारी सुतं जनयति। तस्मात् सा यद्यदिच्छेत्तत्तस्यै दापयेत्। लब्धदौहृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्त्रं जनयति॥ ६॥

भवन्ति चात्र।

इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी।
गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्॥

सम्भवात् परिणामहेतुत्वं तदुक्तं चरके। "भौमाप्याग्नेयवायव्याः पञ्चोष्माणः स नाभसा" इति। घनः कठिनः। यदीत्यादि, पिण्डो वर्त्तुलाकृतिः। पेशी दीर्घाकृतिः। अर्व्वुदं वर्त्तुलफलार्द्धमिति। गयी तु भोजदर्शनात् पिण्डादीनामन्यथाकारं पठति यथा "चतुरस्रा भवेत् पेशी वृत्तः पिण्डोघनः स्मृतः शाल्मलीमुकुलाकारमर्व्वुदं परिचक्षत" इति। तृतीय इति। शाखाश्चतस्रो मूर्द्धोरःपृष्ठोदराण्यङ्गानि चिवुकनासौष्ठश्रवणाङ्गुलिपार्ष्णिप्रभृतीनि प्रत्यङ्गानि। चतुर्थ इति, तत्स्थानत्वात् हृदयस्थानत्वात्, इन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः। द्विहृदयामिति द्वितीयं हृदयं यस्याः सा द्विहृदया तां। दौहृदेत्यादि। कुणिं विकृतहस्तं, तत्र कुब्जादिष्ववयवसमुदायेन्द्रियाधिष्ठानजो दौहृदविमाननजनितो यथा शास्त्रमूह्यः॥ ६॥

गद्योक्तमेवार्थं पद्येराह,—भवन्तीति भोक्तुमित्यस्योपलक्षणत्वात् द्रष्टुं

सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितं।
अलब्धदौहृदा गर्भे लभेतात्मनि वा भयं॥
येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना।
प्रजायेत सुतस्यार्त्तिस्तस्मिंस्तस्मिंस्तथेन्द्रिये॥
राजसन्दर्शने यस्या दौहृदं जायते स्त्रियाः।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते॥
दुकूलपट्टकौशेयभूषणादिषु दौहृदात्।
अलङ्कारैषिणं पुत्रं ललितं सा प्रसूयते॥
आश्रमे संयतात्मानं धर्म्मशीलं प्रसूयते।
देवताप्रतिमायान्तु प्रसूते पार्षदोपमम्॥
दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते॥
गोधामांसाऽशने पुत्रं सुषुप्सुं धारणात्मकम्।

श्रोतुमित्यादिकमपि बोद्धव्यं। सम्प्राप्तेत्यादि,—अलब्धदौहृदा अप्राप्ताभिलषितपादार्था। गर्भे गर्भविषये, भयं लभेत्, आत्मनि वा आत्मविषये वाऽभयं लभेत प्राप्नुयात्। येष्वित्यादि—येषु येष्विन्द्रियार्थेषु शब्दादिषु दौहृदे श्रद्धायां विमानना खण्डितत्वं तस्मिंस्तस्मिन्निन्द्रिये तस्य तस्येन्द्रियार्थस्य ग्राहके इन्द्रिये सुतस्यार्त्तिः पीड़ा प्रजायते। इदानीं दौहृदविशेषैर्गुणविशेषाक्रान्तानामपत्यानामुत्पत्तिं सूचयन्नाह,—राजसन्दर्शनेत्यादि। महाभागं महापुण्यवन्तं। दुकूलमित्यादि। दुकूलपट्टं पट्टवस्त्रं। कौशेयं क्रिमिकोशोत्थं। भूषणानि मुक्ताहारप्रभृतीनि, ललितं शृङ्गारचेष्टायुक्तं। दुकूलपट्टकौशेयमिति केचित् पठन्ति, तत्र दुकूलं सूक्ष्मं वस्त्रं, पट्टं पट्टवस्त्रं, आश्रमे यस्येति आश्रमे पस्विनामधिष्ठाने श्रद्धा भवेत्। सा एवम्भूतं जनयेदिति पिण्डार्थः। संयतात्मानं संयतेन्द्रियं। देवताप्रतिमेत्यादि पार्षदोपममिति पार्षदेषु सभापुरुषेषूपमा यस्य स तथा तं सभ्यसमं। दर्शने इति व्याला व्याघ्रादयो हिंस्राः पशवः। गोधेत्यादि—सुषुप्सुं सुप्तमिच्छुं, धारणा-

गवां मांसे च वलिनं सर्व्वक्लेशसहन्तथा॥
माहिषे दौहृदाच्छूरं रक्ताचं लोमसंयुतम्।
वराहमांसात् स्वप्नालुं शूरं सञ्जनयेत् सुतम्॥
मार्गाद्विक्रान्तजङ्घालं सदा वनचरं सुतम्।
सृमराद्विग्नमनसं नित्यभीतञ्च तैत्तिरात्॥
अतोऽनुक्तेषु या नारी समभिध्याति दौहृदम्।
शरीराचारशीलैः सा समानं जनयिष्यति॥
कर्म्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्।
यथा तथा दैवयोगाद्दौहृदं जनयेत् हृदि॥ ७॥

पञ्चमे मनः प्रतिवुद्धतरं भवति। षष्ठे वुद्धिः। सप्तमे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरः। अष्टमेऽस्थिरीभवत्योजस्तत्र जातश्चेन्न जीवेन्निरोजस्त्वान्नैरृतभागत्वाच्च ततो वलिं मांसौदनमस्मै दापयेत्। नवमदशमैकादशद्वादशानामन्यतमस्मिन् जायते। अतोऽन्यथा विकारी भवति।

मकं हृदयगृहीतवस्तूनाममोचकं। गवामित्यादि—वराहमांसादिति अभिलषितादिति शेषः। मार्गेत्यादि। मार्गादिति मृगमांसात्, विक्रान्तमुद्योगिनं, जङ्घालं वेगवन्तं, सृमरादिति—सृमरो महाशूकरः, अन्ये महाश्वाकारश्चमरालूकः। शील शीलवन्तं। नित्यशीलञ्च तैत्तिरामित्यत्र नित्यभीतञ्च तैत्तिरादित्यपरे। अनुक्तदौहृदसंग्रहार्थं श्लोकमाह,—अतोऽनुक्तेष्विति यादृशेषु दौहृदं श्रद्धामभिध्याति चेतसि करोति तेन समानमित्यर्थः। कर्म्मणेत्यादि। दैवयोगात् दौहृदं हृदि तथा जनयेत्। यथा पुनर्ज्जन्तोः कर्म्मणा चोदितं प्रेरितं भवितव्यं भवेत्॥ ७॥

पञ्चम इति। प्रतिवुद्धतरं जागर्त्तीत्यर्थः। षष्ठ इति। ओजः अशेषधातुधामहृदि स्थितं। नैरृतभागत्वात् रचसा मांसत्वात् नैरृताय भागश्च

मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाड़ी प्रतिवद्धा साऽस्य मातुराहाररसवीर्य्यमभिवहति। तेनोपस्नेहेनास्याभिवृद्धिर्भवति। असञ्जाताङ्गप्रत्यङ्गप्रविभागमानिषेकात् प्रभृति सर्व्वशरीरावयवानुसारिणीनां रसवहानां तिर्य्यग्गतानां धमनीनामुपस्नेहो जीवयति॥

गर्भस्य हि सम्भवतः पूर्व्वं शिरः सम्भवतीत्याह शौनकः, शिरोमूलत्वाद्देहेन्द्रियाणाम्। हृदयमिति कृतवीर्य्यो, बुद्धेर्मनसश्च स्थानत्वात्। नाभिरिति पाराशर्य्यस्ततो हि वर्द्धते देहो देहिनः। पाणिपादमिति मार्कण्डेयस्तन्मूलत्वाच्चेष्टाया गर्भस्य। मध्यशरीरमिति सुभूतिर्गौतमस्तन्निवद्धत्वात् सर्व्वगात्रसम्भवस्य। तत्तु न सम्यक्। सर्व्वाङ्गप्रत्यङ्गानि युगपत् सम्भवन्तीत्याह धन्वन्तरिर्गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवत् चूतफलवच्च। तद्यथा। चूतफले परिपक्वे केशरमांसास्थि मज्जानः पृथग् दृश्यन्ते सूक्ष्मत्वात्तेषां केशरादीनां कालः प्रव्यक्ततां करोति। एतेनैव वंशाङ्कुरोऽपि व्याख्यातः। एवं गर्भस्य तारुण्ये सर्व्वे-

वा तेषु रुद्रेण दत्त इति कुमारतन्त्रे प्रतिपादितं। ततस्तस्मात् कारणादष्टमे मासि अस्मै नैऋताय वलिं दापयेत्। निराहारस्यापि गर्भस्य वर्त्तने हेतुं निर्द्दिशन्नाह,—मातुरित्यादि। मातुर्गर्भिण्या रसवहायां नाड्यां गर्भनाभिनाड़ि या प्रतिवद्धा, सा अस्य गर्भस्य मातृभुक्तमाहाररसवीर्य्यमभिवहति प्रापयतीत्यर्थः। नन्वङ्गप्रत्यङ्गप्रव्यक्तीभावे गर्भनाभिनाड़ीमातुराहाररसवीर्य्यमभिवहति। अङ्गप्रत्यङ्गप्रव्यक्तीभावात्तु पूर्व्वं कथं गर्भपुष्टिः स्यादित्याह,—असञ्जाताङ्गप्रत्यङ्गविभागमित्यादि। आनिषेकात् प्रभृतीति आसमन्ततो भावेन निषेचनमानिषेको योनौ शुक्रस्य निषेचनं तत्प्रभृति गर्भाधानं मर्य्यादीकृत्येत्यर्थः। धमनीनामुपस्नेहो जीवयति। यथा पूर्णसरः

ष्वङ्गप्रत्यङ्गेषु सत्स्वपि सौक्ष्म्यादनुपलब्धिः। तान्येव काल-प्रकर्षात् प्रव्यक्तानि भवन्ति ॥ ८ ॥

तत्र गर्भस्य पितृजमातृजरसजात्मजसत्वजसात्म्यजानि शरीरलक्षणानि व्याख्यास्यामः। गर्भस्य केशश्मश्रुलोमास्थिनख-दन्तसिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि। मांसशोणितमेदोमज्जहृन्नाभियकृत्प्लीहान्त्रगुदप्रभृतीनि मृदूनि मातृजानि। शरीरोपचयो बलं वर्णः स्थितिर्हानिश्च रस-जानि। इन्द्रियाणि ज्ञानं विज्ञानमायुः सुखदुःखादिक-ञ्चात्मजानि। सत्वजान्युत्तरं वक्ष्यामः। वीर्य्यमारोग्यं बल-वर्णौ मेधा च सात्म्यजानि।

तत्र यस्या दक्षिणे स्तने प्राक् पयोदर्शनं भवति दक्षि-णाक्षिमहत्वञ्च पूर्व्वञ्च दक्षिणं सक्थ्यूत्कर्षति बाहुल्याच्च पुन्नामधेयेषु द्रव्येषु दौहृदमभिध्यायति स्वप्नेषु चोपलभते

सलिलोपस्नेहः चत्वरे जात तरुकदम्बकं जीवयति प्राणधारणं करोति। तथाच भोजः "गर्भोत्पण्डि स्रोतांसि रसरक्तवहानि वै। रक्ताज्जरायुर्भवति नाड़ी चैव रसात्मिका। सा नाड़ी गर्भमाप्नोति तया गर्भस्य वर्त्तनं। यद् यदश्नाति मातास्य भोजनं हि चतुर्व्विधं। तस्मादन्नाद्रसीभूतं वीर्य्यं त्रिधा प्रवर्त्तते।" भागः शरीरं पुष्णाति स्तन्यं भागेन वर्द्धते गर्भः पुष्यति-भागेन वर्द्धते च यथाक्रमं गर्भं कुल्येव केदारं नाड़ी प्रीणाति तर्पितेति ॥ ८ ॥

तत्र गर्भस्येत्यादि। लक्ष्यन्त इति लक्षणानि कर्म्मणि युट् प्रत्ययः। तेन लक्षणीयानि ज्ञातव्यानीत्यर्थः। तान्येव ज्ञातव्यानि पितृमातृभ्यः कारणेभ्यः। प्रत्येकं निर्द्दिशन्नाह,—गर्भस्येत्यादि। आत्मजानीति, आत्म-सन्निधानजातानि, नत्वात्मनो जातानि आत्मनो निर्व्विकारस्य विकारजन-कत्वाभावात् प्रकृतिभावानुपपत्तेश्च। स्वाभाविकप्रकृतिभावेन मोक्षानुप-

पद्मोत्पलकुमुदाम्रातकादीनि पुन्नामान्येव प्रसन्नमुखवर्णा च भवति तां ब्रूयात् पुत्रमियं जनयिष्यतीति। तद्विपर्य्यये कन्यां। यस्याः पार्श्वद्वयमुन्नतम्पुरस्तान्निर्गतमुदरं प्रागभिहितलक्षणञ्च तस्य नपुंसकमिति विद्यात्। यस्या मध्ये निम्नं द्रोणीप्रभूतमुदरं सा युग्मं प्रसूयत इति ॥ ९ ॥

भवन्ति चात्र।

देवताब्राह्मणपराः शौचाचारहिते रताः।
महागुणान् प्रसूयन्ते विपरीतास्तु निर्गुणान् ॥
अङ्गप्रत्यङ्गनिर्व्वृत्तिः स्वभावादेव जायते।
अङ्गप्रत्यङ्गनिर्व्वृत्तौ ये भवन्ति गुणागुणाः ॥
ते ते गर्भस्य विज्ञेया धर्म्माधर्म्मनिमित्तजाः ॥ १० ॥

पत्तिः, तस्य हि तत् स्वभावतत्वभावस्योपरित्याज्यत्वादिति। आदिशब्दान्नानायोनिजन्मादिकञ्च। सत्वेत्यादि उत्तरत्र गर्भव्याकरणे। गर्भस्याप्रत्यक्षस्यापि स्तन्यदर्शनादिलक्षणेन स्त्रीपुंनपुंसकलक्षणानि निर्द्दिशन्नाह,—तत्रेत्यादि। प्रसन्नमुखवर्णा चेत्यत्र चकारादूर्द्ध्वरोमराजित्वादीनि ग्राह्यानि, प्रागभिहितलक्षणमिति स्त्रीलक्षणं पुरुषलक्षणञ्च प्रतिपादितं। तत्द्वयमपि च भवति। यस्या मध्ये इति द्रोणीप्रभूतं द्रोणीसदृशं, जलद्रोणीजलक्षेपनी। अन्यत्राप्युक्तं "रोमराजी भवेन्निम्ना यस्या सा सूयते यमौ" ॥ ९ ॥ कायवाक्चित्तगुणवद्गर्भप्रसवज्ञानं दर्शयन्नाह,—देवतेत्यादि। स्वभावमीश्वरमित्यादिश्लोकेन या स्वभावादङ्गप्रत्यङ्गनिर्वृत्तिः सूचिता तां प्रतिपाद्य तन्निर्वृत्तौ प्राक्तनश्लोकाभिहितगुणागुणोपपत्तिं धर्म्माधर्म्महेतुतया निर्द्दिशन्नाह,—अङ्गप्रत्यङ्गेत्यादि ॥ १० ॥

इति शारीरस्थाने निवन्धसंग्रहे तृतीयोऽध्यायः।

चतुर्थोऽध्यायः ।

अथातो गर्भव्याकरणं नाम शारीरं व्याख्यास्यामः ।

अग्निः सोमो वायुः सत्त्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः ॥ १ ॥

तस्य खल्वेवम्प्रवृत्तस्य शुक्रशोणितस्याभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्त त्वचो भवन्ति । तासां प्रथमाऽव-

गर्भावक्रान्ति शारीरानन्तरमवक्रान्तस्य गर्भस्य व्याकरणार्हत्वात् गर्भव्याकरणं वक्तुं युज्यते इत्याह,—अथेति । गर्भव्याकरणं गर्भविवरणमित्यर्थः । तत्र प्राणा त्वक्‌कलादयश्च विवरणीयास्तेषु प्राणानामतीव देहस्थितिहेतुत्वात् प्रागुपादानमाह.—अग्निरिति, अग्निरत्र पाचकभ्राजकालोचकरञ्जकसाधकानां पाञ्चभौतिकानां सर्व्वधात्वनुगता । चोष्मनां शक्तिरूपतयावस्थितो वाचकोऽधिदैवत्वमापन्नो बोद्धव्यः । श्लेष्मरसशुक्रादीनां तोयात्मकानां भावानां रसनेन्द्रियस्य च शक्तिरूपतयावस्थितो मनसोऽधिदैवत्वमापन्नः सोम इति, वायुः पञ्चात्मकः प्राणादिभेदेन । सत्त्वरजस्तमांसि तु प्रकृतेरष्टरूपायागुणाः । इन्द्रियाणि श्रवणदर्शनस्पर्शनरसनघ्राणानीति । पञ्चभूतात्मा शुभाशुभकर्म्मभिः परिगृहीतः कर्म्मपुरुषः, एते चाग्निसोमादयः प्राणयन्ति जीवयन्तीति प्राणाः । तत्राग्निस्तावदाहारपाकादिकर्म्मणा प्राणयति । सोमश्च सौम्यधातोरोजः प्रभृतेः पोषणेन । वायुश्च दोषधातुमलादीनां सञ्चारणाच्छ्वासनिःश्वासाभ्याञ्च सत्त्वरजस्तमश्च मनोरूपतया परिणतं भूतात्मनः शरीरान्तरग्रहणमोचणे हेतुरिति तदपि प्राणयति । पञ्चेन्द्रियाणि चक्षुरादीनि रूपादिग्रहणकर्म्मणा प्राणयन्ति । एवं भूतात्मा कर्म्मपुरुषोऽप्यशेषस्यैव कर्म्मराशेराहनश्चेतनैरिति प्राणयति ॥ १ ॥

प्राणसद्भाव एव शुक्रशोणितस्य परिणामत्वेन त्वगादिसम्भव इत्यनन्तरं

भासिनी नाम या सर्व्ववर्णानवभासयति पञ्चविधाञ्च छायां प्रकाशयति सा व्रीहेरष्टादशभागप्रमाणा सिध्मपद्मकण्टकाधिष्ठाना द्वितीया लोहिता नाम षोड़शभागप्रमाणा तिलकालकन्यच्छव्यङ्गाधिष्ठाना तृतीया श्वेता नाम द्वादशभागप्रमाणा चर्म्मदलाजगल्लीमशकाधिष्ठाना चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना पञ्चमी वेदिनी नाम व्रीहिपञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना षष्ठी रोहिणी नाम व्रीहिप्रमाणा ग्रन्थपच्यर्व्वुदश्लीपदगलगण्डाधिष्ठाना सप्तमी मांसधरा नाम व्रीहिद्वयप्रमाणा भगन्दरविद्रध्यर्शोऽधिष्ठाना यदेतत्प्रमाणं निर्द्दिष्टं तन्मांसलेष्ववकाशेषु न ललाटे सूक्ष्माङ्गुल्यादिषु। यतो वक्ष्यत्युदरेषु व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढ़ं विध्यादिति। कलाः खल्वपि सप्त सम्भवन्ति धात्वाशयान्तरमर्य्यादाः ॥ २ ॥

त्वगादिव्याकरणं कुर्व्वन्नाह,—तस्येति। तस्य शुक्रशोणितस्य एवंप्रवृत्तस्य भूतात्माधिष्ठितस्य, तासामिति सर्व्ववर्णान् गौरादिकान्। अवभासयतीति भ्राजकेनाग्निनेति शेषः। पञ्चविधां पञ्चात्मिकां पञ्चभूतकृतत्वात्। चशब्दात् प्रभापि ग्राह्या। आसन्ना लक्ष्यते छाया प्रभा दूरात् प्रकाशत इति तयोर्भेदः। तस्यास्त्वचः प्रमाणं निर्द्दिशन्नाह,—सा व्रीहिविस्तारस्य विंशतिभागाः अवभासिन्या प्रमाणं, एवं वक्ष्यमाणेष्वपि विंशतिभागेषु षोड़शप्रभृतयो भागा बोद्धव्याः। एतेनैतदुक्तं भवति सप्तानां त्वचां समुदायेनाङ्गुष्ठोदरप्रमाणमस्ति। अङ्गुष्ठोदरन्तु विंशतितमो भागो न षड़्यवप्रमाणं। कला इति। दधतीति धातवो रसरक्तमांसादयः। कफपित्तपुरीषाण्यपि प्राकृतानि स्वकर्म्मणा दधतीति धातवः, तेषामाशयावस्थानप्रदेशा धात्वाशयाः तेषामन्तरेषु मर्य्यादा सीमाभूता इत्यर्थः ॥ २ ॥

भवतश्चात्र।

यथा हि सार: काष्ठेषु छिद्यमानेषु दृश्यते।
तथा धातुर्हि मांसेषु छिद्यमानेषु दृश्यते॥
स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा।
श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान्विदु:॥

तासां प्रथमा मांसधरा नाम यस्यां मांसे सिरास्नायुधमनीस्रोतसां प्रताना भवन्ति॥ ३॥

भवति चात्र।

यथा विसमृणालानि विवर्द्धन्ते समन्तत:।
भूमौ पङ्कोदकस्थानि तथा मांसे सिरादय:॥

द्वितीया रक्तधरा नाम मांसस्याभ्यन्तरतस्तस्यां शोणितं विशेषतश्च सिरासु यकृत्प्लीह्नोश्च भवति।

तासामन्त:स्थितत्वेनाप्रत्यक्षाणामस्तित्वं प्रत्युपमानं प्रमाणं निर्द्दिशन्नाह,—भवत इत्यादि। एतेन कला साधिष्ठानपृथग्धातूपलम्भकार्य्येनाव्यक्तमेव कलानामस्तित्वं साधितं भवेत्। तासामुपष्टम्भकं निर्द्दिशन्नाह,—स्नायुभिरित्यादि। कलाभागान् कलाविभागविशेषान् सन्ततान् सम्यक्प्रकारेण व्याप्तान् जरायुरुल्वाकारो येन वेष्टिता: प्राणिनो जायन्ते कलावेष्टकोऽपि तद्वदेव। इह वाग्भटेन कलास्वरूपमभिहितं यथा यस्तु धात्वाशयान्तरेषु क्लेदोऽवतिष्ठते यथास्वमूष्मभिर्व्विपक्व: स्नायुश्लेष्मजरायुच्छन्न: काष्ठइव सारो धातु रसशेषाल्पत्वात् कलासंज्ञ इति। तासामित्यादि। यस्यां कलायामधिष्ठिते मांसे शिरादीनां प्रताना विस्तारा भवति॥ ३॥

अमुमेवार्थं दृष्टान्तेन दृढ़यन्नाह,—यथा विसमृणाल इत्यादि। तथा प्रथमकलायां मांसस्था: शिरादयो भवन्ति। ननु रसान्तरं रक्तान्ततो-

भवति चात्र।

वृक्षाद्यथाभिप्रहतात् क्षीरिणः क्षीरमावहेत्।
मांसादेवं क्षतात् क्षिप्रं शोणितं सम्प्रसिच्यते॥

तृतीया मेदोधरा नाम मेदो हि सर्व्वभूतानामुदरस्थमणुस्थिषु च महत्सुच मज्जा भवति।

भवति चात्र।

स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रितः।
अथेतरेषु सर्व्वेषु सरक्तं मेद उच्यते॥
शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता॥

चतुर्थी श्लेष्मधरा नाम सर्व्वसन्धिषु प्राणभृतां भवति॥ ४॥

भवति चात्र।

स्नेहाभ्यक्ते यथात्वक्षे चक्रं साधु प्रवर्त्तते।
सन्धयः साधु वर्त्तन्ते संश्लिष्टाः श्लेष्मणा तथा॥

पञ्चमी पुरीषधरा नाम यान्तः कोष्ठे मलमभिविभजते पक्वाशयस्था।

मांसं तत्कथं प्रागेव मांसधरा पठिता ततो रक्तधरेति उच्यते, पोषणक्रमोऽयं नतु धारणे अतएव अस्यामित्याधारत्वेन कला निर्द्दिष्टाः। द्वितीया इत्यादि, अत्र दृष्टान्तेन दार्ष्टान्तिकं द्रढ़यन्नाह,—वृक्षादित्यादि। संप्रसिच्यते प्रस्रवतीत्यर्थः। तृतीयेति अणुस्थिषु अल्पास्थिषु। ननु मज्जा अस्थ्नामन्तर्भवति न तत्कथं मेदस्तदन्तरित्याह,—महत्स्वित्यादि। अणुस्थिषु मेदो महत्सु मज्जेति। गद्योक्तमर्थं श्लोकेन स्पष्टीकुर्व्वन्नाह,—स्थूलेत्यादि। इतरेषु अल्पास्थिषु सर्व्वेषु। ननु मेदोमज्जानुकारी उपधातुर्वसान्यः क? इत्याह,—शुद्धमित्यादि॥ ४॥

ष्टतस्य श्लेष्मणो गुणकर्म्माणि दर्शयन्नाह,—स्नेहेत्यादि। अक्ष इति

भवति चात्र।

यकृत्समन्तात् कोष्ठञ्च यथान्त्राणि समाश्रिता।
उण्डुकस्थं विभजते मलं मलधरा कला॥

षष्ठी पित्तधरा नाम या चतुर्व्विधमन्नपानमुपयुक्तमामाशयात् प्रच्युतं पक्वाशयोपस्थितं धारयति।

भवति चात्र।

अशितं खादितं पीतं लीढ़ं कोष्ठगतं नृणां।
तज्जीर्य्यति यथाकालं शोषितं पित्ततेजसा॥

सप्तमी शुक्रधरा नाम या सर्व्वप्राणिनां सर्व्वशरीरव्यापिनी॥ ५॥

चक्रच्छिद्रान्तर्गतकाष्ठमित्यर्थः। पञ्चमीत्यादि। यकृत्समन्तात् सर्व्वतः यकृदादिकं समाश्रिता। उण्डुकस्थं मलं विभजते तत्र यकृद्ग्रहणं रक्ताधारसाम्येन प्लीहा उपलक्षणं। यकृत् समीपानां हृदयादीनाञ्च उण्डुकग्रहणेन सान्निध्यात् गुदं गृह्यते, तेनोर्द्ध्वं यकृदादिव्यवस्थितं अधस्तात् गुदपर्य्यन्तं कोष्ठं समन्तात् समाश्रिताः इहवाग्भटेनाप्युक्तं पञ्चमी पुरीषधरा सा ह्यन्त्रामपक्वाशयाश्रया तत्रोण्डुकस्थं मलं विभजतीति उण्डुकः पोट्टलक इति लोके। चरके च पुरीषउण्डुकः प्रतिपादितः अतएव पुरीषधरेति नामास्याः। मलं विभजते मूत्रपुरीषरूपतया विभागं करोति। गयी तु। विभजते तस्मात् कोष्ठात् पृथक् करोति इति व्याख्याति। षष्ठीत्यादि। अश भोजने, खाद्द भक्षणे, धेट पाने, लिह आस्वादने, पित्तमत्रान्तरग्निसंज्ञकं आमाशयात् प्रच्युतं कफाशयाद् भ्रष्टं पक्वाशये स्थितं पक्वाशयागमनायोपस्थितं पित्तस्थानं सम्प्राप्तं धारयति पाकार्थमिति शेषः। तथा च संग्रहः। षष्ठी पित्तधरा नाम पक्वाशयमध्यस्था साह्यन्तरग्नरधिष्ठानतया आमपक्वाशययोर्म्मध्ये चतुर्व्विधं अन्नं वलेन विधार्य्य पित्ततेजसा शोधयति। पचतीति, एतमेवार्थं श्लोकेन दर्शयन्नाह,—अशितमित्यादि तत् अन्नं अशि-

भवन्ति चात्र ।

यथा पयसि सर्पिस्तु गुड़श्चेक्षुरसे यथा ।
शरीरेषु तथा शुक्रं नृणां विद्याद्भिषग्वरः ॥
द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः ।
मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते ॥
कृत्स्नदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा ।
स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् सम्प्रवर्त्तते ॥

गृहीतगर्भाणामार्त्तववहानां स्रोतसां वर्त्मान्यवरुध्यन्ते गर्भेण तस्माद् गृहीतगर्भाणामार्त्तवं न दृश्यते। ततस्तदधः प्रतिहत-मूर्द्धमागतमपरञ्चोपचीयमानमपरेत्यभिधीयते। शेषञ्चोर्द्ध तरमा-गतं पयोधरावभिप्रतिपद्यते तस्माद्गर्भिण्यः पीनोन्नतपयोधरा भवन्ति ।

तादि विशेषेणान्नं जीर्य्यति। यथाकालं कालमनतिक्रमेण तीक्ष्णमध्य-मन्दाग्निषु मात्रा द्रव्यगुरुलघूचितकालानतिक्रमेण ॥ ५ ॥

शुक्रस्य सर्व्वाङ्गव्यापित्वे उपमानप्रमाणं दर्शयन्नाह,—यथेत्यादि। पयो दृष्टान्तोऽल्पमैथुनत्वात् बहुशुक्रे। इक्षुदृष्टान्तस्त्वतिपीड़न-शुक्रक्षरणत्वात् मन्द-शुक्रे पुंसि। तस्यैवेदानीं सर्व्वाङ्गव्यापिनोऽपि चारणमार्गमाह,—द्व्यङ्गुल-इत्यादि। वृद्धवाभटेनोक्तं। सप्तमी शुक्रधरा द्व्यङ्गुले दक्षिणे पार्श्वे वस्ति-द्वारस्य चाधो मूत्रमार्गमाश्रिता सकलशरीरव्यापिनी शुक्रं प्रवर्त्तयति। ननु यथा पयसि संलीनं सर्पिरेवं शरीरसंलीनं शुक्रं कथं पृथक्भूय मूत्रमार्गेण चरतीत्याह,—कृत्स्नेत्यादि। प्रसन्नमनसः क्रोधादिरहितचित्तस्य, तथा स्त्रीषु व्यायच्छतो व्यायामं कुर्व्वतो रतं कुर्व्वत इत्यर्थः। कस्माद् गृहीतगर्भाणां गर्भग्रहणकालादूर्द्ध्वं आप्रजाजननादार्त्तवं न दृश्यते? इत्याह,—गृहीते त्यादि। वर्त्मान्यवरुध्यन्ते मुखान्यवरुध्यन्ते। अपराममलामित्याहुः स्त्रियः।

गर्भस्य यकृत्प्लीहानौ शोणितजौ। शोणितफेनप्रभवः फुस्फुसः शोणितकिट्टप्रभव उण्डुकः ॥ ६ ॥

असृजः श्लेष्मणश्चापि यः प्रसादः परो मतः।
तं पच्यमानं पित्तेन वायुश्चाप्यनुधावति ॥
ततोऽस्यान्त्राणि जायन्ते गुदं वस्तिश्च देहिनः।
उदरे पच्यमानानामाध्मानाद्रुक्मसारवत् ॥
कफशोणितमांसानां सारो जिह्वा प्रजायते।
यथार्थमुष्मणा युक्तो वायुः स्रोतांसि दारयेत् ॥
अनुप्रविश्य पिशितं पेशीर्व्विभजते तथा।
मेदसः स्नेहमादाय सिरा स्नायुत्वमाप्नुयात् ॥
सिराणां च मृदुः पाकः स्नायूनाञ्च ततः खरः।
आशय्याऽभ्यासयोगेन करोत्याशयसम्भवं ॥ ७ ॥

गर्भस्येत्यादि। यकृत् कालखण्डं दक्षिणपार्श्वस्थं, प्लीहा अनेनैव नाम्ना प्रसिद्धो वामपार्श्वस्थितः। यकृत्प्लीहानावित्युपलक्षणं तेन क्लोमापि शोणितजः, तथा च वृद्धवाभटः "रक्तादनिलयुक्तात् कालीयकमिति"। शोणितेत्यादि। फुस्फुसो हृदयनाड़िकामग्नः स्वनामख्यातः। शोणितकिट्टेत्यादि। उन्दकः पोट्टलकः ॥ ६ ॥

अन्त्रादिकोत्पत्तिं दर्शयन्नाह,—असृज इत्यादि। आध्मानात् पच्यमानानां वायुनाग्नेः समिन्धनात् पच्यमानानामित्यर्थः। गयी तु हृदये पच्यमानामिति पाठं पठति। यथार्थेत्यादि। उष्मणा पित्तेन सह युक्तो वायुः श्रोतांसि दारयेत् दारणं कुर्य्यात्। कथं, यथार्थं यथाप्रयोजनमित्यर्थः। अनुप्रविश्येत्यादि वायुः पिशितं मांसं अनुप्रविश्य पेशीर्व्विभजते, पेशी मांसखण्डं। मेदसइत्यादि। शिरास्नायुत्वमाप्नुयात् इति शिराः स्नायुश्च वायुः कुर्य्यादित्यर्थः। आशयेत्यादि। आशय्य अभ्यासयोगेन वायुः स्थितिं कृत्वेत्यर्थः ॥ ७ ॥

रक्तमेदःप्रसादाद् वृक्कौ मांसासृक्‌कफमेदःप्रसादाद् वृषणौ शोणितकफप्रसादजं हृदयं यदाश्रया हि धमन्यः प्राणवहाः। तस्याधो वामतः प्लीहा फुस्फुसश्च दक्षिणतो यकृत् क्लोम च।

तद् हृदयं विशेषेण चेतनास्थानमतस्तस्मिंस्तमसावृते सर्व्व-प्राणिनः स्वपन्ति।

भवति चात्र।

पुण्डरीकेण सदृशं हृदयं स्यादधोमुखं।
जाग्रतस्तद्विकशति स्वपतश्च निमीलति॥

निद्रान्तु वैष्णवीं पाप्मानमुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिस्पृशति॥ ८॥

तत्र यदा संज्ञावहानि स्रोतांसि तमोभूयिष्ठः श्लेष्मा

रक्तेत्यादि। प्रसादः सारः वृक्कौ कुक्षिगोलकौ, मांसेत्यादि, वृषणौ अण्डौ, शोणितेत्यादि, तस्य हृदयस्य अधो वामतो प्लीहा फुस्फुसश्च दक्षिणतो यकृत् क्लोमचेति क्लोम तिलकं तद्विशेषेण चेतनास्थानं चैतन्या-स्पदं सामान्ये तु सकलशरीरमेव चेतनास्थानं तदुक्तं चरके "चेतनानामधि-ष्ठानं मनोदेहश्च सेन्द्रियः। केशलोमनखाग्रान्तमलद्रवगुणैर्व्विना" इति चेतना सहचरितं मनोऽपि विशेषेण हृदयाधिष्ठानं मतं। अतस्तस्मिन् हृदये तमसावृते तमसा तमोगुणेनोच्छ्रितेन आवृते निरुद्धे सति सर्व्वप्राणिनः स्वपन्ति। भवति चात्रेत्यादि, तस्याकारं दर्शयति भवति चात्रेत्यादिना तस्याकारं दर्शयति। हृदयं कमलमुकुलाकारमधोमुखम्। अथकेयं निद्रा तामाह निद्रामित्यादि। विष्णोरियं वैष्णवीमायैव पाप्मानं कस्मादामनन्ति कृत्स्नशुभव्यापारनिरोधात्। यद्यपि तन्त्रान्तरीयैः सप्तविधा निद्रा पठिता तत्रापि त्रिविधैव। तामसी स्वाभाविकी वैकारिकी चेति भेदेन॥ ८॥

ताः क्रमेण दर्शयन्नाह,—तत्र यदेत्यादि। यद्यपि सर्व्वासां अपि निद्राणां

प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले। तमोभूयिष्ठानामहःसु निशासु च भवति। रजोभूयिष्ठानामनिमित्तं। सत्वभूयिष्ठानामर्द्धरात्रे। क्षीण-श्लेष्मणामनिलबहुलानां मनःशरीराभितापवतांञ्च नैव सा वैकारिकी भवति॥ ६॥

भवन्ति चात्र।

हृदयञ्चेतनास्थानमुक्तं सुश्रुत देहिनां।
तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनां॥
निद्राहेतुस्तमः सत्वं बोधने हेतुरुच्यते।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्त्यते॥

तमो हेतुस्तथापि प्रकृष्टतमस्त्वात् तामसीरूपां निद्रां कथ्यते। स्वाभाविकी-माह,—तम इत्यादि। अनिमित्तं अनियतकालं। चलत्वाद् रजसः कदाचिद्दिवा कदाचिद् रात्राविल्यर्थः सत्वभूयिष्ठानां अर्द्धरात्र इति तस्मिन् काले किञ्चिद्गौणीभूतं सत्वमुत्कटं तमो भवति। तस्मादर्द्धरात्रे सात्विका स्वपन्ति। वैकारिकीमाह,—क्षीणेति। एवम्भूतानां पुरुषाणां निद्रा नैव भवति। यदि च भवति तदा वैकारिकी नाम निद्रा भवति। ननु यदा लङ्घनश्रमादिभिर्व्वायुर्व्वर्द्धते श्लेष्मा च क्षीयते तदा कथं निद्रेति? उच्यते—मनसः श्रान्तत्वाद् भूतात्मनो विषयनिवृत्तौ प्राणिनः स्वपन्ति, तदुक्तं चरके। "यदा तु मनसि क्लान्ते कर्म्मात्मानः क्लमान्विताः। विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः"॥ ६॥

इदानीं गद्योक्तस्यार्थस्य सुखबोधनार्थं श्लोकानाह,—भवन्ति चात्रे-त्यादि। सत्वादीनां सहसान्निध्यात् परस्परविरोधिनः स्वापविरोधयो-रनुपपत्तिमन्यमान आह स्वभाव एवेति। ननु बोधाभावः स्वापः स्वापाभावे बोधस्तत्कथं स्वपतः स्वप्रदर्शनं भवतीत्याह,—पूर्व्वेति ननु च यः कश्चिदर्थावबोधः स सर्व्वोऽपि बाह्यार्थावबोध इत्युच्यते स्मृतिरेवायं

पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः।
रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान्॥
करणानां तु वैकल्ये तमसाभिप्रवर्द्धिते।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते॥ १०॥

सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात्। प्रतिषिद्धेष्वपि तु बालवृद्धस्त्रीकर्षितक्षतक्षीणमद्यनित्ययानवाहनाध्वकर्म्मपरिश्रान्तानामभुक्तवतां मेदःस्वेदकफरसरक्तक्षीणानामजीर्णिनाञ्च मुहूर्त्तं दिवास्वपनमप्रतिषिद्धं। रात्रावपि जागरितवतां जागरितकालादर्द्धमिष्यते दिवास्वप्नः। विकृ-

पूर्व्वोऽनुभूतेऽर्थे न चाननुभूतविषयापरिस्फुरति। ननु तादृग्विधस्यार्थस्यादृष्टाऽश्रुताननुभूतत्वात् कथं स्मृतिरित्याह,—पूर्व्वदेहानुभूतांस्त्विति एतच्चोपलक्षणमतोऽनेनापि देहो नानुभूतान्। भूतात्मा किम्भूतैर्घटित आत्मा शरीरलक्षण उत भूतैरुपलक्षित आत्मा भूतात्मा क्षेत्रज्ञ इत्याह,—स्वपतः प्रभुरिति। स्वापयुक्तस्य शरीरस्य प्रभुः स्वामी क्षेत्रज्ञ इत्यर्थः। तद्वशेन सर्व्वक्रियाप्रवृत्तेः। कथं पुनरर्थानिन्द्रियग्राह्यान् निद्रानेष्विन्द्रियेषु गृह्णातीत्याह,—मनसेति मनसः सर्व्वदैव सञ्चरात् सदा स्वप्नदर्शनप्रसङ्ग इत्याह,—रजोयुक्तेनेति। रजःप्रेरितेनेत्यर्थः। रजसः प्रवर्त्तकत्वात्। तमोयुक्तेन च मनसा न किमपि युक्तः पश्यति। तमसः आवरणात्मकत्वात्। इन्द्रियग्रामस्य तमसा वैकल्ये आपादिते आत्मा निर्व्विकारोऽपि सुप्त इव भवति इति प्रतिपादयन्नाह,—करणानामित्यादि। अभिप्रवर्द्धित इति अभिसर्व्वतो वहिरन्तश्च प्रवर्द्धिते तत्र वहिरिन्द्रियाणां विषयभूतेऽर्थे अन्तर्म्मनोऽर्थेऽपि सुखदुःखादौ॥ १०॥

दिवास्वप्नस्य प्रवृत्तिनिवृत्तीत्याह सर्व्वेत्यादि अन्यत्र ग्रीष्मादिति ग्रीष्मं वर्ज्जयित्वा, प्रतिषिद्धेष्वपीत्यादि। प्रतिषिद्धेष्वपि ऋतुषु, मुहूर्त्तं घटिकाद्वयं। रात्रावित्यादि कस्मात् अर्द्धमेव सुप्यान्नाधिकमिति दर्शय-

तिर्हि दिवास्वप्नो नाम तत्र स्वपतामधर्म्मः सर्व्वदोषप्रकोपश्च। तत् प्रकोपाच्च कासश्वासप्रतिश्यायशिरोगौरवाङ्गमर्द्दाऽरोचकज्वराग्निदौर्व्वल्यानि भवन्ति। रात्रावपि जागरितवतां वातपित्तनिमित्तास्तएवोपद्रवा भवन्ति ॥ ११ ॥

भवन्ति चात्र।

तस्मान्न जागृयाद्रात्रौ दिवास्वप्नञ्च वर्ज्जयेत्।
ज्ञात्वा दोषकरावेतौ बुधः स्वप्नं मितञ्चरेत् ॥
अरोगः सुमना ह्येवं बलवर्णान्वितो वृषः।
नातिस्थूलकृशः श्रीमान्नरो जीवेत् समाः शतं ॥
निद्रा सात्मीकृता यैस्तु रात्रौ च यदि वा दिवा।
न तेषां स्वपतां दोषो जाग्रतां वा विधीयते ॥
निद्रानाशोऽनिलात् पित्तान्मनस्तापात् क्षयादपि।
सम्भवत्यभिघाताच्च प्रत्यनीकैः प्रशाम्यति ॥
निद्रानाशेऽभ्यङ्गयोगो मूर्द्ध्नि तैलनिषेवणं।
गात्रस्योद्वर्त्तनञ्चैव हितं संवाहनानि च ॥

आह,—विक्षतिरित्यादि। सर्व्वशब्देन रक्तमपि गृह्यते। यद्यपि दिवास्वप्नेऽधर्म्मस्तथापि शरीर-रक्षार्थं ग्रीष्मे दिवास्वप्न उक्तः। रात्रावित्यादि, तएव कासश्वासादय एव ॥ ११ ॥

भवन्तीत्यादि—एवं उक्तेन प्रकारेण वर्त्तमानो वृषः स्त्रीरमणशक्तियुक्तः, श्रीमान् शरीरशोभायुक्तः। ये पुनर्निद्रा सात्म्यास्तेषामदोष एव दिवास्वापेत्यत आह दिवेत्यादि। ये पुनर्निद्रानाशहेतवस्तान् आह निद्रानाश इत्यादि। अनिलादिभ्यो निद्रानाशः सम्भवति इति सम्बन्धः। स निद्रानाशः प्रत्यनीकैरभ्यङ्गादिभिरुपशमं याति। कानि पुनः प्रत्यनीकानि तान्याह,—निद्रानाशेऽभ्यङ्गेत्यादि। निद्रानाशेऽभ्यङ्गयोगादि हितो भवेत्

शालिगोधूमपिष्टान्नभक्ष्यैरैक्षवसंस्कृतैः।
भोजनं मधुरं स्निग्धं क्षीरमांसरसादिभिः॥
रसैर्व्विलेशयानाञ्च विष्किराणान्तथैव च।
द्राक्षासितेक्षुद्रव्याणामुपयोगो भवेन्निशि।
शयनासनयानानि मनोज्ञानि मृदूनि च॥
निद्रानाशे तु कुर्व्वीत तथान्यान्यपि बुद्धिमान्।
वमेन्निद्रातियोगे तु कुर्य्यात् संशोधनानि च॥
लङ्घनं रक्तमोक्षञ्च मनोव्याकुलनानि च।
कफमेदोविषार्त्तानां रात्रौ जागरणं हितं॥
दिवास्वप्नश्च तृट्शूलहिक्काऽजीर्णातिसारिणां॥ १२॥
इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं क्लमः।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्द्दिशेत्॥
पीत्वैकमनिलोच्छ्वासमुद्वेष्टन् विवृताननः।
यन्मुञ्चति सनेत्रास्रं स जृम्भ इति संज्ञितः॥

सम्बाहनं मृदुमर्द्दनं, ऐक्षवसंस्कृतैरिति खण्डादिसंस्कृतैः, शयनादीनि च मनोज्ञानि निद्रानाशेऽकुर्व्वीत। तथान्यान्यपि इति प्रावरणादीनि। निद्रातियोगे प्रतिकारमाह,—निद्रातियोग इत्यादि, संशोधनादेव वमने लब्धे यद्वमनस्य पृथगुपादानं तद्विशेषेण निद्रानाशहेत्वर्थः। रात्रौ विहितः स्वप्नः केषाञ्चिन्निवद्ध्यते इत्यादि। कफेत्यादि। निषिद्धोऽपि दिवास्वप्नः केषाञ्चित् प्रशस्यत इत्याह,—दिवेत्यादि। हि इत्यत्रापि सम्बन्धनीयः॥१२॥

निद्रायास्तमोभवाया: मोहरूपाया अनुषङ्गात् तत्सदृशीं तन्द्राम-प्याह—इन्द्रियेत्यादि। इन्द्रियार्थाः शब्दादयः तेषामसंप्राप्तिरग्रहणं, निद्रार्त्तस्येव निद्रायुक्तस्येव। परं निद्रायां प्रबोधितस्य क्लमाभावः, तन्द्रा-यान्तु प्रबोधितोऽपि क्लाम्यति, अतएवात्र क्लमग्रहणं। इदानीं तन्त्रालक्षण-

योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्ज्जितः।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः॥
सुखस्पर्शप्रसञ्जित्वं दुःखद्वेषणलोलता।
शक्तस्य चाप्यनुत्साहः कर्म्मस्वालस्यमुच्यते॥
उत्क्लिश्यान्नं न निर्गच्छेत् प्रसेकष्ठीवनेरितं।
हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्द्दिशेत्॥
वक्त्रे मधुरता तन्द्रा हृदयोद्वेष्टनं भ्रमः।
नचान्नमभिकाङ्क्षेत ग्लानिं तस्य विनिर्द्दिशेत्॥ १३॥
आर्द्रचर्म्मावनद्धं वा यो गात्रमभिमन्यते।
तथा गुरु शिरोऽत्यर्थं गौरवं तद्विनिर्द्दिशेत्॥
मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा॥ १४॥

प्रतिपादितानां जृम्भणादीनां लक्षणमाह,—पीत्वेत्यादि। अत्र जृम्भाप्रसङ्गेन केचित् हिक्कालक्षणं पठन्ति। यथा "प्राणोदानौ समौ स्यातां मूर्द्ध्नि श्रोतःपथि स्थितौ। नस्तः प्रवर्त्तते शब्दः क्षवथुं तं विनिर्द्दिशेत्"। इति तच्च टीकाकारापठितत्वान्न पठनीयं। क्लममाह,—य इत्यादि। क्लमानन्तरं कर्म्माप्रवृत्तिसाम्यादसूत्रितमपि आलस्यमाह,—सुखेत्यादि। केचिदुत्क्लेश-ग्लान्योर्लक्षणमाहुः,—उदित्यादि। वक्त्र इत्यादि च एतदपि टीकाकारैर-पठितत्वान्न पठनीयं॥ १३॥

आर्द्रेत्यादि। आर्द्रचर्म्मावनद्धं इति वाशब्द इवार्थे तेनार्द्रचर्म्मावनद्ध-मिवेत्यर्थः। तद्वि निर्द्दिशेदिति तस्येति शेषः। मोहरूपाया निद्रायाः प्रसङ्गेन तन्द्रादिकं मोहरूपं निर्द्दिश्य मूर्च्छादिकमपि दर्शयन्नाह,—मूर्च्छे-त्यादि। भ्रमश्चक्रारूढ़स्येव भ्रमणं लक्षणत उक्तायास्तन्द्राया हेतुतोऽपि निर्देशं कुर्व्वन्नाह,—तमोवातकफादिति उक्तापि निद्रा तमसा मनोदोषेण

गर्भस्य खलु रसनिमित्ता मारुताध्माननिमित्ता च परिवृद्धिर्भवति।

भवन्ति चात्र।

तस्यान्तरेण नाभेस्तु ज्योतिःस्थानं ध्रुवं स्मृतं।
तदा धमति वातस्तु देहस्तेनास्य वर्द्धते॥
ऊष्मणा सहितश्चापि दारयत्यस्य मारुतः।
ऊर्द्ध्वं तिर्य्यगधस्ताच्च स्रोतांस्यपि यथा तथा॥
दृष्टिश्च रोमकूपाश्च न वर्द्धन्ते कदाचन।
ध्रुवाण्येतानि मर्त्त्यानामिति धन्वन्तरेर्म्मतं॥
शरीरे चीयमाणेऽपि वर्द्धेते द्वाविमौ सदा।

मूर्च्छादिप्रसङ्गेन शरीरदोषेनापि पुनरभिहिता, गयी तु क्लमालस्यादीनां लक्षणं न पठति असूत्रिकत्वेन हेतुना॥ १४॥

गर्भस्य वृद्धौ पूर्व्वोक्तहेतुमनूद्य द्वितीयमपि हेतुं दर्शयन्नाह,—गर्भस्येत्यादि। रसनिमित्तेति मातुरिति शेषः। तदुक्तं प्राक् मातुस्तु रसवहायां नाड्यां गर्भनाभिनाड़ीप्रतिबद्धेत्यादिना। मारुताध्माननिमित्तेति मारुताध्मानं स्रोतसां पूरणं तदेव निमित्तं यस्यां सा मारुताध्माननिमित्ता। कथं वक्ष्यमाणेनानलानिलकृतेन गर्भस्रोतसामाध्मानाभितो विशालभूतत्वात् गर्भपरिवृद्धिः अतः स्रोतसामेवाध्मानसंप्राप्तिं दर्शयन्नाह,—भवन्तीत्यादि। तस्य गर्भस्य नाभेरन्तरे मध्ये ज्योतिःस्थानं अग्निस्थानं निश्चितं स्मृतं तच्च वायुराधमति तेन चाध्मातेन वह्निना समारुतेन स्रोतसामाध्मापने अस्य गर्भस्य देहो वर्द्धते। ज्योतिःस्थानाध्मानेन मध्यस्रोतो वृद्धौ कथं सर्व्वतो वृद्धिरित्याह,—ऊष्मणेत्यादि। यथातथाशब्दावत्रान्तर्भूतवीप्सार्थौ ज्ञातव्यौ, तेनोष्मणा सहितोऽनिलो यथोर्द्धं तिर्य्यक् अधस्ताच्च स्रोतांसि दारयति विवृतानि करोति तथा तथा देहो वर्द्धते इति पूर्व्ववाक्यात् सम्बन्धनीयः। यथा शरीरं वर्द्धते तथा दृष्ट्यादयोऽपि कथं न वर्द्धन्ते? इत्याह,—दृष्टिरित्यादि यस्मात्, एतानि दृष्टिरोमकूपानि, ध्रुवाणि निश्चलानि,

स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिः ॥
सप्त प्रकृतयो भवन्ति दोषैः पृथक् द्विशः समस्तैश्च।
शुक्रशोणित-संयोगे यो भवेद्दोष उत्कटः ॥
प्रकृतिर्ज्जायते तेन तस्या मे लक्षणं शृणु ॥ १५ ॥
तत्र जागरूकः शीतद्वेषी दुर्भगः स्तेयो मत्सर्य्यनार्य्यो

मर्त्यानां पुरुषाणां। शरीरवृद्धावपि कस्यचिदवयवस्यावृद्धिं प्रतिपाद्य शरीरक्षयेऽपि कस्यचिदतिवृद्धिं दर्शयन्नाह,—शरीर इत्यादि। स्वभावं प्रकृतिं कृत्वा स्वभावं कारणं कृत्वेत्यर्थः। प्रकृतिप्रसङ्गेनान्यदपि प्राकृतरूपं प्रतिपादयितुकामो यावद्विधा प्रकृतिर्यद्धेतुकी यच्चास्याः स्वलक्षणं तत्-क्रमेणाह,—सप्तेत्यादि। सप्तविधत्वं प्रतिपाद्य तस्या उत्पत्तौ हेतुमाह,—शुक्रेत्यादि। यो भवेद्दोष उत्कट इति स्वभाव स्थितो न प्रकुपितः। द्विविधा ह्युत्कटा वातादयः, प्राकृता वैकृताश्च तत्र प्राकृताः सप्तविधाः प्रकृतेर्हेतु-भूताः शरीरैकजन्मानः। वैकृताश्च गर्भव्याघातकाः। गयी तु अन्यथैवाशङ्का समादधाति यथा। ननु स्वभावतः शुद्धं वीजं कर्म्मणा वा समधातुं गर्भं निष्पादयति, अनिलादिदोष दुष्टन्तु गर्भजननाय न समर्थमिति. शुक्रशोणित-शुद्धावुक्तं तत्कथं उत्कटेन दोषेण प्रकृतिरिति? उच्यते। न हि सर्व्वमेव वीजं दूषितं किन्तर्हि वीजावयवो दूषितः न चावयवगतदोषेण गर्भप्रतिबन्धो जात्यन्धमूकादेर्गर्भस्य दर्शनात्। तस्मात् अत्र यएवांशो वीजस्य दुष्टो भवति गर्भावयवविकृतिरभावे वा भवति यथा दृश्यारम्भके वीजभागेन जात्यन्धो गर्भो भवति न तु गर्भएव न भवति यथा दोषाख्ये वीजभागे दुष्टे तत्कार्य्यत्वेन गर्भशरीरभागस्य समधातोरपेक्षया विकृतिः स्फुटितकर-चरणादिलक्षणा भवति। न तु गर्भव्याघातः। तदुक्तं शुद्धं स्वभाव-कर्म्मभ्यां वाताद्यैर्दुष्टमंशतः। दुष्टं वीजार्थकृत् वीजं तत्र प्रकृतिरुत्तर-मिति ॥ १५ ॥

दोषाणां हि वातस्य प्राधान्यं अतस्तत् प्रकृतिलक्षणमाह,—तत्रेत्यादि।

गान्धर्व्वचित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च भवति ॥

अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी ।
द्रुतगतिरटनोऽनवस्थितात्मा वियदपि गच्छति सम्भ्रमेण सुप्तः ॥

अव्यवस्थितमतिश्चलदृष्टिर्मन्दरत्नधनसञ्चयमित्रः ।
किञ्चिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेषु मनुष्यः ॥
वातिकाश्चाजगोमायुशशाखूष्ट्रशुनान्तथा ।
गृध्रकाकखरादीनामनूकैः कीर्त्तिता नराः ॥

स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलो दुर्भगो वलीपलितखालित्यजुष्टो बहुभुगुष्णद्वेषी क्षिप्रकोपप्रसादो मध्यमबलो मध्यमायुश्च भवति ॥

मेधावी निपुणमतिर्व्विगृह्यवक्ता तेजस्वी समितिषु दुर्निवारवीर्य्यः । सुप्तः सन् कनकपलाशकर्णिकारान् सम्पश्येदपि च हुताशविद्युदुल्काः ॥

न भयात् प्रणमेदनतेष्वमृदुः प्रणतेष्वपि सान्त्वनदानरुचिः ।
भवतीह सदा व्यथितास्य गतिः स भवेदिह पित्तकृतप्रकृतिः ॥

भुजङ्गोलूकगन्धर्व्वयक्षमार्ज्जारवानरैः ।
व्याघ्रर्क्षनकुलानूकैः पैत्तिकास्तु नराः स्मृताः ॥ १६ ॥

जागरूकः अतिशयेन जागरणशीलः । दुर्भगोऽमनोरमाकारः, स्तेयः चौरः, मत्सरी परगुणासहनशीलः, अनार्य्यः असत्पुरुषः, गान्धर्व्वचित्तो गीतादिनिरतः, क्रोधी नृसंशनशीलः, दन्तखादी सुप्तः सन् दन्तान् कौटिकिटायते, अधृतिः· अधैर्य्ययुक्तः, द्रुतगतिरटनः शीघ्रगामी शीघ्रभाषी च भवतीत्यर्थः । अनवस्थितात्मा चञ्चलचित्तः, अव्यवस्थितमतिः अनवस्थितबुद्धिनिश्चयः । स्वेदन इत्यादि, विगृह्यवक्तेति परवाक्यमुच्छिद्य वक्तुं शीलः, समितिषु

दूर्व्वेन्दीवरनिस्त्रिंशार्द्रारिष्टशरकाण्डानामन्यतमवर्णः सुभगः प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो बलवांश्चिरग्राही दृढ़वैरश्च भवति ॥

शुक्लाक्षः स्थिरकुटिलातिनीलकेशो
लक्ष्मीवान् जलदमृदङ्गसिंहघोषः ।
सुप्तः सन् सकमलहंसचक्रवाकान्
सम्पश्येदपि च जलाशयान् मनोज्ञान् ॥

रक्तान्तनेत्रः सुविभक्तगात्रः स्निग्धच्छविः सत्वगुणोपपन्नः ।
क्लेशक्षमो मानयिता गुरूणां ज्ञेयो बलासप्रकृतिर्म्मनुष्यः ॥
दृढ़शास्त्रमतिः स्थिरमित्रधनः परिगण्य चिरात् प्रददाति बहु ।
परिनिश्चितवाक्यपदः सततं गुरुमानकरश्च भवेत् स सदा ॥

ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः ।
तार्क्षहंससमानूकाः श्लेष्मप्रकृतयो नराः ॥
द्वयोर्व्वा तिसृणां वापि प्रकृतीनान्तु लक्षणैः ।
ज्ञात्वा संसर्गजा वैद्यः प्रकृतीरभिनिर्द्दिशेत् ॥ १७ ॥

संग्रामेषु, पलाशः किंशुकः, सान्त्वनं उपशमः। व्यथितास्यगतिरिति व्यथितमुखः मुखपाकत्वात्, धावन् क्लेशासहत्वम् पीड़ावहगमनः ॥ १६ ॥

दूर्व्वेत्यादि। इन्दीवरं नीलोत्पलं, निस्त्रिंशः खड्गः, अरिष्टः कृष्णवर्त्तुलफलो जोठा इति लोके प्रसिद्धः। स च धृतिमान् धैर्य्ययुक्तः, सुविभक्तगात्रः सुष्ठु पृथग्भूतसकलावयवः। केचिद् वातादिप्रकृतिषु वातिकाश्वाजगोमायुशशाखूष्ट्रशुनां तथा गृध्रकाकखरावीणामुलूकैः कीर्त्तिता नरा इत्यादि। तथा भुजगोलुकगन्धर्व्वयक्षमार्ज्जारवानरैः। व्याघ्रर्क्षनकुलालूकाः पैत्तिकास्तु नराः स्मृता इत्यादि। तथा दृढ़शास्त्रमतिः स्थिरमित्रधनः परिगण्यचिरात् प्रददाति बहु। परिनिश्चितवाक्यपदः सततं गुरुमान-

प्रकोपो वान्यथाभावः क्षयो वा नोपजायते।
प्रकृतीनां स्वभावेन जायते तु गतायुषः॥
विषजातो यथा कीटो न विषेण विपद्यते।
तद्वत् प्रकृतयो मर्त्यं शक्नुवन्ति न वाधितुं॥
प्रकृतिमिह नराणां भौतिकीं केचिदाहुः
पवनदहनतोयैः कीर्त्तितास्तास्तु तिस्रः॥ १८॥
स्थिरविपुलशरीरः पार्थिवश्च क्षमावान्।
शुचिरथ चिरजीवी नाभसः खैर्म्महद्भिः॥
शौचमास्तिक्यमभ्यासो वेदेषु गुरुपूजनं।

करश्च भवति। स सदा इत्यादि तथा "ब्रह्मेन्द्ररुद्रवरुणैः सिंहाश्वगजगोवृषैः। तार्क्ष्यहंससमालूकाः श्लेषप्रकृतयो नराः"। इत्यादीन् भेदान् चतुःसंख्यकान् श्लोकान् पठन्ति। ते तु श्लोका निवन्धकारैरपठितत्वात् न पठनीयाः॥ १७॥

ते च प्राकृता भावा अन्यथावर्त्तिन इति दर्शयन्नाह,—प्रकोप इत्यादि। वातादिप्रकृतीनां ये दोषास्ते कस्मान्न रुजन्ति इत्याह,—विषेत्यादि एतदारम्भकदोषमधिकृत्योक्तं तस्या वाधकत्वं प्रागेव व्याख्यातं। शक्नुवन्ति न वाधितुमिति न ञयमिषदर्थे तेन किञ्चिद् वाधितुं शक्नुवन्ति न तु भृशं, यथा हि विषकीटो विषस्वभावजनितदाहादिना किञ्चिदेव वाध्यते न तु भृशं। एवं वातादिहेतुजः प्राणिकायो वातादिजेन स्फुटितकरचरणादिकेन दोषेण तथा स्वेददौर्गन्ध्यादिना च किञ्चिदेव वाध्यते। अतएव "वातलाद्याः सदातुरा" इति वातादिप्रकृतिषु नित्यातुरत्वमभिहितं। एकीयमतमाह,—प्रकृतिमित्यादि। पवनदहनतोयैः कीर्त्तित इति वातपित्तश्लेषलक्षणैः कथिता इत्यर्थः॥ १८॥

शेषे द्वे प्रकृती आह,—स्थिरेत्यादि। खैर्म्महद्भिरिति नासाकर्णादिछिद्रैर्व्विपुलैरित्यर्थः। अनेन श्लोकेन पृथिव्यप्तेजोवाय्वाकाशीयसपि प्रकृति-

प्रियातिथित्वमिज्या च ब्रह्मकायस्य लक्षणं ॥
माहात्म्यं शौर्य्यमाज्ञा च सततं शास्त्रबुद्धिता।
भृत्यानां भरणञ्चापि माहेन्द्रं कायलक्षणं ॥
शीतसेवा सहिष्णुत्वं पैङ्गल्यं हरिकेशता।
प्रियवादित्वमित्येतद्वारुणं कायलक्षणं ॥
मध्यस्थता सहिष्णुत्वमर्थस्यागमसञ्चयौ।
महाप्रसवशक्तित्वं कौवेरं कायलक्षणं ॥
गन्धमाल्यप्रियत्वञ्च नृत्यवादित्रकामिता।
विहारशीलता चैव गान्धर्व्वं कायलक्षणं ॥
प्राप्तकारी दृढोत्थानो निर्भयः स्मृतिमान् शुचिः।
रागमोहभयद्वेषैर्व्वर्जितो याम्यसत्ववान् ॥ १९ ॥
जपव्रतब्रह्मचर्य्यहोमाध्ययनसेविनं।
ज्ञानविज्ञानसम्पन्नमृषिसत्वं नरं विदुः ॥

माहुरन्ये सा चैकशो द्वित्रिचतुर्भिर्व्वा भूतैः प्रस्तार्य्यमाना बहुधा संजायते। उक्तञ्च। "एकैकेन वदन्ति पञ्चदश तु द्वाभ्यां त्रिभिस्तावतीभूतैः पञ्चचतुर्भिरेव भिषजस्त्वेकां समस्तैरपि। एकस्मिं शतमत्र भूमि सलिलस्वाहाप्रियस्पर्शनाकाशैश्च प्रकृतिर्गुणैरपि पुनः प्राहुःस्म सप्ताऽपरा" इति। गुणैः सत्वरजस्तमोभिरेकशो द्विशः समस्तैश्च सप्त महाप्रकृतयो भवन्ति। सप्तदोषतः सप्तगुणतः इति नागार्ज्जुनाचार्य्योक्तत्वात्। सत्वादिगुणभेदेन चित्तप्रकृतिं निर्द्दिशन्नाह,—शौचमित्यादि, इज्या यागः। माहात्म्यमित्यादि, माहात्म्यं महाशयत्वं। शीतेत्यादि पैङ्गल्यं पिङ्गाक्षता, हरिकेशता कपिलकेशता। मध्येत्यादि, महाप्रसवशक्तिः प्रजोत्पादनसामर्थ्यं। गन्धेत्यादि विहारशीलता भ्रमणशीलता। प्राप्तेत्यादि, प्राप्तकारी युक्तकारी, दृढोत्थानो दृढारम्भः ॥ १९ ॥

जपेत्यादि, रौद्रं भयानकं, चण्डं तीव्रकोपं, असूयकं परगुणेषु मत्सरिणं,

सप्तैते सात्विका काया राजसांस्तु निबोध मे।
ऐश्वर्य्यवन्तं रौद्रञ्च शूरञ्चण्डमसूयकं॥
एकाशिनञ्चौदरिकमाशूरं सप्तमीदृशं।
तीक्ष्णमायासिनं भीरुञ्चण्डं मायान्वितन्तथा॥
विहाराचारचपलं सर्पसत्वं विदुर्नरं।
प्रवृद्धकामसेवी चाप्यजस्राहार एव च॥
अमर्षणोऽनवस्थायी शाकुनं कायलक्षणं।
एकान्तग्राहिता रौद्रमसूया धर्म्मबाह्यता॥
भृशमात्तं तमश्चापि राक्षसं कायलक्षणं।
उच्छिष्टाहारता तैक्ष्णं साहसप्रियता तथा॥
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचं कायलक्षणं।
असम्विभागमलसं दुःखशीलमसूयकं॥
लोलुपञ्चाप्यदातारं प्रेतसत्वं विदुर्नरं॥
षड़ेते राजसाः कायास्तामसांस्तु निबोध मे॥
दुर्म्मेधस्त्वं मन्दता च स्वप्ने मैथुननित्यता।
निराकरिष्णुता चैव विज्ञेयाः पाशवा गुणाः॥
अनवस्थितता मौर्ख्यं भीरुत्वं सलिलार्थिता।
परस्पराभिमर्द्दश्च मत्स्यसत्वस्य लक्षणं॥

एकाशिनं एकाक्येव चाश्नातीत्यर्थः। औदरिकं घस्मरं, गयदासस्तु औदरिकमित्यत्रौपधिकं इति पठित्वा औपधिकं छद्मपरमिति व्याख्याति। तीक्ष्णेत्यादि। भीरुं अक्रोधे सतीत्यध्याहारः, तदुक्तं चरके। क्रुद्धं शूरमक्रुद्धं भीरुमिति चण्डं प्रकोपनं। प्रवृद्धेत्यादि, अजस्राहारोऽनवरताहारशीलः। एकान्तेत्यादि, एकान्तग्राहिता एकान्तग्रहणशीलता, असूया

एकस्थानरतिर्नित्यमाहारे केवले रतः।
वानस्पत्यो नरः सत्वधर्म्मकामार्थवर्जितः॥
इत्येते त्रिविधाः कायाः प्रोक्ता वै तामसास्तथा।
कायानां प्रकृतिर्ज्ञात्वा त्वनुरूपां क्रियाच्चरेत्॥
महाप्रकृतयस्त्वेता रजःसत्वतमःकृताः।
प्रोक्ता लक्षणतः सम्यग् भिषक् तांश्च विभावयेत्॥ २०॥

गुणेषु दोषारोपणं, भ्रममात्रं तम इत्यर्थः। उच्छिष्टेत्यादि, तैक्ष्ण्यं कोपनत्वं। असम्विभागमित्यादि—अनवस्थिततेत्यादि प्रकृतिज्ञाने प्रयोजनमाह कायानामित्यादि॥ २०॥

इति निबन्धसंग्रहे शारीरस्थाने चतुर्थोऽध्यायः।

अथ पञ्चमोऽध्यायः।

अथातः शरीरसंख्याव्याकरणं शारीरं व्याख्यास्यामः।

शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसम्मूर्च्छितं गर्भ इत्युच्यते। तञ्च चेतनावस्थितं वायुर्व्विभजति तेज एनं पचति, आपः क्लेदयन्ति, पृथिवी संहन्त्याकाशं विवर्द्धयति।

गर्भव्याकरणानन्तरमुत्पन्नस्य गर्भस्य सञ्जाताङ्गप्रत्यङ्गतया शरीरसंज्ञास्य शरीरावयवाणां संख्यां कर्त्तुं युज्यत इत्याह,—अथात इत्यादि। पञ्चमहाभूतशरीरिसमवायः शरीरमुक्तं तस्यावयवसंख्या तस्य व्याकरणं विवरणं यत्र शारीरे तद् व्याख्यास्यामः। अथवा शरीरशब्दोऽयं समुदायवृत्तिरवयवेष्वपि वर्त्तते तेषां संख्यां शेषं पूर्ववत्। तत्र शरीरावयवसंख्याविवरणं प्रतिपादयितुकामः शरीरशब्दव्यपदेशेनेव तावत् क्रमेणाह शुक्रशोणित-

एवं विवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभि-रङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते, तच्च षडङ्गं शाखा-श्चतस्रो मध्यं पञ्चमं षष्ठं शिर इति ॥ १ ॥

अतःपरं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभिललाट-नासाचिवुकवस्तिग्रीवा इत्येता एकैकाः। कर्णनेत्रनासाभ्रू-शङ्खांसगण्डकक्षस्तनवृषणपार्श्वस्फिग्जानुवाहूरुप्रभृतयो द्वे द्वे विंशतिरङ्गुलयः। स्रोतांसि च वक्ष्यमाणानि। एष प्रत्यङ्ग-विभाग उक्तः।

मिति। आत्मा प्रकृतिविकारसंमूर्च्छितमिति, आत्मा चेतज्ञः, प्रकृतयः प्रधानादयोऽष्टौ। विकाराः पञ्चभूतान्येकादशेन्द्रियाणि चेति षोड़श तैः संमूर्च्छितं मिश्रीकृतं गर्भ इति संज्ञां लभते, एतेन योगिनामुपयोगी पञ्च-विंशतिको राशिरुक्तः। अथेदानीं भिषजामुपयोगिनं षट्‌धातुकं कृत्वा निर्द्दिशन्नाह,—तच्चेति। चेतनाया हेतुभूताया यावद्गर्भं प्रसवकालमव-स्थितं चेतनावस्थितं अन्यथा कुथितविशीर्णं स्यात्। तं वायुर्व्विभजति दोषधातुमलाङ्गप्रत्यङ्गविभागेन। तेज एनं पचति। रूपाद्रूपान्तरमवस्थानं प्रापयति। आप क्लेदयन्ति। विभागपरिणामकारिणोरनिलानलयोः शोषणे-ऽप्यार्द्रतां जनयति। पृथिवी संहन्ति अद्भिः क्लिन्नमपि कठिनं मूर्त्तिमत् करोति। संहरतीत्यन्ये पठन्ति। तत्र, संपूर्व्वहृधातोर्व्विनाशार्थत्वात्। आकाशं विवर्द्धयति, अनिलानलविदारितस्रोतसाप्यापनेनोर्द्ध्वमधस्तिर्य्यक् विवर्द्धितमवकाशदानेन विवर्द्धयति। मध्यमिदं कण्ठादिगुदपर्य्यन्तं ॥ १ ॥

अपरमप्यवयवविभागं संख्याश्रयं शरीरे निर्द्दिशन्नाह,—अतःपर-मित्यादि। अंसौ वाहुशिरः, गण्डौ गल्लः, स्फिक् पादः, उरु जङ्घेति लोके। वाहूरुप्रभृतयो द्वे द्वे इत्यत्र प्रभृतिग्रहणाच्चौष्ठसृक्कणीकुकुन्दराणामवबोधः। ननु स्रोतांसि प्रत्यङ्गेषु किमिति निर्द्दिष्टानीत्याह,—स्रोतांसीत्यादि। वक्ष्यमाणानीति, आश्रितेषु लगाद्यवयवेष्वित्यर्थः। एतान्यङ्गप्रत्यङ्गान्याश्रय-

तस्य पुनः शङ्ख्यानं। त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुसफुस उण्डुको हृदयमाशया अन्त्राणि वृक्कौ स्रोतांसि कण्डरा जालानि कूर्च्चा रज्जवः सेवन्यः सङ्घाताः सीमन्ता अस्थीनि सन्धयः स्नायवः पेश्यो मर्म्माणि सिरा धमन्यो योगवहानि स्रोतांसि च ॥

त्वचः सप्तः। कलाः सप्त। आशयाः सप्त। धातवः सप्त। सप्त शिराशतानि। पञ्च पेशीशतानि। नव स्नायुशतानि। त्रीण्यस्थिशतानि। द्वे दशोत्तरे सन्धिशते। सप्तोत्तरं मर्म्मशतं। चतुर्व्विंशतिर्धमन्यः। त्रयो दोषास्त्रयो मलाः। नव स्रोतांसीति समासः।

विस्तारोऽत ऊर्द्धं। त्वचोऽभिहिताः, कला धातवो मला दोषा यकृत्प्लीहानौ फुस्फुस उण्डुको हृदयं वृक्कौ च।

आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम इति ॥ २ ॥

भूतानि प्रतिपाद्य तेष्ववयवेषु समाश्रितास्त्वगाद्यवयवास्तेषां व्याकरणमाह,—तस्य पुनरित्यादि। तस्येत्यङ्गप्रत्यङ्गात्मकस्य शरीरस्य, संख्यानमिति, संख्यायते येन शरीरं तत् संख्यानं, किं तदित्याह त्वचः कला इत्यादि, त्वगादिकं योगवहस्रोतोऽन्तमेकोनत्रिंशत्। योगवहानीति धमन्या सह योगं वहन्ति यानि स्रोतांसि तानि योगवहानि धमनीव्याकरणोदितानि प्राणोदकान्नवाहिनीति। केचित् सुश्रुताध्यायिनः संख्यापनत्वगादीन् कतिचित् संख्येयोपेतान् पठन्ति, तन्मतमाह,—त्वचः सप्तेत्यादि। समासः संक्षेपः, संक्षेपेनाभिहितानां त्वगादीनां विस्तारमाह,—विस्तारोऽत इत्यादि। त्वचोऽभिहिता इति संख्यायां नामभिश्च गर्भव्याकरणे कलादयश्चाभिहिताः। आशयानाह आशयास्त्वित्यादि आशयोऽधिष्ठानं,

सार्द्धत्रिव्यामान्यन्त्राणि पुंसां, स्त्रीणामर्द्धव्यामहीनानि ।

श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां वहिर्मुखान्येतान्येव स्त्रीणामपराणि च त्रीणि द्वे स्तनयो-रधस्ताद्रक्तवहञ्च ।

षोड़शकण्डराः । तासाञ्चतस्रः पादयोस्तावत्यो हस्तग्रीवा-पृष्ठेषु । तत्र हस्तपादगतानां कण्डराणां नखाः प्ररोहाः । ग्रीवाहृदयनिबन्धनीनामधोभागगतानां मेढ्रं श्रोणिपृष्ठनिव-

पित्ताशयादधः पक्वाशयः तस्यैकदेशे च विभक्तमलाधार उण्डुके विद्यते अत उण्डुकात् पक्वाशयो भिन्न इति । आशयक्रमस्तु वाभटेनोक्तो यथा—"रक्त-स्याद्यः क्रमात् परे कफामपित्तपक्वानां वायोर्मूत्रस्य च क्रमात् । गर्भा-शयोऽष्टमः स्त्रीणां पित्तपक्वाशयान्तरा" इति ॥ २ ॥

अन्त्राण्याह,—सार्द्धमित्यादि । व्यामो बाह्वोः सकरयोस्तयोस्तिर्य्य-गन्तरं । श्रवणेत्यादि । नन्वन्यान्यपि धमनीव्याकरणोदितानि स्रोतांसि वक्तव्यानीत्याह,—वहिर्मुखानि धमनीव्याकरणोदितानि चान्तर्मुखानि । अधस्ताद्रक्तवहं स्मरातपत्रस्याध आर्त्तववहं । स्मरात् पत्रं भगस्योपरितले भागे । उक्तञ्च । विपुलपिप्पलपत्रसमाकृतेरवयवस्य शिरस्तलमाश्रितं, सकलकामशिरामुखचुम्बितं निगदितं मदनातपवारणमिति । षोड़शे-त्यादि । कण्डरा महास्नायुः, तावत्यो हस्तग्रीवापृष्ठेष्विति, हस्तयो-श्चतस्रः, ग्रीवायाञ्चतस्रः, पृष्ठे चतस्रः । हस्तादिगतानां कण्डराणा-माश्रयभागमाह,—तत्रेत्यादि । जेज्जड़स्तु हस्तपादतलानां कण्डराणा-मस्थाञ्च नखमात्रप्ररोहा इति पठति । ग्रीवया सह हृदयनिबन्धिनीनां चतसृणां मेढ्रं प्ररोह इति शेषः । श्रोण्या सह पृष्ठनिश्चलबन्धं कुर्व्वतीनां पृष्ठजानां चतसृणामधोभागगतानां बिम्बं मण्डलमर्थान्नितम्बस्य, मूर्द्धोरु-वक्षोऽंसपिण्डादीनाञ्च पूर्व्ववाक्यात् बिम्बमनुवर्त्तते, तेन उण्डुकस्य यद् बिम्बं मण्डलं तत् ग्रीवाश्रितानां प्रागुक्तानामेव चतसृणामुपरिगतानां कण्डराणा-

ष्मिनीनामधोभागगतानां विम्बः। मूर्द्धोरुवक्षोऽक्षपिण्डादीनाञ्च ॥ ३ ॥

मांससिरास्नाय्वस्थिजालानि प्रत्येकं चत्वारि चत्वारि। तानि मणिवन्धगुल्फसंश्रितानि परस्परनिवद्धानि परस्परसंश्लिष्टानि परस्परगवाक्षितानि चेति यैर्गवाक्षितमिदं शरीरं।

षट् कूर्च्चास्ते हस्तपादग्रीवामेढ्रेषु। हस्तयोर्द्वौ पादयोर्द्वौ ग्रीवामेढ्रयोरेकैकः।

महत्यो मांसरज्जवश्चतस्रः पृष्ठवंशमुभयतः पेशीनिवन्धनार्थं द्वे वाह्ये, आभ्यन्तरे च द्वे।

सप्त सेवन्यः। शिरसि विभक्ताः पञ्चजिह्वाशेफसोरेकैका ताः परिहर्त्तव्याः शस्त्रेण।

मात्रप्ररोहः तथा पादगतानां चतसृणामुपरिगतानामुरुमण्डलमात्रप्ररोहः, तथा पृष्ठगतानां चतसृणां कण्डराणामुपरिगतानां वक्षोमण्डलं, आदिशब्दगृहीतस्य स्तनस्य मण्डलमात्रप्ररोहः। हस्तगतानां चतसृणां उपरिगतानामक्षपिण्डौ वाहुशिर अत्र प्ररोह इति। मस्तकस्य तथैवोर्व्वोः तथा वक्षसः तथा अक्षपिण्डयोश्च यद्विम्बं मण्डलं आदिशब्दात् स्तनपिण्डयोरपि मण्डलं ॥ ३ ॥

तासां षोड़शानां यथासमीपं प्ररोहकालान्याह,—मांसेत्यादि। मांसादीनां चतुर्णां प्रत्येकं चत्वारि जालानि तेषां मांसादिजालानां चतुर्णामेकमेकस्मिन् मणिवन्धे गुल्फे च। तद्यथा मांसस्यैकस्मिन् मणिवन्धे गुल्फे च। एवं शिराणां स्नायूनामस्थ्नां चैकैकं जालकमिति चत्वारि जालकानि परस्परगवाक्षितानि सञ्जातपरस्परच्छिद्राणीत्यर्थः। यैर्गवाक्षितमिति विरचितनिरन्तरजालकाकाररन्ध्रनिकरपरिफलितमित्यर्थः। षट् कूर्चा इत्यादि कूर्चा इव कूर्चा नाम्नैवाकृतिरुन्नेया, ते पुनर्म्मांसास्थिसिरास्नायूनां जालकप्रभवाणां सन्तति विरचिताः। महत्य इत्यादि।

चतुर्द्दशास्थ्नां सङ्घाताः। तेषां त्रयो गुल्फजानुवङ्क्षणेषु। एतेनेतरसक्थिबाहू च व्याख्यातौ। त्रिकशिरसोरेकैकः॥

चतुर्द्दशैव सीमन्ताः। ते चास्थिसङ्घातवद्गणनीया यतस्तैर्युक्ता अस्थिसङ्घाताः। येऽष्युक्ताः सङ्घातास्तु खल्वष्टादशैकेषां॥ ४॥

त्रीणि स षष्टीन्यस्थिशतानि वेदवादिनो भाषन्ते। शल्यतन्त्रे तु त्रीण्येव शतानि। तेषां सविंशमस्थिशतं शाखासु। सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोदरोरस्सु। ग्रीवां प्रत्यूर्द्धं त्रिषष्टिः। एवमस्थ्नां त्रीणि शतानि पूर्य्यन्ते।

एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश। तलकूर्च्चगुल्फसंश्रितानि दश। पार्ष्ण्यामेकं। जङ्घायां द्वे।

पेशीनिवन्धनार्थमिति प्रयोजनकथनं। गयी तु महतरो मांसरज्जवस्तस्तः पृष्ठवंशमुभयत इत्यष्टौ प्रतिपादयति। संख्यातानाह,—चतुर्द्दशास्थ्नामित्यादि, त्रयो गुल्फजानुवङ्क्षणेषु, तावन्तोऽन्यस्मिन् सक्थिबाह्वोरेवमेव। एवं चतुर्भिस्त्रिकैर्द्वादशत्रिकशिरसोरेकैकः। त्रिके एकैकः शिरसीत्येवं चतुर्द्दश। यद्यपि श्रोणिकाण्डभागे त्रिकं प्रसिद्धं तथाप्यत्र बाहुग्रीवास्थित्रयं संघातस्त्रिक उच्यते। सीमन्तानाह,—चतुर्द्दशैव सीमन्ता इति, तथाच भोजः—“संघाताः सञ्चिता येस्तु सीमन्तांस्तान् प्रचक्ष्महे” इति। परमतमाह,—येऽष्युक्ता इति। एकेषां आचार्य्याणां मते संघाता अष्टादश तद्यथा—पूर्व्वोक्ताश्चतुर्द्दश। श्रोणिकाण्डमुपर्य्येको वक्षउपर्य्येक उदरोरःसन्धाने एक, अंसकूटमुपर्य्येकः, एवं अष्टादश॥ ४॥

अस्थिसंख्यां कुर्व्वन्नाह,—त्रीणीत्यादि। वेदवादिनो भाषन्ते इत्यत्रायुर्व्वेदवादिन इति द्रष्टव्यं, न पुनर्व्वेद एव। स्वमतमाह शल्यतन्त्रे इत्यादि—कथं शाखासु विंशत्यधिकशतं पूर्य्यन्ते तदाह एकैकस्यान्त्वित्यादि।—तलकूर्च्चगुल्फेत्यादि। तले पादतले पञ्चशलाका, तत्प्रवन्धनमेकमस्थि।

जानुन्येकं। एकमूराविति। त्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थिबाहू च व्याख्यातौ। श्रोण्यां पञ्च, तेषां गुदभगनितम्बेषु चत्वारि। त्रिकसंश्रितमेकं। पार्श्वे षट्त्रिंशदेवमेकस्मिन् द्वितीयेऽप्येवं। पृष्ठे त्रिंशत्। अष्टावुरसि। द्वे अक्षकसंज्ञे। ग्रीवायां नवकं। कण्ठनाड्याञ्चत्वारि। द्वे हन्वोः। दन्ता द्वात्रिंशत्। नासायां त्रीणि। एकं तालुनि। गण्डकर्णशङ्खेष्वेकैकं। षट्शिरसि।

एतानि पञ्चविधानि भवन्ति। तद्यथा। कपालरुचकतरुणवलयनलकसंज्ञानि। तेषां जानुनितम्बांसगण्डतालुशङ्खशिरःसु कपालानि। दशनास्तु रुचकानि घ्राणकर्णग्रीवाक्षिकोषेषु तरुणानि। पाणिपादपार्श्वपृष्ठोदरोरस्सु वलयानि। शेषाणि नलकसंज्ञानि ॥ ५ ॥

द्वे द्वे कूर्चगुल्फयोरिति दश। त्रिंशच्चतुष्केण सविंशमेकशतं। यथा श्रोणिपार्श्वपृष्ठोदरोरःसु सप्तदशोत्तरं शतं पूर्य्यते, तदाह श्रोण्यां पञ्चेत्यादि।—श्रोण्यां पञ्चेति यदुक्तं, तस्यैव विवरणमाह,—तेषामित्यादि। गुदभगनितम्बद्वये चत्वारि एवं श्रोणिशतपञ्चकमारभ्य अक्षकाश्रितद्वयं यावत् सर्व्वैक्ये सप्तदशोत्तरं शतं पूर्य्यते। ग्रीवायां प्रत्यूर्द्ध्वं घना त्रिषष्टिस्तथाह ग्रीवायामित्यादि।—गण्डकर्णसंख्येष्वित्यत्र गण्डौ च कर्णौ शंखौ चेति विग्रहे षड्स्थोनि भवन्ति। एतानि पञ्चविधानि भवन्तीत्यादि। कपालानि कर्परसंज्ञानि। दशना दन्ता इत्यर्थः। तरुणानि तरुणसंज्ञानि। वलयानि वलयसंज्ञानि। अस्थ्नां स्थानविशेषेण धर्म्मविशेषन्नामविशेषः, पञ्चविधानि शेषाणि नलकसंज्ञानीति हस्तपादाङ्गुलितलकूर्चगलकादिषु। तदुक्तं भोजे। "हस्तपादाङ्गुलितले कूर्चेषु मनिवन्धयोः। वाहुजङ्घाद्वये चापि जानीयान्नलकानि तु" नामविशेषकथनं रचनाविशेषज्ञापनार्थं ॥ ५ ॥

भवन्ति चात्र।

अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवं॥
तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणां।
अस्थीनि न विनश्यन्ति साराण्येतानि देहिनां॥
मांसान्यत्र निबद्धानि सिराभिः स्नायुभिस्तथा।
अस्थीन्यालम्बनं कृत्वा न शीर्य्यन्ते पतन्ति वा॥

सन्धयस्तु द्विविधाश्चेष्टावन्तः स्थिराश्च।

शाखासु हन्वोः कट्याञ्च चेष्टावन्तस्तु सन्धयः।
शेषास्तु सन्धयः सर्व्वे विज्ञेया हि स्थिरा बुधैः॥

सङ्ख्यातस्तु दशोत्तरे द्वे शते तेषां शाखास्वष्टषष्टिरेकोनषष्टिः कोष्ठे ग्रीवां प्रत्यूर्द्ध्वं त्र्यशीतिः। एकैकस्यां पादाङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे ते चतुर्द्दश। जानुगुल्फवङ्क्षणेष्वेकैकः। एवं सप्तदशैकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थिबाहू च व्याख्यातौ। त्रयः कटीकपालेषु। चतुर्व्विंशतिः पृष्ठवंशे। तावन्त एव पार्श्वयोः। उरस्यष्टौ तावन्त एव ग्रीवायां। त्रयः

शरीरधारणविषये अस्थ्नां प्राधान्यं दर्शयन्नाह,—भवन्ति चात्रेत्यादि। अस्थ्याश्रितान् सन्धीनाह,—सन्धयस्तु इत्यादि। चेष्टावन्तश्चलाः, स्थिरा अचलाः, कट्याञ्चेति चकारात् ग्रीवायामपि चलाः। शाखासु अष्टषष्टेर्व्विवरणमाह—एकैकस्यामित्यादि।—पादाङ्गुष्ठेऽस्थित्रितयान्वितेऽपि सन्धिद्वयमेव स्यात्। हस्ताङ्गुष्ठेऽस्थित्रितयसंयुक्तेऽपि सन्धिद्वयमेव गणनीयं। तृतीयस्य हस्ताङ्गुष्ठसम्बन्धिनोऽस्थिबन्धसन्धावेवान्तर्भावात्। इदानीं शाखासन्धीनभिधाय कोष्ठसन्धीनूर्द्ध्वाङ्गभागसन्धींश्च दर्शयन्नाह,—त्रयः कटीत्यादि। तावन्त एव ग्रीवायां अष्टावित्यर्थः। त्रयः कण्ठे गलनलकास्थोनि। नाडीषु

कण्ठे। नाड़ीषु हृदयक्लोमनिबद्धास्त्वष्टादश। दन्तपरिमाणा दन्तमूलेषु। एकः काकणके नासायाञ्च। द्वौ वर्त्ममण्डलजौ नेत्राश्रयौ। गण्डकर्णशङ्खेष्वेकैकः। द्वौ हनुसन्धौ। द्वावुपरिष्टाद् भ्रुवोः शङ्खयोश्च। पञ्च शिरःकपालेषु। एको मूर्द्धि ॥६॥

त एते सन्धयोऽष्टविधाः। कोरोदूखलसामुद्गप्रतरतुन्नसेवनी वायसतुण्डमण्डलशङ्खावर्त्ताः। तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः। कक्षावङ्क्षणदशनेषूदूखलाः। अंसपीठगुदभगनितम्बेषु सामुद्गाः। ग्रीवापृष्ठवंसयोः प्रतराः। शिरःकटीकपालेषु तुन्नसेवनी। हन्वोरुभयतस्तु वायसतुण्डाः। कण्ठहृदयनेत्रक्लोमनाड़ीषु मण्डलाः। श्रोत्रशृङ्गाटकेषु शङ्खावर्त्ताः। तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः।

अस्थ्नान्तु सन्धयो ह्येते केवलाः परिकीर्त्तिताः।
पेशीस्नायुसिराणान्तु सन्धिसङ्ख्या न विद्यते॥

कण्ठपार्श्वनाड़ीषु हृदयक्लोमनिबद्धासु अन्नपचनवहासु नलकास्थिसंज्ञका—स्त्वष्टादश। काकनकं गलमणिघटिकेति लोके तत्रैकः, नासायाञ्चैकः, द्वौ वर्त्ममण्डलयोस्तरुणास्थिसन्धौ च गण्डौ च कर्णौ च सङ्खौ चेति विग्रहे षट् सन्धयः। सङ्खयोश्चेत्यत्राप्युपरिष्टाद् द्वाविति सम्बन्धनीयं। तदुक्तं "ग्रीवास्वष्टौ त्रयः कण्ठे कण्ठनाड्यां नवद्वयं। वर्त्ममण्डलगण्डाभ्यां कर्णशङ्खहनुद्वये। भ्रुशङ्खद्वितयस्योर्द्धं सप्त सप्त द्वयं द्वयं। कपाले पञ्चमुर्द्ध्न्येको नासाकाकनयोर्द्वयं। द्वात्रिंशता त्र्यशीतिः स्यादेवं दन्ताश्रितैः सह" ॥ ६ ॥

तत्र ते सन्धय इत्यादि।—यद्यप्येषां नामभिरेवाकृतो व्याख्यातस्तथापि केषाञ्चित् सन्धीनां सुखबोधनार्थं आकृतिर्लिख्यते। कोरो नाम गर्भस्तदाकृतयः कोराः, कोरः कलिका तदाकृतय इत्यन्ये। उदूखलस्तण्डुलखण्डनोप-

नव स्नायुशतानि तासां शाखासु षट् शतानि। द्वे शते त्रिंशच्च कोष्ठे। ग्रीवां प्रत्यूर्द्धं सप्ततिः। एकैकस्यान्तु पादाङ्गुल्यां षट् निचितास्तास्त्रिंशत्। तावत्य एव तलकूर्च्चगुल्फेषु। तावत्य एव जङ्घायां। दशजानुनि। चत्वारिंशदूरौ। दश वङ्क्षणे। शतमध्यर्द्धमेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतर-सक्थिबाहू च व्याख्यातौ। षष्टिः कट्यां। अशीतिः पृष्ठे। पार्श्वयोः षष्टिः। उरसि त्रिंशत्। षट्त्रिंशद् ग्रीवायां। मूर्द्धि चतुस्त्रिंशत्। एवं नव स्नायुशतानि व्याख्यातानि॥ ७॥

भवन्ति चात्र।

स्नायुश्चतुर्व्विधा विद्यात्तास्तु सर्व्वा निबोध मे।
प्रतानवत्यो वृत्ताश्च पृथ्वाश्च शुषिरास्तथा॥
प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ।
वृत्तास्तु कण्डराः सर्व्वा विज्ञेयाः कुशलैरिह॥
आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु।

योगी, तदाकृतयः सन्धयः उदूखलाः। समुद्गः सम्पुटस्तदाकृतयः सामुद्गाः। प्रतरत्यनेनेति प्रतरो भेलकः, तदाकृतयः प्रतराः। मण्डलो मण्डलाकृतिः। शेषानाञ्च नामभिरेवाकृतयो ज्ञेयाः। अस्थिमात्राश्रिताः सन्धयोऽभिहिताः। नान्याश्रिताः सन्धय इति दर्शयन्नाह, अस्थ्नान्त्वित्यादि।—यथा शाखासु स्नायूनां षट्शतानि पूर्य्यन्ते, तथाह एकैकस्यान्त्वित्यादि।—षट् निचिता इति षट्स्नायवो निबद्धा इत्यर्थः। कोष्ठस्थाः कथ्यन्ते। षष्टिः कट्यामित्यादि।—षष्टिः कट्यामिति ग्रीवां प्रत्यूर्द्धस्थाः कथ्यन्ते। महास्नायोस्तु कण्डरेति संज्ञा॥ ७॥

भवन्ति चात्रेत्यादि।—वृत्ता वर्त्तुला। तासाञ्च सर्व्वशरीरावयवविबन्धनं दर्शयन्नाह,—नौरित्यादि।—दृयुक्ता प्राणिसहिता, सुसमाहिता सुघ-

पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ ॥
नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता।
भारक्षमा भवेदप्सु न्नृयुक्ता सुसमाहिता ॥
एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः।
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः ॥
नह्यस्थीनि न वा पेश्यो न सिरा न च सन्धयः।
व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणं ॥
य स्नायूः प्रविजानाति बाह्याश्चाभ्यन्तरास्तथा।
स गूढं शल्यमाहर्त्तुं देहाच्छक्नोति देहिनां ॥

पञ्च पेशीशतानि भवन्ति। तासां चत्वारि शतानि शाखासु। कोष्ठे षट्षष्टिः। ग्रीवां प्रत्यूर्द्ध्वञ्चतुस्त्रिंशत्।

एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश। दश-प्रपदे। पादोपरि कूर्च्चसन्निविष्टास्तावत्य एव। दश गुल्फ-तलयोः। गुल्फजान्वन्तरे विंशतिः। पञ्च जानुनि। विंशति-रूरौ। दश वङ्क्षणे। शतमेवमेकस्मिन् सक्थ्नि भवन्ति। एते-नेतरसक्थिबाहू च व्याख्यातौ। तिस्रः पायौ। एका मेढ्रे। सेवन्याञ्चापरा। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वस्ति-

टिता। यथा स्नायुर्व्यापादिता सती शरीरिणं पुरुषं हन्ति न तथा अस्थ्यादीनि निहन्युः। पञ्चपेशीशतानीत्यादि। मांसावयवसङ्घातः पर-स्परं विभक्तः पेशीत्युच्यते। गयी तु कोष्ठे षष्टिः ग्रीवां प्रत्यूर्द्ध्वं चत्वारिंश-दिति पठति। एकैकस्यान्त्वित्यादि।—प्रपदं पादाग्रं। कोष्ठगता आह तिस्रः पायोरित्यादि।—गयी तु एकामेढ्रसेवन्यां द्वे अपरे वृषणयोः स्फिचोश्च द्वयोर्दश। तिस्रो वस्तिसंज्ञका, गुदे द्वे, वस्तिशिरसिसमोदर-

शिरसि। पञ्चोदरे। नाभ्यामेका। पृष्ठोर्द्धसन्निविष्टाः पञ्च पञ्च दीर्घाः। षट्पार्श्वयोः। दश वक्षसि। अक्षकांसौ प्रति समन्तात् सप्त। द्वे हृदयामाशययोः। षट् यकृत्प्लीहोण्डुकेषु। ग्रीवायाञ्चतस्रः। अष्टौ हन्वोः। एकैका काकलकगलयोः। द्वे तालुनि। एका जिह्वायां। ओष्ठयोर्द्वे। घोणायां द्वे। द्वे नेत्रयोः। गण्डयोश्चतस्रः कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि।

सिरास्नायुस्थिपर्व्वाणि सन्धयश्च शरीरिणां।
पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः॥ ८॥

स्त्रीणान्तु विंशतिरधिका। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे मुखाश्रिते वाह्ये च प्रवृत्ते द्वे। गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति।

फलके। यकृदादिभिः सह नाभ्यामेका। पार्श्वयोः पृष्ठे सन्धिनिविष्टाः पञ्चदीर्घा दश वक्षसि। अक्षकांशौ प्रति सर्व्वतः सप्त। द्वे हृदि एका आमाशये द्वे अभ्यन्तरतः कोष्ठे इति कोष्ठे षष्ठिं पठति, वृद्धवाग्भटोऽपि कोष्ठे षष्ठिमेवाह,—ग्रीवां प्रतूर्द्धगा आह ग्रीवायामित्यादि। गयी तु ग्रीवायाञ्चतस्रः, एका कण्ठे तथा फलकेऽप्येका, तालूनि द्वे, रसनायां षट् अधरयोर्द्वे घोनायाञ्च द्वे द्वे कर्णयोः प्रत्येकं हन्वोश्चतस्रः, अक्ष्णो द्वे, अणिके चतस्रः, मूर्द्धनि षड़ित्यूर्द्धकाये चत्वारिंशत् पठति॥ ८॥

अधिकाया विंशतेर्व्विवरणमाह, स्त्रीणान्त्वित्यादि।—अपत्यपथे योनौ चतस्रः। चतसृणामेव विवरणमाह तासामित्यादि, मुखाश्रिते योनिमुखाश्रिते। अभ्यन्तरतः प्रसृते योणिः अभ्यन्तरतः प्रसारं प्राप्ते। मूत्रस्रोतः स्वरूपे

तासां बहलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्ण-कर्कशभावाः सन्ध्यस्थिसिरास्नायुप्रच्छादका यथादेशं स्वभावत एव भवन्ति ॥ ८ ॥

भवन्ति चात्र।

पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षणमुष्कजाः।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः॥
मर्म्मसिराधमनीस्रोतसामान्यत्र प्रविभागः॥
शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा प्रकीर्त्तिता।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता॥
यथा रोहितमत्स्यस्य मुखं भवति रूपतः।
तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः॥
आभुग्नोऽभिमुखः शेते गर्भो गर्भाशये स्त्रियाः।

इत्यर्थः। बाह्ये निर्गते, वृत्ते वर्त्तुले। योनिकर्णिकास्रोतः पार्श्वद्वयगतत्वेन द्वे मांसपेश्यौ, गर्भच्छिद्रसंश्रिताविति गर्भमार्गमाश्रितास्तिस्रः आवर्त्तत्रयरूपेण तृतीये चावर्त्ते, मत्स्यमुखाकारा गर्भशय्या। तासां शुक्रार्त्तव प्रवेशिन्यश्च तिस्रः पेश्यः। का गर्भशय्येत्याह पित्तपक्वाशययोरित्यादि। इदानीं तासां पेशीनां स्थानवशान्नानारूपत्वमाह तासाञ्चेत्यादि, तासां पेशीनां, बहुला बहुतराः, पेलवा अल्पाः, अणवः सूक्ष्माः, तद्विपरीताः स्थूलाः, पृथवो विस्तीर्णाः, वृत्ता वर्त्तुलाः, ह्रस्वा अदीर्घाः। दीर्घा आयताः, स्थिरा कठिना, मृदवः कोमलाः, श्लक्ष्णाः स्पर्शसुखाः, तद्विपरीताः कर्कशाः॥ ८॥

केचित्तन्त्रकारा स्त्रीणां मेढ्रमुष्काभावात् तदाश्रितानां पेशीनां अन्यत्रावस्थानं पठन्ति, तन्मतमाह भवन्ति चात्रेत्यादि। लक्षणेति लक्ष्यते ज्ञायते पुमाननेनेति लक्षणं लिङ्गं शिश्नमिति यावत्। फलं गर्भाशयः, ता इति पेश्यः। गयी तु इमं तन्त्रान्तरीयश्लोकं न पठति। किन्तु एवमेतानि पञ्चपेशीशतानीत्यत्र पुंसामिति पदं पठित्वा पुंसामेव पञ्चपेशीशतानि

स योनिं शिरसा याति स्वभावात् प्रसवं प्रति ॥
त्वक्पर्य्यन्तस्य देहस्य योऽयमङ्गविनिश्चयः ।
शल्यज्ञानादृते नैष वर्ण्यतेऽङ्गेषु केषुचित् ॥
तस्मान्निःसंशयं ज्ञानं हर्त्त्रा शल्यस्य वाञ्छता ।
शोधयित्वा मृतं सम्यग् द्रष्टव्योऽङ्गविनिश्चयः ॥
प्रत्यक्षतो हि यद्दृष्टं शास्त्रदृष्टञ्च यद्भवेत् ।
समासतस्तदुभयं भूयो ज्ञानविवर्द्धनं ॥ १० ॥

तस्मात् समस्तगात्रमविषोपहतमदीर्घव्याधिपीड़ितमवर्षशतिकं निःसृष्टान्त्रपुरीषं पुरुषमवहन्त्यामापगायां निबद्धं पञ्जरस्थं मुञ्जवल्कलकुशशणादीनामन्यतमेनावेष्टिताङ्गमप्रकाशे देशे कोथयेत् सम्यक् प्रकुथितञ्चोद्धृत्य ततो देहं सप्तरात्रादुशीरवाल-

स्त्रीणान्तु तिसृभिरूनानि शतानि पञ्चशतानीति व्याख्याति। अत्रार्थे च भोजवाक्यं दृष्टान्ता करोति, तथाच भोजवाक्यं "पञ्चपेशीशतान्येव स्त्रीवर्ज्जं विद्धि भूमिप ! अतश्च तिस्रो हीयन्ते स्त्रीणां सेफसि मुष्कयोरिति। परिशिष्टमर्म्मशिरादिव्याकरणं चास्तीति मन्यमान आह,—मर्म्मेत्यादि। अन्यत्रेति प्रत्येकमर्म्मनिर्द्देशव्याकरणे। गर्भशय्यामनन्तरमावर्त्तं प्रतिपादयितुमाह,—शङ्खनाभ्याकृतिरित्यादि। तत् संस्थानामिति अल्पमुखामन्तर्म्महासुषिरामित्यर्थः। मूढ़गर्भोद्धरणार्थं तत्र गर्भस्थितिस्वरूपमाह,— आभुग्न इत्यादि। आभुग्नः सङ्कुचिताङ्गः, स्वभावात् पूर्व्वकर्म्माक्षेपात्। इदानीं शल्यतन्त्रस्योत्कर्षं दर्शयन्नाह,—त्वक्पर्य्यन्तस्येत्यादि। सर्व्वावयवपरिमाणं प्रत्यक्षलक्ष्यं, संशयच्छेदनाय स्यात्। तस्मादुपायं दर्शयन्नाह,—तस्मान्निःसंशयेत्यादि ॥ १० ॥

कथं पुनः शास्त्रदृष्टिं प्रत्यक्षतो दृश्यते ? इत्याह तस्मात् समस्तगात्रमित्यादि। अङ्गहीने आगमोक्तावयवसंख्याद्यप्रत्ययात्। विषोपहते विष-

वेणुवल्कलकूर्चानामन्यतमेन शनैः शनैरवघर्षयंस्त्वगादीन् सर्व्वा-
नेव वाह्याभ्यन्तराङ्गप्रत्यङ्गविशेषान् यथोक्तान् लक्षयेच्चक्षुषा।

श्लोकौ चात्र भवतः।

न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मतमो विभुः।
दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च॥
शरीरे चैव शास्त्रे च दृष्टार्थः स्याद्विशारदः।
दृष्टश्रुताभ्यां सन्देहमवापोह्याचरेत् क्रियाः॥ ११ ॥

त्वाला विशीर्णत्वगादि स्यात्। दीर्घव्याधिते हि त्वगादिमानासम्भवः। मुञ्जाद्यवेष्टने मत्स्यादिभक्षितत्वादसम्पूर्णावयवता, अपक्करण्ये जलरयेण भ्रस्यति। प्रकाशे गृध्रादिभक्षणेन भयं। त्वक्पर्य्यन्तो देहश्चक्षुरिन्द्रियकल्पो न चेतन्न इत्याह,—न शक्य इत्यादि। विभुरात्मा चक्षुषा द्रष्टुं न शक्यः, यतः सूक्ष्मतमः। दृश्यते ज्ञानचक्षुर्भिरिति सद्गुरूपदेशज ज्ञानान्येव चक्षुंषि तैर्दृश्यते। तपांसि चान्द्रायणादीनि तानि चक्षुंषि दृष्टयस्तैरपि च शास्त्रतः प्रत्यक्षतश्च दर्शनं सन्देहापोहकारणं तदाह,—शरीरे चैवेत्यादि। अवापोह्यति निराकृत्येत्यर्थः॥ ११ ॥

इति शारीरे निबन्धसंग्रहे पञ्चमोऽध्यायः।

अथ षष्ठोऽध्यायः।

अथातः प्रत्येकमर्म्मनिर्द्देशं शारीरं व्याख्यास्यामः॥

सप्तोत्तरं मर्म्मशतं। तानि मर्म्माणि पञ्चात्मकानि। तद्-

शारीरसंख्याव्याकरणे हि मांसशिरादिव्याकरणमभिहितं। मर्म्माणि च मांसशिरादिसंश्रितान्यतस्तदनन्तरं मर्म्माणां निर्द्देशो युज्यते इत्याह,— अथात इत्यादि। प्रत्येकशब्दादग्रे मांसादिशब्दो लुप्तो द्रष्टव्यस्तेन प्रत्येक-

यथा मांसमर्म्माणि। सिरामर्म्माणि। स्नायुमर्म्माणि। अस्थिमर्म्माणि। सन्धिमर्म्माणि चेति। न खलु मांससिरास्नाय्वस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मान्नोपलभ्यन्ते ॥१॥

तत्रैकादश मांसमर्म्माणि। एकचत्वारिंशत् सिरामर्म्माणि। सप्तविंशतिः स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि तदेतत् सप्तोत्तरं मर्म्मशतं ॥ २ ॥

मांसादिमर्म्माणां निर्द्देशो विवरणं यस्मिन् तथा। तेषां संख्यामाह,—सप्तोत्तरमित्यादि। पञ्चात्मकानि पञ्चप्रकाराणि। तान्येव पञ्चप्रकाराण्याह,—तद्यथेत्यादि। ननु कथं पञ्चैव मर्म्माणि नाधिकानीति दर्शयन्नाह,—नखल्वित्यादि। ननु श्रोतःप्रभृतीनामपि मारणात्मकत्वात् मर्म्मत्वमस्त्येव तत्कथं मांसादिव्यतिरेकेणान्यानि मर्म्माणि नोपलभ्यन्ते इत्युक्तं। उच्यते—मारयन्तीति मर्म्माण्युच्यते। श्रोतसि च क्षतेऽपि नावश्यतया मरणं यतो वक्ष्यति "श्रोतो विद्धन्तु प्रत्याख्यायोपचरेदिति। यद्येवं तर्हि रुक्करवैकल्यकराणाममारणात्मकत्वात् मर्म्मत्वं न स्यादिति चेत् तन्नरुक्करवैकल्यकरेष्वपि अग्निसोमादिप्राणानां मध्ये कस्यचित् प्राणस्य हानेः अथवा श्रोतःप्रभृतीनि मांसादीन्यव्यतिरिच्य वर्त्तन्ते। यतो मांसादिष्वेव श्रोतःप्रभृतीनि न सन्ति। तस्मान्मांसादीनि पञ्चैव मर्म्माणीति ॥ १ ॥

इदानीं मांसादिभेदेन मर्म्मसंख्यां निर्द्दिशन्नाह,—तत्रेत्यादि। एकादशेति चत्वारि तलहृदयानि। तावन्त्येवेन्द्रवस्तीनि। गुदमेकं। द्वे स्तनरोहिते। एवमेकादशमांसमर्म्माणि। एकचत्वारिंशदिति चतस्रो धमन्यः, अष्टौ मातृकाः। चत्वारि शृङ्गाटकानि, द्वे अपाङ्गे, एका स्थपणी, द्वौ कर्णौ, द्वे स्तनमूले, द्वावपस्तम्भौ, द्वावपलापौ, एकं हृदयं, एका नाभिः, द्वे पार्श्वसन्धी, द्वौ बृहत्यौ, चत्वारि लोहिताक्षाणि, चतस्र ऊर्व्व्यः, एवमेकचत्वारिंशत् शिरा मर्म्माणि। सप्तविंशतिरिति। चतस्रः आणयः, द्वौ विटपौ, द्वौ कक्षधरौ, चत्वारः कूर्च्चाः, चत्वारि कूर्च्चशिरांसि, एको वस्तिः, चत्वारि क्षिप्राणि, द्वावंसौ, द्वे विधुरे, द्वावुत्क्षेपौ, एवं सप्त-

तेषामेकादशैकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि-बाहू च व्याख्यातौ। उदरोरसोर्द्वादश चतुर्दश पृष्ठे। ग्रीवां प्रत्यूर्द्धं सप्तत्रिंशत्।

तत्र सक्थिमर्म्माणि क्षिप्रतलहृदयकूर्चकूर्चशिरोगुल्फेन्द्र-वस्तिजान्वाण्यूर्व्वीलोहिताक्षाणि विटपञ्चेति। एतेनेतरं सक्थि व्याख्यातं॥

उदरोरसोस्तु। गुदवस्तिनाभिहृदयस्तनमूलस्तनरोहिता-पलापान्यपस्तम्भौ चेति। पृष्ठमर्म्माणि तु कटीकतरुणकुकु-न्दरनितम्बपार्श्वसन्धिवृहत्यंसफलकान्यंसौ चेति। बाहु-मर्म्माणि तु क्षिप्रतलहृदयकूर्चकूर्चशिरोमणिबन्धेन्द्रवस्तिकूर्प-राण्यूर्व्वीलोहिताक्षाणि कक्षधरञ्चेति। एतेनेतरो बाहु-र्व्याख्यातः।

जत्रूर्द्ध्वं मर्म्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे कृका-टिके द्वे विधुरे द्वौ फणौ द्वावपाङ्गौ द्वावावर्त्तौ द्वावुत्क्षेपौ द्वौ शङ्खावेका स्थपनी पञ्च सीमन्ताश्चत्वारि शृङ्गाटकान्येकोऽधि-पतिरिति।

विंशति स्नायुमर्म्माणि। अष्टाविति, द्वे कटीकतरुणे, द्वौ नितम्बौ, द्वे अंस-फलके, द्वौ शङ्खौ, एवमष्टावस्थिमर्म्माणि। विंशतिरिति; द्वे जानुनी, द्वौ कुर्परौ, पञ्च सीमन्ताः, एकोऽधिपतिः, द्वौ गुल्फौ, द्वौ मणिबन्धौ, द्वे कुकुन्दरे। द्वावावर्त्तौ, द्वे कृकाटिके, एवं विंशतिसन्धिमर्म्माणि। पुनः सप्तोत्तरं मर्म्मशतमिति, वचनं उपसंहारे प्रयुक्तमतो न पौनरुक्त्यं॥ २॥

मांसादिमर्म्माणां सप्तोत्तरशतसंख्यकानां देशविशेषज्ञानार्थः संख्यया विभज्य शाखाद्याश्रयं निर्द्दिशन्नाह,—तेषामित्यादि। शाखादिषु संख्यया विभक्तानां मर्म्मणां नामान्याह,—तत्रेत्यादि। तत्र क्षिप्रादि एकैकं

तत्र तलहृदयेन्द्रवस्तिगुदस्तनरोहितानि मांसमर्म्माणि।

नीलधमनीमातृकाशृङ्गाटकापाङ्गस्थपनीफणस्तनमूलापला-पापस्तम्भहृदयनाभिपार्श्वसन्धिवृहतीलोहिताक्षोर्व्यः सिरा-मर्म्माणि।

आणिविटपकक्षधरकूर्च्चकूर्च्चशिरोवस्तिक्षिप्रांसविधुरोत्-क्षेपाः स्नायुमर्म्माणि।

कटीकतरुणनितम्बांसफलकशङ्खास्त्वस्थिमर्म्माणि।

जानुकूर्परसीमन्ताधिपतिगुल्फमणिवन्धकुकुन्दरावर्त्तकृका-टिकाश्चेति सन्धिमर्म्माणि।

तान्येतानि पञ्चविकल्पानि मर्म्माणि भवन्ति। तद्यथा। सद्यः प्राणहराणि कालान्तरप्राणहराणि विशल्यघ्नानि वैकल्य-कराणि रुजाकराणीति। तत्र सद्यः प्राणहराण्येकोनविंशतिः। कालान्तरप्राणहराणि त्रयस्त्रिंशत्। त्रीणि विशल्यघ्नानि। चतुश्चत्वारिंशद्वैकल्यकराणि। अष्टौ रुजाकराणीति॥ ३॥

भवन्ति चात्र।

शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरोगुदं।
हृदयं वस्तिनाभी च घ्नन्ति सद्यो हतानि तु॥

गणयितव्यं एवमेकादश। क्षिप्रादीनां लक्षणं आचार्य्यः स्वयमेव अग्रे करिष्यति। अतोऽत्रेमानि न व्याख्यातानि। उदरेत्यादि। गुदादि-हृदयान्तमेकैकं गणयितव्यं। स्तनमूलादीनि द्वे द्वे एवं द्वादश। पृष्ठे-त्यादि—कटीकतरुणादीनि द्वे द्वे एवं चतुर्द्दश। वाह्वित्यादि—अत्रापि क्षिप्रादिकमेकैकं गणयितव्यं तत्रैकादशमांसमर्म्माणीत्यादि वाक्यैः प्रागु-द्दिष्टानां मांसादिमर्म्मणां नामान्याह,—तत्रेत्यादि। एतेषां मांसादि-मर्म्मणां संख्या प्रागेवात्राध्याये व्याख्याता, तेनात्र न व्याख्यायन्ते॥ ३॥

वक्षोमर्म्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः।
कटीकतरुणे सन्धी पार्श्वजौ बृहती च या॥
नितम्बाविति चैतानि कालान्तरहराणि तु।
उत्क्षेपौ स्थपनी चैव विशल्यघ्नानि निर्द्दिशेत्॥
लोहिताक्षाणि जानूर्व्वी कूर्च्चा विटपकूर्परा:।
कुकुन्दरे कक्षधरे विधुरे सकृकाटिके॥
अंसांसफलकापाङ्गा नीले मन्ये फणौ तथा।
वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैव च॥
गुल्फौ द्वौ मणिबन्धौ द्वौ द्वे द्वे कूर्च्चशिरांसि च।
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान्॥
क्षिप्राणि विद्धमात्राणि घ्नन्ति कालान्तरेण च॥ ४॥

तान्येतानि पञ्चेत्यादिना यानि मर्म्माणि उक्तानि, तान्येव सुखपाठार्थम् श्लोकैर्द्दर्शयन्नाह,—भवन्तीत्यादि। चत्वारि शृङ्गाटकानि, एको अधिपतिः, शङ्खौ द्वौ, कण्ठशिरा अष्टौ, मातृका एकोनविंशति, सद्योघ्नानि। वक्ष इति। वक्षमर्म्माणीति स्तनमूले द्वे, स्तनरोहिते द्वे, अपालापौ द्वौ, अपस्तम्भौ द्वौ, एवमष्टौ वक्षोमर्म्माणि। सीमन्ताः पञ्चतलानि चत्वारि, क्षिप्राणि चत्वारि, इन्द्रवस्तयश्चत्वारः, द्वे कटीकतरुणे। द्वे पार्श्वसन्धी, द्वौ बृहत्यौ, द्वौ नितम्बौ, एवं त्रयस्त्रिंशत् कालान्तरप्राणहराणि। उत्क्षेपाविति, उत्क्षेपौ द्वौ, एका स्थपनी, एवं त्रीणि विशल्यघ्नानि। लोहितेति—चत्वारि लोहिताक्षनामधेयानि, आणयश्चतस्रः, जानुनी द्वे चतस्र ऊर्व्व्यः, चत्वारः कूर्च्चा, विटपादीनां आवर्त्तान्तानां प्रत्येकं द्वौ द्वौ, इति चतुश्चत्वारिंशद् वैकल्यकराणि। गुल्फाविति द्वे द्वे कूर्च्चशिरांसि चेति, द्वे कूर्च्चशिरसी हस्तयोः, द्वे कूर्च्चशिरसी पादयोः, एवं चत्वारि कूर्च्चशिरांसि सद्यः प्राणहराणि। भेदेन यत् पञ्चप्रकारत्वमुक्तं तद् यद्यपि वक्ष्यमाणेन मर्म्मणि स्वल्पविषयार्थे-

मर्म्माणि नाम—मांससिरास्नाय्वस्थिसन्धिसन्निपातास्तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति तस्मान्मर्म्मस्वभिहिता-स्तांस्तान् भावानापद्यन्ते ।

तत्र सद्यः प्राणहराण्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्षप-यन्ति । कालान्तरप्राणहराणि सौम्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्रमेण च सोमगुणेषु कालान्तरेण क्षपयन्ति । विशल्य-प्राणहराणि वायव्यानि शल्यमुखनिरुद्धो यावदन्तर्व्वायुस्तिष्ठति तावज्जीवत्युद्धृतमात्रे तु शल्ये मर्म्मस्थानाश्रितो वायुर्निष्क्रा-मति तस्मात् सशल्यो जीवत्युद्धृतशल्यो म्रियते । वैकल्य-कराणि सौम्यानि सोमो हि स्थिरत्वाच्छैत्याच्च प्राणावलम्बनं करोति । रुजाकराण्यग्निवायुगुणभूयिष्ठानि विशेषतश्च तौ रुजाकरौ । पाञ्चभौतिकीञ्च रुजामाहुरेके ॥ ५ ॥

मुदाहरन्तीत्यादि श्लोकप्रतिपादितेन प्राणहरवैकल्यकरेऽपि हितेन बाध्यते, तथापि न दोषो भिषजामादरख्यापनार्थत्वात् तु हितस्येति ॥ ४ ॥

इदानीं प्राणहरादिकं कर्म्म मर्म्मणां संयुक्तिकं दर्शयन्नाह,—मर्म्माणी-त्यादि । सन्निपातः संश्लेषः अत्यन्तमिश्रीभाव इति यावत् । सर्व्वेषां सर्व्वत्र मर्म्मणि संश्लेषेऽपि मांसमर्म्मशिरामर्म्मादिव्यवहार आधिक्यमाश्रित्य पार्थि-वादि व्यवहारवत्, स्वभावत इति हेत्वन्तरनिरपेक्षतया ; प्राणा अग्न्यादयः, तांस्तानिति इन्द्रियार्थेष्वसंप्राप्तिर्म्मनोबुद्धिविपर्य्यय इत्यादिकानत्रैवोक्तान् अन्ये तु भ्रमः प्रलापः, पतनं प्रमोह इत्यादिकान् सूत्रस्थानोक्तान् आहुः । कस्मात् पुनरत्र समानेऽपि प्राणोपघाते सद्यः प्राणहरकालान्तरप्राणहरादिविशेष इत्याह,—तत्रेत्यादि । यद्यपि सोममारुततेजांसि रजःसत्त्वतमांसि च मर्म्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते इत्युक्तं, तथापि आग्नेयेषु मर्म्मा-धिकं तेजः, सौम्येषु सोम इत्यादि ज्ञेयः । अग्निगुणेष्वाशुकारीत्वादित्यर्थः । ताविति अग्निवायू विशेषेण रुजाकरौ । सामान्येन पुनः सोमोऽपि कफरूपी

केचिदाहुर्म्मांसादीनां पञ्चानामपि समस्तानां विवृद्धानाञ्च समवायात् सद्यःप्राणहराणि। एकहीनानामल्पानां वा कालान्तरप्राणहराणि। द्विहीनानां विशल्यप्राणहराणि। त्रिहीनानां वैकल्यकराणि। एकस्मिन्नेव रुजाकराणीति। यतश्चैवमतोऽस्थिमर्म्मस्वप्यभिहतेषु शोणितागमनं भवति।
चतुर्व्विधा यास्तु सिराः शरीरे प्रायेण ता मर्म्मसु सन्निविष्टाः।
स्नाय्वस्थिमांसानि तथैव सन्धीन्सन्तर्प्य देहं प्रतिपालयन्ति॥ ६॥

वेदनासम्भवात्, रुजायामेव द्वितीयमेकीयमतं दर्शयन्नाह,—पाञ्चभौतिकीमित्यादि॥ ५॥

सद्यः प्राणहरादिविशेषस्य द्वितीयदर्शने व्यवहारं दर्शयन्नाह,—केचिदित्यादि। यद्यपि गुदवस्तिनाभिहृदयेषु सद्यः प्राणहरमर्म्मसु। अस्थीनि न व्यक्तानि तथाप्यव्यक्तानामप्यां शक्तिरूपेणावस्थानात् पञ्चानां समवाय उत्पद्यत एव, एकहीनानामित्यत्र हीनशब्दोऽत्यन्ताभावे वर्त्तते नतु न्यूनत्वे, एकहीनानि पुनः स्तनमूलापलापापस्तम्भसीमन्तकटीकतरुणपार्श्वसन्धिवृहतीनितम्बानि मांसहीनानि। स्तनरोहिततलहृदयचिप्रेन्द्रवस्तयोऽस्थिहीनाः। द्विहीनानि पुनः उत्क्षेपौ मांससन्धिहीनौ, स्थपनीमांसशिरास्नायुहीना, त्रिहीनानि पुनः लोहिताक्षाणि, स्नायुसन्ध्यस्थिहीनानि जानुनी, मांसशिरास्नायुहीने, ऊर्व्वोऽस्थिमांसस्नायुहीनाः, विटपौ मांसशिराऽस्थिहीनौ, कूर्परौ मांसशिरास्नायुहीनौ, कुकुन्दरे मांससन्धिशिराहीने, कक्षधरे शिरास्थिसन्धिहीने, विधुरे मांसशिरासन्धिहीने, कृकाटिके मांसशिरास्नायुसन्धिहीने, अंसौ मांसशिरासन्धिहीनौ, अंसफलके मांसस्नायुसन्धिहीने, नीले मन्ये फले च मांससन्ध्यस्थिहीने, आवर्त्तौ मांसशिरास्नायुहीनौ, अपाङ्गौ मांसस्नायुसन्धिहीनौ एकस्मिन्निति मांसादिसंघातादेकस्मिन्नवशिष्टे रुजाकराणि भवन्ति। गुल्फमणिबन्धास्ता कूर्च्चशिरांसि मांसशिरास्नाय्वस्थिहीनानि, स्वदर्शने सर्व्वमर्म्मणां मांसशिरास्नाय्वस्थिसन्धिनिपातत्वादेव द्वित्रादिहीनमसम्यक् इत्यर्थः। कुतः स्वदर्शने

ततः क्षते मर्म्मणि ताः प्रवृद्धः समन्ततो वायुरभिस्तृणोति।
विवर्द्धमानस्तु स मातरिश्वा रुजः सुतीव्राः प्रतनोति काये॥
रुजाभिभूतन्तु पुनः शरीरं प्रलीयते नश्यन्ति चास्य संज्ञाः।
अतो हि शल्यं विनिहर्त्तुमिच्छन्मर्म्माणि यत्नेन परीक्ष्य कर्षेत्॥

एतेन शेषं व्याख्यातं।

तत्र सद्यःप्राणहरमन्ते विद्धं कालान्तरेण मारयति। कालान्तरप्राणहरमन्ते विद्धं वैकल्यमापादयति। विशल्यप्राणहरमन्ते विद्धं कालान्तरेण क्लेशयति रुजाञ्च करोति। रुजाकरमतीव्रवेदनं भवति॥ ७॥

सर्व्वाणि सर्व्वत्र सन्तीत्याह,—यत इत्यादि। यतश्चैवं अस्थिविद्धेष्वपि शोणितदर्शनं। भवत्यतः प्रत्यक्षात् प्रमाणात् सर्व्वाणि मांसादीनि सर्व्वत्र मर्म्माणि भवन्तीति ज्ञातव्यं। अतः एतदेव दर्शयन्नाह,—चतुरित्यादि। चतुर्व्विधा इति वातपित्तश्लेष्मरक्तवहाः। मर्म्मस्वित्यादि। एतेन शिराणां स्नायुस्थिमांससन्धिगतत्वं बोधितं, अतएवास्थिविद्धेऽपि शोणितागमनमित्यर्थः॥ ६॥

इदानीं यथैकदेशजेऽपि प्रहारे मर्म्मविद्धस्य क्रमेण सकलशरीरे वातादिदोषव्याप्त्या रुजा चेतनाधातोर्व्वियोगस्तथा दर्शयन्नाह, तत इत्यादि। ताः शिराः, प्रवृद्धो वायुः, समन्ततः अभिस्तृणोति सञ्छादयति, शरीरं प्रलीयते प्रलयं गच्छति शरीरयन्त्रं विघट्टयतीत्यर्थः। तस्मिन् पाञ्चभौतिके शरीरे प्रलीने संज्ञा षष्ठश्चेतनाधातुरपि नश्यति। ताः प्रवृद्ध इत्यत्र तासु वृद्ध इति केचित् पठन्ति व्याख्यानयन्ति च तासु शिरासु वृद्धो वायुः समन्ततः सकलशरीरं अभिस्तृणोति संछादयतीत्यर्थः। एतेनेत्यादि। रुग्भिरूपेण वायोर्लक्षणेन। शेषमिति, दाहादि स्रोतोनिरोधादि च। पित्तश्लेष्मणोर्लक्षणं व्याख्यातमेवेत्यर्थः। तेषां सद्यःप्राणहरादीनां स्वकर्म्म यत् नियतं तत्कारणं विकल्पाभिचारयन्नाह,—तत्रेत्यादि। अन्ते विद्धं समीपे

तत्र सद्यः प्राणहराणि सप्तरात्राभ्यन्तरान्मारयन्ति। कालान्तरप्राणहराणि पक्षान्मासाद्वा। तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति। विशल्यप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति॥

अत ऊर्द्धं प्रत्येकशो मर्म्मस्थानान्यनुव्याख्यास्यामः।

तत्र पादाङ्गुष्ठाङ्गुल्योर्म्मध्ये क्षिप्रं नाम मर्म्म, तत्र विद्धस्याक्षेपकेण मरणं। मध्यमाङ्गुलीमनुपूर्व्वेण मध्ये पादतलस्य तलहृदयं नाम; तत्रापि रुजाभिर्म्मरणं। क्षिप्रस्योपरिष्टादुभयतः कूर्च्चो नाम; तत्र पादस्य भ्रमणवेपने भवतः। गुल्फ-सन्धेरध उभयतः कूर्च्चशिरो नाम; तत्र रुजाशोफौ। पादजङ्घयोः सन्धाने गुल्फो नाम; तत्र रुजः स्तब्धपादता खञ्जता वा।

विद्धं मध्ये विद्धन्तु सद्य एवेत्यर्थः, एतेन पूर्व्वं पूर्व्वं मर्म्मकारणानि परस्य कार्य्यं करोति। एवं परं परमपि मर्म्मातिविद्धादि कारणवशात् पूर्व्वस्य पूर्व्वस्य कर्म्म करोति। अतएव तेष्वित्यादिना क्षिप्राणि कदाचिदाशु मारयन्ति। क्षिप्रप्राणहराणि सप्तरात्राभ्यन्तरात् मारयन्ति, कालान्तरप्राणहराणि पक्षान्मासाद्वा. तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति विशल्य प्राणहराणि वैकल्यकराणि च कदाचिदभिहतानि मारयन्ति॥ ७॥

तत्र सद्य इत्यादि। यद्यपि सद्यः शब्दस्तत्क्षणवाची तथापि सद्यः प्राणहराणीत्यत्र सद्यः शब्दः सप्ताहाभ्यन्तरात् परो ज्ञातव्यः, सप्तरात्रान्मारयन्तीति उक्तत्वात्। तेष्वपीति कालान्तरप्राणहरेष्वपीत्यर्थः। कदाचिदाशु मारयन्ति अभिहतानीति शेषः। अनभिहतानि तु कालान्तरेनैव मारयन्ति, एतच्चोपलक्षणं तेन रुजाकराण्येवं वैकल्यं जनयन्ति। एवं वैकल्यादिष्वपि स्वनियतकर्म्मव्यभिचारः। अत ऊर्द्धमित्यादि—तत्र पादस्येति। स्नायुमर्म्मेदं अर्द्धाङ्गुलं कालान्तरप्राणहरञ्च। मध्यमाङ्गुलीति मध्यमाङ्गुलिमनुलक्षीकृत्य क्रमेण पादतलस्य मध्ये तलहृदयं मांसमर्म्मेदं

पार्ष्णिं प्रति जङ्घामध्ये इन्द्रवस्तिर्नाम; तत्र शोणितक्षये मरणं। जङ्घोर्व्वोः सन्धाने जानुर्नाम; तत्र खञ्जता। जानुन ऊर्द्ध्व-मुभयतस्त्र्यङ्गुलमाणिर्नाम; तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च। ऊरुमध्ये ऊर्व्वी नाम; तत्र शोणितक्षयात् सक्थिशोषः। ऊर्व्या ऊर्द्ध्वमधोवङ्क्षणसन्धेरूरुमूले लोहिताक्षं नाम; तत्र लोहितक्षयेण पक्षाघातः। वङ्क्षणवृषणयोरन्तरे विटपं नाम; तत्र षाण्ड्यमल्पशुक्रता वा भवति। एवमेतान्येकादश-सक्थिमर्म्माणि व्याख्यातानि। एतेनेतरसक्थिबाहू च व्याख्यातौ॥ ८॥

विशेषतस्तु यानि सक्थ्नि गुल्फजानुविटपानि तानि बाहौ मणिबन्धकूर्परकक्षधराणि यथा वङ्क्षणवृषणयोरन्तरे विटपमेवं

अर्द्धाङ्गुलं कालान्तरप्राणहरञ्च। उपरिष्टादित्यत्र द्व्यङ्गुल इति शेषः। उभयत इत्यूर्द्धमधश्च, तत्र कूर्च्चं नाम विद्धि इति शेषः। स्नायुमर्म्मेदं चतुरङ्गुलं वैकल्य-करञ्च। गुल्फेति इदमपि स्नायुमर्म्म एकाङ्गुलं वैकल्यकरञ्च। पादेत्यादि। सन्धिमर्म्मेदं द्व्यङ्गुलप्रमाणं वैकल्यकरञ्च। पार्ष्णिमिति, मांसमर्म्मेदं अर्द्धाङ्गुलं पार्ष्णिं प्रति त्रयोदशेऽङ्गुले स्थितं कालान्तरे प्राणहरञ्च। भोजस्तु द्व्यङ्गुल-प्रमाणमाह,—भोजदर्शनात् गयदासोऽपि मर्म्ममानसूत्रे द्व्यङ्गुलमिन्द्रवस्ति-मर्म्मेति पठित्वा व्याख्याति। जङ्घेत्यादि सन्धिमर्म्मेदं त्र्यङ्गुलप्रमाणं वैकल्यकरञ्च। जानुन इत्यादि। जानुन ऊर्द्ध्वं त्र्यङ्गुले उभयत ऊर्द्ध्वमधश्च स्नायुमर्म्मेदं अर्द्धाङ्गुलं वैकल्यकरञ्च। गयी तु त्र्यङ्गुलमानमेतदाह,— ऊर्व्वीति। शिरामर्म्मेदं अर्द्धाङ्गुलं वैकल्यकरञ्च। ऊर्व्या इति शिरामर्म्मेदं अर्द्धाङ्गुलं वैकल्यकरञ्च। वङ्क्षणेति स्नायुमर्म्मेदं एकाङ्गुलं वैकल्यकरञ्च। एवमिति एतेनैकादशमर्म्मनिर्द्देशेन॥ ८॥

विशेषत इत्यादि। मणिबन्धः पाणिमूलं, कूर्परः कफोणि; कुहनी इति लोके। तस्मिन्निति मणिबन्धादौ। त एवेति गुल्फादि वधजाताः। विशेष-

वक्षःकक्षयोर्म्मध्ये कक्षधरं तस्मिन्विद्धे त एवोपद्रवाः। विशेषतस्तु मणिबन्धे कुण्ठता, कूर्पराख्ये कुणिः, कक्षधरे पक्षाघातः, एवमेतानि चतुश्चत्वारिंशच्छाखासु मर्म्माणि व्याख्यातानि।

अत ऊर्द्ध्वमुदरोरसोर्म्मर्म्मस्थानान्यनुव्याख्यास्यामः।

तत्र वातवर्च्चोनिरसनं स्थूलान्त्रप्रतिवद्धं गुदं नाम मर्म्म; तत्र सद्योमरणं। अल्पमांसशोणितोऽभ्यन्तरतः कट्यां मूत्राशयो वस्तिर्नाम; तत्रापि सद्यो मरणमश्मरीव्रणादृते तत्राप्युभयतो भिन्ने न जीवत्येकतो भिन्ने मूत्रस्रावी व्रणो भवति स तु यत्नेनोपक्रान्तो रोहति। पक्वामाशययोर्म्मध्ये सिराप्रभवा नाभिर्नाम; तत्रापि सद्य एव मरणं। स्तनयोर्म्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्वरजस्तमसामधिष्ठानं हृदयं नाम; तत्र सद्य एव मरणं। स्तनयोरधस्ताद् द्व्यङ्गुलमुभयतः स्तनमूले नाम मर्म्मणी; तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां म्रियते। स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहितौ नाम; तत्र

तस्त्विति कुण्ठता करस्याकर्म्मण्यत्वं। कुणिः सङ्कुचितबाहुमध्यः। एतेनेतरबाहुर्व्याख्यातः। उपसंहारमाह,—एवमित्यादि। अत इत्यादि, तत्रेति, निरसनं प्रेरकं; मांसमर्म्मेदं चतुरङ्गुलं सद्योघाति च। अल्पेति कट्यामित्युपलक्षणं तेन नाभिपृष्ठमुष्कगुदवङ्क्षणसेफांसि गृह्यन्ते, तदुक्तं नाभिपृष्ठमुष्कगुदवङ्क्षणसेफसां एकद्वारसमुत्पन्नो मध्ये वस्तिरधोमुख इति सद्यो मरणं अश्मरीव्रणादृते भवतीति सम्बन्धः,। तत्रापीति अश्मरीनिमित्त इत्यर्थः। उभयतो भिन्ने वस्ताविति शेषः। स्नायुमर्म्मेदं चतुरङ्गुलं सद्योघाति च। पक्वेति शिरामर्म्मेदं चतुरङ्गुलञ्च। स्तनयोरिति शिरामर्म्मेदं कमलमुकुलाकारमधोमुखं चतुरङ्गुलञ्च स्तनयोरधस्तादिति उभयतः स्तनयो-

लोहितपूर्णकोष्ठतया कासश्वासाभ्याञ्च म्रियते। अंसकूटयो-रधस्तात् पार्श्वोपरिभागयोरपलापौ नाम; तत्र रक्तेन पूयभावं गतेन मरणं। उभयत्रोरसो नाड्यौ वातवहे अपस्तम्भौ नाम; तत्र वातपूर्णकोष्ठतया कासश्वासाभ्याञ्च मरणं। एवमेतान्युदरोरसोर्द्वादश मर्म्माणि व्याख्यातानि ॥ ८ ॥

अत ऊर्द्ध्वं पृष्ठमर्म्माण्यनुव्याख्यास्यामः।

तत्र पृष्ठवंशमुभयतः प्रतिश्रोणिकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी, तत्र शोणितक्षयां पाण्डुर्व्विवर्णो हीनरूपश्च म्रियते। पार्श्वजघनवहिर्भागे पृष्ठवंशमुभयतो नाति-

रधस्ताद् द्व्यङ्गुलप्रदेशे स्तनमूले मर्म्मणि। उभयतो ग्रहणात् पृथक् पृथक् स्तनस्याधः स्तनमूलं मर्म्मेति गम्यते; अन्यथा स्तनयोरधस्तादित्युक्तेर्म्मिलितयोरेव स्तनयोरधस्तादितीदृशेऽर्थे स्तनयुगमध्यस्याधस्तात् स्तनमूलाख्यं मर्म्मद्वयमित्यनिष्टं स्यात्। इमे शिरामर्म्मणी द्व्यङ्गुले कालान्तरप्राणहरे च। स्तनचुचुकयोरिति स्तनयोश्चूचुके स्तनचूचुके पूर्व्ववाक्याद् द्व्यङ्गुले इत्यनुवर्त्तते, तेन स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुले स्तनरोहिते द्वे मर्म्मणी, तदुक्तं "स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुलात् स्तनरोहिते"। अर्द्धाङ्गुलमिति मांसमर्म्मणी परिकर्त्तिते। रक्तपूर्णकोष्ठस्य कालान्मरणकारिणी। वृद्धवाग्भटेन स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहिते इत्युक्तं, मांसमर्म्मणी सद्योघातिनी। अंसेति शिरामर्म्मणी अर्द्धाङ्गुले कालान्तरप्राणहरे। उभयत्रोरस इति उरसोर्द्वयोः पार्श्वयोरित्यर्थः। शिरामर्म्मणी अर्द्धाङ्गुलप्रमाणे कालान्तरप्राणहरे च ॥ ८ ॥

अत ऊर्द्ध्वमित्यादि। तत्र पृष्ठेत्यादि। प्रतिश्रोणिकाण्डमित्यत्र प्रतिश्रोणिकर्णाविति केचित् पठन्ति, तत्र श्रोणिकर्णौ लक्ष्मीकृत्य त्रिकसन्निधानौ श्रोण्यामुपरि अस्थिमर्म्मणी, अर्द्धाङ्गुले कालान्तरप्राणहरे च। पार्श्वेत्यादि,—पार्श्वयोर्वामदक्षिणसंज्ञकयोर्ज्जघनवहिर्भाग इति कट्याः पश्चाद्भागे। गयी तु पार्श्वजघनभाग इति पठित्वा पार्श्वयोर्ज्जघनभागे अधो-

निम्ने कुकुन्दरे नाम मर्म्मणी, तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च। श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राधःकायशोषो दौर्व्वल्याच्च मरणं। अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्धञ्च जघनात् पार्श्वसन्धी नाम; तत्र लोहितपूर्णकोष्ठतया म्रियते। स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम; तत्र शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम; तत्र बाह्वोः स्वापः शोषो वा। बाहुमूर्द्धग्रीवामध्येऽंसपीठस्कन्धनिबन्धनावंसौ नाम; तत्र स्तब्धबाहुता। एवमेतानि चतुर्द्दश पृष्ठमर्म्माणि व्याख्यातानि ॥१०॥

भागे नितम्बे विम्बौ कुकुन्दरे इति व्याख्याति। सन्धिमर्म्मणी अर्द्धाङ्गुले ईषन्निम्नाकारे वैकल्यकरे च। श्रोणीति पूर्व्वोक्तश्रोणिकाण्डयोरुपरि आशयाच्छादनौ आमाशयपिधायकौ पार्श्वयोरन्तरबद्धौ पार्श्वमध्ये प्रतिबन्धौ नितम्बौ, अस्थिमर्म्मणी अर्द्धाङ्गुले कालान्तरे प्राणहरे च। अध इति अधोभागे यत्पार्श्वयोरन्तरं मध्यं तत् प्रतिबन्धौ, जघनपार्श्वयोर्मध्ययोरिति पश्चाद्भागपार्श्वभागयोर्यो मध्ये वामदक्षिणे तयोः, कथं स्थितावित्याह,—तिर्य्यगूर्द्धञ्चेति। उपर्य्युपरि पार्श्वकानां क्रमवृद्धेः सन्धेरपि तिर्य्यगूर्द्धत्वं। जघनादिति यदपि लुप्ता पञ्चमीयं तेन जघनं पश्चाद्भागमाश्रित्य स्थितौ पार्श्वसन्धौ शिरामर्म्मणी अर्द्धाङ्गुले कालान्तरमृत्युप्रदेशे च। स्तनमूलादिति शिरामर्म्मणी अर्द्धाङ्गुले कालान्तरप्राणहरे च। पृष्ठोपरीत्यादि। पृष्ठवंशस्यायतत्वात् प्रदेशनियमार्थं पृष्ठोपरीत्युक्तं त्रिकसन्निबन्धे इति ग्रीवाया अंसद्वयस्य च यः संयोगस्त्रिकस्तत्र सम्बद्धे अंसफलके। अस्थिमर्म्मणी अर्द्धाङ्गुले वैकल्यकारिणी च। बाहुमूर्द्धग्रीवेति बाहुमूर्द्धा बाहुशिरः ग्रीवा तु कन्धरा, तयोर्म्मध्ये सफलकभुजशिखरयोर्बन्धनौ अंसौ स्नायुमर्म्मणी अर्द्धाङ्गुले वैकल्यकारिणी च ॥ १० ॥

अत ऊर्द्धं जत्रुगतानि व्याख्यास्यामः।

तत्र कण्ठनाड़ीमुभयतश्चतस्रो धमन्यो द्वे नीले द्वे च मन्ये व्यत्यासेन तत्र मूकता स्वरवैकृतमरसग्राहिता च। ग्रीवाया-मुभयतश्चतस्रः सिरामातृकास्तत्र सद्यो मरणं। शिरोग्रीवयोः सन्धाने कृकाटिके नाम, तत्र चलमूर्द्धता। कर्णपृष्ठतोऽधः-संश्रिते विधुरे नाम, तत्र वाधिर्य्यं। घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिवद्धे अभ्यन्तरतः फणे नाम, तत्र गन्धाज्ञानं। भ्रूपुच्छान्तयोरधोऽक्ष्णोर्व्वाह्यतोऽपाङ्गौ नाम, तत्रान्ध्यं दृष्ट्युप-घातो वा। भ्रुवोरुपरि निम्नयोरावर्त्तौ नाम तत्रान्ध्यं दृष्ट्युप-घातश्च। भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयोर्म्मध्ये शङ्खौ नाम, तत्र सद्योमरणं। शङ्खयोरुपरि केशान्त उत्क्षेपौ नाम, तत्र सशल्योजीवति पाकात् पतितशल्यो वा नोद्धृतशल्यः। भ्रुवोर्म्मध्ये स्थपनी नाम, तत्रोत्क्षेपवत्। पञ्चसन्धयः शिरसि

अत ऊर्द्धं जत्रुगतानीत्यादि। तत्रेति व्यत्यासेन वैपरीत्येन; एका नीला; एका मन्या; चैकस्मिन् पार्श्वे अन्या नीला, अन्या मन्या, चापरस्मिन् पार्श्वे शिरामर्म्मणी चतुरङ्गुले वैकल्यकारिणी च। ग्रीवायामिति उभयश्चतस्र इति एकस्मिन् एकस्मिन् पार्श्वे चतस्र चतस्र इत्यर्थः। शिरामर्म्माणि चतु-रङ्गुलप्रमाणानि मातृकाः। शिर इति सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकारिणी च। कर्णेति स्नायुमर्म्मनी किञ्चिन्निम्नाकारे वैकल्यकारिणी च। घ्राणेति घ्राणमार्गस्य द्वयोः पार्श्वयोरभ्यन्तरविवरद्वारसम्बन्धे फणे शिरामर्म्मणी अर्द्धाङ्गुले वैकल्यकारिणी च। भ्रुवोरुपरीति भ्रुवोरुपरि निम्नयोरिति भ्रुपुच्छेति शिरामर्म्माणि अर्द्धाङ्गुले वैकल्यकराणि प्रदेशकथनं सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकारिणी च भ्रुवोः पुच्छान्तयोरिति अस्थिमर्म्मणी अर्द्धाङ्गुले। शङ्खयोरिति केशान्ते केशपर्य्यन्ते, स्नायुमर्म्मणी अर्द्धाङ्गुले विशल्य-

विभक्ताः सीमन्ता नाम, तत्रोन्मादभयचित्तनाशैर्म्मरणं। घ्राण-श्रोत्राक्षिजिह्वासन्तर्पणीनां सिराणां मध्ये सिरासन्निपातः शृङ्गाटकानि तानि चत्वारि मर्म्माणि तत्रापि सद्यो मरणं। मस्तकाभ्यन्तरोपरिष्टात् सिरासन्धिसन्निपातो रोमावर्त्तोऽधिपतिस्तत्रापि सद्यो मरणं। एवमेतानि सप्तविंशदूर्द्धजत्रुगतानि मर्म्माणि व्याख्यातानि॥ ११॥

भवन्ति चात्र।

ऊर्व्वी शिरांसि विटपे च सकक्षपार्श्वे
एकैकमङ्गुलमिता स्तनपूर्व्वमूलं।
विद्ध्याङ्गुलद्वयमितं मणिवन्धगुल्फं
त्रीण्येव जानु सपरं सहकूर्पराभ्यां॥

प्राणहरे च। भ्रुवोर्म्मध्य इति; तत्रोत्क्षेपवदिति सशल्यः स्वयं पतितशल्यो वा जीवति उद्धृतशल्यो म्रियत इत्यर्थः। शिरामर्म्म अर्द्धाङ्गुलं विशल्यघ्नञ्च। पञ्चसन्धय इति पञ्चसन्धयो ये शिरसि विभक्ताः शरीरसंख्या व्याकरणे ते सीमन्ता इत्यर्थः। इमानि सन्धिमर्म्माणि चतुरङ्गुलप्रमाणानि कालान्तरप्राणहराणि च। घ्राणश्रोत्रेति घ्राणादि तर्पनशिराणां चतुर्भेदात् इमानि शिरामर्म्माणि चतुरङ्गुलप्रमाणानि। मस्तकेति मस्तकाभ्यन्तरोपरिष्टादिति मस्तकाभ्यन्तरोर्द्ध्वमित्यर्थः शिरासन्ध्योः सन्निपातः। वहिरस्य लक्षणमुपरिष्टाद् रोमावर्त्तः एतत् सन्धिमर्म्म अर्द्धाङ्गुलप्रमाणञ्च॥ ११॥

इदानीं सर्व्वेषामेव मर्म्मणां सूत्रे मानमाह, भवन्ति चात्रेत्यादिना। ऊर्व्वी इति, शिरांसि कूर्चशिरांसि, कक्षपार्श्वे कक्षधरे इत्यर्थः। एकैकमङ्गुलमिता इति एकैकं यथा भवति तथोर्व्यादयो मर्म्मविशेषा अङ्गुलमिता ज्ञेयाः। स्तनपूर्व्वमूलमित्यादि मणिवन्धगुल्फं स्तनमूलं चाङ्गुलद्वयमितं विद्धि जानीहि इति सम्बन्धः। त्रीण्येव जानुसपरमिति सपरं द्वितीय-

हृद्बस्तिकूर्च्चगुदनाभि वदन्ति मूर्द्धि,
चत्वारि पञ्च च गले दश यानि च द्वे।
तानि स्वपाणितलकुञ्चितसंमितानि
शेषाण्यवेहि परिविस्तरतोऽङ्गुलार्द्धं ॥
एतत् प्रमाणमभिवीक्ष्य वदन्ति तज्ज्ञाः
शस्त्रेण कर्म्मकरणं परिहृत्य मर्म्म।
पार्श्वाभिघाततमपीह निहन्ति मर्म्म
तस्माद्धि मर्म्मसदनं परिवर्ज्जनीयं ॥
च्छिन्नेषु पाणिचरणेषु सिरा नराणां
सङ्कोचमीयुरसृगल्पमतो निरेति।
प्राप्यामितव्यसनमुग्रमतो मनुष्याः
संछिन्नशाखतरुवन्निधनं न यान्ति ॥
क्षिप्रेषु तत्र सतलेषु हतेषु रक्तं
गच्छत्यतीव पवनश्च रुजं करोति।
एवं विनाशमुपयान्ति हि तत्र विद्धा
वृक्षा इवायुधविघातनिकृत्तमूलाः ॥

जानुसहितं जानुनीणि त्र्यङ्गुलानि विज्ञीतार्थः। मूर्द्धि चत्वारि। पञ्च चेति यानि मूर्द्धि चत्वारि मर्म्माणि शृङ्गाटकसंज्ञकानि तथा तत्रैव पञ्च-सीमन्तसंज्ञकानि। गले दश यानि च द्वे इति गले कण्ठे यानि दश द्वे च कथितानि तत्राष्टौ मातृका द्वे नीले द्वे च मन्ये एतानि मर्म्माणि स्वपाणि-तलकुञ्चितसम्मितानि चतुरङ्गुलप्रमाणानीतार्थः, शेषाणि षट्पञ्चाशत् मर्म्माणि। अवेहि जानीहि। अन्ये तु इमानि षट्पञ्चाशत् मर्म्माणि तल-प्रमाणान्याहुः। गयी तु अन्यासदृशं सूत्रं पठित्वा स्तनमूले द्वे गुल्फे च, इन्द्रवस्तयश्चत्वारो द्वौ मणिबन्धाविति दश मर्म्माणि द्व्यङ्गुलानि भोजदर्शनाद्-

तस्मात्तयोरभिहितस्य तु पाणिपादं
छेत्तव्यमाशु मणिबन्धनगुल्फदेशे ॥ १२ ॥
मर्म्माणि शल्यविषयार्द्धमुदाहरन्ति
यस्माच्च मर्म्मसु हता न भवन्ति सद्यः ॥
जीवन्ति तत्र यदि वैद्यगुणेन केचि-
त्ते प्राप्नुवन्ति विकलत्वमसंशयं हि।
सम्भिन्नजर्ज्जरितकोष्ठशिरःकपाला
जीवन्ति शस्त्रविहतैश्च शरीरदेशैः ॥
छिन्नैश्च सक्थिभुजपादकरैरशेषै-
र्येषां न मर्म्मपतिता विविधाः प्रहाराः ॥
सोममारुततेजांसि रजःसत्वतमांसि च।

व्याख्याति; तथा जानुसपरमितात्र सह परेण परप्रदेशावस्थितेन मर्म्मणा वर्त्तते यत् तत् सपरं तेन जानुनी द्वे आगन्य चतस्रः कूर्परे द्वे इतरष्टौ अङ्गुलानि व्याख्याति शेषं समं। मानकथनप्रयोजनमाह,—एतदित्यादिना। मर्म्मसदनमिति मर्म्मस्थानं। करचरणच्छेदे जीवन्ति तदवयवभूतमर्म्मच्छेदे तु न जीवन्तीति विशेषं दर्शयन्नाह,—छिन्नेष्वित्यादि, सङ्कोचमीयुः सङ्कोचं जग्मुरतोऽल्परुधिरं प्रवर्त्तते। चिप्रेत्यादि तत्र पाण्योश्चरणयोर्या:। गयी तु, हृत्वा इवायुधनिपातेत्यादि स्थाने किञ्जल्कपत्रमथनादिरपङ्कानीति पठति ॥ १२ ॥

मर्म्ममानकथनप्रयोजनं पूर्व्वतरवाक्ये प्रतिपाद्य मर्म्मस्थानविषयं निर्द्दिशन्नाह,—मर्म्माणीत्यादि। शल्यस्य मनःशरीराबाधकरस्य विषयः शल्यविषयः स च शस्त्रादिप्रणिधानान्मरणामरणकारकत्वेन द्विविधः; तत्र मरणकारकः शल्यविषयो मर्म्माख्यः शरीरदेशः यस्मात् तत्र हताः सद्य एव न भवन्ति, सप्ताहाभ्यन्तर एव म्रियन्त इत्यर्थः, तस्मान्मरणकारकत्वेन मर्म्माणि शल्यविषयस्यार्द्धमुदाहरन्ति पूर्व्वाचार्य्या इति शेषः। ननु केचिन्मर्म्महता अपि

मर्म्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते ॥
मर्म्मस्वभिहतास्तस्मान्न जीवन्ति शरीरिणः ॥ १३ ॥
इन्द्रियार्थेष्वसम्प्राप्तिर्म्मनोबुद्धिविपर्य्ययः ।
रुजश्च विविधास्तीव्रा भवन्त्याशुहरे हते ॥
हते कालान्तरघ्ने तु ध्रुवो धातुक्षयो नृणां ।
ततो धातुक्षयाज्जन्तुर्व्वेदनाभिश्च नश्यति ॥
हते वैकल्यजनने केवलं वैद्यनैपुणात् ।
शरीरं क्रियया युक्तं विकलत्वमवाप्नुयात् ॥
विशल्यघ्नेषु विज्ञेयं पूर्व्वोक्तं यच्च कारणं ।
रुजाकराणि मर्म्माणि क्षतानि विविधा रुजः ॥
कुर्व्वन्त्यन्ते च वैकल्यं कुवैद्यवशगो यदि ।
छेदभेदाभिघातेभ्यो दहनाद्दारणादपि ॥
उपघातं विजानीयान्मर्म्मणान्तुल्यलक्षणं ॥

जीवन्तो दृश्यन्ते तत् कथं मरणकारकत्वेन मर्म्माणि शल्यविषयार्द्धमित्याशङ्काह—जीवन्तीत्यादि। प्रसङ्गतोऽपरं शल्यविषयार्द्धं प्रतिपादयितुकामः अमर्म्महतास्तु विविधैरपि छेदभेदादिभिर्न म्रियन्त इति दर्शयन्नाह,—सम्भिन्नेत्यादि। इदानीं मर्म्मणां शरीरमनोदोषनिवासभूतानां शरीरमनोदोषैरेव मर्म्मविद्धकुपितैर्म्मनः शरीरञ्च नश्यति; तयोराधारभूतयोर्नाशादाधेयभूतोऽपि भूतात्मा नश्यति इति दर्शयन्नाह,—सोमेत्यादि ॥ १३ ॥

सद्यःप्राणहरादि मर्म्मपञ्चकस्य लक्षणं निर्दिशन्नाह,—इन्द्रियेत्यादि। आशुहरे सद्यःप्राणहरे। पूर्व्वोक्तमिति शल्यमुखावरुद्धो यावदन्तर्व्वायुस्तिष्ठति तावज्जीवतीत्यादि। उक्तमेव कारणं ज्ञेयं लक्षणत्वेनेत्यर्थः। इदानीं मर्म्मघाततुल्यं मर्म्मसमीपस्यापि देशस्य घातं महानर्थकरं दर्शयन्नाह,—छेदेत्यादि। उपघातं समीपघातं। मर्म्माभिघाते वैद्यस्य यत्नपरतां दर्शयन्नाह,—

मर्म्माभिघातश्च न कश्चिदस्ति योऽल्पात्ययो वापि निरत्ययो वा।
प्रायेण मर्म्मस्वभिताड़ितास्तु वैकल्यमृच्छन्त्यथवा म्रियन्ते ॥
मर्म्माण्यधिष्ठाय हि ये विकारा मूर्च्छन्ति काये विविधा नराणां।
प्रायेण ते कृच्छ्रतमा भवन्ति नरस्य यत्नैरपि साध्यमानाः ॥१४॥

मर्म्माभिघात इत्यादि। अल्पात्यय इति अल्पव्यापत्; निरत्यय इति निर्गतव्यापत्। गयी तु एतद्वाक्यं न पठति। शरीरदोषेनापि मर्म्मणां मर्म्मसमीपदेशस्यापि नियतं महानर्थं दर्शयन्नाह,—मर्म्माण्यधिष्ठायेत्यादि। मूर्च्छन्ति समुच्छ्रायं गच्छन्ति, यस्मादेवम्विधो मर्म्माभिघातस्तस्माद् वैद्येन यत्नः कार्य्य इति सूचितं ॥ १४ ॥

इति शारीरे निबन्धसंग्रहे षष्ठोऽध्यायः।

अथ सप्तमोऽध्यायः।

अथातः सिरावर्णनविभक्तिनाम शारीरं व्याख्यास्यामः।

सप्त सिराशतानि भवन्ति। याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्व्विशेषैः। द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्ध्वमधस्तिर्य्यक् च।

मर्म्मशिरास्नायुधमनीः परिहरन्नित्यादौ मर्म्मानन्तरं शिराणां निर्द्देशात् प्रत्येकमर्म्मनिर्द्देशशारीरानन्तरं शिरावर्णविभागशरीरारम्भो युज्यत इत्याह,—अथेत्यादि। विभक्तिर्व्विभागः समुदायात् पृथक् करणमित्यर्थः। शिराणां वातादिवहानां तद्वर्णानाञ्चारुणनीलशुक्ललोहितानां विभक्तिर्यस्मिन् शारीरे तत् तथाविधं। तासामनुशोऽपरिसंख्यातानामपि भूयस्त्वाश्रयसमुदायसंख्यां निर्द्दिशन्नाह,—सप्तेत्यादि। तासां सर्व्वासामपि सामान्यंकर्म्म

भवतश्चात्र ।

यावत्यस्तु सिरा: काये सम्भवन्ति शरीरिणां ।
नाभ्यां सर्व्वा निवद्धास्ता: प्रतन्वन्ति समन्तत: ॥
नाभिस्था: प्राणिनां प्राणा: प्राणान्नाभिर्व्युपाश्रिता ।
सिराभिरावृता नाभिश्चक्रनाभिरिवारकै: ॥ १ ॥

तासां मूलसिराश्चत्वारिंशत्तासां वातवाहिन्यो दश पित्तवाहिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्य: । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं भवति तावत्य एव पित्तवाहिन्य: पित्तस्थाने कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृत्प्लीह्नोरेवमेतानि सप्त सिराशतानि ।

निर्द्दिशन्नाह,—याभिरित्यादि । याभि: शिराभि: आरामो नानावृक्षसमुदायविशेष: । जलहरानीभि: प्रणालीभि: कुल्याभि: कृत्रिमाल्पसरिद्भि: । एतद्दृष्टान्तद्वयं स्थूलसूक्ष्मशिराप्रापनार्थं । उपस्निह्यते पुष्टिं नीयते तरुणानां शरीरं । वृद्धानां शारीरपरिणामात्तेनोपस्नेहेन शरीरं याप्यते । सएवान्नरसो वृद्धानां परिपक्वशरीरत्वादप्रीणनो भवतीति । अनुगृह्यते परिपाल्यते । आकुञ्चनादिभिरित्यत्रादिशब्दात् भाषणस्पर्शावबोधादयो गृह्यन्ते । शिराणां सूक्ष्मविशेषप्रदर्शनाय दृष्टान्तमाह,—द्रुमेत्यादि । प्रतानाविस्तारा:, तत इति नाभित इत्यर्थ: ; भवतश्चेत्यादि, ऊर्द्धं प्रतन्वन्ति ऊर्द्धमधस्तिर्य्यक च ; काय इति सम्बध्यते । इदानीं शिराणां प्राणानां चाधाराधेयत्वं प्रतिपादयन्नाह,—नाभिस्था इत्यादि । नाभिस्था इत्यनेन नाभ्यावरकासु शिरास्ववस्थिता: । प्राणा इति शिराणां प्राणधारत्वं प्रतिपादितं ॥ १ ॥

इदानीं शिरापिण्डमभिधाय विभजन्नाह,—तासामित्यादि । वातादिवहा: शिरा: सामान्यत: संख्यया अभिधाय प्रत्यङ्गविभागेन ता एव प्रतिपादयितुमाह,—तत्र वातवाहिन्य इत्यादि, कोष्ठे चतुस्त्रिंशदिति या:

तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थ्नि पञ्चविंशतिः। एतेनेतरसक्थिबाहू च व्याख्यातौ। विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः श्रोण्यामष्टौ द्वे द्वे पार्श्वयोः षट् पृष्ठे तावत्य एव चोदरे दश वक्षसि। एकचत्वारिंशज्जत्रुण ऊर्द्ध्वं तासां चतुर्द्दश ग्रीवायां कर्णयोश्चतस्रः। नव जिह्वायां। षट् नासिकायां। अष्टौ नेत्रयोः। एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातं। एष एव विभागः शेषाणामपि। विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्द्दश कर्णयोर्द्वे। एवं रक्तवहाः कफवहाश्च। एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि ॥ २ ॥

भवन्ति चात्र।

क्रियाणामप्रतीघातममोहं बुद्धिकर्म्मणां।
करोत्यन्यान् गुणांश्चापि स्वाः सिराः पवनश्चरन् ॥
यदा तु कुपितो वायुः स्वाः सिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते वातसम्भवाः ॥

प्रतिपादितास्तासां विवरणमाह,—तासां गुदमेढ्राश्रिता इत्यादि, एकचत्वारिंश जत्रुण ऊर्द्ध्वमित्युद्दिष्टानां विवरणमाह—तासां चतुर्द्दशेत्यादि। पञ्चसप्ततिशतमिति। पञ्चसप्तत्यधिकमितार्थः। एष इत्यादि—एष एव विभागः पूर्व्वोक्तो वातवाहि शिराविभाग इत्यर्थः। शेषाणामिति पित्तश्लेष्मरक्तवहानामित्यर्थः। एतेन पित्तादिवाहिनीनामपि शिराणां प्रत्येकं पञ्चसप्तत्यधिकं शतं भवतीत्युक्तं। उपसंहारमाह,—एवमित्यादि ॥ २ ॥

इदानीं वातादिवहसिरासु वातादीनां प्रकृतिभूतानां प्राकृतं कर्म्मविकृतिभूतानां वैकृतं कर्म्म निर्द्दिशन्नाह,—क्रियाणामित्यादि। क्रियाणां कायक्रियाणां प्रसारणाकुञ्चनादीनां क्रियाणां। वाक्क्रियाणां भाषितादी-

भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगतां ।
संसर्पत् स्वाः सिराः पित्तं कुर्य्याच्चान्यान् गुणानपि ॥
यदा प्रकुपितं पित्तं सेवते स्ववहाः शिराः ।
तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः ॥
स्नेहमङ्गेषु सन्धीनां स्थैर्य्यं वलमुदीर्णतां ।
करोत्यन्यान् गुणांश्चापि वलासः स्वाः सिराश्चरन् ॥
यदा तु कुपितः श्लेष्मा स्वाः सिराः प्रतिपद्यते ।
तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः ॥
धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयं ।
स्वाः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान् गुणानपि ॥
यदा तु कुपितं रक्तं सेवते स्ववहाः सिराः ।
तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥
नहि वातं सिराः काश्चिन्न पित्तं केवलं तथा ।
श्लेष्माणं वा वहन्त्येता अतः सर्व्ववहाः स्मृताः ॥
प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावतां ।
ध्रुवमुन्मार्गगमनमतः सर्व्ववहाः स्मृताः ॥
तत्रारुणा वातवहाः पूर्य्यन्ते वायुना सिराः ।
पित्तादुष्णाश्च नीलाश्च शीता गौर्य्यः स्थिराः कफात् ॥

नामप्रतिहननं । वुद्धिकर्म्मणामिति पञ्चानां वुद्धीन्द्रियाणां मनसो वुद्धेश्च स्वे स्वे विषये प्राकृतायां प्रवृत्तौ मोहस्याभावं करोति । अन्यान् गुणान् तत्र प्रस्यन्दनोद्वहनपूरणेत्यादिकान् । भ्राजिष्णुतामित्यादि । भ्राजिष्णुत्वं दीप्तिमत्वं, संसर्पत् गच्छेत् । अन्यान् गुणान् रागपक्त्योज इत्यादिकान् यदात्वित्यादि । अन्यान् गुणान् सन्धिश्लेषणादिकान् । यात्रूणामित्यादि । अन्यान् गुणान् रक्तं वर्णप्रसादं मांसपुष्टिं करोतीत्याद्युक्तान् प्राकृतवातादि-

असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः।
अतऊर्द्ध्वं प्रवक्ष्यामि न विध्येद्याः सिराः भिषक्॥
वैकल्यं मरणञ्चापि व्यधात्तासां ध्रुवं भवेत्।
सिराशतानि चत्वारि विद्याच्छाखासु वुद्धिमान्॥
षट्त्रिंशच्च शतं कोष्ठे चतुःषष्टिञ्च मूर्द्धनि।
शाखासु षोड़श सिराः कोष्ठे द्वात्रिंशदेव तु॥
पञ्चाशज्जत्रुणश्चोर्द्ध्वमवेध्याः परिकीर्त्तिताः॥ ३॥

तत्र सिराशतमेकस्मिन् सक्थ्नि भवति तासां जालधरात्वेका तिस्रश्चाभ्यन्तरास्तत्रोर्व्वीसंज्ञे द्वे लोहिताक्षसंज्ञा चैकैतास्त्ववेध्या एतेनेतरसक्थिवाहू च व्याख्यातावेवमशस्त्रकृत्याः षोड़श शाखासु।

वहानामपि शिराणां सर्व्वत्र सर्व्वकार्य्योपलम्भात् सर्व्ववहत्वं दर्शयन्नाह,—न हि वातमित्यादि। इदानीं प्रकुपितवातादिवहानामपि शिराणां सर्व्ववहत्वं दर्शयन्नाह,—प्रदुष्टानामित्यादि। मूर्च्छितानामिति परस्परं मिश्रितानामित्यर्थः। शिराविभक्तिं प्रतिपाद्य तद्वर्णविभक्तिं प्रतिपादयन्नाह,—तत्रेत्यादि। तत्र व्याध्याव्याध्यविभागज्ञानाय पूर्व्वोक्तानि सप्तशिराशतानि षड्ङ्गेष्वनुद्य प्रतिज्ञाता अव्याध्याः शिरां प्राह शिराशतानीति। शिराशतानि चत्वारीति। एकैकशाखागतवातादिवहानां शिराणां पञ्चविंशत्या चत्वारिंशतानि भवन्ति। चतुःषष्टिञ्चेति शतमित्यत्रापि योजनीयं तेन चतुःषष्ट्यधिकं शतं मूर्द्धनि ज्ञातव्यं॥ ३॥

षोड़श कास्ताः अव्याध्या? इत्याह,—तत्र शिराशतमिति, जालधरा इति। जालानीव जालानि मांसशिरास्नाय्वस्थिसन्धिजानि कूर्च्चकूर्च्चशिरोव्यापीनि तानि धारयन्ति यास्ता जालधरा इत्यर्थः। कास्तास्तिस्रोऽभ्यन्तरा इत्याह,—तत्रोर्व्वीसंज्ञे द्वे इत्यादि। द्वे अपि ते ऊर्व्वीसंज्ञे अतिसान्निध्यात् प्राक् मर्म्मविभागीये शारीरे ऊर्व्वीसंज्ञैकमर्म्मतया निर्द्दिष्टे।

द्वात्रिंशत् श्रोण्यां तासामष्टावशस्त्रकृत्या द्वे द्वे विटपयोः कटीकतरुणयोश्च। अष्टावष्टावेकैकस्मिन् पार्श्वे तासामेकैका-मूर्द्धगां परिहरेत् पार्श्वसन्धिगते च द्वे। चतस्रो विंशतिश्च पृष्ठवंशमुभयतस्तासामूर्द्धगामिन्यो द्वे द्वे परिहरेद्बृहती सिरे। तावत्य एवोदरे तासां मेढ्रोपरि रोमराजीमुभयतो द्वे द्वे परिहरेत्। चत्वारिंशद्वक्षसि तासां चतुर्द्दशाशस्त्रकृत्या हृदये द्वे द्वे द्वे स्तनमूले स्तनरोहितापलापस्तम्भेषूभयतोऽष्टौ। एवं द्वात्रिंशदशस्त्रकृत्याः पृष्ठोदरोरःसु भवन्ति॥ ४॥

चतुःषष्टि सिराशतं जत्रुण ऊर्द्ध्वं भवति। तत्र षट्पञ्चाश-च्छिरोधरायां तासामष्टौ चतस्रश्च मर्म्मसंज्ञाः परिहरेद्द्वे कृका-टिकयोर्द्वे विधुरयोः। एवं ग्रीवायां षोड़श व्यधाः। हन्वो-रुभयतोऽष्टावष्टौ तासान्तु सन्धिधमन्यौ द्वे द्वे परिहरेत्।

द्वात्रिंशदिति. कटीकतरुणयोश्चेति। अत्रापि द्वे द्वे इति सम्बन्धः। पार्श्व-सन्धिगते द्वे इति। जघनपार्श्वमध्ययोर्ये पार्श्वसन्धिसंज्ञके मर्म्मणी तत्-संज्ञा प्राप्ते द्वे। चतस्र इत्यादि,—परिहरेदित्यर्थः। तावन्त्येत्यादि तावत्य इति चतुर्व्विंशतिरित्यर्थः। चत्वारिंशदिति। उभयतोऽष्टाविति उभयत्रे-त्यर्थः। उभयत इति स्तनमूलादिषु योजनीयं, तेनोभयत्र स्तनमूले वामदक्षिणाश्रिते द्वे द्वे इति चतस्रः। तथोभयत्र स्तनरोहितापलाप-स्तम्भेष्वष्टौ। तत्र स्तनरोहितयोर्द्वे द्वे। अपलापयोरेकैका। अपस्तम्भयो-रप्येकैका एवमष्टावित्यर्थः। उपसंहारमाह,—एवमिति, पृष्ठोदरोरःस्विति अत्र पृष्ठशब्देन श्रोणिपार्श्वानामपि ग्रहणं तेन श्रोणिगता अष्टौ, पार्श्वगता एकैका। चतस्रः पृष्ठे, चतस्र उदरे, चतुर्द्दश वक्षसि, एवं द्वात्रिंशद-व्याध्याः॥ ४॥

चतुःषष्टीति चतुःषष्टि शिराशतमिति चतुःषष्ठ्यधिकं शिराशतमित्यर्थः। तत्र षड़िति, तत्रेति चतुःषष्ठ्यधिकशिराशतमध्ये अष्टौ चतस्रश्च मर्म्मसंज्ञा

षट्त्रिंशज्जिह्वायां तासामधः षोड़शाशस्त्रकृत्या रसवहे द्वे वाग्वहे च द्वे। द्विर्द्वादशनासायां तासामौपनासिक्यश्चतस्रः परिहरेत्। तासामेव च तालुन्येकां मृदावुद्देशे। अष्टाविंशदुभयोर्नेत्रयोस्तासामेकैकामपाङ्गयोः परिहरेत्।

कर्णयोर्दश तासां शब्दवाहिनीनामेकैकां परिहरेत्। नासानेत्रगतास्तु ललाटे षष्टिस्तासां केशान्तानुगताश्चतस्रः।

आवर्त्तयोरेकैका स्थपन्याञ्चैका परिहर्त्तव्या। शङ्खयोर्दश तासां शङ्खसन्धिगतामेकैकां परिहरेत्।

इति। तत्राष्टौ मातृकाः, द्वे नीले, द्वे च मन्ये। एता द्वादशमर्म्मसंज्ञा इत्यर्थः। तथा द्वे कृकाटिकयोर्द्वे विधुरयोः। एवं ग्रीवायामिति। गयी तु वातादिवहानां चतुर्भिरष्टकैर्द्वात्रिंशद् ग्रीवायां। तत्र षोड़शाव्याध्या इति प्रतिपादयति। हन्वोरित्यादि। सन्धिधमन्याविति। हनुसन्धिधमन्यावित्यर्थः। हन्वोः षोड़श शिरा ग्रीवाशिरा स्वेवान्तर्भवन्तीत्यतो न पृथग्गणनीयाः। गयी तु हनुगताः पृथगेव षोड़श तत्र द्वे सन्धिवन्धनकर्म्मणी परिहरेदित्याह,—षड्त्रिंशदित्यादि। तासामधः षोड़शेति तासां जिह्वागत षट्त्रिंशत् शिराणां मध्ये अधोजिह्वायाः षोड़श शिरा भवन्ति। तेषां विंशतिश्च जिह्वाया ऊर्द्धं भवन्ति। अशस्त्रकृत्या रसवहे वाग्वहे चेति। रसवहे द्वे वाग्वहे च द्वे। गयी तु अष्टाविंशतिर्ज्जिह्वायां तासां रसवाहिन्यः षट् शस्त्रकृत्या इति ब्रुते। द्विरिति द्विर्द्वादशेति चतुर्व्विंशतिरित्यर्थः। उपनासिक्यो नासासमीपवर्त्तिन्यः। मृदावुद्देश इति। घण्टासमीप इत्यर्थः। गयी तु षोड़शनासायां तासु पञ्चाव्याध्या इत्याह,—अष्टात्रिंशदिति। गयी तु चतुर्व्विंशतिरुभयोर्नेत्रयोः तासामेकैकामपाङ्गयोः परिहरेदित्याचष्टे। कर्णयोरिति। गयी तु कर्णयोः षोड़श। तासामेकैकां शब्दवहां परिहरेदिति ब्रुते। नासानेत्रेति। याश्चतुर्व्विंशतिर्नासागतायाश्च षट्त्रिंशन्नेत्रगतास्ता एव षष्ठिर्ललाटे विज्ञातव्याः। अतो न पृथग्गणनीयाः। केशा-

द्वादशमूर्द्धि, तासामुत्क्षेपयोर्द्वे परिहरेत्। सीमन्तेष्वेकैकामेकामधिपताविति। एवमशस्त्रकृत्याः पञ्चाशजत्तुर्ध्वमिति।

भवति चात्र।

व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः।
प्रतानाः पद्मिनीकन्दाद्बिसादीनां यथा जलं ॥ ५ ॥

न्तानुगता इति। आवर्त्तमर्म्मसमीपकेशान्तानुगता इत्यर्थः। गयी तु ललाटस्थिताभिः शिराभि सह नासानेत्रगताः शिराः ललाटे षष्टिः। तासु सप्त व्याध्या इति ब्रुते। शङ्खयोरिति।—शङ्खयोर्द्दशैत्येता अपि नासानेत्रगता वोद्धव्याः। अतो न पृथग्गणनीयाः। गयी तु शङ्खयोरष्टौ पृथगेव पठति, तासु द्वे शङ्खसन्धिगतेऽव्याध्ये इति प्रतिपादयति। द्वादशमूर्द्धीति सीमन्तेषु पञ्चसु एकैकां परिहरेत् तथा अधिपतेवेकां परिहरेत् एतासामपि नासानेत्रगतत्वात् पृथग्गणना कर्त्तव्या। गयी तु मूर्द्धि पृथगेव द्वादश पठित्वा तास्वष्टावव्याध्या इत्याह।—इदानीं सर्व्वत्र शिरासम्भवत्वेन नियमव्याख्या न सङ्ख्याव्यभिचारोऽस्तीति दर्शयन्नाह,—व्याप्नुवन्तीति।—सर्व्वतः शरीरं व्याप्नुवन्ति ॥ ५ ॥

इति शारीरे निवन्धसंग्रहे सप्तमोऽध्यायः।

अथ अष्टमोऽध्यायः।

अथातः सिराव्यध-विधि शारीरं व्याख्यास्यामः।

वालस्थविररूक्षक्षतक्षीणभीरुपरिश्रान्तस्त्रीमद्याध्वकर्शितमत्तवान्तविरिक्तास्थापितानुवासितजागरितक्लीवकृशगर्भिणीनां—

शिरावर्णविभक्त्यनन्तरं ज्ञातव्याऽव्याध्यशिरस्य शिराव्यधविधिर्युज्यत इत्याह,—अथात इत्यादि। वालस्थविरयोरसंपूर्णक्षीणधातुः। गयी तु

कासश्वासशोषप्रवृद्धज्वराक्षेपकपक्षाघातोपवासपिपासामूर्च्छा-प्रपीड़ितानाञ्च सिरां न विध्येद्याश्चाव्यध्या व्यध्याश्चादृष्टा दृष्टाश्चायन्त्रिता यन्त्रिताश्चानुत्थिता इति ।

शोणितावसेकसाध्याश्च विकाराः प्रागभिहितास्तेषु चापक्वेष्वन्येषु चानुक्तेषु यथाभ्यासं यथान्यायञ्च सिरां विध्येत् ॥ १ ॥

प्रतिषिद्धानामपि च विषोपसर्ग-आत्ययिकेषु सिराव्यधनमप्रतिषिद्धं ।

क्षतेन क्षतक्षीणस्यानिलव्याधिभयान्न विध्येदिति व्याख्याति । भीरोश्च तमोबहुलत्वाल्लोहितदर्शनेन मूर्च्छाभयान्न विध्येत् । परिश्रान्तस्य श्रमकुपितो शोणितावसेचनेनातिप्रावल्यं प्राप्य शरीरव्यापादकः स्यात् । मद्यपस्य मदविक्षिप्तचित्तस्यातिमूर्च्छाकरत्वात् । अध्वस्त्रीकर्षितस्य वातप्रकोपभयान्न विध्येत् । वान्तविरिक्तयोरकृतसंसर्जनयोरपीतस्नेहयोर्व्वमनविरेकानन्तरमेव वातप्रकोपभयात् शिरां न विध्येत् । आस्थापितजागरितयोर्म्मरुत्प्रकोपभयान्न विध्येत् । अनुवासितस्य मन्देऽग्नौ भूयोऽग्निमान्द्यभयात् । क्लीवस्य प्रधानधातुक्षयेणाल्पसत्वत्वेन च निश्चितविनाशात् । कृशस्य गर्भिणीनां चोपक्षीणधातुत्वादिह संदेहभयात् । कासश्वासशोषिणामपि अपक्षीयमानधातुत्वेन देहसन्देहभयान्न विध्येत् । प्रवृद्धज्वरस्यासृक्स्रावेण प्रलापादिभयात् शिरां न विध्येत् । याश्चाव्याध्या इति । अशेषाव्याध्यप्रसङ्गेनोक्तमपि न पुनरुक्तं । शोणितावसेकसाध्या इति । त्वग्दोषा ग्रन्थयः शोफा इत्यादि शोणितवर्णनीय उक्ताः । तेषु चापक्वेष्विति यद्यपि रक्ताभावात् पक्वानां रक्तस्रुतिर्न क्रियत इत्यर्थः देवापक्वग्रहणं लभ्यत तथापि वाह्योपक्रमेषु मध्ये शोणितावसेकस्य प्राधान्यख्यापनाया पक्वग्रहणं कृतं । अन्येषु चानुक्तेष्विति ये विपाकाभिमुखाः शोणितावसेकसाध्येष्वनभिहितास्तेष्वित्यर्थः । यथाभ्यासमिति, यथासमीपमित्यर्थः । यथा न्यायमिति न्यायस्य स्नेहस्वेदादिकस्यानतिक्रमेण यथान्यायं ॥ १ ॥

इदानीं कारणवशान्निषिद्धानामपि शोणितावसेकं दर्शयन्नाह,—प्रति-

तत्र स्निग्धस्विन्नमातुरं यथादोषप्रत्यनीकद्रवप्रायमन्नं भुक्तवन्तं यवागूं पीतवन्तं वा यथाकालमुपस्थाप्यासीनं स्थितं वा प्राणानबाधमानो वस्त्रपट्टचर्म्मान्तर्व्वल्कललतानामन्यतमेन यन्त्रयित्वा नातिगाढ़ं नातिशिथिलं शरीरप्रदेशमासाद्य यथोक्तं शस्त्रं गृहीत्वा सिरां विध्येत् ।

नैवातिशीते नात्युष्णे न प्रवाते न चाभ्रिते ।
सिराणां व्यधनं कार्य्यमरोगे वा कदाचन ॥ २ ॥

तत्र व्यध्यसिरं पुरुषं प्रत्यादित्यमुखमरत्निमात्रोच्छ्रिते उपवेश्यासने सक्थ्नोराकुञ्चितयोर्निवेश्य कूर्परसन्धिद्वयस्योपरि हस्तावन्तर्गूढ़ाङ्गुष्ठकृतमुष्टी मन्ययोः स्थापयित्वा यन्त्रणशाटकं ग्रीवामुष्ट्योरुपरि परिक्षिप्यान्येन पुरुषेण पश्चात् स्थितेन वाम-

शिद्धानामपीति । प्रतिषिद्धानामिति बालस्थविरादीनां आत्ययिक इति अत्ययो विनाशो भवत्यस्मादिति आत्ययिको विद्रध्यादिरनन्यसाध्यः । तत्र शिराव्यधस्य पूर्व्वकर्म्मविधिं प्रदर्श्य प्रधानकर्म्मविधिं दर्शयन्नाह,—तत्रेति । तत्रेति वाक्योपक्रम । आतुरमिति अत्रोत्तरग्रहणं स्वस्थस्य रक्तं न स्रावयेदिति बोधनार्थं । द्रवप्रायमिति रक्तोत्क्लेशनार्थं द्रवाधिकमन्नं भुक्तवन्तं । यवागूं पीतवन्तमिति सात्म्यापेक्षया यथाकालमिति वर्षादिषु व्यभ्रादिकालानतिक्रमेण । उपस्थाप्य सन्निधाने स्थापयित्वा आसीनमुपविष्टं, स्थितं मन्दीभूतं, नातिशिथिलमिति नातिगाढ़ं, उत्तमाङ्गे नातिशिथिलं शाखासु । शरीरप्रदेशमासाद्येति मर्म्मरहितं शरीरप्रदेशं गृहीत्वेत्यर्थः । प्राप्तं शस्त्रमिति उपयुक्तं शस्त्रमित्यर्थः । नैवातिशीतेनेति । अभ्रित इति अभ्राणि संजाता नियतदिने तदभ्रितं दिनं तस्मिन्नित्यर्थः । इदानीमुत्तमाङ्गसक्थिपाणिद्वयपृष्ठोदरवक्षोमेढ्रजिह्वादिषु शिराणां ॥ २ ॥

येन प्रकारेणोत्थापनं तं दर्शयन्नाह,—तत्र व्याध्यशिरमिति । अरत्निमात्रोच्छ्रित इति कनिष्ठाङ्गुलिप्रमितहस्तमात्रोच्छ्रित इत्यर्थः । सन्धिद्वय-

हस्तेनोत्तानेन शाटकान्तद्वयं ग्राहयित्वा ततो वैद्यो ब्रूयाद्दक्षिणहस्तेन सिरोत्थापनार्थं नात्यायतशिथिलं यन्त्रमावेष्टयेत्यसृक्-स्रावणार्थं यन्त्रं पृष्ठमध्ये च पीड़येति कर्म्मपुरुषञ्च वायुपूर्णमुखं स्थापयेदेष उत्तमाङ्गगतानामन्तर्म्मुखवर्ज्यानां सिराणां व्यधेन यन्त्रणविधिः।

तत्र पादव्यध्यसिरस्य पादं समे स्थाने सुस्थिरं स्थापयित्वान्यं पादमीषत् सङ्कुचितमुच्चैः कृत्वा व्यध्यपादं जानुसन्धेरधः शाटकेनावेष्ट्य हस्ताभ्यां प्रपीड्य गुल्फं व्यध्यप्रदेशस्योपरि चतुरङ्गुलं प्लोतादीनामन्यतमेन बद्धा पादसिरां विध्येत्। अथोपरिष्टाद्धस्तौ गूढ़ाङ्गुष्ठकृतमुष्टी सम्यगासने स्थापयित्वा सुखोपविष्टस्य पूर्व्ववद् यन्त्रं बद्धा हस्तसिरां विध्येत्। गृध्रसीविश्वाच्योः सङ्कुचितजानुकूर्परः स्यात्। श्रोणीपृष्ठस्कन्धेषून्नामितपृष्ठस्यावाक्शिरस्कस्योपविष्टस्य विस्फूर्ज्जितपृष्ठस्य विध्येत्। उदरोरसोः प्रसारितोरस्कस्योन्नमितशिरस्कस्य विस्फूर्ज्जितदेहस्य। बाहुभ्यामवलम्ब्यमानदेहस्य पार्श्वयोः। अवनामित-

स्योपरीति जानुसन्धिद्वयस्योपरिकूर्परे निवेश्येत्यर्थः। कर्म्मपुरुष इति यस्य शिराव्यधनं कर्म्म क्रियते स कर्म्म पुरुषः। अन्तर्म्मुखानामिति मुखान्तर्गतवर्ज्जितानामित्यर्थः। पादव्याध्येति। प्लोतादीनामिति प्लोतं वस्त्रं, आदिशब्दाद्वल्कलादीनां ग्रहणं। अथोपरिष्टेति। पूर्व्ववदिति व्याध्यप्रदेशस्योपरि चतुरङ्गुल इत्यर्थः। गृध्रसीति। गृध्रस्यां संकुचितजानोः विश्वच्यां संकुचितकूर्परस्य। शिरां विध्येदिति पूर्व्ववाक्यात् सम्बध्यते। श्रोणिपृष्ठस्कन्धेष्विति शिरामिति पूर्व्वतरवाक्यात् सम्बध्यते। कीदृशस्य पुरुषेत्याशङ्क्य विशेषणमाह,—उन्नामितपृष्ठस्येत्यादि विस्फुर्ज्जितं आयाममिति पृष्ठं येन स तथा। उदरोरसोः प्रसारितोरुस्कस्योन्नामितशिरस्कस्य विस्फु-

मेढ्रस्य मेढ्रे। उन्नामितविदष्टजिह्वाग्रस्याधोजिह्वायां। अतिव्यात्ताननस्य तालुनि दन्तमूलेषु च। एवं यन्त्रोपायानन्यांश्च सिरोत्थापनहेतून् बुद्धावेक्ष्य शरीरवशेन व्याधिवशेन च विदध्यात्। मांसलेष्ववकाशेषु यवमात्रं शस्त्रं निदध्यादतोऽन्येष्वर्द्धयवमात्रं व्रीहिमात्रं वा व्रीहिमुखेन। अस्थ्नामुपरि कुठारिकया विध्येदर्द्धयवमात्रं ॥ ३ ॥

भवन्ति चात्र।

व्यभ्रे वर्षासु विध्येत ग्रीष्मकाले तु शीतले।
हेमन्तकाले मध्याह्ने शस्त्रकालास्त्रयः स्मृताः ॥
सम्यक्शस्त्रनिपातेन धारया या स्रवेदसृक्।
मुहूर्त्तं रुद्ध्वा तिष्ठेच्च सुविद्धान्तां विनिर्द्दिशेत् ॥

र्ज्जितदेहस्य शिरां विध्येदिति शेषः। विस्फूर्ज्जितदेहस्येति आयामितमध्यशरीरस्येत्यर्थः। बाहुभ्यामवलम्बमानदेहस्य पार्श्वयोः। अवनामितमेढ्रस्य मेढ्रे स्तब्धमवनामितं। मेढ्रं यस्य स तथा तस्य मेढ्रे शिरां विध्येदिति शेषः। उन्नामितविदष्टजिह्वाग्रस्याधो जिह्वायाः। अतिव्यात्ताननं यस्य तालुनि दन्तमूलेषु च। अनुक्तानामपि यन्त्रप्रकाराणां बुद्ध्या वीक्षणेन करणीयतां दर्शयन्नाह,—एवमित्यादि। इदानीं प्रदेशविशेषेण शस्त्रप्रणिधानप्रमाणं शस्त्रविशेषञ्च दर्शयन्नाह,—मांसलेष्विति मांसलेषु जठरस्फिगादिषु, यवमात्रं यवप्रमाणं, व्रीहिरत्र प्रधानकल्पनया शूकधान्यं। तत्रापि रक्तशालिरेव ॥ ३ ॥

नित्यगस्य कालस्य शीतोष्णवर्षाभेदेन त्रिविधत्वात् त्रिष्वपि कालेषु विशेषमाह,—व्यभ्रे वर्षास्विति। व्यभ्रे वर्षास्विति। विगतानि अभ्राणि यस्मिन् दिने तद्व्यभ्रं दिनं। तस्मिन् व्यभ्रे दिने वर्षाकाले शिरां विध्येदित्यर्थः। ग्रीष्मकालेषु शीतल इति। तृतीयप्रहरोपरि इत्यर्थः। हेमन्तकाले इति। हेमन्तग्रहणं शीतकालोपलक्षणं। एतच्चात्ययिकव्याधि-

यथा कुसुम्भपुष्पेभ्यः पूर्व्वं स्रवति पीतिका।
तथा सिरासु विद्धासु दुष्टमग्रे प्रवर्त्तते॥
मूर्च्छितस्यातिभीतस्य श्रान्तस्य तृषितस्य च।
न वहन्ति सिरा विद्धास्तथानुत्थितयन्त्रिताः॥
क्षीणस्य बहुदोषस्य मूर्च्छयाभिद्रुतस्य च।
भूयोऽपराह्णे विस्राव्या सापरेद्युस्त्र्यहेऽपि वा॥
रक्तं सशेषदोषन्तु कुर्य्यादपि विचक्षणः।
नचातिप्रस्रुतं कुर्य्याच्छेषं संशमनैर्जयेत्॥
बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥ ४॥

तत्र पाददाहपादहर्षावबाहुकचिप्पविसर्पवातशोणितवात-

वशेन पुनः स्वस्थस्य तस्य हि शरदादिसाधारण एकैकः काल इति। सुविद्धशिरालक्षणमाह,—सम्यगिति। मुहूर्त्तमिति।—मुहूर्त्तशब्दः स्रवेदिष्टगित्यत्र च सम्बध्यते। इदानीं शिरायां विद्धायां सत्यां पूर्व्वं दुष्टमेव रक्तं प्रवर्त्तत इति दर्शयन्नाह, यथेति। शिराणां सम्यग्विद्धानां अवणे कारणं दर्शयन्नाह,—मूर्च्छितस्येति। अतिभीतादिषु अतिभयादिजनितवातेन शिरामुखनिरोधात्। अनुत्थितयन्त्रितानां शोणितस्य प्रवृत्तावभिमुखीभावात् न वहन्तीति। यद्यपि मदमूर्च्छाश्रमार्त्तानामित्यादिना सूत्रस्थानोदितेनायमर्थ उक्तस्तथापि प्रकरणान्तरत्वान्न पौनरुक्तं क्षीणस्यावश्य स्रावणीये शोणिते क्रमस्रवणं दर्शयन्नाह,—क्षीणस्येति। मूर्च्छयाभिहतस्येति अक्षीणस्यापीत्यर्थः। क्षीणेति स्रावणस्य बहुदोषकरत्वान्निषेधं कुर्व्वन्नाह,—रक्तमिति। प्रस्थं सार्द्धत्रयोदशपलानि, तथा चोक्तं।—"वमने च विरेके च तथा शोणितमोक्षणे। सार्द्धत्रयोदशपलं प्रस्थमाहुर्म्मनीषिणः" ॥ ४॥

इदानीं नियतदेहदेशगतरोगविशेषेण व्याध्यानां शिराणां देशविशेषं

काण्टकविचर्च्चिकापाददारीप्रभृतिषु क्षिप्रमर्म्मण उपरिष्टाद्‌-द्व्यङ्गुले व्रीहिमुखेन सिरां विध्येत्। श्लीपदे तच्चिकित्सिते यथा वक्ष्यते। क्रोष्टुकशिरःखञ्जपङ्गुलवातवेदनासु जङ्घायां गुल्फ-स्योपरि चतुरङ्गुले। अपच्यामिन्द्रवस्तेरधस्ताद्‌द्व्यङ्गुले। जानु-सन्धेरुपर्य्यधो वा चतुरङ्गुले गृध्रस्यां। ऊरुमूलसंश्रितानान्तु गलगण्डे। एतेनेतरसक्थिबाहू च व्याख्यातौ॥ ५॥

विशेषतस्तु वामबाहौ कूर्परसन्धेरभ्यन्तरतो बाहुमध्ये प्लीह्नि कनिष्ठिकानामिकयोर्म्मध्ये वा। एवं दक्षिणबाहौ यकृ-द्दाल्ये कफोदरे चैतामेव च कासश्वासयोरप्यादिशन्ति। गृध्र-स्यामिव विश्वच्यां। श्रोणिप्रतिसमन्ताद् द्व्यङ्गुले प्रवाहिकायां

नियमयन्नाह,—तत्रेति। प्रभृतिग्रहणादन्येऽपि पादरोगा रक्तानुबन्धिदोष-जाता गृह्यन्ते। श्लीपदेति। तच्चिकित्सिते यथावक्ष्यत इति श्लीपद-चिकित्सिते येन प्रकारेण वक्ष्यते। तथा श्लीपदशिरां विध्येदित्यर्थः। क्रोष्टुकशिर इति। क्रोष्टुकशीर्षादिषु वातवेदनासु जङ्घायां शिरां विध्येत्। तत्रापि प्रदेशविशेषज्ञानमाह,—गुल्फस्योपरीत्यादि। अपच्यामिति, अपच्यामिति उत्पन्नमात्रायामित्यर्थः। न तु रूढ़ायां तस्यां पार्ष्णिं प्रति द्वे दशबाङ्गुलानीत्यादिना चिकित्सितस्योक्तत्वात्। जानुसन्धेरिति। यस्मा-द्धस्तयोरपि दाहादयो रोगा भवन्त्यतो बाहुग्रहणं कृतं॥ ५॥

किं सर्व्वत्रैवसक्थिबाह्वोः समानः शिराव्यधः? आहोस्वित् कुत्रचिद्भिन्नं? इति दर्शयन्नाह,—विशेषत इति। कूर्परसन्धिरित्यत्र सन्धिसमीप उच्यते। सन्धौ शस्त्रप्रणिधानस्य निषिद्धत्वात्, एवं दक्षिणबाहौ यकृद्दाल्ये कफोदरे च। यकृद्दाल्य इति। यकृद्दाल्युदरस्य सर्व्वावस्थायामित्यर्थः। एतामेव च कास-श्वासयोरप्यादिशन्ति। एतामेव दक्षिणबाहुमध्याश्रितामित्यर्थः। कास-श्वासयोरिति कफोत्थयोः कफावृतमारुतजन्ययोर्व्वा। गयी तु कासश्वास-योरत्ययोर्म्मार्गविशुद्धर्थं। नतूद्रिक्तयोस्तत्र शिराव्यधप्रतिषेधस्य प्रागेव

शूलिन्यां। परिकर्त्तिकोपदंशशूकदोषशुक्रव्यापत्सु मेढ्रमध्ये। वृषणयो: पार्श्वे मूत्रवृद्ध्यां। नाभेरधश्चतुरङ्गुले सेवन्या वामपार्श्वे दकोदरे। वामपार्श्वे कक्षास्तनयोरन्तरेऽन्तर्विद्रधौ पार्श्वशूले च। बाहुशोषाववाहुकयोरप्येके वदन्त्यंसयोरन्तरे। त्रिकसन्धिमध्यगतां तृतीयके। अध:स्कन्धसन्धिगतामन्यतरपार्श्वसंस्थिताञ्चतुर्थके। हनुसन्धिमध्यगतामपस्मारे। शङ्ख-

प्रतिपादितत्वादिति व्याख्याति। गृध्रस्यामिव विश्वच्यां। यथा गृध्रस्यां जानुसन्धेरुपर्य्यधो वा चतुरङ्गुले। एवं विश्वच्यां कूर्परसन्धेरुपर्य्यधो वा चतुरङ्गुल इत्यर्थ:। शोणिमिति, शूलिन्यामिति कालेनानुबन्धभूतरक्तावृतवातकृतशूलयुक्तायामित्यर्थ:। परिवर्त्तकेति, परिवर्त्तिका इति, मर्द्दनात् पीड़नाद्वायुरित्यादि प्रोक्तलिङ्गा, वृषणयोरिति। सेवन्या वामपार्श्वे इति। सेवनीप्रदेशाद्वामपार्श्वे इत्यर्थ:। वामपार्श्वेति, वृद्धवाग्भटे तु विद्रधौ पार्श्वशूले च। पार्श्वकक्षास्तनान्तरस्था इति सामान्येनैव पार्श्वशब्दोपादानकृतं, तस्मादत्रापि वामपार्श्वग्रहणं दक्षिणपार्श्वोपलक्षणं। तेन दक्षिणपार्श्वे यदा शूलविद्रधौ भवतस्तदा दक्षिणपार्श्वे कक्षास्तनान्तरस्थां शिरां विध्येदित्यर्थ:। अस्याग्रे एतामेव कफोदर इति केचित् पठन्ति। सपाठो न सम्ज्ञात:। दक्षिणबाहौ यकृद्दाल्ये कफोदरे चेति। प्रागेव कफोदरे शिराव्यधस्य प्रतिपादितत्वात्। बाहुशोषाववाहुकयोरप्येके वदन्त्यंसयोरन्तरे। शोणितावृतवातजनितयोर्बाहुशोषाववाहुकयोरप्यसंयो: शिराव्यध:। न तु केवलवातकृतयोरप्येके वदन्त्यंसयोरन्तर इति पठित्वा व्याख्याति। बाहुशोषाऽववाहुकयोर्बाहुमध्ये कूर्परांसयोर्मध्ये इत्यर्थ:। मतान्तरमाह,—एके वदन्त्यंसयोरन्तर इति। ननु चान्यत्रावबाहुकादिति शिराव्यधप्रतिषेधात् कथमत्र शिराव्यधविहित:? नैवं। अन्यत्राववाहुकादित्यनेन वातव्याधिचिकित्सिताविचक्षणस्य प्रतिषेधो, न तु शिराव्यधस्येति। तत्रैव वातव्याधिचिकित्सिते वर्णयिष्याम:। बाहुशोषे च केवलानिलजेऽप्यवस्थावशात् शिराव्यध:। तथाह्युष्णाम्बुलवणादेर्वातहरस्योपयोगात् कुपितेन शोणितेना-

केशान्तसन्धिगतामुरोऽपाङ्गललाटेषु चोन्मादेऽपस्मारे च। जिह्वारोगेष्वधोजिह्वायां दन्तव्याधिषु च तालुनि तालव्येषु। कर्णयोरुपरिसमन्तात् कर्णशूले तद्रोगेषु च। गन्धाग्रहणे-नासारोगेषु च नासाग्रे। तिमिराक्षिपाकप्रभृतिष्वामयेषूप-नासिके लालाट्यामपाङ्ग्याञ्चैताएव शिरोरोगाधिमन्थप्रभृतिषु रोगेष्विति॥ ६॥

अत ऊर्द्ध्वं दुष्टव्यधनमनुव्याख्यास्यामः। तत्र दुर्व्विद्धाति-हतो यदा वेदनाकारी तत् शिराव्यध इति। त्रिकेति। अंसयोरन्तर इत्यत्रापि सम्बध्यते। तेनांसयोरन्तरे यस्त्रिकसन्धिः, तत्समीपगतां न पुनस्त्रिकसन्धिमध्यगतां त्रिकसन्धेर्म्मर्म्मत्वात्। अधःस्कन्धसन्धिगतामन्यतर-पार्श्वसंस्थिताञ्चात्यर्थके स्कन्धसन्धेरधोगतां दक्षिणपार्श्वयोरेकतरपार्श्व-संस्थितां शिरां विध्येदिति समुदायार्थः। हन्विति—हनुसन्धिमध्यगतां हनुसमीपसन्धिमध्यगतामित्यर्थः। शङ्केति—केचिदत्रोन्मादेऽपस्मारे चेति पठन्ति। तत्रापस्मारस्य पाठो न संगच्छेत्। तथाच वाग्भटः "उरोऽपाङ्ग-ललाटस्थामुन्मादेऽपस्मृतौ पुनः। हनुसन्धौ समुद्भूतां शिरां भ्रूमध्य-गामिनीमिति"। जिह्वेति—जिह्वारोगेषु कण्टकादिषु दन्तव्याधिषु कृमि-दन्तादिषु। तालुनीति। तालव्येष्विति तालुभवेषु विकारेषु कर्णयो-रिति। कर्णयोरुपरीति। अत्रोपरिग्रहणमधोनिवृत्त्यर्थं, विधुरमर्म्माश्रित-त्वादधोभागस्य कर्णमूल इति। रक्तावृतानिलजे इत्यर्थः। कर्णरोगद्वारे-णैव कर्णशूले प्राप्ते तदुपादानं। विशेषार्थं तद्रोगेषु कर्णरोगेषु। गन्धेति, नासारोगद्वारेणैव गन्धाग्रहणे प्राप्ते विशेषार्थमुपादानं। तिमिरेति, पाकोऽक्षिपाकः। उपनासिके नासासमीपस्थे शिरे। अपाङ्ग्या भ्रूपुच्छा-न्तस्थाः। एता एव शिरोरोगाधिमन्थप्रभृतिषु रोगेष्विति। प्रभृतिग्रहणात् क्षुद्ररोगे पठिता रूषिकादेरपि ग्रहणं। सर्व्वेषु पूर्व्वोक्तेषु रक्तानुबन्धजेषु रक्तजेषु वा शिराव्यधः। नान्यादृशेषु॥ ६॥

अत ऊर्द्ध्वमिति। दुष्टोव्यधो यासां ता दुष्टव्यधाः। कतिसंख्या इत्याह—

विद्धाकुञ्चिता पिच्चिता कुट्टिता प्रसुता अत्युदीर्णा अन्तेऽभिहता परिशुष्का कूणिता वेपिता अनुत्थितविद्धा शस्त्रहता तिर्य्यग्विद्धा अविद्धा अव्याध्या विद्रुता धेनुका पुनःपुनर्व्विद्धा शिरास्नाय्वस्थिसन्धिमर्म्मसु चेति विंशतिर्दुष्टव्यधाः।

तत्र या सूक्ष्मशस्त्रविद्धा न व्यक्तमसृक् स्रवति रुजाशोफवती च सा दुर्व्विद्धा। प्रमाणातिरिक्तविद्धायामन्तःप्रविशति शोणितं शोणितातिप्रवृत्तिर्व्वा सातिविद्धा कुञ्चितायामप्येवं। कुण्ठशस्त्रप्रमथिता पृथुलीभावमापन्ना पिच्चिता। अनासादिता पुनःपुनरन्तयोश्च बहुशः शस्त्राभिहता कुट्टिता। शीतभयमूर्च्छाभिरप्रवृत्तशोणित अप्रसुता। तीक्ष्णमहामुखशस्त्रविद्धा अत्युदीर्णा। अल्परक्तस्राविण्यविद्धा। क्षीणशोणितस्यानिलपूर्णा परिशुष्का। चतुर्भागावसादिता किञ्चित्प्रवृत्तशोणिता कूणिता। दुःस्थानबन्धनाद्वेपमानायाः शोणितसम्मोहो भवति सा वेपिता। अनुत्थितविद्धायामप्येवं। छिन्नातिप्रवृत्तशोणिता क्रियासङ्गकरी शस्त्रहता। तिर्य्यक्प्रणिहितशस्त्रा किञ्चिच्छेषा तिर्य्यग्विद्धा। बहुशः क्षता हीनशस्त्रप्रणिधानेनापविद्धा। अशस्त्रकृत्या अव्याध्या। अनवस्थितविद्धा विद्रुता। प्रदेशस्य बहुशोऽवघट्टनादारोहबाधा मुहुर्मुहुः शोणितस्रावा धेनुका।

विंशतिः। कथं विंशतिरित्याह,—दुर्व्विद्धेत्यादि। इदानीं दुष्टव्याधीनां विवरणमाह,—तत्रेति। अव्यक्तमिति अल्पतया अस्पष्टं अन्तःप्रविशतीति शरीराभ्यन्तरं प्रविशतीत्यर्थः। कुञ्चितायामिति कुटिलीभूतायामित्यर्थः। पृथुलीभावमापन्नेति कुण्ठशस्त्राभिपातेन चिप्पटतया प्रसरं प्राप्ता। अनासादिता अप्राप्ता, चतुर्भागासादितेति। चतुर्भागेन प्राप्ता। वेपमानाया इति कम्पमानायाः। शोणितमोहः शोणिताप्रवृत्तिः, छिन्नेति द्विधाभूता,

सूक्ष्मशस्त्रव्यधनाद्बहुशो विच्छिन्ना पुनःपुनर्व्विद्धा । स्नाय्वस्थि-शिरासन्धिमर्म्मसु विद्धा वा रुजां शोषं वैकल्यं मरणं वापादयति ॥ ७ ॥

भवन्ति चात्र ।

सिरासु शिक्षितो नास्ति चला ह्येताः स्वभावतः ।
मत्स्यवत् परिवर्त्तन्ते तस्माद्यत्नेन ताड़येत् ॥
अजानता गृहीते तु शस्त्रे कायनिपातिते ।
भवन्ति व्यापदश्चैता बहवश्चाप्युपद्रवाः ॥
स्नेहादिभिः क्रियायोगैर्न तथा लेपनैरपि ।
यान्त्याशु व्याधयः शान्तिं यथासम्यक् सिराव्यधात् ॥
सिराव्यधश्चिकित्सार्द्धं शल्यतन्त्रे प्रकीर्त्तितः ।
यथा प्रणिहितः सम्यग्वस्तिः कायचिकित्सिते ॥ ८ ॥

क्रियासङ्गकरीति गमनादिक्रियाविनाशकरी । प्रदेशस्येति शिराव्यधप्रदेशस्य, बहुशो घट्टनादिति बहून् वारान् ताड़नात् । आरोहद्व्यध उपर्य्युपरि आरोपितशस्त्रपदा । अतएव तैः शस्त्रपदैः । धेनुस्तनैरिव श्रवणात् धेनुका । बहुशोभिन्नेति एकस्थानएवेति शेषः । आशुव्यापत्सु प्रागेव व्यापत्कारणप्रतिषेधः । जातासु तत्कारणविपरीतगुणाचरणं । तत्कारण ये तेषु विकारेषु यथा स्वंशमनेन प्रशमनमिति ॥ ७ ॥

इदानीं शिराव्यधनेयत्वं दर्शयन्नाह,—भवन्तीति । शिक्षितोऽभ्यासेन निपुनः शिरासु नास्ति मत्स्यवच्चलात् । तस्मात्तद्व्यधेय यत्नोविधेय इत्यर्थः । इदानीं शस्त्रकर्म्मानिपुणवैद्याद्व्यापत्सम्भवं दर्शयन्नाह,—अजानता इति । इदानीं स्नेहादिकर्म्मणः शिराव्यधस्य गुणोत्कर्षं प्रतिपादयन्नाह,—स्नेहादिभिरिति । अधुना शिराव्यधस्य चिकित्सार्द्धत्वं दर्शयन्नाह,—शिरेति । चिकित्सार्द्धमिति, चिकित्सामिति, चिकित्सामध्ये प्रधानमित्यर्थः । अपरेऽर्द्धशब्दं संख्यावाचकमाहुः । मांसमेदोऽस्थिमज्जानः शोणितस्रावसेच-

तत्र स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासितसिराविद्धैः परिहर्त्तव्यानि क्रोधायासमैथुनदिवास्वप्नवाग्व्यायामयानोत्थनासनचंक्रमणशीतवातातपविरुद्धासात्म्याजीर्णान्याबललाभान्मासमेके मन्यन्ते। एतेषां विस्तरमुपरिष्टाद्वक्ष्यामः॥

भवतश्चात्र।

सिराविषाणतुम्बैस्तु जलौकाभिः पदैस्तथा।
अवगाढं यथापूर्व्वं निर्हरेद्दुष्टशोणितं॥
अवगाढे जलौका स्यात् प्रच्छन्नं पिण्डिते हितं।
सिराङ्गव्यापके रक्ते शृङ्गालावु त्वचि स्थिते॥ ९॥

नात्। धमनश्च विशुद्धान्ति दोषरक्तात्वचश्च ये। रसस्वेदाद्यनिष्यन्दाद्विशुद्धान्ति यः स्नाति वा वर्णः प्रसीदति त्वग्गतं रक्तं रक्तवहानि च॥ ८॥

इदानीं स्निग्धादिभिः पुरुषैः क्रोधादीनि सामान्येन परिहर्त्तव्यानीति दर्शयन्नाह,—तत्रेति। स्थानमूर्द्धभवनं आसनमुपवेशनं एतेषां क्रोधायासादीनां पञ्चदशानां उपरिष्टात् आतुरोपद्रवचिकित्सिते इदानीं शिराविषाणादीनां रक्तावसेचनोपयानां यथापूर्व्वं गुरुतां दर्शयन्नाह,—शिराविषाणेति। पदैः प्रच्छन्नैः अवगाढ़ं अभ्यन्तराश्रयं, यथापूर्व्वं पूर्व्वानतिक्रमेण एतेनोक्तानपदैरवगाढ़ं जलौकोभिरवगाढ़तरं तुम्बैरवगाढ़तमं विषाणेन सार्व्वाङ्गिकमगाढ़तमञ्च शिराभिरिति। तत्र शिराविषाण तुम्वजलौकः प्रच्छन्नानां विषयं कश्चिदाह,—अवगाढ़े जलौका स्यात्। प्रच्छन्नं पीड़िताेहितं शिरेति॥ ९॥

इति शारीरे निबन्धसंग्रहेऽष्टमोऽध्यायः।

नवमोऽध्यायः ।

अथातो धमनीव्याकरणं शारीरं व्याख्यास्यामः ।

चतुर्व्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः । तत्र केचिद्राहुः सिराधमनीस्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति । तत्तु न सम्यक् । अन्या एव हि धमन्यः

शिराव्यधविधिशारीरानन्तरं शिराधमनीश्रोतसां सदृशत्वाद्धमनी व्याकरणारम्भो युज्यत इत्याह,—अथेति । ध्मानादनिलपूरणाद्धमन्यः । तासां व्याकरणं यस्मिन् शारीर इति विग्रहः । तास्वतीतावेक्षणं निर्द्दिशन्नाह,—चतुर्विंशति इति । तत्र धमनीशिराश्रोतः स्वकीयमतं स्वमतेन हेतुमता निराकर्त्तुमाह,—तत्रेति । अविभागः पृथकत्वं सरणाच्छिरास्ताएव, ध्मानाद्धमन्यः, श्रवणात् श्रोतांसीति । अपृथक्त्वे स्वयमेव हेतुमाह,—शिराविकारा इत्यादि । शिराणामिवाकारान्तरेण परिणामः पिष्टविकारक्षीरविकारवत् पुनरपि तैरुक्तं आकाशीयावकाशानां देहे नामानि देहिनां । शिराश्रोतांसिमार्गाः खं धमन्यो नाड्य ईरिताः इत्यादि परमतोच्छेदमाह,—तत्तु न सम्यगिति । व्यञ्जनान्यत्वात् लक्षणान्यत्वात् । तत्र शिराणां वातादिवहानां अरुणनीलशुक्ललोहितवर्णत्वं लक्षणं । शब्दादिवहधमनीनां तु वर्णानुक्तेः स्वधातुसमवर्णत्वं । एवं श्रोतसामपि तदुक्तं चरके । स्वधातुससवर्णा निवृत्तस्थूलान्यनूनि च । श्रोतांसि दीर्घान्या कृत्येत्यादिकं मूलसन्नियमो द्वितीयोभेदो यथा । तासां मूलशिराश्चतुश्चत्वारिंशत् यावदेवमेतानि सप्तशिरा शतानि धमनीनान्तु चतुर्व्विंशति धमन्यः । श्रोतसां पुनः द्वाविंशति श्रोतांसि कर्म्मवैशेष्यं विशिष्टकर्म्मकरत्वं तच्च तृतीयभेदकारणं । तद्यथा कर्म्मणामप्रतीघातमित्यादिप्रोक्तं शिराणां कर्म्मवैशेष्यं शब्दरूपरसगन्धवहत्वादिकं धमनीनां प्राणान्नवारिरसशोणितमांसमेदो-

स्रोतांसि च सिराभ्यः कस्माद्वाञ्जनान्यत्वान्मूलसन्नियमात् कर्म्मवैशिष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् सदृशागम-कर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मणामप्यविभाग इव कर्म्मसु भवति ॥ १ ॥

तासान्तु नाभिप्रभवाणां धमनीनामूर्द्धगा दश दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः।

ऊर्द्धगाः शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुब्ध-

वाहित्वं स्रोतसां। आगमोऽत्र आयुर्व्वेदः स चतुर्थभेदहेतुः। तद्यथा। शिराधमन्यो योगवहानि स्रोतांसीति तथा मर्म्मशिरास्नायुधमनीः परिहर-न्नित्यादिषु शिरादीनां यदि विभक्तत्वं नावदिष्यत्। तदा पृथग्विवरणं नाकरिष्यदिति। इदानीमेतेषां शिराधमनीस्रोतसां परस्परभिन्नानामपि कर्म्मस्वविभाग इव भवतीति दर्शयन्नाह,—केवलेति। सन्निकर्षो नैकट्यं अविभाग इव अपृथकत्वमिव कर्म्मसु भवति। अतिसन्निकर्षादिहेतुचतुष्ट-येन कर्म्मसु पृथकत्वमिव भवति। कथं यथा अतिसन्निकर्षयुक्तीकृतानां तृणानां प्रत्येकं भिन्नज्वलनक्रियाणामभिन्नमिव ज्वलनं प्रतीयते। सदृशा-गमत्वादिति। आप्तानां वचनमागमस्तस्य सदृशत्वात्। तथा हि आका-शीयावकाशानां देहेनामान्न देहिनां। शिराः स्रोतांसिमार्गाः खं धमन्य इत्यादि। इत्याप्तोपदिष्टेन शिरादिसादृश्येन निर्द्धार्य्य ज्ञायते शिरादिषु कस्येदं तोयादिवहनं कर्म्मसदृशकर्म्मत्वाच्च यथा सह गायतां गायनानां भिन्ननीतक्रियाणामप्यभिन्नगीतक्रियां प्रतीतिः। सौक्ष्म्यात् यथा घटस्थित-मृत्परमाणूनां प्रत्येकमृदुकाहरणं कुर्व्वतामेकक्रियाकारित्वप्रतीतिः ॥ १ ॥

तासामिति—प्रश्वासोऽन्तः प्रविशद्वायुः। उच्छ्वास ऊर्द्धमुत्तिष्ठद्वायुः, जृम्भितं स्वप्नप्रकृतधमनी धर्म्मः। क्षुद्हसितकथितानि घोषभाषयोर्व्विशेषः। रुदितं अश्रुवाहिन्याः कर्म्म आदिशब्दात् रूपादिवाहिनी धमनीसम्बन्धिनां प्रेक्षि-तादि कर्म्मविशेषाणामवरोधः, तास्विति। शब्दादींश्चतुरः प्रत्येकं द्वाभ्यां

सितकथितरुदितादीन्विशेषानभिवहन्त्यः शरीरं धारयन्ति। तास्तु हृदयमभिप्रपन्नास्त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश शब्दरूपरसगन्धानष्टाभिर्गृह्णीते। द्वाभ्यां भाषते च द्वाभ्यां घोषं करोति द्वाभ्यां स्वपिति द्वाभ्यां प्रतिबुध्यते। द्वे चाश्रुवाहिन्यौ। द्वे स्तन्यं स्त्रिया वहतः स्तनसंश्रिते। ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः। तास्त्वेता स्त्रिंशत् सविभागा व्याख्याता एताभिरूर्द्धं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते याप्यन्ते च॥ २॥

भवति चात्र।

ऊर्द्ध्वङ्गतास्तु कुर्व्वन्ति कर्म्माण्येतानि सर्व्वशः।
अधोगमास्तु वक्ष्यामि कर्म्म तासां यथायथं॥

अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति।

द्वाभ्यामित्यष्टाभिः रजःप्रवर्त्तितात्मप्रयत्नप्रबोधमनोऽनुगताभिधमनीभिर्गृह्णीते। मनसश्चाणुत्वादेकत्वाच्च तासां युगपत्प्रवृत्तिर्नास्तीति तासां मध्ये या धमनी मनसानुयुज्यते। तयैव रूपादिष्वन्यतममात्मा गृह्णीते। न पुनर्युगपदेव रूपादिकं सर्व्वं सर्व्वाभिर्धमनीभिर्गृह्णीत इति। स्पर्शग्रहणं पुनरत्रैवाध्याये तिर्य्यग्गानां कर्म्म वक्ष्यति। भाषत इति। ताल्वादिस्थानव्यापारनिष्पादिता काराद्विवर्णव्यक्तियुक्तं शब्दं करोति। घोषश्च तद्विपरीतोऽव्यक्तः शब्दः। द्वाभ्यां स्वपिति तमो विषयाभ्यां तु बुध्यते। एताभिरूर्द्धं नाभेरुदराद्यो धार्य्यन्ते अङ्गादिभिः सहैताभिरुदरादीनां बन्धनेन दृढ़ीकृतत्वात् वातादिवहनैव चैताभिरेवा याप्यन्ते॥ २॥

भवतीति वाताद्यभिवहनमासां सामान्यं कर्म्म आर्त्तवादीनित्यादि शब्दात् अन्नतोयादीनां स्वीकारः। स्थानान्तरगतानां तासामेव कर्म्मतास्तु

तास्तु पित्ताशयमभिप्रतिपन्ना स्तत्रस्थमेवान्नपानरसं विपक्व-मौष्ण्याद्विरेचयन्त्योऽभिवहन्त्यः शरीरं तर्पयन्ति चोर्द्धगतानां तिर्य्यग्गतानां रसस्थानञ्चाभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विरे-चयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश द्वे अन्नवाहिन्यावन्त्राश्रिते तोयवहे द्वे मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभि-वहतो नारीणामार्त्तवसंज्ञं। द्वे वर्च्चोनिरसन्यौ स्थूलान्त्रप्रति-बद्धे। अष्टावन्यास्तिर्य्यग्गाणां धमनीनां स्वेदमर्पयन्ति। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याता एताभिरधोनाभेः

पित्ताशयमित्यादि। अभिप्रपन्ना अभिमुखं प्राप्ताः। विपक्वमौष्ण्यादिति अग्नेरिति शेषः। विरेचयन्त्य इति। यथा यथा विपक्वमशनरसन्तथा। पृथक् कुर्व्वन्त्य इत्यर्थः। अभिवहन्त्य इति। अभितः सर्व्वतो वहन्त्य-स्तर्पयन्ति प्रीणयन्ति। कथं पुनः सकलमेव शरीरन्तास्तर्पयतीत्याशङ्क्याह,— अर्पयन्तीत्यादि। कथमर्पयन्तीत्यत्रयुक्तिमाह,—रसस्थानं चाभिपूरयन्ति इति। अयमभिप्रायः आमपक्वाशये अधोनाभेरेवैवमन्नरसो वर्त्तुलीकृतो यथा रसस्थानस्य पूरणं ततश्चोर्द्धगाभिस्तिर्य्यग्गाभिश्च तत्र तत्रोपनीयते इति सकलशरीरतर्पणमधोगतानामेव कर्म्मरसस्थानञ्च हृदयं तत्पूरणञ्च तच्चि-ष्यादितरसपरम्परया न पुनः साक्षादेव। अधोगमत्वे नासागमनाभावात् हृदयगमनमेव नास्तीति तत्र मूत्रपुरीषस्वेदांश्च विरेचयन्ति पृथक् कुर्व्वन्ति पक्वान्नरसादिति शेषः। पित्ताशये कर्म्म तासां निर्द्दिश्याम पक्वाशयान्तरे निर्द्दिशन्नाह,—आमपक्वाशयान्तर इत्यादि। पचनं पक्वं भावेक्तः। तस्या-शयः पक्वाशयः। एतेनामस्य पच्यमानस्य यदन्तरं तत्रेत्यर्थः। आमपक्वाशय-स्तस्मादन्यत्र ते अन्नवाहिन्यौ अन्नाश्रितेन न हि पित्ताशये रसमूत्रपुरीष-भावेन विरिच्यमानस्य आहारस्यान्नभावोऽस्ति नापितो यस्य तोयभावना

पक्काशयकटीमूत्रपुरीषगुदवस्तिमेढ्रसक्थीनि धार्य्यन्ते याप्यन्ते च ॥ ३ ॥

भवति चात्र।

अधोगमास्तु कुर्व्वन्ति कर्म्माण्येतानि सर्व्वशः।
तिर्य्यग्गाः सम्प्रवक्ष्यामि कर्म्म तासां यथायथं ॥

तिर्य्यग्गानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्त्वसङ्ख्यायास्ताभिरिदं शरीरं गवाक्षितं विवद्धमाततञ्च तासां मुखानि रोमकूपप्रतिवद्धानि यैः स्वेदमभिवहन्ति रसञ्चापि सन्तर्पयन्त्यन्तर्व्वहिश्च तैरेव चाभ्यङ्ग-परिषिकावगाहालेपनवीर्य्याण्यन्तःशरीरमभिप्रतिपद्यन्ते त्वचि विपक्वानि तैरेव स्पर्शसुखमसुखं वा गृह्लाति। तास्त्वेताश्चतस्रो धमन्यः सर्व्वाङ्गगताः सविभागा व्याख्याताः ॥

भवतश्चात्र।

यथा स्वभावतः खानि मृणालेषु बिसेषु च।
धमनीनां तथा खानि रसो यैरुपचीयते ॥ ४ ॥

तेन तोयमत्र भविष्यती मूत्रस्य कारणभूतं पक्काहारविरेचकजं द्रवमयमुदकमिवोदकं। तदपि द्वे एव वहतः। तदुदकं वस्तिविवरप्राप्तं मूत्रमित्युच्यते। ते द्वे तु मूत्रवस्तिसम्बन्धएवमन्नमत्र भविष्यत् किट्टस्य कारणभूतं पक्काहारविरेकजं। घनमन्नमिवान्नं तदपि द्वे एव वहतः। तदेवोण्डुकप्राप्तं पुरीषमित्युच्यते ॥ ३ ॥

भवति चात्रेति। विभज्यन्ते स्वयमेव विभक्ता भवन्ति। गवाक्षितं जालकैरिव व्याप्तं रसञ्चेत्यादि रसं रसधातुं। अन्तरभ्यन्तरे यैर्मुखैः सम्यक् परिणताहाररसवाहिभिः सर्व्वतः सन्तर्पयन्ति। वहिश्च सन्तर्प्पयन्ति त्वचमिति शेषः। तैरेव चाभ्यङ्गादीनां वीर्य्याणि त्वचिभ्राजकेनाग्निना विप-

पञ्चाभिभूतास्त्वथ पञ्चकृत्वः पञ्चेन्द्रियं पञ्चसु भावयन्ति।
पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले ॥५॥

क्तानि शरीरान्तःप्रविशन्ति। तैरेव मनोनुगतैः सुखासुखरूपं स्पर्शं कर्म्मात्मा गृह्णीते। ताः सर्व्वाङ्गगताः स्पर्शग्रहणाय तद्गतं मनोपि सर्व्वाङ्ग-स्रोतोगतमेव। तेनोर्द्ध्वगानाञ्च नियतएव देशो भवति। यथा स्वभावत इति। खानि स्रोतांसि रसयेरुपचीयत इति। रसः प्रधानभूतः तेनान्य-दभ्यङ्गपरिषेकादिवीर्य्यं ॥ ४ ॥

इदानीं शब्दादिग्राहिणीनां स्वर्गस्थितिप्रलयेषु प्रकृतिभूतानाम-प्रकृतिभूतानाञ्च क्रियोपदेशमाह,—पञ्चाभिभूतेति। अस्यार्थः। भावयन्ति योजयन्तिकाः पञ्चाभिभूताः पञ्चभ्यो भूतेभ्योऽभिसमन्तात् भूताः शब्द-स्पर्शरूपरसगन्धैर्व्वा पञ्चभिरभिभूता व्याप्ताः। किम्वा आकाशपवन-दहनतोयभूमिभिरभिभूता व्याप्ता धमन्यः कं पञ्चेन्द्रियं कर्म्मपुरुषं केषु पञ्चसु श्रोत्रादिष्विन्द्रियाधिष्ठानेषु कथं पञ्चकृत्वः। पञ्चवारान् भावयन्ति योजयन्ति आयान्ति आगच्छन्ति। काः धमन्यः किं पञ्चत्वं। किं कृत्वा भावयित्वा संयोज्य किन्वत् पञ्चेन्द्रियं इन्द्रियपञ्चकं सूक्ष्मरूपं। केषु पञ्चस्वाकाशादिषु भूतेषु एतेनैतदुक्तं भवति आकाशादि पञ्चभूतसमुत्पन्ना धमन्यः कर्म्मपुरुषमिन्द्रियाधिष्ठानेषु पञ्चवारान् भावयन्ति ततश्च इन्द्रिय-पञ्चकमानकादिषु भूतेषु संयोज्य विनाशकाले धमन्यो विनाशं यान्ति अन्येतु पञ्चादिभूतान्यथ पञ्चकृत्व इति पठन्ति व्याख्यानयन्ति च। आदि-भूतानि आकाशादीनि पञ्चमहाभूतानि पञ्चेन्द्रियं कर्म्मपुरुषं पञ्चसु चक्षुरा-दिष्विन्द्रियाधिष्ठानेषु भावयित्वा संयोज्य तानि पञ्च आदिभूतानि विनाश-काले पञ्चत्वमायान्ति। अपरे तु पञ्चाभिभूतास्त्वथ पञ्चधावेति पठन्ति व्याख्यानयन्ति च भावयन्ति योजयन्तिकाः पञ्चाभिभूता धमन्यः आयान्ति किं पञ्चत्वं विनाशं? क्व विनाशकाले? किं कृत्वा? भावयित्वा संयोजकं पञ्चेन्द्रियं बुद्धीन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकञ्च। केषु शब्दादिषु वचनादिषु च स्वकीयेष्वर्थेषु। अथवा पञ्चानामाकाशपवनदहनतोयभूमीनां पृथगभि-

अत ऊर्द्धं स्रोतसां मूलविद्धलक्षणमुपदेक्ष्यामः। तानि तु प्राणान्नोदकरसरक्तमांसमेदोमूत्रपुरीषशुक्रार्त्तवत्रहानि ये-

मुख्येन भूताः सत्वरूपेण व्यवस्थिता धमन्यः पञ्चेन्द्रियं कर्म्मपुरुषं यथास्वं पञ्चसु चक्षुरादिष्विन्द्रियाधिष्ठानेषु भावयन्ति योजयन्ति। गयीत्वन्यथा आपातनिकां विधाय व्याख्याति। यथा रूपादिग्राहिणीनां धमनीनां पञ्चत्वात् पञ्चभिर्धमनीभिः पञ्चानामपि रूपादीनां युगपद्ग्रहणेन भवितव्यं। इत्याशङ्काह,—पञ्चाभिभूता इत्यादि। अस्यायमर्थः। पञ्चसु रूपादिषु पञ्चेन्द्रियं चक्षुरादिकं पञ्चधमन्यो भावयन्ति वेदयन्ति। स्वयं तावत् पञ्चेन्द्रियाणि रूपादिकं विदन्ति। तानि च पञ्चधमन्यस्तेषु वेदयन्ति। कथं पञ्चकृत्वः पञ्चवारान् न चैकवारमेव पञ्चापि धमन्यः पञ्चापीन्द्रियाणि पञ्चस्वपि रूपादिषु वेदयन्ति। तत्कुतः पुनरिति हेतुगर्भविशेषणमाह,—अभिभूताः अभिमुखं प्राप्ताः। केन मनसेति शेषः। कस्मात् कर्त्तृमनःपुरःसरेन्द्रियार्थग्रहणात् मन्ता हि शारीरे एकएव मनोप्येकमेव तेन मनसायैव धमनीशब्दादिवहासु धमनीष्वभिप्रपन्ना चैव धमनी स्वधर्म्मं ग्राहयन्ति मन्तारं नान्येति। यतो मनःपुरःसरैरेन्द्रियप्रवृत्तिः। इदानीं स्वस्थस्यैव रूपादिग्राहिणीत्वमासां न पुनरतिदोषाभिपन्नस्य मरणेपीत्याह,—पञ्चत्वमित्यादि। विशिष्टनाशकाले पञ्चत्वं यान्ति धमन्यः पाञ्चभौतिका विनाशकाले पृथक्पृथग्भूतभावेनावस्थानात् पञ्चतां गता उच्यन्ते। पञ्चेन्द्रियं पञ्चसु भावयित्वेति। पुनरत्यनुवादस्तेषां नियतस्वविषयग्राहित्वदर्शनार्थः। ग्रन्थान्तरे। "रसवहं न कुर्व्वन्ति धमन्यः सततं तथा। शब्दादिग्रहणोच्छ्वासनिःश्वासवचनानि च। भावयन्ति पृथक् पश्चात् प्रत्ययाः खलु पञ्चसु"। तत्संख्याकरणं यान्ति नाशकाले तु पञ्चतां शरीर हि गते तस्मिन् शून्यागारमचेतनं। पञ्चतत्वावशेषत्वात् पञ्चतां गत उच्यते ॥ ५ ॥

अत ऊर्द्धमिति। मूलस्य स्थूलत्वेन तद्विद्धलक्षणस्यैव साध्यासाध्यपरिच्छेदकरत्वात्तद्विद्धलक्षणव्याख्यानमेव प्रतिज्ञातं। स्वरूपन्तु स्वधातु-

प्वधिकार एकेषां बहूनि। एतेषां विशेषा बहवः। तत्र प्राण-वहे द्वे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यः। तत्र विद्धस्य क्रोशनविनमनमोहनभ्रमणवेपनानि मरणं वा भवति। अन्न-वहे द्वे तयोर्मूलमामाशयोऽन्नवाहिन्यश्च धमन्यस्तत्र विद्ध-स्याध्मानं शूलान्नद्वेषौ छर्दिपिपासान्ध्यं मरणञ्च। उदकवहे द्वे तयोर्मूलं तालुक्लोम च। तत्र विद्धस्य पिपासा सद्योमर-णञ्च। रसवहे द्वे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यस्तत्र विद्धस्य शोषः प्राणवहविद्धवच्च मरणं तल्लिङ्गानि च। रक्तवहे द्वे तयोर्मूलं यकृत्प्लीहानौ रक्तवाहिन्यश्च धमन्यस्तत्र विद्धस्य श्यावाङ्गता ज्वरो दाहः पाण्डुता शोणितातिगमनं रक्तनेत्रता चेति। मांसवहे द्वे तयोर्मूलं स्नायुत्वचं रक्तवहाश्च धमन्यस्तत्र विद्धस्य श्वयथुर्म्मांसशोषः सिराग्रन्थयो मरणं। मेदोवहे द्वे

समवर्णानि वृत्तस्थूलान्यनूनि च। स्रोतांसि दीर्घाण्या कृत्याप्रतानसदृशानि चेति तन्त्रान्तरात् च यन्त्राण्येव विद्धस्त्वाह,—तानित्यादि। प्राणा-दीनामार्त्तवान्तानामेकादशानां प्रत्येकवचमे द्वे द्वे स्रोतसी। अस्थिमज्ज-स्वेदवाहिषु स्रोतःसु सत्स्वाप्यनाधिकारः कथं तत्रास्थिवहानां सकलाना-मेव मेदोमूलं मज्जवहानाञ्च तेषां सकलान्येव अस्थिसकलशरीरगतानि न च सकलशरीरगतविद्धलक्षणं साध्यादिज्ञाननिश्चायकं एवं स्वेदवहाना-मपि केवलं स्वेदोमूलमिति पूर्व्वेनैव समानं अतः शल्यतन्त्रेषां मूलविद्ध-लक्षणानधिकारः। अमुमेवार्थं चेतसि कृत्वा आह,—येष्वधिकार इति। शल्यतन्त्र इति शेषः, कायचिकित्सायान्तु स्रोतोदुष्टिलक्षणं वाच्यं। तेन सकलाङ्गगतानामपि स्रोतसां कायचिकित्सायामधिकारः। शल्यतन्त्राधि-कारिषु नियतदेशस्थितेषु विद्धेषु वेदनाविशेषस्य साध्यादिज्ञाननिश्चायकत्व-मिति कायचिकित्साधिकारिणां स्रोतसां कृत्स्नशरीरगतत्वेन सूक्ष्माणां आश्रितस्य वेदनाविशेषस्य अतिसूक्ष्मत्वात्। न साध्यादिज्ञाननिश्चायकत्व-

तयोर्मूलं कटीवृक्कौ च तत्र विद्धस्य स्वेदागमनं स्निग्धाङ्गता तालुशोषः स्थूलशोफता पिपासा च। मूत्रवहे द्वे तयोर्मूलं वस्तिर्मेढ्रञ्च तत्र विद्धस्यानद्धवस्तिता मूत्रनिरोधः स्तब्धमेढ्रता च। पुरीषवहे द्वे तयोर्मूलं पक्वाशयो गुदञ्च तत्र विद्धस्यानाहो दुर्गन्धता ग्रथितान्त्रता च। शुक्रवहे द्वे तयोर्मूलं स्तनौ वृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको रक्तशुक्रता च। आर्त्तववहे द्वे तयोर्मूलं गर्भाशय आर्त्तववाहिन्यश्च धमन्यस्तत्र विद्धायां वन्ध्यात्वं मैथुनासहिष्णुत्वमार्त्तवनाशश्च। सेवनीच्छेदाद्रुजाप्रादुर्भावः। वस्तिगुदविद्धलक्षणं प्रागुक्तमिति। स्रोतोविद्धन्तु प्रत्याख्यायोपचरेदुद्धृतशल्यन्तु क्षतविधानेनोपचरेत्।

मिति तेषामनधिकारः। परमतमाह,—एकेषां बहूनि। एकेषामाचार्य्याणां मते बहूनि स्रोतांसि तान्यत्रानधिकृतानीति शेषः। एतेषां विशेषा बहवः। तेषां पूर्व्वोक्तानां प्राणादिवहानां स्नानां स्वतन्त्रे द्वाविंशतिसंख्योपेतानां स्रोतसां विशेषा भेदाः। तत्र प्राणवहेति। क्रोशनमार्त्तस्वरैरोदनं, विनमनं विशेषेण नमनं। अन्नवहे द्वे तयोरिति। त्वक्शब्देन रसोऽत्र तात्स्थ्यात्। मेदोवहेति। तयोर्मूलं कटीवृक्कौ च। तत्र वृद्धस्य स्वेदागमनं स्निग्धाङ्गता तालुशोषः स्थूलशोफता पिपासा च। मूत्रवहे द्वे। तयोर्मूलं वस्तिर्मेढ्रञ्च तत्र वृद्धस्यानद्धवस्तिता मूत्रनिरोधस्तब्धमेढ्रता च। पुरीषवहे द्वे। तयोर्मूलं पक्वाशयो गुदञ्च। तत्र विद्धस्यानाहो दुर्गन्धता ग्रथितान्त्रता च। शुक्रवहे द्वे तयोर्मूलं स्तनौ वृषणौ च। तत्र विद्धस्य क्लीवता। चिरात् वा प्रसेको रक्तशुक्रता च। आर्त्तववहे द्वे। तयोर्मूलं गर्भाशय आर्त्तववाहिन्यश्च धमन्यः। तत्र विद्धायां वन्ध्यात्वं मैथुनासहिष्णुत्वमार्त्तवनाशश्च। शुक्रवहस्रोत इति। चिकित्सिते वस्तिप्रसङ्गेनोक्तमत्रासूचितमपि मूत्रपुरीषस्रोतो मूत्रवस्तिगुदविद्धलक्षणाति-

मूलात् खादन्तरं देहे प्रसृतन्त्वभिवाहि यत्।
स्रोतस्तदिति विज्ञेयं सिराधमनिवर्ज्जितं॥ ६॥

देशेन सुखप्रतिपत्तये निर्द्दिशन्नाह,—सेवनीति। तत्र विद्धस्थानद्रवस्ति-तेत्यादि। गुदविद्धलक्षणञ्च तत्र विद्धस्थानाह,—इत्यादि। इदानीं चिकित्सासूत्रं निर्द्दिशन्नाह,—स्रोतोविद्धमिति। उपचरेदिति, शल्योद्धरण-प्रकारेणेति शेषः। उद्धृतशल्यमिति, अत्रापि प्रत्याख्यायेति योजनीयं। मूलादिति। मूलात् खादितहृदयच्छिद्रात् यत् अन्तरं इदन्तु प्रसृतं अभिवहनशीलं तत् स्रोतोविज्ञेयं॥ ६॥

इति शारीरे निबन्धसंग्रहे नवमोऽध्यायः।

अथ दशमोऽध्यायः।

अथातो गर्भिणीव्याकरणं शारीरं व्याख्यास्यामः।

गर्भिणी प्रथमदिवसात् प्रभृति नित्यं प्रहृष्टा शुच्यलङ्कृता शुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिन-विकृतहीनगात्राणि न स्पृशेद्दुर्गन्धदुर्द्दर्शनानि परिहरेदुद्वेज-नीयाश्च कथाः शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपभुञ्जीत

धमनीव्याकरणान्तरशुक्रार्त्तवस्रोतःसंकीर्त्तनात् शुक्रार्त्तवमूलस्य गर्भस्य प्राप्ताकृतेराश्रयभूतां गर्भिणीं व्याकर्त्तुं युज्यत इत्याह, अथातो गर्भिणीति। चैत्यं देवताधिष्ठितो वृक्षः। अन्ये वौद्धालयमाहुः। श्मशानं मृतमर्त्यदाह—स्थानं, पूर्व्वोक्तानि ऋतुमत्यां निषिद्धानि दिवास्वप्नादीनि। अपाश्रयोपेतं प्रतिवाहकसहितं। असम्बाधं असङ्कटं, विदध्यात् कुर्य्यात्। हृष्टादि-स्वरूपा नित्यं भवेत्। मलिनादि नस्पृशेदिति निषिद्धस्पर्शवर्ज्जनदुर्गन्धदुर्द्द-

वहिर्निष्क्रमणं शून्यागारचैत्यश्मशानवृक्षाश्रयान् क्रोधभयशङ्करांश्च भारानुच्चैर्भाष्यादिकं परिहरेद्यानि च गर्भं व्यापादयन्ति नचाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत न चायासयेच्छरीरं पूर्व्वोक्तानि च परिहरेत्। शयनासनं मृद्वास्तरणं नात्युच्चमपाश्रयोपेतमसम्बाधं विदध्यात्। हृद्यं द्रवं मधुरप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत् सामान्यमेतदाप्रसवात्॥ १॥

विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत। विशेषतस्तु तृतीये षष्टिकौदनं पयसा भोजयेच्चतुर्थे दध्ना पञ्चमे पयसा षष्ठे सर्पिषाचेत्येके। चतुर्थे पयोनवनीतसंसृष्टमाहारयेज्जाङ्गलमांससहितं हृद्यमन्नं भोजयेत्। पञ्चमे क्षीरसर्पिःसंसृष्टं षष्ठे श्वदंष्ट्रासिद्धस्य सर्पिषो मात्रां पाययेद्यवागूम्वा सप्तमे सर्पिः पृथकपर्ण्यादिसिद्धमेवमाप्यायते गर्भः। अष्टमे वदरोदकेन वलातिवलाशतपुष्पपललपयोदधिमस्तुतैललवणमदनफलमधुघृतमिश्रेणास्थापयेत् पुराण-

शनादिपरिहारेण निषिद्धगन्धरूपवर्ज्जनं। उद्वेजनीयाश्च कथा इत्यनेन निषिद्धश्रुतिवर्ज्जनं। शुष्कपर्य्युषितेत्यादिना निषिद्धरसवर्ज्जनं। वहिर्निष्क्रमणादिपरिहारेण कायःक्रियानियमः। क्रोधादिपरिहारेण मनःक्रियानियमः। उच्चैर्भाष्यादिपरिहारेण वाग्विषयनियमः। यानि च गर्भं व्यापादयन्ति गर्भावक्रान्तावुक्तानि ग्राम्यधर्म्मयानवाहनादीनि। विहारं नियम्याहारं नियमयन्नाह,—हृद्यं द्रव्यमित्यादि। हृद्यमोजस्यत्वात्, द्रवं जीवनीयत्वात्, मधुरं सकलशरीरधातूनां सात्म्यत्वादुपयोजनीयं। द्रवादीनामग्निमान्द्यहेतुत्वात्तत्प्रतीकारायाह,—दीपनीयसंस्कृतमिति॥ १॥

विशेषत इति अतिशयेनेत्यर्थः। परं मतमाह, स्वमतमाह,—तत्प्रकार-

पुरीषशुद्ध्यर्थमनुलोमनार्थञ्च वायोः। ततः पयोमधुरकषाय-
सिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखं प्रसूयते निरुप-
द्रवा च भवति। अतऊर्द्ध्वं स्निग्धाभिर्यवागूभिर्ज्जाङ्गलरसै-
श्चोपक्रमेदाप्रसवकालादेवमुपक्रान्ता स्निग्धा वलवती सुख-
मनुपद्रवा प्रसूयते। नवमे मासि सूतिकागारमेनां प्रवेशयेत्
प्रशस्ततिथ्यादौ तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेत-
रक्तपीतकृष्णेषु भूमिप्रदेशेषु विल्वन्यग्रोधतिन्दुकभल्लातक-
निर्म्मितं सर्व्वागारं यथासङ्ख्यं तन्मयपर्य्यङ्कमुपलिप्तभित्तिं
सुविभक्तपरिच्छदं प्रागद्वारं दक्षिणद्वारं वाष्टहस्तायतञ्चतुर्हस्त-
विस्तृतं रक्षामङ्गलसम्पन्नं विधेयं।

जाते हि शिथिले कुक्षौ मुक्ते हृदयवन्धने।
सशूले जघने नारी ज्ञेया सा तु प्रजायिनी॥

तत्रोपस्थितप्रसवायाः कटीपृष्ठं प्रति समन्ताद्वेदना भव-
त्यभीक्ष्णं पुरीषप्रवृत्तिर्मूत्रं प्रसिच्यते योनिमुखात् श्लेष्मा च।

प्रजनयिष्यमाणां कृतमङ्गलस्वस्तिवाचनां कुमारपरिवृतां
पुन्नामफलहस्तां स्वभ्यक्तामुष्णोदकपरिषिक्तामथैनां सम्भृतां
यवागूमाकण्ठात् पाययेत्। ततः कृतोपधाने मृदुविस्तीर्णे
शयने स्थितामाभुग्नसक्थीमुत्तानामशङ्कनीयाश्चतस्रः स्त्रियः
परिणतवयसः प्रजननकुशलाः कर्त्तितनखाः परिचरेयुरिति॥२॥

माह, चतुर्थे इति। पृथक् पर्ण्यादिर्व्विदारिगन्धादिः। अष्टमे इति। तत्र तस्मिन् प्रसवावसरे अरिष्टं सूतिकागृहमेवंभूतं विधेयमिति सम्बन्धः। जाते इति। सशूले जघने शूलायां कट्यां प्रजायिनी प्रसवमनाः। तत्रोपस्थित इति। अशङ्कणीयाः यासां लज्जाभयादिकं करोति गर्भिणी॥ २॥

अथास्या विशिखान्तरमनुलोममनुमुखमभ्यज्याद्ब्रूयाच्चै-नामेका सुभगे प्रवाहस्वेति नचाप्राप्तावीप्रवाहस्व ततो विमुक्ते गर्भनाड़ीप्रबन्धे सशूलेषु श्रोणिवङ्क्षणवस्तिशिरःसु प्रवाहेथाः शनैः शनैः। ततो गर्भनिर्गमे प्रगाढ़ं ततो गर्भे योनिमुखं प्रपन्ने गाढ़तरमाविशल्यभावात्।

अकालप्रवाहनाद्बधिरं मूकं व्यस्तहनुं मूर्द्धाभिघातिनं कासश्वासशोषोपद्रुतं कुब्जं विकटम्वा जनयति। तत्र प्रति-लोममनुलोमयेत्।

गर्भसङ्गे तु योनिं धूपयेत् कृष्णसर्पनिर्म्मोकेण पिण्डी-तकेन वा। बध्नीयाद्धिरण्यपुष्पीमूलं हस्तपादयोर्द्धारयेत् सुव-र्च्चलां विशल्याम्वा।

अथ जातस्योल्वं मुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तं

अथास्या इति। विशिखान्तरमपत्यमार्गमनुलोमलोमानुकूलं। अनुमुखं यथासुखं। एतां गर्भिणीं एका उत्कृष्टा अन्येलिका चतसृणां स्त्रीणां मध्य इति व्याख्यानयन्ति। प्रवाहस्वेति निरूहणं कुरु। वाहृप्रयत्न इत्यस्य धातोरात्मनेपदिनः प्रयोगः। आवी प्रसववेदना, ततो विमुक्ते इति। गर्भ-नाड़ीप्रबन्ध इति। गर्भनाड़ीनां प्रकृष्टो बन्धस्तस्मिन् स्वस्थानात् गर्भस्य निःसरणाय गमनं गर्भनिर्गमस्तस्मिन् गर्भनिर्गमे प्रगाढ़मित्यत्र प्रवाहेथा इति सम्बध्यते। आविशल्यभावादित्यत्र शल्याग्रहणं अमरासहितगर्भ-प्राप्त्यर्थं। अकालेति। व्यस्तहनुं विघटितमुखसन्धिं। जर्द्धाभिघातनं जर्द्ध-जत्रुगतरोगिणं। उपद्रुतं उपद्रुतैर्व्याप्तं। विकटं अयथास्थाननिवेशिता-वयवं। अप्रतिलोमेति प्राञ्जनमाकर्षेत्। प्रतिलोमताचानेकप्रकारा मूढ़-गर्भनिदानोक्तयादिशा ज्ञातव्या। अनुलोमयेदिति मूढ़गर्भचिकित्सितोक्त-प्रकारेणेत्यर्थः। गर्भसङ्गे चेति, हिरण्यपुष्पीकलिकारिका सुवर्च्चला सूर्य्य-भक्ता। विशल्या पाटला, अथ जात उल्वरायुं विशोध्य अपनीय। मुखञ्च

मुर्द्धि पिचुं दद्यात्ततो नाभिनाड़ीमष्टाङ्गुलायम्य सूत्रेण बद्धा छेदयेत्तत्सूत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग् बध्नीयात् ॥३॥

अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्म्मणि कृते मधुसर्पिरनन्ताब्राह्मीरसेन सुवर्णचूर्णमङ्गुल्यानामिकया लेहयेत्ततो बलातैलेनाभ्यज्य क्षीरवृक्षकषायेण सर्व्वगन्धोदकेन वा रूप्यहेमप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादोषं यथाविभवञ्च।

धमनीनां हृदिस्थानां विवृतत्वादनन्तरं।
चतूरात्राच्चिरात्राद्वा स्त्रीणां स्तन्यं प्रवर्त्तते ॥

तस्मात् प्रथमेऽह्नि मधुसर्पिरनन्तामिश्रं मन्त्रपूतं त्रिकालं

विशोध्य निर्म्मलीकृत्य तदपि मुखकण्ठगतजरायुकफापनयनेन। तदुक्तं "जरायुनामुखेच्छन्ने कण्ठे च कफवेष्टित" इति। ब्रह्मदेवघृताक्तमिति पदं परित्यज्य पिचुदद्यादित्यत्र बलातैलाक्तमिति शेषः। इति व्याख्याति। ततो नाभिनाड़ीति आयम्य आकृष्य ग्रीवायां सम्यग्बध्नीयात्। श्रावपरिहारार्थं। गयी तु गर्भनाड़ीमष्टाङ्गुलमायम्य नातिगाढ़ं नातिशिथिलमग्रे सूत्रेणाबध्य वर्द्धयित्वा कुष्ठतैलेन सिक्ताऽपत्यमाश्वस्य मधुसर्पिर्म्मिश्रं अङ्गुल्यानामिकया कनकचूर्णं लेहयेदिति पठन्ति ॥ ३ ॥

अथ कुमारमिति। आश्वास्य योनियन्त्रपीड़नमूर्च्छितं। अनन्तचूर्णं सुवर्णचूर्णं तेन मिश्रं मध्वादिलेहयेत्। चूर्णप्रमाणन्तु गुञ्जामात्रं, सर्व्वगन्धा एलादिका। कालानतिक्रमेण ईषदुष्णेन उष्णेन वा। दोषानतिक्रमेण क्षीरिवृक्षककषायेण पित्तघ्नेन सर्व्वगन्धोदकेन वा वातघ्नेन विभवानतिक्रमेण रूप्यहेमप्रतप्तेन वारिणा। सर्व्वगन्धोदकेन वा स्नापयेत्। अत्र केषुचित् पुस्तकेषु तु मधुसर्पिरनन्ता ब्राह्मीरसेन सुवर्णं चूर्णमङ्गुल्या अनामिकया लेहयेत्। अयं पाठो दृश्यते। परमसौ टिकाकारैर्न व्याख्यातः। वृद्धवाग्भटेनत्वन्यथा। प्राश नमभिहितं यथा ऐन्द्री ब्राह्मीशङ्खपुष्पी वचाकल्कं मधु-

पाययेद्द्वितीये लक्षणासिद्धं सर्पिस्तृतीये च। ततः प्राङ्निवारितः स्तन्यं मधुसर्पिः स्वपाणितलसम्मितं द्विकालं पाययेत् ॥ ४ ॥

अथ सूतिकां वलातैलाभ्यक्तां वातहरौषधनिःक्वाथेनोपचरेत् सशेषदोषान्तु तद्दहः पिप्पलीपिप्पलीमूलहस्तिपिप्पलीचित्रकशृङ्गवेरचूर्णं गुड़ोदकेनोष्णेन पाययेत्। एवं द्विरात्रं त्रिरात्रम्वा कुर्य्यादादुष्टशोणितात्। विशुद्धे ततो विदारिगन्धादिसिद्धां स्नेहयवागूं चीरयवागूम्वा पाययेत्त्रिरात्रं। ततो यवकोलकुलत्थसिद्धेन जाङ्गलरसेन शाल्योदनं भोजयेद्‌बलमग्निबलञ्चावेक्ष्य। अनेन विधिनाध्यर्द्धमासमुपसंस्कृता विमुक्ताहारचारा विगतसूतिकाभिधाना स्यात् पुनरार्त्तवदर्शनादित्येके ॥ ५ ॥

धन्वभूमिजातं सूतिकां घृततैलयोरन्यतरस्य मात्रां पाय-

घृतोपेतं रेणुमात्रं कुशाभिमन्त्रितं सौवर्णेनाश्वत्थपत्रेण वा मेधायुर्व्बलजननं प्राशयेत्। ततो ब्राह्मीवचानन्ताशतावर्य्यन्यतमचूर्णं चेति। मधुसर्पिर्म्मिश्रं सुवर्णचूर्णं कृतो लेहयितव्यं इत्याह,—धमनीनामिति। अनन्तमिश्रं अनन्तस्य सुवर्णस्य गुञ्जाप्रमाणेन मिश्रितं। मधुसर्पिषश्च मानं वक्ष्यमाणं स्वपाणितलसम्मितं त्रिकालं। पाययेत् इति बोद्धव्यं। ततो इत्यादि। ततश्चतुर्थे दिवसे प्रातर्म्मध्याह्नलक्षणे मधुसर्पिः प्राशयेत्। तदनन्तरं चतुर्थदिवसस्य तृतीयकालमारभ्य पञ्चमदिवसेषु यथेष्टं स्तन्यं वृद्धवाग्भटे च अनन्तामिश्रे मधुसर्पिषी इति पाठः तत्र चानन्ता दूर्व्वा व्याख्याताः ॥ ४ ॥

अथ सूतिकामिति। वातहरौषधानि भद्रदार्व्वादीनि उपचरेत्। पानपरिषेकादिभिरिति शेषः। सशेषदोषामित्यत्र दोषशब्दो रक्तवचनः। विशुद्धे तत इति। ततस्तृतीये चतुर्थे वा दिने विशुद्धे शोणिते विदारीगन्धादिक्वाथेन सिद्धां स्नेहबहुलां यवागूं अग्निबलमवेक्ष्य चीरयवागूं वा पाययेत्। एतेन विधिनेति। अध्यर्द्धमासं त्रीणि पक्षाणि ॥ ५ ॥

येत् पिप्पल्यादिकषायानुपानं स्नेहनित्या च स्यात्त्रिरात्रं पञ्चरात्रम्वा। बलवतीमबलां यवागूं पाययेत्त्रिरात्रं पञ्चरात्रम्वा। अतऊर्द्धं स्निग्धेनान्नसंसर्गेणोपचरेत् प्रायशश्चैनां प्रभूतेनोष्णोदकेन परिषिञ्चेत्। क्रोधायासमैथुनादीन् परिहरेत् ॥ ६ ॥

भवतश्चात्र।

मिथ्याचारात् सूतिकाया या व्याधिरुपजायते।

धन्वभूमिजातमिति, जाङ्गलदेशजातान्तु सूतिकां बुभुक्षुयुतां सात्म्यानुरोधेन घृतस्य तैलस्य वा मात्रामहःपरिणामिनीं पाययेत्। जीर्णे तु स्नेहे पूर्व्वौषधसाधितां मात्रया पेयां वा पाययेत्। स्नेहनित्या च स्यादभ्यङ्गादिषु कियन्ति दिनानि घृततैलयोरन्यतरमात्रां पाययेदित्याशङ्क्याह,—त्रिरात्रमित्यादि। बलवतीं बलयुक्तां सूतिकां। बलहीनायाश्च किं कर्त्तव्यमित्याशङ्क्याह,—अबलामित्यादि। पूर्व्वोक्तौषधसाधितां स्नेहयुक्तामिति शेषः। अत ऊर्द्धमित्यादि। स्नेहपानयवागूपानाभ्यां प्रेरितत्रिरात्र पञ्चरात्रादूर्द्धं स्निग्धेन पेयादि क्रमेण वह्नेर्ब्बलस्य च बृंहणार्थं वातजयार्थं चोपचरेत्। अत्रार्थे वृद्धवाग्भटः। अथ सूतिकां बलातैलेनाभ्यज्यात्। बुभुक्षिताञ्च पञ्चकोलचूर्णेन यवान्युपकुञ्चिकाचव्यचित्रकव्योषसैन्धवचूर्णेन वा युक्तामहःपरिणामिनीं यथासात्म्यं स्नेहमात्रां पाययेत्। स्नेहायोग्यां वातहरौषधक्वाथं ह्रस्वपञ्चमूलीक्वाथम्वा पीतवत्याश्च यमकेनाऽभ्यज्य वेष्टयेदुदरं वस्त्रेण तथा न वायुरुदरे विकृतिमुत्पादयति। अनवकाशत्वात्। जीर्णे तु स्नेहे पूर्व्वौषधैरेव सिद्धां विदार्य्यादिगणक्वाथेन वा क्षीरेण यवागूं सुस्विन्नां द्रवमात्रया पाययेदिति। अपरामपि प्रसूतामधिकृत्य सामान्येन क्रियाविशेषमाह,—प्रायशश्चैनामिति। एनां स्त्रियं परिषिञ्चेत् धारया गर्भक्षोभक्षतरक्तस्रवणार्थं वातजयार्थञ्च। आयासो व्यायामः। मैथुनं पुरुषसेवा, क्रोधादयः पञ्चदश आतुरोपद्रवचिकित्सितोक्ताः॥ ६ ॥

उक्ताहाराचारव्यतिक्रमेण किं भवतीत्याह,—मिथ्याचारादिति। अत्यप-

स कृच्छ्रसाध्योऽसाध्यो वा भवेदत्यपतर्पणात् ॥
तस्मात्तां देशकालौ च व्याधिसात्म्येन कर्म्मणा।
परीक्ष्योपचरेदेवं नैयमत्ययमाप्नुयात् ॥

अथापरापतन्त्यानाहाध्मानौ कुरुते तस्मात् कण्ठमस्याः केशवेष्टितयाङ्गुल्या प्रमृजेत्। कटुकालावुकृतवेधनसर्षपसर्पनिर्म्मोकैर्व्वा कटुतैलविमिश्रैर्योनिमुखं धूपयेत्। लाङ्गलीमूलकल्केन वास्याः पाणिपादतलमालिम्पेत्। मूर्द्ध्नि वास्या महावृक्षक्षीरमनुसेचयेत्। कुष्ठलाङ्गलीमूलकल्कं वा मद्यमूत्रयोरन्यतरेण पाययेत्। शालिमूलकल्कं वा पिप्पल्यादिं वा मद्येन सिद्धार्थककुष्ठलाङ्गलीमहावृक्षक्षीरमिश्रेण सुरामण्डेन वास्थापयेत्। एतैरेव सिद्धेन सिद्धार्थकतैलेनोत्तरवस्तिं दद्यात् स्निग्धेन क्षीणनखेन हस्तेनापहरेत्।

प्रजातायाश्च नार्य्या रूक्षशरीरायास्तीक्ष्णैरविशोधितं रक्तं वायुना तद्देशगतेनातिसंरुद्धं नाभेरधः पार्श्वयोर्व्वस्तौ वस्तिशिरसि वा ग्रन्थिं करोति। ततश्च नाभिवस्त्युदरशूलानि भवन्ति सूचीभिरिव निस्तुद्यते भिद्यते दीर्य्यत इव च पक्वाशयः। समन्तादाध्मानमुदरे मूत्रसङ्गश्च भवतीति मक्कल्लक्षणं। तत्र वीरतर्व्वादिसिद्धं जलमूषकादिप्रतीवापं पाययेत्। यव-

तर्पणादिति असाध्यभवने हेतुः तां सुतां देशकालौ परीक्ष्य व्याधिसात्म्यना कर्म्मणा। नित्यमुपचरेदिति सम्बन्धः। अत्ययो विनाशः, गयी तु देशकालौकव्याधिसात्म्येन कर्म्मणेति पठित्वा देशादिभिः सह पृथक् सात्म्यशब्दं सम्बध्नाति। ओकसात्म्यं अभ्याससात्म्यं ओकशब्दोयमुचकसमवाय इत्यनेन धातुना व्युत्पादित इति व्याख्याति। अथापरेति। कृतवेधनः कोशातकः। शालमूलकल्कमित्यत्र शालिमूलकल्कमिति केचित्। प्रजा-

क्षारचूर्णं वा पिप्पल्यादिक्काथेन पिप्पल्यादिचूर्णं वा सुरा-मण्डेन वरुणादिक्काथं वा पञ्चकोलैलाप्रतीवापं पृथक्पर्ण्यादि-क्काथं वा भद्रदारुमरिचसंसृष्टं पुराणगुडं वा त्रिकटुकचतु-र्ज्जातककुस्तुम्बुरुमिश्रं खादेदच्छं वा पिवेदरिष्टमिति ॥ ७ ॥

अथ वालं क्षौमपरिवृतं क्षौमवस्त्रास्तृतायां शय्यायां शाय-येत्। पीलुबदरीनिम्बपरूषकशाखाभिश्चैनं वीजयेत्। मूर्द्धि चास्याहरहस्तैलपिचुमवचारयेत्। धूपयेच्चैनं रक्षोघ्नैर्धूपैः। रक्षोघ्नानि चास्य पाणिपादशिरोग्रीवास्ववसृजेत् तिलातसी-सर्षपकणांश्चात्र प्रकिरेत्। अधिष्ठाने चाग्निं प्रज्वालयेत्। व्रणितोपासनीयञ्चावेक्षेत।

ततोदशमेऽहनि मातापितरौ कृतमङ्गलकौतुकौ स्वस्ति-वाचनं कृत्वा नाम कुर्य्यातां यदभिप्रेतं नक्षत्रनाम वा।

ततो यथावर्णं धात्रीमुपेयान्मध्यमप्रमाणां मध्यमवयसम-रोगां शीलवतीमचपलामलोलुपामकृशामस्थूलां प्रसन्नक्षीराम-

ताया इति। प्रजातायाः प्रजननशोणितसंजनितशूलं मक्कल्वः। अवरुद्ध-रक्तपाकजनितो विद्रधिरपि मक्कल्वः कार्य्ये कारणोपचारात् मक्कल्वचिकित्-सामाह,—तत्र वीरतर्व्वादिसिद्धमिति। जलं क्काथं। यवक्षारचूर्णं सुखो-दकेन मन्दाग्नौ कफप्रकृतीनां पिप्पल्यादिक्काथेन पिप्पल्यादिचुर्णं वा सुरा-मण्डो एवमन्येपि योगा दोषादीनवेक्ष्य योजनीयाः। अच्छं केवलं। अरिष्टमभयारिष्टादिकं ॥ ७ ॥

अथ वालमिति। अधिष्ठाने सूतिकागारे व्रणितोपासनीयं चावेक्षेत। तेन प्राक्शिर्षशयनमजस्रगदामादिसर्व्वमत्रापि तत्रोक्तं वेदितव्यं। रक्षोघ्नै-र्धूपैरिति वचादिभिः, क्षौमं दुकुलं। ततो दशमे इति। नक्षत्राणामिति। नक्षत्रदेवताकृतं नामेत्यर्थः। ततो यथावर्णामिति। यथावर्णामिति ब्राह्म-णस्य ब्राह्मणीं क्षत्रियस्य क्षत्रियामित्यादि। धात्रीमुपेयात् स्तनदायिनीं

लम्बौष्ठीमलम्बोर्द्धस्तनीमव्यङ्गामव्यसनिनीं जीववत्सां दोग्ध्रीं वत्सलामक्षुद्रकर्म्मिणीं कुले जातामतोभूयिष्ठैश्च गुणैरन्वितां श्यामामारोग्यबलवृद्धये बालस्य। तत्रोर्द्धस्तनी करालं कुर्य्यात् लम्बस्तनी नासिकामुखं छादयित्वा मरणमापादयेत्। ततः प्रशस्तायां तिथौ शिरःस्नातमहतवाससमुदङ्मुखं शिशुमुपवेश्य धात्रीं प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं धौतमीषत्परिस्रुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ॥ ८ ॥

चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिणः।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये ॥
पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने।
दीर्घमायुरवाप्नोतु देवाः प्राश्यामृतं यथा ॥

अतोऽन्यथा नानास्तन्योपयोगस्यासात्म्याद्व्याधिजन्म भवति। अपरिस्रुतेऽप्यतिस्तब्धस्तन्यपूर्णस्तनपानादुत्सुहितस्रोतसः शिशोः कासश्वासवमीप्रादुर्भावः। तस्मादेवं विधानं स्तन्यं न पाययेत्।

क्रोधशोकावात्सल्यादिभिश्च स्त्रिया स्तन्यनाशो भवति। अथास्याः क्षीरजननार्थं सौमनस्यमुत्पाद्य यवगोधूमशालि-

समीपं गच्छेत्, भिषक् बालग्राहकोवेति शेषः। श्यामा हि प्रायशः प्रचुरक्षीरा भवति। उक्तविपर्य्यासेन दोषस्य दिङ्मात्रं दर्शयन्नाह,—तत्रेत्यादि। इति शब्दोऽयमेवम्प्रकारे तेनान्येऽपि दोषा एवं प्रकाराः स्वयमप्युह्य ज्ञातव्याः ॥ ८ ॥

अभिमन्त्रणमाह,—चत्वार इति। नियतधात्र्या अभावे दोषं दर्शयन्नाह,—अतोऽन्यथेति। कुत ईषत् परिस्रुतं स्तन्यं पाययेदित्याशङ्क्य तद्विपर्य्यये दोषं वक्तुमाह,—अपरिस्रुत इति। उच्छ्रितस्रोतस इति।

षष्टिकमांसरससुरासौवीरकपिण्याकलशुनमत्स्यकशेरुकशृङ्गाटकबिसविदारिकन्दमधुकशतावरीनलिकालाबूकालशाकप्रभृतीनि विदध्यात्‌ ॥ ६ ॥

अथास्याः स्तन्यमप्सु परीक्षेत तच्चेच्छीतलममलं तनु शङ्खावभासमप्सु न्यस्तमेकीभावं गच्छत्यफेनिलमतन्तुमन्नोत्प्लवते न सीदति वा तच्छुद्धमिति विद्यात्तेन कुमारस्यारोग्यं शरीरोपचयो बलवृद्धिश्च भवति। नच क्षुधितशोकार्त्तश्रान्तप्रदुष्टधातुगर्भिणी ज्वरितातिक्षीणातिस्थूलविदग्धभक्ष्यविरुद्धाहारतर्पितायाः स्तन्यं पाययेन्नाजीर्णौषधञ्च बालं दोषौषधमलानां तीव्रवेगोत्पत्तिभयात्‌।

भवन्ति चात्र।

ध्यात्रास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति ॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः।
दूषयन्ति पयस्तेन शारीरा व्याधयः शिशोः ॥
भवन्ति कुशलस्तांश्च भिषक्‌ सम्यग्विभावयेत्‌।
अङ्गप्रत्यङ्गदेशेतु रुजा यत्रास्य जायते ॥

ऊर्द्ध्वपूरितस्रोतस इत्यर्थः। उत्सुहित स्रोतस इति पाठे तु ऊर्द्ध्वं सुहितमुद्गीर्णं स्रोतो यस्येति समासः। क्रोधशोक इति। अवात्सल्यममत्वं। आदिशब्दाल्लङ्घनव्यायामादयः। अथास्या इति। नालिका शाकविशेषः। नालिकेर इति क्वचित्‌ पाठः ॥ ६ ॥

अथास्याः स्तन्यमिति। अवसीदति वेत्यत्रापि निषेधः सम्बन्धनीयः। व्याधिस्वरूपं प्रतिपादयितुमशक्तानां बालानां रोगज्ञानोपायमाह,—अङ्गप्रत्यङ्गेति। तेषु च रोगेषु यथाविहितं यद्यदौषधं यत्र यत्र रोगे विहितं तत्तत्

मुहुर्म्मुहुः स्पृशति तं स्पृश्यमाने च रोदिति।
निमीलिताक्षो मूर्द्धस्थे शिरोरोगेन धारयेत्॥
वस्तिस्थे मूत्रसङ्गार्त्तो रुजा तृष्यति मूर्च्छति।
विण्मूत्रसङ्गवैवर्ण्यच्छर्द्याध्मानान्त्रकूजनैः॥
कोष्ठे दोषान् विजानीयात् सर्व्वत्रस्थांश्च रोदनैः॥

तेषु च यथाभिहितं मृद्वच्छेदनीयमौषधं मात्रया क्षीरपस्य क्षीरसर्पिषा धात्र्याश्च विदध्यात् क्षीरान्नादस्यात्मनि धात्र्याश्चान्नादस्य कषायादीनात्मन्येव न धात्र्याः। तत्र मासादूर्द्ध्वं क्षीरपायाङ्गुलिपर्व्वद्वयग्रहणसम्मितामौषधमात्रां विदध्यात् कोलास्थिसम्मितां कल्कमात्रां क्षीरान्नादाय कोलसम्मितामन्नादायेति॥ १०॥

येषां गदानां ये योगाः प्रवक्ष्यन्तेऽगदङ्कराः।
तेषु तत्कल्कसंलिप्तौ पाययेत शिशुं स्तनौ॥
एकं द्वे त्रीणि चाहानि वातपित्तकफज्वरे।

तत्र कुर्य्यात्। तदपि मृदु अतीक्ष्णं अच्छेदनीयं कफमेदसोरच्छेकारि। मात्रया वक्ष्यमाणया क्षीरसर्पिषा सह। बालस्य क्षीरसर्पिः सात्म्यत्वात्। धात्र्याश्च केवलमेव न क्षीरयुक्तं नापि सर्पिर्युक्तमित्यर्थः। क्षीरान्नादस्य पूर्व्ववत् क्षीरसर्पिषायुक्तं धात्र्यास्तु केवलमेव। तामेव यथा निर्द्दिशन्नाह—तत्र मासादूर्द्ध्वमिति। अङ्गुलिपर्व्वद्वयग्रहणसम्मितामिति क्षीराज्या लोड़ितौषधस्येति शेषः। तन्त्रान्तरे चान्यथाभिहितं। यथा प्रथमे मासि जातस्य शिशोर्भेषजरक्तिका। अवलेह्या तु कर्त्तव्या मधुक्षीरसिताघृतैः। एकैकां वर्द्धयेत्तावत् यावत् सम्वत्सरो भवेत्। तदूर्द्ध्वं मासवृद्धिः स्यात् यावत् षोड़शकाब्दिक इति॥ १०॥

प्रकारान्तरेणौषधोपप्रयोगमाह,—येषां गदानामिति। ज्वरे विशेष-

स्तन्यपायाहितं सर्पिरितराभ्यां यथार्थतः ॥
नच तृष्णाभयादत्र पाययेत शिशुं स्तनौ।
विरेकवस्तिवमनान्यत्रे कुर्य्याच्च नात्ययात् ॥
मस्तुलुङ्गक्षयादस्य वायुस्तात्वस्थिनामयेत्।
तस्य तृड्दैन्ययुक्तस्य सर्पिर्म्मधुरकैः शृतं ॥
पानाभ्यञ्जनयोर्योज्यं शीताम्बूद्वेजनन्तथा।
वातेनाध्मापितां नाभिं सरुजां तुण्डिसंज्ञितां ॥
मारुतघ्नैः प्रशमयेत् स्नेहस्वेदोपनाहनैः।
गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियां ॥
रसाञ्जनं विशेषेण पानालेपनयोर्हितं ॥

क्षीराहाराय सर्पिःपाययेत् सिद्धार्थकवचामांसीपयस्यापामार्गशतावरीसारिवाब्राह्मीपिप्पलीहरिद्राकुष्ठसैन्धवसिद्धं क्षीरान्नादाय मधुकवचापिप्पलीचित्रकत्रिफलासिद्धमन्नादाय द्विपञ्चमूलीक्षीरतगरभद्रदारुमरिचमधुविडङ्गद्राक्षाद्विब्राह्मीसिद्धं।—तेनारोग्यबलमेधायूंषि शिशोर्भवन्ति।

बालं पुनर्गात्रसुखं गृह्णीयान्नचैनं तर्ज्जयेत् सहसा न प्रति-

माह,—एकं एकमित्यादि। स्तन्यपायाहितं सर्पिः। इतराभ्यां क्षीराादान्नादाभ्यां यथार्थतो यथाप्रयोजनात् हितं सर्पिरित्यर्थः। न चेत्यादि। अत्रेति ज्वरे। अत्ययादिति विनाशकारकात् विकारादिहिनेत्यर्थः। तालुनिपतिते चिकित्सामाह,—मस्तुलुङ्गक्षयादिति। मस्तुलुङ्गो विलीनघृताकारा मस्तकमज्जा। मधुरकैः शृतं इति काकोल्यादिभिः पक्वं। शीताम्बूद्वेजनमिति। शीताम्बुचुलकैरासेचनात्। त्रासनं। वातेनाध्मापितमित्यादि पानालेपनयोर्गर्हितमित्यन्तं श्लोकद्वयं निबन्धसंग्रहकारेण पठितं। सर्पिः सात्म्यत्वाद्बालस्य स्वस्थेऽपि सर्पिरेव भैषजसिद्धं दर्शयन्नाह,—क्षीरेत्यादि।

बोधयेद्वित्रासभयात् सहसा नापहरेदुत्क्षिपेद्वा वातादिविघातभयान्नोपवेशयेत् कौजभयात् नित्यं चैनमनुवर्त्तेत प्रियशतैरजिघांसुः। एवमनभिहतमनास्त्वभिवर्द्धते नित्यमुदग्रसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति। वातातपविद्युत्प्रभापादपलताशून्यागारनिम्नस्थानगृहच्छायादिभ्यो दुर्ग्रहोपसर्गतश्च वालं रक्षेत्।

नाशुचौ विसृजेद्वालं नाकाशे विषमे नच।
नोष्ममारुतवर्षेषु रजोधूमोदकेषु च॥
क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा।
दद्यादास्तन्यपर्याप्तेर्व्वालानां वीक्ष्य मात्रया॥ ११॥

षण्मासञ्चैनमन्नं प्राशयेल्लघु हितञ्च। नित्यमवरोधरतश्च स्यात् कृतरक्षउपसर्गभयात्। प्रयत्नतश्च ग्रहोपसर्गेभ्यो रक्ष्या वाला भवन्ति।

पयस्या अर्कपुष्पी। इदानीं वाले परिजनस्य करणीयं निर्द्दिशन्नाह,—वालमित्यादि। अनुवर्त्तेत अनुकूलयेत्। प्रियशतैर्व्वेलिक्रीड़नकदानादिभिरित्यर्थः। अजिघांसुरिति अहन्तुमिच्छुः सन् वालग्राहक इति शेषः। उक्तप्रकारानुकूलने फलमाह,—एवमित्यादि। पादपलता नानागारेत्यत्र केचित् पादपलता नानागारे निम्नस्थाने गृहच्छायेति पठन्ति। नाशुचावित्यादि। विषमे निम्नोन्नतप्रदेशे स्त्रीस्तन्याभावे च क्षीरान्तरं निर्द्दिशन्नाह,—क्षीरसात्म्यतयेत्यादि। आस्तन्यपर्य्याप्तेरिति यावत्। स्तन्यस्य पुनः पर्य्याप्तिः परिसमन्ततो भावेन प्राप्तिर्भवति। अथवा यावत् स्तन्यपानस्य योग्यता तावदित्यर्थः॥ ११॥

अन्नदानकालमाह,—षण्मासेष्वित्यादि। गयी तु, षण्मासादिति पठित्वा षण्मासादूर्द्ध्वमिति व्याख्याति। नित्यमवरोधरत इति सततं परिजनावृतः अन्तःपुरस्थो वा। कृत रक्षाक्रियो भवेत्। कुतः कारणादि-

अथ कुमार उद्विजते त्रस्यति रोदिति नष्टसंज्ञो भवति नखदशनैर्धात्रीमात्मानञ्च परिणुदति दन्तान् खादति कूजति जृम्भते भ्रुवौ विक्षिपतूर्द्ध्वं निरीक्षते फेणमुद्वमति सन्दष्टौष्ठः क्रूरो भिन्नामवर्च्चादीनार्त्तस्वरो निशि जागर्त्ति दुर्व्वलो म्लानाङ्गो मत्स्यच्छुछुन्दरिमत्कुणगन्धो यथा पुरा धात्र्याः स्तन्यमभिलषति तथा नाभिलषतीति सामान्येन ग्रहोपसृष्टलक्षणमुक्तं विस्तरेणोत्तरे वक्ष्यामः॥ १२॥

शक्तिमन्तञ्चैनं ज्ञात्वा यथावर्णं विद्यां ग्राहयेत्। अथास्मै

त्याह,—उपसर्गभयात्। अस्यैवार्थस्य प्रयत्नकरणीयतां दर्शयन्नाह,—प्रयत्नतश्चेत्यादि। रक्ष्या इति। रक्षणीया इत्यर्थः। किं पुनर्ग्रहोपसर्गलक्षणं तदाह,—तस्य कुमारस्य पुरुषार्थसाधनं। शुष्कमाह,—वाताभिपन्न इत्यादि। वाताभिपन्नो गर्भः शुष्यति न तु पुनर्न्नवा नीलवत् मार्गावरोधात्तिष्ठति। गर्भशोषलक्षणं पुनः कुक्षेरपूरणं वातशोधनेनैव विहतौजस्त्वात्। गर्भोमन्दमेव चलति बृंहनीयैः पयोभिरिति बृंहणीयसंस्कृतैः क्षीरैरित्यर्थः। मांसवलैश्चेति चकारात्। नीलशण्डाकारसमुच्चयः। वृद्धकाश्यपे च शुष्कलक्षणमभिहितं यथा—गर्भनाद्यास्त्ववहनादल्पलाद्वा वलस्य च। चिरेनाप्याय्यते गर्भस्तनैवाकालभोजनात्। अकुक्षिपूरणे गर्भो मन्दमन्दएव च। अवक्रान्तजीवं जीवनोपगतं अतएवाकुथितमवतिष्ठेत्। शुक्रार्त्तवावरोधनो वायुरेव वेदनमाध्मापयति। तदाध्मानं कदाचित् यदृच्छया अनियतहेतुना उपासाम्लमलीनभूतं दृष्ट्वा नैगमेषेण वालग्रहेणाहृतमिति वदन्ति। वस्ताभिवमेव गर्भावस्था विशेषेण दर्शयन्नाह,—तमेवेत्यादि। तमेव वाताभिपन्नमेव पुनः पुनरभिषेकं कृत्वा प्रविलीनमते अल्पीभवन्तं नागोदरमिति कुरुते। तत्रेति नागोदरे। अपि शब्दात् नैगमेषेयहृतेपि लीनोक्तप्रतीकारः॥ १२॥

हेतुभूतां क्रियां निर्दिशन्नाह,—शक्तिमन्तश्चेत्यादि। शक्तिमन्तं विद्या-

पञ्चविंशतिवर्षाय द्वादशवर्षां पत्नीमावहेत् पित्र्यधर्म्मार्थकाम-प्रजाः प्राप्स्यतीति।

ऊनषोड़शवर्षायामप्राप्तः पञ्चविंशतिं।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥
जातो वा न चिरं जीवेज्जीवेद्वा दुर्ब्बलेन्द्रियः।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत्॥

अतिवृद्धायां दीर्घरोगिण्यामन्येन वा विकारेणोपसृष्टायां गर्भाधानं नैव कुर्व्वीत। पुरुषस्याप्येवम्बिधस्य त एव दोषाः सम्भवन्ति।

तत्र पूर्व्वोक्तैः कारणैः पतिष्यति गर्भे गर्भाशयकटीवङ्क्षण-वस्तिशूलानि रक्तदर्शनञ्च तत्र शीतैः परिषेकावगाहप्रदेहा-दिभिरुपचरेज्जीवनीयशृतक्षीरपानैश्च गर्भस्फुरणे मुहुर्म्मुहुस्तत्-सन्धारणार्थं क्षीरमुत्पलादिसिद्धं पाययेत्। प्रस्रंसमाने सदाह-पार्श्वपृष्ठशूलासृग्दरानाहमूत्रसङ्गाः स्थानात् स्थानञ्चोपक्रामति गर्भे कोष्ठे संरम्भस्तत्र स्निग्धशीताः क्रियाः। वेदनायां मह्-

र्ज्जनक्लेशचमं यथावर्णमिति। ब्राह्मणस्त्रयीं राजन्यो दण्डनीतिं वैश्यो वार्त्तामिति। विद्याग्रहणवत्परमपि कुमारस्य दृष्टादृष्टाकारणसाधनभूतं निर्द्दिशन्नाह,—अथास्मै इत्यादि। आवहेदिद्ध्यात् किमर्थमित्याह,—पित्रे-त्यादि। पित्तहितं कर्म्म पित्र्यं श्राद्धदानादि धर्म्मः श्रुतिस्मृतिविहितं यज्ञाद्यनुष्ठानं, अर्थः सुवर्णादिः। कामः स्वेषु विषयेषु इन्द्रियाणामानु-कुल्यतः प्रवृत्तिः। प्रजाः पुत्रपौत्रादयः, अप्राप्तपञ्चविंशतेरूणषोड़श-वर्षया सह संयोगे दोषं दर्शयन्नाह,—ऊनद्वादशवर्षायामित्यादि। अति-वृद्धादिष्वपि गर्भाधाननिषेधमाह,—पुरुषस्याप्येवंविधस्य गर्भाधानेऽनधि-कार इति शेषः। कुतो गर्भाधाननिषेध इत्याह,—एवमित्यादि। एतेन

सहाक्षुद्रसहामधुकश्वदंष्ट्राकण्टकारिकासिद्धं पयःशर्कराक्षौद्र-मिश्रं पाययेत् मूत्रसङ्गे दर्भादिसिद्धं। आनाहे हिङ्गुसौवर्च्चल-लशुनवचासिद्धं। अत्यर्थं स्रवति रक्ते कोष्ठागारिकागारमृत्-पिण्डसमङ्गाधातकीकुसुमनवमालिकागैरिकसर्ज्जरसरसाञ्जन--चूर्णं मधुनावलिह्याद्यथालाभं न्यग्रोधादित्वक्प्रवालकल्कम्वा पयसा पाययेदुत्पलादिकल्कम्वा कशेरुशृङ्गाटकशालूककल्कं वा शृतेन पयसोडुम्वरफलौदककन्दक्वाथेन वा शर्करामधुमधु-रेण शालिपिष्टं न्यग्रोधादिस्वरसपरिपीतं वा वस्त्रावयवं योन्यां धारयेत्। अथादृष्टशोणितवेदनायां मधुकदेवदारुपयस्यासिद्धं पयः पाययेत तदेवाश्मन्तकशतावरीपयस्यासिद्धं विदारि-गन्धादिसिद्धं वा वृहतीद्वयोत्पलशतावरी सारिवापयस्या-मधुकसिद्धं वैरं क्षिप्रमुपक्रान्ताया उपावर्त्तन्ते रुजो गर्भ-श्चाप्यायते ॥ १३ ॥

कुक्षिस्थः सविपद्यत इत्यादिवाक्यो सौवर्च्चलप्रक्षेपं। अत्यर्थं अवतिरक्ते असृग्दर इत्यर्थः। कोष्ठवदागारं कोष्ठागारं तेन चरति। कोष्ठागारिका महाकारिका कीटविशेषः। तद्गृहमृत्तिका औदकाः कन्दाः कसेरुशालुक-नदीमासकादयः। दृष्टशोणितायां रुजिचिकित्सां निर्द्दिश्यादृष्टशोणितायां रुजिचिकित्सां निर्द्दिशन्नाह,—अथादृष्टशोणित इत्यादि। पयस्या अर्क-पुष्पी। सिद्धं पयः पाययेदिति शेषः। अश्मन्तकः कर्व्वुदाकारः उपा-वर्त्तन्ते उपशमं यान्ति। गर्भश्चाप्याय्यते रक्तस्रुतिकर्षितः। एवं क्षिप्रमुप-क्रान्ते नीरुजाया उपावर्त्तन्ते गर्भः। प्राप्याय्यते चेति क्वचित् पाठः। तन्त्रा-न्तरे चोपविष्टकाख्योऽयं गर्भः कथितः। तथाच चरके। यस्याः पुनरुष्ण-तीक्ष्णोपयोगाद् गर्भिण्यामहति जातसारे गर्भे पुष्पदर्शनं योनिस्रावात् तस्यागर्भो वृद्धिं न प्राप्नोति कालान्तरमुपतिष्ठते सस्पदश्च भवति। तमुप-विष्टकमित्याचक्षते इति ॥ १३ ॥

व्यवस्थिते च गर्भे गव्येनोडुम्बरशलाटुसिद्धेन पयसा भोजयेत्। अतीते लवणस्नेहवर्ज्जाभिर्यवागूभिरुद्दालकादीनां पाचनीयोपसंस्कृताभिरुपक्रमेत यावन्तो मासा गर्भस्य तावन्त्यहानि। वस्त्यादरशूलेषु पुराणगुड़ं दीपनीयसंयुक्तं पाययेदरिष्टं वा। वातोपद्रवगृहीतत्वात् स्रोतसां लीयते गर्भः सोऽतिकालमवतिष्ठमानो व्यापद्यते तां मृदुना स्नेहादिक्रमेणोपचरेत्। उत्क्रोशरससंसिद्धामनल्पस्नेहां यवागूं पाययेत्। माषतिलविल्वशलाटुसिद्धान् वा कुल्माषान् भक्षयेन्मधुमाध्वीकं चानुपिवेत् सप्तरात्रं। कालातीतस्थायिनि गर्भे विशेषतः सधान्यमुदूखलं मूषलेनाभिहन्याद्विषमे वा याना-

व्यवस्थिते चेत्यादि—उडुम्बरस्य कोमलैः फलैः पक्केन क्षीरेण क्षीरपाकस्तु तन्त्रान्तराभिहितो यथा—"द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणं। क्षीरावशेषः कर्त्तव्यः क्षीरपाकेत्वयं विधिः"। अतीते इत्यादि, अतीते पतित इत्यर्थः। उद्दालकः आरण्यकोद्रवः, एतच्च यवागूदानं लङ्घनपूर्व्वं। तथाच वाग्भटः। "आमान्वये च तत्रेष्टं शीतं रुक्षोपसंहितं। उपवासो घनोशीरगूड़ूच्यवनुधानकाः। कथिताः सलिले पानं तृणधान्यादिभोजनमिति"। वस्त्यादरशूलेष्वित्यादि। दीपनीयसंयुक्तं पञ्चकोलचूर्णसंयुक्तं, अरिष्टमभयारिष्टादिकं। उक्त रक्तस्रुतिनिमित्तोपविष्टकप्रसङ्गेनापरां चिरकालस्थायिनीं गर्भविकृतिं दर्शयन्नाह,—वात इत्यादि। अतः प्रधानवाची तेन स्नेहप्रधानानुक्रमेणेत्यर्थः। पुनर्मृदुनेति मधुपानवर्ज्जितावचर्च्चितावचारणा स्नेहेनेति मन्यन्ते। तामेवावचरणां निर्द्दिशन्नाह,—उत्क्रोशरससंसिद्धामित्यादि। उत्क्रोशः कुररभेदः, अनल्पस्नेहां प्रभूतस्नेहां। अन्ये पुनरल्पस्नेहामिति पठन्ति तदसम्यक् यवाग्वा पचनाज्यार्थमुपयुज्यमानत्वात् परतन्त्रदर्शनाच्च। तदुक्तं चरके "यस्याः पुनर्गर्भः प्रसुप्तत्वान्नष्टो भन्यते। चांशेन गव्यशिखितास्रचूड़ातित्तिरीणामन्यतमस्य सर्पिष्मता रसेन प्रभूत-

समे सेवेत। वाताभिपन्न एव शुष्यति गर्भः स मातुः कुक्षिं न पूरयति मन्दं स्पन्दते च तं बृंहनीयैः पयोभिर्म्मांसरसैश्चोपचरेत्। शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाध्मापयत्युदरं तत्कदाचिद्यदृच्छयोपशान्तं नैगमेषापहृतमिति भाषन्ते। तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुस्तत्रापि लीनवत् प्रतीकारः॥ १४॥

अतऊर्द्ध्वं मासानुमासिकं वक्ष्यामः।
मधुकं शाकवीजञ्च पयस्या सुरदारु च।
अश्मन्तकस्तिलाः कृष्णास्ताम्रवल्ली शतावरी॥
वृक्षादनी पयस्या च लता चोत्पलसारिवा।
अनन्ता सारिवा रास्ना पद्मा मधुकमेव च॥
वृहत्यौ काश्मरी चापि क्षीरिशुङ्गास्त्वचो घृतं।
पृश्निपर्णी वला शिग्रु श्वदंष्ट्रा मधुपर्णिका॥

सर्पिषा वा भोजयेदिति। विम्बस्य कोमलफलैः सिद्धान्। एवं स्रोतसामवरोधहेतोर्व्वातस्य उपशमविधिमुक्त्वा वातोपशमहेतुभूतानां स्रोतसां विकाशार्थं विल्वं दर्शयन्नाह,—कालातीत इत्यादि। उत्क्रोशकुरकौ समावित्यमरः। पक्षिविशेष इत्यर्थः। मृदुना अतीक्ष्णेन तीक्ष्णस्य गर्भोपघातकरत्वात्। स्नेहादीन् इत्यत्रादिशब्दो न व्यवस्थावाची तीक्ष्णस्वेदस्य वमनविरेचनयोश्च गर्भोपघातकरत्वात्॥ १४॥

शाको महावृक्षः कर्कशपत्रः तस्य वीजं। पयस्या अर्कपुष्पी गयी तु पयस्यां क्षीरविदारीं क्षीरकाकोलीं वा ब्रुते। अश्मन्तकः कोविदारसदृशोऽम्लपत्रोऽम्ललोटक इति लोके। ताम्रवल्ली वामतरुणी मञ्जिष्ठामपरलताप्रियङ्गुः। अनन्ता उत्पलसारिवा, पद्मा पद्मचारिणी भार्गीमपरे। वृहत्यौ स्थूलफला चणकवृहती च। क्षीरिशुङ्गाः क्षीरिवृक्षाणां वटादीनां अविकसिताः प्रवालाः। मधुपर्णी मधुयष्टिका। यथासंख्यमिति प्रथममास-

शृङ्गाटकं विसं द्राक्षा कशेरु मधुकं सिता।
वत्सैते सप्तयोगा स्युरर्द्धश्लोकसमापनाः॥
यथासंख्यं प्रयोक्तव्या गर्भस्रावे पयोयुताः॥ १५॥
कपित्थवृहतीविल्वपटोलेक्षुनिदिग्धिकाः।
मूलानि क्षीरसिद्धानि पाययेद्भिषगष्टमे॥
नवमे मधुकानन्तापयस्यासारिवाः पिवेत्।
क्षीरं शुण्ठीपयस्याभ्यां सिद्धं स्याद्दशमे हितं॥
सक्षीरा वा हिता शुण्ठी मधुकं सुरदारु च।
एवमप्याय्यते गर्भस्तीव्रा रुक् चोपशाम्यति॥ १६॥

निवृत्तप्रसवायास्तु पुनः षड्भ्यो वर्षेभ्य ऊर्द्धं प्रसव-मानाया नार्य्याः कुमारोऽल्पायुर्भवति।

मारभ्य सप्तममासान् यावत् अनुक्रमेणेत्यर्थः। पयोयुता इति चूर्णादि-प्रयोगे एते योगाः पयसा युताः प्रयोज्या इत्यर्थः॥ १५॥

कपित्थेत्यादि। कपित्थादीनां मूलानि क्षीरसिद्धान्यष्टमे मासि नवमे मधुकादयः सारिवान्ताः क्षीरसिद्धाः पिवेत्। पयस्या क्षीरविदारी। दशमे मासि शुण्ठीपयस्याभ्यां क्षीरपाककल्पनया सिद्धं क्षीरं हितं भवेत्। अथवा सक्षीराः शुण्ठ्यादयः प्रशस्यन्ते वाग्भटेप्येतैः सिद्धं क्षीरं प्रतिपादितं तथाच "कपित्थविल्ववृहतीपटोलेक्षुनिदिग्धिकाः। मूलैः शृतं प्रयुञ्जीत क्षीरं मासे तथाष्टमे। नवमे शारिवानन्ता पयस्या मधुयष्टिभिः। योजयेद्दशमे मासि क्षीरसिद्धं पयस्यया"। अथवा यष्टिमधुकनागरामरदारुभिरिति। गयदासेन एते गर्भस्रावचिकित्सितयोगाः प्रागेव गर्भाप्यायन इत्यनन्तरं पठिताः॥१६

इदानीं पूर्व्वगर्भजन्मनो उत्तरगर्भजन्मविधिस्तमतिक्रम्य गर्भग्राहिण्या दोषं दर्शयन्नाह,—निवृत्तमित्यादि। एतेन षड्भ्योवर्षेभ्य ऊर्द्धं नवृत्तपिसवे-त्युच्यते। षट्सु षड्वयवेषु पञ्चचतुस्त्रिद्विवर्षेषु गर्भानुजननस्य जन्मकाल इति; कुतः पुनरस्याः कुमारोऽल्पायुर्भवति? उच्यते—गर्भाशयो योन्यादिदोषेण

अथ गर्भिणीं व्याध्युत्पत्तावत्यये छर्द्दयेन्मधुराम्लेनान्नोप-
हितेनानुलोमयेच्च संशमनीयञ्च मृदु विदध्यादन्नपानयोरश्नी-
याच्च मृदुवीर्य्यं मधुरप्रायं गर्भाविरुद्धञ्च गर्भाविरुद्धाश्च क्रिया
यथायोगं विदधीत मृदुप्रायाः॥ १७॥

भवन्ति चात्र।

सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा।
मत्स्याक्षकः शङ्खपुष्पी मधुसर्पिः सकाञ्चनं॥
अर्कपुष्पी मधु घृतं चूर्णितं कनकं वचा।
हेमचूर्णानि कैटर्य्यः श्वेता दूर्व्वा घृतं मधु॥

हि निवर्त्तते प्रसवः। तत्र तच्छोधनक्रियामन्तरेणाहारविहारादिगुण-मात्रेण यदृच्छोपगृहीताया योनिगर्भाशयादिषु अनिष्फुटितदोषेषु जातोऽल्पायुरेवेति। गर्भव्याघातकत्वेन निषिद्धाया वमनादिक्रियायाः क्वचिदत्ययकारिणि व्याधौ मृदुना द्रव्येण प्रतिप्रसवं निर्द्दिशन्नाह,—अथ गर्भिणीमित्यादि। अत्यये विनाशहेतौ अनुलोमयेच्चेति मधुराम्लेनान्नोपहितेनेति सम्बन्धः। आहारं नियमयन्नाह,—अश्नीयाच्चेत्यादि। विहारमप्यस्य नियमयन्नाह,—गर्भाविरुद्धा इत्यादि। यथायोगं अहीनातिमिथ्यायोगेनेत्यर्थः॥ १७॥

इदानीं योगान्तरैः सह कुमारस्य सुवर्णचूर्णं निर्द्दिशन्नाह,—सौवर्णमित्यादि। मत्स्याक्षको ब्राह्मी धूस्तूर इत्येके। अन्ये रक्तपुष्पमानूपं मत्स्याक्षक इति लोके प्रसिद्धमाहुः। अर्कपुष्पी पयस्या अर्कसदृशाः पयः पुष्पात्रभेव श्वेतदूर्व्वा विशेषणं केचिदचामाहुः। वृक्षजातिमन्ये, कैटर्य्यं पर्व्वतनिम्बः। केचित्तु सम्वत्सरं यावद्देते इति अपादकं वाक्यमपठित्वा मात्राज्ञानार्थं विल्वमित्युक्तं वाक्यमभिदधति, यथा—"विड़ङ्गफलमात्रन्तु जातमात्रस्य भेषजं एतेनैव प्रदानेन मासि मासि प्रवर्द्धितं। कोलाग्निमात्रं चीरादे दद्याद्भैषज्यकोविदः, चीरान्नादे कोलमात्रमन्नादे उदुम्बरोपममिति "सम्वत्सरं

चत्वारोऽभिहिताः प्राशाः श्लोकार्द्धेषु चतुर्ष्वपि ।
कुमाराणां वपुर्म्मेधाबलबुद्धिविवर्द्धनाः ॥ १८ ॥

इति सुश्रुत आयुर्व्वेदशास्त्रे
तृतीयं शारीरस्थानं समाप्तम् ।

यावदेते योगाः प्रयोज्याः । अन्ये द्वादशवर्षाण्याहुः । मात्रा उक्तैव गयी तु । प्राक्तनमात्रा प्रतिपादकवाक्यमपठित्वा मात्राज्ञानार्थं विश्वामित्रोक्तं वाक्यमभिदधाति । यथा—"विड़ङ्गफलमात्रन्तु जातमात्रस्य भेषजं एतेनैव प्रमाणेन मासि मासि प्रवर्द्धितं । कोलास्थिमात्रं क्षीरादे दद्याद्भैषज्य-कोविदः । क्षीरान्नादे कोलमात्रमन्नादे डुम्बरोपममिति" ॥ १८ ॥

इति भिषग्वर श्रीडल्वणविरचिते निबन्धसंग्रहे
तृतीयं शारीरस्थानं समाप्तं ।